सरस्वतीकण्ठाभरणम्

महाराजाधिराज-श्रीभोजदेवविरचितम् ।

पण्डितवर-श्रीरत्नेश्वरविरचितया

प्रथम-द्वितीय-तृतीयपरिच्छेदव्याख्यया

समलङ्कृतम् ।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण विरचितया

चतुर्थ-पञ्चम-परिच्छेदव्याख्यया

समुद्भासितञ्च ।

द्वितीयसंस्करणम् ।

कलिकातानगर्य्याम्

नारायणयन्त्रे

मुद्रितम् ।

ई १८९४ ।

Copy Right Reserved.

প্রকাশক—জীবানন্দবিদ্যাসাগর বি, এ,
২ নং রমানাথমজুমদারের ষ্ট্রীট কলিকাতা।

প্রিণ্টর—রসিকলাল পান
৭৫ নং কটন ষ্ট্রীট কলিকাতা।

सरस्वतीकण्ठाभरणम् ।

प्रथमः परिच्छेदः ।

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम् ।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे ॥ १ ॥

ग्रन्थारम्भे समुचितेष्टदेवतानमस्कारेण शिष्टाचारमनुवर्त्तते । ध्वनिरिति । यामधिष्ठात्री देवी द्योतमाना स्वप्रकाशशब्दब्रह्मरूपा भारती । कथमुपास्यते । सूक्ष्मादिभेदेन ध्वन्यादिभेदेन च विवक्षितो नमस्कारः शब्दब्रह्मणश्चतस्रोभिदा भवन्ति । सूक्ष्मा पश्यन्ती मध्यमा वैखरी चेति । तत्राऽविकारदशा सूक्ष्मा । साहि सर्वस्य प्राणापानान्तराखवर्त्तिनी विगतप्रादुर्भावतिरोभावा सम्यक्प्रयोगपरिशीलनात्मना कर्मयोगेन मननादिना ज्ञानयोगेन च सम्यगधिगम्यते । सेयमाकौर्य्यमाणाऽपि नित्यमागन्तुकैर्मलैः । अन्या कला हि सीमस्य नात्यन्तमभिभूयते । तस्यां विज्ञातमात्रायामधिकारो निवर्त्तते । पुरुषे षोड़शकले तामाहुरमृतां कलामिति । तस्य ब्रह्मणोऽनाद्यविद्यावशादादयः परिणामः पश्यन्तीरूपो जायते सहि वर्णाविभागादक्रमः स्वयंप्रकाशश्च । पूर्वापरे स्वावस्थे पश्यतीति पश्यन्तीत्युच्यते । ततः परमविद्योपादानादन्तःसङ्ख्यरूपक्रमवान् श्रोत्रग्राह्यवर्णाभिव्यक्तिरहितस्तृतीयः परिणामो मध्यमारूपो जायते । सा किल द्वयोः परिणामयोर्मध्ये सदा तिष्ठतीति मध्यमेत्युच्यते । अन्तरं दूरप्रसृतायामविद्यायां स्थानकरणप्रयत्नव्यज्यमानश्रोत्रसंवादिवीणादुन्दुभिनादपरिचयगङ्गादाव्यक्ताकारादिवर्णसमुदायात्मकस्तृतीयः परिणामो वैखरीरूपो जायते । विशिष्टं खमाकाशं राति प्रयच्छतीति विखरी देहेन्द्रियसङ्घातः । तथाच श्रुतिः । "नहवै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति । अशरीरं वा वसन्तं प्रियाप्रिये न स्पृशत इति" तत्र भवा वैखरीति । तदेतासामवस्थानामाद्यास्तिस्रो नित्या अतीन्द्रियाः । तदुक्तम् । स्थानेषु विहृते वायौ कृतवर्णपरिग्रहा । वैखरी वाक्प्रयोक्तॄणां प्राणवृत्तिनिबन्धना । केवलं बुद्ध्युपादानक्रमरूपाऽनुपातिनी ॥ प्राणवृत्तिमतिक्रम्य

निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतम्।
रसान्वितं कविः कुर्वन् कीर्त्तिं प्रीतिं च विन्दति ॥२॥

मध्यमा वाक् प्रवर्त्तते। अविभागात्तु पश्यन्ती सर्वतः संहृतक्रमा। स्वरूपज्योतिरेवान्तः सूक्ष्मा सा चानपायिनीति" श्रुतिरप्याह। "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहा त्रीणि निहितानेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" इत्यादिकमागमसमुच्चयादेवावसेयम्। का पुनस्सा वाचो यासामियमधिष्ठात्रीत्यत उक्तम्। ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयम्। यस्या इति। आस्पदमधिष्ठानमवच्छेदः। ध्वन्यादिभिरवच्छिन्ना परा वाक् तद्व्यवहारहेतुः। साहित्यप्रसिद्धाभिधानध्वननलक्षणव्यवहारकारित्वमेकस्मिन् वर्णे न निरूप्यते इति बहुवचनम्। पदवाक्ययोरस्ति प्रत्येकमपि तथाभाव इति ताभ्यामेकवचनमुपात्तम्। तदयमत्र तात्पर्यसङ्ग्रहः। साहित्यस्वरूपनिरूपणाय किलैषग्रन्थारम्भः। साहित्यं च शब्दार्थयोः सम्बन्धः। तत्र शब्द एव क इत्यपेक्षायामयं विभागोध्वनिरित्यादिः। अर्थस्तु स्तम्भकुम्भादिलक्षणो लोके शास्त्रे च प्रसिद्धः। सम्बन्धः कश्चिदनादिः। सर्वस्यायमानस्तु सम्बन्धो नान्यत्रेत्यस्मिन् नायतते। स चतुर्विधः। दोषहानं गुणोपादानमलङ्कारयोगो रसाभियोगश्चेति ॥ १ ॥

प्रेक्षावत्प्रवृत्त्यङ्गसम्बन्धप्रयोजने दर्शयति निर्दोषमिति। प्रीतिः सम्पूर्णकाव्यार्थस्वादसमुत्थ आनन्दः काव्यार्थभावनादशायां कवेरपि सामाजिकत्वाङ्गीकारात्। सहृदयश्लाघया वा प्रीतिस्तदृष्टं प्रयोजनम्। कीर्त्तिरदृष्टद्वारा स्वर्गफलत्वदृष्टम्। यदाह कीर्त्तिं स्वर्गफलामाहुरिति। अङ्गिनः काव्यस्य प्रयोजनान्वाख्यानेनाङ्गभूतस्यास्य प्रयोजनसम्बन्ध उक्तः। यद्यपि काव्यशब्दो दोषाभावादिविशिष्टावेव शब्दार्थौ ब्रूते तथापि लक्षणया शब्दार्थमात्रे प्रयुक्तः। लक्षणाप्रयोजनं चाभिधेयानामुद्देशः। त्रिधाहि शास्त्रशरीरम्। उद्देशो लक्षणं परीक्षा चेति। उदाहरणव्याख्यानग्रन्थः सर्वत्र परीक्षापर इत्यस्मद्गुरवः। प्रयोजनाभिसम्बन्धपरादेवोद्देशो लभ्यते इति न विरोधः। अतएव दोषाद्युद्देशक्रमेण परिच्छेदाः। निर्दोषं दोषात्यन्ताभाववत्। अवयवैकदेशवर्त्तिना स्त्रियेव कामिनीशरीरस्य वर्णमात्रगतेनापि दोषेण काव्यवैरस्यनियमात्। अतएवामङ्गलप्रायाणामपि दोषाणां प्रथममुपादानम्। अयमेव हि प्रायः कवेर्व्यापारो यद्दोषहानं नाम। गुणवदिति। भूम्निप्रशंसायां वा मतुप्। अलङ्कृतमित्येव वक्तव्ये अलङ्कारैरिति प्रसिद्धालङ्कारपरिग्रहार्थम्। तथालङ्कारैरित्येव वाच्ये प्रसिद्धानामपि वक्ष्यमाणानामेवोपादानार्थमलङ्कृतपदम्। रसान्वितं रसेन नित्यसम्बद्धम्। नास्येव तत्काव्यं यत्र

दोषाः पदानां वाक्यानां वाक्यार्थानां च षोड़श।
हेयाः काव्ये कवीन्द्रैर्ये तानेवादौ प्रचक्ष्महे॥
असाधु चाप्रयुक्तं च कष्टं चानर्थकं च यत्।
अन्यार्थकमपुष्टार्थमसमर्थं तथैव च॥
अप्रतीतमथ क्लिष्टं गूढं नेयार्थमेव च।
सन्दिग्धं च विरुद्धं च प्रोक्तं यच्चाऽप्रयोजकम्॥
देश्यं ग्राम्यमिति स्पष्टाः दोषाः स्युः पदसंश्रयाः॥ ३॥
अथैषां लक्षणं सम्यक् सोदाहरणमुच्यते।
शब्दशास्त्रविरुद्धं यत् तदसाधु प्रचक्षते॥

परम्परयापि विभावादिपर्य्यवसानं न भवतीति काश्मीरकाः। एतेन काव्यलक्षणमपि कटाक्षितम्। ईदृशं काव्यं तत्कुर्वन् कविरिति कवेरपि लक्षणमिति॥ २॥

अथोद्देशक्रमेण दोषाणां सामान्यलक्षणं विभागं चाह। दोषाः पदानामिति। हेया इत्यनेन सामान्यलक्षणम्। ये हेयास्ते दोषा इत्यभिप्रायात्। अभिमतप्रतीतिव्यवधायकतया विघ्नभूतः शब्दकाव्ये हेयतामापादयति स एव दोषः। अयमेवार्थो मुख्यार्थहतिर्दोष इति पदेन अन्येषामभिमतः। स च पदवाक्यवाक्यार्थविषयतया पूर्वं त्रिविधः। पदपूर्वकत्वात् वाक्यस्य तत्पूर्वकत्वाद्वाक्यार्थस्य युक्तः क्रमः। वर्णमात्रदोषो नोल्लिखीत्युपेक्षितवान्। षोड़शेति। काव्यप्रकाशकारादिभिरुक्तानामधिकानामिहान्तर्भावः। अनन्तर्भावेतु दोषत्वमेव नास्तीत्यभिप्रायो न तु देशीरागन्यायेन स्वमतप्रकाशनम्। प्रतीतिव्यवधायकानां सर्वदा तद्रूपत्वात्। उक्तमेवाभिसन्धानं तानेवादाविति विभागमन्तरेण विशेषलक्षणानवतारात् पददोषान् विभजते। असाध्विति। मुख्यार्थहतौ सिद्धोऽनपेक्षासूचनया समासः। अतएव लाघवेऽनादरः। कथं पदप्रतीतादोषा न गण्यन्त इति शङ्कामभिप्रेत्याह। स्पष्टा इति। पदसंश्रयाः पदान्वयव्यतिरेकानुविधायिनः॥ एवं वाक्यादावपि गुणादावपीदमेवाश्रितत्वम्॥ ३॥

विभागप्रयोजनमाह। अथैषां लक्षणमिति। परीक्षां प्रतिजानीते। सम्यगिति।

यथा। भूरिभारभराक्रान्त बाधति स्कन्ध एष ते।
तथा न बाधते स्कन्धो यथा बाधति बाधते॥

अत्र बाधतेरात्मनेपदित्वाद्बाधत इति स्यान्न पुनर्बाधतीति।

कविभिर्न प्रयुक्तं यद् अप्रयुक्तं तदुच्यते।

यथा। कामचीकमथाः केमौ त्वामजिह्वायकीयिषन्।
ससस्ति किं वचन्तीमे शब्बः कम्बं घरिष्यति॥

अत्राचीकमथा अजिह्वायकीयिषन् सस्तिवचन्ति घरिष्यति शब्बः कम्बमिति शब्दानुशासनसिद्धान्यपि कविभिर्न प्रयुज्यन्ते॥ ४॥

लक्षणदोषशून्यं लक्षणानुपपत्तिनिर्णेजनमेव हि परीक्षापदार्थः। कथमेतत् सम्पद्यत इत्यत आह। सोदाहरणमिति। शब्दस्वरूपलक्षणः प्रथमनिरस्योदोष इत्याशयेन प्रागुद्दिष्टस्यासाधोर्लक्षणमाह। शब्देति। शब्दाः शिष्यन्ते प्रकृतिप्रत्ययविभागपरिकल्पनया ज्ञाप्यन्ते येन तच्छब्दशास्त्रं त्रिमुनिव्याकरणं तेन विरुद्धं तदा मातप्रातिखिकविशेषपरित्यक्तमतो न देशीयपदानामसाधुत्वम्। तथाच प्राचैर्नाधते कुचयुगं पचाहतं मा कृथा इति अन्यकारकवैयर्थ्यमिति "सलीलपाणिद्वयलीलनालमानर्त्तितातामदलं दधन्तीमिति च तादृशमेवोदाहृतम्। अत्र केचिदाहुः। बाधतिधातुं संस्कारप्रच्यावनेन बाधते इति बाधतिबाधस्य सब्बोधनं बाधति बाधिति ते तव वचनमिति शेष इति। तदसत्। नेयार्थत्वप्रसङ्गात्। अन्येतु बाधतिर्बाधते यथेति पठन्ति। इदं तत्त्वम्। विद्यमानस्याप्यर्थवत्त्वस्याविवक्षायां गवित्यथमाहेत्यादाविव प्रातिपदिकसंज्ञा न प्रवर्त्तते। कविभिरिति। अस्ति हि किञ्चित् पदं यत्राप्रयोज्यत्वेनैव ज्ञेयता। यद्येवं लोके प्रयुज्यमानस्य साधुतैव प्रसक्ता इत्यत उक्तं कविभिरिति। काव्ये यस्या प्रयोज्यत्वमेव दुष्टत्वबीजं तदित्यर्थः। तथाभूता च पदजातिरलङ्कारकारसमयादवसीयते। तथाचैकेन पुन्देवतशब्दोऽपरेण चीर्णशब्द उदाहृतः। एवमन्यदप्यप्रयुक्तमित्याशयवान् किञ्चिदुदाहरति। कामचीकमथा इति। उदाहरणत्वान्नैकोऽत्र श्लोको गवेष्यः। एकपदमात्रप्रयोगस्तु त्याज्यः समग्रविरोधाभावादित्याराध्याः। अचीकमथा इति कमेर्णिङन्तस्य लुङि चङि द्विर्वचनसन्वद्भावदीर्घत्वङ्गस्वत्वणिलोपेषु रूपम्। का

पदं श्रुतेरसुखदं कष्टमित्यभिशब्दितम्।

यथा। वर्वर्षि जलदो यत्र यत्र दर्दृष्टि चातकः॥

पोफुल्लतिनीपः कालोऽयं चर्कर्त्ति हृदयं मम।

अत्र वर्वर्ष्यादीनि क्रियापदानि श्रुत्यसुखदानि श्रूयन्ते॥ ५॥

पादपूरणमात्रार्थमनर्थकमुदाहृतम्॥

यथा,—बिभर्त्ति यश्च देहार्द्धे प्रियामिन्दुं हि मूर्द्धनि।

जायिका कामितवानसीत्यर्थः। अमी च के त्वामात्मनोह्वायकमेषितुमिष्टवन्तः। ह्वायकशब्दात् क्यच्। ततः सन्। ततो लङि अजिह्वायकीयिषन्निति रूपम्। सः कश्चित् सन्ति। स्वपितिषससन्तिस्वप्ने इति धातोःरूपम्। कम्बः शम्बमिति। कंशं शब्दौ जलवाचकौ ताभ्यां कंशं भ्यां वभयुस्तितुतय स इति मत्वर्थीयो वप्रत्ययः। तत्रायेन जलधरो जलाशयं सेक्ष्यतीत्यर्थः। शम्बः कम्बमिति क्वचित्पठ्यते। तत्र कल्याणवान् कपालिनं सेक्ष्यतीत्यर्थो बोद्धव्यः। षृसेचन इत्यस्य धातोर्घरिष्यतीति रूपम्। सहि धातुर्घृतघृणाघर्मेभ्यो नान्यत्र युज्यत इति पूर्वाचार्याः। कविभिरित्यनेनासाधुशब्दा व्यावर्त्तितेत्याह। शब्दानुशासनसिद्धान्यपीति॥ ४॥

पदमित्यादि। दुर्वचकवर्णारब्धपदं कष्टोच्चारणीयतया कष्टमुच्यते। श्रुतेरसुखदमिति। दूषकताबीजोद्घाटनम्। कदर्थिताहितेन श्रुतिशक्तिर्न तद्वाक्यप्रतीकपरामर्शचमेति। काव्यप्रकाशकृता पदैकदेशः कष्ट उक्तः। यथा। तङ्गच्छसिद्धे। अपेक्षते प्रत्ययमङ्गलब्धे इत्यत्र द्वे ब्धे इति तत्राह। पदमिति। न हि समस्तवस्तुकटुत्व एव पदं कष्टत्वमापादयति। कार्त्स्न्यमित्यादौ तदुदाहृते तदभावात्। एकदेशकष्टतया पदकष्टत्वमिति चात्रापि न दण्ड्वारितमिति भावः। वर्वर्षि। पुनः पुनर्वर्षति। ड्वषेर्यङ्लुगन्तस्य रूपम्। दर्धर्षि पुनः पुनर्धृष्टो भवति। त्रिधृषाप्रागल्भ्य इत्यस्य तत्रैव रूपम्। दर्दृष्टीतिपाठे दृशेर्यङ्लुक्यमागमे च रूपम्। पुनः पश्यति। नीपः कदम्बः। पोफुल्लति। फुल्लविकसन इत्यस्य तत्रैव रूपम्। एवंभूतो वर्षासमयो मम विदूरकान्तस्य हृदयं चर्कर्त्ति। पुनः पुनरतिशयेन वा छिनत्ति। कृतौ छेदन इत्यस्य रूपम्। भूयसां कष्टपदानां समभिव्याहाराद्वाक्यदोष इत्यत्र भ्रान्तिः स्यात्तत्राह। क्रियापदानीति। कथमेवंविभागोऽवसीयत इत्यत्र आह श्रूयन्त इति। श्रोत्रप्रत्यक्षेणैव पदमात्रगामितया कष्टत्वमनुभूयत इत्यर्थः॥ ५॥

स वै देवः खलु त्वान्तु पुनातु मदनान्तकः ॥

अत्र च हि वै खलु तु इत्येतानि पदानि पादानेव पूरयन्ति ॥ ६ ॥

रूढ़िच्युतं पदं यत्तु तदन्यार्थमिति श्रुतम् ।

यथा,—विभजन्ते न ये भूपमालभन्ते न ते श्रियम् ।

आवहन्ति न ते दुःखं प्रस्मरन्ति न ये प्रियाम् ॥

अत्र विभजतेर्वण्टने आलभतेर्मारणे आवहतेः करणे प्रस्मरतेर्विस्मरणे रूढ़िः । न तु विशेषसेवायामभितो लाभे समन्ताद्वहने प्रकृष्टस्मरणे चेति ।

पादपूरणेति द्योतनीयमर्थमन्तरेण प्रयुक्तमव्ययमनर्थकमभिमतमत एव प्राच्यै श्चादिपदमव्ययमिति प्रयोगबीजकथनार्थं न हि निर्मूलः प्रयोगः सम्भवति वृत्तनिर्वहणसमर्थः । प्रायेणाव्ययपदानि क्षिप्त्वा तत् पूरयति तदुक्तम् । कुकवि-प्रबन्ध इव श्लिष्टपदप्रचारः प्रकटतुहिनचयोजनाकीर्णश्चेति । बिभर्त्तीति । चः समुच्चयादिषु चतुर्षु प्रसिद्धप्रयोगो न च तेषामन्यतमोऽप्यत्र सम्भवति । नाप्युच्चावचार्थग इति भाषणेनार्थान्तरमपि । एवं हि प्रभृतिषु अवसेयम् । एत-नैतदपि अपास्तम् । यदाहुरेके । पदादिविशेषानुपादानात्यदैकदेशोऽप्यनर्थकोऽभि-मतः । तथाच । आदावञ्जनपुञ्जजलितवपुषां श्वासानिलोल्लासितप्रोत्सर्पद्विरहा-नलेन च ततः सन्तापितानां दृशाम् । संप्रत्येव निषेकमम्बुपयसा देवस्य चैतां-भुवो भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा इत्यत्र दृशामिति बहुवचन-मनर्थकं कुरङ्गेक्षणाया एकस्या एव उपादानात् । न चात्र व्यापारे दृक्शब्दो वर्त्तते । अञ्जनपुञ्जलिपादीनामनन्वयापत्तेः । तथा कुरुत इत्यात्मनेपदमनर्थकम-कर्त्रभिप्रायक्रियाफलादिति । अपि च । बहुलकर्त्रभिप्रायफलाभावे कथनं द्वयो-रसाधुत्वमिति राजमार्ग एव भ्रमः । न हि स्वरूपत एव किञ्चिदसाधु साधु वा सम्भवति ॥ ६ ॥

रूढ़िच्युतमिति । शक्तिमनपेक्ष्य प्रयुक्तं रूढ़िच्युतम् । अतएव यदभि-सन्धाय प्रयुज्यते तेन कथञ्चन न तस्यासावर्थ इति अन्यार्थमिति नाम । एतदेव

यत्तु तुच्छाभिधेयं स्यादपुष्टार्थं तदुच्यते ॥

यथा,—शतार्द्धपञ्चांशभुजो द्वादशार्द्धत्रिलोचनः।
विंशत्यर्द्धार्द्धमूर्द्धा वः पुनातु मदनान्तकः ॥

अत्र दशबाहुस्त्रिलोचनः पञ्चवक्त्र इति तुच्छमेवाभिधेयम् अतुच्छशब्दैः उक्तमिति अपुष्टार्थम्।

असङ्गतं पदं यत्तदसमर्थं तदुच्यते।

यथा,—जलं जलधरे क्षारमयं वर्षति वारिधिः।
इदं हृंहितमश्वानां ककुद्मानेष हेषते ॥

धातुविशेषो वान्तरसुपसर्गविशेषयोगतो योगवानित्यादिनान्यैरुक्तम्। विभजन्त इति। भजिः सेवार्थो विरूपसर्गसङ्गतविशेषद्योतकस्तत्र यथा विद्योतत इति। अत्र विशिष्टधात्वनुरूपप्रयोगाभिधानं तथात्रापि भविष्यतीति भवो बीजमत्र शब्दशक्तिस्वभावात्। क्वचिदुपसर्गोपसंदानेन धातुरर्थान्तर एव वर्त्तते यदाहुः। उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवदिति तदाह। अत्र विभजतेरित्यादि। नन्वर्थापेक्षिते पदार्थदूषणमेवंविधमिति वामनः। नैतत्। पदस्यैवान्वयव्यतिरेकवत्वात्। न ह्यन्वयस्यापराधः कश्चित्। किन्तु शब्द एव वृत्तिस्खलितादिभिरपराध्यति। यदि चार्थापेक्षितमात्रेणार्थदोषत्वं कथमसाधुप्रभृतीनामपि शब्ददूषणता। न हि तानि स्वरूपत एव तथाऽपि त्वर्थविशेषो विशेष एवाश्वगौश्वादिवदिति। अर्थदोषास्तु यथा भवन्ति तथा वक्ष्यामः। यत्तु तुच्छाभिधेयमिति। स्तोकशब्दाभिलभ्येऽर्थे बहुतरशब्दबहुलमित्यर्थः। न हि तथा क्रियमाणमल्पीयसीमपि प्रकर्षतां पुष्यति येन त्याज्यं न स्यादित्यपुष्टपदेन सूचितम्। शतस्यार्धं पञ्चाशत्तेषां पञ्चतमोंऽशो दश। समासे पूरणप्रत्ययलोपः। असङ्गतमिति। कथं पुनरिदमन्यार्थाद्विद्यते। अत्राराध्याः। अन्यार्थे केवलं योगाद्रूढिर्बलवती। असमर्थे तु केवलयोगाद्योगरूढिः। तदपरे दूषयन्ति तथापि रूढिच्युतिः साधारण्येव तदवान्तरं विशेषद्वयमन्यदिति। तन्न। भावनावशीघात्। किञ्चिदुपदमपवादकारणबलादवगम्यमानमपि योगमनपेक्ष्यैव क्वचिदर्थविशेषे वर्त्तते। यथा गौरिति। न हि गमनस्य वाक्यार्थे प्रवेशः सम्भवति। किञ्चित् पुनरसति बाधहेतौ बुध्यमानस्य त्यागायोगाद्योगविशिष्टमेवोपाधिमभिधत्ते।

दूरे यस्यार्थसंवित्तिः क्लिष्टं नेष्टं हि तत् सताम् ।

यथा,—विजितात्मभवद्वेषि गुरुपादहतो जनः ।

हिमापहामित्रधरैः व्याप्तं व्योमाऽभिनन्दति ॥

अत्र विना गरुत्मता जित इन्द्रस्तस्यात्मभवोऽर्जुनस्तस्य द्वेषी कर्णस्तस्य गुरुः सूर्यस्तस्य पादैरभिहतो लोकः आकाशमभिनन्दति । कीदृशं, हिमापहो वह्निः तस्यामित्रो जलं तद्धारयन्ति ये मेघास्तैर्व्याप्तमिति व्यवहितार्थप्रत्ययं क्लिष्टमेतत् ॥ ९ ॥

गूढार्थमप्रसिद्धार्थप्रयोगं ब्रुवते बुधाः ।

यथा,—सहस्रगोरिवानीकं भवतो दुःसहं परैः ।

हरेरिव तवाभान्ति नान्यतेजांसि तेजसि ॥

अत्र सहस्रगुशब्देन सहस्राक्ष उक्तः । न च गोशब्दस्याक्षि

दूर इति । दूरं चिरं विलम्ब इत्यनर्थान्तरम् । क्लिष्टोहिविधः । पदविषयी वाक्यविषयश्च । आद्यः सामान्यशब्दस्य प्रकारणादिकमनपेक्ष्य क्वचिदभिप्रेतविषये प्रयोगः । तथा सति वाचकतायामपि झटिति प्रतिपत्तिर्न भवति । किन्तु परस्परान्वयपर्य्यालोचनया चिरेणेति विरसत्वम् । यदाह । नेष्टं हि तत्प्रसितानामिति । अयमेवार्थो व्यवधानपदेन वामनादिभिरुक्तः । द्वितीयस्तु व्याकीर्णादिपदेनाऽन्यथा वक्ष्यते । विजितेति । विशब्देन पक्षिसामान्यवचनेन तद्विशेषो गरुडात्मा विवक्षितः । तज्जितोऽपि विशेष एव । एवमन्यत्रापि । न चाऽत्राऽपि किञ्चित् झटिति प्रतीत्यनुगुणं नियमकारणमस्तीति युक्तमेव व्यवधानम् । हिमापहो वह्निरिति । हन्तेर्डप्रत्यये रूपम् । तथाच चन्द्रगोमी डप्रकरणे हन्तेर्ड इत्येव सूत्रितवान् । हिमापहो वह्निरिति । क्विपि व्यभिचारं दृष्ट्वा ब्रह्मभ्रूणेत्यादिसूत्रितं चन्द्रगोमिना ॥ ९ ॥

गूढार्थमिति । यस्य पदस्य द्वावर्थौ सिद्ध्याप्रसिद्ध्या तच्चेदप्रसिद्धे प्रयुक्तं तदा गूढार्थम् । अप्रसिद्धार्थप्रयोगमिति । अप्रसिद्धेऽर्थे प्रयोगो यस्येति गमकत्वाद् बहुव्रीहिः । तव तेजसि नाऽन्यतेजांसि भान्तीति योजना । गौः शराऽक्षिपयः-

भूयसी प्रसिद्धिः। हरिशब्देन च सहस्रांशुः। सोऽपि न तेन नाम्ना बहुभिरुच्यते इति गूढत्वम् ॥ १० ॥

स्वसङ्केतप्रकृतार्थं नेयार्थमिति कथ्यते।

यथा,—मुखांशवन्तमास्थाय विमुक्तपशुपङ्क्तिना।
पङ्क्त्यनेकजनामभ्रतुका जित उलूकजित् ॥

अत्र पङ्क्तिशब्देन दशसंख्या अनेकजनामेत्यनेन चक्रं तद्भ इत्यनेन रथः ताभ्यां दशरथः। तस्य तुक् बालको लक्ष्मणः तेन जितः उलूकजित् इन्द्रजित्। किं कृत्वा मुखांशवन्तमास्थाय हनूमन्तं किम्भूतेन विमुक्तपशुपङ्क्तिना विमुक्तेषु-पङ्क्तिना। अत्र पशुशब्देन गोशब्दो लक्ष्यते तेन इषवः। तदिदं स्वसङ्केतकल्पितार्थं नेयार्थमुच्यते ॥ ११ ॥

स्वर्गपशुभेदवचःसु चेत्यास्नातोऽपि तथा नाऽस्ति प्रयुज्यते यथा पशुभेदादावित्याह। न च गोशब्दस्येति। हरिः कृष्णे च सिंहे च भेकाऽर्कभुजगेषु चेति स्वसङ्केति-तस्यापि हरिशब्दस्य न तथा रवौ प्रसिद्धिर्यथाऽन्यत्रेत्याह। सोऽपि नेति ॥ १० ॥

स्वसङ्केतेति। कल्पितार्थं नेयार्थमिति सूत्रयित्वा वामनेन व्याख्यातम्। अथैतस्यार्थस्य कल्पनाकल्पनाऽकल्पितार्थम्। अस्यार्थः। यत्पदं नानार्थ-स्वपर्यायलक्षणया विवक्षितप्रतीतिपर्यन्तं नीयते तत्कल्पितार्थमिति केचित्। तदयुक्तम्। स्वपर्यायेत्यस्य व्यर्थत्वादव्यापकत्वाच्च। तस्मात् प्रयोजनं विना लक्षणया प्रयुक्तमित्येवार्थः। यदाह काव्यप्रकाशकारः। नेयार्थे यत्तथाशक्ति इति यस्मिन्निषिद्धं लाक्षणिकमिति। प्रयोजनं विना रूढं लक्षणापरिग्रहे न दोषः। तथाच द्विरेफरथाङ्गनामादिपदानां रेफद्वयानुगतभमरादिशब्द-लक्षणाद्वारेण षट्पदादौ वृत्तिर्द्वव्यवहारपम्परानुपातिनीति तेषां प्रयोगोऽयुक्त एव। अतएव तुरङ्गकान्तामुखद्वव्यवहाद्ज्ञाखेव भिला जलमुल्लासेत्यादिक-मपि नेयार्थमिति काश्मीरकाः। तदेतत् स्वपदेन दर्शितवान्। मुखस्यांशो हनुरत्राभिमतः। पङ्क्तिरिति दशाक्षरं छन्दः दशसंख्या लक्ष्यते। अनेकजो द्विजयक्रवाकस्तस्य नामचक्रं रथैकदेशस्तद्वारयतीति धारयतेर्मूलविभुजादि-

न यत् पदं निश्चयकृत् सन्दिग्धमिति तद्विदुः।
यथा,—नीलो लोहितमूर्त्तिर्यो दहत्यन्ते जगत्त्रयम्॥
स एष हि महादेवस्त्रिषु लोकेषु पूज्यते।
अत्र वह्निरर्कः शिवो वेति न निश्चीयते॥ १२॥

विरुद्धं विपरीतार्थप्रकल्पनमिहोच्यते।
यथा,—अनुत्तमानुभावस्य परैरपिहितौजसः॥
अकार्य्यसुहृदोऽस्माकमपूर्वास्तव कीर्त्तयः॥

अत्रानुत्तमा इत्यनेन यथोत्कृष्टस्तथापकृष्टोऽपि। अपिहितमित्यनेन यथा नाच्छादितं तथाच्छादितमपि। अकार्य्यसुहृदित्यनेन यथा कार्य्यमन्तरेण सुहृदेवमकार्य्ये यः सुहृत्

त्वात्कः। ताभ्यामिति। पङ्क्तिरनेकजनाम यस्येत्यर्थात्। तुक्तीकं तीक्ष्णमित्यपत्यनामानि। उपलक्षणतयैकदेशं व्याचष्टे। अत्र पशुशब्देन गोशब्दो लक्ष्यत इति प्रकृतापेक्षया। वैनेयवः प्रत्याय्यन्त इति शेषः॥ ११॥

न यत्पदमिति। पदस्वरूपमेव संदिह्यमानमत्र। तथाहि। स एषहि महादेव इत्यत्र स किमेषहि महादेव इति क्लेदो विधीयतां महादेव इति वा साधकबाधकप्रमाणाभावे सन्दिह्यते। न च विशेषणनियमहेतुः। वह्न्यर्कावपि हि भगवती नीललोहितमूर्त्तिभूती हिमापहौ च न निश्चयकृदिति दूषणताबीजप्रदर्शनम्। यदैको विवक्षितस्तदा दोषः। साधुचर इत्यत्रापि भूतपूर्वे चरडितिचरट्प्रत्यये किं पूर्वं साधुरथवा चरेष्टप्रत्यये साधुषु चरतीति पदमेव सन्दिह्यते तेन पदावयवः सन्दिग्ध इति केनचिदुक्तं तदप्यपास्तम्॥ १२॥

विरुद्धमिति। विपरीतं प्रकृतोपमर्दकमर्थकल्पनं यत्र। तथाहि। अनुत्तमेत्यादौ प्रकरणादिभिस्तुतिपरत्वे व्यवस्थिते उत्तमत्वाभावादिना विरुद्धेनार्थेन तत्र पर्यवसाययितुं न शक्यते। संशययुगपद्विवक्षायामपि न विरोधः। इह तु स्तुतिनिन्दयोर्योगपद्यमसम्भावितमतएवैकस्य सम्भवे तु अपरस्य बाध एव। यथा। चिरकालपरिप्राप्तलोचनानन्ददायिनः। कान्ताकान्तस्य सहसा विदधाति गलग्रहमिति गलग्रहशब्दस्य कण्ठग्रहप्रतिहन्त्रर्थे विवक्षिते पूर्वप्रक्रान्तानन्ददायित्वं बाध्यते। अत्रानुत्तम इति बहुव्रीहितत्पुरुषाभ्यामपिहितमिति वष्टिभागुरि-

सोऽप्युच्यते। अपूर्वाः कीर्त्तय इत्यनेन यथाद्भुताः कीर्त्तय एवमकीर्त्तयोऽप्युच्यन्ते ॥ १३ ॥

अप्रयोजकमित्याहुरविशेषविधायकम्।

यथा,—तमालश्यामलचारमत्यच्छमतिफेनिलम् ॥

फालेन लङ्घयामास हनूमानेष सागरम्।

अत्र तमालश्यामलमित्यादीनि सागरविशेषणानि लङ्घने न हनूमतोऽतिशयं सूचयन्ति ॥ १४ ॥

तद्देश्यमिति निर्दिष्टं यदव्युत्पत्तिमत्पदम्।

यथा,—गल्लौ लावण्यतल्लौ ते लडहौ मडहौ भुजौ।

नेत्रे वोसट्टकन्दोट्टमोट्टायितसखे सखि ॥

अत्र गल्लतल्लादयः शब्दा अव्युत्पत्तिमन्तो देश्या दृश्यन्ते ॥१५॥

त्यादिना विकल्पेनाकारलोपविधानात्। अपूर्वा इति। पचान्तरेऽकारपूर्वाः। नियामकसद्भावे तु गुण एव। यथा। अपूर्वं यदस्तु प्रथयति विना कारणकलामिति शब्दरूपान्तरमेव विरुद्धोपचायकमित्यन्वयव्यतिरेकाभ्यां शब्ददोषताव्यवस्थितिः ॥ १३ ॥

अप्रयोजकमित्याहुरिति। तदेव हि कवीनामुपादेयं यदाक्यार्थे प्रकृष्टकाष्ठां पुष्णाति। अन्यथाऽनङ्गाभिधानेऽवाच्यवचनमेव स्यात्सार्थकत्वादनन्वयत्वाच्च। न ह्यत्पूरणमात्रप्रयोजनता नातिशयमिति। सागरलङ्घनद्वारा हनूमतः प्रकर्षोऽवाच्यः। न च तमालश्यामलत्वादिविशेषणानि कथञ्चित् प्रकर्षमर्पयन्ति यानि दूरत्वादीनि तथा न तेषामुपादानम् ॥ १४ ॥

तद्देश्यमिति। अव्युत्पत्तिमत्। प्रकृतिप्रत्ययविभागशून्यं लोकमात्रप्रयुक्तं पदमनादेयं भवति। तद्द्विविधम्। अभागं भागवच्चेति। आद्यं देश्यम्। द्वितीयं ग्राम्यमिति विभागः। व्युत्पन्नानामन्यादृशीच्छाया देश्यानां च न तादृशीतिदेश्यवेद्यपदसमभिव्याहारे प्रायेण इच्छाया वैरूप्यं वक्तुस्य भवतीति सहृदयहृदयसाक्षिकं दोषबीजम्। तल्लमल्लसरः लडह मनोहरं मडह कृशं वोसट्टं विकसितं कन्दोट्टं नीलोत्पलं मोट्टायितं विलासः ॥ १५ ॥

अश्लीलामङ्गलघृणावदर्थं ग्राम्यमुच्यते।
अत्राश्लीलमसभ्यार्थमसभ्यार्थान्तरञ्च यत्॥
असभ्यस्मृहिहेतुश्च त्रिविधं परिपठ्यते॥

तेषु असभ्यार्थं यथा,

छत्राकारशिराः शिरालसरलस्थूलप्रकाण्डो महान्
मध्ये भानुसुताभ्रसिन्धुविपुलाभोगो वटः पातु वः।
कायैक्ये विकटप्रसारितमहाजङ्घं महीसुप्तयोः
यः खण्डेन्दुकिरीटकैटभजितोः काटश्रियं कर्षति॥

तदेतच्छत्राकारशिराः काट इत्यादेरसभ्यार्थत्वादसभ्यार्थम्॥ १६॥

असभ्यार्थान्तरम्। यथा,

विद्यामभ्यसतो रात्रावेति याभवतः प्रिया।
वनिता गुह्यकेशानां कथं ते पेलवं धनम्।

अश्लीलेति। देश्यातिरिक्तं लोकमात्रप्रयुक्तं ग्राम्यं तत्त्रिधा व्रीडाजुगुप्सालङ्कदायित्वात्। तत्राद्यमश्लीलं श्रीर्यस्यास्ति तच्छ्रीलं सिध्मादिराकृतिगणत्वाल्लच्। कपिलकादिपाठाल्लत्वं नश्लीलमश्लीलं व्रीडादायित्वेनाकान्तमित्यर्थः। द्वितीयं घृणावदर्थकम्। जुगुप्सादायिप्रत्याय्यमस्येति। तृतीयममङ्गलार्थमातङ्कदायिज्ञाप्यमस्येति कृत्वाऽश्लीलपर्य्यायोऽसभ्यशब्दः। सभायां साधुरित्यर्थे तेनापि शास्त्रे व्यवहार इति प्रदर्शनार्थमसत्यशब्देनाश्लीलमनूद्य व्याचष्टे। तत्रासभ्यमिति। अर्थस्यासभ्यत्वात्पदमप्यसभ्यम्। स चार्थः क्वचित् प्रकृतोऽप्रकृतोऽपि श्लेषोपस्थित एकदेशात् स्मृतिमात्रारूढो वा। तत्र यथाक्रममसभ्यादयस्त्रयः। एवममङ्गलादयोऽपि। सूर्य्यसुता यमुना। अभ्रसिन्धुर्गङ्गा। तयोर्मध्ये पारिमध्येषष्ठ्यावेति अव्ययीभावः। अर्द्धं हरेरर्द्धं हरस्येति शरीरैक्ये। काटशब्दस्यासभ्यार्थत्वे तद्विशेषणानामप्यसभ्यत्वमिति तान्यादाय व्याचष्टे। अत्रच्छत्राकारेति॥ १६॥

विद्यामिति। या रात्रौ विद्यामभ्यसतो मन्त्रमावर्त्तयतस्तव प्रिया समायाति सा वचिणी। अतः कथं ते धनं पेलवं कोमलं स्वल्पमिति यावत्। किं तु

तदेतद् याभवतः प्रिया वनिता गुह्यकेशानां पेलवं धन-शब्दानामसभ्यार्थान्तरत्वादसभ्यार्थान्तरम् ॥ १७ ॥

असभ्यस्मृतिहेतुर्यथा,

उत्कम्पयसि मां चूत पिकवाक् काटवेन किम् ।
कृतः कृकाटिकायां ते पादः प्राणेन यास्यता ॥

तदिदं काटवकृकाटिकापदयोरसभ्यस्मृतिहेतुत्वादसभ्य-स्मृतिहेतुता ।

लोकेषु यदशस्तार्थमशस्तार्थान्तरञ्च यत् ।
अशस्तस्मृतिहेतुश्चामङ्गलार्थं निषेध तत् ॥ १८ ॥

तेषु अशस्तार्थं यथा ।

खेटके भक्तसूपस्य वलभ्याः पत्तनस्य च ।
अहमोऽहं मरिष्यामि हे हले भाषितस्य च ॥

अत्र मरिष्यामीति पदमशस्तार्थम् ॥ १८ ॥

यद्विणीप्रयाटादहुषनं तवोचितमित्यर्थः । प्रकृतपदानि तु असभ्यार्थान्तराणि तान्युद्धृत्य व्याचष्टे । तदेतत् या भवतः प्रियेति । असभ्यार्थप्रकाशनमेव षष्ठ्या आक्रोश इत्यर्थः । किं याभवतः प्रियेति । एकं पदं याभो मैथुनं तद्वतः प्रियेत्यर्थात् । योनिर्वनितायां गुह्यस्तस्य केशाः । पेलशब्दोसुष्कथीः प्रसिद्धः । तच्च बन्धनमिति ॥ १७ ॥

उत्कम्पयसीति । हे चूतवृक्ष कोकिलस्य वाचा कटुत्वेन दुःखदायित्वात् किं मां भाषयसि । ननु तव कृकाटिकायां ग्रीवायां पादं दत्त्वा चलिता मम प्राणाख्येन मया जितम् । व्यर्थत्वायं परिश्रम इति वाक्यार्थो विवक्षितः । काटवशब्दे काट एकदेशः कृकाटिकाशब्दे काटिकेति लोपः । काटः काटिका ॥१८॥

खेटक इति । अहमः सुखस्य इयत्तापरिच्छेदाभावात् खेटके ग्रामे यद्भक्तसूपश्चीत्यर्थते तस्य पत्तनस्य नगरस्य या वलभी तस्यां सुहितार्थयोगे षष्ठी निषेधाङ्गिङ्गादनुमीयते तस्मार्थयोगे षष्ठी भवति । अन्ये तु व्याचक्षते । भक्तसूपपद-

अशस्तार्थान्तरं यथा ।

प्रवासयति या कान्तं वसन्ते गृहसंस्थितम् ।
विना शपथदानेन पिशाची सा न चाङ्गना ॥

अत्र प्रवासयति संस्थितं विना शपथदानेन पिशाचीपदानामशस्तार्थान्तरत्वम् ॥ २० ॥

अशस्तस्मृतिहेतुर्यथा,

मारीचोऽयं मुनिर्यस्य क्रत्याः कालान्तकालये ।
पत्न्यां संक्रन्दनादीनां सुतानामाप्तयेऽभवन् ॥

अत्र मारीच क्रत्या कालान्तक संक्रन्दन पदानामशस्तार्थस्मृतिहेतुत्वम् ।

पदमर्थं घृणावन्तं यदाहार्थान्तरञ्च यत् ।
घृणावत् स्मृतिहेतुर्यत् तद्घृणावदिह त्रिधा ॥

तेषु घृणावदर्थं यथा,

पर्दते हदते स्तन्यं वमत्येष स्तनन्धयः ॥ २१ ॥

नामा दक्षिणापथे विषयसत्कस्मिन् खेटके वल्लभीनामकस्य चिद्विरूपाचाधिष्ठानस्य तत्रैव पत्तनस्य हिहले स्त्रीणामव्याजमन्योन्यप्रेमातिशयगर्भस्य भाषितस्येति ॥ १९ ॥

प्रवासयतीति । शपथदानेन विना प्रवासयति । अन्यत्र प्रहिणोति गृह सम्यक् स्थितं प्रियं साङ्गना न किन्तु पिशाचीवदनुचितकारिणीत्यर्थोऽभिमतः । अन्यत्र प्रवासनमुच्चाटनं संस्थानं विनाशः विनाशस्य पन्थासस्य दानम् । पिशितमश्नातीति पिशाची । पृषोदरादित्वात् । तदेतदव्याचष्टे । अत्र प्रवासयतीति ॥ २० ॥

मारीचोऽयमिति । मरीचेरपत्यं मारीचः काश्यपः संक्रन्दनादीन् इन्द्रादीन् द्वादशपुत्रान् आदित्यान् उत्पादितवान् । तच्च कालान्तकस्य भगवती महादेवस्य आलये याः क्रत्याः क्रियाः भगवदाराधनरूपास्तासां फलमित्यर्थः । मारीचशब्दे

मुहुरुल्कीति निष्ठीवत्याक्तगर्भा पुनर्वधूः ।

अत्र पर्दते हृदते वमति निष्ठीवति इति शब्दानां घृणावदर्थत्वम् ॥ २२ ॥

घृणावदर्थान्तरं यथा ।

वाष्पक्लिन्नाविमौ गण्डौ विपूयापाण्डुरौ तव ।
प्रियोऽग्रे विष्ठितः पुत्रि स्मितवर्चोभिरर्चति ॥

अत्र क्लिन्न गण्ड विपूय विष्ठित वर्चः पदानां घृणावदर्थान्तरत्वम् ॥ २३ ॥

घृणावत् स्मृतिहेतुर्यथा ।

प्रत्यार्द्रयन्तो रूढानि मदनेषुव्रणानि नः ।
हृदयं क्लेदयन्त्येते पुरीषण्डमहाद्रुमाः ॥

अत्र रूढव्रणपुरीषण्डपदानां घृणावत्स्मृतिहेतुत्वम् ॥२४॥

मारकदेशः क्लत्या इति सुबन्तपदे क्लत्येत्येकदेशः कालान्तकालय इत्यत्र अन्तकेति संक्रन्दने शब्दः क्रन्दनेति ॥ २१ ॥

उल्कीति । उल्कारं करोति । निष्ठीवति थूत्करोति । आक्तगर्भा पुनर्वधूरिति । बालस्य स्तन्यवमनादिनिदानसूचनम् । अतएव न गर्भिण्याः पिबेत् चीरं पारगर्भिकक्लृप्तं तदिति वैद्यकम् ॥ २२ ॥

वाष्पेति । विपूयो मुञ्जः विशेषेण स्थितो विष्ठितः । स्मितवर्चो हास्यतेजः । तव कपोलौ दृष्ट्वा पुरःस्थितस्तवप्रिय ईषद्धास्यं कुर्वन् कपोलयोर्हास्यज्योत्स्नया पूजां करोतीत्यर्थः । अन्यत्र वाष्पेणोष्णा क्लिन्नौ मृदूभूतः । गण्डौ व्रणः । विश्लिष्टः पूयोविपूयस्तेन पाण्डुरः विष्ठितो विष्ठा सञ्जाता अस्य । वर्चः पुरीषम् । यत्स्मरणात् वाष्पादीनां घृणावति वृत्तिस्तदेव पृथक्कृत्याह । अत्र क्लिन्नेति ॥ २३ ॥

प्रत्यार्द्रयन्त इति । अन्योन्यलग्नो वृक्षसमूहः षण्डः । रूढानीत्यनेन मदनेषुव्रणानां विशेषितत्वात् । मदनेषुभागमपहाय व्रणभागमात्रेण रूढव्रणस्मृतिर्भवन्ती पदादेवेति विवक्षितवान् । पुरीषण्डशब्दे पुरीषेत्येकदेशः ॥ २४ ॥

शब्दहीनं क्रमभ्रष्टं विसन्धि पुनरुक्तिमत्।
व्याकीर्णं वाक्यसङ्कीर्णमपदं वाक्यगर्भितम्॥
द्वे भिन्नलिङ्गवचने द्वे च न्यूनाधिकोपमे।
भग्नच्छन्दीयती च द्वे अशरीरमरीतिमत्॥
वाक्यस्यैते महादोषाः षोड़शैव प्रकीर्त्तिताः।
अथैषां लक्ष्म संक्षेपात् सनिदर्शनमुच्यते॥
उच्यते शब्दहीनं तद्वाक्यं यदपशब्दवत्।

यथा,—नीरन्ध्रं गमितवति क्षयं पृषत्कैः
भूतानामधिपतिना शिलावितानैः।
गाण्डीवी कनकशिलानिभं भुजाभ्याम्
आजघ्ने विषमविलोचनस्य वक्षः॥

अत्र गमितवतीति क्तवतोः कर्मणि, आजघ्न इति आत्मने-

तदेवं पददोषान् लक्षयित्वा क्रमप्राप्तवाक्यदोषा लक्षणीया इति तान् विभजते। शब्दहीनमिति। उक्तेनैव प्रयोजनेनासमासद्वन्द्वगर्भबहुव्रीहिसमासौ। एवं गुणादिविभागवाक्येष्वपि प्रयोजनमवसेयम्। भिन्नलिङ्गवचनेत्यादौ तु द्वन्द्वलक्षणस्य समासस्य पूर्ववर्त्तिनां भिन्नादिपदानां प्रत्येकमन्वयः। यमनं यतिरिति भग्नच्छन्दो भग्नयतिरिति केचित्। तथाच व्यतिकीर्णोऽर्थः स्यात्। अरीतिमदिति। रीतिरस्यास्तीति नित्ययोगे मतुप्। नित्ययोगप्रतिपादनं हि दूषकतावीजोद्घाटनाय उपपद्यते। अतएव बहुव्रीहौ लाघवं तत्रनादरः। असाधुवदसाधुमत्वस्य प्राधान्याल्लक्षणमाह। उच्यत इति। अपशब्दत्वं पद एव नियतं वाक्ये संस्कारप्रसक्तेरभावादपशब्दत्वं न वाक्यदूषणम्। तथाहि। कर्त्तरिक्तादिति नियमात्कर्मणि क्तवतुरसाधुः। अकर्मकाच्चेत्यनुवृत्त्या आङो यमहन इत्यात्मनेपदमकर्मक एव प्राप्तं स्वाङ्गकर्मकाच्चेति वाक्यैकवाक्यतापर्य्यालोचनया अस्वाङ्गकर्मणि अस[illegible] तथा वाक्यदूषणता। न हि वाक्यान्तःपातितामात्रेण सा युज्यतेऽतिप्रसङ्गादित्याशङ्क्योक्तम्। तौ च इति। न हि यथा वाधधातुः परस्मैपदान्त इत्येवासाधुत्वं तथात्र पदान्तरसन्निधानापेक्षतेऽव्यवसीयते। भूता-

पदस्य अस्वाङ्गकर्मणि प्रयोगादपशब्दौ। तौ च शिलावितानत्राक्षवक्षःसम्बन्धाद्वाक्यदोषौ जायमानौ असाधुनाम्नः पददोषाङ्गियेते ॥ २५ ॥

क्रमभ्रष्टं भवेदार्थो शाब्दो वा यत्र न क्रमः ॥

यथा,—तुरङ्गमथ मातङ्गं प्रयच्छास्मै मदालसम्।
कान्तिप्रतापौ भवतः सूर्य्याचन्द्रमसोः समौ ॥

अत्र मातङ्गमथ तुरङ्गमिति वक्तव्ये तुरङ्गमथ मातङ्गमित्यार्थः, कान्तिप्रतापौ चोक्ता सूर्य्याचन्द्रमसोः समाविति शाब्दः क्रमभ्रंशो लक्ष्यते ॥ २६ ॥

विसंहितो विरूपो वा यस्य सन्धिर्विसन्धि तत् ॥

यथा,—मेघानिलेन असुना एतस्मिन्नद्रिकानने।

नामधिपतिना शिलावितान इति यावन्नानुसन्धीयते तावद्द गमितवतीति किंकर्त्तरिकर्मणि वेति सन्देहानिवृत्तेः। तथा गण्डीवी विषमविलोचनस्य वक्ष इत्येतावत् प्रतीत्य कथमाजघ्न इति अस्वाङ्गकर्मणि आत्मनेपदमध्यवसानयोग्यमियमेव हि वाक्यदोषता यदनेकपदनिरूप्यता नाम बाधतीत्यत्रापि किं बाधशब्दात् क्विबन्तात्तिप्। उत बाधृधातुरिति सन्देह इति कुदेशम्। स्वस्यादिपदसन्निधानेऽपि तस्या निवृत्तेः। तेन त्वामनुनाथते कुचयुगमित्यादिकमत्रत्यमुदाहरणं प्रमादात् काव्यप्रकाशकृता पददोषेषु लिखितम्। यथाच। उदपूतितः को न हीयत इति रुद्रटेन। तत्र हि अपादाने चाहीयरुहोरिति तसि प्रत्ययनिषेधः। स स पदान्तरसन्निधानेनैवेति स्वयमालोचनीयम्। शिलावितानत्राक्षवक्ष इत्युपलक्षणम्। अधिपतिगाण्डीविशब्दावपि बोद्धव्याविति ॥ २५ ॥

क्रमभ्रष्टमिति। अर्थादागतः क्रम आर्थः। शब्दादागतः शाब्दः। अर्थक्रमभंशः कथं शब्ददूषणमत आह। इति वक्तव्य इति। मातङ्गो दीयतामथ तद्दानसामर्थ्यं नास्ति तदा तुरङ्ग इति वक्तव्ये रचनावैपरीत्यमात्रमत्रापराध्यति। नार्थ इति युक्ता शब्ददोषता ॥ २६ ॥

विसंहितमिति। विशब्दो विगमं वैपरीत्यं च द्योतयति। तेनार्थद्वयं

मञ्जर्य्युद्गमगर्भासौ तर्वाल्युर्वी विधूयते ॥

अत्र मेघानिलेन अमुना एतस्मिन्न संहितया विवक्षामीत्यभिसन्धानं विसन्धिः। मञ्जर्य्युद्गमगर्भासौ इत्यादौ तु विरूपसन्धानं विसन्धिः ॥ २७ ॥

पदं पदार्थश्चाभिन्नौ यत्र तत् पुनरुक्तिमत्।
यथा,—उत्कामुन्मनयन्त्येते बालां तदलकत्विषः।
अम्भोधरास्ताडिदन्तो गम्भीराः स्तनयित्नवः ॥

सम्पद्यते। परः सन्निकर्षः संहिता। तया तत्कार्य्यं लक्ष्यते। सन्धानं सन्धिः। अर्द्धमात्राकालव्यवधानं तथा च संहिता कार्य्यशून्य सन्धानं यत्रेत्यर्थः। संहितैकपदे नित्येतिसमयादन्यत्र विकल्पः। ततो नासाधावन्तर्भावः। वैरूप्यं द्विविधम्। दुर्वचकत्वमश्लीलत्वं च। तत्राद्यमुपलक्षणतया उदाहृतम्। द्वितीयं यथा उड्डीय गगने दूरं चलन् डामरचेष्टितः। अयमुत्पतते पक्षी ततोऽत्रैव रुचिं कुरु। ननु यदि सन्निकार्य्ये वैकल्पिकं कथमत्र दोष इत्यत आह। न संहितामिति। यदि संहिताप्रतिषेधः स्यात्तदा सङ्कीर्णसन्निकरणेन तथा वैरूप्यं भवतीति कवेरपराधो न सम्भाव्यते यदितु प्रतिषेधो नास्ति असङ्कीर्णोपादानं तदा व्यक्तवैरूप्यप्रतिभासात्कथं न दोष इत्यर्थः। न विवक्षामीत्युपलक्षणम्। विवक्षायामप्यसङ्कत्प्रयोगो विरस एव। यथा। तत उदित उदारहारहारीति। विशेषं वैशेषिके वक्ष्यामः ॥ २७ ॥

पदं पदार्थश्चाभिन्न इति। पदमभिन्नतात्पर्य्याभिधेयमिति विशेषः। तेन तात्पर्य्यभेदे लाटानुप्रासोऽभिधेयभेदे यमकञ्च न दोषः। पदार्थोऽभिन्नपर्य्यायशब्दोपात्त इति शेषः। तेन पूर्वस्माद्विशेषः स्वाभिधेयतात्पर्य्यैकपदावृत्तिः पर्य्यायोपादानं च द्वयमपि शब्दपुनरुक्तमिष्यते तथाच परमार्षे सूत्रं "शब्दयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादादिति" ॥ युक्तं चैतत्। एकस्याभिधेयस्य द्विरभिधानं दोषः। तत्राभिधानं तेनैव पदेन पर्य्यायेण वा सम्भवतीति शब्दमादायैव तस्य व्यवस्था पुनरुक्तिरत्रैव पदे भवति तत्कोऽत्र मत्वर्थ इत्यत उक्तम्। यत्र तदिति। यत्र समुदायेऽवयवः पुनरुक्तरूपः स मतुवर्थः। अतएव नानापदनिरूपणीयतया वाक्यदूषणमिति स्फुटोऽर्थः। विकल्पितं चेदं लक्षणमेकस्यैव दूषणधुरारोहणक्षमत्वात्। संक्षेपार्थं त्वेकमुदाहरणम्। अर्थमादायैव पुनरभिधानं पुनरुक्तमिति

अत्र उत्काम् उन्मनयन्ति इति अर्थपुनरुक्तम्। गम्भीराः स्तनयित्नव इति शब्दपुनरुक्तम् ॥ २८ ॥

व्याकीर्णं तन्मिथो यस्मिन् विभक्तीनामसङ्गतिः।

यथा,—दण्डे चुम्बति पद्मिन्या हंसः कर्कशकण्टके।
मुखं वलगुरवं कुर्वन् तुण्डेनाङ्गानि घट्टयन् ॥

अत्र कर्कशकण्टके दण्डेऽङ्गानि घट्टयन् हंसः पद्मिन्या मुखं चुम्बतीति वक्तव्ये यथानिर्दिष्टरूपे विघट्टितविभक्तिकयुक्तित्वाद् व्याकीर्णम् ॥ २९ ॥

वाक्यान्तरपदैर्मिश्रं सङ्कीर्णमिति तद्विदुः ॥

विभावयितुं लक्षणक्रमवैपरीत्येन प्रथममर्थपुनरुक्तमुदाहृतमित्याशयवान् व्याख्यानेऽपि तमेव क्रममाद्रियमाण आह। अत्रोत्कामिति उत्क उन्मनाः। उन्मनयन्तीति। उन्मनसं कुर्वन्तीति णिचि इष्ठवद्भा वेटिलोपे च रूपम्। अम्भोधरा इति विशेष्यपदम्। शेषाणि विशेषणानि। गम्भीरा मांसला: स्तनयित्नवः शब्दायमानाः। तद्वित्नः प्रकृष्टतयुक्ताः ॥ २८ ॥

व्याकीर्णं तदिति। पदानामक्लेशेऽप्यर्थप्रतीतिहेतुभूताकाङ्क्षावद्विभक्तिव्यवधानादनाकाङ्क्षितविभक्तिसन्निधानाच्च। नाहत्यपदानि विशिष्टार्थज्ञानजननसमर्थानि भवन्ति विलक्षणलक्षणक्लेशपदानि भ्रमकराणीति वदतामाराध्यानामयमेवाभिप्रायो बोद्धव्यः। विभक्तिव्यवधानमात्रकृतस्तु क्लेशः प्रायेण पदैकवाक्यतायामुत्पद्यते। दण्ड इति। आधारविभक्तिराधेयविभक्तिमपेक्षते न तु चुम्बतीति क्रिया विभक्तिम्। सापि कारकविभक्तिमाकाङ्क्षति। पद्मिन्या इति सम्बन्धविभक्तिकमेव तत्र बोद्धव्यम्। क्लेशेन योऽत्रावगम्यते तमभिमतमर्थमावेदयति। अत्र कर्कशेति। अतएव नापार्थकत्वेन सङ्करः समुदायार्थस्य प्रतीयमानत्वात्। अस्ति कश्चिदुच्चारणयोर्विशेषो येन वाक्यार्थप्रतीतिः क्वचिदाहत्य भवति। क्वचित्तु नेति स एव विशेषः। सन्निधानं व्यवधानमिति व्याख्यायते। कार्यदर्शनादर्शनाभ्यां बोध्यीयत इत्याशयवानाह। यथोक्तरूपेणेति ॥ २९ ॥

यथा,—काअं खाअइ खुहिओ कूरं फेल्लेइ णिब्भरं रुट्ठो।
सूणअं गेण्हइ कण्ठे हक्केइ अ णत्तिअं ठेरो॥

अत्र काकं क्षिपति क्रूरं खादति कण्ठे नप्तारं गृह्णाति श्वानं भोषयते इत्यादौ वक्तव्ये यथोक्तपदविन्यासः सङ्कीर्य्यते॥ ३०॥

विभिन्न प्रकृतिस्थादि पदयुक्त्यपदं विदुः॥

यथा,—आउज्झिअ पिट्ठिअए जह कुक्कुलिणा ममज्झ भत्तालो।
पेक्खन्त हलाउलकलणिआ ह हा कस्स कन्देमि॥

वाक्यान्तरपदैर्मिश्रमिति। वाक्यैरसंवलितानि पदानि वाक्यान्तरमनुप्रविश्य तथा प्रतीतिं विघ्नयन्ति यथा समुदाय एव दूषितो भवति। क्रूरं भक्तं क्षुधितः खादति। काकं च निर्भरं रुष्टः सन् क्षिपति श्वान च निवारयति नप्तारं च कण्ठे गृह्णाति स्थविरजातिः। आकाङ्क्षाक्रमेण किञ्चित्पदं कस्यचिद्वाक्यस्य सम्बद्धमिति ज्ञायत एव तदाह। अत्र काकं क्षिपतीति। शब्ददोषत्वं प्रकाशयति। इति वक्तव्य इति। यथोक्तपदविन्यास इत्यनेन सङ्कीर्य्यत इत्यस्यार्थो विवक्षितः। एवं प्रकारः सङ्कर इत्यर्थः। विजातीयसम्बलने लोके सङ्करव्यवहारः॥ ३०॥

विभिन्नेति। षोढा पदं भवति। प्रकृतिस्थं कोमलं कठोरं ग्राम्यं नागरमुपनागरं च तत्रानेकदीर्घं स्वरकृतगौरवमेकसंयोगकृतगौरवं पदं प्रकृतिस्थम्। यथा नीहारतारानीकाशसारसीत्यादि। इलपल्लवकङ्कणकर्पूरादि च। यथा च। पाडिव आमाणं सिणिवे आलगीलेत्यादि त्यज्भतुज्भ उत्ताविलविहत्थति अक्खेत्यादि च। एकस्वरकृतगौरवं गुरुशून्यं वा कोमलम्। करेणुतारकसरोजनिकरादि। मधुरमसृणसरससरलेत्यादि च। यथा नीहारवाण इवाणवेणीत्यादि। परकुअलडहतलिणेत्यादि च सानुस्वारविसर्गदीर्घस्वरकृतगौरवं संयोगबहुलं वाक्कठोरम्। यथाशुद्धं पयः पाचयांबभूव ताः पिब। आहिषातामित्यत्र। अच्छाच्छ तत्रस्थव्यूढोरस्कप्रच्छन्नेत्यादि च। तथाच आईइए इत्यादि उप्पिच्छउप्पुपुअएकमेक्कमित्यादि च प्रसिद्धमादाय ग्राम्यादि त्रयं भवति। प्रसिद्धि स्त्रिधा। सार्वलौकिकी पण्डितजनगामिनी तदुपजीविविचतुरलौकिकगामिनी

तदेतत् प्रकृतिस्थकोमलकठोराणां नागरोपनागराणां ग्राम्याणां वा पदानामयुक्तेरपदम् ॥ ३१ ॥

चेति। तत्र सर्वलोकप्रसिद्धं ग्राम्यम्। देशीपदानि सर्वाणि अपसंस्कृतेषु हसविवाहभगिनीहारकङ्कणादिकं तुभ अम्हहलिहासाहज्जादिकं च। एतदपभ्रंशसमानप्रसिद्धिकमतिप्रसिद्धं चेति गीयते। ग्राम्यवैपरीत्येन नातिप्रसिद्धं नागरं नगरेणोपमितमिति कृत्वा अतिप्रसिद्धाभावेनोपमा। इदमेव नात्यप्रसिद्धमुपनागरमित्युच्यते। यथा। आद्याशकिशारुखरलीलातङ्गेत्यादि। सुन्दिवअच्छेव गुप्पन्तीविवलाआइत्यादि च। शृङ्गारप्रकाशे तु भाषाणामपि भेदो पदमित्युक्तम्। इह तु शब्दजात्यौचित्याविवेचनेन गतमिति ग्रन्थकर्तुराशयः। तदेवं स्थिते प्रतिपदं कवीनां कीऽपि क्रमो निर्वाह्यो नलवकमादेवालूनविशीर्णभावो विधेयः। तदिदमाह विभिन्नेत्यादि। युक्तिरुचिता योजना सा प्रकृतिस्थादीनां विभिन्नाऽन्वयानीताऽत्युक्तिरिति यावत्। एतदुक्त्यत्ययुक्तेरिति। आउज्झिअ इति। आवर्ज्य केशेषु नमयित्वा। आउज्झिए इति पाठे निर्भर्त्स्य। पिट्टिअए ताडाते। जह कुक्कूलि। यथा कुक्कुरी नाम शब्दः प्राकाश्ये प्रकाशमेव ताडितमित्यर्थः। मज्झ भत्तालि मम भर्त्तापेक्खन्तहला उलकणि आइ। अनादरे षष्ठी। राजकुलनियुक्तान् प्रेक्षमाणान् अनादृत्येत्यर्थः। हा शब्दः खेदे। कस्य क्रन्दामि कस्य फूत्करोमीत्यर्थः। अत्र प्रथमे पादे आउज्झिय इत्युपनागरं प्रकृतिस्थं च। आउज्झीति पाठे ग्राम्यं प्रकृतिस्थं च। भत्ताल इत्यपि तथा तृतीयपादे पेक्खत्त हेति कठोरमुपनागरं च। राउलकलणि आहेति ग्राम्यं प्रकृतिस्थं च इति ग्राम्यं कोमलं च। कस्सेति प्रकृतिस्थमुपनागरं च। कन्दिमीति ग्राम्यं प्रकृतिस्थं च तदिहैकरूप एवकर्मकरवधूलक्षणे ग्राम्ये वक्तरि एकरूप एववाक्यार्थे सर्वदोषतिरोधायकरसदीप्तप्रभावे च यथा भाषाणां व्यतिकरो दूषणं तथा ग्राम्यादीनामिति। सहृदयमात्रवेद्यस्यायं पन्था इत्यवहितैर्भवितव्यम्। एतेषां च स्वरूपं स्वयमेव गुणीभावप्रस्तावे लेशतः प्रकाशयिष्यति तेनेह संक्षिप्तवान्। नैवंविधः कदापि व्यतिकरो महाकविगिरामाजानिकः प्रवर्त्तते। तथाहि। त्यजती मङ्गलचौमे दधानस्य च वल्कले। दृष्टयुर्विस्मितास्तस्य मुखरागं समं जनाः॥ अत्र प्रथमादिषु पादेषु चौमचीरविस्मितरागपदानि उपनागराणि शेषाणि ग्राम्याणि। प्रतिपादं च प्रकृतिस्थकोमलाभ्यामेव निर्वाहः। एवमन्यत्रापि प्रत्येकं द्वन्द्वसमुदायैः प्रतिपादमुपक्रमोपसंहारनिर्वाहक्रमः स्वयमुपलक्षणीय इत्यास्तां तावत्॥ ३१॥

वाक्यान्तरसगर्भं यत्तदाहुर्वाक्यगर्भितम् ॥

यथा,—योग्यो यस्ते पुत्रः सोऽयं दशवदन लक्ष्मणेन मया।
रक्षैनं यदि शक्तिर्मृत्युवशं नीयते विवशः ॥

अत्र योग्यो यस्ते पुत्रो लक्ष्मणेन मया मृत्युवशं नीयते इति वाक्यस्य रक्षैनं यदि शक्तिरिति वाक्यान्तरेण सगर्भत्वात् गर्भितत्वम्।

यत्रोपमा भिन्नलिङ्गा भिन्नलिङ्गं तदुच्यते।
भवेत्तद्भिन्नवचनं यद्भिन्नवचनोपमम् ॥

यथा,—अविगाह्योऽसि नारीणामनन्यवचसामपि।
विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः ॥

अत्रापगेव त्वमविगाह्योऽसीति लिङ्गभेदः। नारीणामुत्तितीर्षत इति लिङ्गभेदो वचनभेदश्च। तदिदं द्वयोरेकमेवोदाहरणम् ॥ ३२ ॥

वाक्यान्तरेति। मध्यप्रविष्टं वाक्यं पूर्वोत्तरभागाभ्यामेकीभूतस्य गर्भायमाणमेकस्वरसप्रसूतां प्रतीतिं विघ्नयदात्मना सहैव समुदायं विरसकचामारोहयति। वाक्यान्तरं वाक्यस्य विशेषो विवक्षितः प्रतीतिव्यवधायक इति यावत्। योग्य इति। मयेति। कारकविभक्तिः क्रियाकाङ्क्षणशीलायास्तामसङ्गमय्य मध्ये रक्षैनं शक्तिरित्येतावता गर्भस्थानीयेन विरसीकरणमित्याह। अत्र योग्यो य इति। एवं वाक्यरूपताभङ्गहेतून् दोषानभिधाय तत्रैव काव्यभावप्रत्यूहहेतवोऽभिधातव्यास्ते च गुणभङ्गद्वारका अलङ्कारभङ्गद्वारकाश्छन्दोभङ्गद्वारका यतिभङ्गद्वारकाश्चेति चतुर्धा विप्रथन्ते। ततश्च यद्यपि प्रथमं गुणभङ्गद्वारका वक्तुमुचितास्तथापि तेषां बहुलादृदुरूहत्वाच्च सूचीकटाहन्यायेन पश्चात्करणमलङ्कारभेदादिषु च मध्ये प्रतियोगिद्वाराऽलङ्कारभङ्गस्य प्राधान्यमिति तद्द्वारा दोषान् लक्षयति। यत्रोपमेति। उपमाग्रहणमुपलक्षणमित्यग्रे वक्ष्यामः। उपमा उपमितिः सादृश्यभिन्नोपमानवाचिन उपमेयवाचिनश्च लिङ्गं स्त्रीपुन्नपुंसकं यस्य सा तथोक्ता। एवं भिन्नवचनोपममित्यत्रापि व्याख्येयम्। अविगाह्योऽसीति। अविगाह्यतामात्रमत्र

अथ भिन्नलिङ्गस्यैव यथा,

वापीव विमलं व्योम हंसीव धवलः शशी ।
शशिलेखेव हंसोऽयं हंसालिरिव ते यशः ॥

भिन्नवचनस्यैव यथा,

सरांसीवामलं व्योम काशा इव सितः शशी ।
शशीव धवला हंसी हंसीव धवला दिशः ॥ ३३ ॥

न्यूनोपममिह न्यूनमुपमानविशेषणैः ।

यथा,—संहदचक्कवाअजुआ विअसिअकमल मुणालसंच्छण्णा ।
वावी बहुव्व रोअणविलित्तथणआ सुहावेइ ।

अत्र नेत्रबाह्वपमापदानां बधूविशेषणत्वेनानुक्तत्वादिदं न्यूनोपमम् ॥ ३४ ॥

सादृश्यं विवक्षितमेतदुपयुक्तमेव विशेषणमुपमानोपमेययोरुपादानयोग्यमित्यकस्मादेव विकृतवचनभेदनिबन्धनः प्रयोजनमाकाङ्क्षति । तथा तदनुसन्धानप्रवणस्य प्रकृतप्रतीतिराच्छाद्यत इति दूषणसिद्धिः । एतेन दूषणता व्याख्याता । विभागवाक्ये संहितावस्थयोरुद्देशादिह च मिलितयोरुदाहरणात्तथा भावी दोषत्वमिति भ्रान्तिं निरस्यति । तदिदमिति । एकमुदाहरणं न तु एकः सन्भिन्न उपाधिः प्रत्येकमेवत्वस्ति समर्थत्वादित्यर्थः । एतदेवानुसन्धाय विभागवाक्ये द्वे पदम् ॥ ३२ ॥

तत्किमुदाहरणस्य सङ्कीर्णत्वमेव नेत्याह । अथ भिन्नलिङ्गस्यैवेति । इयमपि निगदव्याख्यातम् ॥ ३३ ॥

जातिप्रमाणधर्मतो न्यूनता उपमानस्य न्यूनोपमत्वम् । तत्र जातिप्रमाणन्यूनतार्थदोषः । धर्मन्यूनता तु धर्माभिधायकपदन्यूनतालक्षणाशब्ददोष एव । एतेनाधिकत्वं व्याख्यातमित्याशयवानाह । न्यूनोपममिहेति । इहशब्दो येषु मध्येषु उपमानस्य स्त्रीकविशेषणतया उपमेयन्यूनेत्युक्तं तथाधिकोपममिति वक्ष्यति । संहतचक्रवाकयुगा विकसितकमलमृणालसंछन्ना । वापीवधूरिव रोचनाविलिप्तस्तनी सुखयति । अत्र चक्रवाकयुगोपमानपदमेव परमुपात्तम् । रोचनाविलिप्तस्तनीत्यनेन कमलस्त्रीपमानं नेत्रपदं मृणालस्त्रीपमानं बाहुपदं च नोपात्तं तदपि च सविशेषणमुपादेयं भवति । येन विकासादिसमभिव्याहारसामञ्जस्यमपि

अधिकं यत् पुनस्तैः स्यात्तदाहुरधिकोपमम् ॥

यथा,

अहिणवमणहरविरइअवलअविहूसा विहाइ णववहुआ।
कुन्दलएव्व समुप्फुल्लगुच्छपरिणित्तभमरगणा ॥

इदं भ्रमरगणस्योपमानविशेषणस्याधिक्यादधिकोपमम् ॥३५॥

भग्नच्छन्द इति प्राहुर्यच्छन्दोभङ्गवद्वचः।

यथा,—यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः।
तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः ॥

अत्र पञ्चमवर्णस्य लघोः स्थाने गुरोः करणाच्छन्दोभङ्गः ॥ ३६ ॥

स्यादिति। पदानामिति बहुवचनाभिप्रायः। अतएव धर्माणामेकनिर्देशेऽन्यसंविसाहचर्य्यादिति नावतरति व्यभिचारात्। किमर्थं तस्योपमानमनुसन्धेयमित्यपि वाच्यम्। मात्रापि नानर्थिका कविनीपादेवेति साहित्यविदामाय व्यवस्थितावुपमेयविशेषणस्योपमानविशेषणतया प्रयोजनचिन्तायां पूर्ववदेव प्रतीतिप्रत्यूहस्य सुलभत्वादनुक्तत्वादिति शब्दप्रधानकतामाचष्टे। एवमुत्तरत्र ॥ ३४ ॥

अभिनवमनोहरविरचितवलयविभूषा विभाति नववधूः। कुन्दलतेव समुत्फुल्लगुच्छपरिनिर्यद्भ्रमरगणा ॥ यद्यप्यत्र विशेषणाधिक्ये विशेषणन्यूनत्वे वाऽन्यविशेषणस्य न्यूनाधिकभावो नियतस्तथाप्युपमानगतस्येव इयं निरूप्यते। तत्र हि दृष्टमुपमेये प्रतिबिम्बकल्पमुपस्थाप्यते तेनान्तो नोपमेये तयोर्निरूपणमिति ॥ ३५ ॥

भग्नच्छन्द इति। वाचां अव्यवच्छेदश्छन्दस्तस्यैवोपमानयुक्तादयस्तेनैव गुरुलघुनिवेशक्रमेण अव्यता भवतीत्याशयात्। तस्य विपर्यासश्छन्दोभङ्गो व्यक्त एव वैरस्यहेतुः। आहुरिति। पद्योदाहरणत्वावच्छेदविपर्य्यासत्वे च भग्नवृत्तव्यवहारादिदमेव निमित्तमस्यावधार्य्यत इत्यर्थः। पञ्चेति। पञ्चजनाः पुरुषास्ते देवपितृगन्धर्वराक्षसासुरभेदात्पञ्च। अथवा निषादपञ्चमब्राह्मणादि चतुष्टयभेदात्। तमेवात्मानं ब्रह्मपरपर्य्यायं विज्ञाय श्रवणमननिदिध्यासनैरुपास्य प्रज्ञां प्रकृष्टं ज्ञानं साक्षात् कुर्वीत। अत्र पञ्चमवर्ण इति। "पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः। षष्ठं गुरु विजानीयाच्छेषास्त्वनियता मताः" इत्यनुष्टुप्छन्दसो लक्षणम् ॥ ३६ ॥

अस्थाने विरतिर्यस्य तत्तु भग्नयतीष्यते ॥

यथा,

ब्रह्मेन्द्रोपेन्द्रादिगीर्वाणवन्द्यो भक्तानां भूयाच्छ्रिये चन्द्रचूडः ।
स्त्रीणां सङ्गीतं समाकर्णयन् केतूदस्ताम्भोदं सदोऽध्यास्त ईशः ॥

अत्र चतुर्थस्थाने यतौ कर्त्तव्यायां तदन्यत्र यतिकरणाद् भग्नयतीदम् ॥ ३७ ॥

क्रियापदविहीनं यदशरीरं तदुच्यते ।

यथा,—शैलसुताऽरुद्धङ्गं मुद्राणा बद्धमुद्धसंसिलेहम् ।
सीसपरिट्ठिअगङ्गं सञ्जापणअं पमहणाहम् ॥

क्रियापदाभावादशरीरमिदम् ॥ ३८ ॥

अस्थान इति । अन्यः पठितिविच्छेदो यतिर्विच्छिद्य विच्छिद्य पठ्यमाना भारती खण्डते । अन्यतीपलक्षणार्थञ्च हिमुनिवेदादिसञ्ज्ञया तत्र तत्र विविच्यते । तथा चास्ति कश्चिद्विशेषो येन क्रियमाणापि विरतिर्न सौभाग्यपदं पुष्यति स च विशेषो नाम भागभेदोऽस्वरसन्धिकृतश्च प्रायेण एतेषां स्वभावविशेषादेव स्थाने क्रियमाणापि विरतिरन्यत्रैव पर प्रकाशते । न तत्र कथञ्चन सौभाग्यमुन्मीलयति । स्थानपरिभाषया व्यावर्त्तितत्वात् । तदिदमुक्तमस्थान इति । वामनोऽप्याह ॥ विरसविरामं कष्टमिति । सदोगृहरूपा सभा केतूदस्ताम्भोदं ध्वजदण्डोत्क्षिप्तजलधरमित्युच्चैस्तम् । वेदच्छेदा शालिनीमोऽथ तौ गौ इत्युपलक्षणं अन्यविरतेः । अत्र द्वितीयपादे धातुभागभेदःशेषपादत्रये नामभागभेदाः । न चात्र स्वरसन्धानमस्तीति ॥ ३७ ॥

क्रियापदेति । क्रियेत्युपलक्षणम् । प्रधानपदनहीनमिति बोद्धव्यम् । प्रधानाविमर्शेहि वाक्यशरीरमेव न निष्पन्नं स्यात् । शैलेति । शैलसुतारुद्धाङ्गं मूर्द्धावद्धभुग्नशशिलेखम् । शीर्षपरिष्ठितगङ्गं सन्ध्याप्रणतं प्रमथनाथम् ॥ वाक्ये क्रियाप्रधानमिति दर्शने तत्पदानुपादानादत्र प्रधानाविमर्शः । शैलसुतयाऽवरुद्धमङ्गं यस्य तम् मूर्द्धायां आबद्धा भुग्ना शशिलेखा येन तम् शीर्षे प्रतिष्ठिता गङ्गा येन तम् यश्च सन्ध्यायै प्रणतस्तं प्रमथनाथं प्रमथा गणास्तेषां नाथम् । कर्मविभक्तेः क्रियाम-

गुणानां दृश्यते यत्र श्लेषादीनां विपर्य्ययः॥
अरीतिमदिति प्राहुस्तत्त्रिधैव प्रचक्षते।
शब्दार्थोभययोगस्य प्राधान्यात् प्रथमं त्रिधा॥
भूत्वा श्लेषादियोगेन पुनस्त्रेधोपजायते।
अत्र यः श्लेषसमता सौकुमार्य्यविपर्य्ययः॥
शब्दप्रधानमाहुस्तमरीतिमतिदूषणम्।

तत्र। विपर्य्ययेण श्लेषस्य सन्दर्भः शिथिलो भवेत्॥
यथा,—आलीयं मालतीमाला लोलालिकलिला मनः।

न्तरेणाचरितार्थत्वात् क्रियाया नमस्काररूपाया व्यभिचारेणार्थापत्तिविषयतानुपपत्तेरिति। अस्यां च गाथायां स्त्रीमयव्यापाररूपता भगवतः प्रतीयते इति रहस्यमाराध्या मन्यन्ते॥ ३८॥

गुणसङ्घटारकदोषनिरूपणावसरोऽयमित्याशयवानाह। गुणानामिति। समाध्यादिभङ्गोऽपि तर्हि दोषः स्यादित्यत आह। श्लेषादीनामिति। श्लेषप्रसादसमतासौकुमार्य्यार्थव्यक्तिमाधुर्य्यकान्त्युदारतौजसाम्। एतद्योगाद्वाक्यं वक्ररूपतामासाद्य काव्यव्यपदेशं लभते तेषां गुणानां भङ्गः काव्याभासत्वपर्य्यवसायी दोषः। ते च श्लेषादयो नवैव। तेषामन्यतमाभावे काव्यस्याभासत्वात्। तेषां हि विपर्य्यये रीतिरवश्यं भज्यते। तस्यागुणवत्पदरचनारूपत्वादतएव पानकरसन्यायेन सम्भूय चित्रास्वादपर्य्यवसानक्षमं गुणसम्वलनमेव रीतिरिति लोचनकारः। रीतिः साररूपतया काव्यस्यात्मेत्युच्यते। यथा चित्रस्य लेखा उत्तुङ्गप्रत्यङ्गलावण्योन्मीलनक्षमा तथा रीतिरिति द्वितीये विस्तरः। तत्त्रिधेति। तदिति काकाक्षिगोलकवत्पूर्वापराभ्यामभिसम्बध्यते। यत्र गुणानां विपर्य्ययस्तदरीतिमत्। तत्त्रिधेत्यर्थः। त्रिधाभूतं भूयस्त्रिधा प्रचक्षते तेन नवभेदाः तदेतद्विवृणोति। शब्दार्थेति। योगशब्दः प्रत्येकमन्वीयते। शब्दप्रधानत्वमर्थानपेक्षशब्दनिरूप्यत्वम्। वाक्यगुणस्य श्लेषादित्रयस्य। एवशब्दानपेक्षार्थनिरूपणीयत्वं तादृशस्य कान्त्यादित्रयस्य। एतेन ओजःप्रभृतित्रिकस्य उभयप्रधानता व्याख्याता। तेनायमर्थः शब्दार्थोभयप्रधानतया सामान्यतस्त्रिधाभूत्वा श्लेषादित्रिकविवक्षया प्रत्येकं त्रिधा भवतीति। तेषु शब्दस्य प्राधान्यात् प्रधानकगुणभङ्गः प्रथमं विवेक्तव्य इत्याह।

निर्मूलयति मे मूलात्तमालमलिने वने ॥

अत्र भिन्नानामपि पदानां एकपदताप्रतिभासहेतुरनतिकोमलो बन्धविशेषः श्लेषः ॥ तद्विपर्ययेण शब्दप्रधानोऽयं श्लेषविपर्ययः ॥ ३९ ॥

भवेत् स एव विषमः समताया विपर्ययात् ।

यथा,—कोकिलालापवाचालो मामेति मलयानिलः ।

उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥

अत्र पूर्वार्द्धस्य मृदुबन्धत्वादुत्तरार्द्धस्य च गाढ़बन्धत्वात् समबन्धेषु विषममिति विषमो नाम शब्दप्रधानः समताविपर्ययो दोषः ॥ ४० ॥

सौकुमार्य्यविपर्य्यासात् कठोर उपजायते ।

तत्रेति । अरीतिमतीति । निर्द्धारणे सप्तमी । जात्यभिप्रायमेकवचनम् । विपर्य्ययेणेति । श्लेषः सन्धानं घटनमित्यनर्थान्तरम् । न चैतावतैव गुणत्वं वाक्यमात्रसाधारणत्वात् । तेन बहूनामपि पदानामेकताप्रतिभासहेतुत्वमनतिकोमलत्वं च विशेषणमिच्छन्ति । विशेषमर्थगुणकाण्डे वक्ष्यामः । एवम्भूतविशेषणविपर्यासे शिथिलो बन्धोऽतिकोमलो विकीर्णप्रायश्चेत्यर्थः । आलीयमित्यादौ दन्त्यवर्णप्रायतयाऽतिकोमलत्वं विकीर्णता च व्यक्तैव । नास्य निरूपणे क्वचिदप्यर्थापेक्षेति स्फुटयन्नाह । अत्र भिन्नानामिति । श्लेषस्य शब्दप्रधानतया तद्विपर्योऽपि शब्दप्रधानो भवतीत्याह । शब्दप्रधानोऽयमिति । अन्यतरविशेषणहानावपि श्लेषाभावो भवत्येव । तेन पूर्वार्द्धस्य लेशत ऐक्यप्रतिभानसम्भवेऽपि अतिकोमलतया दुष्टत्वम् ॥ ३९ ॥

भवेदिति । स एव सन्दर्भो मृदुमध्यकठोरवर्णनिर्व्यूढास्त्रिधो बन्धजातयस्तत्रैकरूपे वाक्यार्थे एकैव जातिरुपादेयेति तद्विपर्यासो वैराग्यहेतुरेव । उच्छलन्तः शीकरा यस्मात्तथाऽच्छाच्छमत्यच्छं द्वयमपि निर्झराम्भो विशेषणम् । मलयमारुतस्योद्दीपनविभावभूतस्य वर्णमात्रवैरूप्यमस्येत्याशयवानाह । एतत्पूर्वार्द्धस्येति । शब्दप्रधानतामस्य विवृणोति । समबन्धेष्विति ॥ ४० ॥

यथा,—असितर्त्तितुगद्रिच्छित् स्वःक्षितां पतिरद्रिदृक् ॥
अमिद्भिः शुभ्रदृग्दृष्टैर्द्विषो जेष्णोयिषीष्ट वः ।
अत्रातिकठोरत्वादसौकुमार्य्यं सुप्रतीतमेव ॥ ४१ ॥
या तु कान्तिप्रसादार्थव्यक्तीनामन्यथा स्थितिः ।
अर्थप्रधानः प्रोक्तः स वाक्ये गुणविपर्य्ययः ॥
अप्रसन्नं भवेद्वाक्यं प्रसादस्य विपर्य्ययात् ॥
यथा,—अनङ्गकमलं चक्रे मयमाना मरालिका ।

सौकुमार्य्यविपर्य्यासादिति । अकठोराक्षरप्रायता बन्धस्य सुकुमारत्वं तद्विपर्य्ययो कठोरता श्रुतिकटुत्वं भवति । असितर्त्तीति । ऋगताविति धात्वनुसारादृतिर्वर्त्म । अमिता कृष्णा ऋतिर्वर्त्म यस्य कृष्णवर्त्मा वह्निस्तस्य तुक् अपत्यम् । अद्रिच्छिदिति । क्रौञ्चदारणत्वात् । स्वर्गे च्छियन्ति निवसन्ति ये देवास्तेषां पतिः सेनानीत्वात् । अद्रिदृग् द्वादशलोचनत्वात् । स एवं भूतो भगवान् कुमारोऽमिद्भिरस्निग्धैरूक्षैः शुभ्रदृग्दृष्टैर्धवलाक्षिविलोकितैः सक्रोधनिभालने तारकाभागस्योर्द्ध तया नयनात् तथा भावीजातिर्वीयुष्माकं द्विषः शत्रून् जेष्णोयिषीष्ट अत्यर्थं पुनः पुनर्वा वध्यादित्यर्थः । हन्तेर्यङि ष्णीभावे आशीर्लिङि रूपम् । स्वतन्त्रस्य पदस्य श्रुतिकटुता पददोषः । इह तु पदानाम् अतथाभावेऽर्त्तिद्रिच्छि इत्यादीनां वर्णानां परस्परसन्निधाने घटनैव कठोरेत्याह । अत्रातिकठोरत्वादिति ॥ ४१ ॥

या तु कान्तीति । कान्तिप्रसादार्थव्यक्तीनामिति प्रमादात्पाठः । विवरणक्रमानुरोधेन प्रसादार्थव्यक्तिकान्तीनामिति पठनीयम् । अप्रसन्नमिति । श्रुतमात्रस्यैव यस्य अर्थश्चित्ते प्रतिफलति स प्रसन्नः शब्दः । तथा च अर्थस्य प्राकट्यं झटिति प्रतिबन्धयोग्यत्वम् । पश्चादिव गतिर्वाचः पुरस्तादिव वस्तुन इति सहृदयव्यवहारार्थविषयत्वं प्रसादोऽर्थनिरूपणीय इति भवति अर्थप्रधानः । न चासौ पदमात्रमुल्लिखतीति वाक्यांशो भवति । तेन तद्विपर्य्ययोऽपि वाक्यगामी । अर्थस्य यत्र झटिति प्रतीतिरुपजायते । तत्र तत्र सहारानशब्द एवापराध्यतीति वाक्यदोषेषु परिगणनमभ्यच्छ तया च शब्दानां प्रतीतिः स्खलन्ती दूषणतामस्य ख्यापयति । अनङ्गकमिति । न विद्यतेऽङ्गं यस्य इत्यनङ्गकमाकाशं मयमाना गच्छन्ती । अयमयेति दण्डकेषु पठितत्वात् मयधातोः शानच् । मरा-

यस्यानत्यर्जुनाजन्मसदृक्षाङ्गो वलक्षगुः ॥

अत्र शब्दानामनतिप्रसिद्धार्थत्वादप्रसन्नत्वमिति सोऽयमर्थप्रधानः प्रसादविपर्य्ययो दोषः ॥ ४२ ॥

वाक्यं भवति नेयार्थमर्थव्यक्तेर्विपर्य्ययात् ॥

यथा,—मही महावराहेण लोहितादुद्धृतोदधेः ।
इतीयत्येव निर्दिष्टे नेया लोहित्यहेतवः ॥

तदिदं निगदेनैव व्याख्यातमित्यर्थप्रधानोऽयमर्थव्यक्तिविपर्य्ययः ॥ ४३ ॥

लिका हंसी। अलञ्चक्रे शोभितवती। ननु हंस्या गमनपथालङ्करणकाली रात्रिस्तस्यां च तुषारकिरण एव तदलङ्कारकारी किमनया वराक्या इत्यत आह। यस्येति। यदत्यर्जुन न भवति अजन्म तीयभयं नीलोत्पलमिति यावत्। तत्सदृशलाञ्छनो वलक्षगुः वलक्षी गौः किरणो यस्य शशांशुः चन्द्रस्तेन अमौ सकलङ्कतया न तथालङ्काराय यथेयमित्यर्थः। पश्येति। वाक्यार्थकर्मकमेके पठन्ति। तन्न युक्तम्। चक्र इति परोक्षतास्वरसभङ्गापत्तेः। उक्तयुक्त्या वाक्यदोषत्वमाह। अत्र शब्दानामिति। न च मयमानादीनां श्लिष्टता। तल्लक्षणविरहात्। नापि गूढार्थत्वं तत एव ॥ ४२ ॥

वाक्यमिति। सम्पूर्णं वाक्यत्वमर्थव्यक्तिं करोतीति वक्ष्यति। सर्वस्य वाक्यस्य विशेषणविशेष्यभावबोधकत्वनियमे यावता विशेषणविशेष्यभावोऽभिमतस्तावत्प्रतिपादकपदोपादानं संपूर्णता। सा च विशेषणविशेष्यभावानुरूपार्थनिरूपणीयतयार्थप्रधानेति तद्विपर्य्ययोऽपि तत्प्रधान इति पूर्ववत् नेयम्। अतएव विवक्षितवाक्यान्यथानुपपत्त्या नेयः कल्पनीयोऽर्थो यस्येति नेयार्थमित्यर्थोऽपि घटते। महीति। पूर्वार्द्ध एव काव्यं निर्वर्त्तितम्। न च तावता विवक्षितार्थलाभः। तथाहि। समुद्रमध्यात् पृथिव्यामुद्ध्रियमाणायां महासुरविमर्दे तेषां दंष्ट्रया पाटनेन रुधिरश्यवलतया लोहितत्वमुदधेरिति वाक्यार्थोऽभिप्रेतः। लक्षणाया अभावात् न नेयार्थत्वं पददूषणमत्र सम्भावनामारोहति। दूषणतावीजं चात्र स्फुटमेव। अशरीरं तु क्रियापदशून्यमित्युक्तं तदेतत्सर्वमभिप्रेत्याह। तदिदं निगदेनैवेति ॥ ४३ ॥

कान्तेर्विपर्य्ययाद्वाक्यं ग्राम्यमित्यपदिश्यते।

यथा,—विरहे ते विषीदन्तं निषीदन्तं तवान्तिके।

कन्ये कामयमानं मां त्वं न कामयसे कथम्॥

इदमुक्तेर्ग्राम्यतया कान्तिहीनमित्यर्थप्रधानोऽयं कान्तिविपर्य्ययो दोषः।

ओजो माधुर्य्यमौदार्य्यं न प्रकर्षाय जायते॥

यस्मिंस्तमाहुरुभयप्रधानं तद् विपर्य्ययात्॥ ४४॥

वाक्ये यः खण्डयन् रीतिं भवत्योजोविपर्य्ययः।

असमस्तमिति प्राहुर्दोषं तमिह तद्विदः॥

यथा, स्मरः खरः खलः कान्तः कायः कोपधनः कृशः।

च्युतो मानोऽधिको रागो मोहो जातोऽसवो गताः॥

कान्तेरिति। रसस्य दीप्तिः कान्तिरग्रे विवरिष्यते तेनार्थप्रधानता व्यक्ता। तस्यामस्तिवाक्यवाचयोर्व्यापारः। वाक्यं विदग्धोक्तिकं व्याप्रियते। अतथाभूतस्य रसाव्यञ्जकत्वनियमात्। तथाहि। कन्येति सम्बोधनेन रसविरोधिनी विलसिताचमता प्रतीयते। कामयमानमित्यनेन अनावरणमुच्यमानोऽर्थः कथं न वैरस्यम् आवहतीत्यादिकमुन्नेयम्। तदिदमाह। इदमुक्तेर्ग्राम्यं तयेति॥४४॥

वाक्ये य इति। ननु समासभूयस्त्वमोजोऽभिधास्यते तत्कथमस्याभावोऽर्थप्रधानोऽपि कथञ्च दोष इत्यत आह। खण्डयन् रीतिमिति। रीतिर्भङ्गपर्य्यवसायी तस्याभावो दूषणं न तु तन्माचमित्यर्थः। एतदुक्तम्भवति। शब्दार्थयोरुचिता प्रौढिरोजः। यदाह "रौद्रादयो रसा दीप्ता लक्ष्यन्ते काव्यवर्त्तिनः। तद्व्यक्तिहेतु शब्दार्थावाश्रित्यौजोव्यवस्थितमिति। तत्रार्थव्यक्तिमर्थगुणेषु विवेचयिष्यामः। शब्दस्य तु पारुष्यशैथिल्यव्यतिकरलक्षणा सा च क्वचित् समासदीर्घतया व्यज्यते। यथा। चञ्चद्भुजभ्रमितचण्डगदाभिघातसञ्चूर्णितोरुयुगलस्य सुयोधनस्येति। क्वचिदन्यथापि प्रकाश्यते। यथा। यो यः शस्त्रबिभर्त्तीत्यादि। तदेवं तत्व्यवस्थितौ पूर्वाचार्य्यव्यवस्थित्या गुणकाण्डे समासभूयस्त्वमोजोलक्षणं व्यभिचरितगुणमध्ये समासरचनासौष्ठवं वक्तृचमतया गुण इत्यभिप्रायादिशेषं तत्र

अत्र सत्यसमस्तपदाभिधाने सत्यपि च अर्थस्य सौकुमार्य्यं श्लेषादिगुणसामग्र्यभावान्न वैदर्भीरीतिः। नापि यथोक्तलक्षणाभावात् गौड़ीयादय इति। खण्डितरीतित्वादयमोजोविपर्य्ययः शब्दार्थप्रधानो गुणविपर्य्ययो दोषो भवति। यदाह।

इत्यादिबन्धपारुष्यं शैथिल्यञ्च नियच्छति।
अतो नैनमनुप्रासं दाक्षिणात्याः प्रयुञ्जते ॥ ४५ ॥

माधुर्य्यव्यत्ययो यस्तु जायते रीतिखण्डनात्।
तदनिर्व्यूढमित्युक्तं काव्यसर्वस्ववेदिभिः ॥

यथा, नखिनाञ्च नदीनाञ्च शृङ्गिणां शस्त्रपाणिनाम्।
विश्वासो नैव कर्त्तव्यः स्त्रीषु राजकुलेषु च ॥

वक्ष्यामः। तदिदमिति। रीतिं खण्डयतीति। न हि प्रौढेरभावे गुणसम्बन्धनात्मिका रीतिर्नामेति विपर्य्ययपदेन साधारणेन पारुष्यशैथिल्ये दर्शयति। अत्र इति। एतदेवाचार्य्यमतेन द्रढयति। यदाहेति। यद्यप्यत्रानुप्रासोऽस्ति तथापि रीतिमन्तरेण मृतशरीर इव काव्येनालङ्करणतामध्यास्ते। ततश्च न प्रकृतः कोऽपि चमत्कारावाविर्भाव इति नास्त्येव काव्यतां प्रयोजयतीत्यर्थः। दाक्षिणात्या वैदर्भीमाहुः। पारावरीणास्ते हि विशिष्टरीतिस्वरूपमवधारयितुं क्षमा इति ॥ ४५ ॥

माधुर्य्यव्यत्यय इति। शब्दार्थयोश्चित्तद्रुतिविधायित्वं माधुर्य्यम्। निचुलितत्वमिवार्द्रतापदाभिधेया चेतसोऽवस्था तत्कारिता माधुर्य्यम्। सा च शृङ्गारकरुणान्यतरप्रकाशानुगुणव्यापारावेशेन भवति। यदाह। शृङ्गार एव मधुरः परः प्रह्लादनो रसः। तन्मयं काव्यमाश्रित्य माधुर्य्यं प्रतितिष्ठति। शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत्। माधुर्य्यमात्रतां याति यतस्तत्राधिकं मन इति। तत्र शब्दस्य माधुर्य्यं पृथक्पदतया व्यज्यते। दीर्घसमासस्य यत्रान्तरसाध्यतया सुकुमाररसप्रकाशसामग्रीवहिर्भावात्। ततश्च शब्ददूषणप्रस्तावे पृथक्पदतामात्रप्रत्ययो यदि उच्यते गौड़ीया दुष्टा स्यादिति रीतिखण्डनपर्य्यवसायितयाऽभिधानम्। भवति हि कदाचित्कवेः शक्तिवशात्सोल्लेखेऽपि समासे रसव्यक्तिः। यथा। याते द्वारवतीं तदा मधुरिपौ तद्दत्तसङ्गानतां कालिन्दीतटरूढवञ्जुलतामालिङ्ग्य

अत्र नखिनां नदीनाञ्चेति षष्ठ्यन्ताञ्चकारेण रीतेरुपक्रमे शृङ्गिणां शस्त्रपाणिनामिति चकारानिर्वाहात् स्त्रीषु राजकुलेषु चेति षष्ठीपरित्यागादमधुरार्थत्वाच्च माधुर्य्यविपर्य्ययनामायं शब्दार्थप्रधानो गुणविपर्य्ययो दोषः॥ यदाहुः।

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः॥
यया कयाचिच्छ्रुत्या यत् समानमनुभूयते।
तद्रूपा हि पदासत्तिः सानुप्रासा रसावहा॥ ४६॥

यस्तु रीतेरनिर्वाहादौदार्य्यस्य विपर्य्ययः।
वाक्यं तदनलङ्कारमलङ्कारविदो विदुः॥

यथा, दीर्घपुच्छश्चतुष्पादः ककुद्मान् लम्बकम्बलः।

सोत्कण्ठया। उद्गीतङ्गुरुवाष्पगद्गदगलत्तारस्वरं राधया येनान्तर्जलचारिभिर्जलचरैरप्युत्क्रमुत्कूजितम्॥ एवञ्चाखलितप्रतीतिविषयस्यैव सन्दर्भस्य रसत्वं पदघटनारूपस्य च सन्दर्भस्यानिर्वाहादेव प्रतीतिः स्खलतीत्याह। तदनिर्व्यूढमिति। काव्यसर्वस्वं रसप्रकाशस्तद्वेदिभिस्तदुपायभूतघटनास्वरूपवेदिभिः। एतदेवव्याख्यानेन स्फुटयति। अत्रेति। नखिनां नदीनाञ्चेति चकारेणोत्तरत्र तत्परित्यागेऽनुपपत्तिर्जागर्त्ति तदेव प्रतीतेः संवलनमेवमुत्तरत्रापि। अस्तु तर्हि वस्त्वसत्त्वेऽप्येकदिङ्माधुर्य्यसम्पत्तौ काव्यताप्रतिलम्भ इत्यत आह। अमधुरार्थत्वाच्चेति। स्पष्टमेतच्छब्दार्थप्रधानतान्माधुर्य्यस्य पूर्वाचार्य्यसमत्या द्रढयति। यदाहेति। माद्यन्ति आर्द्रचित्ता भवन्ति। मधुरसादृश्यादयं व्यवहार इत्यत आह। मधुनेति। इदञ्च घटनाया माधुर्य्ये परम रहस्यमित्याह। यया कयाचिदिति। औष्ठ्यकण्ठ्यादिकं वा तद्रूपसमानश्रुतिकमादौ यस्य यथाभूतस्य पदस्य प्रत्यासत्तिस्तद्रूपाहीति पाठे व्यक्त एवार्थः। अतएव सानुप्रासा ततश्च रसावहेत्यर्थः। यदाह कङ्कणादिविमुक्तापि कान्ता किमपि शोभते। कुङ्कुमेनाङ्गरागश्चेत्सर्वाङ्गीणः प्रवर्त्तत इति॥ ४६॥

विकटतामात्रभावस्यादोषत्वाद्विशेषयन्नाह यस्तु रीतेरिति। काव्यरूपताप्रयो-

गोरपत्यं बलीवर्दस्तृणमत्ति मुखेन सः ॥

तदिदमपुष्टार्थत्वादनुत्कृष्टविशेषणमनुदारं निरलङ्कारमाचक्षते सोऽयमौदार्य्यविपर्य्ययो नाम शब्दार्थप्रधानो गुणविपर्य्ययो दोषः ॥ यदाह ।

श्लाघ्यैर्विशेषणैर्युक्तमुदारं वाक्यमिष्यते ।
यथा लीलाम्बुजक्रीडासरोहेमाङ्गदादयः ॥
उत्कर्षवान् गुणः कश्चिदुक्तेर्यस्मिन् प्रतीयते ।
तदुदाराह्वयं तेन सनाथा काव्यपद्धतिः ॥ ४७ ॥
अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम् ।
खिन्नं चैवातिमात्रञ्च परुषं विरसं तथा ॥
हीनोपमं भवेच्चान्यदधिकोपममेव च ।
असद्दृष्टोपमं चान्यदप्रसिद्धोपमं तथा ॥
निरलङ्कारमश्लीलं विरुद्धमिति षोड़श ।
उक्ता वाक्यार्थजा दोषास्तेषां वक्ष्यामि लक्षणम् ॥
समुदायार्थशून्यं यत्तदपार्थं वचः स्मृतम् ।

जकं शब्दार्थयोर्वक्रता उदारता न हि वक्रतामन्तरेण काव्यपदवीप्राप्तिस्तदाह । यत्तु वक्रं वचः शास्त्रे लोके च वच एव तत् । वक्रं यदनुरागादौ तत्र काव्यमिति श्रुतिरिति । तदेतदलङ्कारसामान्यमस्याभावे निरलङ्कारता भवतीत्याह । अनलङ्कारमिति । दीर्घपुच्छ इत्यादौ प्रकृतोदाहरणे द्वयोरवक्रत्वं स्फुटयति । यथेति । विविच्य गुणप्रस्तावे कथयिष्यामः । अर्थपीषमाह । उत्कर्षवानिति । उभयप्रधानतामुपसंहरति । काव्येति ॥ ४७ ॥

तदेवं वाक्यदोषान् लक्षयित्वा क्रमप्राप्ता वाक्यार्थदोषा लक्षणीया इति तान् विभजते । अपार्थमिति । उद्देशे दोषाणां व्यासेनोक्तिः । पूर्वोक्तप्रयोजनानुरोधेनेति । समुदायिपदानां विशेषणविशेष्यभावः समुदायार्थः । तेन शून्यं पदजातमपार्थकं पदार्थानामसंसर्गेण पदानामसंसर्गोऽभिधीयते । तेनार्थ-

यथा,

जरद्गवः कम्बलपादुकाभ्यां द्वारि स्थितो गायति मङ्गलानि।
तं ब्राह्मणी पृच्छति पुत्रकामा राजन् रुमायां लशुनस्य कोऽर्घः॥

अत्र समुदायार्थः कोऽपि नास्तीत्यपार्थमिदम्॥ ४८॥

व्यर्थमाहुर्गतार्थं यद् यच्च स्यान्निष्प्रयोजकम्॥

यथा, आंहिषातां रघुव्याघ्रौ शरभङ्गाश्रमं ततः।
स्वामहौषीत्तनुं वह्नौ दृष्ट्वा तौ रामलक्ष्मणौ॥

अत्रांहिषातां दृष्ट्वेत्येताभ्यामेव ताविति, रघुव्याघ्रावित्यनेनैव रामलक्ष्मणाविति, तनुमित्यनेनैव स्वामिति, अहौषी-

---

दोषत्वम्। जरद्गव इति। कम्बलपादुकाभ्यामिति लक्षणे तृतीया। न च ताभ्यां द्वङ्गोचस्य सम्बन्धः। कथञ्च तस्य मङ्गलानां धवलादीनाम्। मद्रकाणामिति पाठे गीतकविशिष्टाणां वा सङ्गतिः कथं वा पुत्रकामायास्तत्प्रश्नसंसर्गः कथं च राजन्निति सम्बोधनं घटते पुत्रकामायाश्च रुमालवणार्घप्रश्नः। रुमालवणाकरः। तथाच प्रयोगः। रुमाघासकान्तादिलवणात्मवदिति॥ ४८॥

व्यर्थमिति। विज्ञाती वाविगती वाऽर्थोऽभिधेयम् प्रयोजनं यस्य तद्व्यर्थं स्वतन्त्रञ्च दूषणमिति वैशेषिके वक्तव्यम्। तथाहि। आंहिषातामिति। अंहेर्गतिकर्मणो लुङि रूपम्। स च प्राचुर्य्यप्रयोगः प्राप्तवच्छिन्न व्यापारप्रचयमभिधत्ते। तथाचार्यसिद्धायां प्राप्तौ शब्देनोपादानमनुचितं लोकानुसारेण काव्ये दृशिश्चाक्षुष एव ज्ञाने प्रयुज्यते। यथा। मया तावद्दृष्टो न खलु कलिकन्दर्पनृपतेर्गुणैस्तुल्यः कोऽपि क्वचिदपि किमश्रावि भवता। इति प्रश्नं श्रुत्वा क्वणितमिव कर्णान्तिकमगान्मृगाक्षीणां चक्षुश्चटुलभवता चान्ततरलम्। यथा वा नैवादर्शि न चाश्रावि। फलं मलयभूरुहः। चक्षुश्च प्राप्तमेव गृह्णतीत्यर्थलभ्यायां प्राप्तौ कथं शब्देन उपादानम्। तदिदमुक्तमेताभ्यामेवेति। रघुव्याघ्रादिप्रकरणादिकमासाद्य विशेषपर्य्यवसायि यौगिकत्वात् न तु विशिष्टे एव शक्तम्। "उपगम्य रघुव्याघ्रः कच्छभूभागचारिणीम्। लुलुभे मुनिधेनुं तां वेलामिव महार्णवः॥" इति महर्षिप्रयोगात्। एतेन पुष्पवदादिपदवद्वचनभेदोऽप्यपास्तः। एवञ्च प्रकरणादिना रघुव्याघ्रपदं रामलक्ष्मणपरमेवेति पूर्वार्द्धे

दित्यनेनैव वङ्गाविति गम्यत इति गतार्थत्वम्। न च शरभङ्गाश्रमगमनं तनुहोमो वा अग्रतः कथाशरीरोपयोगीति निष्प्रयोजकत्वम्। अतोऽयं व्यर्थनामा वाक्यस्य महावाक्यस्य च दोषो भवति। आर्थ्या च वृत्त्या लब्धस्य शास्त्रेतिहासादौ शब्दवृत्त्या भणनमपौनरुक्त्याय इत्यर्थपुनरुक्तेर्भिद्यते ॥ ४९ ॥

उक्त्यभिन्नार्थमेकार्थं

यथा,

प्रसाधितस्याथ सुरद्विषोऽभूदन्यैव लक्ष्मीरिति युक्तमेतत्।

तयोरेव प्रक्रान्तत्वात् तदङ्गे सर्वनाम्ना परामर्शो युज्यते न तु स्वशब्देन। तनुप्रभृतिशब्दानां सम्बन्धिशब्दत्वात् समभिव्याहृतशब्दार्थसम्बन्धकत्वं लोके व्युत्पन्नम्। यथा "करौ धुनाना नवपल्लवाङ्गुलीर्द्विधा कृता मानिनि मा परिश्रमसिति। शब्दान्तरसन्निधाने तु क्वचित्ताद्रूप्यावगमो भवति। यथा। उमास्तनोऽङ्गे दमनुप्रवङ्गी मनोरथो यः प्रथमश्चभूव। तमेव मेना दुहितुः कथञ्चिद्विवाहदीक्षातिलकञ्चकार। तदिहान्यस्यानुपादानाच्छरभङ्गसम्बन्धिन्येव तनुः प्रतीयते जुहोतिश्च वङ्गाधारकमेव हविर्द्रव्यत्यागमभिधत्ते तेन वङ्गावित्यपि न वाच्यम्। गतार्थशब्दं व्याचष्टे। गम्यत इति। अस्मिन्नेवोदाहरणे निष्प्रयोजनत्वमाह। न चेति। शरभङ्गाश्रमगमनं तनुहोमश्चात्र वाक्यार्थद्वयं न प्रयोजनवत्। अस्य वाक्यस्य चरितार्थत्वात्। किं प्रयोजनान्तरगवेषणयेत्यत आह। अत इति। यद्वाक्यपोषणाद्यनौपयिकपदमप्रयोजकवचसा प्रागुक्तं तथाच प्रबन्धाद्यर्थपोषपर्य्यवसायि वाक्यमेव। इहापि अवाच्यवचनस्य स्फुटत्वात्। न चाश्रमगमनतनुहोमौ करिष्यमाणवीररसोचितकथा शरीरे कामपि शोभामात्रामर्पयत इति वाक्यस्य महावाक्यस्य चेति यथासङ्ख्यमन्वयः। कथं पुनर्गतार्थं प्रसाधितस्येत्यादेरर्थपुनरुक्तात्भिद्यत इत्यत आह। आर्थ्या चेति। शब्दवृत्त्यैवावगतस्य शब्दवृत्त्या पुनरुक्तम्। अर्थतो लब्धस्य शब्दवृत्त्या भणनमित्येकः प्रकारः। अर्थतो लाभं व्युत्पादयति। शास्त्रेति। अस्य रघुकुलभुवः शरभङ्गाश्रमगमनमितिहासाच्चक्षुषः प्राप्तस्यैव ज्ञानजनकत्वं शास्त्रात्। शरभङ्गसम्बन्धिन्येव तनुर्होमव्युत्पत्तिसेन नियमेन ह्यर्थतः प्राप्तिर्भवतीत्यभिप्रायः ॥ ४९ ॥

उक्ताभिन्नेति। वाक्यान्तरोक्ताभिन्नतात्पर्य्यार्थो यस्य तत्तथोक्तम्। तथाहि।

वपुष्यशेषेऽखिललोककान्ता साऽनन्यकान्ता ह्युरसीतरा तु॥

इत्युक्तैकार्थमेवाह।

कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य।
आलिङ्गिताशेषजना बभूव सर्वाङ्गसङ्गिन्यपरैव लक्ष्मीः॥

अनयोः श्लोकयोरभिन्नार्थमेकं वाक्यं महावाक्ये दुष्यति॥ ५०॥

सन्दिग्धार्थं ससंशयम्।

यथा, मनोरथप्रियालोकरसलोलेक्षणे! सखि!।
आराद्वृत्तिरियं माता न क्षमा द्रष्टुमीदृशम्॥

अत्रारात् प्रभृतिशब्दानामुभयार्थत्वात् माता द्रक्ष्यति न वेति सन्दिग्धम्। ॥ ५१॥

प्रसाधितस्येत्यादि श्लोके श्लेषोपहितेन व्यतिरेकेण कापि अपूर्वा कृष्णस्य लक्ष्मीस्तत्काले बभूवेति तात्पर्यार्थः। तेनैव प्रकारेण कपाटेत्यग्रिमश्लोके स एवास्ति तुल्यार्थत्व उपादानं भिन्नार्थत्वेऽपि तदिदमाह। अनयोः श्लोकयोरिति। महावाक्ये श्लोकद्वयरूपे एकमन्यतरद् दुष्यति हेयं भवतीत्यर्थः॥ ५०॥

सन्दिग्धार्थमिति। शब्दस्वरूपनिश्चयेऽपि वाक्यार्थो दोषायते इति अर्थदोषत्वम्। तथाहि। मनोरथेत्यादौ मनोरथे यः प्रियो वल्लभस्तदालोकरसेन लोलेक्षणे हे हे चपललोचने तव मातेयमाराद्वृत्तिर्दूरवर्त्तिनी। अतो नैतादृशं सानुरागाङ्गनाजनयोग्यं द्रष्टुं क्षमा इति व्यवस्थापनात् न अवलोकयितुं शक्ता ततो निःशङ्कमालोकस्वेति वाक्यार्थे उतेयमाराद्वृत्तिः समीपदेशवर्त्तिनीः। आराद्दूरसमीपयोः। तथाचेदृशं कुलाङ्गनानुचितं चारित्रखण्डनं द्रष्टुं न क्षमा न सहिष्णुः अतो मा नयनचापलं कार्षीरिति। नानार्थपदप्रक्षेपात् साधकबाधकप्रमाणाभावाच्च सन्दिह्यत इत्याह। अत्रारात् प्रभृतिशब्दानामिति। न च मिथो विरोधिनोरेकत्र विवक्षा सम्भवति। न चास्ति प्रकरणादिकमेकनियामकं न च मातुः प्रकोपशङ्कया प्रियविलोकनरसोत्कायाः मनोरथभङ्गो न भवतीत्यर्थः॥ ५१॥

वाक्यं यत्तु क्रमभ्रष्टं तदपक्रममुच्यते ॥

यथा, कारावित्रुण खउरं गामउलो मज्जिओ जिमिओअ ।
णक्खत्ततिहिवारे जोइसिअं पुच्छिउं चलिओ ॥ (क)

अत्र क्षुरकर्मणोऽनन्तरं नक्षत्रादिप्रश्नादिदम् अपक्रमम् ॥५२॥

जात्याद्युक्तावनिर्व्यूढं खिन्नमाहुर्महाधियः ।

यथा, विवाहिऊ णववहुआ सासुरअं दोलिआइ णिज्जन्ती ।
रोअइ दिअरो तां सण्ठवेइ पास्सेण वजन्तो ॥ (ख)

(क) कारयित्वा चौरं ग्रामप्रधानः मज्जित्वा जिमितश्च ।
नक्षत्रवारान् ज्योतिष्कं प्रष्टुं चलितः ॥

(ख) विवाह्य नववधूः श्वाशुरकं (श्वशुरगृहं) दोलिकया नीयमाना ।
रोदिति देवरस्तां संस्थापयति पार्श्वेन व्रजन् ॥

वाक्यं यत्त्विति । कारयित्वा चौरं ग्रामउलो ग्रामप्रधानपुरुष इति देशीयाः । ग्रामेऽपि वा यः कुटोऽव्युत्पन्नः मज्जिओ सुस्नातश्च जिमिओअ भुक्तवाश्च ततो नक्षत्र तिथिवारौ च ज्यौतिषिकं प्रष्टुं चलितः । तिथिवार-ज्ञानानन्तरं क्षुरकर्म ततः स्नानभोजने इति लौकिकः क्रमः तस्य विप-र्यासो व्यक्त एव क्षाश्रुतिवचनात् । क्रियमाणेऽपि रचनावैपरीत्येन क्रमभंशः समाधीयत इति नासौ शब्ददोषः । अत्र पूर्वार्द्धोपात्तानां क्रमो न विपर्यस्तः किन्तु चौरोत्तरार्द्धोक्तयोरित्याह । अत्र क्षुरकर्मण इति ॥ ५२ ॥

जातीत्यादि वाक्यार्थो द्विविधः । स्वतःसम्भवी कविप्रौढोक्तिनिर्मितश्च । तत्र असति विशेषहेतौ यज्जातीयमर्थं बुद्ध्या व्यवस्थाप्य वचनोपक्रमस्तज्जातीयस्यैव समस्तवाक्यनिर्वाहो युक्तो न तु अन्तरेण परित्यागेन भेदः । उपक्रान्तनिर्वाहा-शक्तौ लोके खिन्न इत्युच्यते । तदिदमुक्तं जात्यादीति । आदिपदेन स्वतः सम्भविविशेषाणामुपमादीनां कविप्रौढिनिर्मितानाञ्च रूपकादीनां परिग्रहः । स्वतःसम्भवी नवपरिणीतास्वभाववर्णनार्थः तावदुपक्रान्तः तथा सति यो जन्मा-

अत्र प्रक्रान्तस्य नवपरिणयवतीस्वरूपभणनस्यानिर्व्यूढत्वात् खिन्नत्वम् ॥ ५३ ॥

यत् सर्वलोकातीतार्थमतिमात्रं तदुच्यते ॥

यथा, भृङ्गेण कलिकाकोषस्तथा भृशमपीड्यत।
ववर्ष विपिनोत्सङ्गे गोष्पदप्रं यथा मधु ॥

अत्र कलिकाकोषे गोष्पदप्रमधुवर्षस्यासम्भवादतिमात्रत्वम् ॥ ५४ ॥

यत्तु क्रूरार्थमत्यर्थं परुषन्तु तदुच्यते।

यथा, खाहि विसं पिअ मुत्तं णिज्जसु मारीअ पडउ दे वज्जम्।
दन्तखण्डिअथणआ खिविऊण सुअं सवइ माआ ॥ (ग)

अत्र खाद विषमित्यादीनां क्रूरार्थानामभिधानात् पारुष्यम् ॥ ५५ ॥

(ग) खाद विषं पिब मूत्रं नीयसे मार्य्या पततु ते वज्रम्।
दन्तखण्डितस्तनी चिक्षिप्य सुतं शपति माता ॥

श्वशुरपितृगृहवियोगवेदनादूनमानसाया अत्यन्तापरिशीलितेन दैवरेण संस्थापनप्रकारः स न जातौ निविशते। परिशीलितभर्तृकुलाया अकुलाया वा तत्रौचित्यात् तस्या एव हि किञ्च न वक्तव्यं भवतीत्याह। अत्र प्रक्रान्तस्येति ॥ ५३ ॥

यत् सर्वलोकेति। गोष्पदप्रमिति पूरेर्णिजन्ताद्दर्षप्रमाण ऊलीपश्चास्य अन्यतरस्यामिति णमुल्। ऊलीपश्च। कलिकामकरन्दपरिणामस्य एतावती लोके न प्रसिद्धिः। न चैतत् खिन्नमेव कलिकाकुसुमस्यानुपक्रमात् किन्तु स्वरूपभ्रमात् लोकमर्य्यादातिरिक्तवृत्तमुपात्तमिति पृथगेव दोषः ॥ ५४ ॥

यत्त्विति। खाद विषमित्यत्र इत्थं माता पुत्रमाक्रोशति किं कृत्वा चिक्षिप्य भूमौ निरस्य। कुतो दन्तखण्डितस्तनी यतो बाल्ये दन्तैर्मातुस्तनं दशतीति

अप्रस्तुतरसं यत् स्याद्विरसं तन्निगद्यते ॥

यथा, तव वनवासोऽनुचितः पितृमरणशुचं जहीहि किं तपसा।
सफलय यौवनमेतत् सममनुरक्तेन सुतनुर्मया ॥

अत्र पितृमरणसन्तप्तायाः सम्भोगप्रवर्त्तनमप्रकृतरसत्वाद्विरसम् ॥ ५६ ॥

हीनं यत्रोपमानं स्यात्तत्तु हीनोपमं स्मृतम्।

यथा, क्वचिदग्रे प्रसरता क्वचिदायत्यनिम्नता।
शुनेव सारङ्गकुलं त्वया भिन्नं द्विषत्कुलम् ॥

जातिसखाः पुनरेवंविधं परुषाभिधायित्वमनुचितम्। अतिपारुष्यमेव चात्र विरसताहेतुः। तेनातिमात्राङ्गदः ॥ ५५ ॥

अप्रस्तुतेति। अप्रस्तुतः प्रस्तावमन्तरेण सूचितो रसो यत्र तत्तथा। एकरसप्रक्रमे हि विरोधिरसान्तरप्रस्ताव एव क्रियमाणोऽनौचित्यवान्। नचौचित्यमन्तरेण रसस्य प्रबन्धसम्बन्धः सम्भवति। यदाह। अनौचित्यादृते नास्ति रसभङ्गस्य कारणम्। प्रसिद्धौचित्यबन्धस्तु रसस्योपनिषत्परेति। तव वनवास इत्यादौ पितृमरणानुभवप्राप्तशोकप्रकर्षायाः शृङ्गारप्रस्तावना विरसायते। सा हि स्वभावत एव करुणेन सह एकवाक्यसमावेशविरोधिनी। न चैकस्य बाध्यत्वमङ्गभावी वा अवगम्यते। नाप्युभयोरयं गुणीभावोऽवगम्यते। येनायं विरोधः समाधीयते। युक्तिरत्र विदग्धैव। अर्थस्तु रसात्माविरोधेन पदबन्धाति ततः कान्तिविपर्य्ययाङ्गदः। न च करुणोक्तिः उपक्रान्ता यतस्तदनिर्वाहे खेदसम्भावना स्यात्। किन्तु पितृमरणशुचं जहीहीत्यनेन शोकाविष्टायां शृङ्गारप्रस्तावना। तथाच भिन्नमेव दुष्टताबीजं तदेतत् सर्वमपि सन्धाय व्याचष्टे। अत्रेति ॥ ५६ ॥

इदानीमनौचित्यरूपदूषणप्रस्तावः। अर्थालङ्कारेषु उपमाप्रधानमिति प्रसिद्धा तस्यामेवोपलक्षणतयाऽनौचित्यं प्रपञ्चयति। हीनमित्यादि। हीनमपकृष्टमसज्जातीयमुपमानमित्युपमानप्रसिद्धा विशेषा उपमेये प्रतिबिम्बकल्पनाश्च प्रतीयन्त इत्युक्तम्। उत्कृष्टजातीयस्य उपमेयस्य हीनजातीयेन सामान्यमभिधीयमानं शाब्दन्यायेन बोधयदनुचितमेव भवति। यथा। रणाश्वमेधे पशुतामुपागता

अत्र शौर्यशालिनः गुणोपमितत्वाद्धीनोपममिदम् ॥ ५७ ॥

तदेव यस्मिन्नधिकं तद्भवेदधिकोपमम् ॥

यथा, अयं पद्मासनासीनश्चक्रवाको विराजते।

युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः ॥

अत्र चक्रवाकस्य जगत्स्रष्टा ब्रह्मणा उपमितत्वादधिकोपममिदम् ॥ ५८ ॥

यत्त्वतुल्योपमानं तद्वदन्यसदृशोपमम्।

यथा, णमह हरं रोसाणलणिद्दड्ढमुद्धमम्महसरीरम्।

वित्थअणिअम्बणिग्गअगङ्गासोत्तं व हिमवन्तम् ॥ (घ)

अत्र कोपानलनिर्दग्धमुग्धमन्मथशरीरस्य हरस्य नितम्ब-

(घ) नमत हरं रोषानलनिर्दग्धमुग्धमन्मथशरीरम्।
विस्तृतनितम्बनिर्गतगङ्गास्रोतसमिव हिमवन्तम् ॥

इति। ननु अत्र रूपकबलेन वर्णनीयस्य पशुतावगम्यत इति युक्तमनौचित्यम्। क्वचिदय इत्यादौ प्रकृतोदाहरणे तु कथम्। न हि अत्र प्रस्तुतोपस्कारस्य सारमेयता अवगम्यते। अये प्रसरणमायत्यनिहननञ्च सादृश्यमुपात्तमुचितमेवेति नैतत्। तत्प्रतिबिम्बे सादृश्यप्रतीतिरपि शब्देन क्रियमाणा लोके कान्तिं परिपुष्णाति न हि कदापि हीनेन सादृश्योक्तौ वर्णना सजीवा प्रतीयते। प्रतीतिमात्रपरमार्थश्च काव्यदर्शनमिति ॥ ५७ ॥

तदेवेति। हीनेनोत्कृष्टं यथा नोपमीयत इति लोकमर्यादा तथा उत्कृष्टेन हीनम्। तथाहि। चक्रवाकोपमितिम् अनुसन्दधतां विशेषावगतिविधुराणाञ्च सहृदयानां प्रतीतिः स्खलन्ती जनयत्येव वैरस्यमिति ॥ ५८ ॥

इदमपरमायातमनौचित्यं यत्सादृश्यबुद्ध्या निबन्धेऽप्यसादृश्यपर्यवसानमित्याह। यत्त्वतुल्येति। यद्यपि बलवत्त्वादिना प्रतीयमानं हिमवद्भगवतीरसि सादृश्यं तथापि वाच्योपमाभमेणायं निबन्धः सा च न सम्पन्ना न हि रोषेण निर्दग्धमन्मथ-

निर्गतस्रोतसा हिमवद्गिरिणा सह असादृश्यादिदमसदृशोपमम् ॥ ५९ ॥

अप्रसिद्धोपमानं यदप्रसिद्धोपमं हि तत् ॥

यथा,

कुमुदमिव मुखं तस्या गौरिव महिषः शशीव काव्यमिदम् ।
शरदिव विभाति तरुणी विकसितपुलकोत्करा सेयम् ॥

अत्र कुमुदमुखयोर्गौमहिषयोः काव्यशशिनोश्च प्रतीयमाने शरत्तरुण्योश्च अभिधीयमाने सादृश्ये उपमानोपमेयभावस्य अप्रसिद्धत्वादप्रसिद्धोपममिदम् ॥ ६० ॥

यदलङ्कारहीनं तन्निरलङ्कारमुच्यते ।

शरीरदाही विस्तृतनितम्बनिर्गतगङ्गास्रोतः प्रतिबिम्बभूतः धातुरङ्गरञ्जितो गङ्गाप्रवाहोऽभिमतश्च भवति । ललाटनेत्राग्निज्वालाप्रतिबिम्बमित्यपि न वाच्यम् । येनान्यत्वप्रसङ्गात् । नितम्बसम्बन्धोक्तिश्च न सङ्गता स्यात् । कथञ्च मथ्यशरीरदाहः प्रतिबिम्बायत इत्याशयेन व्याचष्टे । अत्रेति । विशेषणयोर्बिम्बप्रतिबिम्बभावाभावे विशिष्टयोरुपमा न सम्भवतीति मत्वा विशेषणद्वयमदोषायैवेति व्याख्यातवान् ॥ ५९ ॥

इदानीं कविसमयबहिर्भूतत्वेनोपमानोचितीमाह । अप्रसिद्धेति । कमलमुखयोरिव कुमुदमुखयोर्गौगवययोरिव गौमहिषयोः काव्यशब्दयोरिव काव्यशशिनोरस्ति सादृश्यं सौरभादिकमेव अनुपात्तमपि प्रसिद्धतया प्रतीयमानम् । शरत्तरुण्योस्तु न तथा प्रसिद्धमिति विकसितपुलकाङ्कुरमातीत्येताभ्यामुपात्तम् । पुलक इवाङ्कुर इति तत्राशयात् । विशिष्टभानस्य च द्वयानुगतत्वेनैव प्रतीयमानत्वात्तथापि पद इवालङ्कारेऽपि कविभिः अप्रयुज्यमानत्वमेव दोष इति व्याचष्टे । अत्रेति । प्रतीयमान इति । इव शब्दस्य द्योतकमात्रत्वात् । अभिधीयमानं व्याख्यातम् ॥ ६० ॥

वक्रताविशेषविशिष्टस्यैव अर्थस्य काव्यकोटिनिवेशादवक्रो हेय इत्याह ।

यथा, कोला खणन्ति मोत्थं गिद्धा खाअन्ति मडअमंसाइम् ।
उलुआ हणन्ति काए काआ उलुए वि वाअन्ति ॥ (ङ)

अत्र कोलादेः स्वरूपाद्यनभिधानाज्जात्याद्यलङ्कारासम्भवे निरलङ्कारनामायं वाक्यार्थदोषः । सविशेषणाद् गोरपत्यमित्यादेर्वाक्यदोषाद् भिद्यते ॥ ६१ ॥

अश्लीलमिति निर्दिष्टमश्लीलार्थप्रतीतिकृत् ॥

यथा, उद्यतस्य परं हन्तुं स्तब्धस्य विवरैषिणः ।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः ॥

अत्र उद्यतस्य परं हन्तुमिति सम्भोगारम्भविषया, स्तब्धस्य विवरैषिण इति वराङ्गविषया, पतनं जायतेऽवश्यमिति रेतो-

---

(ङ) कोलाः खनन्ति मुस्तां गृध्राः खादन्ति मृतकमांसानि ।
उलूका घ्नन्ति काकान् काका उलूकानपि वायन्ति (चिपन्ति) ॥

यदिति । वक्रताव्यतिरेकेऽलङ्कारसामान्यमेव न स्यादिति निरलङ्कारमित्युक्तम् । वीगतिव्याप्तिप्रजनकान्त्यसनखादनेष्विति धात्वनुसारात् । नन्वस्ति कोलादिस्वरूपमत्र । ततो जात्यलङ्कारेण वक्रत्वमाक्षिप्यते । विशेषस्य च सामान्यानन्तरीयकत्वात्कथमुच्यते निरलङ्कारमित्यत आह । अत्रेति । खं रूपञ्च चमत्कारकारि कविप्रतिभामात्रप्रकाश्यनीयं रूपं तदेवालङ्कारकत्वमधिशेते । न चात्र तथा किञ्चिदभिहितमतो न जात्यलङ्कारः । एवमन्योऽप्यलङ्कारो नास्ति । कथं तर्हि वक्रताऽभावरूप दीर्घपुच्छ इत्यादेः शब्ददोषाङ्गिद्यते तदाह । सविशेषणादिति । तत्र विशेषणप्रयोगे शब्दानामेव वक्रता व्यतिरेकेण अपवाद इति शब्ददूषणमिह तु न तथा । किन्तु उक्तमेव स्वरूपं न वक्रमिति वाक्यार्थ एव दुष्टः ॥ ६१ ॥

अश्लीलमिति । उद्यतस्येति । परमन्यं हन्तुमुद्यतस्य विवरैषिण इति प्रमादक्लृतावधानस्य स्तब्धस्य आत्मनि उत्कर्षाभिधानेन अन्यानवधीरयतः पतन-

विसर्गविषया, कृच्छ्रेण पुनरुन्नतिरिति नष्टरागप्रत्यानयन-विषया अश्लीलवाक्यार्थविषया प्रतीतिर्भवति ॥ ६२ ॥

विरुद्धं नाम तद् यत्र विरोधस्त्रिविधो भवेत्।
प्रत्यक्षेणानुमानेन तद्वदागमवर्त्मना ॥
यो देशकाललोकादिप्रतीपः कोऽपि दृश्यते।
तमामनन्ति प्रत्यक्षविरोधं शुद्धबुद्धयः ॥

तत्र देशविरोधो यथा,

सुराष्ट्रेष्वस्ति नगरी मथुरा नाम विश्रुता।
अक्षोटनारिकेलाढ्या यदुपान्ताद्रिभूमयः ॥

अत्र सुराष्ट्रेषु मथुरा नाम नास्ति तत्पर्यन्ताद्रिभूमिषु च अक्षोटनारिकेराणामभावात्। देशोऽद्रिवनराष्ट्रादिरित्ययं देशकृतः प्रत्यक्षविरोधः ॥ ६३ ॥

कालविरोधो यथा,

पद्मिनी नक्तमुन्निद्रा स्फुटत्यङ्कि कुमुद्वती।
मधुरुत्फुल्लनिचुलो निदाघो मेघनिस्वनः ॥

अत्र पद्मिन्या नक्तं, कुमुद्वत्या अङ्कि, मधौ निचुलाना-

आवश्यकमुद्गमः कृच्छ्रादिति संसर्गोऽभिमतः। एषामेव पदार्थानां संसर्गान्तरम-श्लीलमेवेत्याह। अत्र उद्यतस्येति। एतेन पददोषाद्विद उक्तः ॥ ६२ ॥

देशकालादेः काव्याङ्गत्वात्तद्विरोधेन अर्थो दुष्टः। विरोधश्च बाधः। सप्रमाणे-नैव तत्रो लोकादिविरोधस्य अलङ्कारसमयसिद्धस्य प्रमाणविरोधपर्यवसायित्व विवक्षन्नाह। विरुद्धमिति। तत्र देशकालादौ प्रत्यक्षत एव वर्ण्यमानस्य अभावो निश्चीयत इति देशादिविरोधः प्रत्यक्षविरोधः। शूरसेनेषु मथुरा न सुरा-ष्ट्रेषु। तत्पर्यन्तभूमिषु अक्षोटा नारिकेला वा न सम्भवन्ति। अद्रीणां कथं देशत्व-मित्यत आह। देशोऽद्रिवनराष्ट्रादिरिति ॥ ६३ ॥

पद्मिनीति। नक्तं रात्रौ मधुर्वसन्तः निचुलः इञ्जलः। ते वर्षासु पुष्यन्ति

सुन्निद्रत्वाद्यभावात् निदाघस्य चामेघदुर्दिनत्वात् कालो नक्तन्दिनर्त्तव इति कालकृतोऽयं प्रत्यक्षविरोधः ॥ ६४ ॥

लोकविरोधो यथा,—

आधूतकेशरो हस्ती तीक्ष्णशृङ्गस्तुरङ्गमः।
गुरुसारोऽयमेरण्डो निःसारः खदिरद्रुमः ॥

अत्र हस्तिहयैरण्डखदिराणां केशरादिसद्भावस्य प्रत्यक्षेण अनुपलम्भात्। जङ्गमः स्थावरो लोक इति लोककृतोऽयं प्रत्यक्षविरोधः ॥ ६५ ॥

युक्त्यौचित्यप्रतिज्ञादिकृतो यस्त्विह कश्चन।
अनुमानविरोधः स कविमुख्यैर्निगद्यते ॥

तत्र युक्तिविरुद्धं यथा।

सुरहिमहुपाणलम्पडभमरगणावद्धमण्डलीबन्धम्।
कस्स मणं णाणन्दइ कुम्मीपुठ्ठट्ठिअं कमलम् ॥ (च)

(च) सुरभिमधुपानलम्पटभ्रमरगणावद्धमण्डलीबन्धम्।
कस्य मनो नानन्दयति कूर्मपृष्ठस्थितं कमलम् ॥

न वसन्ते। यद्यपि कालस्वरूपमप्रत्यक्षं तथापि तदुपाधीनां व्यवहाराङ्गतेव प्रत्यक्षता चेत्याह कलानक्तन्दिनर्त्तव इति ॥ ६४ ॥

अन्ते प्रत्यक्षविरोधशब्दार्थं व्याचष्टे। प्रत्यक्षेण अनुपलम्भादिति। कथमयं लौकिकविरोध इत्यत आह। जङ्गमेति। जङ्गमस्थावरं जीवच्छरीरं लोकः। तत्र जङ्गम गवाश्वादि स्थावरं लतावृक्षादि राष्ट्रादावेव देशपरिभाषा इदं प्रकारान्तरेण देशशब्देनाभिधीयते ॥ ६५ ॥

युक्तीति। सामान्यतस्तादवनुमानविरोधी यत्प्रमाणाभावः न हि प्रमेयाभावे प्रसिद्धम्। तदयमर्थो युक्तिः प्रमाणम्। आधूतकेसरेत्यादौ उदाहरणे

अत्र कूर्मपृष्ठे कमलोद्भवेः अयुक्तियुक्तत्वाद् युक्तिविरुद्धमिदम् ॥ ६६ ॥

औचित्यविरुद्धं यथा ।

पट्टंसुउत्तरिज्जेण पामरो पामरीए परिपुसइ ।
अइगरुअकूरकुम्भीभरेण सेउल्लिअं वअणम् ॥ (छ)

अत्र पामरस्य पट्टांशुकोत्तरीयावरणानौचित्याद् औचित्यविरुद्धमिदम् ॥ ६७ ॥

प्रतिज्ञाविरुद्धं यथा,

यावज्जीवमहं मौनी ब्रह्मचारी च मे पिता ।

(छ) पट्टांशुकोत्तरीयेण पामरः पामर्याः प्रोञ्छति ।
अतिगुरुककूरकुम्भीभरेण स्वेदार्द्रितं वदनम् ॥

क्वचिदेव व्यक्तिविशेषे केसरादिसम्बन्धप्रतिपादनं कथमन्यथा तेषामेरण्डत्रिर्दिशति । ततो भवति प्रत्यक्षेणैव विरोध इह तु न तथा । न हि विशेषतः कापि कूर्मपृष्ठव्यक्तिरस्तीति सामान्याकारेण विवक्षितम् । ततश्च कमलजातेः पङ्कजप्रभवाया एव निश्चयात् कूर्मपृष्ठादुद्गमे न कश्चित्प्रमाणं कदापि कस्याप्यवतरतीति आशयवान् व्याचष्टे । अत्रेति । अयुक्तियुक्तत्वादिति । युक्तिः प्रमाणत्वेनासम्बद्धत्वादित्यर्थः ॥ ६६ ॥

औचित्यविरुद्धमिति । औचित्यं योग्यता तस्य विरुद्धं परामृश्यमानस्य विवक्षितविपरीतपर्य्यवसानम् । एषोऽपि अनुमानविरोधः । तथाहि । पट्टांशुकमित्यत्र अपूर्ववत् सम्बन्धग्राहकप्रमाणाभावः । कदाचिद्राजप्रसादादिना तथा सम्भवात् । किन्तु पामरौचित्यप्रतिसन्धाने पट्टांशुकावगुण्ठनमनुचितम् । विदग्धनेपथ्यपरिग्रहादिनागरकत्वापरिचय एव पामरत्वम् । ततश्चायमर्थो भवति पट्टांशुकसम्बन्धायोग्येयं पामरत्वादिति । कूरं भक्तम् । कुम्भी कलशी ॥ ६७ ॥

माता च मम बन्ध्यासीत् स्मराभोऽनुपमो भवान् ॥

अत्र स्वयं वक्तुरेव यावज्जीवमहं मौनीत्यादिपदानामुक्त्या प्रतिज्ञाविरोधात् प्रतिज्ञाविरुद्धमिदम् ॥ ६८ ॥

धर्मार्थकामशास्त्रादिविरोधः कोऽपि यो भवेत् ।
तमागमविरोधाख्यं दोषमाचक्षते बुधाः ॥

तेषु धर्मशास्त्रविरोधो यथा,—

असावनुपनीतोऽपि वेदानधिजगे गुरोः ।
स्वभावशुद्धस्फटिको न संस्कारमपेक्षते ॥

अत्रानुपनीतस्य वेदाध्ययनानधिकारात् धर्मशास्त्रविरोधः ॥ ६९ ॥

अर्थशास्त्रविरोधो यथा ।

कामोपभोगसाकल्यफलो राज्ञां महीजयः ।

प्रतिज्ञाविरुद्धमिति । अभ्युपगमवाक्यं प्रतिज्ञा । यथा । यद्यदादिश्यति स्वामी तत्करोम्यविचारयन्निति । साध्यनिर्देशस्य । अयं स रसनोत्कर्षी पीनस्तनविमर्दनः । नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः कर इति । इयमपि प्रतिज्ञापदेनाभिमतम् । तत्राद्ये यावज्जीवमहम्मौनी इत्युदाहरणम् । अव्याहारो मौनम् । तदभ्युपगमवाक्येनैव बोध्यते । तथाहि । नायं मौनी वचनवत्त्वादित्यभ्युपगम्य मौनाभावपर्य्यवसन्नमिति द्वतीयोऽयमनुमानविरोधः । द्वितीयपक्षकक्षीकरणेन चतुर्थोदाहरणे ब्रह्मचारी च मे पिता माता च मम बन्ध्येति वक्ता यस्यौरसः सुतः । स पितृपदेनाभिमतो न च ब्रह्मचारित्वं सम्भवति । माता जननी एव अभिधीयते न च तस्या बन्ध्यात्वं सम्भवति । परस्परव्याघाती विरोधः । अयञ्च पञ्चमप्रकारो यद्व्यापकद्वारा विरोधः । यथा । स्मराभोऽनुपम इति । न हि स्मराभत्वं लोके प्रसिद्धं किन्तु स्मरतुल्यतां वदन् सोपमानत्वमभ्युपगच्छति । तच्चानुपमत्वेन विरुद्धम् । ततो व्यापकविरोधोऽयम् । यथा वह्निरनुष्ण इति । आदिग्रहणादृष्टान्तद्वारकोऽनुमानविरोधः संगृहीतः ॥ ६८ ॥

वेदाध्ययनानधिकारादिति । अकृतव्रतबन्धे तु गुरावुपरते सति । नाभिव्याहारयेद् ब्रह्म स्वधानिनयनादृते इति धर्मशास्त्रम् ॥ ६९ ॥

अहङ्कारेण जीयन्ते द्विषन्तः किं नयश्रिया ॥

अत्र महीजयस्य फलत्वेन कामोपभोगानामर्थशास्त्रकारैः अननुमतत्वात् शत्रुविजये च अहङ्कारस्य अहेतुत्वादर्थशास्त्रविरोधः। कामशास्त्रविरोधो यथा,—

तवोत्तरोष्ठे बिम्बोष्ठि! दशनाङ्को विराजते।
पूर्णः सप्तस्वरः सोऽयं भिन्नग्रामः प्रवर्त्तते ॥ ७० ॥

अत्र उत्तरोष्ठे दशनाङ्कस्य कामशास्त्रकारैः अननुज्ञातात् कामशास्त्रविरोधः। भिन्नग्रामाणां च पूर्णसप्तस्वरत्वानुपपत्तेः। कलाविरोधेऽपि तदङ्गत्वात् कामशास्त्रविरोध एव ॥ ७१ ॥

एवं पदानां वाक्यानां वाक्यार्थानाञ्च यः कविः।

अत्र महीजयस्येति। महीजयस्य धर्मः फलमिति नीतिशास्त्रे स्थितम्। अहङ्कारो मानः स नः शत्रुविजये साधनम्। अरिषड्वर्गत्यागे हि इन्द्रियजयः। तथा विजिगीषुता। तया च शत्रुपरिभव इति। यदाह। स रघुराष्ट्रो विललास इत्युपक्रम्य कौटिल्याचार्यः मानाद्रावणः परदारानप्रयच्छन् दुर्योधनो राज्यांशं चेति ॥ ७० ॥

अत्र उत्तरोष्ठ इति। उपरितन ओष्ठ उत्तरोष्ठमन्तर्मुखं नयनान्तञ्च मुक्त्वा चुम्बनवद्दशनच्छेद्यस्थानानीति कामसूत्रम्। भिन्नग्रामरागाणामिति। भिन्नमार्गेषु सप्तस्वराणां समवायो नीपनिबद्धस्तथा सुग्रीवस्तु चैवतन्यासः पञ्चमर्षभवर्जितः षड्जो दीव्यतां जातो भिन्नषड्ज उदाहृतः। तमङ्गीऽप्याह। षाड्वौड़विके जाती भिन्नग्राम उदाहृतः। ततश्च षड्वा पञ्चवा स्वरा भवन्ति भिन्नग्रामे न तु सप्त। कामशास्त्रविरोधप्रस्तावे कथं कलाविरोध उदाह्रियत इत्यत आह। तदंशत्वादिति। गीतादिकला चतुःषष्टेः कामाङ्गतया कामसूत्रकारैरुपदेशाद्भवति तद्विरोधे कामशास्त्रविरोध इत्यर्थः। आदिग्रहणाद्देवताभक्तितो मुक्तिर्न तत्त्वज्ञानसम्पदेत्यादिकं मोक्षादिशास्त्रविरुद्धमुदाहरणीयम् ॥ ७१ ॥

दोषाणां प्रथममुद्देशो यमभिसन्धाय कृतः तं विशेषसंहारव्याजेन स्फुटयति।

दोषान् हेयतया वेत्ति स काव्यं कर्त्तुमर्हति ॥
अलङ्कृतमपि श्राव्यं न काव्यं गुणवर्जितम्।
गुणयोगस्तयोर्मुख्यो गुणालङ्कारयोगयोः ॥
त्रिविधाश्च गुणाः काव्ये भवन्ति कविसम्मताः।
बाह्याश्चाभ्यन्तराश्चैव ये च वैशेषिका इति ॥
बाह्याः शब्दगुणास्तेषु चान्तरास्त्वर्थसंश्रयाः।
वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः ॥
चतुर्विंशतिराख्यातास्तेषु ये शब्दसंश्रयाः।

एवमिति। तदेवं दोषलक्षणे वृत्ते क्रमप्राप्ता गुणा लक्षयितव्याः। तदेवमोजः-प्रसादादयो गुणाः। यमकादयस्त्वलङ्कारा इति पूर्वप्रसिद्धौ सत्यां विचार्यते। किमेषा मियाभदनिबन्धनं कथञ्चालङ्कारेभ्यो गुणानां पूर्वनिपातः। रसस्य हि दोषाभावादिव्यवस्थित एव पदलाभ इत्यस्ति पक्षाङ्गावे निबन्धनमिति तत्राह। अलङ्कृतमपीति। रसावलम्बिनो गुणाः, शब्दार्थावलम्बिनस्तु अलङ्कारा इति काश्मीरकाः। तदगमकम्। तथाहि। यदि काव्यस्य रसप्रधानात्मकतामाश्रित्याय विभागः। अलङ्कारा अपि तर्हि तत्प्रवणा एव। अथ नायन्नियमो यत्सर्वत्र रसः प्रधानमिति तदा अत्र गुणेषु अपि कथं तदालम्बननियमः। किञ्चात्र प्रसादादिवत् श्लेषादयोऽपि शब्दार्थगता एव प्रत्यभिज्ञायन्ते तत्कथमय विभागः। यद्यपि शब्दार्था ज्ञायन्ते तथापि रसप्रवणा इति चेत्। किमिदं रसप्रवणत्वं रसाश्रितत्वं तावन्न सम्भवत्येव। रसप्रतीतिपर्यवसानञ्च यथाकथञ्चिदलङ्कारेष्वपि तुल्यमिति अविचारितरमणीयोऽयं मार्गः। लोकशास्त्रवचनातिगामी कश्चित् विशेषः शोभापदाभिलषोभवन्नस्मिञ्छ्रव्यशब्दः शब्दार्थौ विषयीकरोति। ततश्च तथाभूतशोभानिष्पत्तिहेतवो गुणास्तदुत्कर्षहेतवस्तु अलङ्काराः। यदाह। काव्यशोभायाः कर्त्तारो धर्मा गुणास्तदतिशयहेतवस्तु अलङ्कारा इत्यन्ये। तदपि न। अस्य रसादिवदव्याप्तेः। न हि तेषां रीतिशरीरान्तर्निवेशः कैश्चिदभ्युपगम्यते तस्मादालङ्कारकसमयानुपाती श्लेषाद्यन्यतमो गुणः। जात्याद्यन्यतमय अलङ्कार इति विभागः। तत एव च शोभाकारित्वेन गुणानामप्यलङ्कारपक्षनिक्षेपं करिष्यति। तदभूतगुणस्तु स्फुटालङ्कारहीनमपि चमत्कारमावहत्येव।

ते तावदभिधीयन्ते नामलक्षणयोगतः ॥
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता ।
अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥
ओजस्तथान्यदौर्जित्यं प्रेयानथ सुशब्दता ।
तद्वत् समाधिः सौक्ष्म्यञ्च गाम्भीर्य्यमथ विस्तरः ॥
संक्षेपः संमितत्वञ्च भाविकत्वं गतिस्तथा ।
रीतिरुक्तिस्तथा प्रौढ़िरथैषां लक्ष्यलक्षणे ॥

तत्र, गुणः सुश्लिष्टपदता श्लेष इत्यभिधीयते ।

यथा,

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगङ्गापयसः पतेताम् ।

यथा । का त्वं शुभे, कस्य परिग्रहो वा, किं वा मदभ्यागमकारणं ते । आचक्ष्व मत्वा वशिना रघूणां मनः परस्त्रीविमुखप्रवृत्ति । यतो गुणयोगो मुख्यस्ततः प्रथममुद्दिष्टो लक्षितश्चैषः सामान्यगुणस्थितौ गुणान् विभजते । त्रिविधाश्चेति । शब्दः शरीरस्थानीयोऽधिष्ठेयतया प्रथमप्रतिसन्धेयतया च वाच्यः । ततस्तदाश्रिता गुणा अपि वाच्याः । अर्थस्त्वात्मतुल्योऽधिष्ठायकतया पश्चाद्ग्राह्यतया चाऽन्तरस्तेन तदाश्रिता गुणा आभ्यन्तराः । अथेदानीं येषामर्थे दोषत्वं ततो गुणभावः । केचिद्विशेषमासाद्यते वैशेषिकाः । पूर्वं दोषा अपि विशेषयोगेन गुणीभवन्तीत्यभिप्रायात् । माधुर्य्यौजः प्रसादास्त्रय एव गुणा इति ध्वनिकारस्य मतन्निरस्यति । चतुर्विंशतिरिति । परस्परसङ्कीर्णत्वादुपाधीनामिति भावः । न चैतदस्माकमनीषामात्रेण कल्पनमित्याह । आख्याता इति । निष्ठाप्रत्ययेनेदं प्रथमतो द्योत्यते । उक्तविशेषादेव शब्दगुणानां पूर्वभाव इत्याह । तेष्विति । अभिधान द्विविधं विभागतो लक्षणतश्चेत्याह । नामलक्षणयोगत इति । पदघटनव्यवस्थितौ गुणान्तरगवेषणमतः प्रथमं श्लेषलक्षणमाह । तत्रेति । श्लिष्टानि घटितानि पदानि यत्र तस्य भावस्तत्ता । न च घटनामात्रस्य गुणभाव इत्याशङ्क्यम् । सुपदं शोभना घटनेत्यर्थः । शोभनत्वं घटनाया मसृणत्वमेकताप्रतिभानसामर्थ्यं यदत्राह्नं सूत्रसुरःस्थल इति । बीजञ्चात्र श्रुत्यनुप्रासवत्त्वमत्र-

तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः॥

अत्र भिन्नानामपि पदानामेकपदताप्रतिभासहेतुत्वेन सन्दर्भस्य सुश्लिष्टत्वादयं श्लेषो नाम शब्दगुणः॥ ७२॥

प्रसिद्धार्थपदत्वं यत् स प्रसादो निगद्यते॥

यथा, गाहन्तां महिषा निपानसलिलं शृङ्गैर्मुहुस्ताड़ितं
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु।
विश्रब्धैः क्रियतां वराहपतिभिर्मुस्ताक्षतिः पल्वले।

क्षितसन्धिता च। तथाहि प्रकृतोदाहरणे उभावित्युकारभकारावोष्ठौ। यदिव्य इत्याद्यन्तौ यकारौ तालव्यौ। न चायं वर्णानुप्रासः। ईषत् स्पृष्टत्वादिभेदात्। मध्ये दकारवकारौ दन्त्योष्ठौ। स्त्रीत्यत्र मकारो भकारेण नकारो दकारेण समानश्रुतिक इत्यादि बोद्धव्यम्। तथा पृथक्प्रवाहाविति ककारस्य पवर्गगमनैकता प्रतिभासते। प्रवाहावाकाशेत्यौकारस्यावादेशेन वर्णान्तरनिष्पत्त्या॥ एवं पयसः पतेतामित्यादावुन्नेयम्। पृथगिति पार्श्वद्वये। तेन वक्षःस्थलदक्षिणवामभागयोर्लम्बमानौ द्विसरो हार इति लभ्यते। अस्य वक्ष इति। अचास्येति पदेन नान्यस्य हार इत्यमनुपमो न चान्यस्य वक्षःस्थलमाकाशवदुन्नतविस्तीर्णमिति भगवतः सकलजगद्विलक्षणत्वध्वनिरित्याराध्याः॥७२॥

प्रसिद्धार्थेति। अस्यार्थः प्रागेव विवृतः। प्रसादो द्विधा वाक्यविषयः, प्रतीयमानविषयश्च। तत्र प्रतीयमानविषयो यथा। एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी। लीलाकमलपत्राणि गणयामास पार्वती। अत्र श्रुतावगतादेव वाक्यात्लज्जादयो हसदत्ता इव प्रकाशन्ते। वाक्यविषयो द्विधा भवति। ग्राम्यैरेव ग्राम्य उपनागरैर्वा पदैः सन्दर्भनिर्वाहे। आद्यो यथा। चन्द्रे कलङ्कः सुजने दरिद्रता विकाशलक्ष्मीः कमलेषु चञ्चला॥ सुखाप्रसादः सघनेषु सर्वदा यशो विधातुः कथयन्ति खण्डितम्। द्वितीयमुदाहरति। गाहन्तामिति। अत्र प्रथमपादे गाहन्तां महिषा इति ग्राम्यम्। निपानसलिलमित्युपनागरम्। शृङ्गैरिति ग्राम्यम्। मुहुरित्युपनागरम्। ताड़ितमिति ग्राम्यम्। द्वितीयपादे कदम्बकरोमन्थशब्दावुपनागरौ शेषाणि ग्राम्याणि। एवञ्च चरमयोरपि स्वतो विवेचनीयम्। गाहनं विलोड़नं तन्निःशङ्कमेव भवतीति विश्रब्धध्वनिः। अत-

विश्रामं लभतामिदञ्च शिथिलज्याबन्धमस्मद्धनुः ॥

अत्र गाहन्तां महिषा निपानसलिलमित्यादिप्रसिद्धार्थपदोपादानात् प्रसादः ॥ ७३ ॥

यन्मृदुप्रस्फुटोन्मिश्रवर्णबन्धविधिं प्रति।
अवैषम्येण भणनं समता साऽभिधीयते ॥

यथा,—यच्चन्द्रकोटिकरकोरकभारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य।

एव त्रासाऽभावात् प्रकृतिप्रत्यापत्तौ। शृङ्गाभ्यां पर्य्यायेण जलताडनं महिषजातिः। छायाश्रयेण यूथबन्धश्च मृगजातिः। चिरपरस्परवार्त्तानभिज्ञानां दिवानिशं पलायनेन रीमत्योऽपरिचित इवासीत्तस्येदानीं शिक्षाक्रमेण यदि परिचयः स्यादित्यभ्यस्तु इति ध्वनिः। वराहपतिभिरिति। न यादृशतादृशानामस्मन्मृगयासंरम्भगोचरत्वमिति प्रकाश्यते। ननु चाच कर्तृप्रक्रमभेदो दूषणं कस्मान्न भवति। नैतत्। आपातशौण्डेषु परिणतिभीरुषु च महिषेषु स्वभाव भीतेषु मृगेषु न तथायं संरम्भते यथा पुनरावृत्तिचतुरेषु प्रकारकोविदेषु च वराहेषु। ततश्च तेषामुचितक्रियासु कर्तृतामात्रमेव न सोढवानिति साम्प्रतं कर्तृताभ्यनुज्ञानेन व्यज्यते। ततस्तृतीयायामौचित्यनिवेशिन्यां प्रक्रमभेदोऽप्युचित एवेति व्यक्तिविवेककारादीनामपि सम्मतः पन्थाः। इदञ्चेति चकारेण चेदस्मद्धनुरारूढमवतीर्णं वा तदेव संरम्भगोचराणां भयविस्रम्भाविति कोपप्रकर्षः। अतएवास्मदिति बहुवचनं सजीवम् ॥ ७३ ॥

यदिति। प्रतीत्यन्तेन मार्गो व्याख्यातः। अवैषम्येण भणनमित्यनेन वाम्भटः स्वरेषु ह्रस्वन्त्याः व्यञ्जनेषु वर्गान्त्या दन्त्याश्च मृदवः कोमलवर्णाः। दीर्घाः स्वराः व्यञ्जनेषु णकारवर्जटवर्गरेफशषहा अदन्त्यसंयोगाश्च प्रस्फुटाः। शेषाणि व्यञ्जनानि दन्त्यसंयोगाश्चोन्मिश्रमध्यमा वर्णास्तेषामन्यतमैर्वर्णैर्योबन्धनविधिस्तन्मति यदवैषम्येण उपक्रमनिर्वाहादिना करणेन भणनमुक्तिः सिद्धिः सा समता। न चैवं दोषाभावमात्रमेकजातीयवर्णपरिचयप्रबन्धप्रवेशनिर्वाहाणां शक्तिव्युत्पत्तिरूपतया प्रधानोत्कर्षपर्य्यवसानात्। न च दोषाभावस्यैवं रूपता केनचित् प्रतिषिद्धा॥ अतएव श्लेषप्रसादयोरपि गुणभावः सिद्धः। ननु रक्ताशोककुशो-

तद्वः पुनातु हिमशैलशिलानिकुञ्ज-
झाङ्कारडम्बरविरावि सुरापगाम्भः॥

अत्रोपक्रमादासमाप्तिस्फुटबन्धस्य निर्वाहात् समत्वम्॥७४॥

या पृथक्पदता वाक्ये तन्माधुर्य्यमिति स्मृतम्।

यथा,—स्थिताः क्षणं पक्ष्मसु ताडिताधराः
पयोधरोत्सेधनिपातचूर्णिताः।

हरी क्व नु गता त्यक्त्वानुरक्तं जननी दृष्टेति मुधैव चालयसि किं वाताभिभूतं शिरः। उत्कण्ठाघटमानषट्पदघटासङ्घट्टदष्टच्छदस्तत्पादाहतिमन्तरेण भवतः पुष्पोद्गमोऽयं कृतः। इत्यत्र वैषम्यं दोष एव स्यात्। न ह्यत्र मुक्तस्थाने स्फुटता। तस्मात्यत्किञ्चिदेतत्। तदेवन्निर्वाह्य त्रैविध्यात् समता त्रिरूपा भवति। ग्राम्या परुषा उपनागरिका च। तत्रोन्निद्रप्रायसन्दर्भनिर्वाहे ग्राम्या यथा। पुरः पाण्डुच्छायं तदनु कपिलिम्ना कृतपदन्ततः पाकोद्रेकादरुणगुणसंवर्द्धितवपुः। शनैः कौशारम्भे स्थपुटनिजविष्कम्भविषमे वने पीतामोदं बदरसरसत्वं कलयति। परुषा यथा। यच्चन्द्रेति। बालेन्दुमयूखसुकुलजालनिचुलितासु परमेश्वरजटावल्लरीषु भ्रमणाऽध्यासादिव अद्यापि हिमाद्रिकुञ्जेषु झाङ्कारिगङ्गाम्भ इति प्रतीयमानोत्प्रेक्षा। उपनागरिका यथा। वसने परिधूसरे वसाना नियमक्षामसुखी धृतैकवेणिः। अतिनिष्करुणस्य शुद्धशीला मम दीर्घा विरहव्यथां व्यनक्ति। अत्र अक्षत्सहाध्यायिनः पूर्वार्द्धमेव उपनागरिकोदाहरणं मन्यन्ते। उत्तरार्द्धे हि निष्कृत्यादिवर्णनिवेशनादुन्निद्रत्वमेव। इयमपरा उन्निद्रा सन्दर्भजातिर्यत्कोमलकठोरवर्णतुल्यतया निर्वहणमिति॥ ७४॥

पृथगिव पदानि यत्र भासन्ते स पृथक्पदः सन्दर्भ इत्युपमागर्भो बहुव्रीहिः। तस्य भावस्तत्ता। माधुर्य्यमुक्तस्वरूपं तच्छब्दगतं पृथक्पदतया विक्षिप्यत इति। तदेव माधुर्य्ययुक्तमौचित्येन हि समासव्यतिरेक आक्षिप्यते कदाचिदनुद्धती वा समासः। अनुद्धतिरनुल्लेखः। तदुक्तम्। अवृत्तिर्मध्यवृत्तिर्वा माधुर्य्ये घटना तथेति। अतएव समासनिवृत्तिपरमेतदिति वामनः। कश्चित् समासो रसौचित्येनाक्षिप्तः परिभाव्यमानो मनीषिभिश्चमत्कारकारणं भवति। यथा। तेषां गोपवधूविलाससुहृदां राधा रहः साक्षिणां चेमं तत्र कालिन्दीकल-

बलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥

अत्र पदेषु सहिताभावात् पृथक्पदत्वेन माधुर्यम् ॥ ७५ ॥

अनिष्ठुराक्षरप्रायं सुकुमारमिति स्मृतम् ॥

यथा,—मण्डलीकृत्य वर्हाणि कण्ठैर्मधुरगीतिभिः ।

तनयातीरे लतावेश्मनाम्। विच्छिन्ने अरतल्पकल्पनमृदुच्छेदोपयोगेऽधुना ते नून जरठीभवन्ति विगलन्नीलत्विषः पल्लवाः। अत्र तच्छब्दो येषां विलाससम्पत्तिस्वभावलक्ष्यप्रकर्षाणामनुभव एव साक्षीति विशेषप्राधान्यविवक्षया न समासेनानिगमनात्। न या कापि वधूरपि तु गोपसम्बन्धिनी कृतगोपाचारचातुरीपराधीना नान्यत्र नीरसप्राये क्वचन सौहार्दं किन्तु विलास एव। सोऽपि न यः कश्चिदपितु गोपवधूसम्बन्धीत्येवं बहूनां पिण्डीभावविवक्षया समास एवोचितः। एतावतैव छेदोऽप्युचित एव सर्वस्यायमानत्वात्। तत्सम्बन्धजनितस्य विशेषस्य पृथगेवोक्तिः उचिता। राधारहः साक्षिणामित्यत्रापि समासः पूर्ववत्। यद्यपि राधासम्बन्धस्य वैवक्षिकं प्राधान्यमिति न समासः प्रतिभासते तथापि यदन्यस्य राधारहसि निवेशः क्षम इति भावयन् सुहृदामित्यपहाय साक्षिणामित्युक्तवान्। साक्षी हि तटस्थ एव व्याप्रियते। तेनावश्यकर्त्तव्यसाक्षिताप्राधान्यविवक्षया सम्भवति विरोधादित्यवसेयम्। स्थिता इति। पद्मावस्थानेऽधरताडने स्तनतटनिपाते बलिभङ्गस्खलने नाभिनिम्नप्राप्तौ जलबिन्दूनां कर्तृतानिर्देशात् स्वाच्छन्द्यसुन्मीलितम्। तथाच गौर्या बाह्यसंवेदनाभावस्तेन भगवद्भक्तोऽनुरागप्रकर्षः प्रथमपादेन। निदाघतापच्छिदा रजोहरणेन वसुन्धरा सौरभोन्मीलनेन मयूरकेकायितादिना त्रिभुवनस्यापि ये चमत्कारास्पदमिति ध्वनितम्। तथाभूतानामथ संवेदने पूर्व एवाभिप्रायः। ताडितेत्याकारेण छेदोन्मेषः पयोधरेत्यादावोकारः ॥ ७५ ॥

अनिष्ठुरेति। समस्त एव गुम्फे द्वित्राणि त्रिचतुराणि प्रस्फुटानि अक्षराणि निवेशन्ते स किलान्तरान्तरोपदंशन्यायेन चित्तास्वादपर्य्यवसायी सुकुमार इति प्राचां मतम्। अतएव समतायाः भेदः। मृदीकापाकः पुनरन्यादृशो वक्ष्यते। अनिष्ठुरे सुकुमारव्यवहारो लोके दृष्टः। मण्डलीकृत्येत्यादौ प्रथमपादे मण्डेति, कृत्येति, वर्हेति। अत्र संयोगत्रयम्। द्वितीयपादे रूकेति मैति, च संयोगद्वय-

कलापिनः प्रनृत्यन्ति काले जीमूतमालिनि ॥

अत्र सर्वकोमलत्वे सति श्लेषविपर्य्ययदोषशैथिल्याभावाद् बाहुल्येन वर्णानामनैष्ठुर्य्यात् सौकुमार्य्यम् ॥ ७६ ॥

यत्र सम्पूर्णवाक्यत्वमर्थव्यक्तिं वदन्ति ताम्।

यथा,—वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ॥

जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ।

अत्र वाक्यपरिपूर्णतयार्थसमर्थकत्वादर्थव्यक्तिः ॥ ७७ ॥

यदुज्ज्वलत्वं बन्धस्य काव्ये सा कान्तिरुच्यते ॥

यथा,—निरानन्दः कौन्दे मधुनि विधुरो बालवकुले।

सुपन्यस्य गीतिदीर्घस्वरनिवेशी रूपान्तरमादाय विशेषशोभाहेतुः। तृतीयपादे क्वेति न इति प्रतिनृत्यन्तीति च दीर्घविसर्गसंयोगा इति व्यन्तरम्। चतुर्थपादे दीर्घस्वरा एवान्तरान्तरेति सैव वासना। ननु अनिष्ठुराक्षरमयत्वं सुकुमारतेति वक्तव्ये प्रायशब्दः केन प्रयोजनेनेत्यत आह। अत्रेति। न चायमर्थगुणः स हि वाक्यार्थे धर्मिणि निरूप्यते अयन्तु पदसमुदाय इति युक्तं शब्दगुणेषु परिगणनम्। सम्मितत्वमन्यथा भविष्यति ॥ ७६ ॥

वागर्था विवेति। अत्र वन्दे इत्युत्तमपुरुषवचनेनैवाहमिति प्राप्तमस्मद्युत्तम इत्यत्र स्थानिनीत्यभिधानात्। किमिति कर्मापेक्षया पार्वतीपरमेश्वरावेति। तावपि किम्भूतावित्यतो जगतः पितरावेति। तेन लक्ष्मीनारायणादिवैधर्म्येण नमस्कार्य्यत्वम्। एकशेषशब्देनैव मातृशब्दार्थः। स्त्रीपुंसयोरित्यौचित्याद्वागर्थाविवेति। किमर्थं नमस्कुरुत इत्यत्र वागर्थप्रतिपत्तये इति। तदेवं यादृशौ यावाश्च विशेषणविशेष्यप्रकारोऽभिमतः स सर्व एव वागित्याद्युपात्तशब्दसमुदायमात्रेण निष्पत्यूहमवगम्यत इत्यर्थव्यक्तिशब्दार्थव्याख्यानेन स्फुटयति। अत्रेति। अर्थसमर्पकत्वमित्यनेन शब्दगुणता व्यक्तीकृता ॥ ७७ ॥

यदुज्ज्वलत्वमिति। किम्पुनरिदमुज्ज्वलत्वं नाम। केचिदाहुरनुप्रासबहुलमिति। तदसत्। तस्याः सुखाव नेत्राभ्यां वारि प्रणयकोपजम्। कुशेशयपत्राशाभ्यामवश्यायजलं यथेत्यादावनुप्रासबहुलता सम्भवति एवंविधं हि पुराण-

न साले सालम्बो लवमपि लवङ्गे न रमते ।
प्रियङ्गौ नासङ्गं रचयति न चूते विचरति
स्मरन् लक्ष्मीलीलाकमलमधुपानं मधुकरः ॥

अत्र बन्धस्य छायावत्त्वेन औज्ज्वल्यं तदेव च कान्तिरुच्यते ॥ ७८ ॥

विकटाक्षरबन्धत्वमार्य्यैरौदार्य्यमुच्यते ॥

यथा,—आरोहत्यवनीरुहं प्रविशति क्षभ्रं नगैः स्पर्द्धते ।

च्छायमामनन्ति । कान्तिविपर्य्ययः पुराणी छाया । यथा । व्रजति गगनभल्लातक्या दलेन सहोपमामिति । अतएवाह । पुराणचित्रस्यानीयं तेन बन्धं कवेर्वच इति । तस्मादप्रहृतपदैरारब्धः सन्दर्भस्यैव कान्तिः । तद्यथा । कुसुमस्य धनुरिति प्रहृतम् । कौसुममित्यप्रहृतम् । जलनिधाविति प्रहृतम् । अब्धिजलधीत्यप्रहृतम् । गुरुत्वमिति प्रहृतम् । गौरवमित्यप्रहृतमित्यादि । अतएव प्रहृतशङ्का । चमत्कारित्वन्तु सहृदा ह्लादकत्वमस्ति हि तुल्येऽपि वाचकत्वे पदानां कश्चिदवान्तरो विशेषो यमधिकृत्य किञ्चिदेव प्रयुञ्जते महाकवयो न तु सर्वे यथा पद्मव इति वक्तव्ये किसलयमिति । स्त्रीति वक्तव्ये कान्तिति कमलमिति वक्तव्ये राजीवमित्यादि । एतदेव महाकविभिरुपेयते । कत्तिमणाम इच्चं सच्चइविए समं समगगेसु । सीमठे उण सुम्मितम्मिसच्चणवच्चेअ । कान्तवर्णानुप्रासोऽपि कान्त एव भवतीति मत्वाऽनुप्रासोत्कटमुदाहरति । निरायन्द इति । अस्ति कुन्दे मधुपरं न कमलसजातीयमित्यासक्तो नानन्दमलभत । कुन्दस्येति प्रहृतं कौन्दमित्यप्रहृतम् । बालत्वे बकुलकुसुमानां न मधुप्रादुर्भाव इति एतत्कालेऽपि न प्राप्तवानिति विधुर इत्यनेन व्यज्यते । कालान्तरेऽपि शाखे मधुनोऽसम्भवादालम्बः प्रत्याशामात्रबन्धोऽपि न तस्यासीत् । आमोदप्रकर्षादन्तः चण निपत्य रसमनासादयल्लवङ्गमनुसरतीति लवमित्यनेन ध्वन्यते । एमसुत्तराद्धेऽपि पदस्वरसो गवेषणीयः । उक्तमेव विशेषमभिसन्धाय व्याचष्टे । अत्रेति । छायौज्ज्वल्यं कान्तिरित्येकार्थतया लोके प्रसिद्धं तदिह यथा शब्दषु सङ्गच्छते तथा पूर्वाचार्य्यप्रसिद्धया विवेचनीयमित्यभिप्रायः ॥ ७८ ॥

विकटेति । विकटैरक्षरैर्बन्धो यस्य तस्य भावस्तत्त्वम् । अस्ति तावद् हृत्य-

खं व्यालेढि विचेष्टते क्षितितले कुक्षोदरे लीयते ॥
अन्तर्भ्राम्यति कोटरस्य विरमत्यालम्बते वीरुधः ।
किं तद् यन्न करोति मारुतवशं यातः कृशानुर्वने ॥

अत्र विकटाक्षरबन्धत्वेन नृत्यद्भिरिव पदैः यद्वाक्यरचना सा उदारता ॥ ७९ ॥

श्लाघ्ये विशेषणैर्योगो यस्तु सा स्यादुदात्तता ॥

नीव पदानीति सहृदयानां क्वचिदर्थे व्यवहारः । स च न निर्विषयो नाप्यस्य विशेष इति ततप्रमाणकमेव गुणान्तरमवस्थितमिति कश्चिदाचष्टे । तथा तु न कथञ्चित स्वरूपमुद्भिद्य दर्शितं भवति । अन्ये तु विसर्गानुप्रासादिग्रन्थिखलमनेनाभिमतमित्याहुः । तदपि न । और्जित्याऽवहित्थाभावप्रसङ्गात । तस्मादिदमत्र वाच्यम् । विकटानि विशालानि प्रभूतानीति यावत् । तथाभूतानि अक्षराणि दीर्घानुस्वारादिरूपाणि सहृदयसंवेदनीयानि । अतएव नृत्यतुल्यता । यथाहि नृत्ये अङ्गानामङ्गुल्यादीनामाकुञ्चनप्रसारणक्रमेण रञ्जकत्वं तथात्रापि । तथाहि आरोहतीत्यादौ प्रथमपादे आकारोकाराभ्यां प्रसारः । हृत्येवेति सङ्कोचः । नीरुह इतीकारविसर्गाभ्यां प्रसारणम् । नगैः स्पर्धत इति विसर्गसन्धयश्चरैर्विकाशः । द्वितीयपादेऽपि प्रसारणसंकोचप्रसङ्गत इति नैव निर्वहणमन्तरान्तरावरोहक्रमो भवति । न चात्र यतीनां सन्निवेशोऽभिमतः । मारुतवशं यात इत्यनेनोन्मादरोगग्रहीत इति शब्दमूलानुस्वानबलेन अवगम्यते । उन्मादग्रहीतोऽपि वृक्षारोहणादिक्रमसमञ्जसव्यवस्थितश्च करोति । नव इत्यनेन यत्र सर्वथैव प्रतीकारासम्भव इति निरङ्कुशोन्मादचेष्टितमेव उपबृंहयति । नगैः स्पर्धते पर्वतोच्छ्रायमनुकरोतीति दूरप्रसृत उन्मादः । ख व्यालेढीत्यत्रापि तथैवाभिप्रायः । किन्त्वयदिति न शक्यते गणयितुम् उन्मादचेष्टितानीति प्रकाशन्ते इति ग्रन्थिलाविच्छेदात । प्रसारणस्य पर्यवसानं हृत्येवेनेन प्रविशतीति सङ्कोचः । अतएव परस्मैपदयोर्निरन्तरभावापः कान्तिविशेषकरत्वादुपादेय एव भवतीति ॥ ७९ ॥

श्लाघ्येरिति । उत्कर्षवानुदात्तो लोके प्रसिद्धो बहूनां मध्ये यः श्लाघते स उत्कर्षवांस्तेन श्लाघ्यत्वमुदात्तलक्षणं तदिह काव्ये वाक्यार्थपोषाधायकतया सहृदय-

यथा,—श्रुत्वायं सहसागतं निजपुरात् त्रासेन निर्गच्छतां
शत्रूणामवरोधनैर्जललवप्रस्यन्दतिग्मत्पुटाः।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि
क्रीडाद्रौ च सशाहले विवलितग्रीवैर्विमुक्ता दृशः॥

अत्र शुभ्रे पल्लविनि नवाम्भोरुहि इत्यादिश्लाघ्यविशेषणोपादानात् उदात्तता॥ ८०॥

हृदयावर्जनचमत्वेन श्लाघाविषयत्वे विशेष्यत्वञ्च वाक्यार्थोऽतस्तद्विशेषणपदेषु यथोक्तरूप उत्कर्षोऽभिमतोऽनुदारस्यायङ्गुण इति स्वरूपविशेषकृतात्कान्तिशरीरान्तर्गतात् चमत्कारित्वात् भिद्यते न चात्र मुहुरभिमतेति नैकमपि कान्तिरूपमस्ति। अतएव पुराणच्छायमुदाहरति। श्रुत्वेति। श्रुतिमात्रेणैवेयं दशा दर्शनेतु न ज्ञायते कथं भविष्यतीति। यमिति। न हि अन्यस्य श्रुतमात्रस्य तादृशप्रभावसम्भावना। सहसेति। यावत् क्रीडासहचराणां धवलगृहादीनामपि च प्रेमानुरूपमापृच्छ्यते तावानपि समयो न लब्ध इति ध्वन्यते। आगतमिति। निष्ठाप्रत्ययेन चेदिच्छति सिद्धमेवागमनमिति द्योतयति। निर्जेति। यस्यान्येन धर्षणं स्वप्नेऽपि न बुद्धिविषय आसीत्। सोपद्रवस्यापि यस्य न त्यागः कदापि कथञ्चिदभूदिति व्यज्यते। निर्गच्छतामिति। हृदयवैमुख्येन पुनः पुनरवतिष्ठमानानामसम्भवद्रूपं निर्गमनमिति द्योत्यते शत्रूणामिति बहुवचनेन यदैकावस्कन्दमुद्दिश्य अयं प्रचलति तदा सर्वेषामियं दशा भवतीति प्रत्याय्यते। अतएव असमासः सजीवः। वियोगवेदनादूनमानसानामुद्गतोऽपि वाष्पस्तावादन्तरेव विच्छिद्यत इति लवपदेन ध्वन्यते। पुनः समागमाशंसनशीलानामङ्गलभिया वाष्पस्त्रभी लवपदरहस्यमित्येके मन्यन्ते। अन्यस्य वाष्पस्य निर्गमनानुपपत्तौ पुटयोरार्द्रभावमात्रम्। शुभ्र इति। यत्र चन्द्रातपेन पल्लविताः कान्तयः चणदाविलासविहारेषु कामपि रसमात्राम् उत्कर्षयन्तीति व्यनक्ति। तदनन्तरमेव वाप्यामित्याह। नवाम्भोरुहीति। पूर्ववत्सम्भोगोद्गारः सशाहल इत्यनेन रतिकुतूहलोत्कण्ठितानामद्रिशृङ्गारोहणश्रान्तानां तदेवास्तरणमिति प्रकटीक्रियते। विवलितग्रीवतया च पदभ्यां पलायनमेव न तु शरीरवलनमपीति। शृङ्गारादद्भयानक एव रसःस्थायीति ध्वनितम्। तदेतत् सर्वमभिप्रेत्याह। अचेति॥८०॥

ओजः समासभूयस्त्वम्।

यथा,—जयति भुजगरज्जुग्रन्थिनिष्पीड़ितेन्दु-
स्रवदमृतनिवृत्तप्रेतभावैः कपालैः।
विरचितनुतिबन्धो मूर्द्ध्नि सद्यः पुरारेः
परिणतबहुकल्पब्रह्मणां ब्रह्मघोषः॥

अत्र भुजगरज्जुग्रन्थीत्यादिना समासभूयस्त्वात् ओजः॥८१॥

और्ज्जित्यं गाढ़बन्धता।

यथा,—अस्मिन्नौषद्वलितविततस्तोकविच्छिन्नभुग्नः
किञ्चिल्लोलोपचितविततः पुञ्जितश्चोत्थितश्च।

अरीतिमत्कारणीकृतमभिप्रेत्यौजोलक्षणमाह। ओज इति। वैपुल्यवृत्तेर्बहु-शब्दस्येयसुनि भूय इति रूपम्। तथाच समासस्य भूयस्त्वं वैपुल्यविकटत्वमिति यावत्। न चैवं गौडीया रीतिरेवेयमिति वाच्यम्। क्वचित् समासभूयस्तामात्रस्यैवौ-चितीवशेन विशेषशोभावहत्वात्। यथा। वाद्यन्ति दिग्गण्डकषणैर्भग्नसत्ता इति। न च समासाभावो नोचितः। तद् यदि एक एव समासो रूपभेदमादाय गुणत्वमनलङ्कारत्वञ्च प्रयोजयतीति किमनुपपन्नम्। एवं प्रकृतोदाहरणेऽपि। तथाहि। परिणताः परिणामं गताः। बहुनाङ्कल्पानां ब्रह्माण इति चतुर्णां पदार्थानां पिण्डत्वे चत्वारि पदानि समबहुव्रीहिरूढ़िभिः भुजगरज्जुभिरिति ग्रन्थिदृढताबोधनाय रूपकम् अतएव निर्वीत्युपसर्गः तात्पर्य्यवान्। सद्यो विरचित-नुतीत्यनेन कपालानामसाधारणो व्यापारो बन्धो हि बाह्यरूपसाक्षादिकमन्तरेण न निष्पद्यते जीवनानन्तरमेव त्वासावेशात् स्तुतिरूप एव ब्रह्मघोष उदचरदिति भगवतस्त्रैलोक्यग्रहे निरङ्कुशप्रभावः सद्यः पदेन सूच्यते। अथवा चेदागमाना-मात्मलाभानन्तरमेव परमेश्वरस्तुतिरूपतात्पर्य्यावसानमिति सर्वस्या अपि श्रुतेः परमेश्वरप्रवणत्वमनन्यसाधारणभक्तिप्रहृतात्त्व कविरभिप्रैति। पुरारेरित्यनेन महारिरूपता भगवतः प्रकृतपोषानुगुणा प्रकाशिता॥ ८१॥

और्जित्यमिति। ऊर्जितो महाप्राणस्तस्य भाव और्जित्यं तत्र सन्दर्भस्य महाप्राणताग़ाढ़त्वमन्तरान्तरा विलम्बितनयैः प्रयोगैः कुण्ठितत्वम्। गुणसामान्य-

धूमोत्पीड़ स्तरुणमहिषस्कन्धनीलो दवाग्नेः
खैरं सर्पन् सृजति गगने गत्वरानभ्रभङ्गान् ॥

अत्र गाढ़बन्धस्य स्पष्टमेव प्रतिभानात् ओजित्वम् ॥ ८२ ॥

प्रेयः प्रियतराख्यान चाटूक्तौ यद्विधीयते ॥

यथा,—सौजन्याम्बुनिधे बुध प्रियगुणप्राकार धर्मद्रुम-
प्रारोह प्रतिपन्नवत्सल महात्यागिन् विवेकाश्रय ।

लक्षणात् अतिप्रसङ्गो नास्ति । तथाहि । प्रकृतोदाहरणे प्रथमपादे विच्छिन्न-भुग्न इत्यत्र तालव्यद्वयम् । कण्ठ्यदन्त्यसयोगौ प्रस्फुटोन्मयौ । अन्ये मृदवः । द्वितीयपादे ओष्ठ्योपध्मानीयतालव्यचतुष्कसयोगाः प्रस्फुटाः स्वरव्यञ्जनमध्ये विसर्गपाठ उभयसज्ञाभिप्रायेणेति दुर्गासिंह । । तेन तदादेशस्यापि व्यञ्जनत्वमन्ये मृदवः । तृतीयपादे दन्त्योष्ठ्यदन्त्यकण्ठ्यसयोगा उन्मिश्रा अन्ये मृदवः । चतुर्थपादे रेफान्तसयोगा मृदवो य इति न कापि कठोरता प्रतिभासते । तथाच प्रथमतृतीयाभ्या अत्र द्वितीयचतुर्थयोर्गाढत्वम् । तथा । हस्ते लीला-कमलमलकं बालकुन्दानुविद्धमित्यादेः अगाढ़प्रथमतृतीययोरप्यस्ति धारणी महा-प्राणता व्यक्तेत्याह । अत्रेति ॥ ८२ ॥

प्रेय इति । परप्रियाख्यान चाटूक्तिः तत्र यद्विधीयते स प्रेयो नाम गुणः किन्तु क्रियत इत्याह । प्रियतराख्यानमिति । प्रत्ययांश तात्पर्य्यं लोके साधारण एव प्रिय इत्युच्यमाने यस्तत्र असाधारणः प्रकर्षोऽवसीयते स इत्यर्थो भवति । एतेन लक्षणपदे इयसुन् व्याख्यातः । उक्तिखण्डैः उपचितोऽर्थः सन्नसन् वा भवतु कविप्रतिकृष्टा सूक्तिरेक एव त्रिभुवने भूयसीनामपामधिष्ठानमेव भवानपि तत्स्थानीयस्य सौजन्यस्येति प्रतीयते । बुधप्रियेति बहुव्रीहि तत्पुरुषाभ्यामर्थ-द्वयमुपात्तम् । सूक्ष्मगुणप्रतिबिम्बभासितया यावदभिमतदायितया च प्रीति-ध्वनितया च प्रकर्षमर्पयति । गुणप्राकारेति । यथा प्राकारे उपर्युपरि शिलादीनामवस्थितिरेवम् अहमहमिकया त्वयि गुणानाम् अथवा यथा प्राकारः कलत्रावेक्षणस्थानमेवं भवानपि गुणानामेव प्रोच्यते । धर्मद्रुमप्रारोहेति । प्रारोहः प्ररोहोऽङ्कुरः । तेनातिजरती भग्नानेकविक्रमादिव्यादिशाखस्य धर्म-तरोस्समग्रिमःसन्तानोऽवलम्बः । यदि वा अधोमुखो लम्बमानलताप्ररोहः । तथाच धर्मतरोः उपरि ब्रह्मलोकादि बहुविस्तारस्य भगवद्रूपः प्रारोहो सूपष्ट

लक्ष्मग्रावास मनस्विनीमनसिजव्यापारदीक्षागुरो
श्रीमन्मुञ्च किमित्यमुं जनमुपस्प्रष्टुं दृशा नार्हसि ॥

अत्र सौजन्याम्बुनिधे इत्यादीनां प्रियार्थानां पदानामुपादानं प्रेयः ॥ ८३ ॥

व्युत्पत्तिः सुप्तिङां या तु प्रोच्यते सा सुशब्दता ॥

यथा,—तस्याजीवनिरस्तु मातरवमा जीवस्य माजीवतो
भूयाद्वाजननिः किमम्ब जनिना जन्तोर्वृथाजन्मनः ।

मधितिष्ठतीति कोऽपि प्रीतौ प्रकर्षः। प्रतिपन्नवत्सलेत्युपकर्त्तव्यतया प्रतिपन्नः स्वीकृतस्तत्र वत्सलो झटिति स्नेहार्द्रान्तःकरणस्तेनाङ्गीकृतभङ्गभीरुतामात्रेण पुरुहूतादिवन्नापि श्लेषाविश्लेषान्वितत्तया बलिकर्णादिवत् किन्तु भवान् सिन्धुरिव वाञ्छितादिकमुपकारं करोतीति समानं पूर्वेण। महात्यागिन्निति। त्यागिनामपि यः पूज्यः स महात्यागी तेन नूनं दधीचिप्रभृतयो विश्रान्तितार्था अपि न तव तुल्यतामारोढुमीशते इति पूर्ववत्। विवेकाश्रय इति। यथा कर्त्तव्यताज्ञानं विवेकः। तस्याश्रयो विश्रान्तिस्थानं यदि त्वं मूलस्तम्भो नाभूस्तदा कमाश्रित्य विवेकप्रासादः पदमारोपयेत् इत्यादिकं स्वयमूहनीयमिति तदेतत् सर्वं सूचयन्नाह। प्रियार्थानां पदानामिति। प्रियार्थाना प्रीतिप्रकर्षार्थानाम् ॥ ८३ ॥

व्युत्पत्तिरिति। विशिष्टा उत्पत्तिर्व्युत्पत्तिः सुबन्तानां तिङन्ताना च बहूनामपि चकारादिमन्तरेण घटनासौष्ठवार्पकतया चमत्कारकारित्वमित्यर्थः। आक्रोशे नञ्यनिः। किमर्थमिदमाशास्यते इत्यत आह। जीवतोऽवमान इति। जीवतोऽवमाननं माभून्मरणमपि तदपेक्षया वरमित्यर्थः। आयुः कर्मवशात् तथा भूतोऽपि जीविष्यतीति यदि तदा अजननिः अनुत्पत्तिरेव भूयात् कुत इत्यत आह। किमिति। जनिनेति पुंलिङ्गनिर्देशश्चिन्त्य इकः स्त्रीप्रकरणे विधानात्। अनिरुत्पत्तिरिति साहचर्याच्च। जनुषा इति पाठान्तरम्। कस्येदं सर्वमाशास्यत इत्यत आह। यस्यामेवेति। तदन्यदेवताप्रवणस्य जन्मादिक विफलमिति वदतः कोऽपि भगवतीविषये भक्तिप्रकर्षोऽवसीयते। अन्ये तु व्याचक्षते कवेः पदपरिचयान्तरी व्युत्पत्तिः। पदं च सुप्तिङन्ततया द्विविधं तयोरेकमुभयं वा यत्र

यस्त्वामेव न वन्दते न यजते नोपैति नालोकते
नोपस्तौति न मन्यते न मनुते नाध्येति न ध्यायति ॥

अत्र अजीवनिः अजननिः इत्यादीनां सुबन्तानां वन्दते यजत इत्यादीनां तिङन्तानां च व्युत्पत्तिः सुशब्दता ॥ ८४ ॥

समाधिः सोऽन्यधर्माणां यदन्यत्राधिरोपणम् ॥

यथा,—प्रतीच्छत्याशोकीं किशलयपरावृत्तिमधरः
कपोलः पाण्डुत्वादवतरति तालीपरिणतिम् ।

निवेश्यमानं व्युत्पत्तिमभिव्यनक्ति तत्र सौशब्द्यमिति लक्षणार्थः । तथाहि अजीवनिरिति सोपाधिसिद्धकृदन्तं जीवितमुपन्यस्य तदेव जीवस्य जीवत इति निरुपाधिसिद्धसाध्यार्थाऽभिधायि कृदन्तमुपन्यस्तवान् । मातरवमेति । मातृत्वमुभयथा उत्प्रेक्षितवान् । द्वितीयपादे जनिजीवमिवोपक्षिप्य जनिना जन्मेति तमेवप्रकारद्वयेन उपात्तवान् । एकैकधातुप्रपञ्चानां सुबन्तानां दुर्घटमेकसन्दर्भप्रवेशं तत्तदुचितक्रियासङ्गमनेन विहितवानिति सुबन्तव्युत्पत्तिरिति दिक् । अवमेति अस्त्वित्यनुषज्यते । इत्यादि वा पूर्वेणापि संबध्यते । अथ उत्तरार्द्धे तिङन्तव्युत्पत्तिः । तत्र पूर्वप्रकारभेदो न घटते अतः साभिप्रायाणामेवोत्प्रेक्षणं सा वाच्या । तथाहि वन्दत इति जायमानमात्राऽभिवाद्यतया त्रिभुवनमातृता । यजत इति समस्तदेवतारूपत्वम् । उपैतीति । सर्वोपगम्यतया जगच्छरण्यत्वम् । आलोकत इति । विश्ववर्त्ति यावन्मनोहरत्वम् । स्तौतीति । समस्ताभिमतदायिता । मन्यत इति । निखिलज्ञेयस्वरूपता । मनुत इत्यवधारणीयतया तत्त्वात्मकता । अध्येतीति । कान्तारादिस्मर्त्तव्यतया दुर्गादिभेदेन प्रपञ्चमानत्वम् । ध्यायतीति । निदिध्यासनविषयतया प्रत्यग्ज्योतीरूपतेति परापरभेदभिन्ना भगवती स्तुता भवति । मन्यते मनुते इति यथा सामान्यविशेषाभिधायिनौ तथाऽध्येति ध्यायती अपि । तिङन्तानां च दुर्घटोऽपि परस्परमन्वयः केनापि प्रकारेण घटित इति पूर्ववत् बोद्धव्यः । तदेतदाह । अत्रेत्यादिपदसुभाभ्यां सम्बध्यते तेन जीवितवर्गो जनिवर्गश्चाभिमतः । मतिः सकृदेवाऽस्त इति नोक्तः भूयसाहि लोके व्यपदेशो दृश्यत इति ॥ ८४ ॥

समाधिरिति । सम्यगाधानमारोपणं समाधिः । सम्यक् त्वञ्च वक्रताशोकातिशयत्वं न तदधिकभावः । तदिदं लक्षणे स्फुटम् । कमलानि निमीलन्ति

परिम्लानप्रायामनुवदति दृष्टिः कमलिनी-
मितीयं माधुर्य्यं स्पृशति च तनुत्वञ्च भजते॥

अत्र प्रतीच्छति अवतरति अनुवदति इत्यादिचेतन-क्रियाधर्माणाम् अचेतनेषु अधरादिषु उपचारेण अध्यारोपणं समाधिः॥ ८५॥

अन्तःसंजल्परूपत्वं शब्दानां सौक्ष्म्यमुच्यते।

यथा, केवलं दधति कर्त्तृवाचिनः प्रत्ययानिह न जातु कर्मणि।
धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः॥

कुमुदानि उन्मिषन्ति चेत्यादौ व्यभिचाराच्च। तेन सम्बन्धिता न धर्मविशेषण-मत्र अभिमता। अलङ्कारात् भेदश्चतुर्थे वक्ष्यते। प्रतीच्छतीति। प्रत्येषणं दीय-मानस्य ग्रहणं चेतनधर्मः स विरहव्यथा अचेतनेऽधरे समारोपितः। किसलय-कान्तिमिती मन्दीभूतामवगमयति। देयस्य दातुरपसरणेऽन्यत्र संक्रान्तौ च प्रत्येषणनिर्वाहाच्च। तथाचाऽशोककिसलयेभ्योऽपि कोमलपाटलत्वमधरस्येति माधुर्य्यपोषः। तदभिमुखप्रवर्त्तनमवतरणमपि चेतनधर्मः सोऽचेतने कपोले समारोपितः किञ्चित् पाण्डुतामवद्योतयति। न च प्रत्येषणवत्सामस्त्येन ग्रहणम् अपि तु संमुखीभावमात्रमित्याशयात्। तथाच पूर्वश्लाघ्यं पुष्णाति अनुवादोऽपि चेतनधर्म एव सोऽचेतनायां दृष्टौ आरोपितः पर्य्युषितकमलच्छाया-मखण्डम् एव अत्र बोधयति। परप्रकर्षाभिमुखेऽपि विप्रलम्भे कदाचित् सङ्कल्पो-पस्थितप्राणनाथायां दृष्टौ कान्तीभवतीति प्राय.पदेन सूचितम्। स्पर्शस्य माधुर्य्य-विषयेऽसम्भवात् स्पृशति इति अपि आरोपः। प्रथमविग्रहश्रीभाविर्भावमभिव्य-नक्ति। चेतनक्रियेति। प्रकृतापेक्षया क्रियाक्रियावतोः सादृश्याभावान्नेयं गौणी किन्तु उपचरितैव शुद्धेत्याह। उपचारेणेति। एतेन रूपकादिभ्यो भेदः समर्थितः॥ ८५॥

अन्तरिति। यथा करितुरगादिरूपकाणां पाषाणशिलादौ अभिव्यक्तमवस्थितौ सूक्ष्मरूपता तथा शब्दानां श्रूयमाणानामपि कथमन्यथा वाक्यार्थभावनदशायां शेष-नियमेन उन्मेषः। केवलमित्यादौ सृजतिसंहरति शास्तयोधातवः कर्त्तर्य्येव भग-

अत्र श्रुतावगतवाक्यार्थस्य सृजति संहरति शास्ति स्तूयत इति शब्दानामन्तः संजल्परूपेण सूक्ष्मतया सूक्ष्मत्वम् ॥ ८६ ॥

ध्वनिमत्ता तु गाम्भीर्य्यम् ।

यथा,—मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमम्
चक्राङ्कं वह पादयुग्ममवनीं दोष्णा समभ्युद्धर ।
लक्ष्मीं भ्रूनिकटे निवेशय भव ज्यायान् दिवौकस्पते-
र्विश्रान्तःकरणैकचौर तदपि ज्ञातं हरिः खल्वसि ॥

बहिषये प्रयुज्यमानाः प्रत्ययान् प्रयोजयन्ति न कर्मणीति वाक्यार्थो यदा भाव्यते तदैवायं सृजति संहरति शास्ति न तु सृज्यते संह्रियते शिष्यत इति शब्दाः प्रकाशन्ते । एवं स्तौतिर्विपरीतकारकः । अत्र स्तौतिः कर्मण्येव प्रयोजको न कर्त्तरीति वाक्यार्थभावनासमय एव नायं किञ्चित् स्तौति किन्तु सर्वैः स्तूयत एवेति शब्दा उन्मिषन्ति तदेतदाह । अत्र श्रुतावगतस्येति । यावदेव वाक्यं श्रूयमाणमवगम्यते तस्यैव भावनापल्लवः पश्चादवसीयत इति वटबीजन्यायमुपोद्बलयति । सोऽयं सहृदयप्रतीतिसाक्षिकोऽर्थः ॥ ८६ ॥

ध्वनिमत्तेति । ध्वननं ध्वनिर्व्यञ्जनात्मा व्यापारः । स द्विविधः शब्दध्वनिः अर्थध्वनिश्च । येन शब्द एव ध्वन्यते स शब्दध्वनिः अभिमत इति केचित् तन्न । शब्दस्यैव ध्वन्यतानङ्गीकारात् । नाम्ना पुण्डरीकधारणमित्यादिव्याख्या ग्रन्थभङ्गप्रसङ्गाच्च । तस्मात् शब्दाश्रित ध्वननं शब्दध्वनिः अर्थाश्रितश्च अर्थध्वनिरिति वक्तव्यम् । प्रभूतध्वनिसम्बन्धपदकदम्बकस्य गाम्भीर्य्यम् । अथवा ध्वनयतीति ध्वनिः शब्दात्मको यत्रास्ति पदसमुदायः तद्गाम्भीर्य्यम् तथाहि पुण्डरीकपदप्रस्तावात् सितच्छत्रे नियताभिधानशक्तिकं कांस्यतालानुस्वानस्थानीयां सिताभीजव्यक्तिम् उपजनयन्नीयलभ्यते । अनेकार्थनियताभिधानशक्तिकत्वाच्च । तदाह । अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते । संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरञ्जनमिति । एवं विक्रमादिषु । तथापि विक्रमः पौरुषं परिगृष्टः पादविक्षेपश्च । चक्रं चक्रवर्त्तिचिह्नं रेखासन्निवेशलक्षणम् आयुधविशेषश्च । अभ्युद्धरणं सम्यग्लाभपालनप्रापणमुत्थापनञ्च । लक्ष्मीः सम्पत् देवताविशेषश्च । ज्यायान् प्रशस्यतरो वयोज्येष्ठश्च । इद-

अत्र नाभ्यां पुण्डरीकधारणं परिमितविक्रमत्वं चक्राङ्कितकरत्वं दंष्ट्रया वसुधोद्धरणं वक्षःस्थलनिवेशितलक्ष्मीकत्वमिन्द्रावरजत्वञ्च ध्वनयतीति गाम्भीर्य्यम् ॥ ८७ ॥

व्यासेनोक्तिस्तु विस्तरः ॥

यथा,—जनः पुण्यैर्यायाज्जलधिजलभावं जलमुचः
तथावस्थं चैनं निदधतु शुभैः शुक्तिवदनैः।

सेवाभिसन्धाय दिवौकसस्तेरित्यन्तं व्याचष्टे। अत्रेति। तदपीति अपिशब्देन विरोधद्योतिना हरिभावमाचरन्निति प्रतीयते पुण्डरीकधारणादेरुभयतुल्यत्वात् मौलावित्यादिविरुद्धमतः तद्विपरीतस्थानीयं विष्णौ ध्वनयत् प्रसिद्धिबलात् नाभ्यादिकमेव ध्वनयति। प्रसिद्धिरपि हि विशिष्टार्थप्रतिपत्तौ कारणमेवेत्यभिप्रेत्य शब्दध्वनिप्रस्तावेऽप्यन्यत व्याख्यातवान्। अन्यथा तु प्रक्रतासङ्गतिशङ्कया न वाच्यार्थपुष्टिः स्यात्। सोऽयं विरोधरूपमूलः प्रतीयमानव्यतिरेकी वाक्यार्थः शब्दध्वनिश्चात्र जीवभूतः। विश्रान्तःकरणैकचोर इत्यनेन त्रिभुवनमनोहरता। दिवानिशमन्तःकरणानि चोरयन्नभ्यासकौशलादिवा अत्यन्तप्रसिद्धानि नारायणचिह्नानि गोपायमीति प्रतीयमानोत्प्रेक्षा। ननु वस्तुध्वनिं शब्दशक्तिमूलमेके न मन्यन्ते कथं तर्हि "पन्थिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे। उण अपओहरं पेक्खिअ उण जह वससि ता वससु" इत्यादौ वस्तुवर्णनं न हि अत्र श्लेषन्यायो न वा समासोक्तिन्यायः सम्भवति। किं चालङ्कारध्वनावपि शब्दशक्तिरेवोपयुक्तेत्युक्तलक्षणः शब्दध्वनिः। ये तु वदन्ति शब्दस्याभिधाव्यतिरिक्ता वृत्तिरेव नास्तीति, लक्षणापि तैः अनङ्गीकरणीया स्यात्। न च अनङ्गीकर्त्तव्येति वाच्यम्। गङ्गायां घोष इत्यत्र सप्तम्यनन्वयापत्तेः। प्रक्रत्यनुगतस्वार्थाऽभिधानं हि विभक्तीनां व्युत्पन्नमिति घोषप्रतियोगिकाधिकरणभावयोग्यः कश्चिदर्थो गङ्गापदस्य वक्तव्यः। तथाच का अन्या नाम लक्षणा। एवं पुण्यत्वादिप्रतीतिस्तत एव भवन्ती ध्वननमुपस्थापयति इत्यादिकमस्माभिः काव्यप्रकाशविवरणे प्रपञ्चितम् इहतु ग्रन्थगौरवभियाविरम्यते ॥ ८७ ॥

व्यासेनेति यत्र लोकेऽपि वाच्ये वचनपल्लवः चमत्कारकारी तत्र स एव गुणकथाधिरोहणचम इति शब्दगुणेषु युक्तो विवेकुमत एवोक्तिं विशेष्य तया निर्दि-

ततस्तां श्रेयोभिः परिणतिमसौ विन्दतु यथा
रुचिं तन्वन् पीनस्तनि हृदि तवायं विलुठति ॥

अत्र कथमहं त्वत्कुचतटे विलुठामीत्यभिप्रायस्य विस्तरेण प्रकाशितत्वादयं विस्तरः ॥ ८८ ॥

समासेनाभिधानं यत् स संक्षेप उदाहृतः ।

यथा,—स मारुतिसमानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः ॥

इति । जनः पुण्यैरित्यादौ कथमहमित्यादौ निर्दिष्टोऽपि वक्त्राभिप्रायरूपोऽर्थः शक्तिपल्लवेन प्रकर्षमानीयते । तथाहि जन इति तटस्थोक्त्या न ममेदृशानि भागधेयानि । पुण्यैरिति । बहुवचनेन अनेकजन्मोपात्तानामेवेदं फलम् । यावाहिति सम्भावनाऽभिप्रायेण लिङा मुक्ताफलपरिणतियोग्यजलधिजलप्राप्तिसम्भावनापि कस्यचिदेव धन्यजन्मन इति प्रकाशिते कोऽपि कारणप्रकर्षः । जलमुच इत्यनेन वेषा न जलदानमेव व्यापारोऽपि तु विश्वसन्तापच्छिदुराणामन्योपकारप्रवणतया शुक्तिमुखपर्य्यन्तमपि तु नयनमुपपद्यत इति । तथास्थमित्यनेन यदैव चरावस्था तदैव जलधरैः पानमाशसामात्रगोचरो न तु पूर्ववत् सम्भावनामात्रगोचरोऽत एव शुभैरिति । समयविलम्बनस्य प्राक्तनपुण्यमानहेतुकत्वादित्यादिस्वयमवसेयम् । एतेन पदार्थे वाक्यरचनमिति यदन्यैर्गुणान्तरमभिहितं तद्विस्तारमेकमेव । घटनासौष्ठवमात्रोपयुक्तस्तु पल्लवीविशेषगुणेषु अस्माभिरभिधास्यते । त्वत् कुचतटे लुण्ठनमत्यल्पपुण्यस्य न संपद्यत इत्येतावानेव अर्थो विवक्षाविषय इति कार्य्यनिकाशस्यैव चमत्कारार्पणे प्रागल्भ्यमिति शब्दप्रधानकतया युक्तमत्र परिसंख्यानमिति ॥ ८८ ॥

सक्षेपेणेति । अस्ति कश्चिद्विशेषो यत्र वाक्यसङ्कोचः प्रकृतौचितीवशेन चमत्कारकारणं तथाहि स मारुतीत्यादौ मारुतिना यदौषधेरानयनं यच्च तया व्याहरणं तदुभयमपि इतिहासकथाविस्तरेण प्रतिपादितमिह तु स्त्रीकाङ्क्षमात्रेणेति शब्ददत्तभर एवायं गुणो यद्यपि भवति तथापि यावद्विवक्षितोपादानकाव्य-

अत्र कथाविस्तरप्रतिपाद्यस्यार्थस्य प्रकृतसंग्रामरसविच्छेदाशङ्कया श्लोकार्द्धमात्रेणोक्तत्वात् संक्षेपः ॥ ८९ ॥

यावदर्थपदत्वञ्च संमितत्वमुदाहृतम् ॥

यथा,—केचिद्वस्तुनि नो वाचि केचिद्वाचि न वस्तुनि।
वाचि वस्तुनि चाप्यन्ये नान्ये वाचि न वस्तुनि ॥

अत्रार्थस्य पदानां च तुलाविधृतवत्तुल्यत्वेन संमितत्वम् ॥ ९० ॥

भावतो वाक्यवृत्तिर्या भाविकं तदुदाहृतम्।

यथा,—एह्येहि वत्स रघुनन्दन पूर्णचन्द्र
चुम्बामि मूर्द्धनि चिरञ्च परिष्वजे त्वाम्।

रूपेण अर्थसङ्कोचो वक्तव्यः स च तथाविधवक्रोक्तिसङ्कोच एव भवतीत्युक्तावेव सङ्कोच उल्लिखति। कथमयं सङ्कोचः प्राप्तोचितभाव इत्याह। प्रकृतेति। अतएवोपक्षिप्तमपि इतिहासार्थमपहाय त्वराक्लिष्टेन कविना प्रकृतमुत्तरार्द्ध एवा संहितं पूर्वोत्तरार्द्धसामञ्जस्याय संक्षिप्यैव प्रकृतमप्युक्तम् ॥ ८९ ॥

यावदिति। यावन्ति वर्णानि विना प्रकृतमनुसर्त्तुमेव न शक्यन्ते तावन्मात्रमयत्वं वाक्यस्य सम्मितत्वम्। अतः संक्षेपाङ्गेदः। कवेः शक्तिव्युत्पत्तिभ्याम् असत्यपि पल्लवे कदाचिद् घटनालावण्यमुन्मिषत्येव। यथा पूर्वमुदाहृतम्। का त्वं शुभे कस्य परिग्रही वेत्यादि। अर्थव्यक्तिसङ्करशङ्कापि अतएव निराकृता। अस्ति उत्तरस्यान्दिशि देवतात्मेति केचिदुदाहरन्ति तदयुक्तम्। अनेन नामपदयोः पल्लवरूपत्वात् सम्मितत्वाभावे कथमाभासत्वं भवतीति विस्मृतव्यभिचारिगुणप्रकरणस्य भाषितमुपेक्षणीयम्। केचिदिति सर्वनाम्न एव अभिमतकविविशेषे पर्य्यवसानं सामर्थ्येन सम्भवतीति न अध्याहारशङ्का। शक्ता इत्यादिक्रियाऽपि सामर्थ्येन अवसीयते तदेतत् सर्वमभिप्रेत्याह तुलाविधृतवदिति ॥ ९० ॥

भावत इति। भावनादृशापन्ना चित्तवृत्तिर्भावः। भावनावासनाव्याप्तिरिति अनर्थान्तरम्। तथाहि उच्यते अनेन गन्धेन रसेन वा सर्वं भावितमिति

आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥

अत्र हर्षवशादनौचित्येनापि वन्देऽथवा चरणपुष्करकद्वयमित्यादीनामुक्तत्वाद् भाविकत्वम् ॥ ९१ ॥

गतिर्नाम क्रमो यः स्यादिहारोहावरोहयोः ॥

यथा,—वराहः कल्याणं वितरतु स वो यस्य शशभृत्
कलाकोटीकान्तं क्रमविगलदभ्युद्गतिभिया ।

हर्षादिभावितचेतसो हि वीचिप्राया उक्तिभेदाः प्रादुर्भवन्ति यैः अप्रत्यूहमेव भावोऽभिव्यज्यते तदिदमुक्तं या भावतो वाचः काव्यरूपायाः प्रवृत्तिर्निष्पत्तिः सैव-भाविकम् । भावप्रधानो निर्देशः । तथादि प्रकृतोदाहरणे एहीत्येकेनैव युष्मदर्था विना भाविनाऽभिमुखीकरणे वृत्ते द्वितीयस्य यदुपादानम् । पूर्णचन्द्रेति यदग्रिमक्रियाखनुपयुक्तस्यैव अभिधानम् । चुम्बामीति करिष्यमाणस्यापि यो वर्त्त-मानोपदेशश्चुम्बामीत्यत्र विशेषणमनुपादाय परिष्वज इत्यत्र चिरमिति यद्विशे-षणोपादानं त्वमिति योग्यार्थस्यापि प्रयोगः पूर्वोपात्तवदुत्तरक्रियास्वर्द्धितया यदेकस्यैव वहनस्य भाषणमेव समस्तसमकचतयैव यद्वहनाभिधानम् । वक्षे-त्यभिधाय चरणौ वन्दे इति या विरुद्धोक्तिर्यच्च ते इत्यस्य अवगतार्थस्यापि वचनं तत्सर्वमधर्मसिद्धमेवेति भावार्थस्य निष्पादितया स्वादहेतुर्भवति । प्रवर्त्तन्ते हि लौकिकानां स्नेहार्थानाम् उत्कलिकाप्राया वाचः स्वदन्ते च । यथा । इयं गेहे लक्ष्मीरियमसृतवर्त्तिर्नयनयोः रसावस्याः स्पर्शो वपुषि बहलश्चन्दनरसः इति । तदेतदभिप्रेत्य व्याचष्टे । अत्रेति । अनौचित्येनापि वन्दे इति ॥ ९१ ॥

गतिरिति । केचित् व्याचक्षते । यतीनामारोहावरोहौ विवक्षितौ क्वचित् कविशक्तिवशाद्यत्यद्गारूढा अवरूढा इव प्रकाशन्ते । यथा । भुवो नीचैर्नीचैर-वटपरिपाटीषु पतता स्फुरत्यर्वागर्वागखिलभुवने भोगितिलकः । क्रमादुच्चैरुच्चै-र्गिरिशिखरभाजामपि तृणामयं दूरे दूरे भवति भगवानम्बरमणिः ॥ अत्र यतीनामारोहावरोहौ तिलतण्डुलवत् प्रकाशते । इयं वृत्तौचिती वक्ष्यते ।

मिथः संमूर्च्छद्भिश्चतुरुदधिकल्लोलपटलै-
रनामृष्टं दंष्ट्राशिखरमधिशेते वसुमती ॥

अत्र पूर्वार्द्धे स्वरस्यारोहात् उत्तरार्द्धे चावरोहाद् गतिः ॥९२॥

उपक्रमस्य निर्वाहो रीतिरित्यभिधीयते।

यथा,—

ग्रावणा नासि गिरेः क्षता, न, पयसा नार्त्तासि, न, म्लापिता
न श्वासैः फणिनोऽसि, न, त्वदनुगा नायासिता क्वापि, न।

तथाच द्वितीये सङ्गता स्यात्। तस्मादयमर्थः। स्वराणामकारादीनामुपर्युपरितया बोधः सन्निकृष्टानामिव प्रकाशन गतिरिति। तथाच व्याख्यास्यति। स्वरस्येति। तथाहि प्रकृतोदाहरणे वराहः कल्याणमित्यत्राकारद्वयं तुल्यजातीयं निर्दिश्य सर्वो इत्यत्रोकारेण तुङ्गत्वमिव विधाय द्वितीयपादोपक्रमे कलाकोटीकान्तमित्यत्राभिन्नजातीया आरोहपरम्परा विहिता। उत्तरार्द्धे तु तथा नास्ति। शेते इत्यत्रापि न सोल्लेख आरोहः सोऽयमानुभविको गुणः श्लोकार्द्धश्लोकपादश्लोकांशक्रमेण नरसिंहवद्भवति। अत्र उपलक्षणतया आद्यमुदाहरति। अत्र पूर्वार्द्धमिति। क्रमैरितस्ततश्चरणविन्यासैर्विगलन्ती असम्पद्यमानायाऽभ्युद्धतिः अभ्युद्धरणं तस्या याभीर्भयं तयेति केचित्। अन्ये तु वदन्ति। क्रमेण विगलदभ्युद्धृतिभयमूर्द्धनयने स्फुटनादिभयं यस्याः सा क्रमविगलदभ्युद्धृतिभियेति ॥ ९२ ॥

उपक्रमस्येति। यादृश्या पदसन्निवेशस्यनीपक्रम्यते तादृश्या वृत्तनिर्वाहः क्वचिद् विशेषशोभावहो भवति। अतएवात्र नात्यन्तनिर्वाहोऽभिमतः। एकदेशवृत्तेरपि अभिप्रायसमयकाव्यजीवभूतत्वादेतस्य एव नातिप्रसङ्गोऽपि तथा प्रकृतोदाहरणे प्रथमोत्थिताया अभिदुहितुः अभ्याजसर्वाङ्गीणलावण्यमवलोकयिता कृष्णः स्वचक्षुषोः कृतार्थतां गमितवान्। इदानीमधरोष्ठमुद्राभेदेन यदि वर्णमात्रामपि भारतीं निश्चरन्तीमाकर्णयामि तदा श्रोत्रयोः सफलता भवेदिति मन्यते। न च इत्थमेव मुग्धाङ्गनानामालापः प्रवर्त्तते अपि तु नायकसन्निधौ भयादेवेति प्रथमं पृच्छति। ग्रावणा नासि गिरेःक्षतेति। अनन्तरञ्च यदि न वक्ष्यामि तदा ग्राम्यामथ वक्ष्यामि तदा धृष्टामाकलयिष्यतीति जानन्त्या इयमुत्तरमौचित्यापन्नं

स्वं वेश्म प्रतिगच्छतोरिति मुहुः श्रीशार्ङ्गिणोः सस्पृहं
सा प्रश्नोत्तरयुग्मपंक्तिरुभयोरत्यायता पातु वः ॥

अत्र प्रत्येकपदानन्तरं नञो विनिवेशात् क्रमाभेदो रीतिः ॥ ९३ ॥

विशिष्टा भणितिर्या स्यादुक्तिं तां कवयो विदुः ॥

यथा, कुशलं तस्याः, जीवति, कुशलं पृच्छामि, जीवतीत्युक्तम्।
पुनरपि तदेव कथयसि, मृतां नु कथयामि या श्वसिति ॥

अत्र कुशलं तस्या इति पृष्टे कुशलमकुशलञ्चेति वक्तव्ये योऽयं जीवतीत्याद्युक्तिभङ्ग्या जीवितमात्रशेषताप्रतिपादनप्रकारः स काव्ये शब्दगुणेषु उक्तिसंज्ञां लभते ॥ ९४ ॥

स्यात्। शिरःकम्प एकाक्षरत्व। तत्राद्यः कालिदासेन प्रयुक्तो मूर्द्धकम्पमयमुत्तरं ददाविति। द्वितीयं कविना विनिवेशितं न इति। एवं मृजतल्पितामृतः तदनुबन्धेन कृतकृत्यमिवात्मानं मन्यमानोऽधिकवासहेतुं आरयन् पृच्छति। पश्यसेति। तदिदमुक्तमार्त्तेति। प्रकारान्तरेण उत्तरदानासम्भवात् पुनरप्याह। नेति। तदनन्तरं व्याजसरसायाः कियदधिकवचनश्रवणोत्कण्ठितः सर्वलोकप्रसिद्धं भयहेतुं आरयन् पृच्छति। स्वापितेति अभिमतस्यानिष्टम्। स्वप्नेऽपि सञ्जात इति दृष्टासीति नोक्तम्। एवमपि वचनपल्लवनेन समस्तमुग्धाङ्गनाप्रसिद्धेन वचनोन्मुद्रणप्रकारेण पृच्छति। त्वदनुगेति। सर्वाकारेण उत्तमतामभिज्ञाय मानदृप्तः स्वं वेश्म प्रत्येव गतवान्न तु पृष्टवानिति। तदिदं सर्वमभिप्रेत्य व्याचष्टे। अत्रेति ॥ ९३ ॥

विशिष्टेति। लोकोत्तराः सन्ति हि भणितिप्रकारा लोकप्रसिद्धाः। यथा सुप्तोऽसीति प्रश्ने गृहे देव कुले वा इत्यादि। एतत्प्रसिद्धिव्यतिक्रमेण तु या काचित् कविप्रतिभया भणितिः आक्रम्यते सा भवति लोकोत्तरा। तथाच प्रतिभाकृष्टतया चमत्कारित्वादगुणत्वम्। अतएव कवय इत्याह। कविसहृदयानामेव तादृशीक्तिपरिचयसम्भवात्। तथाहि। प्रकृतोदाहरणे कुशलप्रश्ने कुशलं वेत्ति

उक्तेः प्रौढ़ः परीपाकः प्रोच्यते प्रौढ़िसंज्ञया ।

यथा,—अभ्युद्धृता वसुमती दलितं रिपूरः
त्रिविक्रमं कवलिता बलिराज्यलक्ष्मीः ।
अत्रैकजन्मनि कृतं यदनेन यूना
जन्मत्रये तदकरोत् पुरुषः पुराणः ॥

अत्र प्रकृतिस्थकोमलकठोरेभ्यो नागरोपनागरग्राम्येभ्यो

लोकप्रसिद्धमतस्तदेव वक्तुमर्हति । यत्तु तदपहाय जीवतीति उपात्तमपरत्रापि प्रश्ने तथैवोक्तं ततप्रतिभाकृष्टतया साभिप्रायमुन्नीयत इत्याह । अत्र कुशलमकुशलमित्यादि ॥ ९४ ॥

सम्प्रति प्रकर्षकाष्ठालक्षणं वाक्यस्य गुणं लक्षयति । उक्तेरिति । उक्तिर्वाक्यं तस्यायं पाकः सा प्रौढ़िः । शब्दानां पर्य्यायपरिवर्त्तासहत्वं पाकः । यदाह । यत्पदानि त्यजन्त्येव परिवृत्तिसहिष्णुताम् । तं शब्दन्यायनिष्णाताः शब्दपाकं प्रचक्षत इति । प्रौढ़ इति । उपक्रमसंहारयोर्निर्व्यूढ़ः स चायं नालिकेरसहकारमृद्वीकोपलक्षणेस्त्रिविधो गीयते । तद्यथा । नालिकेलफलं पक्वं त्वचि कठिनं शिरास्त्रिवृतकोमलप्रायं कपालिकायां कठिनतरं तथा कश्चित्सन्दर्भो मुखे कठिनस्तदनन्तरं मृदुप्रायस्ततः कठिनतरो नालिकेरपाक इत्युच्यते । तथाहि । प्रकृतोदाहरणे प्रथमपादेऽभ्युद्धृतेति वर्णचतुष्टयमारभ्य कठिनं वसुमतीदलि इति वर्णषट्कं कोमल तंरिपूर इत्यनुस्वाररेफदीर्घैरक्षरचतुष्टयं कठिनतरम् । अत्रापि तमिति मृदुप्रायनिवेशनेन कोमलकपालिकामुखभागसारूप्यं द्रढ़यति इति अस्मदाराध्याः । एवं द्वितीयादिपादत्रये चतुष्कषट्कचतुष्कैर्नालिकेरफलसाम्यमुन्नेयम् । कथं पुनरेवंविधः पाकः सम्भवतीत्यत आह । अत्रेति । अभ्यासनिर्वृत्त आभ्यासिकः । काव्यं कर्त्तुं विचारयितुं च ये जानन्ति तदुपदेशेन करणे योजने च पौनःपुन्येन प्रवृत्तिरभ्यासः । असावपि कथं पाकविशेषो भवतीत्यत आह । सन्निवेशचारुत्वेनेति । सन्निवेशो रचना तस्यां चारुत्वं तदपि कथमित्यत आह । आवापोद्वापाभ्यामिति । सन्दर्भानुप्रवेशनमावापस्ततः समुद्धरणमुद्वापः । केषामित्यत उक्तम् ।

वा पदेभ्योऽभ्युद्धृतादीनां ग्राम्यादीनामुभयेषां वा पदानामावापोद्वापाभ्यां सन्निवेशचारुत्वेन योऽयमाभ्यासिको नालिकेरीपाको मृद्वीकापाक इत्यादिर्वाक्यपरिपाकः सा प्रौढिः इति उच्यते। तथाच एतद्वाक्यं नालिकेरीपाक इत्युच्यते। एवं सहकारपाकमृद्वीकापाके अपि उदाहरणीये इति ॥ ९५ ॥

पदानामिति। उद्धृतानामिति। बुद्ध्या पृथक्कृतानाम्। केभ्य इत्यत उक्तम्। प्रकृतिस्थादीत्यादि। तेनायमर्थः। प्रकृतिस्थादिपदकोऽप्येतदेवोद्धर्तव्यं यद् घटनासौष्ठवेन पर्यायपरिवर्त्तनं न सहते। भवति हि सहृदयानामेवमन्यत्पदं नास्तीति व्यवहारः। सोऽयं रचनासिद्धिविशेषः कथमन्यथा तज्जातीयमेव पदमन्यत्र सन्दर्भे निवेशितं न तथा स्वदते। अतएवासौ वाक्यगुणः काठिन्यं च संयोगैर्दीर्घैर्वा स्वरैर्भवति। यथा अत्रैव उदाहरणे रिपुर इत्यादौ। सुप्तिङ्व्युत्पत्तिलक्षणस्तु वार्त्ताकपाकः कैश्चिदुक्तः स तु सुग्रन्थता लक्षणगुण एव। एवमिति। यथा द्राक्षाफलं त्वच आरभ्य कोमलमन्तरा द्वित्रिचतुरास्थिसम्पादितकिञ्चित्काठिन्यम् एवं कश्चित्सन्दर्भ उपक्रमोपसंहारयोः कोमलः एव मध्ये कठिन एव। संयोगदीर्घस्वरमात्रकृतमनाकठोरभावो मृद्वीकापाक इत्युच्यते। यथा। अयि त्वदावर्जितवारिसम्भृतं प्रवालमासामनुबन्धि वीरुधाम्। चिरोज्झितालक्तकपाटलेन ते तुलां यदा रोहति दन्तवाससा। यथाच। अनवरतनयनजलस्रवनिपतनपरिपीतहरिणमदतिलकम्। वदनमपयातमृगमदशशिकिरणं वहति खेलदृशः। अतएव कविकल्पलताकारादिभिरुक्तो नीलकपित्थपाकश्चतुर्थो नास्ति। यदत्र परिणतं सहकारफलमारम्भादेव कोमलमस्थनि तु कठोरप्रायम् एवमपरः सन्दर्भो मुखादारभ्य मृदुरन्तरे कठिनतरः सहकारपाक इत्युच्यते। यथा। कमलिनि कुशलं ते, सुप्रभातं रथाङ्गाः, कुमुदिनि पुनरिन्दावुद्गते त्वं रमेथाः। सखि रजनिगतासि त्वं तमो जीर्णमुच्चैरिति, तरलितपक्षाः पक्षिणो व्याहरन्ति। अत्र एवोदाहरणेऽपि द्विधापि कठोरत्वमवसेयम्। तेऽमी त्रय एव गुडपाकाः व्यतिकरजन्मानस्तु भूयांसः। एत एवार्थपाकाः पञ्चमे प्रकारान्तरेण प्रतिपादयिष्यन्ते ॥ ९५ ॥

उक्ताः शब्दगुणा वाक्ये चतुर्विंशतिरित्यमी ॥
अथैतानेव वाक्यार्थगुणत्वेन प्रचक्ष्महे।
तेषां श्लेष इति प्रोक्तः संविधाने सुसूत्रता ॥

यथा,—दृष्टैकासनसंस्थिते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने निमील्य विहितक्रीड़ानुबन्धच्छलः।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसा-
मन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति ॥

अत्रैकासनसंस्थितयोः प्रियतमयोर्विलासिना हि एका नयननिमीलनकेलिकर्मणा वञ्चिता, अन्या तु वदनचुम्बनेन रञ्जितेति। सेऽयं संविधाने सुसूत्रता श्लेषो नाम वाक्यार्थ-गुणः ॥ ९६ ॥

सूत्रकार एवार्थगुणप्रकरणे सङ्गतिं करोति। उक्ता इति। वृत्तकीर्त्तनं हेतुभावप्रदर्शनार्थम्। एतानेव श्लेषादिनामकानिति। एषामिति निर्द्धारणे षष्ठी। वाक्यार्थशरीरभूतः श्लेषः प्रथमं लक्ष्यत इति। घटनाश्लेष, इति सूत्रयित्वा क्रमकौटिल्यानुल्लणत्वोपपत्तियोगी घटनेति, वामनेन व्याख्यातम्। अस्यार्थः। इदं कृत्वा इदं कर्त्तव्यमिति क्रमसत्त्वेव कौटिल्यं लोकातिगामिनी वक्रता। अवक्रयोः शब्दार्थयोः वचनमात्रत्वात्। अतिमात्रतया प्रतिभासाभावो-ऽनुल्लणत्वं कथमेवमर्थः सङ्गच्छत इत्यनुपपत्तिसमाधानौपयिकविशेषनिवेशनम् उप-पत्तिः तथाच क्रमेण कौटिल्येनानुल्लणतया उपपत्त्या योजनमर्थस्य श्लेष, इति तव संविधानक्रमानुल्लणत्वेन सूत्रशब्देन उपात्ते स्वपदेन कौटिल्यम् उक्तम् अघटमानस्य एव वाक्यार्थस्य बुद्धिचातुर्य्येण घटनेति वाक्यार्थः। दृष्टेति। एका नायिका, अपरा नायिका च तत्सखीप्रच्छन्ननायकप्रेमपात्रं तेन एकासनसङ्गतिः। प्रियतमे इति तदनुरञ्जनमेव जीवितसर्वस्वमिति मन्यमानस्य युगपत् प्रवृत्तिः। आदरेण निभृतपदन्यासता तथा भूत्वा युगपत्करार्थां नयनद्वयपिधानं लोकप्रसिद्धः केलिः। ईषदिति कन्धरामात्रं यथा चलते न तु शरीरमपि। अन्यथा चलनज्ञाने नायि-कायाः कषायभावः स्यात्। निभृतरागोन्मुद्रणात् पुलकोद्गमः। अतएव प्रेम्णा स्वगोचरलोकोत्तरत्वाभिमानरूपेण तत्तदनेकभावोर्मिभिः आन्दोलनं मनस

यत्तु प्राकव्यमर्थस्य प्रसादः सोऽभिधीयते ।

यथा,—अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्ववन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोड़ताम्रस्तमांसि ॥

अत्र पद्मिनीविकाशकरणे उदयशैलावतरणे कोकशोकहरणे तमोविदारणे च अनुक्तोऽपि सूर्य्यलक्षणोऽर्थः प्रकटम् उपलक्ष्यते ॥ ९७ ॥

अवैषम्यं क्रमवतां समत्वमिति कीर्त्तितम् ॥

यथा, अग्रे स्त्रीनखपाटलं कुरवकं श्यामं द्वयोर्भागयो-
र्बालाशोकमुपोढ़रागसुभगं भेदोन्मुखं तिष्ठति ।
ईषद्धरजःकणाग्रकपिशा चूते नवा मञ्जरी
मुग्धत्वस्य च यौवनस्य च सखे! मध्ये मधुश्रीः स्थिता ॥

अत्र मधुश्रियो मौग्ध्यत्यागयौवनारम्भक्रतानां विशेषणानाम् अवैषम्यात् समता ॥ ९८ ॥

उल्लासः साधुवचनं न जानातीत्यभिप्रायिकसपत्नीगतधिक्कारभावनया निभृतहासोन्मेषः । वचनाचातुर्य्येण स्वमनीषितसम्पादनं धूर्त्तता । तदेतद् व्याचष्टे । अत्रैकासनेति ॥ ९६ ॥

यत्तु प्राकव्यमिति । समभिव्याहृतपदार्थसंसर्गात्मनि वाक्यार्थे दर्पणतल इव अनुपात्तस्यापि विवक्षितस्य वस्तुतः प्रतिभासोऽर्थप्रसादः । न चेदमनुमानं समानसंवित्संवेद्यत्वात् । तदाह । अनुक्तोऽपि सूर्य्यलक्षणोऽर्थः प्रकटमुपलक्ष्यत इति ॥ ९७ ॥

अवैषम्यमिति । येन रूपेण लोकेऽर्थः प्रतीतस्तदनतिक्रमणं तस्योक्तिः समता । वक्रता चात्र विशेषणमूहनीयमन्यथा भूत्वा व्रजतीत्यतः को विशेषः स्यात् । अग्रे मुग्ध इति । कोषात् प्रथमसुह्रियमाना कुरवककलिकाकान्ता-

माधुर्य्यमुक्तमाचार्य्यैः क्रोधादावप्यतीव्रता ॥

यथा, भ्रूभेदे सहसोन्नतेऽपि वदनं नीतं परां नम्रता-
मीर्ष्यां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम् ।
अन्तर्वाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च नो प्रश्रयः ॥

अत्र वासवदत्तालक्षणस्य अर्थस्य कोपेऽपि योऽयं विनया-
वलम्बनेन कोपचिह्ननिह्नवः तत् माधुर्य्यम् ॥ ९९ ॥

अनिष्ठुरत्वं यत् प्राहुः सौकुमार्य्यं तदुच्यते ॥

यथा,—सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात्त्रिचतुराणि पदानि गत्वा ।

नखवत्याटला भवतीति मधुश्रियो बाल्यम् । ततः प्रौढिमापद्यमानासु कलिकासु श्यामो वृन्तभागः स्फुटितत्वात् द्विधाऽवतिष्ठते इति यौवनम् । एवं बालाशोक-मित्यादौ क्रमेण बाल्ययौवनचिह्नीपदर्शनम् अवसेयम् ॥ ९८ ॥

माधुर्य्यम् इत्यादि । शृङ्गारकरुणौ हि मधुरौ ततः तद्व्यञ्जकोऽर्थोऽपि मधुर-स्तस्य शर्करादिरसोदरं माधुर्य्यम् । यथाहि शर्करारसः सहृदयस्य असहृदयस्य वा, सुस्थस्य असुस्थस्य वा, झटिति रसनाग्रमपीति चमत्कारमावहति । तथा चित्त-द्रुतिसारवर्णैकप्राणरसव्यञ्जकोऽर्थः तेन तद्व्यञ्जनशक्तिसमुद्रेकनिर्वहणं वाक्यार्थस्य माधुर्य्यमिति पर्य्यवसितोऽर्थः तच्च वासनापरिपाकवशादुदयव्ययवतीषु दीप्तचित्त-वृत्तिषु जागरूकास्वपि समस्तभावनया विरोधः सम्पद्यते इति क्रोधादावप्यतीव्रता इत्युक्तम् । तथाहि भ्रूभेद इत्यादौ गात्रस्खलितादिना कदाचिदपराद्धे नायके प्रेमस्वभावादीर्ष्यारोषलक्षणव्यभिचारिप्रादुर्भावात् तदनुभावभ्रूभेदोद्गमो रतिप्रक-र्षाद्विष्णुना अवहित्थेन न्यग्भाव्यते । विरोधि विजये हि भूयान् प्रकर्षः परस्य भवति । अतएव परामित्युक्तम् एवम् ईर्ष्यां प्रति भेदकारि हसितमित्यादौ माधुर्य्यमुन्नेयम् । तदिदमाह । अत्र वासवदत्तालक्षणस्येति ॥ ९९ ॥

अनिष्ठुरत्वमिति । सामग्रीसम्भवेऽपि चित्तद्रुतिमनासादयन्नीरसः कठोरो-ऽभिधीयते । अतथाभूतस्तु झटिति तन्मयी भवनयोग्यान्तःकरणः सुकुमारस्तदिद-

गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥

अत्र सीतायाः पुरीपरिसरेऽपि कियदस्ति गन्तव्यमिति वचनं शृण्वतो रामस्य शिरीषमृदुतदङ्गावलोकनेन अश्रुणोऽवतारः सौकुमार्य्यमाह ॥ १०० ॥

अर्थव्यक्तिः स्वरूपस्य साक्षात् कथनमुच्यते ।

यथा,—पृष्ठेषु शङ्खशकलच्छविषु च्छदानां
रेखाभिरङ्कितमलक्तकलोहिताभिः ।
गोरोचनाहरितबभ्रुवहिःपलाश-
मामोदते कुमुदमम्भसि पल्वलस्य ॥

अत्र कुमुदस्वरूपस्य साक्षादिव प्रतीयमानत्वेन यत् स्पष्टरूपाभिधानम् असौ अर्थव्यक्तिः ॥ १०१ ॥

मुक्तमनिष्ठुरत्वमिति । प्राहुरित्यनेन प्रसिद्धिं द्योतयति । सद्य इति । सह गन्तुमुत्सुका कथमेवं सुकुमारप्रकृतिः कान्तारेषु भविष्यसीति वार्य्यमाणापि हृदयवैमुख्येन पद्भ्यामिति त्वरितं गमिष्यामीति स्नेहमूढ़ा त्रिचतुराणि पदानि जवात् गतवती । अश्रुणः प्रथमावतारो भविष्यदश्रुपरम्पराप्रचारभूतः । सौकुमार्य्यमाहेति । अश्रुपातेन अनुभावाश्रुनिमित्तभूता चित्तद्रुतिः करतलामलकवत् प्रकाश्यते ॥ १०० ॥

अर्थव्यक्तिरिति । स्वरूपं स्वसाधारणं कविप्रतिभैकगोचरं चमत्कारिरूपं तस्य साक्षात् कथनं कविशक्तिवशात् साक्षात्कारसोदरप्रतीतिजनकपदवत्त्वं सन्दर्भस्य अर्थव्यक्तिनामा गुणः । अर्थो यथोक्तः तस्य व्यक्तिः प्रत्यक्षायमाणता जातेर्भेदस्तृतीये वक्ष्यते । पृष्ठेऽपि । ईषद्विकस्वरस्य कुमुदस्य किञ्चिद् विघटमानबहिः पलाशसम्बन्धिषु शीतातपासम्पर्कादत्यन्तविशदानां दलानां पृष्ठानि पाकलोहितरेखाङ्कितानि दृश्यन्ते । अतएव आमोदन्ते किञ्चित् उद्भिदुरेण सुखेन गर्भपिण्डितमामोदं सूचयतीति ॥ १०१ ॥

कान्तिर्दीप्तरसत्वं स्यात्

यथा, —मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि भाजनमीदृशीनां
वैरी न चेद् भवति वेपथुरन्तरायः ॥

अत्र नायिकायाः सपत्नग्रामीर्ष्यानुबन्धेन प्रतिपादितस्य प्रियतमानुरागलक्षणस्य शृङ्गारस्य दीप्तरसत्वं कान्तिः ॥१०२॥

भूत्युत्कर्ष उदारता ।

यथा, प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने
तोये काञ्चनपद्मरेणुकपिशे पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो
यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ॥

कान्तिरिति । रसोऽभिमानात्मा शृङ्गारः तस्य दीप्तत्वं विभावानुभावव्यभिचारिभिः सम्यक्सञ्चलितेन स्थायिना निरन्तरमुपचीयमानस्य परमकोटिगमनम् । तथाहि । मा गर्वमित्यादौ यत्र भङ्गेषु बहुतरसूक्ष्मभङ्गविशेषमयमञ्जरीलिखितेन वह्निर्विषयातिरोधानलक्षणतादवस्थ्यात् प्रकाशनेन नायकस्य सपत्नग्रामनुरागे विच्छायभावोक्तिः । स्वात्मनि तु सहसा आविर्भवत्सात्त्विकप्रतिपादनेन जीवितसर्वस्वाभिमानात्मकरतिस्थायिभावप्रकाशने तस्याः सापेक्षभावे नायिकाया अपि तदवस्थैव सा प्रतीयते तदिदमाह प्रियतमानुरागेति । अनुरागेण लक्ष्यते सप्तार्चिरिव अर्चिषा उपचीयत इत्यनुरागलक्षणः ॥ १०२ ॥

भूतीत्यादि । भूतिः सम्पत् तस्या उत्कर्षो लोकातिगप्रकर्षः तस्यैव सहृदयचमत्कारार्पकतया गुणधुराधिरोहणक्षमत्वात् । प्राणानामिति । उचिता तपोयोग्या । वनस्य कल्पतरुसम्बन्धः सम्पत्तत्रैव सत्पदेन मुक्तास्रवकमाणिक्यमञ्जरीचीनाऽंशुककिशलयादिविशेषद्योतिना प्रकर्षः पद्मप्रकरस्योयसम्पत्तत्रैव काञ्चनमयत्वे पद्मानां प्रकर्षः । बहुत्वं शिलावेश्मसम्पत् । तत्रैव रत्नरूपताप्रकर्षः

अत्र मारीचाश्रमस्य सत्कल्पवृक्षादिपदैर्वैभवोत्कर्षस्य प्रतिपादनमुदारता ॥ १०३ ॥

आशयस्य य उत्कर्षस्तदुदात्तत्वमीष्यते ॥

यथा,

पात्रे पुरोवर्त्तिनि विश्वनाथे क्षोदीयसि क्ष्मावलये च देये ।
व्रीड़ास्मितं तस्य तदा तदासीच्चमत्कृतो येन स एव देवः ॥

अत्र सकलक्ष्मावलयप्रदानेऽपि जातव्रीड़तया बलेराशयोत्कर्षप्रतिपादनाद् उदात्तत्वम् ॥ १०४ ॥

ओजः स्वाध्यवसायस्य विशेषोऽर्थेषु यो भवेत् ॥

यथा, तान्येव यदि भूतानि ता एव यदि शक्तयः ।
ततः परशुरामस्य न प्रतीमः पराभवम् ॥

अत्र परशुरामो विजयत एव इत्यस्मिन्नर्थे स्वाध्यवसाय प्रतिपादनम् ओजः ॥ १०५ ॥

सन्निधौ स्त्रीप्रतियोगिकतासम्यत् तत्रैव विबुधेति प्रकर्षस्तदिदमाह । सत्कल्पवृक्षादिपदैरिति ॥ १०३ ॥

आशयस्येति । उत्कर्षः पूर्ववत् । उच्चाशयो लोके उदात्त इति प्रतीतः । पात्र इति । विश्वनाथ इति । यदाशावशवदा त्रिलोकी सोऽपि यत् प्रार्थयत इति, बलयेऽपि इति अपिशब्देन यस्यैकदेशः कुरुपाण्डवनिधननिदानतया विख्यातः तत्रापि देये लज्जत इति । देवासुरकिन्नरादिः अयं जङ्गमस्थावरप्रपञ्चो यदुच्छ्वासविलसितं सोऽपि चमत्कृत इति पदार्थानभिहितः प्रकर्षोऽभिधेयः ॥ १०४ ॥

ओज इति । अध्यवसायो निश्चयस्तत्र विशेषः पूर्ववत् । स्वपदेन वक्ता अभिमतः । तानीति । यदि हन्तव्यजातौ इदमेव न विपर्य्यस्तम् । ता एवेति । प्रभावोत्साहमन्त्रजाः तत्तदर्थनिर्वहणप्रख्यातकीर्त्तयः शक्तयो यदि न विलीनतामयासिषुः । परशुराम इति । अर्जुनभुजसहस्रच्छेदादिना यस्य परशुरामस्य त्रिभुवनेऽपि प्रसिद्धिः ॥ १०५ ॥

रूढ़ाहङ्कारमौर्जित्यम्

यथा, उमा बधूर्भवान् दाता याचितार इमे वयम्।
वरः शम्भुरलं ह्येष तत्कुलोद्भूतये विधिः॥

अत्र इमे वयमिति आत्मान्वितव्रतचर्य्यादिसमुत्थप्रौढ़ाहङ्कारप्रतिपादनादौर्जित्यम्॥ १०६॥

प्रेयस्त्वर्थेष्वभीष्टता।

यथा, रसवदमृतं कः सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविज्ञनो
वदतु यदिहान्यत् स्वादु स्यात् प्रियादशनच्छदात्॥

अत्रामृतप्रभृतिभ्यः प्रियादशनच्छदस्याभीष्टताप्रतिपादनं प्रेयः॥ १०७॥

अदारुणार्थपर्य्यायो दारुणेषु सुशब्दता॥

रूढ़ेति। ऊर्जितशब्दोऽहङ्कृते प्रसिद्धः तात्कालिकनिमित्तोपनिपाते वासनाविकाशात्तमो निर्भेदस्थानेषु सुप्तप्रबुद्ध इव स्थायिभिः असंस्पृश्यमानः प्रथमप्रादुर्भूतोऽभिमानोऽहङ्कार इत्युच्यते। रूढ़ः सूत्रावस्थातो द्वितीयाभाविर्भावदशामापन्नोऽहङ्कारो यस्य स रूढ़ाहङ्कारः तस्य भावस्तत्ता। सुगमसुदाहरणम्॥ १०६॥

प्रेय इति। शब्दगुणेऽनुनिष्पादिवर्णनीयप्रीतिजनकत्वं पदानामुक्तमिह तु वाक्यार्थस्य वक्तृप्रीतिगोचरत्वमुच्यत इति विशेषः। प्रीतिरुक्तपूर्वा। तत्र एव अभिशब्देन प्रकर्षो द्योतितः। अभीष्टता प्रेय इति प्रेयः पदप्रवृत्तिनिमित्तम्। रसवदिति प्रशंसायां मतुप्। अमृतमिति यस्य प्रसादात् त्रिदशैरमरत्वम् आसादितम्। नान्यथेति प्रत्यक्षसाक्षिके वस्तुनि प्रमाणान्तरानुसरणम्। प्रसन्नरसमिति। अस्तालक्षणकाव्यार्थापगमेन परिणतिः इत्यादि॥ १०७॥

अदारुणेत्यादि। झटिति आतङ्कदायी दारुणः तस्य साक्षादभिधाने

यथा,

देवव्रते वाञ्छति दीर्घनिद्रां द्रोणे च कर्णे च यशोऽवशेषे।
लक्ष्मीसहायस्य तवाद्य वत्स वात्सल्यवान् द्रौणिरयं सहायः॥

अत्र मुमूर्षामरणादीनां दारुणार्थानां दीर्घनिद्रां वाञ्छति यशोऽवशेष इत्यादिभिः सुशब्दैः पर्यायेण भणनं सुशब्दता। सा च मुख्यार्थव्यतिक्रमस्य वाक्यार्थत्वान्न शब्दगुणः॥ १०८॥

व्याजावलम्बनं यत्तु सा समाधिरिति स्मृतः।

यथा,—दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा।
आसीद्विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम्॥

अत्र गमने सति प्रियजनावलोकनाभिलाषिण्याः शकुन्तलाया दर्भाङ्कुरचरणक्षतिवल्कलव्यासङ्गादिव्याजावलम्बनं समाधिः॥ १०९॥

सौक्ष्म्यमित्युच्यते तत्तु यत् सूक्ष्मार्थाभिदर्शनम्॥

विवक्षितप्रतीति स्खलनखेदसम्भवात् तदुपनीतस्य वस्तुनः तदध्यासान्तरितस्य वाक्यार्थत्वादिति। सर्वत्रैव हि लक्षणायाम् अर्थाध्यासोऽङ्गीक्रियते लौकिकी चेयं लक्षणेति न प्रयोजनगवेषणमपीति। सुगममुदाहरणम्॥ १०८॥

व्याजेति। चित्तवृत्तिषु बलादाविर्भवन्तीषु प्रकृतरसौचित्यविरोधिप्रकर्षात् प्रकटमनावरणीयासु च यदन्यथा समर्थनं तद्व्याजावलम्बनं प्रस्तुतोचितसमाधानात्मकत्वात्। तथाहि। पूर्वानुरागे चपासाध्वसविवशायाः तावन्नायकसमीपादपसरणमौचित्यापन्नमनन्तरन्तु उत्कण्ठातरलितायाः कथमालोकमात्रेण अपि कृतार्थः स्यादिति परावर्त्तनम्। तत्र च मौग्ध्यभङ्गशङ्कायां दर्भाङ्कुरचरणप्रवृत्तिव्याजावलम्बनमेव कार्य्यसर्वस्वमाभासत इति॥ १०९॥

यथा,—अन्योन्यसञ्चलितमांसलदन्तकान्ति
सोल्लासमाविरलसंवलिताङ्गितारम्।
लीलागृहे प्रतिकलं किलकिञ्चितेषु
व्यावर्त्तमानविनयं मिथुनं चकास्ति॥

अत्रान्योन्यसञ्चलितमांसलदन्तकान्तीत्यादिवाक्ये दम्पत्योः अनुरागलक्षणस्य सूक्ष्मार्थस्य दर्शनात् सौक्ष्म्यम्॥ ११०॥

शास्त्रार्थसव्यपेक्षत्वं गाम्भीर्य्यमभिधीयते।

यथा,—मैत्र्यादिचित्तपरिकर्मविदो विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः।
ख्यातिञ्च सत्वपुरुषान्यतयाधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम्॥

अत्र मैत्र्यादिपदानां शास्त्रार्थसव्यपेक्षत्वाद् गाम्भीर्य्यम्॥१११॥

सूक्ष्मेत्यादि। वाक्यैकगोचरोऽर्थः कुशाग्रीयबुद्धितया सूक्ष्मः तस्य दर्शनमुपायवैलक्षण्यात् तत्तद्विशेषवतः प्रत्यक्षायमाणता। सूक्ष्मालङ्कारादङ्गदसूतीये करिष्यते। स चायं भावो वासनीयश्च। भावनामात्रगम्यो भाव्यो यथा। उच्चइ अगमहिआवट्ठसिज्जन्तरो सपरिआरअम्। पाणीपसरन्त मत्ताचंवफलिह च सअम्मुहं बाला। एकाग्रता प्रकर्षगम्यो वासनीयस्तमुदाहरति। अन्योन्येति। व्याजापसृतपरिवारे लीलावेश्मनि तत्कालकलितमन्मथोन्माथं विदग्धमिथुनम् उत्तरोत्तरमपनीयमानत्रपासाध्वसतया प्रतिकलं नवेन्दुवत्कान्तिविशेषमासादयति। विचित्रमव्यभिचारि अनुप्रवेशे हर्षरुदितस्मितादीनामव्यवस्थिततया व्यतिरेकरूपकिलकिञ्चिताख्यश्रृङ्गारभावोन्मेषः॥ ११०॥

शास्त्रार्थ इति। एकपुरुषार्थप्रयोजनकपदार्थव्युत्पादनं विधिनिषेधव्युत्पत्तिफलकं शास्त्रं तदर्थसव्यपेक्षत्वम्। तदुक्तप्रक्रियानिरूपणाधीननिरूपणत्वं वाक्यार्थस्य गाम्भीर्य्यम्। मैत्री, करुणा, मुदिता उपेक्षा इति चतस्रः चित्तसम्मार्जनाः। अविद्याऽस्मितारागद्वेषाभिनिवेशाः, पञ्च क्लेशाः। चित्तवृत्तिनिरोधो योगः स

विस्तरोऽर्थविकाशः स्यात्

यथा, संग्रामाङ्गनमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सुहृसा यद् यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलं
तेन त्वं भवता च कीर्त्तिरनघा कीर्त्या च सप्ताब्धयः ॥

अत्र विपञ्चबधात् सप्ताब्धिव्यापिनी कीर्त्तिरर्जितेत्येतावतोऽर्थस्य बहुधा विकाशितत्वाद्विस्तरः ॥ ११२ ॥

संक्षेपस्तस्य संवृत्तिः ।

यथा, श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्य्यताम् ।
आत्मनः प्रतिकूलानि न परेषां समाचरेत् ॥

एव व्युत्थानहेतुभिः अनास्कन्दनीयः सबीजः । सत्वं प्रधानम् । पुरुषचिद्रूपस्वयोर्भेदः प्रथा ख्यातिरिति, सांख्यप्रक्रिया । मैत्र्यादिपदानामिति । वाक्यार्थस्यैव यथोक्तरूपत्वे तत्प्रतिपादकपदानामवश्यं तथा भावो भवतीति वैशेषिकादेर्भेदो वक्ष्यते ॥ १११ ॥

विस्तर इति । वाक्यार्थस्य पल्लवभूततत्तत्सहृदयचमत्कारिविशेषप्रसारणं संहतविहतपटवत् । विस्ताख्यो गुणः । विस्तर इव विस्तरःशब्दप्रपञ्चवदित्यर्थः । अन्यथा विस्तार इति स्यात् । संग्रामाङ्गणेत्यादौ तु शत्रुशिरश्छेदात् सप्ताब्धिव्यापिनी त्वया कीर्त्तिर्जितेति एतावान् वाक्यार्थो लौकिकसाधारणतया च चमत्कारास्पदमिति संग्रामाङ्गणसङ्गतिरेव न तथा यथा वीरमात्रस्य उचिता तत्रापि चापसमारोपणमिति कापि उत्साहशक्तिः । अतएव बलवदाशयप्रसक्तलुण्ठाकवधेन यदवसितं तेन एव तदासादितमिति सोपस्कारकर्तृकर्मप्रपञ्चेन विकाशनमेव काव्यपदवीप्राप्तिबीजं तदिदमाह । बहुविधं विकाशितत्वादिति । नात्र शब्दविकाशाधीनः प्रकर्ष इति शब्दविस्तराद्भेदः ॥ ११२ ॥

संक्षेप इति । तस्य इत्यर्थस्य । समासे गुणीभूतस्यापि बुद्ध्या विभज्य परामर्शः । यथा । अथ शब्दानुशासनम् । केषां शब्दानामिति । अशेषविशेषोपयाहक-

अत्र शास्त्रे विस्तरप्रतिपादितस्य धर्मस्य श्लोकार्द्धेनोक्तत्वादयमर्थसङ्कोचः संक्षेपः ॥ ११३ ॥

शब्दार्थौ यत्र तुल्यौ स्तः संम्मितत्वं तदुच्यते ।

यथा, इन्दुर्मूर्ध्नि शिवस्य शैलदुहितुर्वक्त्रो नखाङ्कः स्तने
देयाद्वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः ।
संवादः प्रणवेण यस्य दलता कायैकतायां तयो-
रूर्द्ध्वद्वारविचिन्तितेन च हृदि ध्यातः स्वरूपेण च ॥

अत्र प्रणवलक्षणस्यार्थस्य तुल्यत्वेन यथावद्विभज्य विनिवेशनं सम्मितत्वम् ॥ ११४ ॥

साभिप्रायोक्तिविन्यासो भाविकत्वं निगद्यते ॥

पुरस्कारेण वाक्यार्थस्य अभिधानं विवृतसंवृतपटवत् संक्षेपः । शृण्वतामिति । अत्र तेन तेन विशेषेण विस्तरतः प्रतिपादयितव्यस्य धर्मस्य यत्किञ्चिदात्मनः प्रतिकूलमन्यस्य नाचरणीयमिति सामान्येन अभिधानमप्रवृत्तप्रवर्त्तने प्रगल्भायमानमतिसुन्दरमाभासते । न अत्र रचनासङ्कोचप्रतिष्ठितं काव्यमिति शब्दगुणादृभेदः ॥ ११३ ॥

शब्दार्था इति । शब्दस्यार्थौ तयोर्विभज्य विनिवेशनं सम्मितत्वमिति केचित् । तन्न । शब्दग्रहणवैयर्थ्यप्रसङ्गात् । द्वित्वाविवक्षाप्रसङ्गाच्च । "पल्लविअंविअकरपल्लवेहिंपप्फुल्लिअं वसुणहअच्छेहिम् । फलिअम्मिव पीणपओहरेहिं अज्जा इलावसम्" इत्यादौ द्विप्रभृतीनामर्थानामविभज्य विनिवेशनमिष्यते । तस्माच्छब्दस्यार्थस्य शब्दार्थौ । तयोस्तुल्यत्वं यावदुद्देशशब्दार्थम् । अर्थस्य विभज्य तुलाधृतवत् प्रतिनिवेशः सम्मितत्वमिति । अर्थमुद्दिश्य शब्दतुलनं काव्यभाववीजं शब्दगुणः, शब्दमुद्दिश्य तु अर्थतुलनमर्थगुणश्च । तथाहि परमेश्वरस्य मूर्ध्नि बालेन्दुः, पार्वतीस्तनेन खाङ्क इति पृथक् शब्देन उद्दिश्य तदुपमायोग्यतया कायैकतायां दलनं हृत्पद्मनवमद्वारयोः ध्यानेन युगपत् सन्निधानमिति सम्यग्विभज्य तुलितस्य एव प्रणवस्य प्रतिनिर्देश इति तदिदमाह । अत्रेति । यथावदिति । येन प्रकारेण सङ्गच्छते इति तदनतिक्रमेण इति ॥ ११४ ॥

यथा, दृष्टिं हे प्रतिवेशिनि क्षणमिहाप्यस्मद् गृहे दास्यसि
प्रायेणास्य शिशोः पिता न विरसाः कौपीरपः पास्यति।
एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः॥

अत्र तमालमालावलयितसरित्तीरकृतसङ्केतायाः कुलटायाः स्वतनौ भाविनां परपुरुषनखक्षतानां नलग्रन्थ्यालेखव्याजगोपनेन साभिप्रायभणनं भाविकम्॥ ११५॥

गतिः सा स्यादवगमो योऽर्थादर्थान्तरस्य तु।

यथा, शुभे कोऽयं वृद्धो गृहपरिवृढः, किं तव पिता,
न, मे भर्त्ता रात्रौ व्यपगतदृगन्यश्च वधिरः।
हु हुंहुं श्रान्तोऽहं शिशयिषुरिहैवापवरके
क्व यामिन्यां यासि स्वपिहि ननु निर्दंशमशके॥

अत्र प्रश्नादर्थमवगम्य उत्तरार्थान्तरावगमो गतिः॥११६॥

साभिप्राय इति। अभिप्रायविशेषप्रतिबद्धस्य वाक्यार्थस्य उक्तिविन्यास उक्त्या विशेषो न्यासः शब्दगुणे पदानां भावार्थनिष्पादिता इह तु अर्थस्येति विशेषः। तथाहि। दृष्टिमित्यादौ तनुमालिखन्तु जरठच्छेदानलग्रन्थय इत्युक्त्या विन्यस्यमान एव भाविनलग्रन्थ्यालेख्यरूपार्थः कुलटास्वरूपानुसन्धानदत्तान्तःकरणस्य प्रतिपत्तुः अनन्तरमेव स्वैरविहारविघ्नगोपनमभिव्यनक्ति॥ ११५॥

गतिरिति। अर्थादर्थविशेषा हृदयसंवादिन इति यावत्। अर्थान्तरस्य तथाभूतस्य। तेन यत्र सहृदयहृदयङ्गमात् अर्थात्कांस्यतालानुस्वानन्यायेन तादृशमर्थान्तरमवगम्यते सा गतिरिति लक्षणार्थः। शुभे कोऽयं वृद्ध इति। सर्वाकारमनवद्यायास्तावद्दास्यमपि नायमर्हतीति हृदयानुकूलमर्थं प्रश्नादवगत्य गृहपरिवृढ इत्युत्तरम्। अस्मादपि मम नायं कोऽपि किन्तु गृहस्वामीति हृदयसंवादिनम् अर्थम् अवधार्य किन्नव पितेत्यादिकप्रश्नोत्तरशङ्कया गवेषणीया तदेतद् व्याचष्टे। उत्तरादिति। उत्तरप्रत्युत्तरवाक्यात्। उत्तरन्तु पदं प्रश्नपदमेव॥ ११६॥

रीतिः सा यस्त्विहार्थानामुत्पत्त्यादिक्रियाक्रमः॥

यथा,—प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनुविरहोत्ताम्यत्तन्वीकपोलतलद्युतिः।
प्रभवति पुनर्ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसविसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः॥

अत्र उदयादारभ्य चन्द्रस्य उत्पत्त्यादिक्रियाक्रमो रीतिः॥ ११७॥

उक्तिर्नाम यदि स्वार्थो भङ्ग्या भव्योऽभिधीयते।

यथा, त्वमेवं सौन्दर्य्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं चेत् स्याज्जितमिह तदानीं गुणितया॥

अत्राभीष्टस्य नायकनायिकासङ्गमस्य भङ्ग्या भणनमुक्तिः॥ ११८॥

विवक्षितार्थनिर्वाहः काव्ये प्रौढ़िरिति स्मृता॥

यथा, त्वद्वक्त्रेन्दुविलोकनाकुलधिया धात्रा त्वदीयां श्रियं
निःक्षिप्य प्रतिराजकेषु विदुषां लक्ष्म्या त्वमापूरितः।

रीतिरिति। उत्पत्त्यादीनां क्रियाणां क्रमः काव्यशोभावहत्वेन गुणः। नेदं वस्तुस्वभाववर्णनमिति जातेरर्थव्यक्तेश्च भेदः। सुगममुदाहरणम्॥ ११७॥

उक्तिरिति। स्वीयोऽभीष्टोऽर्थः स्वार्थः तस्य साक्षात्प्रतिपादनम् अनुचितमिति अर्थान्तरभङ्गिभिः प्रतिपादनमर्थगुणः। भव्यो मनोहरः। सुगममन्यत्। नायकनायिकासङ्गमस्येति। नायकस्य नायिकया तस्याश्च नायकेनेति परस्परोत्कण्ठाप्रकर्षो विवक्षितः। तेनैकशेषो न भवति॥ ११८॥

विवक्षितेति। कवेरभिमतस्य भूयसोऽपि अर्थस्य स्वल्पेन एकवाक्येन प्रतिपादनं प्रौढ़िः। तथाहि। लाक्षिर्माय जगद्विलक्षणवस्तुनिर्वहणक्षमत्वकृतस्य धातुः

तेनैते नियतं दरिद्रति गृहेष्वेषामियं दृश्यते
नैनामाद्रियसे त्वमिच्छसि नु तां त्वामेव सा धावति ॥

अत्र त्वद्वक्त्रविलोकनाकुलेन धात्रा त्वदीया लक्ष्मीः शत्रुषु निःक्षिप्ता विदुषां च लक्ष्मीः त्वयि आरोपिता। अतस्त्वं विपक्षलक्ष्मीमाद्रियसे सा च त्वामनुधावति। या च विदुषां लक्ष्मीस्तया त्वमापूरितस्तेन ते दरिद्राः। अत एव त्वमेनां नाद्रियसे इयञ्च त्वद्विद्वद्गृहेष्वेव दृश्यते इत्येतावतः प्रभूतस्य अनेकवाक्येन प्रतिपादितत्वात् विवक्षितार्थनिर्वहणं प्रौढिः ॥ ११९ ॥

पदाद्याश्रितदोषाणां ये चानुकरणादिषु।
गुणत्वापत्तये नित्यं तेऽत्र दोषगुणाः स्मृताः ॥
त्रिविधा अपि ते भूयश्चतुर्विंशतिधा बुधैः।
प्रोक्ता यथा गुणत्वेन प्रविभज्य तथोच्यते ॥
या श्लिष्टम्लेच्छितादीनां पददोषेष्वसाधुता।

त्वद्वक्त्रेन्दावलोकनं तदासङ्गेन त्वदर्थनिर्मितायाः श्रियः प्रतिराजकेषु भ्रमणक्रमेण सञ्चारणं तत्पूर्वापरप्रतिसम्भातबलादिद्वयी लक्ष्मीमाकृष्येत्यादिको भूयानर्थः श्लोकेन वाक्येनोपनीत इति ॥ ११९ ॥

सम्प्रति अतिप्रसङ्गकारणार्थं क्रमप्राप्ता वैशेषिकगुणा लक्षयितव्यास्ते च दोषा अपि सन्तो गुणीभावमापन्ना उच्यन्ते। तत्रैष कवीनामालापः। सामान्यसुन्दरीणां विभ्रमसुव्यूहद्र अविनयोच्चिश्च। धूमोच्चिश्च प्रज्वलिताणम्बहुमश्री सुरभिदारुणम्। * दारुणाना गुणत्वमिति शङ्कां दर्शयन्नाह। पदादीति। पदवाक्यवाक्यार्थदोषाणां गुणत्वापत्तये नित्यं ये भवन्ति तेऽनुकरणादिषु मध्ये दोषगुणाः स्मृता

---

* सामान्यसुन्दरीणां विभ्रमसुव्यूहति अविनयोच्चायः।
धूमोच्चयः प्रज्वलितानां बहुमतः सुरभिदारुणाम् ॥

निरूपितानुकरणे गुणत्वं सा प्रपद्यते ॥

यथा, उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हटवृत्त्या ।
हुं हु मुञ्च मम मेति च मन्दजल्पितं जयति मानवलीनाम् ॥

अत्र हुं हु मम मेत्यसाध्वोरपि श्लिष्टश्लेच्छितयोरनुकरणत्वाद् गुणत्वम् ॥ १२० ॥

गुणत्वमप्रयुक्तस्य तथानुकरणे भवेत् ॥

यथा, दिवं पत्काशिणो यान्ति येऽचीकमतभाषिणः ।
पत्काशिणोऽपि नो यान्ति ये वचन्ति प्रयुञ्जते ॥

अत्राचीकमतवचन्तीत्यादिपदानां कविभिरप्रयुक्तानामपि अनुकरणत्वाद् गुणत्वम् ॥ १२१ ॥

इति सम्बन्धः । यद्यपि च अनुकरणादिका एव न गुणास्तथापि अनुक्रियमाणाद्यभेदोपचारेणोक्तम् । पदादिदोषेषु अन्यान्यस्यैकस्य नवधाभेदे चतुर्विंशतिप्रकाराः । यथेति । येनोपाधिना गुणीभवनमाचार्यैरुपपादितं तत्तदुपाधिविभागप्रदर्शनं करिष्यत इति । या श्लिष्टेति । इह द्वये दोषा नित्या अनित्याश्च तत्रानुकरणमात्रानपवदनीयदोषभावाद्युतसंस्काराप्रयुक्तादयो नित्याः । अनुकरणीयानुकरणापवादकहेतुकाः श्रुतिकटुत्वप्रभृतयस्तु अनित्याः । येषु पददोषेषु श्लिष्टश्लेच्छितप्रभृतीनां याऽसाधुता निरूपिता सा गुणत्वमनुकरणे प्रपद्यत इत्यन्वयः । लुप्तैकदेशं श्लिष्टम् । अव्यक्तरूपं श्लेच्छितम् । आदिग्रहणेन यस्तिरस्तीपभ्रातकम्पितादयः । हुं हु इति । द्वितीयहुङ्कारे बिन्दुप्रोच्छनात् श्लिष्टम् । मम मेति किं मुञ्च मुञ्चेति श्लिष्टमुत ममेति न निश्चीयते ॥ अनुकरणत्वाद् गुणत्वमिति । अर्थविशेषे हि साधुत्वव्यवस्थेति । यच्चाशक्तिजम् असाधुरूपं तस्यानुकरणे साधुत्वमिष्यत इत्युक्तमनुक्रियमाणं तु स्वरूपपदानुकरणतया पूर्वार्थत्यागेन साध्वेव । तस्य एव अनुकरणस्य तत्कालरञ्जकमानवती मम वचनानुकारतया च गुणीकरणसामर्थ्यमिति ॥ १२० ॥

पत्काशिण इति । पादमविकषन्तः । हिमकाशिहुतिषु चेति पादशब्दस्य

यच्छ्रुतेर्विरसं कष्टं तस्य दुर्वचकादिषु ।
गुणत्वमनुमन्यन्ते सानुप्रासस्य सूरयः ॥

यथा, त्वाष्ट्रास्त्वाष्ट्रारिराष्ट्रे न भ्राष्ट्रे नादंष्ट्रिणो जनाः ।
धार्त्तराष्ट्राः सुराष्ट्रे न महाराष्ट्रे न चोष्ट्रिणः ॥

अत्र श्रुतिविरसत्वात् कष्टत्वेऽपि दुर्वचकत्वाद् गुणत्वम् ॥१२२॥

यत्पादपूरणाद्यर्थमनर्थकमुदाहृतम् ।
गुणत्वमनुमन्यन्ते तस्यापि यमकादिषु ॥

यथा,—योषितामतितरां नखलूनं
गात्रमुज्ज्वलतया न खलूनम् ।
बभौ मुखेनाप्रतिमेन काचन
श्रियाऽधिकानां प्रति मेनका च न ॥

पद्भावः । वचेर्वचन्तीत्येवरूपमप्रयुक्तं न तु अन्यथापि । सत्यं नाम न वच्मीत्यादेः अनुमतत्वात् । इत्यादिपदानामित्युदाहरणान्तराभिप्रायेण ॥ १२१ ॥

यच्छ्रुतेरिति । दुर्वचकयोगा इति । व्यवहारिकचतुःषष्ट्यां दुर्वचकप्रयोगोऽनुमतः तस्य अनुप्रासघटकत्वे अलङ्कारनिर्वहणचमतया कविशक्तिव्यञ्जकस्य गुणीभावः । आदिपदेन रौद्रादिरसानुप्रवेशः । यदाह । शषौसरेफसंयोगौ टवर्गश्चापि भूयसा । विरोधिनः स्युः शृङ्गारे तेन वर्णा रसच्युताः । त एव विनिवेश्यन्ते वीभत्सादौ रसे यदा । तदा तं दीपयन्त्येव तेन वर्णा रसच्युता, इति । त्वाष्ट्राराचसास्त्वष्टुरपत्यं त्वचसस्वारिरिन्द्रस्य राष्ट्रे स्वर्गे न सन्ति । भ्राष्ट्रे चणकादिर्भर्जनस्थाने न कुण्डदंष्ट्रा भवन्ति । असितचक्षुचरणा हैमा धार्त्तराष्ट्रा न विद्यन्ते । उष्ट्रिण उष्ट्रोपजीविनः ॥ १२२ ॥

यत्पादपूरणेति । द्योतनीयमर्थमन्तरेण प्रयुक्तमव्ययपदमनर्थकमित्युक्तम् । पादपूरणार्थत्वन्तु दूषणतावीजम् । आदिग्रहणाद् गद्यपूरणम् । सति तु उपयोगे तस्य तद्बीजाभावाद्दोषभावविरहो अलङ्कारारम्भे च गुणत्वं तदिदमुक्तं यमकादिषु इति । आदिशब्दोऽनुप्रासचित्रादिपरः । वाक्यालङ्कारार्थत्वमपिशब्दालङ्कारारम्भकत्वमेव । यदाह । आर्षार्षिपुत्रकर्षिकवैदिकादिवाक्यानाम् अलङ्का-

अत्र खलुशब्दस्य चशब्दस्य च पादपूरणमात्रेऽपि प्रयोजने यमकत्वाद् गुणत्वम् ॥ १२३ ॥

यत्तु रूढ़िच्युतत्वेन प्रोक्तमन्यार्थसंज्ञितम् ।
प्रहेलिकादिषु प्रायो गुणत्वं तस्य युज्यते ॥

यथा, खातयः कनि काले ते स्फातयः स्फार्हवल्लावः ।
चन्द्रे साचाद् भवन्त्यत्र वायवो मम धारिणः ॥

अत्र खातय इत्यादीनां घर्घरिकादौ धृङ्स्थानवस्थाने न रूढ़िः, गूढ़ार्थे तु प्रहेलिकादौ तन्न दुष्यतीति तेषां दोषगुणत्वम् ॥ १२४ ॥

रार्था इति । तेन उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि । अभिवाञ्छितं प्रसिद्धयतु भगवति युष्मत्प्रसादेन इत्यत्र हि प्र इत्येतयोर्न वाक्यालङ्कारप्रयोजकत्वमित्युक्तप्रायम् । योषितामित्यादौ अतितरां न खलूनं योषितां गात्रमुज्ज्वलतया नीलमित्येव पर्य्याप्ते द्वितीयपादे तदुभयमपि यमकारम्भक सत् प्रस्तुतोपयोगितया कविव्युत्पत्तिपुरस्कारप्रवृत्तमपजहाति दोषभावमुपादत्ते च गुणत्वमिति ॥ १२३ ॥

यत्त्विति । रूढ़िच्युतत्वेन द्वितीयां संज्ञां प्रयोजयति । आकीर्णा मन्त्रणाद्युपयोगिनी प्रहेलिका तथाच तद्विद्यसम्भाषायां विदग्धैः उपन्यासैः स्वार्थाप्रत्यायकत्वलक्षणबीजाभावात् न दोषो गुणस्तु भवति । अनुकरणादिकमादिपदेन गृह्यते । खातयो घर्घरिकाः कनीति कन्यासम्बोधनम् । कालश्चरणः-कर्णाटदेशभाषानुसारात् । स्फातयः स्फीताः स्फार्हो मनोहरो वल्गुः ध्वनिश्चन्द्र आह्लादको वायवः प्राणाः धारिणोऽनवस्थिताः तदयं वाक्यार्थः हे कनि ! कन्ये ! तव आह्लादकचरणभङ्गा यथोक्तविशेषणा घर्घरिकाः साचाद् भवन्ति श्रीत्रेण प्रत्यक्षीक्रियन्ते अत्र प्रस्तावे मम प्राणा उद्दीपनप्रकर्षमसहिष्णवो धारिणोऽनवस्थिता इति । व्रणप्ररोहस्थानादौ खात्यादिशब्दानां रूढ़िर्न तु घर्घरिकादावित्याह । अचेति । नाम धातुविवक्षया द्विधा व्याख्यातम् ॥ १२४ ॥

तुच्छवाच्यमपुष्टार्थमिति यत् प्राक् प्रकाशितम् ।
तस्य छन्दोऽनुरोधादौ गुणत्वमवधार्य्यते ॥

यथा,

द्विरष्टवर्षाकृति मेनमर्थिनामुशन्ति कल्पोपपदं महीरुहम् ।
यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरण्यपूर्वं कशिपुं प्रचक्षते ॥

अत्र द्विरष्टवर्षाकृतिमिति कल्पोपपदं महीरुहमिति हिरण्यपूर्वं कशिपुमित्यस्य तुच्छार्थत्वेऽपि छन्दोऽनुरोधाद् गुणत्वम् ॥ १२५ ॥

प्रतिपादितमादौ यदसमर्थमवाचकम् ।
तस्यापि खलु मन्यन्ते गुणत्वं सीत्कृतादिषु ॥

यथा, आशु लङ्घितवतीष्टकराग्रे नीविमर्द्दसुकुलीकृतदृष्ट्या ।
रक्तवैणिककराहततन्त्रीमण्डलक्वणितचारु चुकूजे ॥

तुच्छेति । शब्दपल्लवनस्य प्रकृतरसाननुगुणत्वेन दोषत्वप्रसङ्गे क्वचिदनन्यगतिकतया कवेरुत्पाद्यते । तथाहि । भिन्नसर्गान्तैः इत्यादिना सर्गाणामौत्सर्गिकैकवृत्तनिर्वाहौचित्ये यथोक्तसंचितशब्दाप्रवेशात्परुषेण तदर्थत्वस्य विवक्षितत्वाच्च शब्दविकाशेन दोषः किन्तु गुण एव । प्रकृतोदाहरणे । द्विरष्टवर्षाकृतिमिति । कल्पोपपदं महीरुहमिति च निदर्शनं मन्यन्ते । षोडशादिशब्दानामपि वंशस्थप्रवेशत्वादनन्यगतिकत्वाभावात् । हिरण्यपूर्वं कशिपुमिति तु सङ्गच्छते । न हि हिरण्यकशिपुशब्दोऽत्र प्रविशति प्रदर्शनार्थं तु इयमन्यदप्युपात्तम् । एवंविधः शब्दविस्तरो गुणतामासादयतीत्याशयात्तेनायमर्थः । पल्लवाख्यशब्दगुणे तावत्तुच्छता चमत्कारकारितया गुणधराधिरूढैव अविस्तरविविक्तविषयतया क्व विशेषगुणस्य भवतीति जिज्ञासायां तु छन्दोऽनुरोधीविहितः सोऽपि हि कादाचित्क करीत्येव दोषभावव्यावृत्तिमिति ॥ १२५ ॥

प्रतिपादितमिति । अस्ति कश्चिदेवं विषयी यत्र असमर्थस्य चारुतया गुणभावः । तथाहि । यद्यपि गणपाठादव्यक्तशब्दः कूजितं तथापि लोके पक्षि

अत्र कूजितस्य पक्षिणोऽन्यत्र अवाचकत्वेऽपि कामशास्त्रेऽनुमतत्वाद् गुणत्वम् ॥ १२६ ॥

शास्त्रमात्रप्रतीतत्वादप्रतीतं तदुच्यते।
गुणत्व तस्य तद्विद्यसम्भाषादौ विदुर्बुधाः ॥

यथा,—सर्वकार्य्यशरीरेषु मुक्ताङ्गस्कन्धपञ्चकम्।
सौगतानामिवात्माऽन्यो नास्ति मन्त्रो महीभृताम् ॥

अत्राङ्गस्कन्धपञ्चकमित्यस्य बौद्धशास्त्रमात्रप्रसिद्धस्यापि तद्विद्यसम्भाषायां गुणत्वम् ॥ १२७ ॥

अर्थप्रतीतिक्लृद्दूरे क्लिष्टं नाम यदुच्यते।
झटित्यर्थप्रतीतौ तद्गुणत्वमनुगच्छति ॥

यथा,

अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः।

विषय एव नियतं तथाच अभिमतविषये प्रयुक्तं पक्षिविरुताकारमावेदयति। हारीतप्रभृतीत्यादिना कामशास्त्रकारैः सीत्कारोपदेशनात् सीत्कारस्य च चतुःषष्टिकलालेन प्रवणतया अत्यन्तमुपादेयत्वात्। तदाह। अन्यानि अपि आकृतिग्रहणानि उपलक्षयेदिति ॥ १२६ ॥

शास्त्रेति। शास्त्रमात्रप्रसिद्धानामाहत्यप्रतीत्यजननेन विवक्षितवाक्यार्थप्रत्ययपरिस्खलन खेददायिना नाम्नदुष्टताबीजम्। यदि तु कुतश्चिद्विशेषात् झटित्येव प्रतीतिं जनयेत् तदा कथं दोषः। अस्ति च प्रतिपत्तिव्युत्पत्त्यतिशयलक्षणो विशेषस्तदिदमुक्तम्। तद्विद्येति। मन्त्रणाद्यवसरे औचितीवशात् तत्तत्पदाना गुणत्वमपि निर्वहति। शास्त्रप्रक्रियापेक्षित्वं गाम्भीर्य्यम्। शास्त्रव्यवहारसङ्केतितपदाना गुणत्वमित्यन्यः प्रकारः यथावद्विनियोगः कार्य्यः तस्य प्रकारसाकल्यं शरीरं शब्दच्छलात्काय आत्मासारभूतः चेत्रचश्च। कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद्देशकालविभागो विनिपातप्रतीकारः कार्य्यसिद्धिरिति पञ्चाङ्गानि। रूपं संज्ञा संस्कारो वेदना विज्ञानमिति पञ्चस्कन्धाः ॥ १२७ ॥

अर्थप्रतीतिक्लृदिति। इहापि तदेव दूषणताबीजं झटिति प्रतीतिजनने सति

पितुः पदं मध्यममुत्पतन्ती काञ्चीगुणस्थानमनिन्दितायाः ॥

अत्रात्मनः पदं शब्दगुणमिति पितुः पदं मध्यममिति चाकाशविषयां काञ्चीगुणस्थानमिति नितम्बविषयामिति सर्वप्रसिद्धेर्झटित्येव प्रतीतिं करोतीति क्लिष्टस्यास्य गुणत्वम् ॥ १२८ ॥

अप्रसिद्धार्थसम्बन्धं यद् गूढार्थमिति स्मृतम् ।
तद्व्याख्यानादिषु प्रायो गुणत्वेन तदिष्यते ॥

यथा, अम्हारिसावि कइणो हलिअन्दहालपमुहावि ।

समाधीयते । समाधानोपायश्च पदान्तरसन्निधानमतिप्रसिद्धिर्वा प्रकरणं वा । तथाहि । प्रकृतोदाहरणे उत्तरार्द्धे हरिरित्यभिधानात् आत्मनः पदमिति हरेः पदमिति सम्पन्नस्य च सामान्यशब्दत्वादाकाशविषया प्रतीतिः यद्यपि झटिति नोत्पत्तुमर्हति तथापि शब्दगुणमिति विशेषणेन पदार्थान्तरावच्छिद्य विवक्षिताभिमुखीप्रतीतिः उपजन्यते । पितुः पदमिति । यद्यपि पदमिति सामान्यं तथापि आकाशस्यैव मध्यमचरणविन्यासस्थानत्वेन प्रसिद्धेर्न तथोचितप्रतीति व्यवधानम् । काञ्चीगुणस्थानमिति । चरणादारभ्य वर्णनाक्रमे नितम्ब एव काञ्चीनिवेशनस्य उचितत्वान्न प्रतीतिव्यवधानं तदिदमुदाहरणत्रयप्रयोजनमुदाहरणादेरनेकोऽत्र वाक्यार्थो गवेषणीयः । कथं तर्हि सर्वप्रसिद्धेरिति ब्रवीति । इत्थं शब्दगुणशब्दस्य बहुव्रीहित्वादवश्यं विशेषपर्य्यवसानाय प्रसिद्धिरनुसरणीयाऽवश्यञ्च वर्णनक्रमेऽपि काञ्चीगुणस्थानमनिन्दितायाः इत्यत्र काञ्चीगुणस्थानशब्दस्य नितम्बविशेषपर्य्यवसानार्थं कवीनामौचित्यप्रसिद्धिरङ्गीकर्त्तव्येति । ननु च आत्मनःपदं शब्दगुणत्वमित्यत्र प्रसादः कस्मान्न भवति । एवमाह न भवतीति । उदाहरणस्य अदूषणत्वात् सामान्यशब्दस्य विशेषपर्य्यवसानमन्यच्च । समभिव्याहृतपदार्थसंसर्गरूपे वाक्यार्थे स्वच्छसलिल इव अभिमतविशेषप्रतिबिम्बनमिति उपाधिद्वयस्य सङ्करात्च ॥ १२८ ॥

अप्रसिद्धार्थसम्बन्धमिति । तस्य गुणार्थस्य व्याख्यानं तद्व्याख्यानमत्रापि अतिप्रसिद्धया आक्रुष्टस्य अनतिप्रसिद्धार्थप्रतीत्यकरणं दुष्टतावीजम् अभिधानीयं तत्तु

मण्डुक्कमक्कडावि हुहोन्ति हरिसप्पसिंहावि ॥ (ज)

अत्र मण्डूकमर्कटसर्पसिंहेषु अप्रसिद्धप्रयोगत्वाद् गूढस्यापि हरिशब्दस्य स्वयं व्याख्यातत्वाद् गुणत्वम् ॥ १२९ ॥

नेयार्थं यत् स्वसङ्केतकृतवाच्यं तदीरितम्।
प्रहेलिकादिषु प्राज्ञैस्तद्गुणत्वेन गण्यते ॥

यथा, मोरु कलावे जं वहइ तह णामह सरिसणाउ।
उस्सीसा पाअन्तिगउअ णु णत्तिहिं जाणु णाउ ॥ (झ)

(ज) अस्मादृशा अपि कवयः हरिचन्द्रहालप्रमुखा अपि।
मण्डूकमर्कटा अपि खलु भवन्ति हरि सर्पसिंहा अपि ॥

(झ) मयूरः कलापे य वहति तस्य नाम्नाः सदृशनामा।
उच्छीर्षात् पादान्तगती नु नक्तं यथा नौका ॥

प्रतीतिपर्य्यवसानादेव निवर्त्तते। भवति च अभिधानकोष इव व्याख्याने झटिति-प्रत्ययः। अस्मादृशा अपि मन्दप्रतिभानाः कवयः कविशब्दवाच्याः हरिचन्द्र-हालप्रमुखाश्च लोकोत्तरप्रतिभाशालिनः तदवयवतां विख्याते च अविख्याते च शब्दाः साधारणा भवन्ति तद्यथा हरिशब्द एवेति व्याख्यानम्। ततो दोषत्वा-भावः प्रतिवस्तुलक्षणालङ्कारपर्य्यवसायितया च प्रकृतार्थानुगुणत्वेन गुणत्वलाभस्त-देतत् व्याचष्टे ॥ स्वयं व्याख्यातत्वात् दोषाभावो गुणत्वं पुनराभिप्रायिकात् प्रकृतानुगुणभावादिति बोद्धव्यम् ॥ १२९ ॥

नेयार्थमिति। अत्रापि पूर्वदेव वासना। आकीर्णानन्तरणादौ विदग्धानां लक्षणादयः प्रहेलिकाविशेषानुन्मीलयन्त उपयुज्यन्ते। जिअणाउ इति पाठे जितनौक इति स एवार्थः मयूरो वर्हभारे चन्द्रकं वहति। अनेन सङ्के-तेन चन्द्रनाम लभ्यते संविष्टस्य शिरोदेश उच्छीर्षं चरणदेशः पादान्तः। उच्छीर्षेण प्राचीदिक् लक्ष्यते। प्राक्शिराः शयीतेतिवचनादर्थात्पादान्तेन प्रतीची ततश्च प्राचाः प्रतीचीम् अर्द्धचन्द्रो गत इति प्रातःकालोद्देशो वाक्यार्थः।

अत्र मयूरवर्हकचन्द्रकसङ्केतेन कल्पितस्य चन्द्रनाम्नो नेयार्थत्वेऽपि प्रहेलिकात्वाद् गुणत्वम् ॥ १३० ॥

यदनिश्चयकृत् प्रोक्तं सन्दिग्धं तद्गुणो भवेत् ।
भवेद्विशेषावगमो यदि प्रकरणादिभिः ॥

यथा,

महीभृतः पुत्रवतोऽपि दृष्टिस्तस्मिन्नपत्ये न जगाम तृप्तिम् ।
स शार्ङ्गचक्रासिगदाब्जपाणिर्मेघच्छविः पातु जगन्ति शौरिः ॥

अणुणेन्ति इति । अजिणणाउ इति पाठे सुभगमानिनं कान्तमनुनयन्त्या मया ज्ञात इति खण्डितकामिनीखेदोक्तिः । न चैतासां लक्षणानामस्ति किञ्चित्प्रयोजनमिति नेयार्थत्वप्रसक्तौ प्रहेलिकाभाव एव समाधानहेतुः । ननु च उच्छीर्षपादान्तपदयोरस्तु मयूरकलाप इत्यादौ तु कथम् । यमिति हि सर्वनामाभिमतमेव तावदुपस्थापयति बर्हे बर्हनां बहुलि कथमेकस्य प्रतीतिरिति । अभिधानेऽपि कदाचित् क्लिष्टस्य विशेषगुणः स्यात् । नात्र नेयार्थता किन्तु तेन सङ्केतेन कल्पितस्य चन्द्रनाम्न इति । तस्य नाम्नः सदृशनामेत्यनेन मुख्यवृत्त्यैव विवक्षितसदृशलाभादिति । अत्रेदं वक्तव्यम् । तस्य नाम्न इत्यनेन चन्द्रकपदमुपस्थापितं न च तेन सहास्ति चन्द्रपदस्य सादृश्यमिति तत्र लक्षणा आश्रयणीया तदिदमुक्तं चन्द्रसङ्केतेन कल्पितस्य चन्द्रनाम्न इति । उपलक्षणतया च एकदेशव्याख्यानम् ॥ १३० ॥

यदिति । संशयकजातीयस्य सन्देहजनकत्वं नाम दूषकता बीजम् । तद्यदि कुतश्चिद्विशेषात् विवक्षितप्रतीतिः अप्रत्यूहमुपपद्यते तदा भवत्येव दोषाभावः । विशेषावगमो विशेषदर्शनं तस्यैव संशयविरोधित्वात् । महीभृत इत्यादौ अपत्यशब्दो यद्यपि गौरीशब्दोऽपि तदितरदत्तपद इति संशयकजातीयो भवति तथापि तच्छब्दोपस्थापित एव विवक्षितविशेषे पर्य्यवस्यन्नपजहाति दोषत्वम् । तच्छब्द एव कथ तमर्थमुपनयतीत्यत्र तु प्रकरणमेव जायदवस्थमस्ति । मेघच्छविरित्यत्र तु यद्यपि मेघपदं श्यामाश्यामदत्तपदतया संशयकजातीयं तथापि प्रसिद्धपदनीलवर्णार्थगौरीपदसमभिव्याहाराच्छब्दान्तरसन्निधिरपि विशेषे नियम-

अत्र तस्मिन्नपत्ये इत्यनिश्चितस्यापि अपत्यविशेषस्य सन्दिग्धत्वेऽपि गौर्यामिति प्रकरणेन गम्यते। मेघच्छविरित्यस्य च नवश्यामादिपदानुपादानेऽपि शौरिसम्बद्धत्वात् नवमेघच्छविर्मेघश्यामच्छविरिति वा विशेषो निश्चीयते इति अस्यापि गुणत्वम्॥ १३१॥

यत्तद्विरुद्धमित्युक्तं विपरीतप्रकल्पनम्।
तथाभूताभिधानेन गुणत्वं प्रतिपद्यते॥

यथा, अभिधाय तदा तदप्रियं शिशुपालोऽनुशयं परं गतः।
भवतोऽभिमनाः समीहते सरुषः कर्त्तुमुपेत्य माननाम्॥

यति तद्वा छविपदं वा विशेषे पर्य्यवस्यति। अत्र प्रकरणादीनां विशेषस्मृतिहेतुत्वात्। अतएव सूत्रे बहुवचनादिपदानुपादानादनुपात्ताः तदेतदभिसन्धाय व्याचष्टे। अत्रेत्यादि। एवं नवमेघच्छविरिति चोक्ते यथानियमेन अर्थप्रतीतिः अप्रत्यूहा भवति। यथा मेघच्छविरित्युक्त इति। अतएव कविसमयप्रसिद्धविशेषावगमसामग्रीसम्पादनेन गुणत्वमिति। कथं पुनरिदं क्लिष्टस्य वैशेषिकं न भवति को वाक्यभूतेन भवति। किन्तु संशयकत्वमापादयतः प्रतिभासोऽपि उक्तयुक्त्या निवर्त्तत इत्यभिमतं न चैवं रूपताक्लिष्टवैशेषिके सम्भवति। एकस्यैव चिवपदस्य संशयशक्तिरिति न वाक्यार्थगामिता॥ १३१॥

यत्तदिति। एवं वस्तुप्रकृतमभिसन्धाय वाक्यरचने तदुपमर्दकवस्त्वन्तरप्रवेशो विरोधः। यत्र हि अपि वस्तुनी प्रकृते वस्त्वन्तरमेव वा प्रकृतं तद्यथोक्तरूपाभावे कथं दोषः। तथाहि। अभिधायेत्यादौ दूतवाक्ये सन्धिविग्रहयोर्मिथो विरोधिनोरपि विवक्षितं स दोषः। सरुषः सक्रोधस्य तव माननां पूजां शिशुपाल इच्छति अनुशयः पश्चात्तापोऽभिमुखस्य स तथेति सन्धिपक्षे विग्रहपक्षे तु अनुशयः क्रोधः। भवतः सकाशादभिभूय शून्यं यभोयस्येति नित्यसापेक्षत्वात् समासः सरुषो माननां उपयोगस्तदिह निसृष्टार्थस्य उभयोपन्यासो यद्रोचते तद्विधीयतामित्यभिसन्धाय रचित इति गुणत्वमित्युभयविवक्षापक्षे व्याख्यानम्। यदा तु शासनहरो दूतस्तदा उद्यतेषु अपि शस्त्रेषु यथोक्तवक्तारो दूता भवन्तीति

अत्र विपरीतार्थकल्पनं विरुद्धत्वेऽपि सन्ध्यर्थविग्रहार्थयोः स्फुटभिन्नार्थत्वेनाभिधानाद् गुणत्वम् ॥ १३२ ॥

अप्रयोजकमित्युक्तमविशेषविधायकम् ।
स्वरूपमात्रे वक्तव्ये तस्यापि गुणतेष्यते ॥

यथा, तेऽप्याकाशमसिश्यामसुतं प्रत्य परमर्षयः ।
साग्रं वर्षसहस्रं स तपस्तेपे महामनाः ॥

अत्रासिश्याममित्याकाशं प्रति साग्रमित्यनेन वर्षसहस्रं प्रति विशेषानभिधानेऽपि दूरोत्पतनचिरतरतपश्चरणयोरुपयोगविवक्षायां गुणत्वम् ॥ १३३ ॥

न्यायेन विग्रहार्थमेवाभिमतः विपक्षस्यापि प्रपोचनादूतकर्त्तव्येति सुखे सन्धिः पर्य्यायभूतौ युक्त एव । तदिदं व्याख्यानेन स्फुटयति । अत्रेति । सन्धिरूपोऽर्थः सन्ध्यर्थः विग्रहरूपोऽर्थो विग्रहार्थः तयोः अभिधानेन स्फुट एव भिन्नोऽर्थः प्रयोजनं पक्षद्वयेऽपि यत्प्रयोजनमुक्तं तदभिप्रायेण एतद्व्याख्यानम् ॥ १३२ ॥

अप्रयोजकमिति । तदेव कविभिरुपादीयत इति यदभिप्रेतसन्धिसाधत्ते । यत्र वाक्यार्थप्रविष्टमपि न तथाभावमासादयति तदप्रयोजकमित्युक्तम् । तस्य यदि विशेष्यस्वरूपाभिधाने पर्य्यवसानेन प्रयोगो न तर्हि दोषः । तथाहि । आकाशमित्यादौ नासि श्यामतारूपं विशेषमाकाशे काञ्चिदपि विशेषमात्रामुन्मुद्रयति आकाशस्य सर्वदा तद्रूपानपायात् । एवमसमग्रस्य सहस्रत्वाभावात् साग्रमित्यपि न विशेषाधायकम् । आकाशसहस्रयोस्तु यदेव रूपमावेदनीयमिति अत्र एतावन्मात्राभिप्रायेण नास्ति दूषणं तथापि न अन्तरीयकयोरभिधाने किं प्रयोजनं येन अनयोर्गुणभावसम्पत्तिरित्यत आह । दूरे इति । अतिदूरे श्यामत्वमधिकं प्रतिभाति । क्षणमात्रमपि न विरतिरासीदिति साग्रपदाभिप्रायोऽत एव नात्र पौनरुक्त्यम् । तर्हि वाक्यार्थे विशेषाधायकत्वमेव अनयोरिति कथं दूषणत्वसम्भावना । इत्थं यस्मिन् अनुपादीयमानेऽपि न अभिमतन्यूनता तत्पदमप्रयोजकम् । अस्ति चात्र द्वयोरपि तज्जातीयतायां दोषत्वप्रसङ्गः । स प्रकृतोपयोगविवक्षायामेव निवर्त्तते । सर्वथा प्रकृतानुपयोगे दूषणत्वानापायितास्ति चात्रोचित एव उपयोगो यो विवक्षितुमर्हतीत्याह । विवक्षायामिति ॥१३३॥

यदव्युत्पत्तिमद्देश्यमिति पूर्वं निरूपितम्।
महाकविनिबद्धं सत्तदप्यत्र गुणो भवेत्॥

यथा, षण्डेषूद्दण्डपिण्डीतगरतरलनाः प्रापिरे येन वेल्ला-
मालम्बग्रोत्तालतल्लस्फुटितपुटकिनीबन्धवो गन्धवाहाः।
पातालप्रतिमल्लगल्लविवरप्रक्षिप्तसप्तार्णवम्।
किरन्तः कावेरीलड़हलहरीशीकरकणान्॥

अत्र तल्लगल्ललड़हलहरीप्रभृतीनामव्युत्पत्तिमत्त्वेन देश्य-त्वेऽपि महाकविभिः अङ्गीकृतत्वाद् गुणत्वम्॥ १३४॥

ग्राम्यं घृणावदश्लीला मङ्गलार्थं यदीरितम्।
तत् संवीतेषु गुप्तेषु लक्षितेषु न दुष्यति॥

तत्र संवीतं यथा,

तस्मै हिमाद्रेः प्रयतां तनूजां यतात्मने योजयितुं यतस्व।
योषित्सु तद्वीर्यनिषेकभूमिः सैव क्षमेत्यात्मभुवोपदिष्टम्॥

यदिति। सन्दर्भच्छायावैषम्यमत्र कष्टताबीजमिति पूर्वमुक्तं तत्र यदि समानच्छायशब्दः मध्यनिवेशनेन प्रतिक्षिप्यते तदा कथं दोषः। तथाभूतानामेव पदानां सन्दर्भनिर्वाहकतया महाकविनिबद्धमिति अतएव शब्दगमकतया गुणत्व-लाभः। उद्दण्डत्वेन पिण्डीतगराणां कठोरता। तादृशानामपि तरलनेन प्रौढ़िः। उत्तालेत्याद्यनुप्रासवत् प्रौढ़पदसजातीयमेव तल्लपदमेवं गल्लेत्यादौ बोद्धव्यं तदिदमाह। अत्र तल्लगल्लेत्यादि॥ १३४॥

ग्राम्यमिति। अत्र केचित् यथासंख्यं व्याचक्षते। घृणावदादीनां त्रयाणां क्रमेण संव्यानगोपनलक्षणानि दोषत्वाभावबीजानीति तदसत्। घृणावदर्थादि-मात्र एवाग्रे प्रतिसन्धिदत्रिकम् उपादाय संव्यानादित्रिकस्य उपदर्शनात्। एता-दृश यथासंख्यसूचनायैव लक्षणातिक्रमेण घृणावतः प्रथमसुपादानम्। तस्मात् संव्यानमिव संव्यानं लोकानुमतिः। किञ्चित्पदं दुष्टजातीयमपि लोकेन

अत्र तद्वीर्य्यनिषेकभूमिः इति अश्लीलस्यापि संवीतत्वाद् गुणत्वम् ॥ १३५ ॥

यदाह, संवीतस्य हि लोकेषु न दोषान्वेषणं क्षमम् ।
शिवलिङ्गस्य संस्थाने कस्यासभ्यत्ववासना ॥

गुप्ते यथा,

सुदुस्त्यजा यद्यपि जन्मभूमिर्गजैरसम्बाधमयास्वभूवे ।
स तेऽनुनेयः सुभगेऽभिमानी भगिन्ययं नः प्रथमाभिसन्धिः ॥

अत्र जन्मभूमिसम्बाधसुभगभगिनीशब्दानाम् अश्लीलार्थान्तरत्वेऽपि प्रथमार्थप्रभावभावनागुप्तत्वाद् गुणत्वम् ॥

उपादानात् तादूप्यं जहात्येव । प्रायेण लोकानुसारि काव्यदर्शनं भवत्यतः प्रतिस्त्रीदन्तितयसम्बन्धात् उपपन्नं यथासख्यं स्यादिति अभिधाय पूर्वक्रमेण उदाहरति । अत्रेति । एतेन संवीतेषु इत्यादिकं बहुवचनं व्याख्यातम् । यथा शिवलिङ्गस्य संस्थान इत्यत्र । यद्यपि मुख्यविधेव शिवलिङ्गपदमश्लील एवार्थे तथापि अविगानेन अनादिप्रयोगयोगित्वान्न व्रीडादानक्षमं तथा इहापि । तद्वीर्य्येति । शिवलिङ्ग इत्यत्र भगवत्सम्बन्धः प्रयोजक इति तु तुल्यमत्रापीत्याह । तदिति । अत्र हि जगदन्तर्यामिणी भगवतस्त्रिरोधितया प्रसिद्धिरूपजीव्या तदुपजीवने व्रीडादायिनी प्रतीतिः अनुत्थायिनी एव । अत्रैव आचार्य्यमतं लिखति । संवीतस्य हीति । कस्य असभ्यत्ववासनेति । वासना सकललोकसाधारणं ज्ञानम् ॥ १३५ ॥

यस्य पदस्य व्युत्पत्तिसभ्यमर्थान्तरं ग्राम्यं यस्य वा समभिव्याहारलभ्यं तच्च गोपनं समाधानबीजम् । तदुभयं भवति रूढेर्वा बलवत्त्वं जलधरादिषु इव तथा तात्पर्य्योन्नयनप्रतिबन्धेन विपरीतार्थतात्पर्य्योन्नयनपर्य्यवसानं वा । यथा उदाहरिष्यमाणे तथाच प्रतीतेरप्रत्यूहे दूषणताबीजाभावः तत्र प्रथमकक्षापचीकरणेनाद्यमुदाहरति । रूढ्युपस्थापितः प्राथमिकोऽर्थः तस्य भावो झटिति वाक्यार्थज्ञानं तस्य भावना वासना तया गोपनं चमत्कारार्पणं न तिरोधानम् असुम् एवार्थम् आचार्य्यमतेन स्वहृदयति । वस्तुमाहात्म्येति । अविभावनादिति । विरुद्धं

यदाह, वस्तुमाहात्म्यगुप्तस्य पदार्थस्य विभावनात् ।
भगिनीभगवत्यादि नासभ्यत्वेन भाव्यते ॥ १३६ ॥

लक्षितं यथा, ब्रह्माण्डकारणं योऽम्भु निदधे बीजमात्मनः ।
उपस्थानं करोम्येष तस्मै शेषाहिशायिने ॥

अत्र ब्रह्माण्डोपस्थानशब्दयोः असभ्यस्मृतिहेतुत्वेऽपि अन्यत्र लक्षितत्वाद् गुणत्वम् । एवमप्रशस्तादीनामपि गुणत्वम् ॥१३७॥

यथा, भद्रे मारि प्रशस्तं वद सदसि मुदा नृत्य कृत्ये मुहूर्त्तम्,
मृत्यो रत्नैश्चतुष्कं विरचय रचयारात्रिकं कालरात्रे ।
चामुण्डे मुण्डमालामुपनय विनयस्त्वायतां भैरवीर्थाम्,
एवं देवे भवानीं वहति परिजनव्याहृतिस्त्वायतां वः ॥

अत्र मारीकृत्यादीनामपि पदानां समस्तमङ्गलायतनस्य भगवतो विश्वेश्वरस्य सम्बन्धेनोक्तत्वाद् गुणत्वम् ॥१३८॥

व्रीडादायितया भावनं तस्याभावात् । तेन क्वचिद्योगोपादानेऽपि तथाभावसम्पत्तौ न दोषः । एतदेव उदाहरणेन स्फुटयति । भगिनीति । एतेन भगवतीति पूर्वानुपात्तमुदाहरणं व्याख्यातम् । द्वितीयगोपनम् अप्रस्तार्थान्तरे व्यक्तीभविष्यतीति ॥ १३६ ॥

यस्य पदस्य एकदेशी ग्राम्यानुगामी तस्य स्मृतिहेतुता तत्र कुत्रचिदुक्तिवैचित्र्यात् एकदेशी झटिति स्मारकः क्वचित् तथैव समुदायशक्त्या विपरीतार्थोपस्थापनात् झटिति स्वार्थं समुदाय एव प्रतिपादयति । आद्यो दूषणम् । द्वितीयस्तु वैलात्याभावात् गुणः । तदेवं लक्षणं यत्र आद्ये ग्राम्यत्वं ततोऽन्यत्रैव बहुधालक्षणात् तदिदमुक्तम् अन्यत्र लक्षितत्वादिति ॥ १३७ ॥

पुनरपरेण प्रकारेण संज्ञानं भवतीति अप्रशस्ते स्फोरयति । परमेश्वरस्य मङ्गलायतनत्वं तत्सम्बन्धिमात्रस्य एव मङ्गलीभवननियमेन शास्त्रेतिहासादौ प्रसिद्धत्वात् । तदुक्तम् । तथापि स्मर्तृणां वरदपरमं मङ्गलमसीति । अयञ्च प्रकारोऽप्रशस्तार्थ एव भवति । मार्य्यादयो मातृविशेषाः । आरात्रिकं नीराजनदीपव्यासङ्गशाब्रम् । परिजनपदं सम्बन्धं पुष्णाति ॥ १३८ ॥

यथा वा, सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशान्मेदिनीपृष्ठे ॥

अत्र धार्त्तराष्ट्राः कालवशात् मेदिनीपृष्ठे निपतन्ति इति अस्य अमङ्गलार्थान्तरत्वेऽपि हंसानहं धार्त्तराष्ट्रानिति व्यपदिशामि इति वक्ष्यमाणवाक्यान्तरगुप्तत्वाद् गुणत्वम् ॥ १३९ ॥

यथा च, कोऽभिप्रेतः सुसंस्थानस्तस्या इति न निश्चयः ।
आशापिशाचिकैषा तु कुमारी मां वरिष्यति ॥

अत्र अभिप्रेतसुसंस्थानाशापिशाचिकाकुमारीति पदानामशस्तस्मृतिहेतूनामपि लोकैरन्यत्र लक्षितत्वाद् गुणत्वम् ॥ एवं घृणावदर्थादीनामपि गुणत्वम् ॥ १४० ॥

तत्र घृणावतो यथा,

पद्मान्यर्कांशुनिष्ठूताः पीत्वा पावकविप्लुषः ।
भूयो वमन्तीव मुखैरुद्गीर्णारुणरेणुभिः ॥

अत्र,—निष्ठूतोद्गीर्णवान्तादिगौणवृत्तिव्यपाश्रयम् ।
अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते ॥ १४१ ॥

द्वितीयं गोपनप्रकारमशस्तार्थान्तरं व्याजं प्रपञ्चयति । यथा वेति । पक्षः पतत्रं परिकरश्च । आशादिक् प्रत्याशा च । मदः क्षीवता दर्पश्च । निपात आगमनं शस्त्रादिहतानां मेदिनीसङ्गतिश्च । रङ्गमङ्गलान्तः स्वस्त्ययनप्रवृत्तस्य सूत्रधारस्य मङ्गलार्थाधिकारवस्तुप्रस्तावनं तावद्बुद्धिपूर्वकमत्र न सम्भवति हसान् अहमित्यादिना तात्पर्यस्य नियमितत्वात् । स्वशक्त्या तु पदार्थान्तरम् आभासयन्ति पदानि दोषतया न प्रतिभासते । तत्र वीथ्यङ्गविशेषोपक्षेपस्यासुखशरीरत्वादौचित्यनिवेश एव स्फुटं कारणमित्याशयो बोद्धव्यः । औचित्यविरोधो न सार्वत्रिक इति नातिप्रसङ्गः ॥ १३९ ॥

कोऽभिप्रेत इत्यादौ पूर्ववदेव वासना ॥ १४० ॥

अथापरं संव्यानप्रकारं घृणावदर्थे कथयति । यथेति ॥ १४१ ॥

घृणावदर्थान्तरस्य यथा,

कामिनीगण्डनिःस्यन्दिविन्दुरिन्दुर्मतो मम।
अन्यथा कथमेतस्य जगद्द्योतिनी द्युतिः॥

अत्र रागातिशयहेतुभूतयोः कामिनीकपोलचन्द्रमसोः स्वरूपभावनामाहात्म्येन अर्थान्तरभावना गुप्तेति गण्डनिः-स्यन्दिविन्दुरित्यस्य घृणावदर्थान्तरस्यापि न दोषः॥ १४२॥

घृणावत् स्मृतिहेतुर्यथा,

विपूयरसनावन्तः पलाशाषाढ़धारिणः।
ब्रह्मवर्चस्विनो यान्ति द्विजपोगण्डका इमे॥

अत्र विपूयपलाशब्रह्मवर्चसपोगण्डशब्दानां घृणावत् स्मृति-हेतुत्वेऽपि अत्र लक्षितत्वात् अदोषत्वम्॥ १४३॥

एवमन्यत्र द्रष्टव्यम्।

अत्र च, किञ्चिदाश्रयसम्बन्धाद्वक्ते शोभामसाध्वपि।

गुणवृत्तिव्यापाराश्रयेषु अवान्तरादिपदेषु प्रथमत एव अन्यक्रियादिधर्माणाम् अन्यत्रारोपे समाधिप्रादुर्भावात् अनुत्थानं दोषाभावत्वद्वारं ततश्च मुख्य एव स्थाने जुगुप्सादायित्वं पूर्वाचार्य्यश्लोकेनैव व्याचष्टे। अत्रेत्यादि। गुणग्रस्तत्वम् अभि-प्रेत्यातिशयसम्पत्तौ प्रकृतौचित्यात् कपोलस्यैव प्रतिभासस्तदिदमुक्तं रागातिशय-हेतुभूतयोरिति। तथाच जगन्नयनानन्दभूतस्य निःशेषिताशेषतमसः चन्द्रमसो यदिदमभिप्रेतकामिनीकपोललावण्यविन्दुमात्रतया भानं तदुचितमेवेति॥ १४२॥

प्राच्यानामेव वासनाम् अभिसन्धाय स्मृतिहेतुमुदाहरति। यथेति। आषाढ़ो दण्डः। ब्रह्मवर्चसिन इति। ब्रह्महस्तिभ्यां वर्चस इति समासान्तस्तो मत्वर्थीय इतिः पोगण्डो बालः॥ १४३॥

एवमन्यप्रकारमपि संज्ञानादिकं स्वयमुन्नेयमित्याह। एवमिति। अनि-

कान्ताविलोकने न्यस्तं मलीमसमिवाञ्जनम् ॥

तद् यथा, अन्त्रप्रोतबृहत्कपालनलकक्रूरक्वणत्कङ्कण-
प्रायप्रेङ्खितभूरिभूषणरवैराघोषयन्त्यम्बरम् ।
पीतच्छर्दितरक्तकर्दमघनप्राग्भारघोरोल्लसद्-
व्यालोलस्तनभारभैरववपुर्दर्पोद्धतं धावति ॥

अत्राश्रयस्य बीभत्सरसोचितत्वात् अदोषः ।

सन्निवेशवशात् किञ्चिद्विरुद्धमपि शोभते ।
नीलं पलाशमावद्धमन्तराले स्रजामिव ॥

तद्यथा, अन्त्रैः कल्पितमङ्गलप्रतिसरा: स्त्रीहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनद्ध सहसा हृत्पुण्डरीकस्रजः ।
एताः शोणितपङ्ककुङ्कुमजुषः सम्भूय कान्तैः पिब-
न्त्यस्थिस्रेहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥

त्योऽयं दोषः । तेन यत्र दोषता नास्ति तत्र विषये रसप्रकाशसामग्र्याम् अन्तर्भावात् कथं न गुणत्वम् अन्तर्भावस्य द्विधा प्रयोगविषयौचित्येन वा वागनुभावौचित्येन वा तत्र प्रथमं दर्शयति । किञ्चिदिति । यथा अञ्जनस्य न अञ्जनवल्लादिसङ्गतत्वेन शतशो भाव्यमानस्यापि उद्दीपनविभावना । भवति तु कान्ताविलोचनचुम्बितयानुसन्धीयमानस्य । तथा पदस्यापि विषयेऽतद्विषये च प्रयुज्यमानस्य तदेतत् व्याचष्टे । अत्र आश्रयस्येति । द्वितीयमन्तर्भावप्रकारं व्युत्पादयति । सन्निवेशवशादिति । सन्निवेशो वागनुभावः । औचित्याकृष्टपदघटना तद्वशत्वं तदाकृष्टत्वम् अतएव विरोधिसङ्गततया विजातीययोरपि औचितीवशेन कान्तिविशेषोन्मीलकत्वात् पत्रपुष्पव्यतिकरजमालासादृश्यं दर्शयति । नीलमिति । अन्त्रैरित्यादौ प्रत्युत्पन्नप्रदीपोन्मत्तप्रेताङ्गनावलीकस्य माधवस्यालम्बनोद्दीपनविभावादिप्रकर्षे बीभत्सरसोत्सेकस्तावदुपपन्नो यस्तु अयमकस्मादेव मङ्गलादिपदानां शृङ्गारानुयायिनामिह निवेशः स कथं दोषभावादपनेतव्यः कथं वा गुणत्वम् आसादयितव्य इत्यतो हेतुगर्भं व्याचष्टे । अत्र शृङ्गारिण इति । शृङ्गारवासनानि-

अत्र शृङ्गारिणो हि जगदपि शृङ्गारमयं पश्यन्तीति बीभत्सरसेऽपि मार्दवेन अन्त्यादिपदानाम् अन्तरालेषु निवेशितानां मङ्गलप्रतिसरादिपदानामदोषः।

अश्लीलादेरमी भेदा भिद्यन्ते यत्त्रिधा त्रिधा।
भवन्ति नव तेनैते पूर्वोक्ता दश पञ्च च॥
चतुर्विंशतिरित्येषा प्रोक्ता पदसमाश्रया।
समासात् पूर्वनिर्दिष्टदोषाणां गुणकृत्तये॥
इत्येतत् पददोषाणामदोषत्वमुदीरितम्।
इदानीं वाक्यदोषाणां गुणत्वमभिधीयते॥
तत्र शब्दविहीनस्य विवक्षावशतः क्वचित्।
निसर्गसुन्दरत्वेन गुणत्वं परिकल्प्यते॥

विष्टः शृङ्गारी तथाच पूर्वं बीभत्सरसान्वयेऽपि प्रकृतशृङ्गारभङ्गी मा भूदित्येतदर्थमेव कविना मम हीत्यादिना प्रतिज्ञाय लौनेव इत्यादिवासनाद्दृढत्वम् उपपादितम्। अतएव प्रतिपदं रूपकमाविष्टाभिप्रायमेवं शृङ्गारमयं शृङ्गाराङ्गतया रसतापन्नम्। उपपद्यन्ते च तच्चित्तस्य साहश्यमावेण तद्रूपतानुसन्धानम्। ततश्च कथं न उद्दीपनता वस्तुसत्त्वस्यानुपयोगित्वात्। अतएव सूचितस्य बीभत्सस्य प्रकृतेन बाधात् प्रकृतार्थानुपोष इति। ननु कथमुद्देशे चतुर्विंशतिधा इत्युक्तं दोषाहि पूर्वं षोडशैव विभक्ता इत्यत आह। अश्लीलादेरिति। निगदव्याख्यातम्। चतुर्विंशतिरित्येषेति आदशभ्यः संख्यासंख्येये वर्त्तते ततः सख्याने संख्येये चेत्यभिधानात् केवलसंख्यानवचनत्वेन गवां विंशतिरितिवत्पदसमाश्रयेत्युपपन्नम्। क्रमप्राप्तवाक्यदोषगुणीभावव्युत्पादनम् अवतारयति। इदानीमिति। यस्य वस्तुनो नानारूपाणि विजातीयरूपाणि तत्र तद्रूपविवक्षावैचित्र्याच्छब्दवैचित्र्यं सङ्गच्छत इति दोषत्वाभावः। एवं रूपतागमितवतीत्यादौ कदापि नास्तीति दोषरूपता एव। क्वचित् पुनरस्ति रूपान्तरमित्याह। क्वचिदिति। भवत्वेवं गुणत्वन्तु कथमित्यत आह। निसर्गेति। नियतरूपविवक्षाहि महाकवीनां न लावण्यम् अनुसन्धाय

यथा, आक्षिपन्त्यरविन्दानि मुग्धे तव मुखच्छविम् ।
कोशदण्डसमग्राणां किमेषां खलु दुष्करम् ॥

अत्र न लोकाव्ययनिष्ठाखलर्थतृणामिति कृत्कर्मणोः षष्ठीप्रतिषेधे किमेतेषां दुष्करमित्यपभाषणेऽपि सम्बन्धमात्रविवक्षातो गुणत्वम् ॥

यदाह, इदं हि शास्त्रमाहात्म्यादर्शनालसचेतसाम् ।
अपभाषणवद् भाति न च सौभाग्यमुज्झति ॥ १४४ ॥

यत्नः सम्बन्धविज्ञानहेतुः कोऽपि कृतो यदि ।
क्रमलङ्घनमप्याहुर्न दोषः सूरयो यथा ॥
बन्धुत्यागस्तनुत्यागो देशत्याग इति त्रिषु ।

भवितुमर्हति तथाहि आक्षिपन्तीत्यादौ एषां दुष्करमिति अत्र खलर्थयोगेन लोकाव्ययनिष्ठाखलर्थतृनामित्यनेन षष्ठीप्रतिषेधादेषामिति कथं षष्ठीति दुष्टजातीयतामादाय शेषरूपविशेष विवक्षासमाधानहेतुः । अस्ति हि षष्ठ्यर्थस्य सम्बन्धस्य द्वैरूप्यं सम्बन्धसामान्यं विशेषश्च जन्यजनकभावादिः । तत्र सम्बन्धविशेषविहितषष्ठीमुपादाय नलोकेत्यादिना निषेधः सम्बन्धसामान्यरूपमुपादाय षष्ठी केन वार्ध्यते । अयमेव सम्बन्धः शेष इत्युच्यते । एवं तावत् न दोषत्वम् । यथा कोशसमग्राणां राज्ञां विपक्षश्रीहरणमुपदिश्य यत् किमपि सम्बन्धिमात्रमेव न दुष्करं तथा पद्मानामिति समर्थयामहे । कथम् अन्यथा दुरापत्वइदनश्रीहरणमिति प्रकृतपोषलाभात् गुणत्वमतिसुलभं तदेतत् व्याचष्टे । अत्रेति । ननु सम्बन्धमात्रविवक्षायां दोषता मा भूत् गुणत्वं तु कथमिति यथोक्तमभिसन्धाय परमतं लिखति । इदं हीति । शास्त्रमाहात्म्ये विधिनिषेधयोः परस्परासङ्कीर्णविषयत्वम् ॥ १४४ ॥

यत्न इति । क्रमभंगे हि यथा अभिमतान्वयप्रतीति प्रत्यूहो दूषणताबीजं तद्यदि कुतश्चिद्विशेषादस्खलितैव प्रतीतिरुपजायते तदा बीजाभावेन तथाभावो निवर्त्तत एव स च विशेषः प्रतिपदमनुक्रमितुं न शक्यत इति कोऽपि यत्न इति सामान्येन प्रतिपादितम् । योऽयं शब्दक्रमलङ्घनापवादोऽर्थक्रमलङ्घने तु

आद्यन्तावायतक्लेशौ मध्यमः क्षणिकज्वरः॥

आद्यन्तौ मध्यम इति सम्बन्धिविज्ञानहेतोर्विधानात् न शाब्दक्रमलङ्घनं दोषः। वक्तुश्च बन्धुत्यागदेशत्यागयोः तनुत्यागाद् गरीयस्त्वेनाभिमतत्वादित्यर्थक्रमलङ्घनस्यापि गुणत्वम्॥ १४५॥

विरूपसन्धि यत्पूर्वं विसन्धि च निरूपितम्।
न च दुर्वचके प्रायः प्रगृह्यादौ च दुष्यति॥

तत्र—दुर्वचके विरूपसन्धिः॥

यथा,

जयन्ति वर्षास्विति भर्गदुर्गयोः सुदुर्वचा दुर्वचकप्रयुक्तयः।
अभेङ्गेङ्जे खमपोग्रभोग्ररुग्भ्रुङ्भ्रमव्रणमुखि सभ्रजेधि नः॥

अभिप्रायविशेषः तथाहि बन्धुत्याग इत्यादौ बन्धुत्याग तनुत्याग देशत्यागात् क्रमेण उद्दिश्य तथैवानुदेशोऽपि अर्हति न तु आदिमसुद्दिश्य ततोऽन्त्यस्ततो मध्य इति उद्देशानुदेशलक्षणशास्त्रक्रमभङ्गजातीयत्वेऽपि सम्बन्धज्ञानहेतुयत्नकरणात् अदूषणत्वं व्यवस्थाप्यते। यत्नश्च अयमेव यदादिपदैः उल्लेखस्तन्निहितत्तत्तत्स्थानविशेषगामिन एव प्रतीतिमुपजनयन्ति। अवश्यञ्चानेन क्रमेण अत्र वक्तुमुचितं तनुत्यागस्य विजातीयताविवक्षया पृथगेव वक्तुमर्हत्वात्। एवञ्च अनुपपत्तिर्लोके बन्धुत्यागापेक्षया शरीरत्यागस्य अतिकृच्छ्रत्वेन प्रसिद्धिः। अतश्च मध्यम आयतक्लेश आद्यन्तौ क्षणिकज्वरौ इति वचनमुचितमिति आर्थक्रमभंगः कथं न भवति तत्राह। वक्तुश्चेति। अभिमतमित्यनेन अभिप्रायविशेषोऽपवादहेतुः यथारुचि यथार्थित्वं यथाव्युत्पत्ति भियते। आभासोऽप्यर्थ एकस्मिन् अनुसन्धानसाधित, इति न्यायात् उपपन्नम् एवैतदिति॥ १४५॥

विरूपेति। विरूपो दुर्वाचकीविसन्धिर्विगतं संहिताकार्यं दुर्वचके कलाविशेषरूपतयानुमते संहिताकार्यनियमः। द्वितीये कुत्र अदूषणमित्याह प्रगृह्यादौ इति। प्रगृह्य मीदूदेद्द्विवचनं प्रगृह्यमित्यादिना यत्र प्रगृह्यसंज्ञा विहिता तत्र आदिग्रहणादिनापि प्रगृह्यसंज्ञया प्रकृतिभावविधानम्। यथा उदाहरि-

अत्रोत्तरार्द्धस्य विरूपसन्धित्वेऽपि दुर्वचकत्वेन कलाविद्भि-राहृतत्वाद् गुणत्वम् ॥

यदाहुः। शुकस्त्रीबालमूर्खाणां मुखसंस्कारसिद्धये।
प्रहासाय च गोष्ठीषु वाच्या दुर्वाचकादयः ॥

प्रगृह्यादौ विगतसन्धिर्यथा,

कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः।
स इतोऽब्द ऋताहृतप्रियो न ऋचस्त्वं न यजूंषि ऊहसे ॥

अत्र विसन्धेः प्रगृह्यादिहेतुकत्वाद् गुणत्वम् ॥

यदाह, न संहितां विवक्षामीत्यसन्धानं पदेषु यत्।
तद्विसन्धीति निर्दिष्टं न प्रगृह्यादिहेतुकम् ॥ १४६ ॥

ष्यते। यत्र वा वक्तुः खेदादिना विच्छिद्य पाठे विरतिर्भवति। यथा। का एकशिरोरुहेति। तदेवं दुर्वचकप्रगृह्यादौ यथासंख्यं विरूपविसन्धिविगत-सन्धानयोः अपवादकारणे इत्याह। अत्रेति। प्रयुज्यन्त इति प्रयुक्तयो दुर्वच-कास्च ताः प्रयुक्तयश्चेति दुर्वचकप्रयुक्तय इति कर्मधारयः। सुदुर्वचा इति। अन्ये-नोच्चारयितुमशक्याः। स्वयमेव कविः प्रतिज्ञाय उत्तरार्द्धे दुर्वचकानि आह। अभे-डित्यादि। हे अगेड्जे पर्वतराजपुत्रि! खम् आकाशमभेड्भानां नक्षत्राणामीडी-श्वरश्चन्द्रः सोऽविद्यमानो यत्र तिरोधानात् असत्कल्पिता चन्द्रमसः केन पुनस्तिरो-धानमित्याकाङ्क्षायां द्वितीयं विशेषणं अपीत्येति। अपगतोग्रभाः दीप्तिः उग्ररुचिरः आदित्यः तदीयद्रोहकारिणोऽभपदवाच्या मेघा यत्र। अम्बु रोहतीत्यम्बुट् पद्मं तद्वन्मुखं यस्या इति देवीसम्बोधनम्। चेदीदृशं तर्हि सभ्रां सहचरी भवास्याक-मिति गौर्या उत्तरम्। कलारूपत्वेन विरूपसन्धानस्य गुणत्वमित्याह। कलाविद्भिः आहृतत्वात्। कमले इत्यादौ उदाहरणत्वात् नैकः श्लोकार्द्धः। पूर्वार्द्धे कमले इत्यादि त्रितयं प्रगृह्यसंज्ञोदाहरणम्। उत्तरार्द्धे विनैव प्रगृह्यसंज्ञां प्रकृति-भावविधानं यत्र तत् त्रितयोदाहरणम् तथाहि अब्द ऋताविति न ऋच इति च ऋत्यक इत्यनेन प्रकृतिभावः। यजूंषि ऊहस इति। इको सवर्णे शाकल्यस्य

अनुकम्पाद्यतिशयो यदि कश्चिदिवक्ष्यते ।
न दोषः पुनरुक्तेऽपि प्रत्युतेयमलङ्क्रिया ॥

यथा, हन्यते सा वरारोहा: स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥

अत्र हन्यते हन्यत इति शब्दपुनरुक्तं चारुसर्वाङ्गी वरारोहेत्यर्थपुनरुक्तम् ॥ तदुभयम् अनुकम्पाद्यतिशयविवक्षायामदोष इति गुणत्वम् ॥ १४७ ॥

पदानां व्युत्क्रमो यत्र क्रमेण व्युत्क्रमेण वा ।
तद्व्याकीर्णं विदुस्तस्य न दोषः क्वापि तद् यथा ॥

जुगुप्सत स्मैनमदुष्टभावं मैवं भवानक्षतसाधुवृत्तः ।
इतीव वाचो निगृहीतकण्ठैः प्राणैररुध्यन्त महर्षिसूनोः ॥

क्रस्य इत्यनेन ॥ अपरमादिपदग्राह्यं पूर्वमुदाहृतम् । अत्रापि स इति बोद्धव्यम् । तदेतच्छास्त्रानुमतमपि घटनासौष्ठवेन निवेशनीयम् । न तु अन्यथा उक्तं च पूर्वमेव यत् प्रगृह्यादिहेतुकमपि नासकृत् प्रयोक्तव्यमिति ॥ १४६ ॥

अनुकम्पेति । सम्भ्रमादौ यावद्दोषमित्यादिना पदद्विरुक्त्यादेः अनुमतत्वात् न दोषत्वम् अभिप्रायव्यञ्जननैयत्येन प्रकृतिपोषानुगुणतया गुणत्वम् । तथाहि । हन्यत इत्यादौ हन्यत इति यद्यपि अभिधेयतात्पर्य्यमिति शब्दपुनरुक्तजातीयं भवति । यद्यपि वरारोहेत्यभिधाय चारुसर्वाङ्गीत्यभिन्नाभिधेयतात्पर्य्यं पर्य्यायरूपत्वादर्थपुनरुक्तजातीयं तथापि विरहवेदनादूनायाम् अनुकम्पातिशयात् असकृत् उपादानमहिरहिर्वुध्यस्वेति लोकानुसारात् । अनुकम्पाभयाद् यस्य हि तादृशी पदद्विरुक्तिः अभिप्रायविशेषार्थनिष्पादितया गुणकत्वाधिरोहणक्षमे वेति आशयवान् व्याचष्टे । तदुभयमपीति ॥ १४७ ॥

पदानामिति । एकस्मिन् वाक्ये पदानाम् उचितसन्निवेशविपर्य्यासः क्रमभंशः स द्विधा भवति । पूर्वापरभावनियतानां तादृशक्रमप्रच्यावनेन वा । यथा बहुदणमिति अन्योऽर्थः दणं वह्नित्यन्यः । पूर्वापरनियमशून्यानामिति

अत्र मा स्म जुगुप्सेति वक्तव्ये जुगुप्सत स्म एनमदुष्टभावं मैवमिति पदव्यतिक्रमस्य व्यस्तेऽपि इच्छन्ति केचिदिति लुङ्-लङोर्विशेषलक्षणत्वाद् गुणत्वम् ॥ १४८ ॥

पर्य्यायेण द्वयोर्यत्र वाक्य प्रश्नोत्तरादिषु।
संकीर्णं तन्न दोषाय वाक्ये वाक्यविदो विदुः ॥

यथा, बाले! नाथ! विमुञ्च मानिनि! रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि।

तादृगुच्चारणविपर्य्यासेन वा। यथा कपालमनुलिम्पति दुकूलं परिदधातीति अत्र क्रमनियमोऽभिमतः। अनुलिम्पति कपालं परिदधाति वस्त्रमिति अपिक्रतेन तस्यैवार्थस्य लाभात्। यदा तु कपालं परिदधाति दुकूलमनुलिम्पतीति क्रियते तदा भवति सन्निधिविपर्य्यासः तदेतद् व्याकीर्णसङ्कीर्णयोः तुल्यं तदिदमुक्तं क्रमेण व्युत्क्रमेण वा स्मोत्तरे लङ् चेत्यनेन मा शब्दादुत्तरं यत्र स्मशब्दप्रयोगः तत्र लुङ्लङोर्विधाने पदक्रमनियमः कृतः तत् कथं स्म समेति प्रयुक्ते सोऽर्थः प्रत्येतव्य इत्यत आह। व्यस्त इति। विशेषेण लक्ष्यत इति विशेषलक्षणं तस्य भावः तत्वम् ॥ १४८ ॥

पर्य्यायेणेति। यत्र वाक्यैकवाक्यतायाम् अवान्तरवाक्येषु परस्परपदार्थप्रवेशेन यथाऽभिमतसंसर्गप्रतीतिः स्खलिता भवति तत्र सङ्करो दूषणं प्रतीतेः अस्खलने तु न दोषः। स्खलनं च अनेकवक्तृकपर्य्यायप्रवृत्तवाक्यावयवमिश्रणेन भवति तदपि मिश्रणं प्रश्नोत्तररूपमन्यादृशं वा भवतीति आह। प्रश्नोत्तरादिषु इति। विषयसप्तमीयम्। वाक्ये वाक्यं वाक्यो वाक्यं पृषोदरादित्वात् साधु। तत्र प्रश्नोत्तरादिरूपं वाक्यो वाक्यमुदाहरति। बाले इति। अत्र बाले विमुञ्च मां प्रति रुषमिति प्रथमप्रश्नवाक्यं नाथ रोषात् मया किं कृतमिति तादृशमेव उत्तरवाक्यम्। तत्र बाले इति वाक्यप्रतीकानन्तरमेव नाथेति वाक्यान्तर-प्रतीकस्य निर्देशः सङ्कीर्णजातीयतामाकारयिमुद्यतः प्रश्नोत्तरप्रभावादपोद्यते। सङ्कीर्णयोः अपि वाक्ययोः पर्य्यायनिर्देशे भवति एव वाक्यो वाक्यमिति चेत् न

तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥
अत्र सङ्कीर्णत्वेऽपि वाक्यो वाक्यत्वात् न दोषः ॥ १४९ ॥

प्रकृतिस्थादिभेदेन ग्राम्यादिभिरथापि वा।
अपदं तस्य चानुज्ञा भाषाचित्रे विधीयते ॥

यथा, ह्रातो जो ज्जलदेउ नैव मदनः साक्षादयं भूतले
तत् किं दीसइ सच्चमाहतवपुः कामः किल श्रूयते।

व्यतिकरस्याऽभिप्रायविशेषव्यञ्जकतया चमत्कारकारित्वेन विजातीयत्वात् अतएव गुणत्वम्। तथाहि। बाले इति पदं परचित्तानभिज्ञायाः क्षुद्रसहचरीवचसि विश्वासभानः सोपालम्भं सम्बोधनमाविष्करोति। एतदाकर्ण्य अनन्तरमेव ईर्ष्याकषायकामिनीवचनमुचितमिति नाथेति सम्बोधनं साभिप्रायं प्रभुरसि न पुनरस्मासु दत्ताशयो न वा स्वाधीनता सौभाग्यभागिति विवक्षितत्वात्। एवमुत्तरत्र स्वयमुन्नेयम्। उपलक्षणं च द्वयोरिति एकस्यापि वक्तुः प्रहेलिकादौ तद्विषये तदाभाषणस्य उचितत्वात्। विजातीयवाक्यद्वयसन्दंशपतितपदे किमिदमनेन अन्वीयतेऽनेन वेति सन्देहसङ्कीर्णता संशयोऽपि सङ्करमध्यासीन एवेति गुरवः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामिति अत्र राजपदं सन्दंशपतितं किं पूर्वेणाथ परेणान्वीयत इति सन्दिह्यते राजगोचीरादौ द्वयेनानुयोगो पदस्य निश्चित इति ॥ १४९ ॥

प्रकृतिस्थेति। विभिन्नेत्यादौ अपदलक्षणसूत्रे वक्ष्यामिति व्यतिकर एकत्वेन नाभिप्रेतोऽपि तु ग्राम्यादिचिकस्य वा प्रकृतिस्थादिचिकस्य वेति विकल्पेन उपन्यासप्रयोजनमनुज्ञासम्पत्तिसेन दोषताभावगुणीभावौ प्रतिपादितौ। विषयं दर्शयति। भाषाचित्र इति। संस्कृतादिव्यतिकरस्य अपदत्वेन अभिप्रेतत्वात्। संस्कृतादयो ग्राम्यादयः प्रकृतिस्थादयश्च भाषाशब्देनाभिमताः। यथा हि नानावर्णारब्धमालेख्यचित्रं यथा वा भिन्नप्रकारतन्तुनिर्वातः पटश्चित्रपटस्तथा नानाभाषाभिरारब्धं किञ्चित् काव्यं चित्रमुच्यते। चित्रमाश्चर्यं तत्कारि च चित्रम्। तेन रूपद्वयसम्पत्तौ युक्तिपोषः स्यादेवं यथौचित्याकृष्टनानाभाषाव्यतिकरजमेकं सम्भवतीति आशङ्क्य संक्षेपात् सर्वं भाषासङ्करमेव उदाहरति।

एदूए किअलेउ भूतपतिना गौरीविवाहोत्सवे
ऐसें सच्चुजिवोल्लुहस्तकटकः किं दर्पणेनेक्ष्यते ॥

अत्र ग्राम्यः प्रष्टा नगरमागतः राजानं दृष्ट्वा ग्राम्यैः प्रकृतिस्थैरेव वा पदैः प्राकृतेन पृच्छति। हाती जो ज्जलदेउ इति। नागरश्च तमनुजिघृक्षुरुपनागरैः कोमलैर्वा पदैः सवक्रोक्तिं प्रत्याचष्टे, नैव मदनः साक्षादयं भूतले इति। अथ ग्राम्य आहितप्रतिभः पूर्वपदानुरोधादर्द्धप्राकृतेन एव ग्राम्योप-

---

यथेति। सङ्करमौचितीं च व्याख्यानेन स्फुटयति। अत्र ग्राम्य इति। ग्रामवासी किञ्चिद् व्युत्पन्नश्च। ग्राम्याश्च नगरवस्तुनि अद्भुतचमत्कारवन्तो जिज्ञासुश्च भवन्तीति जातिः। तत्र राजानं दृष्ट्वेति। अद्भुतवस्तुकथनेन चमत्कारः। पृच्छतीति। जिज्ञासा बहुमान आदरः चमत्कारिणैव। यदा यान पृच्छति तेषु एव बहुमानो वर्त्तते ये नामगोत्रादिकमेतस्य जानन्ति, सततमनम् अवलोकयन्त इत्याशयात्। प्रस्तुतग्राम्यप्रकृतेः च अस्य प्राकृतपदैरेव प्रश्नो योग्यस्तदेतत् सर्वम् आदर्शयितुं प्रश्नं पृथक्कृत्य दर्शयति। हाती इत्यादि हाती इति महाराष्ट्रभाषायां प्रश्नकाकुरयं स इत्यर्थे। स इति यो नामैतत् नगरनायकत्वेन अस्मद् ग्रामेऽपि बहुशो विख्यातकीर्त्तिरिति चमत्कारः। जोज्जलदेउ इति। जिज्ञासा सामान्यतश्च नगरसञ्चरिष्णुजनगोचरोऽयं प्रश्नः। अत्र सर्वाण्येव पदानि नातिहीनपात्रे ग्राम्ये प्रकृतिभवानि अपभ्रंशपदानि। देशीपदत्वेन सर्वेषां ग्राम्यता। हाती इत्यनेन स्वरकृतं गौरवम्। जोज्जलदेउ इत्येकसंयोगवर्णापादितगौरवञ्च प्रकृतिस्थं तदत्र प्राकृतग्राम्ययोः औचित्याकृष्टम्। प्रकृतिस्थे तु नौचित्यम् उपयुज्यतेऽपि तु सन्दर्भारम्भेन प्रक्रान्त इति विवक्षितम्। अधिकस्य प्रष्टव्यस्य अभावात् एतत्प्रश्नानन्तरमेव उत्तरावसरः। ततश्च नानौचित्यम्। प्रश्नोत्तरोपन्यासो हि इति। प्रकृत्यैव च नागरका ग्राम्यमतविरोधिनी वक्रोक्तिरसिका भवन्ति। यदि तस्य ग्राम्ये जघन्यबुद्धिः किमिति उत्तरमेव दास्यतीत्यत उक्तम् अनुजिघृक्षुरिति। सबहुमानं पृच्छति। ग्राम्ये यस्य दया तदानीम् आसीत् जिज्ञासानिवर्त्तकज्ञानजननम् अनुग्रहः। यद्यपि नागरस्य नागराणि पदानि प्रयोक्तुमर्हन्ति तथापि ग्राम्यानुग्रहे कर्त्तव्ये तद्बोधयोग्यमेव अभिमतं

नागरैः प्रकृतिस्थकोमलैर्वा पदैस्तमुपालभते। तत् किं दीसइ सच्चमाहतवपुः कामः किल श्रूयत इति। अथ नागरो ज्ञाततत्प्रावीण्यः तत्पदानुरोधादेव अर्द्धप्राकृतेन ग्राम्योपनागरनागरैः प्रकृतिस्थकोमलकठोरैर्वा पदैः समाधत्ते। एदूए किअलेउ भूतपतिना गौरीविवाहोत्सवे इति। अथ ग्राम्यः श्लोकसमाप्तेः पादस्य तदुत्तरस्य च अनुरोधाद् ग्राम्याणि प्रकृतिस्थानि वा त्रिचतुराणि पदानि प्राकृतेनोक्त्वा पादार्द्धे एव तिष्ठति। ऐमें सज्जुजिवोत्तु इति। अथ नागरो

न तु नागरत्वं तर्हि ग्राम्यैरेव कृतो न ब्रवीतीति अपि न वाच्यम्। सहसा एव तथाकरणे ग्राम्यमतविरोधोऽपि तु उपनागरकरूपभङ्गप्रसङ्गात्। ततो मध्यमानि उपनागराणि प्रयोगयोग्यानि इत्याह। उपनागरैरिति। स्वभावत एव प्राकृतप्रकृतिस्थाना संस्कृतप्रकृतिस्थानां प्रौढ़त्वं भवति। येन यद्यपि ग्राम्यप्रयुक्तजातीयान्येव सन्दर्भैकरूपतानिर्वाहार्थं घटयितुम् उचितानि तथापि औचिती प्राप्तसंस्कृतपदनिवेशने यदि प्रकृतिस्थत्वमाद्रियेत ततः छायावैरूप्यं स्यादिति आशयेन कोमलप्रायाण्येव निवेशितानि इत्याह। कोमलैर्वा इति। भूयसा व्यपदेशो भवतीति लोकन्यायानुसारात् साचादिति एकस्य प्रकृतिस्थत्वेऽपि कोमलैरिति उक्तम्। साकाङ्क्षप्रश्ने च किमर्थं लोकोत्तरो "जीज्जलइउ" नाम्नः कश्चित् तादृगिति भावो विवक्षितः. तत्र न इत्येव उक्तेन अनुग्रहः कृतः स्यादिति अधिकमपि किञ्चित्वक्तुमुचितमित्याह। सवक्रोक्तीति। एतेन नागरकवृत्तिरूपवृंहिता नैव इत्येवकारेण मनुष्य एव अयं न भवति दूरे तद्विशेषरूपो जीज्जलइव इति प्रकाशितम्। साचादिति। प्रत्यक्षेण अवधार्यमाणः किञ्चित्व्युत्पन्नत्वेन ग्राम्यस्य उक्तत्वात्। कामव्याहतसाचाद्भावलक्षणविरुद्धधर्मानुसन्धानेन मदनदाहव्यतिकरता सम्भवतीति लब्धावसरं ग्राम्यानुयोगम् अवतारयति। अथेति। शिचाविशेषस्यर्थिनी बुद्धिःप्रतिभा। माम् एकान्ततो नागरकवृत्तपरिचयपराधीनं मा शङ्किष्ठा इत्याशयशौटीर्येण नागरकप्रयुक्तजातीयैः एव पदैः प्रश्नो योग्यो न चैतावतैव सर्वथा प्रकृतित्यागोऽर्हतीत्यतः स्वप्रयोगयोग्यान्यपि प्रयोगमर्हन्ति तत्रार्द्धे प्रकृतिवैशसेनार्द्धे प्राकृतमर्द्धे ग्राम्यच्च प्रश्नवाक्यानुचितम् इत्याह।

जितकाशी ग्राम्योपनागरनागरैः प्रकृतिस्थकोमलकठोरैरेव पदैः श्लोकमुत्तरञ्च पूरयति, हस्तकटकः किं दर्पणेनेच्यते इति। तत्र च प्राकृतानां सर्वेषामपि ग्राम्यत्वम्। प्रष्टुः संस्कृतपदेषु वपुरित्युपनागरं शेषाणि ग्राम्याणि प्रतिवक्तुश्च हस्तविवाहगौरीपदानि ग्राम्याणि, भूतपतिनेति नागरं

पूर्वपदानुरोधादिति। पूर्वं परप्रयुक्तं पदं तर्कितम्। सच्चमा सत्यः। यावती ग्राम्यस्य व्युत्पत्तिरर्हति तावतीमुपन्यस्यति। श्रूयत इति। ऐतिहासिकमुखादेवम् आकर्णितं न पुनरद्यापि निर्णयो वर्त्तते इत्यर्थः। तर्कितमिति प्रकृतिस्थं दीसदीति कोमलं सच्चमेति प्रकृतिस्थं हृतवपुरिति कोमल कामः किलेत्यपि तथा श्रूयत इति प्रकृतिस्थम् इत्यनन्तरं नागरिकस्य उत्तरावसरः। कथं परमार्थवादिनि उत्तरं दातव्यमिति अनुपपत्तावयं समाधानप्रकारो भवति। अस्ति ग्राम्यस्य किल श्रूयत इत्येताभ्यां सन्दिहानत्वं किञ्चित्व्युत्पन्नत्वञ्च उन्नीतमिति किमपि अलीकमेव बुद्धिकौशलात् तथा प्रतीयमानम् अभिधाय प्रतारणम् उपपद्यते। तन्मात्रपरत्वाच्च सर्वाकारम् अधिका व्युत्पत्तिराहृत्यदर्शयितुमर्हतीति तर्कितम् इत्यादिपादे यावती ग्राम्यस्य व्युत्पत्तिस्तावदनुकरणं कियदधिकव्युत्पत्तिपुरस्कारमर्हतीति आशयवानुत्तरम् अवतारयति। अथेति। पादस्तर्कितम् इत्यादिग्राम्यप्रयुक्तः तस्य अनुरोधो व्युत्पत्त्यनुकरणम्। ऐदूए इति दूअं व्याजोऽनेन व्याजेन भूतपतिः पशुपतिः। ननु न क्वचिदेवं श्रूयते तत्कथं ग्राम्यस्य प्रबोधो भवतीत्याह। गौरीविवाहोत्सव इति। मा श्रूयताम् उपपत्त्या तु सिद्धो द्वितीयो यदि कामप्रादुर्भावो न स्यात् कथं गौरीपाणिग्रहं भगवत उत्साह इत्यतस्तेन एव करुणासन्तानशान्तात्मना भूयः सृष्टः स्यात् इत्यर्थः। पच्छेति पाठे प्रकृतिस्थ मे इति कठोरं किअलेउ इति कोमलं भूतपतिनेति तथा। गौरीविवाहोत्सव इति प्रकृतिस्थम्। एँदूएँ इतिपाठे इयमपि कठोरम्। तदत्र कठोरनिवेशनं व्युत्पत्त्याधिक्यसूचनाय। एतावति उक्ते परीक्षणव्युत्पत्तिर्न किञ्चिद्ग्राम्यं प्रतिभाति। न च तस्य अद्यापि निःशङ्कता वर्त्तते। ततो नागरकप्रामाण्यदत्तभरः प्रश्नी घटत इत्याशयवान् अवतारयति। अथ ग्राम्यमिति। प्रकृत्यापन्न एव तेन यथा प्रथमं हातो इत्यादिप्रश्ने गतिः तथात्रापीति ग्राम्यप्रकृतिस्थयोः उपन्यासः। भाषाचित्रेण परस्परसङ्घर्षादिक-

शेषाण्युपनागराणि। तदिदमीदृशि प्रमेये तथा एव उपक्रमादेतत् न दुष्यति॥ १५०॥

वाक्यान्तरसगर्भं यद् वाक्य तद्वाक्यगर्भितम्।
रसान्तरतिरस्कारे तदिष्टं नेष्टमन्यथा॥

यथा, दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा सा च वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत् कथाद्भुतमिदं यत्रैव चास्तं गतम्॥

काव्यरचनाप्रवृत्तये ग्राम्यस्यापि श्लोकसमाप्तिपदारम्भो योग्य एव। यदि चाबमेव समस्तं निर्वाहयन् अशेषश्लोकानिहत्युपयुक्तमुत्तरं नागरस्य निवेशितं स्यादिति तदुत्तरानुरोधेन पादाद्यं एव विलम्बोऽपि उचितः। ऐसें एवमिति अत्रार्थे, काकुगर्भम्। सच्च जिवोल्ल इति जिरवधारणे। सत्यमेव एतदुक्तम्। यदि सत्यपुरःसरं ब्रूयाः तदा प्रत्येमीत्यर्थः। एवं ग्राम्यताप्रतारणसिद्धौ किमत्र सर्वलोकसाक्षिके वस्तुनि वक्रोक्त्यैव पूर्वव्युत्पत्तिमात्रनिवेशनेन उत्तरं दत्त्वा श्लोकपूरणमेव नागरस्य उचितमित्याशयेन उत्तरम् अवतारयति। अथेति। इस्से इति प्रकृतिस्थं कटकमिति कोमलं दर्पणेन इच्यते इत्येते प्रकृतिस्थे इति प्रकृतिस्थादीनां सुपरिचयत्वात् ग्राम्यादीन्येव व्याचष्टे। अत्र चेति। प्रकृतिव्यतिकरा-व्यतिकरत्वयोः औचित्यापन्नत्वाद्भाषासङ्करः शोभावहत्वेन गुण एव भवतीति उक्तमुपसंहरति। तदिति॥ १५०॥

वाक्यान्तरेति। रसान्तरं रसविशेषः प्रकृतरसानुसहितो रसस्तेन तिरस्कारो दोषभावस्य तस्मिन् सति तथा कृतं वाक्यमिष्टमेव कवीनाम् उपादानयोग्यमेव अन्यथा न इष्टं दुष्टमेव इत्यर्थः। तेन अयमर्थो भवति। प्रकृतरसतिरोधायकत्वं किल दूषणताबीजं तदतिरोधानेन एव निवर्त्तते प्रत्युत द्वितीयपरिच्छेदे वक्ष्यमाणगर्भादिवाक्ययोजनप्रकारसम्पत्तौ अलङ्कारलाभे गुणत्वं भवति। तथाहि दिङ्मातङ्गानां घटया विभक्ताः पृथक् उद्धिय व्यवस्थापिताश्चत्वार आघाटा यस्या सा तथा तेन समद्वीपा वसुमती साध्यत इति विवक्षितम्। ये तावत् भरतभगीरथमन्धतयः मथितप्रतापातिशयाः तेषां तद्दूषणपरिनिष्ठितशक्तीनामेकस्यापि समस्त-

अत्र यथोक्ता मही साध्यते सिद्धा च सा विप्राय प्रतिपाद्यते इति वक्तव्ये, येयं वीराद्भुतरसवशप्रवृत्तेन वदन्त एव हि वयं रोमाञ्चिताः पश्यत इति वाक्येन प्रकृतवाक्योक्तेः असमाप्तौ एव विप्रायेत्यादिपदविच्छित्तिः सा रसान्तरतिरस्कृतिरित्युच्यते। तथा चेदं वाक्यान्तरसगर्भमपि वाक्यं न दोषाय भवति ॥ १५१ ॥

यद्भिन्नलिङ्गमित्युक्तं विभिन्नवचनं च यत्।

चत्रवंशोन्मूलनेन नवखण्डमेदिनीसिद्धौ न उत्साहशक्तिः श्रवणगोचरताम् अयासीदिति लोकोत्तरा परशुरामस्य उत्साहशक्तिः आवेद्यते सिद्धा सा च इत्यनेन यावदेव अभिलषितं तावदेव सिद्धमिति अहो विजिगीषुतेति पूर्ववदेव अभिप्रायः। न चेदसौ सिद्धिमभिसन्धाय प्रवृत्तोऽनुपदमेव सा सम्पन्नेति चकारेण द्योत्यते। एवम् अभिहिते अभिप्राये इत्यादिकमस्ति वाक्यशेषभूतं तद्विच्छिद्यैव मध्ये वदन्त एव हि वयं रोमाञ्चिता इति वाक्येन सगर्भता सा न दोषाय। अनेन हि वाक्येन लोकोत्तरवस्तुभावनात्मकविभावसम्पत्तौ प्रादुर्भवन् वक्तुमभिमतो रसो व्यज्यते। स च वीरानुसन्धानहेतुर्वीराद्भुतयोः समानभूमिकयोः अन्योन्यानुगमेन प्रतिकूलता विरहता। तत्र यथा शृङ्गाररौद्रयोर्भिन्नानाम् एकप्रघट्टकेन सूचणे सन्निपातितैरपि हास्यकरुणभयानकैर्न तिरस्कारः। खाङ्गमव्यवधायकमिति न्यायात् तथा इह वीरस्य अद्भुतेन अतएव अद्भुतादुद्वेलस्य प्रादुर्भूतपुलकाङ्कुरलक्षणानुभावप्रदर्शनं पश्यतेति। न चात्र दोषोदाहरणे मया इति कारकविभक्तेः उत्थिताकाङ्क्षाया रचैनमित्यादिना स्वरसबाधः तथा अत्र सम्भवति सिद्धेति एतावत्यपि दर्शिते वाक्यार्थपर्यवसानात्। न च सम्पूर्णे रसे वदन्त एव इत्यादिकम् अभिधातुमर्हति। अद्भुता च पार्थिवानुभावस्य तन्मात्रपूरणापेक्षत्वात्। एवं रसानुभावनाटप्रस्य तत्र एव पुनःपुनः उत्कण्ठायां जिगीषुकरणीयलब्धपात्रप्रतिपत्तिविशेषस्फोरणे विप्राय प्रतिपाद्यत इत्युक्तम्। दानवीरोऽपि वीर एव अतएव अधिकस्य कर्त्तव्यस्य अभावे किमपरमित्यादिरुपसंहारः तदेतत्सर्वं व्याचष्टे। अत्रेति ॥ १५१ ॥

यद्भिन्नेति। दोषप्रकरणानुरोधेन समस्तव्यस्तोदाहरणं बोद्धव्यम्। सहृदयो-

उपमा दूषणं तत्र यत्रोद्वेगो न धीमताम् ॥

यथा, अन्यदा भूषणं पुंसः शमो, लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥

अत्र पुंसो योषित इव शमो लज्जेव पराक्रमो वैयात्यमिवेति लिङ्गभेदः । परिभवे सुरतेषु इवेति तु लिङ्गभेदो वचनभेदश्च दृश्यते । स चैतानेव परस्परम् उपमानोपमेयभावविवक्षायां पर्य्यायान्तराभावादन्यथा कर्त्तुम् अशक्यमिति सहृदयहृदयानुद्वेजकत्वात् न दुष्यतीति दोषस्यापि गुणत्वम् । तदिदं द्वयोरपि एकमुदाहरणम् ।

अथ भिन्नलिङ्गस्यैव यथा,

यस्य त्रिवर्गशून्यानि दिनान्यायान्ति यान्ति च ।
स लोहकारभस्त्रेव श्वसन्नपि न जीवति ॥

द्वेजकत्वेन हि दोषता यत्र तु कथञ्चित् तथाभावी न भवति तत्र दोषत्वहानिरुचितैव । तथाहि स्त्रीपुंसयोः एव प्रकृतानुगुणोपमानोपमेयभाव विवक्षायाम् आवश्यकं लिङ्गवचनभेदयोः अन्यतरदेकस्य पुंस उपमेयत्वेन दारशब्दस्य भिन्नवचनत्वनियमात् कलत्रपदं भिन्नवचनमेव । पर्य्यायाणामपि लिङ्गभेदो नियतः । न च पुंवचनं किञ्चित्समानस्वभावमस्ति येन अयं प्रकारो निवर्त्तेत । न चैवंविधोपमानमन्तरेण प्रस्तुतवाक्यार्थपोषः । एवमनन्यगतिका भिन्नलिङ्गता भिन्नवचनता वा साहित्यसमयविदामुद्वेगं न उत्पादयति । अतएव अलङ्कारौचितीसम्पदा गुणत्वसिद्धिः । एवं शमलज्जयोः पराक्रमवैयात्ययोः परिभवसुरतयोश्च बोद्धव्यम् इत्याशयवान् व्याचष्टे । अत्रेति । रतं रङ्गः शयनं मोहनमिति सुरतवाचिनां सर्वेषाम् एव नपुंसकता न दुष्यतीति सहृदयहृदयानुद्वेजकत्वादिति हेतुर्गुणत्वे तु आभिप्रायिकः स च दर्शित एव । अथेति । धर्मार्थकामास्त्रिवर्गः । वह्नितिग्मापनचर्मपुटो भस्त्रा सा यथा वातेन पूर्य्यते वातञ्च मुञ्चति न तु किञ्चित्पुरुषार्थमासादयति तथा त्रिवर्गशून्येऽपि भस्त्रापर्य्यायस्य

अत्र प्राग्वदेव पर्य्यायान्तराभावात् स लोहकारभस्त्रेवेति लिङ्गभेदस्य न दोषः ॥ १५२ ॥

भिन्नवचनस्यैव यथा,

प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः ।
मुक्तात्मानः शिवं नेमिरन्येऽपि ददतां जिनाः ॥

अत्र नेमिरन्येऽपि इति वचनभेददोषेऽपि ददतामिति क्रियापदादेर्वचनश्लेषमाहात्म्याद् गुणत्वम् । न च इदं वाच्यमत्रेवादिर्न विद्यत इति नोपमात्वम् । इवस्यापिना समु-

---

समानलिङ्गस्य अभावेन सहृदयानाम् अनुद्वेगोऽलङ्कारसम्पत्त्या गुणत्वम् उपपन्नम् इत्याह । अत्र प्राग्वदेवेति । अदोष इत्युपलक्षणं गुणश्च भवतीत्यपि बोद्धव्यम् ॥ १५२ ॥

प्राज्येति । आर्हतानां नेमिनामा जिनविशेषोऽन्ये जिना ऋषभनाथप्रभृतयः प्राज्यमुचितं तथाभूतं प्रभावः सिद्धिरूपो यस्य तादृशो नेमिः शिवं ददतां ददातु । दददान इति धात्वनुसारात् । कस्मै इति अपेक्षायां मुक्तात्मा इत्यत्र नः पक्षे वो युष्मभ्यं शिवं ददतां ददत्विति । धर्मस्य प्रभवम् उत्पत्तिनिमित्तम् । नेमिः प्रभवः प्रभुता यथावदनुशासनेन जिना रजश्च तमश्च रजस्तमसी ते अस्ते क्षिप्ते येन स तथाभूतो नेमिः । अस्तं रजो येस्तेऽस्तरजस्तेषु प्रकृष्टाः तमपि अस्तरजस्तमाः । मुक्तो निरावरण आत्मा । आत्मशब्द आत्मवचनः स्वरूपवचन इति वा बहुव्रीहिः तादृशो नेमिः जिनास्तु मुक्तात्मान इति स्पष्टम् । तदिह वचनभेदम् अन्तरेण वचनश्लेषाभावात् भिन्नवचनत्वस्य आवश्यकत्वेन दोषः । श्लेषलक्षणालङ्कारघटनया गुणत्वम् । ननु च लिङ्गादिभेद उपमाया दूषणत्वम् उक्तमिहतु अलङ्कारान्तर उदाक्रियते तत्कथं पूर्वापरसमञ्जसत्वं न च अत्रोपमा सम्भवति तत् सामग्र्यसम्भवात् । उपमानोपमेयसाधारणधर्मेवादिशब्दाः किल तद्घटकाः तदत्र त्रितयसम्बद्धे तु अपीव वद्वा प्रभृतिशब्दानुपादानात् कथम् उपमेति शङ्काम् उत्थाप्य निरस्यति । न चेति । इवादयो हि शब्दाः सादृश्यद्योतकाः तथाच क्वचित् प्रसिद्धस्य प्रकृते सम्बन्धप्रतीतिः तेभ्यो भवति बिम्बप्रतिबिम्बन्यायाश्रयणात्

श्रयार्थेन तुल्यधर्माणां तु धर्मस्य प्रभव इत्यादिभिर्वचनश्लेषैः विषयापहारात्। यथा, अग्रतो द्योतकलोप उपमायाम्। कोमलापाटली तन्वि पल्लवस्याधरश्च ते। नन्वेषोऽपि श्लेषः कस्मान्न भवति। उच्यते। यत्र द्वयोः सदृशयोरभिधानं स श्लेषो यत्र सदृशात् सदृशप्रतिपत्तिस्तदुपमानम्। यत्र द्वयोः सादृश्यमभिधीयते प्रतीयते वा सोपमेति प्रबन्धेनाग्रे वक्ष्यामः। उपमालक्षणं चैतत्। यदुपमायामेव लिङ्गवचनभेदेन दूषणं

देवच्च न युगपत् तुल्यरूपसम्बन्धोऽपिशब्दस्तु युगपत् तुल्यरूपसम्बन्धं बोधयतीति विभिन्नविषयत्वं न हि इवादिशब्दाभावे सादृश्यमेव न प्रतीयते लुप्तोपमाप्रपञ्चभङ्गप्रसङ्गात्। अन्यत एव प्रतीतिसिद्धेरुपायान्तरवैयर्थ्यात्। किमितीह न इवादिपदं प्रयुक्तमिति प्रश्नोऽवशिष्यते तत्र इदमुत्तरमिवस्य इत्यादि। नेमिरन्येऽपीति अपिशब्देन समुच्चयोऽपि अवसीयते। स च युगपदेकसम्बन्धाभिधानेनिर्वहति। तेन अनेकमुद्दिश्य किञ्चित् एकसम्बन्धाभिधानं समुच्चयाभिधायिनो विषयः। एकमुद्दिश्य प्रसिद्धान्यधर्मविधानं तु यथेवादिरिति विषयविरोधात् न प्रयुज्यत इति। स्यादेतदिववद्वा यथादिशब्दा यत् पराः तस्य एव उपमानता प्रतीतिः तथाच अनेन इदं तुल्यमिति साधारणधर्मविधिरूपा कथमुपेमेति अत उक्तं तुल्यधर्मणाम् तु इति। नात्र वचनश्लेषतुल्यधर्मागमोऽपि तु द्वया व्यवसितानामेव शब्दतन्त्रतेति धर्मस्य प्रभव इत्यादिभिः द्विवचनश्लेषैः तथापि विषयोऽपहृत इति। यदि च इवादिमन्तरेण न उपमाप्रतीतिः तर्हि प्रसिद्धमुपमोदाहरणं भज्येतेत्याह। यथेति। अग्रतश्चतुर्थपरिच्छेदे। अत्र अपि उपमामनङ्गीकुर्वतो मतमाशङ्कते। ननु इति। इहापि चकाराभ्यां युगपत् पल्लवाधरयोः एकधर्मविधानस्य तुल्यत्वादिति देश्याभिप्रायः। उक्तयुक्त्या दूषयति। उच्यते इति। तर्हि प्रकृतोदाहरणेन अस्त्येव उपमा कथं वचनभेदस्य गुणीभाव उदाक्रियत इत्याह। यत्रेति। यद्यपि अभिधीयमानं नास्ति सादृश्यं तथापि प्रतीयमानोपमा व्यवक्रियतामित्यर्थः। शब्दमात्रसाम्यं श्लेषसङ्कीर्णमेवेति उपेक्षितवान्। ननु यत्र उपमया काव्यव्यपदेशः तत्र प्रतीयमानमपि सादृश्यमूरीक्रियते। यत्र तु अलङ्कारस्वभावव्यवस्थापितमेव काव्यं

तस्य सर्वालङ्कारसाधारणत्वात् केवलसादृश्यमलङ्कार इति दर्शने उपमायामुदाक्रियते ॥ १५३ ॥

यत्रोपमानधर्माः स्युर्नोपमेयेन सम्मिताः ।
तद्धीनोपममित्याहुस्तत्प्रसिद्धौ न दुष्यति ॥

यथा,

स मारुताकम्पितपीतवासा बिभ्रत् सलीलं शशिभासमञ्जम् ।
यदुप्रवीरः प्रगृहीतशार्ङ्गः सैन्द्रायुधो मेघ इवावभासे ॥

अत्र सैन्द्रायुध इति कार्मुकमात्रोपादानं वासशङ्खयोस्तु अनुपादानादूनोपमत्वं तत्र इन्द्रविद्युतोरतिप्रसिद्धत्वाद्दोषत्वम् ।

यदाह, सर्वं सर्वेण सारूप्यं नास्ति भावस्य कस्यचित् ।

न तत्रापीत्याह । उपलक्षणमिति । प्रतिपत्तिवैरूप्यस्य अलङ्कारान्तरसाधारण्यादुपमातोऽन्यत्रापि लिङ्गवचनभेदो दूषणमेव । तद्यथा मुखं पद्ममिति रूपके मुखं पद्मं वेति संशये न मुखं पद्ममेवेति अपह्नवे । एवमन्येऽपि । अतएव द्वे भिन्नलिङ्गवचने इत्यत्र न उपमायाग्रहणम् । यदि एवं कथमुपमायामेव दूषणमुदाक्रियत इत्यत आह । केवलमिति । चिरन्तनैः हि भरतमुनिप्रभृतिभिः द्वे एव यमकोपमे शब्दानुगतालङ्कारत्वेनेष्टे । तत्प्रपञ्चनमात्र तु पुनरन्यैः अलङ्कारकारैः कृतमुपमायाः प्रभूतविषयतया प्राधान्यात् तच्च उदाहृतमतिस्फुटं भवतीति संक्षेपः ॥ १५३ ॥

यत्रोपमान इति । उपमेयेन उपमेयविशेषणेन सम्मिताः तुल्यसंख्याः । इन्द्रायुधम् इन्द्रधनुरेकम् उपमाने उपमेये पीतं वासः शार्ङ्गमञ्जः शङ्ख इति त्रीणि विशेषणानि तदिहाधिकविशेषणविषय इति जिज्ञासासमकालमेव अप्रसिद्धेन्दुबिम्बयोः उपमानयोः मेघानुसन्धानात् खलनाभिमुखी प्रतीतिः अवलक्ष्यते । ध्वननव्यापारोन्मेषात् च गुणलाभः । तदुक्तम् । मुख्या महाकविगिरामलङ्कृतिभृतामपि । प्रतीयमानच्छायेषा भूषा लज्जेव योषितामिति । न चैवं स्वनितादीनामिति कथं प्रतीतिरिति वाच्यम् । प्रतीय-

यथोपपत्तिं कृतिभिरुपमानं प्रयुज्यते ॥

अखण्डमण्डलः क्वेन्दुः क्व कान्ताननसुद्युति ।

यत्किञ्चित् कान्तिसाम्यात्तु शशिनैवोपमीयते ॥

इति ॥ १५४ ॥

क्रमेणानेन कृतिभिरेष्टव्यमधिकोपमम् ।

विशेषस्तूपमेयाङ्गमनुमानात् प्रतीयते ॥

यथा,

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः ।

शतक्रतेन्द्रायुधवान्निशायां संसृज्यमानः शशिनेव मेघः ॥

अत्र शशिनो ग्रहणादधिकोपमत्वेऽपि उपमात्वेनाविवक्षणाद् गुणत्वम् । यदि वा उपमाने धर्मोद्घाटनानुमानात् शङ्खचक्रगदाधरो विष्णुरिति प्रसिद्धेः शङ्खोऽनुमेयः ॥ १५५ ॥

मानस्यापि प्रतिपत्तिवैरूप्यसमाधौ वा अनौपयिकस्यानाकाङ्क्षितत्वेन आदरादित्याह । सर्वं सर्वेणेति । यथा उपपत्तिपर्यन्तो यावता उपमानविशेषणत्वेन प्रकृतमुपमेयविशेषणप्रतिबिम्बता नीयते तदतिक्रमेण एकपुत्रीति अनुरोधे कल्पितेनापि उपमेयविशेषणेन इत्यर्थः । अन्यथा चन्द्रमुखादीनां न उपमा पर्य्यवस्येत् इत्याह । अखण्डेति ॥ १५४ ॥

अमुमेव प्रकारमधिकोपमेये योजयन्नाह । क्रमेणेति । यत्र उपमानेऽधिकविशेषणसंक्षेपस्तद्वाक्यम् अधिकोपममिति इति उच्यते तत्र कृतिति प्रतिबिम्बभूतोपमेयविशेषणप्रतिसम्माने न दोषः तदेव तु कथमत उक्तम् । विशेषस्त्विति । उपमेयांशे विशेषाविशेषणम् उपादानात् उपमानविशेषणात् प्रतीयते । शतक्रतुदा विद्युत् । उपमानत्वेन अविवक्षितत्वात् इति आपाततः । उपमानविशेषणानां यावत् प्रतीति न ग्रहणमिति प्रकाशयितुं पारमार्थिकस्त्वयं सिद्धान्त इत्याह । यदि वेति । उपमानधर्मस्याधिकस्य उद्घाटनम् अभिधानस्य अनु पश्चात् मानं ज्ञानम् । कथमेतत् इत्याह । अतिप्रसिद्धेरिति ॥ १५५ ॥

यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न छन्दो भङ्गमप्याहुस्तदा दोषाय सूरयः ॥

यथा, जुह ह्लाउं ओइसे अव्वभिन्नमुह्लसिअमंसुअइन्तम् ।
तह आणह्लासि तुमं सच्छे गोलाणईतूहे ॥ (अ)

अत्र द्वितीयैकादशत्रयोविंशतिवर्णानां संयोगपरत्वाद् गुरुत्वेऽपि ह्लह्लादिसंयोगस्यातीव्रप्रयत्नोच्चारणेन पूर्वलघुत्वेन छन्दोभङ्ग इति गुणत्वम् ॥ १५६ ॥

वाक्यमस्थानविरतिप्राग्भग्नयतिसंज्ञया ।
समुद्दिष्टं यदधुना गुणत्वं तस्य कल्प्यते ॥

(अ) यथा स्नातुमवतीर्णे आर्द्रीभूतसुल्लासितमंशुकार्द्धान्तम् ।
तथाच स्नाता भवसि त्व स्वच्छे गोदानदीतीये ॥

यदा प्रयतनं प्रयत्नः स्थानकरणव्यापारः तस्य तीव्रत्वमुद्रेकस्तत एव हि विष्ठाक्षरादीनाम् अकठोरत्वमाभासते । आदिग्रहणादिव हि ङ्कारौ सानुस्वारौ च केवलौ पदान्ते वर्त्तमानौ तत्तद्भाषाविषयेऽवसेयौ । क्वचिदेव हि वर्णे तथा अवभासते न तु सर्वत्र तदुपलक्षणम् एव रहवञ्जणसञ्जीए इत्यादिकं छन्दोविचितौ दर्शितम् । जहेति । स्नातुमवतीर्णे त्वयि अंशुकार्द्धमुद्भष्टं स दब्भृत्तमार्द्रीभूतं यथा चलत्वं स्थितेस्तथावगम्यते न तु अन्तर्जलं जलकेलिस्थानमवतीर्णे इत्यभिप्रायशेषः । कथमन्यथा गोदावरीनद्याः स्वच्छं जलं दृश्यते इति । तूहन्तीर्थम् । अत्र द्वितीयैकादशादिस्थानेषु यद्यपि संयोगात् पूर्वभावे गुरुत्वं विद्यते तथापि तीव्रप्रयत्नोच्चारणीयशकारहकारादिसंयोगमहिम्ना नावच्छेदशब्दता कलुषीक्रियत इति एवमन्यदपि उदाहार्य्यम् । यथा धवलाइंगलेत्तिधवलेहिंअणं जणसामलेणिसालआए । णखवत्तकुसुमाइं णइअलाओओसरइ इत्यादि नाम धातुभागे स्वरासन्नाने च पठिति विच्छेदो न भवतीति उक्तं स तदुल्लङ्घनमात्रेण समाधीयते शोभां पुष्यतीति ॥ १५६ ॥

कार्य्याकार्य्येति च नाम भागमुल्लङ्घविच्छेदशब्दता च परस्य यथादेशेन

यथा, शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबोधः
किञ्चिद् भावालसमसरलप्रेक्षितं कामिनीनाम्।
कार्य्याकार्य्याण्ययमविकलेनागमेनैव पश्यन्
वश्यामुर्वीं वहति नृप इत्यस्ति चायं प्रयोगः॥

अत्र पादत्रये चतुर्थस्थाने यतौ कर्त्तव्यायां पञ्चमस्थाने कृतत्वादपरत्र च पादस्य मध्यभागे निविष्टकेवलस्वरत्वाद् यतिभ्रंशेऽपि स्वरसन्धिकृतत्वादविभिन्ननामधातुशरीरत्वाच्च न दोषत्वम्।

तदाह, स्वरसन्ध्यकृते प्रायो धातुभेदे तदिष्यते।
नामभेदे च शेषेषु न दोष इति सूरयः॥
लुप्ते पदान्ते शेषस्य पदत्वं निश्चितं यथा।
तथा सन्धिविकारान्तं पदमेवेति वर्ण्यते॥ १५७॥

अशरीरं क्रियाहीनं क्रियापेक्षा न यत्र तु।
प्राशस्त्यादेरपेक्षा वा न दोषस्तत्र तद् यथा॥
कियन्मात्रं जलं विप्र! जानुदघ्नं नराधिप!।

किञ्चिद्भावेति नृप इति च स्वरसन्धाने विच्छेदो अतएव अव्यत्वमपि तदेतद् व्याचष्टे। अत्रेति। मन्दाक्रान्ताभभनभयुगङ्गद्वयं वेददिग्भिरिति चतुर्थदशमयोः यतिराम्नाता। पञ्चमस्थान इति। प्रथमतृतीययोः द्वितीये तु षष्ठे यतिकरणादिति बोद्धव्यम्। ननु पदच्छेदे स्वरसन्धानपठिति विरामः सोल्लेखो लक्ष्यते न तु चतुष्पादे तथा अस्तीति कथं अव्यत्वमत आह। लुप्त इति। सन्धौ विकारीयत्वयलोपादिकं कार्य्यं तथाच पदान्ते सति पदच्छेद एव अयमिकारोऽवतिष्ठत इत्यर्थः॥ १५७॥

अशरीरमिति। प्रधानाविमर्शे हि दूषणमित्युक्तं तदुपात्तानामेव पदार्थानां प्रधानगर्भीकरणे तत्प्रतिबन्धे अवश्यविधेयमन्यं प्रति गुणीभावे वा समाधीयते अतएव विशेषादगुणत्वम्। तथाहि कियन्मात्रं जानुदघ्नमित्यनयोः परिमितं

तथापीयमवस्था ते नहि सर्वे भवादृशाः ॥

अत्र त्रिषु पादेषु पदानि क्रियापदं नापेक्षन्ते सापेक्षं च असमर्थं भवति। चतुर्थे तु न हि इत्यादिभिः सन्तीत्यपेक्षते। न चैतावतामीषामसामर्थ्यं भवति। यदाह। यत्रान्यक्रियापदं नास्ति तत्रास्तिः भवन्ती परः प्रथमपुरुषः प्रयुज्यते इति ॥ १५८ ॥

श्लिष्टमस्पृष्टशैथिल्यं शिथिलं तद्विपर्ययः।
गौड़ीयैरिष्यते तत्तु बन्धप्राशस्त्यगौरवात् ॥

यथा, लीलाविलोलललनाललितालकलासकाः।
विलुप्तमालतीमालाजलकालानिला ववुः ॥

अत्र शैथिल्यदोषेऽपि बन्धप्राशस्त्येन गौड़ैराहृतत्वाद् गुणत्वम् ॥ १५९ ॥

क्रियाप्रधानगर्भभूता न हि भवादृशा इत्यत्र तु सत्ताक्रियायाः सकलपदार्थाव्यभिचारात् अपेक्षित इति सिद्धिः तदिदम् आचार्य्यमतेन आह। यत्र अन्येति। भवन्ती वर्त्तमाना। तदेतद् वाक्यं क्रियाप्रधानमिति दर्दश्च सप्रधानं विशेष्यमात्रं तु वाक्यार्थ इति परमार्थः तेन राधारहः साक्षिणाम् इत्यादौ आवश्यकविधेय साक्षिभावादिगुणतया राधासम्बन्धादीनां वैवक्षिकप्राधान्यानामपि प्रधानत्वाविमर्शो न दोष इत्युक्तं भवति ॥ १५८ ॥

श्लिष्टमिति। पारुष्यशैथिल्याभ्यां विना कृतं श्लिष्टमित्युक्तं तस्य विपर्ययो विपरीतं वाक्यं शिथिलं भवति। परुषम् अल्पप्राणाक्षरोत्तरं वा इत्यर्थः। एवंविधमपि च एतत् अनुप्रासमौष्ठवात्पदानामेकताप्रतिभासे समाधीयते उद्भटानुप्रासतया च कान्तिप्राधान्ये गौड़ीयरीतिप्राधान्येन गुणत्वमासादयति तदिदम् उक्तम्। बन्धप्राशस्त्यगौरवादिति। गौड़ीयैः गौड़ीयरीतिगोचरहेतुवाक्प्रकर्षशालिभिः। लीलेति। अत्र दन्त्यवर्णमयत्वेन अल्पप्राणाक्षरोत्तरतायामपि पदैकताप्रतिभासानुप्रासयोः उद्रेकः कान्तिप्रकर्षोऽवसेयः ॥ १५९ ॥

न दोषः क्वापि वैषम्येऽप्यर्थालङ्कारकारणात्।
पौरस्त्यैराहृतत्वाच्च शब्दाडम्बरतोऽपि वा॥

यथा, चन्दनप्रणयोद्गन्धिर्मन्दो मलयमारुतः।
स्पर्द्धते रुद्धमर्द्धैर्यो वररामामुखानिलैः॥

अत्र सत्यपि शब्दवैषम्यदोषे शब्दाडम्बरगुणादर्थालङ्कार-गुणात् पौरस्त्यैराहृतत्वाच्च गुणत्वम्॥ १६०॥

कठोरमपि बध्नन्ति दीप्तमित्यपरे पुनः।
तेषां मतेन तस्यापि दूषणं नैव विद्यते॥

यथा, न्यक्षेण पक्षः क्षपितः क्षत्रियाणां क्षणादयम्॥

अत्र कठोरत्वेऽपि दीप्तत्वाद् गुणत्वम्॥ १६१॥

अविद्वदङ्गनाबालप्रसिद्धार्थं प्रसादवत्।

न दोष इति। अर्थालङ्कारकारणात् अर्थालङ्काररूपम्। यत्र हि शब्दस्य अर्थोऽन्यथारूपं भजते तत्र अवश्य तदनुयायिना पदसन्दर्भेण भिन्नरूपेण भाव्यम्। एवमपि छायावैरूप्यं वैरस्यमेव आवहतीति आशङ्क्य शब्दाडम्बर इत्युक्तम्। आडम्बर उद्भटता। तस्यापि एकरीत्यनिर्वाहो दूषणमिति अत्र पौरस्त्यैः इत्युक्तम्। चन्दनेति। अत्र यद्यपि मलयानिल एक एव वाक्यार्थः तथापि चन्दनप्रणयेन प्रवृद्धसौरभे मन्द इत्याभ्यां शृङ्गाराङ्गताप्रतीतौ उन्मिश्रः सन्दर्भः। मलयमारुत इति कोमलः वररामामुखानिलैः इत्यपि तथा तत्रापि आरभटीप्रकाशने स्पर्द्धत इति स्फुटम्। एवं रुद्धमर्द्धैर्य इति तदेवं समताविपर्यासेऽपि विशेषणानाम् अर्थानां भिन्नभिन्नरसानुप्रवेशे पृथगर्थालङ्काराः प्रकाशन्ते अस्ति चात्र शब्दाडम्बर-वशादेव छायारूपाप्रतिभासः। लाटीया च रीतिः॥ १६०॥

कठोरमिति सुकुमारताविपर्यासः कठोरः सन्दर्भः प्रस्फुटतरवर्णप्रधानम् इति यावत्। सोऽयं दीप्तरसानुप्रवेशात् औचित्येन गुणत्वं भजत इति व्यक्त-मपरे पौरस्त्याः। न्यक्षेण सामस्त्येन॥ १६१॥

विपर्य्ययोऽस्याप्रसन्नं चित्रादौ तन्न दुष्यति ॥

यथा, याश्रिता पावनतया यातनाच्छिदनीचया ।
याचनीया धिया माया या मायासं स्तुता श्रिया ॥

अत्राप्रसाददोषेऽपि चित्रत्वाद् गुणत्वम् ॥ १६२ ॥

अध्याहारादिगम्यार्थं नेयार्थं प्रागुदाहृतम् ।
स गम्यते प्रसिद्धेश्चेन्न तद्दोषवदिष्यते ॥

यथा, मा भवन्तमनलः पवनो वा वारणो मदकलः परशुर्वा ।
वाहिनीजलभरः कुलिशं वा स्वस्ति तेऽस्तु लतया सह वृक्ष ॥

अत्र दहतु इत्यादीनामध्याहार्य्यतया नेयत्वेऽपि अति-प्रसिद्धया प्रतीयमानत्वाद् गुणत्वम् ॥ १६३ ॥

असभ्यार्थं मतं ग्राम्यं तद्ग्राम्योक्त्यैव दुष्यति ।
विदग्धोक्तौ तु तस्याहुर्गुणवत्वं मनीषिणः ॥

अविवक्षिपर्य्ययः प्रत्यनीकभूतं वाक्यमादियद्वणात् यमकश्लेषप्रहेलिकाप्रकरणानि । या देवी पवित्रत्वेनाश्रिता अनीचया तुङ्गया बुद्ध्या मायायामस्य अविद्याविस्तारस्य आयासं ग्लानिं विच्छिदं याचनीया प्रार्थनीया यतो यातनं नरकानुभवनीयं दुःखं छिनत्ति श्रियापि स्तुतेति । अष्टदलकमलबन्धोऽयम् । तदिह तथा वरासन्निवेशस्य चमत्कारकारित्वेन प्रसादोऽपि सहृदयश्लाघाविषयो गुणताममध्यास्त इति ॥ १६२ ॥

अध्याहारेति । असम्पूर्णं वाक्यं नेयार्थमित्युक्तं तस्य एवं रूपता झटिति श्रुतार्थापत्तिप्रादुर्भावपरिङ्गवकसम्भानात् समाधीयते । तथाहि मा भवन्तमनल इत्यादौ वृक्षसमभिव्याहारेण दहनादीनां योग्यतया शीघ्रमेव धाक्षीदित्यादि क्रियान्वयोऽवसीयते । स्वस्तिवचनेन च अमङ्गलप्रस्तावनिरासात् तथाभूतक्रियानुपादानं वक्रत्वमतया गुण इति ॥ १६३ ॥

असभ्यार्थमिति । रसस्यादीप्तिः कान्तिविपर्य्ययो वचनापराङ्गेन दूषणता-

यथा, कामं कन्दर्पचाण्डालो मयि वामाक्षि निर्दयः ।
त्वयि निर्मत्सरो दिष्ट्या सोऽयमस्मास्वनुग्रहः ॥

अत्र ग्राम्यत्वेऽपि ग्राम्यार्थस्य विदग्धोक्त्या तिरस्कृतत्वाद् गुणत्वम् ॥ १६४ ॥

ओजः समासभूयस्त्वं तद्दीप्तार्थेषु बध्यते ।
विपर्य्ययोऽस्यासमस्तं तद्दीप्तं चेन्न दोषभाक् ॥

यथा, यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनां
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा ।
यो यस्तत् कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥

अत्रासमस्तत्वेऽपि प्रौढबन्धत्वाद् गुणत्वम् ॥ १६५ ॥

समस्तमसमस्तं वा न निर्वहति यद्वचः ।
तदनिर्व्यूढमस्यापि न दोषः क्वापि तद् यथा ॥

प्रसीद चण्डि! त्यज मन्युमञ्जसा जनस्त्वयायं पुरतः कृताञ्जलिः ।
किमर्थमुत्कम्पितपीवरस्तनद्वयं त्वया लुप्तविलासमास्यते ॥

मध्यासि स समाधीयते अत्र ग्राम्योक्तिपरिहारेण एव अतएव उक्तिसमर्पितच्छाया-विशेषयोगे गुणत्वलाभः सहृदयसभाया न साधुरसभ्यो वैदग्ध्यविधुरं ग्राम्यम् ॥१६४॥

ओज इति । दीप्तरसानुप्रविष्टार्थप्रतिपादकसन्दर्भौचित्येन समासभूयस्त्व-मोजोऽस्य विपर्य्ययो दीप्तिरप्रत्यूहादेव समाधीयते तदिदमुक्तं "दीप्तार्थे बध्यते यत्र तद्दीप्तञ्च न दुष्यतीति । सुगममुदाहरणम् । व्यूढ. प्रौढः ॥ १६५ ॥

समस्तमिति । उपक्रान्तरीतेः अनिर्वाहे मधुरसपर्य्यताप्रतीतिः स्खलतीति दूषणताबीजमुक्तं तथाभूतरसानुगुणव्यभिचार्य्यनुप्रवेशव्यञ्जनौचित्यात् उपक्रमनिर्वाहः सर्वस्वायमानो गुणताम् आसादयति । तथाहि प्रसीदेति आदौ प्रणयकेलिकुपित-कामिनीप्रसादनायां शृङ्गारविरोधिसमासव्यतिकरेण रीतेरप्यक्रमे दोषलक्षण-

अत्र समस्तरीत्यनिर्वाहादनिर्व्यूढत्वेऽपि रसान्तरपरिग्रहेण रीत्यन्तरपरिग्रहाद् गुणत्वम् ॥ १६६ ॥

अनलङ्कारमित्याहुरलङ्कारोज्झितं वचः ।
पूर्वोत्तरानुसन्धाने तस्य साधुत्वमिष्यते ॥

यथा, निशम्य ताः शेषगवोरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥

अस्यानलङ्कारत्वेऽपि पूर्वापरानुसन्धानप्रयोजनभूतत्वाद् गुणत्वम् ॥ १६७ ॥

वाक्याश्रयाणां दोषाणां गुणीभावोऽयमीरितः ।
अथ वाक्यार्थदोषाणामदोषः कथ्यतेऽधुना ॥
समुदायार्थशून्यं यत् तदपार्थं प्रचक्षते ।
तन्मत्तोन्मत्तबालानामुक्तेरन्यत्र दुष्यति ॥

यथा, क्वाकार्य्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा
दोषाणामुपशान्तये श्रुतमहो कोपेऽपि कान्तं मुखम् ।

भावानुभावभूः स्तनकम्पवर्णनायां समासोऽनुप्रविष्ट इति व्यक्तः पूर्वरीतेः अनिर्वाहः । रसान्तरं प्रकृतविजातीयैरसम्बद्धो व्यभिचारीभावः ॥ १६६ ॥

अनलङ्कारमिति । अनुत्कृष्टाप्रविष्टविशेषणवद्वाक्यं निरलङ्कारो पूर्वोत्तरवाक्यसङ्गतिकरणप्रयोजनकतया न दोषः । कथं तथाभूतस्य काव्यत्वमित्यपि न वाच्यम् । अनुगतेन वक्त्रीभावेन तत्समर्थनात् । व्यक्तमुदाहरणम् ॥ १६७ ॥

सूत्रकार एव वाक्यार्थदोषगुणीभावविवेचनं सङ्गमयति । वाक्याश्रयाणामिति । सत्यादिवचनान्यनुक्रियमाणानि चमत्कारम् अर्पयन्ति । अतएव छायालङ्कारप्रादुर्भावाद्गुणः अनित्यदोषतया च अनुकरणान्यदपि गुणीभवनबीजमुन्नेयमिति उदाहरणेन व्यञ्जयन्नाह । क्वाकार्य्यमिति । अत्र युतिशालिनो नायकस्य वासनापरिपाकवशादिप्रसन्नभावेऽपि प्रथमं प्रादुर्भावः । क्वाकृत्यं शशलक्ष्मणः

किं वक्तव्यपकल्मषाः कृतधियो रेखेव सान्याट्टशी
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ॥

अस्य समुदायार्थशून्यतया अपार्थस्यापि उन्मत्तवचनत्वाद् गुणत्वम् ॥ १६८ ॥

यदप्रयोजनं यच्च गतार्थमर्थमेव तत् ।
तस्यापि क्वापि निर्दोषः प्रयोगो दृश्यते यथा ॥
गीताविदुरवाक्यानि धर्माः शान्तनवेरिताः ।
न श्रुता भारते येन तस्य जन्म निरर्थकम् ॥

अत्र गीताविदुरवाक्यादीनां कथायाम् अप्रयोजकत्वेऽपि इतिहासव्याजेन चतुर्वर्गप्रतिपादनस्यारम्भ एव प्रतिज्ञानाद् गुणत्वम् तदिदमप्रयोजनम् ॥ १६९ ॥

क्व च कुलमिति । तदेवं शान्तरसानुयायिनमनन्तरमेव बाधित्वा चित्तानुरञ्जकप्रकृतरसाव्यभिचारिणा औत्सुक्यस्य प्रादुर्भावो भूयोऽपि दृश्येत सेति । एवं दोषाणामुपशान्तये युतमित्याद्यौचित्यादीना पूर्वपूर्वप्रादुर्भूतानाम् उत्तरोत्तरभाविभिश्चिन्ताप्रभृतिभिः अपवादे प्रकृतवासना प्रौढिः अवसेया । उन्मत्तवचनत्वादिति । रसाविष्टचेतसः तदुत्कलिकाप्रायाणां भावानामव्यवस्थया कीर्त्तनमुन्मादः ॥१६८॥

यदप्रयोजनमिति । प्रबन्धार्थपोषी नाधायकवाक्यम् अप्रयोजनमर्थलाभप्रतिपादकतया कृतकरं व्यर्थम् । एवकारो भिन्नक्रमस्तच्छब्दः अनन्तर द्रष्टव्यः । दृश्यत इत्यनेन तत्र तत्र प्रकृतसङ्गतौ सत्यां दोषाभावोऽवसेय इति दर्शितम् । यद्यपि भगवद्गीतायां मोक्षाधिकारिणामस्ति एव प्रकृतशान्तरसपरिपोषकत्वं तथापि तदन्तर्गतानां भूयसामाहृत्य नास्ति भीष्मविदुरवाक्यानान्तु धर्माधिकारे प्रकृतानां व्यक्त एव निष्प्रयोजनभावः सोऽयं यथा समाधीयते तद्विवृणोति । अत्रेति । इतिहासरूपे प्रबन्धे सत्यपि शान्तस्य वाक्यार्थाभावेन बहूनाम् इतिहासानां त्रिवर्गाधिकारित्वात् चतुर्वर्गप्रतिपादनमेव महर्षेः अभिमतं धर्मादित्रितयस्य च प्रासङ्गिकतया न पूर्ववदस्य अर्थैकताविरोधः । तदिदमुक्तं व्याजेनेति ।

एवं गतार्थमपि। यथा,—

हृत्कण्ठवक्त्रश्रोत्रेषु कस्य नावस्थितं तव।
श्रीकण्ठहारकर्पूरदन्तपत्रप्रभं यशः॥

अत्र एकेन एव उपमानेन शीघ्रप्रतीतौ शेषोपमानपदानां व्यर्थत्वेऽपि यशसः स्मर्यमाणत्वगीयमानत्वस्तूयमानत्वश्रूयमानत्वैः हृदयादिषु श्रीखण्डादिवदनस्थानस्य प्रतीयमानत्वाद् गुणत्वम्॥ १७०॥

अविशेषेण पूर्वोक्तं यदि भूयोऽपि कीर्त्यते।
तदेकार्थं रसाक्षिप्तचेतसां तन्न दुष्यति॥

यथा, असारं संसारं परिमुषितरत्नं त्रिभुवनं
निरालोकं लोकं मरणशरणं बान्धवजनम्।
अदर्पं कन्दर्पं जननयननिर्माणमफलं
जगज्जीर्णारण्यं कथमसि विधातुं व्यवसितः॥

असारं संसारमित्युक्त्वा परिमुषितरत्नं त्रिभुवनं निरालोकं लोकं जगज्जीर्णारण्यमिति यदुक्तं, तस्य विशेषानभिधायकत्वेऽपि रसाक्षिप्तेन वक्त्राभिहितत्वाद् गुणत्वम्॥ १७१॥

एवञ्च व्युत्पादयितव्यविषयजिज्ञासोपादाने धर्मार्थप्रवृत्तये वाक्यमिदं सफलतामासादयद् गुण एव भवति। एवं गतार्थमपीति॥ १६९॥

श्रीखण्डेनैव उपमाने यशसः शुक्लत्वमवगतं शेषोपमानपदानि केवलकृतकराणीति व्यर्थत्वप्रसङ्गे स्मरणादिविशेषविवक्षया तिरस्क्रियते यथा सख्यादिभङ्गिसौभाग्येन च गुणीभाव इति॥ १७०॥

अविशेषेणेति। पूर्वोक्तपूर्वोक्ताभिन्नतात्पर्यैकमविशेषेण तात्पर्यावृत्तिप्रयोजनम् अन्तरेण तन्मयीभवनं चेतसः आक्षेपः। असारं संसारमित्यनेन स्थावरजङ्गमप्रपञ्चस्य निःसारतां प्रतिपाद्य "जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते"

संशयायैव सन्दिग्धं यदि जातु प्रयुज्यते ।
स्यादलङ्कार एवासौ न दोषस्तत्र तद् यथा ॥
कुदो लब्भइ पन्थिअ सत्थरअं एत्थ गामणिघरम्मि ।
उण्णअपओहरे पेक्खिऊण जइ वससि ता वससु ॥ (ट)

अत्र केनापि पथिकयूना प्रावृड़ारम्भे ग्रामणीवधूः पीनोन्नतस्तनी सत्थरअमिति स्तरकव्याजेन शस्त्रतं याचिता । तं प्रत्याचक्षाणैव यथोक्तं ब्रूते । कुतोऽत्र ग्रामणीगृहे स्तरकः, कुतो वा शस्त्रं रतम् । उन्नतौ पयोधरौ मम हृदये नभसि वा पयोधरान् दृष्ट्वा यदि वससि तद् वसेति तदन्यगोपनाय द्व्यर्थैरेव पदैः प्रयुक्तमिति सन्दिग्धस्यापि अस्य गुणत्वम् ॥ १७२ ॥

वाक्ये प्रबन्धे चार्थानां पौर्वापर्य्यविपर्य्ययः ।
दोषः सोपक्रमो नाम चित्रहेतौ न दुष्यति ॥

(ट) कुतो लभ्यते पथिक स्तरकं (शस्त्रतं) अत्र ग्रामणीगृहे ।
उन्नतपयोधरान् प्रेक्ष्य पुनर्यदि वससि तदा वस ॥

इति । परिसुषितरत्नमिति अत्रापि तावानेव तात्पर्य्यार्थः । एवं निरालोकं लोकं जगज्जीर्णारण्यमिति अत्रापि द्रष्टव्यं सुगमम् अन्यत् ॥ १७१ ॥

संशयायैवेति । मिश्रो विरुद्धार्थवाक्यं संशयापादनेन दुष्यतीत्युक्तम् । यदा तु सन्देह एव तात्पर्य्यमवधार्य्यते तदा स एव रञ्जकतया अलङ्कारतामारोहतीति कथनं गुणीभाव इति तदिदमुक्तम् । स्यादलङ्कार एवेति । कुतो लभ्यते पथिकस्तरः शस्त्रतं चात्र ग्रामणीगृहे ग्रामणी ग्रामप्रधानं उन्नतपयोधरान् मेघान् पयोधरौ स्तनौ वा दृष्ट्वा यदि वससि तद्वस । अत्र प्रष्टुः सन्देहजननेन निभृतानुरागप्रकाशनं पथिकविषये प्रतीयते । द्व्यर्थैरिति । तदुक्तं द्व्यर्थैः पदैः पिशुनयेच्च रहस्यवस्त्विति ॥ १७२ ॥

वाक्ये इति । अर्थानां कार्य्यकारणभूतानां तेषामेव पौर्वापर्य्यनियमाद्य

यथा, पश्चात्पर्य्यस्य किरणानुदीर्णं चन्द्रमण्डलम्।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः॥

अत्र पौर्वापर्य्यविपर्य्ययादपक्रमदोषस्य चन्द्रोदयं प्रति-रागोद्दीपनप्रकर्षप्रकाशनत्वाददोषः॥ १७३॥

यस्मिन् रीतेरनिर्वाहः खिन्नं तदभिधीयते।
न दोषस्तस्य तु क्वापि यत्र च्छाया न हीयते॥

यथा,—अभिनवबधूरोषः स्वादुः करीषतनूनपात्
असरलजनाश्लेषस्तुषारसमीरणः।
गलितविभवस्याङ्गेवाद्य द्युतिर्मसृणा रवेः
विरहिवनितावक्त्रक्लैब्यं विभर्त्ति निशाकरः॥

अत्र उपमानानि सामान्यवचनैः समस्यन्ते इति प्रक्रान्त-

इति पूर्वार्द्धेऽध्याहार्य्यम्। चित्रहेतौ इति प्रसिद्धरूपविपर्य्यासेन हेतुवचनद्वारा प्रकृतवाक्यार्थपरिपोषाधानं चित्रहेतुः पर्य्यस्य विस्तार्य्य चन्द्रोदयरागोद्दीपनयोः सत्यपि हेतुहेतुमद्भावेन पौर्वापर्य्ये प्रथमं रागसागरः पश्चात् चन्द्रमण्डलमुदीर्णम् इति विपर्य्यासप्रतीतिसमसमयमुद्दीपनविभावनानुसन्धानाद् हिमांशोः अति-शीघ्रकारिताप्रकाशनात् प्रकृतशृङ्गाररसो दीप्यते। एवं कुलकादिरूपं प्रबन्धान्त-र्गतवाक्येषु अपि गुणत्वमवसेयम्॥ १७३॥

यस्मिन्निति। वाक्यार्थस्य धर्मिणो यदलङ्कारभङ्ग्या प्रक्रमस्यया निर्वहणाभावः खेदः स तु पूर्वालङ्कारविश्रान्तौ प्रतीतेः अस्खलनेन दोषः। गुणत्वं च तस्य भङ्ग्यन्तरैरपि प्रकृतालङ्कारे ध्वननात्। तथाहि अभिनवबधूरोषस्स्वादुरसरल-जनाश्लेष इव क्रूर इत्युपमानानि सामान्यवचनैः समस्यन्त इति समासद्वयेन उपमा-मुपक्रम्य मलिनविभवस्याङ्गेवेति समासत्यागादिरहिवनितावक्त्रक्लैब्यं विभर्त्तीति च अन्तरधर्मारोपेण च उपमात्यागात् सत्यपि रीतेरनिर्वाहे उपमायामेव पर्य्यवसानं समाधानहेतुः। गुणत्वहेतुमाह। व्याख्यापरत्वेन इति। गलितविभवाङ्गाम-सृणेति समासे कर्त्तव्ये योऽयमिव शब्दप्रयोगः स इवार्थे पूर्वो समासो बोधयति। क्लैब्यं विभर्त्तीति सामान्यालङ्कारे कथम् अन्यधर्मम् अन्यो वहतीति प्रतिसन्धान-

रीतेः अनिर्वाहेऽपि समासव्यापारत्वेन एव इव शब्दतद्धितयोः प्रयोगे प्रत्युत क्वायोत्कर्ष इति गुणत्वम् ॥ १७४ ॥

लोकातीत इवार्थे यः सोऽतिमात्र इहेष्यते।
वार्त्तादौ तेन तुष्यन्ति विदग्धा नेतरे जनाः ॥
तच्च वार्त्ताभिधानेषु वर्णनास्वपि विद्यते।
कान्तं जगति तत्कान्ते लौकिकार्थानुयायि यत् ॥
लौकिकार्थमतिक्रम्य प्रस्थानं यत् प्रवर्त्तते।
तदत्युक्तिरिति प्रोक्तं गौड़ानां मनसो मुदे ॥

यथा, देव धिष्णयमिवाराध्यमद्यप्रभृति नो गृहम्।
युष्मत्पादरजःपात धौतनिःशेषकल्मषम्।

अत्रातिमात्राख्ये दोषेऽपि वार्त्ताभिधानेऽभिधेयस्य कान्ति-गुणस्याभ्यनुज्ञानाद् गुणत्वम्।

यथा वा, अल्पं निर्मितमाकाशमनालोच्यैव वेधसा।
इदमेवंविधं भावि भवत्याः स्तनजृम्भणम् ॥

अत्रातिमात्रत्वेऽपि वर्णनार्थत्वाद् गुणत्वम्। अथानतिमात्रं कीदृक्। उच्यते। वार्त्ते तावत्।

यथा, गृहाणि नाम तान्येव तपोराशिर्भवादृशः।

समसमयं वक्त्रक्लैव्यमस्य इति अन्तर्गतोपमाप्रकटीभावे उपमासमासपदयोरपि सा प्रतीयत इति सेयं कविचातुरीप्रतीयमानच्छायामेव पुष्णाति तदिदमुक्तम्। प्रत्युतेति ॥ १७४ ॥

अनानये प्रियालापे वार्त्ते वार्त्ता च कीर्त्यते। वर्णनासु अपि इत्यादिपदविवरणं दृश्यते कान्तमित्यभिसम्बन्धः। लौकिकार्थानुयायि यत् जगति लोके कान्तमुच्यते तथाभूतम् अतिक्रम्य यत्कवीनां प्रस्थानं प्रवर्त्तते तदपि गौड़ानां मनसो मुदे प्रोक्तं शब्दाड़म्बरात्मकगौड़रीतिप्रियाणां विदग्धकामानां ज्ञापकं सद् गुणीभवतीति

सम्भावयति यान्येव पावनैः पादपांशुभिः ॥

अथ वर्णनायां यथा,

अनयोरनवद्याङ्गि स्तनयोर्जृम्भमाणयोः ।
अवकाशो न पर्य्याप्तस्तवबाहुलतान्तरे ॥ १७५ ॥
परुषं निष्ठुरार्थं तु यदतीव विगर्हितम् ।
विरुद्धलक्षणाद्यासु तदुक्तिषु न दुष्यति ॥

यथा, हालाहलं विषं भुंक्ष्व सखि मा तत्र विश्वसीः ।
यद्वा न दह्यसे काष्ठैः स्वल्पैस्त्वमपि मे मतिः ।

अत्र पारुष्येऽपि विरुद्धलक्षणया अर्थान्तरस्य लक्षितत्वाद् गुणत्वम् ॥ १७६ ॥

अप्रस्तुतं रसं प्राहुर्विरसं वस्तु सूरयः ।
अप्राधान्ये तदेष्टव्यं शिष्टैः स्याद्रसवस्तुनोः ॥

यथा, क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोंऽशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स दहतु दुरितं शाम्भवो वः शराग्निः ॥

श्लोकार्थः । क्षिप्तः गृहम् । ननु प्रियालापवर्णनयोः एवंविधा एव लोके काव्ये च वचनसन्दर्भा इति नास्ति अतिमात्रतानतिमात्रतयोर्भेद इति पृच्छति । अथेति ॥ १७५ ॥

सुगममन्यत् । परुषमिति । विरुद्धलक्षणा लौकिकी तस्याहि झटिति अभिधानाविनाभावात् अपरुषार्थप्रतीतेः अभिधानतः पारुष्यं न दोषो लक्षणापरिग्रहेण च गुणत्वम् । तदाहुः । अभिधेया विनाभावप्रतीतिः लक्षणेति या । सैषा काव्ये दग्धवक्रा जीवितं इत्तिरिष्यते ॥ १७६ ॥

अप्रस्तुतेति । अप्राधान्य इत्युपलक्षणं वाच्यत्वेऽपि इति च बोद्धव्यम् ।

अत्र करुणे शृङ्गारस्य अप्रस्तुतत्वेऽपि शम्भुप्रभाववर्णनाङ्गभूतत्वेन द्वयोरपि अप्राधान्यात् अवैरस्येन गुणत्वम् ॥ १७७ ॥

हीनं यत्रोपमानं स्यादुपमेयं गुणाधिकम्।
हीनोपमं तदस्याहुः कवयः क्वाप्यदुष्टताम् ॥

यथा, ततः कुमुदनाथेन कामिनीगण्डपाण्डुना।
नेत्रानन्देन चन्द्रेण माहेन्द्री दिगलङ्कृता ॥

अत्र उपमानस्य हीनतायामपि रागातिशयहेतुत्वाद् गुणत्वम् ॥ १७८ ॥

यत्रोपमानमुत्कृष्टमुपमेयं निकृष्यते।
ज्ञेयं तदधिकौपम्यमस्यापि क्वाप्यदोषता ॥

यथा, कान्त्या चन्द्रमसं धाम्ना सूर्यं धैर्येण चार्णवम्।
राजन्ननुकरोषि त्वं सौभाग्येनापि मन्मथम् ॥

अस्य अधिकौपम्येऽपि राज्ञो लोकपालांशत्वेन शिष्टैः आदृतत्वाद् गुणत्वम् ॥ १७९ ॥

उपमानेन वैषम्याद्भवेदसदृशोपमम्।
तस्याभ्यनुज्ञामिच्छन्ति व्यतिरेकोपमादिषु ॥

यथा, प्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा।

रसवस्तुनोः परस्परविरोधिरसव्यञ्जकयोः। यद्वा। मिथो विरोधिरसरूपयोः एव वस्तुनोः तदाह। बाध्यानामङ्गभावं वा प्राप्तानामुक्तिवत्सलेति ॥ १७७ ॥

हीनमिति। जातिप्रमाणाभ्याम् अपकृष्टं हीनं चन्द्रापेक्षया कामिनीकपोलस्य अपकर्षे आत्मनस्तुल्यताम् उद्दीपनस्य प्रतिपाद्यमानः प्रकृतशृङ्गारप्रकर्षम् अर्पयिष्यतीति गुणत्वम् ॥ १७८ ॥

एवमधिकौपमेऽपि ॥ १७९ ॥

न परेषु महीजसश्छलादपकुर्वन्ति मलिम्लुचा इव ॥

अस्य असदृशोपमत्वेऽपि व्यतिरेकोपपादकत्वाद् गुणत्वम् ॥ १८० ॥

यस्योपमानं लोकेषु न प्रसिद्धं तदिष्यते ।
अप्रसिद्धोपमं नाम तत् क्वचिन्नैव दुष्यति ॥

यथा,—उद्गर्भहृणरमणी रमणोपमर्द-
भुग्नोन्नतस्तननिवेशनिभं हिमांशोः ।
बिम्बं कठोरविसकाण्डकडारगौरै-
र्विष्णोः पदं प्रथममग्रकरैर्व्यनक्ति ॥

अस्य अप्रसिद्धोपमत्वेन दूषणत्वेऽपि द्वयोरपि शृङ्गारोद्दीपकत्वसाम्याद् गुणत्वम् ॥ १८१ ॥

निरलङ्कारमित्याहुरलङ्कारोज्झितं वचः ।
अर्थौर्जित्येषु तस्यापि क्वचिन्निर्दोषता मता ॥

यथा, याञ्चां दैन्यपराभवप्रणयिनीं नेच्छाकवः शिक्षिताः
सेवासंवलितः कदा रघुकुले मौलौ निबद्धोऽञ्जलिः ।
सर्वं तद्विहितं तथाप्युदधिना नैवोपरोधः कृतः

उपमानेन वैषम्यम् अन्वयेन सादृश्याभावात् । व्यतिरेकोपमादीत्यादिग्रहणाद् व्यतिरेकदृष्टान्तोत्प्रेक्षादिपरिग्रहः ॥ १८० ॥

यस्योपमानमिति । लोकप्रसिद्धमेव कविभिरुपमाने कान्तं भवति तेन यत्र लोके प्रसिद्धं तेन सहोपमावर्णने सम्भवदपि अप्रसिद्धोपमत्वं रसानुप्रवेशेन गुणीभवति । उद्गर्भत्वेन स्तनाग्रस्वामिका तया लाञ्छनानुकरणम् अभिलषितम् ॥१८१॥

निरलङ्कारमिति । दैन्यपराभवप्रणयिनीमित्याद्युत्कृष्टपुष्टिविशेषणयोगादस्ति शब्देऽस्पष्टे वक्रतार्थे तु नास्ति वक्रत्वं वा अलङ्कार इति । यद्यपि वाक्यार्थो निरलङ्कार इव भासते तथापि विशेषतः अलङ्कारानध्यवसायेऽपि सामान्येन

पाणिः सम्प्रति मे हठात् किमपरं स्प्रष्टुं धनुर्वाञ्छति ॥

अत्र निरलङ्कारत्वेऽपि अर्थोर्जित्याद् गुणत्वम् ॥ १८२ ॥

असभ्यार्थं यदश्लीलं तदर्थान्तरवाचि वा।
तस्येह दृश्यते भूम्ना प्रयोगो नाभिदुष्यति ॥

यथा,—अद्यापि तत्कनककुण्डलघृष्टगण्ड-
मास्यं स्मरामि विपरीतरताभियोगे।
आन्दोलनश्रमजलस्फुटघर्मबिन्दु-
मुक्ताफलप्रकरविच्छुरितं प्रियायाः ॥

अत्राश्लीलार्थेऽपि कविभिरविगीतत्वाद् गुणत्वम् ॥१८३॥

देशोऽद्रिवनराष्ट्रादिः कालो रात्रिन्दिवर्त्तवः।
नृत्यगीतप्रभृतयः कलाः कामार्थसंश्रयाः ॥
चराचराणां भूतानां प्रवृत्तिर्लोकसंज्ञिता।
हेतुविद्यात्मको न्यायः संस्मृतिः श्रुतिरागमः ॥
तेषु तेष्वयथारूढं यदि किञ्चित् प्रवर्त्तते।
कवेः प्रमादाद्देशादिविरोधीत्येतदुच्यते ॥

वक्रता प्रकाशत एव। न हि लौकिकशास्त्रीयवचनार्थवैपरीत्यमिह प्रतीयते। तदिदमुक्तमर्थोर्जित्यादिति ॥ १८२ ॥

अस्ति हि वयं याचामह इति उक्ते याञ्चा च भिक्षाकरी नालक्षिता इत्युक्तौ नायकप्रकर्षाभिव्यञ्जकौ विशेष इत्याह। असभ्यार्थमिति। क्वचित् प्राथमिक एव पदार्थसंसर्गोऽश्लीलः क्वचित्तु न तस्मिंस्तथाभूतेऽपि संसर्गान्तरमिति यदश्लीलम् अर्थान्तरवाचि वेत्युक्तम्। कविभिरविगीतत्वादिति। अविपरीताद्विपरीतं रतमुत्कृष्यत इति शास्त्रकारैः आम्नातात् तस्य शृङ्गारोद्दीपनतया कविभिः आदृतत्वात् इत्यर्थः ॥ १८३ ॥

देशोऽद्रीति। आदिपदेन द्वीपादिपरिग्रहः। कामार्थसंश्रयाः। अर्थ-

विरोधः सकलोऽप्येष कदाचित् कविकौशलात् ।
उत्क्रम्य दोषगणनां गुणवीथीं विगाहते ॥

तत्र देशविरुद्धस्य गुणीभावो यथा,

तस्य राज्ञः प्रभावेण तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रवालानामास्पदं सुरशाखिनाम् ॥

अत्र देशविरुद्धत्वेऽपि तस्य राज्ञः प्रभावेणेति कारणोपन्यासाद् गुणत्वम् ॥ १८४ ॥

कालविरुद्धस्य यथा,

राज्ञां विनाशपिशुनश्चचार खरमारुतः ।
चुम्बन् कदम्बकुसुमैः सह सप्तच्छदोद्गमान् ॥

अत्र कालविरुद्धत्वेऽपि राज्ञां विनाशपिशुन इत्यनिष्टसूचकोत्पातरूपत्वाद् गुणत्वम् ॥ १८५ ॥

लोकविरुद्धस्य यथा,

ऐन्दवादर्चिषः कामी शिशिरं हव्यवाहनम् ।
अबलाविरहक्लेशविह्वलो गणयत्यलम् ॥

अत्र लोकविरुद्धत्वेऽपि कामिभिः तथा संवेद्यमानत्वाद् गुणत्वम् ॥ १८६ ॥

युक्तिविरुद्धस्य यथा,

स सङ्कोचश्चन्द्रादिव कुमुदराशेरशरणः
स सूर्यात् कोकानां विरह इव लुप्तप्रतिविधिः ।
गुणेऽभ्यस्ते खेदप्रशमनकरेभ्योऽपि यदयं

संश्रयाः । प्रवृत्तयोऽवस्थाविशेषाः । हेतुविद्या आन्वीक्षिकी । अयथारूढं तथाच अप्रसिद्धम् ॥ १८४ ॥

खलानामुद्वेगस्तदिदममृतादेव मरणम् ॥

अत्र युक्तिविरुद्धत्वेऽपि छेकोक्त्या सम्भाव्यमानोपमया तथा प्रतीतेर्गुणत्वम् ॥ १८६ ॥

औचित्यविरुद्धस्य यथा,

तेनाथ नाथ दुरुदाहरणातपेन
सौम्यापि नाम परुषत्वमभिप्रपन्ना।
जज्वाल तीक्ष्णविशदाः सहसोद्गिरन्ती
वागर्चिषस्तपनकान्तशिलेव सीता ॥

अत्र स्त्रीत्वादौचित्यविरोधेऽपि तत्समयोचितत्वाद् गुणत्वम् ॥ १८७ ॥

वचनविरोधो यथा,

परदाराभिलाषो मे कथमार्य्यस्य युज्यते।
पिबामि तरलं तस्याः कदा नु रदनच्छदम् ॥

अत्र वचनविरोधेऽपि वक्तुस्तथाविधावस्थत्वाद् गुणत्वम् ॥ १८८ ॥

धर्मविरोधस्य यथा,

पञ्चानां पाण्डुपुत्राणां पत्नी पाञ्चालकन्यका।
सतीनामग्रणीस्त्वासीद्दैवो हि विधिरीदृशः ॥

अत्र धर्मविरोधेऽपि दैवो विधिः इत्यनेनाभिहितत्वात् अदोषः ॥ १८९ ॥

कालविरुद्धस्येति। उपघात उत्पातः ॥ १८५ ॥ १८६ ॥

स सङ्कोच इति। यदि चन्द्रादिभ्यः कुमुदसङ्कोचादयो भवेयुः तदा भवद्गुणेभ्यः खलानामुद्वेग उपमीयते न तु तथा सम्भवति तेन अयमलौकिकत्वादायमर्पयतीति वाक्यार्थपरिपोषात् तथा उपन्यासो गुण एवेति ॥ १८७ ॥ १८८ ॥

वचनविरोधस्येति। अष्टमी कामावस्था ॥ १८९ ॥

धर्मशास्त्रविरुद्धस्य यथा,

नीतिरापदि यद्गम्यः परस्त्रीमानिनो क्रिये ।
विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥

अत्रापन्नः शत्रुरभियातव्य इति नीतिः तच्च मानिनो क्रिये भवति इति विरुद्धमपि उद्धतपुरुषभाषितत्वात् न दुष्यतीति गुणत्वम् ॥ १९० ॥

कामशास्त्रविरुद्धस्य यथा,

दोलातिप्रेरणत्रस्तवधूजनमुखोद्गतम् ।
कामिनां लयवैषम्याद् गेयं रागमवर्द्धयत् ॥

अत्र त्रासतो लयवैषम्येण गेयस्य रागहेतुत्वेऽपि कामिनीमुखोद्गीर्णत्वाद्रागविवर्द्धनत्वेन गुणत्वम् ॥ १९१ ॥

इत्थं गुणाश्च दोषाश्च काव्ये दोषगुणाश्च ये ।
आख्यातास्ते स्फुटं सम्यत्यलङ्कारान् प्रचक्ष्महे ॥ १९२ ॥

युवतेरिव रूपमङ्ग काव्यं स्वदते शुद्धगुणं तदप्यतीव ।
विहितप्रणयं निरन्तराभिः सदलङ्कारविकल्पकल्पनाभिः १९३

देवी ह्रीति । सिद्धादिशाच्च सतीत्वं पञ्चालकन्यकायाः । तिरस्कृतमिति अत्र एव वा पञ्चधा विवक्षित इत्यागमः ॥ १९० ॥

उद्धतपुरुषभाषितत्वादिति । पूर्वपक्षतया सिद्धान्तीपीडातत्वादित्यर्थः ॥१९१॥

लयवैषम्यादिति । गीतस्य कलाप्रकथनात् तस्य च विषमलयस्यारञ्जकत्वात् कथं रागवर्द्धनमिति दूषणं दोलागतागतत्रस्तकामिनीगीतप्रभावोक्तेः चमत्कारकारित्वात् तिरोधीयत इति गुणभावं च नीयते भावान्तरालवर्त्ती कामो लयः ॥ १९२ ॥

ननु गुणैरेव शब्दार्थयोः सनाथीकरणे किमलङ्कारविवेचनप्रयासेन इत्यत

यदि भवति वचश्चुतं गुणेभ्यो
वपुरिव यौवनबन्धमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं
नियतमलङ्करणानि संश्रयन्ते ॥ १९४ ॥

दीर्घापाङ्गं नयनयुगलं भूषयत्यञ्जनश्री-
स्तुङ्गाभोगौ प्रभवति कुचावर्चितुं हारयष्टिः।
मध्ये क्षामे वपुषि लभते स्थानं कूर्पासलक्ष्मीः
श्रोणीबिम्बे गुरुणि रशनादाम शोभां बिभर्त्ति ॥१९५॥

इति महाराजभोजदेवविरचिते सरस्वतीकण्ठाभरणालङ्कारे
गुणविवेचनं नाम प्रथमः परिच्छेदः।

आह। युवतेरिति। अङ्गेत्याक्षेपसम्बोधने। अलङ्कारसाहित्यबुद्धिसङ्गतिः प्रणयः। विकल्पो विशेषसर्हि किमुत्तरसिद्धौ पूर्वेणेति न्यायेन त्यज्यन्तां गुणा इत्यत आह ॥ १९४ ॥

यदि भवतीति। विवृतमेतत् ॥ १९५ ॥

ते च अलङ्कारा यथास्थानं निवेश्यमाना एव सहृदयरञ्जनक्षमा इति कवीन् शिक्षयति। दीर्घेति। तेन शब्दादिविषयविभागेन अलङ्कारविवेचनं सप्रयोजनमेव इति तात्पर्यार्थः। शेषमतिरोहितम् ॥ १९६ ॥

इति दोषगुणविवेचनो नाम प्रथमः परिच्छेदः।

द्वितीयः परिच्छेदः ।

शब्दार्थोभयसंज्ञाभिरलङ्कारान् कवीश्वराः ।
बाह्यानाभ्यन्तरान् बाह्याभ्यन्तराश्चानुशासति ॥ १ ॥
ये व्युत्पत्त्यादिना शब्दमलङ्कर्त्तुमिह क्षमाः ।
शब्दालङ्कारसंज्ञास्ते ज्ञेया जात्यादयो बुधैः ॥ २ ॥
जातिर्गतौ रीतिवृत्तिच्छायामुद्रोक्तियुक्तयः ।
भणितिर्गुम्फना शय्या पठितिर्यमकानि च ॥ ३ ॥
श्लेषानुप्रासचित्राणि वाक्कोवाक्यं प्रहेलिका ।
गूढप्रश्नोत्तराध्येयश्रव्यप्रेक्ष्याभिनीतयः ॥ ४ ॥

एवं दोषगुणेषु निर्णीतेषु अलङ्काराः प्राप्तावसराः तत्र अलङ्कारसामान्यलक्षणमाद्यपरिच्छेदे तद्विभागं दर्शयन् परिच्छेदत्रयं सङ्गमयति । शब्दार्थोभयसंज्ञाभिरिति । इत्यभूतलक्षणे तृतीया मध्यमपदलोपी समासः । तेन शब्दालङ्कारार्थालङ्कारोभयालङ्कारसंज्ञाभिरित्यर्थः । गुणप्रस्तावे बाह्यत्वादिकं विवृतं शब्दोऽवच्छेदकतया प्रथमप्रतिसन्धेयभावेन च शरीरस्थानीयो बाह्यस्ततः तदाश्रया अलङ्कारा अपि बाह्याः । अर्थो विच्छेद्यतया पश्चात् अनुसन्धेयतया च आत्मतुल्य आभ्यन्तरः तेन तदाश्रया अलङ्कारा अपि आभ्यन्तराः । एतेन बाह्याभ्यन्तरा व्याख्याताः । आश्रयाश्रयिभावश्च यथा तथोक्तमेव । उभयालङ्कारेषु योगस्य प्रायिकत्वम् आश्रित्य कवीश्वराणाम् अनुशासनमुक्तमेतत् विवेचयिष्यते चतुर्थारम्भे ॥ १ ॥

शब्दालङ्कारसामान्यलक्षणमाह । ये व्युत्पत्तीति । विशिष्टा उत्पत्तिर्व्युत्पत्तिर्लोपागमविकारादिप्रपञ्चः । अतएव हि संस्कृतादिजातयो व्यवतिष्ठन्ते । आदिग्रहणात् गुरुलघुसन्निवेशात् अयोगत्याद्यवच्छेदाः त्रयोविंशतिरूपाताः । बाह्यकङ्कणादिसाम्यादियं संज्ञा प्रवृत्तेत्याह । शब्दालङ्कारसंज्ञा इति ॥ २ ॥

जातिरित्यादि । ते च प्रतिविशेषं वक्ष्यन्ते ॥ ३ ॥ ४ ॥

चतुर्विंशतिरित्युक्ताः शब्दालङ्कारजातयः।
अथासां लक्षणं सम्यक् सोदाहरणमुच्यते ॥ ५ ॥
तत्र संस्कृतमित्यादिर्भारती जातिरिष्यते।
सा त्वौचित्यादिभिर्वाचामलङ्कारत्वाय जायते ॥ ६ ॥
संस्कृतेनैव केऽप्याहुः प्राकृतेनैव केचन।
माधारण्यादिभिः केचित् केचन म्लेच्छभाषया ॥ ७ ॥
न म्लेच्छितव्यं यज्ञादौ स्त्रीषु नाप्राकृतं वदेत्।
सङ्कीर्णे नाभिजातेषु नाप्रबुद्धेषु संस्कृतम् ॥ ८ ॥
देवाद्याः संस्कृतं प्राहुः प्राकृतं किन्नरादयः।
पैशाचाद्यं पिशाचाद्या मागधं हीनजातयः ॥ ९ ॥
संस्कृतेनैव कोऽप्यर्थः प्राकृतेनैव चापरः।
शक्यो रचयितुं कश्चिदपभ्रंशेन जायते ॥ १० ॥

शब्दालङ्कारजातयः। शब्दालङ्कारसामान्यानि ॥ ५ ॥

स्वरूपस्थितौ रूपान्तरगवेषणम् अनुचितमती जातेः प्राधान्यात् प्रथमं लक्षणम् इत्याह। तत्रेति। संस्कृतमिति भावप्रधानो निर्देशः। भारतीग्रहणं स्पष्टार्थम्। ननु अवश्यं शब्देन संस्कृताद्यन्यतमेन भवितव्यं तत्कोऽत्र कवेः शक्तिव्युत्पत्त्योरंशो येन अलङ्कारता स्यादित्यत आह। सेति। औचित्याकृष्ट एव अलङ्कारोऽस्ति च संस्कृतादेरपि तथाभाव इति भावः ॥ ६ ॥

यद्यपि अर्थौचिती पूर्वं दर्शयितुमुचिता तथापि प्राधान्यमावेदयितुं पृथक्कौचितीमाह। संस्कृतेन एवेति ॥ ७ ॥

विषयौचितीमाह। न म्लेच्छितव्यमित्यादि। म्लेच्छनमपशब्दः प्राकृतं संस्कृतभवम्। अभिजातः शुद्धान्वयः ॥ ८ ॥

अथ के संस्कृताद्युचितवक्तार इत्यत आह। देवाद्या इति। आदिग्रहणेन ऋषिभूमिपतिप्रभृतयः ॥ ९ ॥

वाचौचितीं दर्शयति। संस्कृतेन एव इति। यथाहि। देवतास्तुत्यादौ संस्कृतं प्रगल्भते न तथा प्राकृतादि। यथा च सूक्ष्मवस्तुस्वरूपोद्भवने प्राकृतस्य सौष्ठवं न तथा संस्कृतादेरित्यादि ॥ १० ॥

पैशाच्या शौरसैन्याऽन्यो मागध्याऽन्यो निबध्यते।
द्वित्राभिः कोऽपि भाषाभिः सर्वाभिरपि कश्चन ॥ ११ ॥
नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया।
कथां गोष्ठीषु कथयंल्लोके बहुमतो भवेत् ॥ १२ ॥
शृण्वन्ति लटभं लाटाः प्राकृतं संस्कृतं द्विषः।
अपभ्रंशेन तुष्यन्ति स्वेन नान्येन गुर्जराः ॥ १३ ॥
ब्रह्मन् विज्ञापयामि त्वां स्वाधिकारजिहासया।
गौड़स्त्यजतु वा गाथामन्या वास्तु सरस्वती ॥ १४ ॥
कोऽभूवन्नाढ्यराजस्य राज्ये प्राकृतभाषिणः।
काले श्रीसाहसाङ्कस्य के न संस्कृतवादिनः ॥ १५ ॥
गिरः श्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः
सुभव्योऽपभ्रंशः सरसरचनं भूतवचनम्।

द्वित्राभिः कोऽपि काव्यसमस्याभेदस्यार्थः। सर्वाभिः कश्चन प्रकरणादेरर्थः ॥ ११ ॥

विषयौचित्यमेव क्वचिद्विशेषे कान्तिप्रकर्षम् अर्पयतीत्याह। नात्यन्तमिति। समानबुद्धिशीलवयसां विनोदार्थमासनबन्धो गोष्ठी ॥ १२ ॥

देशौचितीमाह। शृण्वन्तीति। लटभं मनोज्ञम्। स्वेन गुर्जरजातीयेन ॥ १३ ॥

ब्रह्मन्नित्यादिना निन्दार्थानुवादेन गौड़ेषु प्राकृतानौचित्यं राजशेखरेण व्यञ्जितम् ॥ १४ ॥

समयौचितीं दर्शयति। कोऽभूवन्निति। आढ्यराजः शालिवाहनः साहसाङ्को विक्रमादित्यः। ग्रन्थकृत्पूर्वजतया श्रीपदम् ॥ १५ ॥

ता इमाः परस्परसङ्कीर्णाः षडेव संस्कृतादिभाषा भवन्तीति सामान्यविभागम् एतद् विरचनप्रयोजनञ्च उपसंहरति। गिर इति। दिव्याः संस्कृता भूतवचनं पैशाचम्। मथुरावासिभणितिः शौरसेनी। तेषामिति। तच्च भूतवचनं स च अपभ्रंशस्ताश्च दिव्याद्या इति नपुंसकमनपुंसकेन इत्येकशेषः पाचिकं

विदग्धानामिष्टे मगधमथुरावासिभणिति-
र्निबद्धा यस्तेषां स इह कविराजो विजयते ॥ १६ ॥
शुद्धा साधारणी मिश्रा संकीर्णा नान्यगामिनी।
अपभ्रष्टेति साचार्य्यैर्जातिः षोढा निगद्यते ॥ १७ ॥

तासु उत्तमपात्रप्रयोज्या संस्कृतजातिः शुद्धा यथा,—

उन्नमितैकभ्रूलतमाननमस्याः पदानि रचयन्त्याः।
कण्टकितेन प्रथयति मय्यनुरागं कपोलेन ॥ १८ ॥

मध्यमपात्रप्रयोज्या प्राकृतजातिः शुद्धा यथा,

बहुवचनम्। प्रतिभार्थप्राणना जीवद्वर्णना निपुणो हि कविः स एव हि सर्व-पद्यीनताद्गुक्तिसिद्धिसम्पन्नः कविराजः अतएव विजयते सकललोकशास्त्रवचन-निर्माणेभ्यः प्रकर्षेण वर्त्तते इति ॥ १६ ॥

संस्कृतादिषु यथायोगं शुद्धादिभेदेन जातिः षोढा भिद्यत इत्याह। शुद्धा साधारणीति। इह भाषारूपविषयभेदेन भिन्नाः संस्कारा यानधिकृत्य पाणिनिवररुचिप्रभृतीनाम् अनुशासनानि व्यवतिष्ठन्ते। तद्यत्रैक एव संस्कारः प्रत्यभिज्ञायते सा शुद्धा। संस्कारान्तराग्रहणात्। यत्र तु लक्षणसम्भेदेन नानासंस्कारसम्पातः क्षीरनीरवत्सासाधारणी। रूपसाधारण्यां नरसिंहवद्-भाषाभेदव्यवस्थितभागद्वयात्मिका मिश्रा। रूपमिश्रणात्। तिलतण्डुलन्यायेन सङ्कीर्णा विजातीयवस्त्वन्तरव्यतिरेक एव लोके सङ्कीर्णव्यवहारात्। या पुनः प्रकृतिभावेनापि भाषान्तरसम्पर्कं न सहते सा अनन्यगामिनी। संस्कार-सम्भेदेन वा प्रकृतिभावेन वा नान्यं गच्छति यतोऽपशब्दरूपा अपभ्रष्टा ॥ १७ ॥

तासु उत्तमेति। पात्रलक्षणमुत्तमादिभेदश्च पञ्चमे वक्ष्यते। उन्नमितैकेति। पदानि प्रकृतानङ्गलेखोचितानि निर्व्याजप्रेमगर्भाणि। अतएव आवापीडापप्रति-सन्धाननिमग्नमानसायाः चिन्तानुभावरूपं भ्रूलताविरेचितमिवासीत्। हसतल-निहितैककपोलायाः तादृक्पुलकितैककपोलदर्शनात् अतिमानात्मा शृङ्गारःसुप्र-बुद्ध इव तत्कालं नायकस्यापि इति मिथोऽनुबन्धलक्षणा अपूर्वानुरागकक्षाम् अधि-रूढा रतिः एव काव्यसर्वस्वायते। अत्र च कस्यचित् पदस्य भाषान्तरसाधारण्येऽपि भूयसामुदाहरणमनेवम् अन्यत्रापि ॥ १८ ॥

तं सि मए चूअङ्कुर दिन्नो कामस्स गहिदधणुअस्स।
जुवइमणमोहणसहो पञ्चब्भहिओ सरो होहि ॥२२॥ (ण)

नातिहीनपात्रप्रयोज्योऽपभ्रंशः शुद्धो यथा,

लइ वप्पुल पिअ दुद्धं कुदो अम्हाणं हुञ्छासि।
पुत्तहमत्थे हत्थो जइ दहि जम्मेवि जादं आसि ॥ (त)

प्रायिकञ्चैतत् तेन कवेरभिप्रायशक्त्यादिभ्यः सर्वा अपि सर्वप्रयोज्या भवन्ति ॥ २३ ॥

(ण) त्वमसि मया चूताङ्कुर। दत्तः कामस्य गृहीतधनुषः।
युवतिमनोमोहनसहः पञ्चाभ्यधिकः शरो भव ॥
(त) गृहाणानुकम्प्य पिब दुग्धं कुतोऽस्माकं तक्रम्।
पुत्रकमस्तके हस्तो यदि दधि जन्मन्यपि जातमासीत् ॥

कामस्य कामायेत्यर्थः। चतुर्थ्याः सम्बन्धसामान्यविवक्षायां षष्ठीति सूत्रात् षष्ठी ॥ २२ ॥

नातिहीनेति। हीनात् किञ्चित् उत्कृष्टं मध्यमादपकृष्टं नातिहीनम्। लइ वप्पुलेति। अपथः पुत्रस्य मस्तकेनाहं अपे यदि तक्रस्य व्यापकं दधि जन्मन्यपि जातमासीदिति व्यापकानुपलब्धिः प्रयुक्ता। ननु प्राकृतादिषु उत्तमादिपात्रव्यक्तिकरदर्शनात् कथमेषा व्यवस्था घटत इत्यत आह। प्रायिकमिति। यत्र प्रकृतनिर्वहणोचितविशेषाभिसन्धानेन कविरन्यथा प्रवर्त्तते। यथा मालत्यां संस्कृतमाश्रित्य। एषोऽस्मि भोः कार्य्यवशात् प्रयोगवशाच्च प्राकृतभाषी संवृत्त इत्यादि, यत्र वा कवेर्व्युत्पत्तिकृतो भाषाविपर्य्यासः शक्त्या तिरस्क्रियते यथा मृच्छकटिके विटस्य मध्यमपात्रस्य अपि संस्कृतोक्तिः। यत्र वा प्रबन्धौचिती परवशाः संस्कृतादिजातयो विपर्य्यस्यन्ते। यथा च सर्गबन्धादौ मध्यमादेरपि संस्कृतमेव खण्डकथापरकथादौ उत्तमादेरपि प्राकृतमेव, बृहत्कथादौ पैशाचमेव, वस्तुबन्धादौ अपभ्रंश एवेति। तत्र सन्धिसन्ध्यङ्गघटनासौष्ठवेन रसः युज्यतीति भरतमुनिप्रभृतीनामतिप्रकाश एव पन्थाः ॥ २३ ॥

तां इमाः शुद्धाः षड़ेव, साधारण्यादयः पुनरनन्ताः। ताश्च मध्यमपात्रभूमिकास्थोत्तमपात्रप्रयोज्या संस्कृतप्राकृतयोः साधारणी यथा,—

सरले ! साहसरागं परिहर रम्भोरु ! मुञ्च संरम्भम्।
विरसं विरहायासं सोढुं तव चित्तमसहं मे ॥ २४ ॥

नात्युत्तमभूमिकास्थोत्तमपात्रप्रयोज्या संस्कृतपैशाचयोः साधारणी यथा,—

चम्पककलिकाकोमलकान्तिकलापाथ दीपितानङ्गा।
इच्छति गजपतिगमना चपलायतलोचना लपितुम् ॥

एवं संस्कृतापभ्रंशादिसाधारण्यः प्राकृतादिभाषान्तरसाधारण्यश्च द्रष्टव्याः ॥ २५ ॥

वक्तृविषयौचित्यादिप्रयोज्या मिश्रा यथा,—

साधारण्येति। संस्कृतस्य प्राकृतादिसाधारण्ये पञ्चप्रकाराः प्राकृतस्य शौरसेन्यादिसाधारण्ये चत्वारः शौरसेन्याः पैशाच्यादिसाधारण्ये त्रयः पैशाच्या मागध्यादिसाधारण्ये द्वौ। मागध्या अपभ्रंशसाधारण्ये एक इति। द्विविकल्पे पञ्चदशप्रभेदास्त्रिविकल्पे विंशतिश्चतुर्विकल्पे पञ्चदश पञ्चविकल्पे षट् षड्विकल्पे एक इति सर्वमिलने सप्तपञ्चाशत्प्रकारा साधारणी। एवं मिश्रादौ अपि लोष्टप्रस्तावक्रमेण बहवो भेदा इति तावदुदाहरणे ग्रन्थगौरवं स्यादिति दिङ्मात्रमुदाहरति। ताश्चेति। संभिन्नसंस्कारा भाषाप्रयोगे हि प्रयोक्तृप्रकृतिसम्भेदे भवति। न च प्रकृतिसम्भेदस्तात्त्विकः स्वभावसङ्करप्रसङ्गादत उक्तं मध्यमपात्रभूमिकास्थेति। भूमिका वर्णिका। मध्यमपात्रप्रकृत्युचितो रागाद्यभिनयः तत्र तिष्ठति तत्परिग्रहेण चित्रतुरगवत् सामाजिकानां सम्यङ्मिथ्यासंशयसादृश्यप्रतीतिविलक्षणप्रतिपत्तिपदवीम् अवतरतीति मध्यमपात्रभूमिकास्थम् उपलक्षणञ्च इदमुत्तमभूमिकास्थमध्यमप्रयोज्यापि इयमेव एवमुत्तरत्र ॥ २४ ॥

तव विरहायासं सोढुं मम चित्तमसहमिति योजना ॥ २५ ॥

जयति जनताभिवाञ्छितफलप्रदः कल्पपादपो गिरिशः।
जअइ अ तमल्लिअन्ती गिरितणया पणअकप्पलआ॥ (घ)

एवं भाषान्तराणामपि मिश्रीभावो द्रष्टव्यः॥ २६॥

दुर्विदग्धादिपात्रप्रयोज्या संकीर्णा यथा,

अकट गुमटी चन्द्रज्योत्स्ना कलं किल कोइलो
लवइ अ मुहुर्याम्यो वायुर्निवारअ वाइ अ।
अवि सखि अला रक्ताशोकस्तवापि मनो मुदे
न कज न कजं मानेनाद्य प्रियं प्रति जाहुदा। (ङ)

(घ) जयति तमालीयमाना गिरितनया प्रणयकल्पलता।

(ङ) "अकट आश्चर्यं, गुमटी मनोज्ञा" 'कोइलो लवइ' कोकिलो लपति; वाइ अ=वाति च, "निवारय वारकशून्यः, अला आगतः; जाहुदा आमः" कजं कार्यम्।

वक्तृविषयेति। यदा उत्तमादिषु नानावक्तृभिरेका काव्यसमस्या क्रियते। भिन्नभाषोचितवर्णनीयविषयं वा काव्यमेकम् उपक्रम्यते। यदा वा शक्तिनिरूपणाय कवेरेव नानाभाषामयं काव्यमारब्धं स्यात् तदा कथं न अलङ्कारपदवीमध्यास्ते अत आह। मिश्रेति॥ २६॥

दुर्विदग्धादीति। नागरकभावमवाप्तस्तद्भूमिकामवलम्बमानो दुर्विदग्धः। आदिपदात् पूर्वोक्ताः समस्यादयः। अकटमाश्चर्यम्। गुमटी मनोज्ञा। आस्फालितखड्गस्येव स्फुरणे लवइ इति महाराष्ट्रदेशी। तथाच प्रयोगः। लवइ अविज्जूमणोहरीत्याराध्याः। अन्ये तु लपतीत्यर्थमाहुरेवं च कलशब्दः पुष्यतीति। याम्यो दक्षिणो निवारअ निर्वेचको वारकशून्यो वा अला आगतः। यदिह मानो न क्रियेत ज्योत्स्नादयो मनो मुदमेवाधास्यन्तीति प्रतीचना। यदा तु मनोमुद इतिपाठेऽपिशब्देन नायकसाधारणमुत्कण्ठाकारित्वमुक्तं

सेयं संस्कृतमहाराष्ट्रापभ्रंशयोगस्तिलतण्डुलवत् संकीर्णा जातिः। एवं प्राकृतापभ्रंशसङ्करोऽपि द्रष्टव्यः॥ २७॥

क्रीड़ागोष्ठीविनोदाद्यर्थाऽनन्यगामिनी असाधारणी यथा,

भीष्मप्रोक्तानि वाक्यानि विदुरक्रीडेषु शेरते।
गोसे तिरिञ्छिरिञ्छोली तल्ल तूहे विवल्लिदा॥ (ध)

अत्र पूर्वार्द्धपदानि संस्कृत एव, उत्तरार्द्धपदानि प्राकृत एव। सेयम् असाधारणी अनन्यगामिनी च जातिः उच्यते। भाषान्तराणां पुनः असाधारण्यं नास्ति॥ २८॥

(ध) "गोसे=प्रभाते, तिरिञ्छिरिञ्छोली=कमलरजः पङ्क्तिः, तल्ल=अल्पसरः, तूहे=(तोये), विवल्लिदा=प्रसारिता"

चन्द्रज्योत्स्नादीनामिति। अतो न कज नकजं नार्थो नार्थ ईर्ष्यारोषलक्षणेन प्रतिकूलभावावलम्बिना मानेन तस्मात् प्रियमेव प्रति जाह्नदा यामः। यदामनन्ति स्वयं वा तत्र गमनमिति॥ २७॥

क्रीडेति। काव्यसमस्याक्रीड़ा उक्तपूर्वा गोष्ठी तत्र विनोदो मनोऽनुकूलेन समयातिवाहनम्। आदिपदं पूर्ववत्। ननु माभूत् प्रकृतिभावेन भाषान्तरसम्भेदः संस्कारसम्पातेन तु भविष्यति तथाच कथं साधारणीती भिद्यत इत्यत आह। असाधारणी चेति। नात्र पूर्वोत्तरार्द्धयोः ऐकमत्यमुदाहरणत्वात्। आराध्यास्तु यथा सरसीरे कमलरजः पङ्क्तिः प्रसृता शोभते तथा विदुरक्रीडेषु भीष्मवाक्यानीति उपमाकल्पनया कथञ्चित् एकवाक्यतामाहुः। अत्र पूर्वार्द्धपदानीति। प्राकृत एवेति। महाराष्ट्रदेशीयत्वात् देशीपदानाञ्च स्थानिभावासम्भवात्। भाषान्तराणां पुनरिति। सिद्धिर्महाराष्ट्रीतः, सिद्धिः शौरसेनीतः इत्युपक्रम्यानुशासनात् तद्भवरूपतैव स्फुटा। तत्समानान्तु साधारण्यमेव इति॥ २८॥

अपभ्रष्टा यथा,

मुद्धे ! गहणअ गेण्हउ तं धरि मुद्दं णिएँ हत्थे।
णिच्छउ सुन्दरि ! तुह उवरि मम सुरअप्पहा अत्थि॥ (न)

सेयमपशब्दप्रयोगतोऽपभ्रष्टापि अविदद्भिः श्रोत्रियादैः प्रयुज्यते इति अपभ्रष्टा जातिः॥ अस्या अपि च अनुकरणे साधुत्वमिष्यते॥ २९॥

पद्यं गद्यञ्च मिश्रञ्च वाक्यं यत् सा गतिः स्मृता।
औचित्यादिभिः सापि वागलङ्कार इष्यते॥ ३०॥

(न) मुग्धे ! ग्रहणकं (रत्नमूल्यम्) गृहाण त्वं धारय मुद्रां निजे हस्ते।
निश्चयः सुन्दरि ! तवोपरि मम सुरतस्पृहाऽस्ति॥

मुग्धे इत्यत्र तव उपरि सुरतस्पृहा अस्ति इत्यादिकमपशब्दबहुलत्वेन अपभ्रष्टा स्पष्टैव। सा तु कथमलङ्कार इत्यत आह। सेयमिति। श्रोत्रियश्छान्दस आद्यपदेन बालादयः सर्व एव हि लौकिकः पदार्थोऽभिनयकथामधिरूढः परित्यज्य ग्राम्यमभिमुखीभूतो विभावादिषु कथं न अलङ्कारस्तदिदमुक्तं प्रयोगत इति। न चापशब्दानां दोषत्वमेव इति वाच्यम्। अनुकरणे तु सर्वेषामिति दोषसामान्यावलम्बिना गुणीभावेन अस्य विषयीकृतत्वादिति॥ २९॥

नानावच्छिन्नजातिः काव्यशरीरे निविशिते इति तदवच्छेदरूपां गतिमनन्तरं लक्षयति। पद्यमित्यादि। पठितपदात्पदान्तरसञ्चारी गतिः सा केनचित् औचित्योपनिपातिना सन्दर्भपरिमाणेन नियम्यते। ततः तदपि उपचारेण गतिः। पठितिपरिमाणञ्च काव्यं समाश्रयत इति तदपि गतिस्तच्च पद्यादिभेदेन त्रिविधमिति सक्षेपः। अतएव गद्यबन्धे तु कैश्चिद्वृत्तमाश्रितं वृत्तं वर्त्तनमियत्तेति यावदिति। सर्वनामशब्दा हि कदाचिदुद्देश्यस्य लिङ्गमाश्रयन्ते

कश्चिद् गद्येन पद्येन कश्चिन्मिश्रेण शक्यते ।
कवितुं कश्चन द्वाभ्यां काव्येऽर्थः कश्चन त्रिभिः ॥ ३१ ॥
यादृग् गद्यविधौ बाणः पद्यबन्धेन तादृशः ।
गत्यां गत्यामियं देवी विचित्रा हि सरस्वती ॥ ३२ ॥
यथामति यथाशक्ति यथौचित्यं यथारुचि ।
कवेः पात्रस्य चैतस्याः प्रयोग उपपद्यते ॥ ३३ ॥
द्रुता विलम्बिता मध्या साथ द्रुतविलम्बिता ।

कदाचित् प्रतिनिर्देश्यस्येति काव्ये यत् सा गतिरित्युक्तम् । तत्र पद्यं चतुष्पदीति न लक्षणमुल्लेखमात्रादौ द्विपदपञ्चपदादिशरीरे तदभावात् । अपादः पदसन्तानो गद्यमित्यपि न । अपादत्वं हि अप्रत्यभिज्ञायमानवृत्तभागत्वं विवक्षितचतुष्पदीव्यतिरिक्तत्वं वा । आद्ये वृत्तगन्धिपद्यं न स्यात् । द्वितीये तु अतिप्रसङ्गः । तस्मात् छन्दोनियमवती काव्यमतथाभूता तु गद्यमिति विभागः । गद्यपद्यात्मकं वाक्यं मिश्रम् । तदस्यागतेः अलङ्कारत्वम् उपपादयति । अर्थौचित्यादिभिरिति ॥ ३० ॥

तत्रार्थौचित्यमाह । कश्चित् गद्येनेति । यथा हि अटवीवर्णनादौ गद्यं प्रगल्भते तथा न पद्यं यथा च काव्यप्रस्तावनिर्वहणोचितेऽर्थे पद्यमुत्सहते न तथा गद्यमित्यादि । एवं कथाख्यायिकादौ गद्यमेव चम्पूप्रभृतौ मिश्रमेव इत्यादिपदोपात्तवन्नौचित्यं द्रष्टव्यम् ॥ ३१ ॥

आस्तां तावदर्थौचित्यगवेषणं स्वरूपेण एव पद्यादिकं परिस्फुरत् कविप्रतिभाविशेषावेदनेन सहृदयावर्जकम् अवसीयते । कथमन्यथा क्वचिदेव कस्यचित्सौष्ठवमित्याह । यादृगिति । गत्यां गत्यामिति । पद्ये गद्ये मिश्रे च इत्यर्थः । विचित्रा अव्यवस्थितसिद्धिका ॥ ३२ ॥

प्रयोगव्यवस्थामुपपादयति । यथा मतीति । मतिर्व्युत्पत्तिः युक्तायुक्तविवेक इति यावत् । शक्तिः कवित्वबीजभूतः प्राक्तनः संस्कारः औचित्यं दर्शितमेव । रुचिर्मनोऽनुकूलताप्रतिसन्धानम् । कवेः पात्रस्येति यथायोगम् । तथाहि शक्तिव्युत्पत्ती कवेरेव । औचित्यं पात्रस्यैव रुचिः उभयोरपीति ॥ ३३ ॥

स चायं सन्दर्भावच्छेदो गुरुलघुसन्निवेशेन एव शोभत इति तमाश्रित्य विभाग-

द्रुतमध्या च विज्ञेया तथा मध्यविलम्बिता ॥ ३४ ॥
सा लघूनां गुरूणाञ्च बाहुल्याल्पत्वमिश्रणैः।
पद्ये गद्ये च मिश्रे च षट्प्रकारोपजायते ॥ ३५ ॥
तत्र वृत्तञ्च जातिञ्च पद्यमाहुरथो पृथक्।
समं चार्द्धसमं चैतत् विषमञ्च प्रचक्षते ॥ ३६ ॥
गद्यमुत्कलिकाप्रायं पद्यगन्धीति च द्विधा।
द्विधैव गद्यपद्यादिभेदान्मिश्रमपीष्यते ॥ ३७ ॥
ललितं निष्ठुरं चूर्णमाविद्धञ्चेति योऽपरः।
विशेषः स तु गद्यस्य रीतिवृत्त्योर्भविष्यति ॥ ३८ ॥

माह। द्रुतेति। आद्यास्तिस्रः शुद्धा आसामेव मिथो व्यतिकरेण उत्तरास्तिस्रः सङ्कीर्णाः ॥ ३४ ॥

कथमेषा व्यवस्थेत्यत आह। सा लघूनां गुरूणामिति। बाहुल्यमल्पत्वं मिश्रणञ्च तुल्यवत्प्रतिभानम्। न गद्यादिकमेव गतिः किन्तु तदाधाराः पठितिसञ्चार इति व्यनक्ति। पद्ये गद्ये च मिश्रे चेति ॥ ३५ ॥

वर्णनियतं छन्दो वृत्तम्। मात्रानियतं जातिः। समप्रस्तावं समम्। प्रथमतृतीययोः द्वितीयचतुर्थयोश्च तुल्यप्रस्तावमर्द्धसमम्। विभिन्नचतुष्पादं विषमम् ॥ ३६ ॥

उत्कलिका कल्लोलसत्प्रायम् उच्चावचमिव प्रतिभासमानमित्यर्थः। यथा सलीलकरकमलतालिकातरलवलयावलीकमिति। वृत्तगन्धि प्रतिभातवृत्तैकदेशम्। तदेतदल्पाख्यायाम् उत्पन्नेन समासान्तेन व्यञ्जितं तदयमर्थः सामान्यतः पद्यादिभेदेन गतिस्त्रिधा। तत्रापि जात्यादिभेदेन षट्प्रकारा स्तेऽपि द्रुतादिभेदेन षट्त्रिंशदिति ॥ ३७ ॥

ननु ललितादयो गद्यभेदाः कैश्चिदलङ्कारकारैः परिसंख्याताः ते कस्मान्नोच्यन्त इत्यत आह। ललितमित्यादि। सुकुमारसन्दर्भं ललितम्। यथा कमलिनी वनसञ्चरणव्यतिकरलग्नलिननालकण्टकेव न क्वचिन्निर्भरं पदमादधातीति। प्रस्फुटसन्दर्भं निष्ठुरम्। यथा उत्तम्भितकुटिलकुन्तलकलापः श्मशानवाटमवतरतीति। अनुल्लिखितसमासं चूर्णं यथा। अभ्यासो हि कर्मणोः कौशलमाह-

तत्र पद्यभेदेषु समवृत्तेद्रुता गतिर्यथा,

अयि ! विजहीहि दृढोपगूहनं त्यज नवसङ्गमभीरु ! वल्लभम् ।
अरुणकरोद्गम एष वर्त्तते वरतनु ! सम्प्रवदन्ति कुक्कुटाः ॥

सेयं समवृत्ते लघुसंयुक्ताक्षरभूयस्त्वाद् द्रुता गतिः ॥ ३९ ॥

समवृत्ते विलम्बिता यथा,

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः ॥

सेयं स्थाने स्थाने गुर्वक्षरयोगाद् विलम्बिता गतिः ॥ ४० ॥

तत्रैव मध्या यथा,

आसीद्दैत्यो हयग्रीवः सुहृद्देश्मसु यस्य ताः ।

भाति । न खलु सन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधातीति । उद्भटसमासमाविद्धम् । यथा । कुलिशशिखरखरतरखरप्रचयप्रचण्डचपेटपाटित-मत्तमातङ्गमदच्छटाच्छुरितचारुकेसरभारभासुरमुखे केसरिणि इति । रीति-त्रयीः इति विषयसप्तमी । तथा । ललितं कौशिक्यादौ, निष्ठुरम् आरभट्यादौ, चूर्णं वैदर्भ्यादौ, आविद्धं गौडीयाप्रभृतौ, यथायथम् अन्तर्भवतीति न उक्तभेदाः परिसंख्याता इत्यर्थः ॥ ३८ ॥

उक्तप्रकारेषु किञ्चिदुदाहरति । तत्रेति । नवसङ्गमभीरु इति सम्बो-धनम् । भीरुशब्दादूङ् तस्मात् सम्बोधनस्य रूपम् । गर्भगृहस्थानालोकयति चेत्तदाह । सम्प्रवदन्तीति । अत्र प्रतिपादमष्टौ लघवश्चत्वारो गुरव इति लघुबाहुल्ये संयोगाक्षराणामुद्रेके च तालत्रयवदतिव्यक्त एव द्रुतभावः ॥ ३९ ॥

प्रणम्येति । अत्र यद्यपि पदचतुष्टये गुरुलघूनां समसंख्यत्वमेव तथापि संयोगाक्षरैः अन्तरान्तरापठितिदीर्घाभावोन्मेषात् आरोहप्राधान्ये विलम्बिता । एवं व्युत्क्रमेण समानिकायामपि विलम्बितैव । यथा मीनजालघटितानि सूर्यरश्मिबोधितानि मत्तषट्पदाकुलानि पश्य भीरु ! पङ्कजानि । तदिदमाह । सेयमिति । तेन विभागसूत्रे गुरुलघुनियमम् एवं रूपमपि बोद्धव्यमिति ॥ ४० ॥

वदन्ति स्म बलं बाह्वोः सितच्छत्रस्मिताः श्रियः॥

सेयं नातिलघ्वक्षरत्वात् मध्या गतिः॥ ४१॥

द्रुतविलम्बिता यथा,

अवतु वः सवितुस्तुरगावली स्फुरितमध्यगतारुणनायका।

समभिलङ्घिततुङ्गपयोधरा मरकतैकलतेव नभःश्रियः॥

सेयं द्रुतायाश्च विलम्बितायाश्च गतेरन्तरान्तरानुप्रवेशाद् द्रुतविलम्बिता गतिः॥ ४२॥

द्रुतमध्या यथा,

अपि तुरगसमीपादुत्पतन्तं मयूरम्

न स रुचिरकलापं बाणलक्ष्यीचकार।

सपदि गतमनस्कश्चित्रमाल्यानुकीर्णे

रतिविगलितबन्धे केशपाशे प्रियायाः॥

सेयं द्रुतायाश्च मध्यायाश्च गतेरन्तरानुप्रवेशाद् द्रुतमध्या गतिः॥ ४३॥

मध्यविलम्बिता यथा,

दुन्दुभयो दिवि दध्वनुरुच्चैरुच्चकराः कपयश्च ववल्गुः।

आसीदिति। अत्र यद्यपि गुरवो बहवः तथापि न द्रुतिर्न विलम्बनं पठितैरित्यनुभवसाक्षिकोऽयमर्थः तदेतदाह। नातिलघ्वक्षरेति॥ ४१॥

अवतु व इति। अरुणो गरुडाग्रजः शोणश्च नायको नेता हारमध्यमणिश्च पयोधरा मेघाः स्तनौ च तदेतस्मिन् द्रुतविलम्बिताख्ये वृत्ते समाख्यैव रूपं बोधयतीति॥ ४२॥

अपि तुरगेति। उत्पन्नाविर्भवद्दर्हगतोज्ज्वलविचित्रकोमलमयूरस्तत्कालमव्याजप्रेमनिर्यन्त्रणकण्ठग्रहविलुलितप्रियाकेशपाशवासनाविकाशहेतुः सर्वस्वायमानः कथं बाणलक्ष्यतां सहत इति चित्रप्रत्ययेन व्यज्यत इति। अत्र पादचतुष्कोऽपि प्रथमं द्रुता पश्चात् मध्या च भागशः प्रत्यभिज्ञायते इत्याह। सेयमिति॥४३॥

सिद्धनिकायकराञ्जविमुक्तं माल्यमथाङ्गदमूर्ध्नि पपात ॥
सेयं मध्याया विलम्बितायाश्च गतेः अन्तरानुप्रवेशात् मध्यविलम्बिता गतिः ॥ ४४ ॥

एवमर्द्धसमविषमयोः मात्राच्छन्दःसु गद्यमिश्रयोर्लघुगुरुन्मिश्रवर्णविन्यासविशेषभूयस्त्वेन द्रुतादिगतयो गवेषणीयाः ॥

तत्र विषमवृत्तच्छन्दसि द्रुता यथा,

अथ वासवस्य वचनेन रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं विधिवत्तपांसि विदधे धनञ्जयः॥४५

अर्द्धसमच्छन्दसि विलम्बिता यथा,

विहितां प्रियया मनःप्रियामथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं नृपमूचे वचनं वृकोदरः ॥ ४६ ॥

उत्कलिकाप्रायगद्ये द्रुतमध्या च यथा,

व्यपगतघनपटलममलजलनिधिसदृशमम्बरतलं विलोक्यते ॥
अञ्जनचूर्णपुञ्जश्यामं शार्वरं तमः स्त्यायते ॥ ४७ ॥

पद्यगन्धिगद्ये वृत्तगन्धौ मध्या जातिगन्धौ द्रुतमध्या यथा,

पातालतालुतलवासिषु दानवेषु ॥

दुन्दुभय इति । अत्रापि प्रतिपादं पूर्वं मध्या ततो विलम्बिता च खण्डशः प्रतिभासते इति दर्शयति । सेयमिति । इमामेव व्यवस्थाम् अर्द्धमध्यमादिषु अपि अतिदिश्यते इति दिङ्मात्रमुदाहरति एवमिति ॥ ४४ ॥ ४५ ॥ ४६ ॥

उत्कलिकाप्रायेति । उच्चावचभावेन प्रतिभासमानम् उत्कलिका । यथा । सलीलकरकमलताडितातरलयावलीकमिति । तथैव तदपि प्रकृतोदाहरणमिति व्यक्तम् । पातालेत्यादौ वसन्ततिलकाभाग इव हर इव इत्यादौ आर्याभाग इव प्रतिभातीति ॥ ४७ ॥

हर इव जितमन्मथो गुह इवाप्रतिहतशक्तिः ॥ इति ॥४८॥

गद्यादौ मिश्रे गद्यपद्ययोर्द्रुतमध्या यथा,

हन्त पुण्यवानस्मि यदहमुत्तर्कितोपनतदर्शनोल्लसितनय-नयानया ।

अविरलमिव दाम्ना पौण्डरीकेण नद्धः
स्नपित इव च दुग्धस्रोतसां निर्झरेण ।
कवलित इव कृत्स्नश्चक्षुषा स्मारितेन
प्रसभममृतवर्षेणेव सान्द्रेण सिक्तः ॥ ४९ ॥

पद्यादौ मिश्रे द्रुतविलम्बिता यथा,

असौ विद्याधारः शिशुरपि विनिर्गत्य भवना-
दिहायातः सम्प्रत्यविकलशरच्चन्द्रमधुरः ।
यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥

अत्र बालसुहृदा मकरन्देन सह विद्यामान्वीक्षिकी-मधीते स एव माधवो नाम इति ॥ ५० ॥

वृत्तगन्धौ जातिगन्धाविति । तृतीयादिषु भाषितपुंस्कं पुंवदमालवस्य इति पुंवद्भावेन नुम् भवति ॥ ४८ ॥

हन्तेति । आश्चर्यस्मितस्य हन्तेत्येव वागनुभावस्तदोऽभिमानोन्मेषे पुण्य-वान् अस्मीति अनन्तरं लोकोत्तरविभाववर्णनालरितस्य यदहम् इत्यादिगद्यापर्यव-सान एव अविरलमित्यादि वृत्तमाविरासीदिति मध्ये विच्छेदकारणानुपपत्तौ गद्य-पद्याभ्यामेकवाक्यम् ॥ ४९ ॥

असाविति । दूतीकल्पे कयाचित् प्रच्छन्नप्रार्थनीयया आसम्भोगमुन्नयेदिति आम्नातम् । तदिह उत्प्रेक्षा मनोहरयाम्यमालोकनमुक्तम् । तेन एकस्मिन् वर्ण-नीयवस्तुनि वृत्तप्रपञ्चेन उक्ते प्रकृतसङ्गतिमात्रं गद्येन कृतवतीति युक्तेयमानुपूर्वी-वाक्यैकवाक्यता चेति ॥ ५० ॥

वैदर्भादिकृतः पन्थाः काव्ये मार्ग इति स्मृतः ।
रीङ् गताविति धातोः सा व्युत्पत्त्या रीतिरुच्यते ॥ ५१ ॥
वैदर्भी साथ पाञ्चाली गौडीयावन्तिका तथा ।
लाटीया मागधी चेति षोढा रीतिर्निगद्यते ॥ ५२ ॥
तत्रासमासा निःशेषश्लेषादिगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते ॥ ५३ ॥
समस्तपञ्चषपदामोजःकान्तिविवर्जिताम् ।

वैदर्भादीति । गुणवत्पदरचना रीतिः । गुणाः श्लेषादयः काव्यव्यभिचारिणो नव । तेषाम् अन्योन्यसीलनक्षमतया पानकरस इव गुडमरिचादीन् खाण्डव इव मधुराम्लादीनां यत्सम्मूर्च्छनरूपावस्थान्तरगमनं तत्संस्कारादेव हि लोकशास्त्रपदरचनातः काव्यरूपा च रचना व्यावर्त्तते । अतएव सृज्यते कविभिः आसंसारमिति मार्गपदेन उच्यते । वैदर्भादयो विदर्भादिदेशप्रभवास्तैः कृतः सुख हेतुवाग्गीचरतया प्रकटितो न तु तत्तद्देशैः काव्यस्य किञ्चिदुपक्रियते । पन्था इति । प्रतिष्ठन्ते हि महाकविपदवीलाभार्थिन इति । ईदृशमेव रीतिलक्षणम् आनन्दवर्द्धनादीनामपि मतमेतत् उपलक्षणतया सूत्रं व्याख्यातम् । कथं पुनः उक्तम् उपमादेः रीतिपदं प्रवृत्तम् इत्यत आह । रीङ्गताविति । रियन्ते परम्परया गच्छन्ति अनयेति करणसाधनोऽयं रीतिशब्दो मार्गपर्य्याय इत्यर्थः ॥ ५१ ॥

एवं सिद्धे सामान्यलक्षणे विभागमाह । वैदर्भीति ॥ ५२ ॥

वक्ष्यमाणरीत्या वैदर्भीप्राधान्यम् अभिप्रेत्याह । तत्रेति । असमासा अनुल्लिखितसमासाः । निःशेषश्लेषादीति । श्लेषादयो नवगुणास्तैर्गुम्फिता । मिथो मिलनेन संमूर्च्छितैः अनुपलभ्यमानान्यतमसमाप्तकैः अपि परस्परविभक्तस्वरूपभावेन सहृदयहृदयसंवादगोचरैः आख्या । एवं विपञ्चीस्वरसौभाग्या । विपञ्ची वाग्रूपा सरस्वती बिम्बप्रतिबिम्बभावेन द्विविधा । प्रतिबिम्बाधिष्ठानतया दार्वादियन्त्रमपि विपञ्चीत्युच्यते तदीयाः स्वराः तन्त्रीकण्ठोत्थिताः स्थानक्रमवैपरीत्यानुमेयशरीराः प्रतिबिम्बभावाः षड्जादयस्तेषु श्रुतिसंमूर्च्छनरूपेषु अपि मिथो विभक्ताः श्रुतयः श्रोत्रस्त्रकस्वरावस्थामापन्नाः समस्तगान्धर्ववित्साक्षिकाः प्रकाशन्ते । अतएव वीणा एव प्रधानं समस्तस्य स्वरजातस्य तत्रैव श्रुतिमण्डलीस्नेषादिति ॥ ५३ ॥

मधुरां सुकुमाराञ्च पाञ्चालीं कवयो विदुः ॥ ५४ ॥
समस्तात्युद्भटपदामोजःकान्तिगुणान्विताम्।
गौड़ीयेति विजानन्ति रीतिं रीतिविचक्षणाः ॥ ५५ ॥
अन्तराले तु पाञ्चालीवैदर्भ्योर्याऽवतिष्ठते।
सावन्तिका समस्तैः स्याद्द्वित्रैस्त्रिचतुरैः पदैः ॥ ५६ ॥
समस्तरीतिर्व्यामिश्रा लाटीया रीतिरिष्यते।
पूर्वरीतेरनिर्वाहे खण्डरीतिस्तु मागधी ॥ ५७ ॥

तासु वैदर्भी यथा,

मनीषिताः सन्ति गृहेषु देवतास्तपः क्व वत्से क्व च तावकं वपुः।
पदं सहेत भ्रमरस्य पेलवं शिरीषपुष्पं न पुनः पतत्रिणः ॥

यदा तु पानकादिन्यायेन कश्चिदंश उद्रिक्तो भवति तदा रीत्यन्तरमुत्तिष्ठतीत्याह। समस्तेति। ओजः कान्तिविवर्जिताम्। ओजः कान्त्योः विशेषेण वर्जिताम्। न्यग्भूतौजः कान्ति गुणमिति यावत्। यतः तत् प्रतिहन्त्रीः माधुर्यसौकुमार्ययोः तत्र उद्भवः तदेतदाह। मधुरां सुकुमारां चेति। अतएवौजः प्रकाशकः षड्धिकेषु पदेषु समासो न क्रियते ॥ ५४ ॥

समस्तेति। अत्युद्भटानि सोल्लेखसमासानि यस्मादोजः कान्त्योरुद्भवे न्यग्भूतगुणसप्तकेयं रीतिः ॥ ५५ ॥

अन्तराल इति। माधुर्यसौकुमार्ययोः किञ्चिदुद्भवेन निर्मीलनाङ्गप्राधान्येन वाऽन्तरालकल्पना। तां व्यनक्ति। द्वित्रैरिति। द्वे त्रीणि वा त्रीणि चत्वारि वेति वाऽर्थे बहुव्रीहिः ॥ ५६ ॥

समस्तेति। यद्यपि उपक्रान्तरीत्यनिर्वाहः अत्रापि अस्ति तथापि तिलतण्डुलवद्यावद्विभक्तरीतिसंवलनस्य कविसंरम्भगोचरस्य उत्तररीतेः पृथग्भावः। पूर्वरीतेरिति। एकां रीतिमुपक्रम्य यदन्यया सन्दर्भनिर्वहणमसावन्य एव प्रकारः। न च अनिर्वाहो दोषस्छायावैरूप्याभावात्। रीतिखण्डनेऽपि हि सन्दर्भसौभाग्यसम्पत्तिः शक्तिमेव आविष्करोति ॥ ५७ ॥

मनीषिता इति। अत्र दीर्घसमासाभावे कथमोज इति कस्यचित् कुदृश्य-

सेयमसमस्तपदा समस्तश्लेषादिगुणवती वैदर्भी रीतिः ॥५८॥

पाञ्चाली यथा,

गात्राभिघातदलिताङ्गदजर्जराणां
गण्डस्थलीलुलितकुण्डलताडितानाम् ।
क्षोभस्फुटन्मुकुटकोटिविघट्टितानां
नादोऽभवज्झणझणामुखरो मणीनाम् ॥

सेयमोजःकान्त्यभावात् आश्लिष्टश्लथभावपुराणच्छाया माधुर्यसौकुमार्य्यवती समस्तपञ्चपदा पाञ्चाली रीतिः ॥ ५९ ॥

गौड़ीया यथा,

यस्यावस्कन्दलीलाचलितबलपरिस्यन्दखर्वीकृतोर्वी-
संरम्भोत्तम्भनायोन्नमितभरनमत्कन्धरासन्धिरासीत् ।
शेषो विस्फारपुल्लस्फुटपृथुलफणापूत्कृताग्निस्फुलिङ्ग-
स्फूर्जत्सन्दोहसन्देहितविकटशिखामण्डलीरत्नखण्डः ॥

सेयमोजःकान्तिमती समस्तोद्भटभूरिपदा च गौड़ीया रीतिः ॥ ६० ॥

आवन्तिका यथा,

एतानि निःसहतनोरसमञ्जसानि

सपरीतिमत्प्रकरण एवेत्यपास्तम् । एतेन गुणनवकस्य समकक्षतया सम्भेदोक्षण इति । असमस्तपदेत्यनुल्लेखसमासपदेत्यर्थः । समग्रानवगुणवतीति नित्ययोगे मतुप् ॥ ५८ ॥

गात्राभिघातेति । अत्राद्यतृतीययोः षड्द्वितीये च पञ्चपदानि समस्तानि । ओजः कान्त्यभावादिति । ईषदर्थे नञ् । अतएव माधुर्य्यसौकुमार्य्ययोरुन्मेषः आश्लिष्टा प्राप्ता यथासंख्यमोजःकान्तिनिमीलनलक्षप्रादुर्भावा श्लथभावा पुराणी च छाया ययेति विग्रहः ॥ ५९ ॥

समस्तोद्भटभूरिपदेति । उद्भटता प्रौढ़िप्रकर्षः ॥ ६० ॥

शून्यं मनः पिशुनयन्ति पदानि तस्याः।
एते च वर्त्मतरवः प्रथयन्ति ताप-
मालिङ्गितोज्झितपरिम्लपितैः प्रवालैः॥

सेयं समस्तद्वित्रिचतुष्पदा वैदर्भीपाञ्चाल्योरन्तरालवर्त्तिनी आवन्तिका नाम रीतिः॥ ६१॥

लाटीया यथा,

अयमुदयति मुद्राभञ्जनः पद्मिनीनाम्
उदयगिरिवनालीबालमन्दारपुष्पम्।
विरहविधुरकोकद्वन्द्वबन्धुर्विभिन्दन्
कुपितकपिकपोलक्रोड़ताम्रस्तमांसि॥

सेयं समस्तरीतिमिश्रा लाटीया नाम रीतिः॥ ६२॥

मागधी यथा,

करिकवलनशिष्टैः शाकशाखाग्रपत्रैः
अरुणसरणयोऽमी सर्वतो भीषयन्ते।
चलितशबरसेनादत्तगोशृङ्गचण्ड-
ध्वनिचकितवराहव्याकुला विन्ध्यपादाः॥

सेयमारब्धरीतेरनिर्वाहात् खण्डरीतिर्मागधी॥ ६३॥

एतानीति। निःसहतनीः असमञ्जसानि मार्गतरव इति द्वे द्वे पदे आलम्बिते इत्यादौ त्रीणि पदानि समस्तानि माधुर्यसौकुमार्य्ययोः मनागुन्मेषः पाञ्चालीभागः। इतरेषां समकक्षता वैदर्भीभागः। अनयोः सम्मेदेन अन्तरालकल्पना व्यक्तैव॥६१॥

अयमिति। मुद्राभञ्जन इति द्वाभ्यां समस्ताभ्याम् आवन्ती। उदयगिरीत्यादिना पञ्चकेन पाञ्चाली। प्रौढिप्रकर्षेण गौड़ीया। अयमुदयति इत्याद्यसमासेन वैदर्भी च प्रत्यभिज्ञायते इति पूर्वोक्तसमस्तरीतिसम्मेद इति॥ ६२॥

करिकवलनेति। अत्र पूर्वार्द्धे यथोक्ताम् आवन्तीम् उपक्रम्य चरमार्द्धे गौड़ीया-

या विकाशेऽथ विक्षेपे सङ्कोचे विस्तरे तथा।
चेतसो वर्त्तयित्री स्यात् सा वृत्तिः सापि षड्विधा ॥ ६४ ॥
कैशिक्यारभटी चैव भारती सात्वती परा।
मध्यमारभटी चैव तथा मध्यमकैशिकी ॥ ६५ ॥

परिग्रहात् उपक्रान्तरीतेः अनिर्वाहः खण्डनं तथापि च न छायावैरूप्यमिति कविशक्तिव्यञ्जकत्वात् अलङ्कारभाव इति। शाकी वृत्तविशेषः ॥ ६३ ॥

या विकाश इति। वृत्तिर्वर्त्तनं रसविषयो व्यापारः काव्यस्य रसप्रवणत्वात्। स च व्यापारः सत्त्वोद्रेकलक्षणो जन्मान्तरानुभवभावितवासनासमुत्थः परिपूर्णोऽविषद्रसास्वादसर्वस्वास्वमानचित्तावस्थानिदानभूतोऽर्थगतः पञ्चमेऽभिध्यास्यते। शब्दगतः पुनरत्र सङ्गतः सन्दर्भस्य रसप्रकाशकारणेषु प्रधानत्वात्। यदाह। कविवागभिनेयश्च तदुपायो विधिष्यते। वस्तुशक्तिमहिम्ना तु प्रथमोऽत्र विशिष्यते। वर्त्तते न याचितमिति करणसाधनोऽयं वृत्तिशब्द इति वर्त्तयित्रीत्यनेन प्रयोजकव्यापारप्रधानेन दर्शितम्। तत्र विषयवैचित्र्यादिकाशाद्याः चतस्रः चित्तावस्थाविषयो हि दीप्तमसृणमध्यमभेदेन त्रिविधः। विभावाद्युपधानमहिम्ना तन्मयी भवनयोग्यं हि चेतः कदाचिदिकसति। सत्त्वाविर्भावो विकासः। न्यग्भूतरजस्तमो गुणं हि चेतः सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिमासादयति। ततः सत्त्वभागप्रतिष्ठितः शृङ्गारस्तदाभासोऽपि तामेव भूमिकामालम्बते। अतएव शुक्तिरजतवङ्गावीदयेऽपि दोषमहिम्नैव काव्यमहिम्ना तद्व्यञ्जनात्। तत्समानभूमिकया हास्योरसः प्रादुर्भवतीत्यभिसन्धायाह "शृङ्गाराद्धि भवेद्धास्यमिति" भरतमुनिः। तेन विकासभूमिकौ शृङ्गारहास्यौ। विकासात् प्रच्युतमप्राप्तगुणान्तरप्रादुर्भावं विक्षिप्तं चित्तमुच्यते। तत्र उचितविभावादिवैचित्र्यादाविर्भवद्रजोगुणस्य चेतसो विक्षेपप्रच्युतिदशायां रौद्ररसोन्मेषः। अतएव समानभूमिकया रौद्राच्च करुणो रस इत्याह। यदा तु सत्त्वतमो निमीलनेन केवलरजः प्रतिष्ठचेतस्तदा बहुमुखव्यापारोन्मेषाद्विस्तराख्याम् अवस्थामासादयति। तद्भूमिको वीररसस्तदवस्थामेवावस्थाया अद्भुतोऽपि प्रथत इति वीराच्चैव अद्भुतोत्पत्तिरित्युक्तं न्यग्भूतरजोगुणस्य प्रबुद्धतमसश्चेतसो अवस्थाविशेषः समङ्कोचः तमालम्ब्य बीभत्सः प्रादुरासे तदेकभूमिकश्च भयानक इति बीभत्साच्च भयानक इत्याह। तेऽमी चत्वारश्चित्तावस्थाविशेषाः ॥ ६४ ॥

कथमविशेषणादेव सन्दर्भादुभवन्तीत्याशङ्क्य विभागेन उत्तरमाह। कैशिक्येति। शुद्धिमङ्गराभ्यां रीतिवदत्रापि षट्प्रकाराः ॥ ६५ ॥

सुकुमारार्थसन्दर्भा कैशिकी तासु कथ्यते।
या तु प्रौढार्थसन्दर्भा वृत्तिरारभटीति सा॥ ६६॥
कोमलप्रौढ़सन्दर्भा कोमलार्थाथ भारती।
प्रौढ़ार्था कोमलप्रौढ़सन्दर्भां सात्वतीं विदुः॥ ६७॥
कोमले प्रौढ़सन्दर्भा त्वर्थे मध्यमकैशिकी।
प्रौढ़ार्था कोमले बन्धे मध्यमारभटीष्यते॥ ६८॥

तत्र कैशिकी यथा,

शशिरुचिषु दलेषु नागवल्ल्या
विचकिलदामनि चन्दने च हृद्ये।
कुवलयिनि पुराणसीधुपात्रे
तरलदृशामपतन् दृशः प्रिये च॥

सेयमर्थस्य च सन्दर्भस्य च सौकुमार्य्यात् कैशिकी नाम वृत्तिः॥ ६९॥

सुकुमारेति। चित्तद्रुतिकारित्वं सौकुमार्य्यं सुकुमारौ अर्थसन्दर्भौ यस्यामिति विग्रहः. एवं प्रौढार्थसन्दर्भेत्यपि। चित्तद्रौतिविधायिता प्रौढिः। अर्थसौकुमार्य्यादिना विशिष्यमाणसन्दर्भः सुकुमारत्वादिः शब्दालङ्कारतां प्रयोजयति। कोमलप्रौढ़ी मध्यमः प्रकारान्तरविरहाच्च मध्यमभारत्यादयो न सम्भवन्ति॥ ६६॥ ६७॥ ६८॥

शशिरुचिष्विति। नियमितादिषु सुग्धाङ्गनाचुम्बनरसौत्सुक्यानाम् अतिमनोज्ञाधररागसमर्पकेषु नागलतादलेषु ततो मानपरिग्रहेवलितकादिचुम्बनविशेषार्थिनीनां कचग्रहसौभाग्यसुन्दरे मल्लिकादामि ततः सर्वाङ्गीणाश्लेषसौभाग्यार्थकचन्दनरसे अनन्तरमौर्ष्यारोषवासनानिःशेषकेलियन्त्रणरतोत्कण्ठितानां सीधुपात्रे। ततः सर्वोपकरणजीवितसर्वस्वे प्रियतमे समकचतयैव दृष्टयः पेतुरिति। कुवलयिनीति युक्तः पाठः। कुवलयितेति पाठे विशेषणाङ्गप्राधान्यविवक्षाया समासे गुणीभावस्य अनुचितत्वात्। सेयं कैशिकीमहणे शृङ्गारादौ विनियुज्यत इति॥ ६९॥

आरभटी यथा,

यो यः शस्त्रं बिभर्त्ति स्वभुजगुरुमदः पाण्डवीनां चमूनाम्
यो यः पाञ्चालगोत्रे शिशुरधिकवया गर्भशय्यां गतो वा।
यो यः यत् कर्मसाक्षी चरति मयि रणे यश्च यश्च प्रतीपः
क्रोधान्धस्तस्य तस्य स्वयमिह जगतामन्तकस्यान्तकोऽहम् ॥

सेयं प्रौढ़ार्थसन्दर्भा आरभटी नाम वृत्तिः ॥ ७० ॥

भारती यथा,

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकवरीभारमंसे वहन्त्याः।
भूयस्त्वत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलमलसद्बाहु लक्ष्म्याः पनातु ॥

सेयमतिसुकुमारार्थे नातिसुकुमारसन्दर्भा भारती नाम वृत्तिः ॥ ७१ ॥

सात्वती यथा,

वन्द्यौ द्वावपि तावनार्य्यचरितप्राप्तप्रतापोदयौ
भीमो भीमपराक्रमः स च मुनिर्भास्वत्कुठारायुधः।
एकेनामृतवह्निदार्य्य करजैः पीतान्यसृञ्जि द्विषाम्
अन्येनापि हताहिताम्बुसरसि स्नातं क्रुधः शान्तये ॥

सेयं प्रौढ़ार्थानातिप्रौढ़सन्दर्भा सात्वती नाम वृत्तिः ॥ ७२ ॥

यो य इति। ओजः प्रधानतया प्रौढः सन्दर्भः। यस्मादियमारभटी दीप्ते रौद्रादौ विनियुक्ता तेन युक्तं शब्दार्थयोः प्रौढत्वमिति ॥ ७० ॥

उत्तिष्ठन्त्या इति। सर्वाङ्गीणाश्लेषसमुत्सुके प्रियतमे बहिर्व्यावर्त्तनम् अन्तरनुवर्त्तनञ्च मुग्धाङ्गनाजातिरिति न्यायेन नीवी बन्धकेशपाशसंयमार्थिन्या

मध्यमकैशिकी यथा,

किं द्वारि दैवहतके सहकारकेण
संवर्द्धितेन विषपादप एष पापः।
अस्मिन् मनागपि विकाशविकारभाजि
भीमा भवन्ति मदनज्वरसन्निपाताः॥

सेयं सुकुमारेऽर्थे प्रौढ़सन्दर्भा मध्यमकैशिकी नाम वृत्तिः॥७३॥

मध्यमारभटी यथा,

त्वं नागराज वहुमस्य नितम्बभागं
भोगेन गाढ़मुपवेष्टय मन्दराद्रेः।
सोढ़ा विषह्य वृषवाहनयोगलीला-
पर्य्यङ्कबन्धनविधेस्तव कोऽतिभारः॥

सेयं प्रौढ़ेऽर्थे सुकुमारसन्दर्भा मध्यमारभटी नाम वृत्तिः॥७४॥

अन्योक्तीनामनुकृतिश्छाया सापीह षड्विधा।

निर्भरकेलिखेदेन भुजलतालसं लसत्येव न तु व्यापारयितुमपि शक्नोति तत्कालिकोऽतिपोषः। अत्र मसृणेऽपि रसे वृत्त्यौचित्येन सन्दर्भस्य प्रौढिरुचितैव। दीर्घसमासो हि शृङ्गारादौ निषिद्धो न तु प्रौढ़िः। रेफहकारादिवर्णनिवेशात्तु कोमलता सन्दर्भस्येति। एवमुत्तरोदाहरणेषु अपि विशेषः स्वयमूहनीय इति॥७१॥७२॥७३॥७४॥

अन्योक्तीनामिति। लोके बिम्बप्रतिबिम्बयोः प्रतिबिम्बं चमत्कारितया प्रसिद्धम् अतएव अव्याप्रेक्ष्य न्याय इत्याह। शब्दालङ्कारकाण्डे वाक्यानुकरणमेव प्रतिबिम्बवाचिना छायापदेन गुणवृत्तेन आख्यायते। तदेतत् अनुकरणमनुकार्य्यभेदादेव षोढ़ा व्यवतिष्ठत इत्याह। छेकेति। छेकादीनां लोकविशेषाणाम् एव शोभाकारित्वेन पृथगुपादाने अर्थात्तदितरानेकविचित्रतत्तदनुकार्य्यपरो लोकशब्दः। छेका विदग्धाः। पीटा स्त्रीपुंसलक्षणा। सहजकेलिरिति प्रसिद्धा-पीटा। भुजिष्या दासीत्यर्थे। अत्र केचिदन्यच्छायाशोनिजमपि काव्यं छाया-

लोकच्छेकाभंकोन्मत्तपोटामत्तोक्तिभेदतः ॥ ७५ ॥

तासु लोकोक्तिच्छाया यथा,

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ

लङ्कारव्यवहारभूमिमाहुः। प्रकृतिपरिणामः, परपुरप्रवेशः, खण्डसङ्घात्यं चूडिका, परिमल, इति पञ्चयोनिजकाव्यभेदास्तत्र किञ्चित् विकृतार्थैः प्रकृतिपरिणामः। यथा। धुअमेह महुअरा अणुव्वणसमअहि अओ ण अविसुक्काओ। णहआअवसाहाओणिअ अव्वाणवअडिगआओदिसाओ। यथा च। सिसिरपडिरहसुक्कपरिहुत्तं पअ अवलि अक्कम्। इह रइ अरया अलिअं विअरदिदिसाहिं कट्ठिअ वणह अलम्। अत्र आकाशदिशां विस्तारभणनं मनाग्विकृतमुपलक्ष्यत इति प्रकृतिपरिणामनामायं योनिजकाव्यभेदः। भाषामात्रभिन्नः परपुरप्रवेशो यथा। दैनाधिपो वा भुजगाधिपो वा धराधिपो वा यदि हैहयः स्याम्। सन्दर्शनं ते गुणकीर्त्तनं ते सेवाञ्जलिं ते तदहं विदध्याम्। यथा च। सविमी अणज्जुणमिअ अमहिन्दमवासुइअ अप्पाणम्। सेडञ्जालदसणगुणकहासुतइजणूपज्जत्तम्। अत्र भाषामात्रं भिन्नमिति परपुरप्रवेशनामायं यो निजकाव्यभेदः। विकीर्णमसमाहारः खण्डसङ्घात्यम्। यथा। दिचाणम्बुजिनी दलानि खरसासुत्सङ्गमध्यासते मौलौ किंशुकशाखिनस्त्रिचतुराणाबिभ्रते कोरकान्। गर्भग्रन्थिषु पञ्चषाः सुमनसो बध्नन्ति चूतद्रुमाः सम्प्राप्ताः प्रकटीभवन्ति कुररीकण्ठेषु कूजोर्मयः। अत्र काव्यचतुष्कात् उच्छिद्य पादचतुष्टयं ग्रथितमिति खण्डसङ्घात्यनामायं योनिजकाव्यभेदः। तावन्तमर्थम् उपादायाधिकी वापश्चूलिका। यथा। कमलमनभसि तत्र च कुवलये तानि कनकलतिकायाम्। सा च सुकुमारसुभगेति उत्पातपरम्परा केयम्। तथाच। उभौ रत्नास्तस्मादुपरि विपरीतौ कमलयोः तदूर्ध्वं रत्नाश्मस्थलमपि दुरूहं किमपि यत्। ततः कुम्भौ पश्चादिसकिसलये कन्दलमथो तदन्विन्दाविन्दीवरमधुकराः किं पुनरिदम्। अत्र स्थाने स्थानेऽधिकावापस्य प्रत्यभिज्ञानाच्चूडिकानामायं योनिजकाव्यभेदः। बन्धच्छायामात्रसंवादी परिमलः। यथा। अनेन यूना सह पार्थिवेन रम्भोरु! कच्चिन्मनसी रुचिस्ते। सिप्रातरङ्गानिलकम्पितासु विहर्त्तुमुद्यानपरम्परासु। यथा च। यात्राप्रसङ्गादुपवीणयन्ती तस्यां महाकालमविप्रतिष्ठम्। कृशाङ्गि! वीणागुणसारणासु चिरात् कलाभ्यासफलं लभेथाः। अत्र सन्दर्भच्छायामात्रम् अनुकृतमिति परिमलनामायं योनिजकाव्यभेदः ॥ ७५ ॥

मासानेतान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्विक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु॥

सेयं लोचने मीलयित्वेति लोकोक्तेरनुकृतिर्लोकोक्तिच्छाया॥ ७६॥

छेकोक्तिच्छाया यथा,

यो हि दीर्घासिताक्षस्य विलासललितभ्रुणः।
कान्तामुखस्यावशगस्तस्मै नृपशवे नमः॥

सेयं तस्मै नृपशवे नम इति विदग्धोक्तेरनुकृतिश्छेकोक्तिच्छाया॥ ७७॥

अर्भकोक्तिच्छाया यथा,

किं सः स्वर्गतरुः कोऽपि यस्य पुष्पं निशाकरः।
ते वृक्षाः कीदृशा मातर्येषां मुक्ताफलं फलम्॥

सेयमव्युत्पन्नशिशुजनोक्तेरनुकृतिरर्भकोक्तिच्छाया॥ ७८॥

उन्मत्तोक्तिच्छाया यथा,

दृष्टः कथं सुतनु किं कुरुते किमस्मद्-

शापान्त इति। लोचने मीलयित्वेत्यनेन लोकोक्त्यनुकारेण नयननिमीलनवदाशु भाविताससमागमसमयस्य प्रतिपाद्यते। तथाच सुकुमारतरकान्ता जीविताध्यवसायाभिप्रायः प्रवासविप्रलम्भाविष्टचेतसः प्रकाशितो भवतीति। उपलक्षणञ्चैतत्। वर्षाकाले चतुरो मासानित्यपि लोकोक्तिरेव॥ ७६॥

यो हीति। कान्तामुखमेव जीवितसर्वस्वमभिमन्यमानः तत्रालं प्रत्ययशालिनः पशूनिव प्रतिश्रङ्गारी विदग्धः॥ ७७॥

किं स इति। नूनं त्रिजगद्वर्त्तिसकलार्थिसार्थकीकरणविख्यातकीर्त्तेः पारिजातप्रमुखस्य कस्यचित् एकस्तवकः सुधामिराह्लादयन्नयमवलोके दृश्यत इत्यादि॥ ७८॥

वार्त्तां स पृच्छति शृणोति निवेद्यमानाम् ।
आस्तां किमस्य कथया कथयाशु तावद्
अत्रागमिष्यति न वा खलु सोऽभिमानी ॥

सेयमसमञ्जसाया उन्मत्तोक्तेरनुकृतिरुन्मत्तोक्तिच्छाया ॥७९॥

पोटोक्तिच्छाया यथा,

तिलकमसहास्मि सोढुं घनसारेणातिसारो दोषो मे ।
लभयति च दौर्बल्यं कुङ्कुमरागो ममाङ्गानि ॥

सेयमुत्तमपदारोपितनीचयुवत्युक्तेरनुकृतिः पोटोक्तिच्छाया ॥ ८० ॥

मत्तोक्तिच्छाया यथा,

पि पि प्रिय स स स्वयं मु मु मुखासवं देहि मे
त त त्यज दु दु द्रुतं भ भ भ भाजनं काञ्चनम् ।
इति स्खलितजल्पितं मदवशात् कुरङ्गीदृशः
प्रगे हसितहेतवे सहचरीभिरध्यैयत ॥

सेयं स्खलन्त्या मत्तोक्तेरनुकृतिर्मत्तोक्तिच्छाया ॥ ८१ ॥

साभिप्रायस्य वाक्ये यद्वचसो विनिवेशनम् ।
मुद्रां तां सुप्रदायित्वात् काव्यमुद्राविदो विदुः ॥ ८२ ॥

दृष्ट इति । कथमित्यादिना तदेकतानतामाविष्कृत्य सहसा एव आस्तामित्यादिसम्भ्रमाणं कथय तावदित्यादिना च पुनरादानमसमञ्जसम् ॥ ७९ ॥

उत्तमपदस्थानीययुवतिम् अनुकुर्वाणा उत्तमपदारोपितनीचयुवतिः ॥ ८० ॥

पि पि प्रियेति । अव्यक्तवृत्तिरूपं स्खलितजल्पितम् ॥ ८१ ॥

साभिप्रायेति । यद्यपि सम्पूर्णमेव काव्यं वक्त्रभिप्रायप्रतिच्छन्दकभूतम् । उक्तञ्च । वक्त्रभिप्रायं सूचयेयुरिति । तथापि न अस्मिन् इतरसाधारणतया वाक्यार्थगोचरमभिप्रायमावेदयत्येव काव्यसनाथीकरणक्षमवक्त्रभिप्रायविशेषप्रतिरूपक एक-

सास्मिन् पदस्य वाक्यस्य विभक्तेर्वचनस्य च ।
समुच्चयस्य संवृत्त्या षोढा न्यासेन जायते ॥ ८३ ॥

तासु पदमुद्रा यथा,

निर्माल्यं नयनश्रियः कुवलयं वक्त्रस्य दासः शशी
भ्रूयुग्मस्य सनाभि मन्मथधनुर्ज्योत्स्ना स्मितस्याञ्चलः ।
मङ्गीतस्य च मत्तकोकिलरुतान्युच्छिष्टमेणीदृशः
सर्वाङ्गीणमहो विधेः परिणतं विज्ञानचित्रं चिरात् ॥

अत्र निर्माल्यं दासः सनाभ्यञ्चल उच्छिष्टमिति पदानां गौणवृत्तिव्यपाश्रयेण सुबदायिनां साभिप्रायनिवेशादियं पदमुद्रा ॥ ८४ ॥

वाक्यमुद्रा यथा,

यत् स्वच्छे सलिलात्मनि प्रतिफलद्देवे त्रियामापतौ

देशनिवेशो दृश्यते । अतएव अङ्गुलीयादिमुद्रेव मुद्रा इत्युच्यते । निरुक्तिमाह । सुत्प्रदायित्वादिति । सुद्युपपदेरातेर्दानकर्मणः के रूपम् । मुद्रेव पदादिप्रकाश्यध्वनिव्यवहारभूमिरन्येषाम् ॥ ८२ ॥

सास्मिन्निति पदं प्रातिपदिकं कृत्तद्धितसमासरूपम् । विभक्तिवचनयोः सामान्यविशेषभावेऽपि पृथक् पृथगभिप्रायव्यञ्जकतया निर्देशः । आसाम् इत्यादिवचनसङ्कोचः संवृतिः ॥ ८३ ॥

गौणवृत्तिव्यपाश्रयेणेति । निर्माल्यादिपदानाम् अत्यन्ततिरस्कृतवाच्यानाम् अतिविच्छायत्वादिलक्षणाद्वारेण लावण्यविशेषध्वननात् सहृदयहृदयाकर्षकानां निवेशो दृश्यते । एवम् । तालाजा अन्तिगुणा जालाते सहिअ एहिइ ज्जिन्ति । रविकिरणाणुग्गहि आइं होन्ति कमलाइं कमलाइम् । तथा । अमृतमहृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं रतिरपि रतिः कामः कामो मधूनि मधून्यपि । इत्यादावर्थान्तरसंक्रमणादिना तत्प्रकाश्यो ध्वनिरनुसन्धेयः ॥ ८४ ॥

यत् स्वच्छ इति । आदित्यकला एव प्रतिफलिताः चन्द्रव्यपदेशं लभन्त

पीयूषाकृतिपर्य्यवस्यति किल ज्योत्स्नेति तत्त्वान्तरम् ।
तिग्मं धाम चिरं चकास्ति दिवि यत् तत्रास्ति दिव्यः पुमान्
यं विज्ञातवतां त्रुटन्ति निखिला भूयो भवग्रन्थयः ॥

अत्र तत्रास्ति दिव्यः पुमानित्यादेर्वाक्यान्तरस्य पूर्ववाक्योपकारित्वेन मुक्तदायकस्याभिप्रायपूर्वं निवेशादियं वाक्यमुद्रा ॥ ८५ ॥

विभक्तिमुद्रा यथा,

श्रियः प्रदुग्धे विपदो रुणद्धि यशांसि सूते मलिनं प्रमार्ष्टि ।
संस्कारशौचेन परं पुनीते शुद्धा हि बुद्धिः किल कामधेनुः ॥

अत्र प्रदुग्धे रुणद्धि सूते प्रमार्ष्टि पुनीते इति लिङ्विभक्तीनां दुहिपच्योः सकर्मकयोरुपसंख्यानं रुधादिभ्यः श्नम् इत्या-

---

इत्यागमः । तदाह । सलिलमये शशिनि रवेर्दीधितयो मूर्च्छितास्तमो नैशम् । दलयन्ति दर्पणोदरविहृता इव मन्दिरस्यान्तरिति । पूर्ववाक्योपकारित्वेन इति । दिवे पीयूषकृति तत्त्वान्तरं तिग्मधाम चकास्तीति च पदगाधतया तर्कितमिति किलशब्दकटाक्षितमभिधानम् । तत्र किं सम्बन्धमित्याकाङ्क्षाविपूरकं तत्रास्ति इत्यादिवाक्यम् । तथाहि य एष आदित्यपथं व्याप्य पुरुषो दीप्यत इत्याद्युपनिषदर्थनिवेशनमभिप्रायपूर्वकमाभासते । एतेन अन्येऽपि वाक्यप्रकाशप्रकाराः पदिग्दर्शिता बोद्धव्याः । पूर्वं वाक्येऽन्तर्भावितद्वित्वमवसेयमिति ॥ ८५ ॥

श्रिय इति । बुद्धिरूपा कामधेनुः श्रियः प्रथयतीत्युक्तेन तथा प्रकर्षो यथोक्तो तु विशिष्टः कवेरभिप्राय उन्नीयते । तथाहि । यथोदुम्बरः सलोहितं फलं पच्यत इति कर्मकर्त्तरि फलोदुम्बरयोरैकात्म्यमवसीयते तथा इहापि श्रीरूपमात्मानं बुद्धिः प्रकाशयतीति । अतएव हि दुहिपच्योः सकर्मकयोः इति बाह्यकर्मविशिष्टस्यैव कर्तुः कर्मवद्भावः शिष्यते । नदुहस्नुनमां यक्चिणौ इति यगभावोऽपि विशेषाभिप्रायनियत एव रुणद्धीत्यागमरूपः । सूते इति लुप्तः प्रमार्ष्टीति इङ्वियोजकः पुनीते इति स्वरूपेण विकृतस्य विकरणः । आत्मनेपदपरस्मैपदयोः

दिभिर्विशेषलक्षणवतीनां योगैः परस्मैपदात्मनेपदपर्य्यायेण निवेशो दृश्यते। श्रियो विपदो यशांसि मलिनं संस्कारशौचेनेति च सुब्विभक्तीनाम् अचि श्नुधातुभ्रुवां य्वोरियङुवङावित्यादिविशेषलक्षणवतीनां विकृताविकृतानां मङ्गलामङ्गलार्थपरत्वेन मङ्गलाद्यर्थानामभिप्रायतः प्रयोगो लक्ष्यते तेनेयं विभक्तिमुद्रा भवति ॥ ८६ ॥

वचनमुद्रा यथा,

विश्वम्भरा भगवती भवतीमसूत
राजाप्रजापतिसमो जनकः पिता ते।
तेषां बधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयञ्च ॥

अत्र वयमित्यात्मनि बहुवचनेन सविता चेति सवितरि एकवचनेन सवितुरप्यहं बहुमत इत्यभिप्रायो वक्तुः इति इयं वचनमुद्रा ॥ ८७ ॥

समुच्चयमुद्रा यथा,

जातश्चायं मुखेन्दुस्ते भ्रुकुटिप्रणयी पुरः।

एकान्तरितो निवेशः श्रिय इति प्रकृतिभागे इयङादेशो विकारी विभक्तावपि विकारो विपद इति प्रकृतिरविकृता। विभक्तिषु कृत्वेन विकृता। यशांसीति द्वे अपि विकृते। मलिनमिति वैकल्पिकपरसवर्णविधौ इयमविकृतम्। संस्कारशौचेन इति प्रकृतिरविकृता। प्रत्ययस्विनादेशेन विकृतः। यथा श्रिय इति मङ्गल्यम्। विपद इति विपरीतमिति क्रमेण शुद्धा बुद्धिः कामधेनुरिति मङ्गलपरम्परानिवेशनेनोपसंहारस्त्रिताग्रकोज्ज्वल इव प्रतिभासमानोऽनुबिम्बमिव कामपि कान्तिमभिव्यञ्जयत्तूपलक्षते। मङ्गलामङ्गलार्थपदपरत्वेनेति। मङ्गलामङ्गलेभ्यः पदेभ्यः परवर्त्तित्वेन इत्यर्थः ॥ ८६ ॥

विश्वम्भरेति। अहङ्कारप्ररोहस्य पूर्वं गुणप्रयोजकत्वमुक्तम्। इह तु कवेरभि

गतश्च वसुदेवस्य कुलं नामावशेषताम् ॥

अत्राशंसायां भूतवच्चेति भूतवद्भावस्य हयग्रीवप्रभावातिशंसिनः समुच्चयद्वारेण निवेशादियं समुच्चयमुद्रा ॥ ८८ ॥

संवृतिमुद्रा यथा,

मणिरत्नं प्रसेनस्य तच्चानार्येण विष्णुना ।
लब्धं येनाद्य योगेन तेन किं कीर्त्तितेन वः ॥

अत्र "कथापि खलु पापानामलमश्रेयसे यतः" ततः किं तेन वः कीर्त्तितेनेति साभिप्रायसंवृतिकरणादियं संवृतिमुद्रा ॥ ८९ ॥

विधिद्वारेण वा यत्र निषेधेनाथ वा पुनः ।
प्रतीयते विशिष्टोऽर्थः सोक्तिरत्राभिधीयते ॥ ९० ॥
विधेरथ निषेधात् स्यादधिकाराद्विकल्पतः ।
नियमात् परिसङ्ख्याया उपाधेः सेह षड्विधा ॥ ९१ ॥

प्रायविशेषस्य अलङ्कारघटकतेति विभागः । अत्राशंसायामिति । गतमिति निष्ठाप्रत्ययेन भूतताद्योतनादाशंसाप्रतीतावपि कथं प्रकृतपोष इत्यत उक्तं समुच्चयद्वारेणेति । तेन हि तुल्यकक्षतापतीतौ लक्षेदङ्गीकृतरोषः तदा सिद्धमेव समीहितमिति । वक्तुरध्यवसायविशेषप्रतीतौ समुच्चय एव मुद्रापदवीमारोहतीति । शेषं सुबोधम् ॥ ८७ ॥ ८८ ॥ ८९ ॥

विधीति । उक्तिरभिधा । सा हयग्रीवाभावाभावविषयत्वात् । तर्हि गीरपत्यमयङ्गीरित्यतः को भेद इत्याशङ्क्य विधिद्वारेण वा इत्यादि । भावज्ञानं विधिः अभावज्ञानं निषेधो लोके गृहीतव्युत्पत्तिबलेन भावाभावान्यतरसंवित्सरणिमारुह्य काव्यैकगोचरे रसाद्यात्मनि पर्य्यवस्यन्ती भवत्युक्तिरलङ्कार इति भावः ॥ ९० ॥

सोऽयं भावादिप्रपञ्चेन षोढा विधिः प्रथत इत्याह । विधेरिति । उपाधिविशेषणं विध्यधिकारी शुद्धभावभेदो निषेधनियमौ शुद्धप्रतिषेधभेदौ । विकल्पस्तु संख्ये सङ्कीर्णभेदाविति । तत्राप्राप्तप्रापणो विधिः प्रसक्तप्रतिषेधो निषेधः

तासु विध्युक्तिर्यथा,

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ॥
अत्र प्राप्तौ प्रापणवचनं विधिः ॥ ९२ ॥

निषेधोक्तिर्यथा,

भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ॥
अत्र प्राप्तौ निवारणं निषेधः ॥ ९३ ॥

अधिकारोक्तिर्यथा,

भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥
अत्र विधिनिषेधज्ञानाद्विधिनिषेधे योग्यताधिकारः ॥ ९४ ॥

विकल्पोक्तिर्यथा,

एको नेता क्षत्रियो वा द्विजो वा
एका विद्याध्यात्मिकी वा त्रयी वा ।
एका भार्य्या वंशजा वा प्रिया वा
एकं मित्रं भूपतिर्वा यतिर्वा ॥

क्रियाफलसम्बन्धः अधिकारः तुल्यकक्षयोः एकबाधेन अन्यसम्बन्धो विकल्पो व्याहृत्तिफलको विधिर्निषेधः शेषविधिनिषेधनान्तरीयकौ विशेषनिषेधविधी परिसंख्या ॥९१॥

अप्राप्तौ प्रापणवचनमिति । अप्रवृत्तप्रवर्त्तनात्मको हि विधिः कथमितरापेक्षत्वे सङ्गच्छते । अतएव उच्यते । विधिरत्यन्तमप्राप्ताविति ॥ ९२ ॥

प्राप्तौ निवारणमिति । रोषेण प्रसजत्प्रतीपाचरणात् निवार्य्यते ॥ ९३ ॥

विधिनिषेधज्ञानादिति । विहितनिषिद्धक्रियाज्ञानेन तत्फलसम्बन्धयोग्यत्वमधिकारः ॥ ९४ ॥

शुश्रूषस्वेति भूयिष्ठं भव दक्षिणेति द्वे विहिते मास्म प्रतीपङ्गम इति भोगेषु अनुत्सेकिनीति द्वे निषिद्धे । विधिनिषेधयोग्यताविधिनिषेधफलसम्बन्धयोग्यत्वं

सोऽयं जातिक्रियागुणद्रव्यावलम्बी चतुर्विधो विकल्पः ॥९५॥

नियमोक्तिर्यथा,

विवादोऽपार्थ एवायं पार्थ एव धनुर्धरः।
यो न केवलमात्मीयैः परैरप्यभिनन्द्यते ॥

सोऽयमयोगान्ययोगात्यन्तायोगव्यवच्छेदलक्षणस्त्रिप्रकारो नियमः ॥ ९६ ॥

परिसङ्ख्योक्तिर्यथा,

पञ्च पञ्चनखा भक्ष्याः वामेनाक्ष्णा न पश्यति।
काठिन्यमस्याः कुचयोः किमसद् यन्न रोचते ॥

तदिदं विधिनिषेधाभ्यां विशेषाभ्यनुज्ञानं परिसङ्ख्येत्युच्यते ॥ ९७ ॥

अयुज्यमानस्य मिथः शब्दस्यार्थस्य वा पुनः।

ग्टहिणीपदप्राप्तिर्विहितक्रियाफलम्। सोऽयमिति। जात्यादय एव पदार्थास्ते च विकल्पन्ते। कुतो जात्यादिना तद्व्यवस्था। वाशब्दः पाक्षिकभावमाहेति भावाभावसङ्करः ॥ ९५ ॥

अपार्थ एवेति। विशेषणसङ्गत एवकारः केवलविशेषणयोगस्यासम्भवे व्युत्पत्तिवशेन तदभावं व्यवच्छिन्दन् योग्यव्याहत्तौ अवतिष्ठते। पार्थ एवेति विशेष्यसङ्गत एव शब्दस्तदन्यस्य धनुर्धरतारूप विशेषणं व्यावर्त्तयन् अन्ययोगव्यवच्छेदद्योतको भवति। केवलमिति। अभिनन्दनस्य नायोगं न वा अन्ययोगं व्यवच्छिनत्ति। किन्तु तत्सम्बन्धं बोधयन्नात्यन्तिकमयोगमत्यन्तायोगव्यवच्छेदोऽभिधीयते ॥ ९६ ॥

पञ्चपञ्चेति। पञ्चनखेषु पञ्च भक्ष्या नान्ये। कुचयोरस्याः काठिन्यं न वचनादाविति विशेषनिषेधमनुजानीतः। वामेन न पश्यति दक्षिणेन तु पश्यत्येव। किमसत् किमशोभनम्। यद्यस्यै न रोचते इतरत्तु सर्वैवेति विशेषनिषेधौ शेषविध्यभ्यनुज्ञाविषयाविति ॥ ९७ ॥

अयुज्यमानस्येति। पूर्वं पदैकवाक्यता ततो वाक्यैकवाक्यत्वमनन्तरं प्रकरणैक-

योजना क्रियते यासौ युक्तिरित्युच्यते बुधैः ॥ ९८ ॥
पदञ्चैव पदार्थश्च वाक्यं वाक्यार्थ एव च।
विषयोऽस्याः प्रकरणं प्रबन्धश्चाभिधीयते ॥ ९९ ॥
तत्र, योगकारणपर्य्यायाङ्गाङ्गिभावपरम्पराः।
पदयुक्तेर्निमित्तं स्युर्निरूढाः पदसिद्धये ॥ १०० ॥
विरुद्धानां पदार्थानां जात्यादीनां परस्परम्।
योजनायेह तां युक्तिं पदार्थविषयां विदुः ॥ १०१ ॥
गर्भः सह निगर्भेण संवृतिः ससमुच्चया।
हेतवो वाक्ययुक्तीनां क्रियन्तामेवमादयः ॥ १०२ ॥

वाक्यत्वमिति प्रबन्धनिर्वहणं यावत् कविव्यापारः। तत्र गामभ्याज गुक्लां दक्षिणेत्यादीनां लोके गृहीतव्युत्पत्तीनामेव यद्यपि काव्यानुप्रवेशस्तथापि भङ्गीभणितिसनाथा अन्येव काव्यपद्धतिमभ्यासते इत्यप्रहतानामुपादेयत्वे यत्रापाततः परस्परमन्वयी न प्रतिभासते तत्र अवश्यं कविना स्वाभिप्रायप्रतिच्छन्दकभूतविशेषनिवेशनेन विवक्षितवाक्यार्थप्रतीत्यस्खलनं विधेयम् अतएव वैचित्र्यादलङ्कारता। तदिदमुक्तम्। अयुज्यमानस्येति। आपातत इति शेषः। योजना अन्वयीपयिकरञ्जकविशेषनिवेशनं तस्य विषयः। शब्दार्थौ शब्दः पदं वाक्यं प्रकरणं प्रबन्धोऽयं पदार्थो वाक्यार्थश्च ॥ ९८ ॥

विषयभेदात् षोढायुक्तिरित्याह। पदञ्चैवेति ॥ ९९ ॥

योगेत्यादौ द्वन्द्वपरवर्त्ती परम्पराशब्दः प्रत्येकमन्वीयते। योगो योगरूढिः कारणं कार्य्यकारणभावः। निरूढाः प्रथिताः। पदसिद्धये। पदसमुदायात्मकवाक्यैकदेशतासिद्धये ॥१०० ॥

यद्यपि पदानामर्थद्वारक एव सम्बन्धः तथापि तदौपयिकविशेषः क्वचित् पदेषु एव साक्षादवसीयते क्वचित् पदार्थेषु इत्यभिप्रेत्याह। विरुद्धानामिति। एवं वाक्यवाक्यार्थयोरपि वाक्यमध्यवर्त्तिप्रकृतरसानुगुणरससमर्पकं वाक्यान्तरम् ॥१०१॥

गर्भस्तस्यैकदेशभूतस्तथाभूतो निगर्भः। उक्तेरुपसंहारवचनं संवृतिः। तुल्यप्रधानभावानां युगपदेकार्थसम्बन्धः समुच्चयः। आदिपदादन्वाचयादयः ॥ १०२ ॥

यत्तदादेरुपादानं क्रियाभ्याससमुच्चयौ ।
क्रियासमभिहारश्च वाक्यार्थान् युञ्जते मिथः ॥ १०३ ॥
यदश्रद्धेयशैलादिवर्णनाभ्युपपत्तये ।
वाक्यं सेह प्रकरणविषया युक्तिरिष्यते ॥
प्रबन्धविषयाप्येवं युक्तिरुक्ता मनीषिभिः ।
उदाहरणमालैषां रूपव्यक्त्यै निदर्श्यते ॥ १०४ ॥

अत्र योगरूढिपरम्परादिनिमित्ता पदयुक्तिर्यथा,

प्राच्यां निर्जितजम्भजिद्विपशिरःसिन्दूरशोभं दिशि
प्रत्याख्यातहयाङ्गनास्यहुतभुग्ज्योतिः प्रतीच्यर्णवे ।
प्रातर्जातमदोन्मिषत्कमलिनीकिञ्जल्ककल्कोद्भटं
भानोः पूर्णनभःकटाहकुहरक्रोड़ं महः पातु वः ॥

अत्र जम्भजिद्विप इति योगरूढिपरम्परा, हयाङ्गनास्यहुतभुगिति पर्यायपरम्परा, प्रातर्जातमदोन्मिषत्कमलिनीकिञ्जल्ककल्कोद्भटमिति हेतुपरम्परा, नभःकटाहकुहरक्रोड़मित्यङ्गाङ्गिभावपरम्परा च परिस्फुरन्ती दृश्यते ॥ १०५ ॥

यत्तदोः उद्देश्यविधेयगामिनोरादिग्रहणादिदमेतदासां क्रियाणामावृत्तिरभ्यासः । विजातीयानामेकदा एकत्रसम्बन्धः समुच्चयः । समभिहारो भृशत्वं प्रकर्ष इति यावत् ॥ १०३ ॥

अतिमात्रतया प्रतिभासमानत्वमश्रद्धेयता । तदेतासां युक्तीनामतिदुरूहत्वादाह । उदाहरणमेवेति ॥ १०४ ॥

जम्भजित्पदं कृदन्तत्वाद्यौगिकम् । तथा जम्भजिद्विप इत्यपि समासत्वात् । तदेतदुभयं योगेनातिप्रयुज्यमानं निरूढिद्वयेन विवक्षितैरावतरूपे वस्तुनि नियम्यते । हयाङ्गनेति । वडवापर्यायः । आस्यमिति मुखपर्यायः । हुतभुगित्यनलपर्यायः सेयं पदपरम्परापर्यायताप्रतिसन्धानेन अभिमतवड़वामुखानलप्रतीतिं करोति । मदस्य किञ्जल्कोन्मेषे तस्य कल्के तस्यापि उद्भटतायां हेतुभाव इति

विरुद्धजात्यादियोगनिमित्ता पदार्थयुक्तिर्यथा,

नागेन्द्रकरोरुदोः करिशिरःपीनस्तनांसं वपुः
स्त्रीपुंसाकृति यत् पितुस्तव मुखे रम्योग्रमीक्षामहे ।
वाराह्या इति नर्मणीभवदनः पश्यन् यदास्या मुखं
नाभिष्टौति हसन्न निन्दति तदा श्लिष्टोऽम्बया पातु वः ॥

अत्र स्त्रीपुंसाकृति इति विरुद्धजातियोजना, नाभिष्टौति न निन्दतीति विरुद्धक्रियायोजना, रम्योग्रमिति विरुद्धगुणयोजना, मुखे वपुरीक्षामहे इति विरुद्धद्रव्ययोजना च लक्ष्यते ॥ १०६ ॥

वाक्यगर्भादिविषया वाक्ययुक्तिर्यथा,

दिङ्मातङ्गघटाविभक्तचतुराघाटा मही साध्यते
सिद्धा मा च वदन्त एव हि वयं रोमाञ्चिताः पश्यत ।

कार्यकारणपरम्परा । नभः कटाहोऽङ्गी । तस्याङ्गमेकदेशः कुहरं तस्यापि क्रीड इत्यङ्गाङ्गिपरम्परा च यथाभिमतपदैकवाक्यतानिदानमिति तदेतद् व्याचष्टे । अत्रेति । परिस्फुरन्ती कविशक्तिव्यञ्जकतया सहृदयहृदयेषु प्रतिफलन्ती ॥ १०५ ॥

नागेन्द्रकरवदूरुः पार्वतीभागे दीर्घाहुश्च देवभागे करिकुम्भत्पीनः स्तनी देवीभागे । अंसः स्कन्धश्च देवभागे । एवं विधत्वत्पितुरीश्वरस्य वपुः त्वन्मुखे । एकविषाणतया करिकरिणीसमाहारात्मनि वीक्ष्यामह इति वाराह्या परिहासोक्तिः । वाराही वराहप्रकृतिभूतो मातृविशेषः । इभवदनो विनायकः । स्त्रीत्वपुंस्त्वयोः परस्परपरिहारेण उपलभ्यादिरुद्धयोरपि त्वत्पितुरित्यनेन स्तुतिनिन्दयोः प्रतिषेधेन रम्यताभीषणतयोर्भागव्यवस्थया मुखवपुषोः सादृश्येनाभितोऽभिप्रायप्रतिबिम्बितेन योजना विहिता इति तत्प्रतिपादकानां पदानामेकवाक्यतासिद्धिः । तदिदमाह । अत्रेति ॥ १०६ ॥

जातिक्रियेत्यादिना क्रमेण विरोधप्रसिद्धेर्गुणविरोधम् उल्लङ्घ्य क्रियाविरोधो व्याख्यातः । आघाटः सीमा । गर्भो विहितपूर्वस्तत्रैव आश्चर्यरसाविष्टस्य वक्तुः

विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत् कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥

अत्र वदन्त एव हि वयं रोमाञ्चिताः पश्यतेति वाक्यगर्भः। तत्रैव पश्यतेति वाक्यान्तरे भावाविष्कारवाचा निगर्भः, किमपरं रामाय तस्मै नम इति वाक्यसंवृतिः, यस्मादाविरभूत् कथाद्भुतमिदं यत्रैव चास्तं गतमिति वाक्यसमुच्चयः। सेयमेतेषां योजनाद्वाक्यविषया युक्तिर्भवति ॥१०७॥

यत्तदाद्युपादाननिमित्ता वाक्यार्थयुक्तिर्यथा,

तिष्ठ द्वारि भवाङ्गने व्रज बहिः सद्मेति वर्त्मेक्षते
शालामञ्च तमङ्गमञ्च वलभीमञ्चेति वेश्माञ्चति।
दूतीं सन्दिश सन्दिशेति बहुशः सन्दिश्य सास्ते तथा

पश्यतेति वाक्यान्तर निगर्भः। गर्भवाक्येन समर्थ्यमाणप्रकृतरसान्वयिनि रसे प्रकर्षाधायकी निगूढी गर्भो निगर्भ इत्युच्यते। तदिदं भावाविष्कारवाचीत्युक्तम्। विप्राय प्रतिपाद्यते सम्पत् न स्वयं भुज्यत इत्यादिवक्तव्ये किमपरमित्यस्य संवृतित्वेन योजना। एवं हि कियदस्य महानुभावस्य तादृशाचरितं प्राप्यते तदिह मौनमेवोचितमिति भूयान् प्रकर्षोऽवसीयते। यस्मादाविरभूत्कथादद्भुतमिदं यत्र एव च अस्तङ्गतमिति वाक्यद्वयस्य पूर्ववाक्यगततर्कार्थसमुच्चयवाचिना चकारेण योजना व्यक्तैव। एवमादय इति। तद्यथा। वीथ्यङ्गानि त्रयोदशप्रस्तावनापरिचेयानि। सन्ध्यङ्गानि विलासाद्यानि चतुःषष्टिसन्धयश्च रूपकावयवभूता मुखप्रतिमुखगर्भविमर्शनिर्वहणाख्याः पञ्च। प्रकृतरसावस्थारूपाणि च पञ्चैव। बीजबिन्दुपताकाप्रकरी कार्य्याणि तत्तत् प्रकरणप्रबन्धरूपवाक्यैकदेशयोजनानि अवगन्तव्यानि ॥ १०७ ॥

तिष्ठेति। उपस्थितिसमयसीमामतिक्रामति प्रियतमे तत्कालदिगुणितोत्कण्ठातरलितान्तःकरणा कदाचित् प्रागिव गर्भगृहद्वारि तिष्ठति। ततस्तत्र अनवलोकमाना गृहाङ्गणे भवति। तदनन्तरं वेश्मनो बहिर्व्रजति। सोऽयं विजातीयक्रियार्थनानाधातुगोचरः सर्वकालेषु समुच्चयेऽन्यतरस्याम् इति क्रीडोद्धि-

तल्पे कल्पमयीव निर्घृण! यथा नान्तं निशा गच्छति॥

अत्र प्रथमपादे क्रियासमुच्चयः द्वितीये क्रियाभ्यासस्तृतीये दूतीं सन्दिश सन्दिशेति यावत् क्रियासमभिहारः। शेषे तु तथा सास्ते यथा निशान्तं न गच्छति इति यत्तदोरुपादानं वाक्यार्थयुक्तेर्हेतुः प्रतीयते। सेयमुक्तलक्षणा वाक्यार्थयुक्तिर्भवति॥ १०८॥

अश्रद्धेयपर्वतादिवर्णनोपपत्तिहेतुः प्रकरणविषया यथा,

मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृङ्गैः।
भवन्ति नोद्दामगिरां कवीनामुच्छ्राय सौन्दर्य्यगुणा मृषोद्याः॥
॥ १०९॥

प्रबन्धव्यापि वस्तूपपत्तेर्हेतुस्तु प्रबन्धविषया युक्तिर्भवति यथा, धूमज्योतिःसलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥ ११०॥

रनुशिष्यते। अतएव दर्शनावच्छेदभूतद्वारावस्थानादिसामान्यवचनः समुच्चये सामान्यवचनस्य इति अनुशासनान्नियमितप्रयुक्तिरौचितिरनुप्रयुज्यते। नायकस्य सर्वथा हृदयवैशसं सर्वथैवाश्रद्दधाना दूरदूरतरदूरतमरथ्याभागावलोकनार्थिनी शालां गृहमारोहति। ततः तस्मात् उच्चैस्तमङ्गमट्टालकम् अनन्तरं तस्मात् उच्चतरां वलभीमुपरितनकुटीमिति। अतएव अञ्चनक्रियैव अत्रावृत्तिति क्रिया समभिहारे लोट्लोटौ हि स्तौ वाचतध्वमीः इति अनुशिष्यते। अतएव च यथा विध्यनुप्रयोगः पूर्वस्मिन् इति तस्यैव धातोरनुप्रयोगोऽपि। एवमप्यनागच्छति नायके दूतीव्यापारः शरणं यत् कुण्डनायां स्वयं वा तत्र गमनमित्युपदिश्यते तेन तत् तदभिप्रायसंवर्द्धकमन्दिशप्रकर्षः सोऽयमाभीक्ष्ण्यादिरूपया व्यज्यते। अतएव लोटः समभिव्याहारो विषयो न तु घञादिवदभिधेय इति पूर्वाचार्याः।

उक्तिप्रकारो भणितिः सम्भवेऽसम्भवे च सा।
विशेषसंवृत्याश्चर्य्यकल्पनासु च कल्पते ॥ १११ ॥

तत्र सम्भवभणितिर्यथा,

सद्योद्रावितकेतकोदरदलस्रोतःश्रियं बिभ्रती

इति शब्दादधिकं चतुर्थवाक्यानुप्रविष्टमिति यावत् शब्देनावच्छिनत्ति सन्दिश्य-सन्दिशेति यावदिति दिक् ॥ १०८ ॥ १०९ ॥ ११० ॥

उक्तीति। उक्तिरभिधानम् उच्चारणक्रिया लक्षणक्रिया सा सर्ववाक्यसाधारणी कथमलङ्कार इत्याशङ्क्य प्रकारपदम्। प्रकारो भङ्गीरूपता। लौकिकशास्त्रीयवचनातिगामी विशेषः स एव कैश्चिदव्याप्तिमननुसन्दधानैः अलङ्कारसामान्ये उक्तः। उक्तिरूपत्वाविशेषे कथमयमेव सङ्गच्छतामित्यतो विभागप्रदर्शनव्याजेन विषयविशेषादेव तद्रूपताम् उपपादयति। सम्भव इत्यादि। तत्र बहिरसम्भाव्यमानस्यापि प्रतिभानिर्मितचित्रतुरगवत्प्रतीतिः सम्भवस्तामर्पयन्ती सम्भावनात्मिका भणितिः सैव हि किन्तु अस्ति काचिदपरापि पदानुपूर्वी यस्यां न किञ्चिदपि किञ्चिदिवावभातीति न्यायेन तत् तदर्थनिर्माणप्रवीणा "यथास्मैरोचते विश्वं तथैव परिवर्त्तते" इति व्यवहारकारणं भवतीति तथाविध एव विषये शास्त्रप्रसिद्धप्रकारवैपरीत्येन बाधवर्णनमसम्भावना। तदुच्यते। इह तेज अन्तिक इणीजअमिणमीजाणसअलपरिणामम्। वाआसुठिअं दीसइ आमी अघणं वतुच्छंव। अतएव इयं निषेधरूपा। तज्जातीयव्यावृत्तो धर्मो विशेषस्तं क्वचिदिदधाना कवेरभिप्रायविशेषमर्पयन्ती निषेधप्रसङ्गे विशेषभणितिर्विधिरूपा भवतीति तामवलम्बमाना चमत्कारकारिणी विशेषे पर्य्यवस्यन्ती वर्णनापल्लवप्रसङ्गे सङ्कोचमवगाहमाना विधौ निषेधरूपा पर्य्यस्यति। अतर्कितोपनतं विस्मयजनकम् आश्चर्यं तस्य निषेधे विधातव्ये यत्किञ्चिद्विधानं तदाश्चर्य्यरूपताम् अन्तरेण काव्यकक्षामारोढुं न क्षमत इति नूनमनया विस्मयार्पणमेव सर्वस्वभूतम् अवलम्बनीयमिति निषेधविधिप्रसङ्गे निषेधरूपाभणितिर्बहिरसम्भाविनः क्वचिदसतो विशेषस्य उत्प्रेक्षाकल्पना। तामाश्रयन्ती विधाननिषेधमात्रेण चरितार्था किञ्चिद्विशेषं विदधाति इति विधिनिषेधप्रसङ्गे सामान्यतः प्रतिषेधति विशेषतश्च विधत्त इति निषेधविधिरूपा कल्पनाभणितिः ॥ १११ ॥

सद्य इति। केतकोदरदलानां द्रावणं ततः स्रोतोरूपता ततस्तेन उप-

येयं मौक्तिकदामगुम्फनविधेर्योग्यच्छविः प्रागभूत्।
उत्सेक्या कलशीभिरञ्जलिपुटैर्मेया मृणालाङ्कुरैः
पातव्या च शशिन्यमुग्धविभवे सा वर्त्तते चन्द्रिका॥

अत्र ज्योत्स्नायाः सद्योद्रावितकेतकोदरदलस्रोतःसादृश्यादिसम्भवादियं सम्भवभणितिर्विधिरूपा॥ ११२॥

असम्भवभणितिर्यथा,

क्व पेयं ज्योत्स्नाम्भो वदत विषवल्लीसरणिभि-
र्मृणालीतन्तुभ्यः सिचयरचना कुत्र भवति।
क्व वा पारीमेयो वत वकुलदाम्नां परिमलः
कथं स्वप्नः साक्षात् कुवलयदृशं कल्पयतु ताम्॥

अत्र ज्योत्स्नादीनां मृणालादिभिः पेयत्वादेरसम्भवादियमसम्भवभणितिः॥ ११३॥

निषेधरूपा विशेषभणितिर्यथा,

रेवतीदशनोच्छिष्टपरिपूतपुटे दृशौ।
वहन् हली मदक्षीवः पानगोष्ठ्यां पुनातु वः॥

अत्र रेवतीदशनोच्छिष्टयोरपि हलिदृशोर्यत् पूतत्वं मद-

मितायां बहलतरबहिर्भागस्य कलशीभिरुत्सेचनम् अनन्तरं किञ्चिदल्पीभूतमध्यभागस्य करतलाञ्जलिपुटैर्मानं ततः शेषीभवतः सारभागस्य मृणालाङ्कुरैः पानमिति बहिरसम्भाविन एव श्रियं विभ्रतीति निदर्शनया योग्यपदेन उत्सेक्येत्यादिभिः चमत्कारिणी सम्भावना जायते॥ ११२॥

क्व पेयमिति। स्वप्नस्य साक्षात्कल्पने सामर्थ्यम् असम्भावितं तदेवमेव उच्यमानं तथा शोभामुन्मीलयतीति क्व पेयम् इत्यादिप्रतिवस्तुना निर्देशव्यञ्जारक्तिसुषमाविस्तारं कुर्वाणा भवति असम्भवभणितिः। पारी भाण्डभेदः॥ ११३॥

रेवतीति। दशनोच्छिष्टं चुम्बितम्। उच्छिष्टचौवयोः न क्वचित् पूतत्वं

जीवस्यापि हलिनो यत् पावनत्वमसौ विशेष इतीयं विशेषभणितिर्निषेधे विधिरूपा ॥ ११४ ॥

संवृतिभणितिर्यथा,

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे ! प्रत्युपमानं वपुस्तस्याः ॥

अत्र प्रसिद्धवर्णनाप्रपञ्चविधेराभरणस्याभरणं वपुः इत्यादिवाक्यैः संवरणादियं संवृतिभणितिर्विधौ निषेधरूपा ॥ ११५ ॥

आश्चर्यभणितिर्यथा,

ज्योतिर्भ्यस्तदिदं तमः समुदितं जातोऽयमद्भ्यः शिखी
पीयूषादिदमुत्थितं विषमयं छायात्मजन्मातपः ।
को नामास्य विधिः प्रशान्तिषु भवेद् वाढं द्रढीयानयं
ग्रन्थिर्यत् प्रियतोऽपि विप्रियमिदं सख्यः कृतं सान्त्वनैः ॥

अत्र ज्योतिःप्रभृतिभ्यस्तमःप्रभृतीनामुत्पत्तेराश्चर्यरूपत्वादियमाश्चर्यभणितिर्निषेधविधौ विधिनिषेधरूपा ॥११६॥

पावनत्वं वा दृष्टचरमिति हलिनेत्रपुटहलिनोर्विधीयमानं दैवताचरितस्य लोकोत्तरतां गमयतीति निषेधप्रसङ्गे विधिरूपेयं भणितिः ॥ ११४ ॥

आभरणस्येति । अत्र चन्द्रमुखी दुग्धधवलनयना बिम्बोष्ठी करिकुम्भस्तनीत्यादिकविसमयप्रसिद्धवर्णना प्रपञ्चप्रसङ्गे यथोक्तरूपेण तस्य सङ्कोचो निषेधः तत्प्रतिष्ठाभणितिः अलङ्करणमेव अनया क्रियत इति कान्तिविशेषं व्यञ्जयन्ती विधौ प्रसक्ते निषेधरूपा भवति ॥ ११५ ॥

ज्योतिर्भ्य इति । प्रियो हि न अप्रियमाचरतीति उत्सर्गसिद्धाप्रियानाचरणं दैवगत्या शठे सम्भाव्यमानम् आश्चर्यमुन्मुद्रयत् सामान्यपरम्परया प्रेमाविष्टम् अन्तःकरणमावेदयति । यदि ज्योतिरादेस्तमः प्रभृतीनामुद्गमः स्यादपि प्रियादप्रियमिति सर्वथैव निषेधे विधातव्ये प्रत्यक्षपरिकल्पितस्य अन्यथा कर्तुमशक्यत्वात् प्रमेयविरोधमसहमाना विधत्ते च निषेधति चेति निषेधविधिप्रसङ्गे विधिनिषेधरूपा भणितिर्भवति ॥ ११६ ॥

कल्पनाभणितिर्यथा,

दृश्यं दृशां सहस्रैर्मनसामयुतैर्विभावनीयं च।
सुकृतशतकोटिभोग्यं किमपि वयः सुभ्रुवः स्वदते॥

अत्र वयोरामणीयकातिशयस्य दृक् सहस्रादिभिरेवावलोकनीयत्वादियोग्यताकल्पनादियं कल्पनाभणितिर्विधिनिषेधे निषेधविधिरूपा॥ ११७॥

वाक्ये शब्दार्थयोः सम्यग्रचना गुम्फना स्मृता।
शब्दार्थक्रमपर्याय पदवाक्यकृता च सा॥ ११८॥

तासु शब्दकृता यथा,

रामाभिषेके मदविह्वलायाः कराच्चुतो हेमघटस्तरुण्याः।
सोपानमासाद्य चकार शब्दं ठं ठं ठ ठं ठं ठ ठ ठं ठ ठं ठः॥

दृश्यमिति। यद्यपि द्वाभ्यामेकेनाल्पीयसा च नेत्राभ्यां मनसा सुकृतेन च वयसो यौवनस्य दृश्यत्वविभावनीयत्वभोग्यत्वानि प्रतीति सुखमवतीर्णानि तथापि जीवितसर्वस्वभूतायामितरकामिनीसाधारण्यामितरसाधारण्यमसहमानो दृगादिसामान्ये सहस्रत्वादिकं कल्पयन् साधारणधर्मनिषेधसरणिमारुह्य विशेषं विधत्ते। सेयं भणितिर्विधिनिषेधप्रसङ्गे निषेधघटकद्वाराविधिरूपा भवतीति आसां विस्तरः॥ ११७॥

वाक्य इति। एकार्थप्रतिपादनावच्छिन्नः शब्दसमुदायो वाक्यं तस्मिन् विषयभूते आनुपूर्व्येण ग्रथनं रचना सा कथमतिप्रसक्तापि अलङ्कार इत्यत आह। सम्यगिति। प्रकृतपरिपोषाधानलक्षणम् औचित्यमापन्न इत्यर्थः। वाक्यत्वमर्थशब्दाभ्यां विशेषणविशेष्याभ्यां व्यवतिष्ठते। तेन द्वयोः एव गुम्फना समाप्यत इत्याशयेन शब्दार्थयोरित्युक्तम्। तत्र शब्दो द्विविधो वाच्य उपाधिश्च। प्रतिपादकशब्दो द्विरूपः पदवाक्यभेदात्। पदं द्विधा पर्यायभूतरूपम् अतथा रूपञ्च। तदेतत् विवक्षावैचित्र्याम् अङ्गीकृत्य विभजते। शब्द इति। अप्रतिपादकः शब्दः शब्दपदेनोक्तः। अर्थोवाच्यः। क्रमग्रहणमुपाध्युपलक्षणम्॥ ११८॥

रामेति। राज्याभिषेकोत्सवजातहर्षायाः करात् प्रच्युतस्य सोपानपर-

सेयं ठं ठमित्यादेर्निरर्थकस्य श्लोकपादस्यार्थानुगुण्येन वाक्ये रचितत्वाच्छब्दरचना ॥ ११९ ॥

अर्थक्रता यथा,

दिक्कालात्मसमेव यस्य विभुता, यस्तत्र विद्योतते
यत्रामुष्य सुधीभवन्ति किरणा, राशेः स यासामभूत् ।
यस्तत्पित्तमुषःसु योऽस्य सविषे, यस्तस्य जीवातवे
वोढा यद्गुणमेष मन्मथरिपोस्ताः पान्तु वो मूर्त्तयः ॥

सेयं व्योमादीनामष्टानामपि महेशमूर्त्तिलक्षणानामर्थानामुत्तरोत्तरसङ्कलनया रचितत्वादर्थरचना ॥ १२० ॥

क्रमक्रता यथा,

नीलाब्जानां नयनयुगलद्राघिमा दन्तपत्रः

स्मरासु स्खलतः काञ्चनकलशस्य भूभागप्राप्ति यावत् क्रमेणोच्चरन्तशब्दमालानुक्रतेति प्रक्रतार्थानुगुण्यम् । एवं हि करच्युतमपि न सम्भावयतीति कोऽपि मदप्रकर्षो व्यज्यते ॥ ११९ ॥

दिक्कालेति । दिक्कालात्मतुल्यं सर्वमूर्त्तसंयोगाश्रयतालक्षणं विभुत्वमाकाशस्यैव तस्मिन्नर्थाच्चिते यच्छब्दोऽयमुद्देश्यगामी निविशते तमुपजीव्य तच्छब्देन प्रतिनिर्देशो युक्तः । आकाशे विशेषेण चन्द्रतारादितेजोऽभिभवसामर्थ्यलक्षणेन द्योतते भगवान् आदित्य इति यच्छब्देन तमुद्दिश्योत्तरवाक्ये अदसाप्रतिनिर्दिष्टवान् । कर्णगत्याप्रतिफलिताः सूर्यकिरणाः सलिलमये शशिन्येव सुधाव्यपदेशं लभन्ते तत्र एव यच्छब्दो निविष्टस्तदुपनीतमर्थमुत्तरः तच्छब्दो विषयीकरोति इत्यादि अपामेव राशेश्चन्द्रो जातस्तासां पित्तं वह्निस्तस्य सायं प्रातराहुतये यजमानः स वायुना जीवति । स च पृथिवीगुणं गन्धं वहतीति पूर्वपूर्वसङ्कलनेन उत्तरं वाक्यार्थरचनाविहितेति । यद्यपि चार्थगुम्फो शब्दगुम्फो ध्रुवभावी तथापि प्रथमानुसन्धेयम् अर्थगुम्फनमेव अत्र प्रधानमिति तेन एव व्यपदेशो युक्त इत्याशयवान् व्याचष्टे । अत्रेति । यदि इयं शृङ्खला न प्रतिसन्धीयते कथं परमेश्वरमूर्त्तयोऽष्टौ लभ्यन्त इति भावः ॥ १२० ॥

कुम्भावेभौ कुचपरिकरः पूर्वपक्षीचकार।
भ्रूविभ्रान्तिर्मदनधनुषो विभ्रमानन्ववादीद्
वक्त्रज्योत्स्ना शशधररुचं दूषयामास यस्याः॥

अत्र पत्रप्रदानपूर्वपक्षोपन्यासानुवाददूषणोद्भावनानां बुधजनप्रसिद्धक्रमेण रचितत्वादियं क्रमरचना॥ १२१॥

पर्य्यायकृता यथा,

कणइल्लिचिअ जाणइ कुन्तपलत्ताइ कीरसंलविरी।
पूसअभासं मुच्च स ण हु रे हं धिठंवाआडी॥ (प)

सेयं शुकनामपर्य्यायाणामर्थानुगुणरचितत्वात् पर्य्यायरचना॥ १२२॥

(प) शुक्येव जानाति शुकप्रलपितानि कीरसंलापिनी।
कीरभाषां मुञ्च सा न खलु रेऽहं धृष्टशुकी॥

नीलार्चेति। पत्रदाने स्पर्द्धा व्यज्यते। सा च सादृश्यपर्य्यवसायिनी इति प्रतीयमानोपमा। इभकुम्भपूर्वपक्षीकरणेन कुचाभोगस्य सिद्धान्तभावोऽवगम्यते। तथाच व्यतिरेको ध्वनितः। अनुवादेनापि उपमा प्रतीयते दूषणेन व्यतिरेक इति प्रकृतपर्य्यवसाने समासोक्त्या पत्रदानादीनां विद्वदादिप्रसिद्धानां शब्दानभिधेय एव क्रम उपाधिभूतो ग्रथित इत्युदाहरण व्याख्यानग्रन्थार्थः॥ १२१॥

कणइल्लिचिअ। केनचिद्विटेन शुकभाषामनुकुर्वता प्रियायां परिहास आरब्धः स तस्य दुर्विदग्धत्वमाकलयन्ती तदुचितमुत्तरमदात्। शुकप्रलपितानि किल शुकी जानाति नान्या न च अहं शुकी। ततो विफलत्ववायं प्रयास इत्यर्थः। अत्र कुन्तकीरपूसशब्दाः शुकपर्य्यायाः। कणइल्लीवाआडीशब्दौ शुकीपर्य्यायौ। तत्रापि कीरशब्दः तत्समः। अन्ये देशीरूपाः। तदेतेषां पर्य्यायाणां यथोक्तरूपानुगुणानामेकत्ववाक्ये गुम्फनमेव कविसंरम्भगोचर इति॥ १२२॥

पदवक्रता यथा,

लोलल्लाङ्गूलवल्लीवलयितवकुलानीकहस्कन्धलोलै-
र्गोलाङ्गूलैर्नदद्भिः प्रतिरसितजरत्कन्दरामन्दिरेषु ।
षण्डेषूद्दण्डपिण्डीतगरतरलनाः प्रापिरे येन वेला-
मालम्बग्रोत्तालतल्लस्फुटितपुटकिनीबन्धवो गन्धवाहाः ॥

अत्र लाङ्गूलवलयितवकुलैर्नदद्भिर्गोलाङ्गूलैः प्रतिरसित-जरत्कन्दरामन्दिरेषु षण्डेषु उद्दण्डपिण्डीतगरतरलनाः पुट-किनीबन्धवो गन्धवाहा वेलामालम्बग्र येन प्रापिरे[]इत्यतो-ऽधिकानामपुष्टार्थानामपि पदानामनुप्रासाय छन्दःपूरणाय चार्थानुगुण्येन रचितत्वादियं पदरचना ॥ १२३ ॥

वाक्यवक्रता यथा,

पतिश्वशुरता ज्येष्ठे पतिदेवरतानुजे ।
इतरेषु तु पाञ्चाल्यास्त्रितयं त्रितयं त्रिषु ॥

इह महतोऽर्थस्याल्पीयसा ग्रन्थेनाभिधानमिति व्युत्क्रमे-णापि ग्रन्थलाघवाय वाक्यार्थो रचित इतीयं वाक्यरचना ॥ १२४ ॥

लोलल्लाङ्गूलवल्लीति । लाङ्गूलवलयितेत्यादि यथोक्तवाक्यविरचनमात्रेण एव प्रयोजनपरिग्रहे सिद्धे यदधिकानां लोलल्लीप्रभृतिपदानामावापस्तेन विना न उचितानुप्रासिद्धिर्न च तया विना इत्तौचिती समाप्यते । न वा तामन्तरेण लाङ्गूलादीनामभिमतास्ते ते विशेषाः प्रतीयन्त इति पल्लवप्रतिष्ठा एव हि सरस्वतीसहृदयानावर्जयतीति । वाक्यप्रतीतिमात्रार्थानुपात्तेषु पदेषु यः । उपस्कारः पदैरन्यैः पल्लवं तं प्रचक्षते । अपल्लवन्तु यद्वाक्यं कविभ्यस्तन्न रोचते । प्रयुज्यते तथाभूतमुदीच्यैः कविगर्हितम् । तदिदमाह । अत्र इत्यादि ॥ १२३ ॥

वाक्यरचना तु महावाक्य एव भवतीति । तथाहि । पतिश्वशुरतेत्यादि-क्रमत्याचरमेव वाक्यं महतोऽर्थराशेः समर्पकमिति भावयतां सहृदयानां कवि-

श्रेय्यैत्याहुः पर्थानां घटनायां परस्परम् ।
सा प्रक्रान्तेन कस्मिंश्चिदपक्रान्तेन कुत्रचित् ॥ १२५ ॥
अतिक्रान्तेन कुत्रापि पदार्थवर्णयोः क्वचित् ।
वाक्यार्थवाक्ययोः क्वापि प्रकीर्णानाञ्च दृश्यते ॥ १२६ ॥

तासु प्रक्रान्तघटना यथा,

स तथेति प्रतिज्ञाय विसृज्य कथमप्युमाम् ।
ऋषीन् ज्योतिर्मयान् सप्त सस्मार स्मरशासनः ॥

सेयं सप्तर्षीणामागमनस्य प्रक्रान्तस्यैव घटनात् प्रक्रान्त-घटना ॥ १२७ ॥

अपक्रान्तघटना यथा,

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निषादस्य च संवादमृषेः संवरणस्य च ॥

सेयमपक्रान्तस्य निषादसंवरणसंवादस्य घटनादपक्रान्त-घटना ॥ १२८ ॥

त्वशक्तिरप्रत्यूहैव प्रकाश्यते । अतएव शक्तितिरस्कारादायन्तौ अभिधाय मध्यमा-भिधाने क्रमभङ्गोऽपि तिरस्क्रियत इत्याह । अत्रेति ॥ १२४ ॥

श्रेय्येति । किञ्चिदेकं वस्तु बुद्धौ समाधाय तदधिकारप्रबन्धरचनायाम् अधिकस्य अन्तरान्तरा प्रकृते योजना श्रेय्या । पदार्थानां प्रस्तुताप्रस्तुतवस्तूनाम् । तच्च योजनीयं शब्दार्थभेदेन द्विविधम् । तत्र वस्तुवाक्ययोरेव योजना महा-कविप्रबन्धेषु दृश्यते । अर्थस्तु प्राकरणिकार्थोपयोगी तदनुयोगी चेति द्विविधः । द्वितीयोऽपि अतिक्रान्तो तथाभूतश्चेति पूर्ववद्विभागवाक्यं व्याख्येयम् ॥ १२५ ॥

पदार्थं पदसिद्ध्यर्थमेवं वाक्यार्थमिति ॥ १२६ ॥

सेयं सप्तर्षीणामिति । गौरीपरिणयप्रापकतया प्रकरणसङ्गतसप्तर्षि-वृत्तान्तः ॥ १२७ ॥

इयमप्रक्रान्तस्येति । संवरणनिषादसंवादस्य पूर्वापरप्रकरणानुपयोगेऽपि इतिहासरूपेण सङ्गतिः ॥ १२८ ॥

अतिक्रान्तघटना यथा,

तस्य चक्रुश्चमत्कारं व्यतीतसमया अपि ।
स्मितार्द्रमुकुलोद्भेदाः कदम्बवनराजयः ॥

इयमतिक्रान्तस्यापि कदम्बवनराजीनामार्द्रमुकुलोद्भेदस्य विरहिमनश्चमत्कारकारिणो रामस्य स्मृतिद्वारेण घटनादतिक्रान्तघटना ॥ १२९ ॥

पदघटना यथा,

छिन्नेनापतता वह्नौ यन्मुखेन हठात् कृते ।
स्वेति हेति हरिणोक्ते स्वाहासीत् सैष रावणः ॥

इयं स्वेति हेति वर्णाभ्यां स्वाहेति पदस्य घटितत्वात् पदघटना ॥ १३० ॥

वाक्यघटना यथा,

हंस प्रयच्छ मे कान्तां गतिरस्यास्त्वया हृता ।
विभावितैकदेशेन देयं यदभियुज्यते ॥

इयं पूर्वशास्त्रनिबद्धस्योत्तरार्द्धस्य तदर्थाननुयायिनापि प्रस्तुतार्थाविरुद्धेन पूर्वार्द्धेनैकवाक्यतया एव घटितत्वाद्वाक्यघटना ॥ १३१ ॥

इयमतिक्रान्तस्यापीति । कदम्बकुसुमोद्भेदस्य प्रत्यक्षस्य एव विरहिजनतातङ्कदायित्वं सम्भवतीति कथमतीतस्य तद्वयस्य इत्युक्तं "स्मृतिद्वारेणेति । सङ्कल्पवशेन प्रत्यक्षायमाणस्य इत्यर्थः । एवमनागतयोजनापि गुणादिना बोद्धव्या ॥ १२९ ॥

इयं स्वेति । स्वाहाकारप्रदानो होमस्तत्र सद्यश्छिन्नेन शिरसा प्राणशेषयोगात्पदार्द्धमात्रे निष्पादिते तदैव भूतकरुणासन्तानशान्तात्मना परमेश्वरेण खेदाविष्कारवाची हाशब्दःप्रयुक्तस्वेनैव निरन्तरमुच्चरता स्वाहापदं सिद्धमिति ॥१३०॥

इयं पूर्वशास्त्रेत्यादि सुगमम् ॥ १३१ ॥

प्रकीर्णघटना यथा,

एक्कहिं अच्छिहि सावणु अण्णहि भद्दवउ।
माहउ महिअलसत्थरि गण्डत्थले सरउ॥
अङ्गहि गिम्हु सुहच्छिइ तिलवणे मग्गसिउ।
मुद्धिहि मुहपङ्कअसरि आवासिउ सिसिरु॥ (फ)

अत्र श्रावणादीनामयुगपद्भावित्वेन विप्रकीर्णानां घटनादियं प्रकीर्णघटना॥ प्रकीर्णशब्दश्चायं शेषवाची तेनान्यासामपि प्रकीर्णघटनानामिहावकाशो भवति। तेन या इमा महाकविप्रबन्धेषु मुख्या गौणी लक्षणा तद्भावापत्तिरुपचरिता

(फ) एकस्मिन् अक्षि श्रावणः अन्यस्मिन् भाद्रपदः
माधवो महीतलसस्तरे गण्डस्थले शरत्।
अङ्गे ग्रीष्मः सुखासिका तिलवने मार्गशीर्षः
मुग्धाया मुखपङ्कजसरसि आवासितः शिशिरः॥

अत्र श्रावणादीनामिति। प्रकीर्णं विकीर्णमनेकत्र प्रतीतमिति यावत्। तद्द्विविधं कालतो देशतश्च। अत्र हि श्रावणादिमासर्तुषट्कस्य युगपदसम्भवत एकत्र विरहिणीशरीरे युगपद्भावो निबद्धः सगुणवृत्तिव्यपाश्रयेण श्रावणादिपदे प्रतिपाद्यमानः प्रवासविप्रलम्भप्रकर्षमावेदयतीति। एवं देशविकीर्णघटनापि उदाहार्या। यथा। अमृतमसृतं चन्द्रश्चन्द्रः तथा अम्बुजमम्बुजं रतिरपि रतिः कामः कामी मधूनि मधून्यपि। इति न भजते वस्तुप्रायः परस्परसङ्करं तदियमवस्था धत्ते भावान् कथं सकलात्मकान्। यस्तु अत्र सिद्धादिभेदः कश्चिदुपवर्णितः स तथा न चमत्कारकारीति ग्रन्थगौरवभयादुपेक्षितोऽस्माभिः। तत्तदनेकासाधारणरूपाणि अपि प्रकीर्णानि प्रकीर्णपदेन ग्राह्याणि। तेषामनुक्तान्यतया वा उपग्रहोऽपि प्रयुज्यत इत्याह। प्रकीर्णशब्दश्चायमिति। व्याख्यानान्तरप्रयोजनमाह। तेनेति। शब्दस्यार्थप्रतिपादनशक्तिरभिधा। सा

लक्षितलक्षणेतिशब्दवृत्तयस्ता अपीह श्रूयन्ते। तत्रादितः षट्स्वाधारवचनेषु मुग्धाया इति सम्बन्धिपदे च मुख्या, शेषयोर्द्वयोराधारवचनयोर्गौणी, श्रावणादिषु चतुर्षु मासवचनेषु लक्षणा, षट्स्वपि चाधेयवचनेषु वर्षादिषु लक्षिताभिहितेषु अपि युगपदसम्भवत्सु श्रुतार्थापत्तिलभ्या तावत् भावापत्तिः, आवासित इति क्रियापदे चोपचरिता व्यक्तमेव प्रतीयते। लक्षितलक्षणापि चैतास्वेव व्याख्यानत उन्मिषति। तथाहि आवासितशब्दोऽयमभिमतप्रदेशनिवेशितमहापरि-

---

विधा मुख्या गौणी लक्षणा च। तासु सुखमिव प्रथमं यस्यामर्थः प्रतीयते सा मुख्या तथाभूतार्था तद्भावापत्तिश्च। तत्रावान्तरार्थसम्बन्धविषया तथाभूतार्था। यथा। खात्मेन्दुवह्निपवनार्कमहीपयोभिरष्टाभिरेव तनुभिर्भवता समस्ते। व्याप्ते जगत्यपरमिच्छति योऽत्र वक्तुं कीन्वीगतत्वपतया सदृशोऽस्ति तेन। सैवार्थान्तरस्वार्थसम्बन्धविषया तद्भावापत्तिः। अतथाभूतस्य तथाभावापादनं हि सा। अतएव स्वतोऽन्यतो वा स्वार्थावच्छिन्नस्य साक्षादभिधानशक्तिरेव मुख्येत्याचार्याः। यथा। कमला अक्षसणिआ हंसाउडडाविआणअपिउछा। केण विगामतडाए अब्भं उत्ताणअंवूढम्। गुणव्यवहितार्था गौणी। गुणनिमित्ता उपचारनिमित्ता च। तत्र द्वयोर्यत्र द्रव्यवचनयोः सामानाधिकरण्येन वैयधिकरण्येन वा प्रयोगे विशेषणविशेष्यभावान्यथानुपपत्त्या प्रतीयमानाभिधीयमानगुणद्वारकसम्बन्धो भवति सा गुणनिमित्ता। यथा। पडिवक्खमसुपुञ्जे लावण्णकुण्डे अणङ्गअकुम्भे। पुरिससअहिअअभरिए कीस खलन्ती थणे वहसि। मुख्यया गौण्या वान्यविशेषणस्यान्यत्र प्रयोग उपचरिता सापि गुणयोगमुपजीवन्ती गुणवृत्तिरेव। एतावांस्तु विशेषो यद्गुणनिमित्तायाम् अभिधेयगुणयोग इह तु स्वाभिधेयविशेष्यगुणयोग इति। यथा। परार्थे यः पीडामनुभवति निर्व्याजमधुरो यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः। न सम्प्राप्तो वृद्धिं सपदि भृशमत्रैव पतितः किमिन्दोर्दोषो यत् न पुनरगुणायामरभुवः। स्वार्थसम्बन्धव्यवहिता लक्षणा। तदुक्तम्। अभिधेया विना भूतप्रतीतिर्लक्षणेति या। सैषा विदग्धवक्रोक्तिजीवितं वृत्तिरिष्यते॥ सा द्विधा। शुद्धा लक्षित-

च्छदे महाराजादौ निरूढाभिधानशक्तिः। स चोपचारेण श्रावणादिषु प्रयुज्यमानस्तेषामपि महत्त्वमभिलक्ष्य महापरिच्छदतां महारम्भत्वञ्च लक्षयन् प्रस्तुताया अपि प्रवृत्तेर्महान्तमनुबन्धं लक्षयति। ते च युगपल्लोचनादावनुपपद्यमानस्थितयः स्वशब्दशक्तिभिस्तत्र तत्र निवेश्यमानाः स्वधर्मसम्पदः प्रत्यासन्नायां तद्धर्मसम्पदमुपलक्षयन्ति। असावसौ विरहवत्या अपि वियोगवेदनातिशयं लक्षयन्ती कमितरि स्नेहातिशयं लक्षयति। तत्र श्रावणो भाद्रपद इत्युभाभ्यामवयवाभ्यां वर्षर्त्तुर्लक्ष्यते। स च लोचनयोरनुपपद्यमानस्थितिरपि विभक्तिश्रुत्या निवेशितः पयःपृषत् प्रवाहलक्ष-

---

लक्षणा च। तत्र साक्षात् स्वार्थसम्बन्ध्य विना भूतविषया शुद्धा। यथा। यत्तालीदलपाकपाण्डुवदनम्, अभिनवकरिदन्तच्छेदपाण्डुः कपोल इति। यथा पूर्वपूर्वलक्षितमेव लक्ष्यते सा लक्षितलक्षणेति केचित्। यथा। मधु द्विरेफः कुसुमैकपात्रे, भीमो भीमपराक्रम इति। अत्र हि द्विरेफादिना शब्देन लक्षित एव भ्रमरप्रभृतिर्लक्ष्यते न तु कुररादिः। अन्ये तु लक्षणा व्यवहिता लक्षणा लक्षितलक्षणेत्याहुः। यथा। सुवर्णपुष्पां पृथिवीं चिन्वते पुरुषास्त्रयः। शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्। तद्भावापत्त्यादिविशेषसमभिव्याहारेण मुख्यादिशब्दाः तदितर तथा भूतत्वागोचरा इति पूर्ववदृत्त्याख्येयम्। क्व पुनः पदैकावृत्तिरित्यत आह। अत्रेति। एकहि अच्छिहिम् असहिम्महि अलसत्थरे गण्डत्थले अङ्गहिम्। इत्यादि षड्वाधारवचनाः। अत्र यद्यपि गण्डस्थलपदं गौणमेव तथापि अनादिप्रयोगयोगितया मुख्यकल्पमिति षट्सु आधारवचनेषु इत्युक्तम्। अङ्गादिपदानि च स्वार्थविशिष्टान्यपराण्येव प्रयुक्तानीति मुख्यैव वृत्तिः। एवं मुग्धाया इति सम्बन्धिपदेऽपि। मुहच्छितिलवणे मुहपङ्क असरि इति द्वावाधारवचनौ शेषौ। अत्र तिलवनसरः पदयोः स्नेहनिर्भरत्वसरसत्वलक्षणगुणद्वारकैव मुखासिकामुखपङ्कजयोर्वृत्तिः। मुखपङ्कजसरसीत्यत्र यद्यपि पदद्वयं गौणं तथापि पङ्कजपदस्य वृत्तिरभिधातुस्थैति न कविसंरम्भगोचरस्तेन व्यवहारो युक्तः। सावणभद्दवअमाहवमग्गसिरु इति चत्वारो मासवचनाः। ते च स्वार्थसम्बन्ध्यवहितं

णाया: स्वधर्मसम्पद: प्रत्यासन्नामविच्छिन्नाश्रुप्रवाहसम्पदमुप-
लक्षयन् समागमोत्काया उत्कण्ठातिशयं लक्षयति; माधव
इत्युत्तरावयवेन वसन्तो लक्ष्यते। सोऽपि महीतलस्तरेऽनुप-
पद्यमानस्थिति: प्राग्वदेव शब्दशक्त्या निवेशित: कुसुमकिश-
लयमृणालकमलिनीदलादिकाया: स्वधर्मसम्पद: समासन्नां
शिशिरोपकरणसामग्रीमुपलक्षयन् कामवत्या: शरीरान्त:-
सन्तापं लक्षयति। शरदित्यनेन ऋतुविशेषोऽभिधीयते। सा
गण्डयोरनुपपद्यमानस्थिति: प्रशंसावचनस्यापि स्थलशब्दस्या-
नुस्मरणशक्त्या समाक्षिप्यमाण: काशकुसुमहंसागमनकुमुदसर:-
प्रसादचन्द्रातपादिकाया: स्वधर्मसम्पद: समासन्नां गण्डयो:

वर्षाप्रभृतिसमुदायं लक्षयन्तीति। वक्ष्यमाणरीत्या वर्षादय: षड़ाधेयवचनास्ति च
विरहवतीशरीरे युगपच्चासम्भवदवस्थितयो जलादिसम्पदादिस्वप्रवृत्तिनिमित्ता-
ध्यासेन प्रयुज्यमानास्तद्भावापत्तिरूपां वृत्तिमासादयन्ति। अस्याश्च विवर्त्तपरिणा-
माध्यासादय: षट् प्रकारा गौरवभिया न दर्शिता:। श्रुतार्थानुपपत्तिमूला कल्पना-
श्रुतार्थापत्ति:। राजादेरासिते आवासितशब्दो मुख्यवृत्त्यैव विशेषणतया रूढ:।
स स्वविशेषणगुणव्यवहितेऽर्थान्तरेऽप्रयुक्तो गौणीवृत्तिमनुत्प्रवन् वसन्तादेरपि विशे-
षणतामासादयति। लक्षणा व्यवहिता लक्षणा लक्षितलक्षणा। सा कथमावासि-
तेति शब्दे सम्पद्यत इत्यत आह। स उपचारेणेति। कथञ्चित् सारूप्येण
श्रावणादिषु प्रयोगादुपचारस्तमुपजीव्य प्रयुक्त: स्वार्थाविनाभूतं महत्त्वादिकं
प्रकृतेषु लक्षणया संक्रामयतीति। आद्या लक्षणा तदव्यवहितां द्वितीयामाह।
प्रस्तुताया अपीति। आवासितस्यापि हि यथोक्तविशेषणस्य परदुर्गग्रहणादौ
महाननुबन्धो दृष्ट: स इह प्रस्तुतायां विरहवतीसन्तापलक्षणायां प्रवृत्तौ
लक्ष्यते इत्येकलक्षणाव्यवधानेनेयं लक्षणा। एवं लक्षणाद्वयव्यवधानेनापि भव-
तीत्याह। ते चेति। श्रावणादय: स्वधर्मसम्पदो निरन्तरवर्षादे: स्वार्था
विना भावेन लक्षिताया: प्रत्यासन्ना सदृश्यो तेषां लोचनादीनां धर्मसम्पदश्रुप्रभा-
वादिलक्षणा लक्ष्यत इति द्वितीया लक्षणा। तत् पुरःसरां तृतीयामाह।

पाण्डुतां लक्षयन् मृगेक्षणाया विरहक्षामतामुपलक्षयति। ग्रीष्म इत्यनेनापि ऋतुविशेष एव उच्यते। सोऽपि अङ्गनाङ्गेऽनुपपद्यमानः सूर्यांशुकार्कस्य प्रतप्तपांशुतापरुषोष्णानिलत्वदावाग्निकालुष्यादेः स्वधर्मसम्पदः समानानीकभूताभूतपूर्वानङ्गज्वरलिङ्गसम्पदमुपयन्नष्टमीं कामावस्थां लक्षयति। मार्गशीर्ष इत्यनेन तु पूर्वावयवेन हेमन्तो लक्ष्यते। तेन च यथा हेमन्ते तिलवनं लूयते तथा तस्याः सुखासिका साम्प्रतं लूयते इति लक्ष्यते। तेनातिशयिनी मनःपीड़ोपलक्षिता भवति। का पुनः सुखासिकातिलवनयोः समानधर्मता। येयं स्नेह-

---

असावसाविति। एवं लक्षणात्रयपूर्वापि लक्षणा बोद्धव्येत्याह। कमितरीति। स्नेहप्रतीत्या तु विभावादिसंवलितया रसो व्यज्यते न तु लक्ष्यत इत्यन्यत्र विस्तरः। कस्याः पुनः स्वधर्मसम्पदः प्रत्यासन्ना का तद्धर्मसम्पदित्यतो विवेचयति॥ तत्रेति। यदि श्रावणादिपदेषु समुदायलक्षणा न स्यात् तदा मासानुपक्रम्य ऋतूनामभिधाने प्रक्रमभेदो भवेत्। न भवेत् च तत्तत् ऋतुप्रतीत ऋतुसम्पत्प्रतीतिः क्वचिदिति युक्तैव समुदायलक्षणा। एताभ्यामिति। प्रत्येकं न तु पदद्वये लक्षणा सम्भवति। विभक्तिश्चेत्येति। सप्तमी प्रथमाविभक्तिभ्यामाधाराधेयभावः स्वशक्त्या प्रतिपाद्यते तदनुपपत्त्या अर्थान्तरलक्षणा प्रादुर्भवति। एवं चैत्रवैशाखसमुदायात्मनो वसन्तस्य उत्तरावयवो वैशाखः तद्वाचकेऽपि माधवपदे समुदायलक्षणाद्वारेण लक्षणा भवति। प्रशंसावचनस्यापीति। गर्भीकृतसारूप्याद्धि व्याघ्रादय उपमेयवाचिभिः समस्यन्ते। तत्र सारूप्यं प्रकर्षलक्षणमेवेति प्रशंसापरत्वे स्थितेनाभिधेयमप्रतीत्यसारूप्यं वा रूपान्तरं वा प्रत्येतुं न शक्यत इत्यभिधेयप्रतीत्यनुनिष्पादिनीचष्टानुसानसीदारास्वधर्मसम्पद्योक्ता प्रतीयते। स्वप्ने किल शरदाकाशकुसुमहंसादिका स्वसम्पद्विशाल्यते। न सुखचन्द्रादिवत्सुखासिकातिलवनयोः सादृश्यप्रतीतिर्न च तदभिधीयमानं किञ्चिदस्तीति पृच्छति। का पुनरिति। साभूत् तथा प्रसिद्धिः कवेरभिप्राया रूढा तु प्रतीयत इत्युत्तरमाह। येयमिति। न स्नेहो नाम द्वयोरेकः कश्चिदस्ति न च अनभिधीयमानमपि सादृश्यं शब्दसामान्यमाश्रयत इत्यतः प्रकारान्तर-

निर्भरता नाम। अभिसारिकाणां च प्रायेण तिलवनाञ्जिनीषण्डयोरेव बहुमानप्रसिद्धिः। यदित्यमाह।

अत्तान्तहरमणिज्जं अम्हं गामस्स मण्डणीहूअं।
लुअ तिलवाड़िसरिच्छं सिसिरेण कअम्भिसिणिसण्डम्॥ (ब)

अतएवायमुत्तरवाक्ये कमलसरःशब्देनाञ्जिनीखण्डमपि निर्दिशति। तद् यथा,

मुद्धिहि मुहपङ्कअसरि आवासिउ सिसिरु॥

तत्र शिशिर इत्यनेन ऋतुविशेषेण मुग्धामुखेऽपि पद्मसरसीव शब्दशक्त्याभिनिवेशितेन कमलवनोपप्लवादेः स्वधर्मसम्पदो लोकप्रतीतायाः प्रत्यासन्ना मुग्धामुखाम्बुरुहलोचनोत्पलस्मितकुसुमदशनकेशरादेश्छायापरिम्लानिर्लक्ष्यमाणा विप्रलम्भानुभावप्रकर्षमुपलक्षयति। शिशिरलक्ष्मीवर्णनप्रस्तावाच्च मुखमङ्गं शरीरस्य सर्वं वा मुखमुच्यत इति स्थानप्राधान्य-

---

(ब) अत्यन्तरमणीयम् अस्माकं ग्रामस्य मण्डनीभूतम्।
लूनं तिलवाटीसदृशं शिशिरेण कृतमञ्जिनीषण्डम्॥

माह। अभिसारिकाणाञ्चेति। कथमेतद्भगतमित्यत आह। यदित्यमिति। ननु कमलिनीशब्दस्य अत्र बहुमानगोचरता प्रतिपादिता न तु तिलवनस्येत्यत आह। अतएवेति। उपमानोपमेययोः द्वयोरपि कामिनी बहुमानगोचरतां वितरन्ती शिशिरेण साम्प्रतं तिलवाटिकालवनमपि वर्त्तत इत्यभिप्रेतीति भावः। मुखमङ्गं शरीरस्य इत्यादिन्यायेन मुखशब्दः प्राधान्यं लक्षयति ततो मुखपङ्कजसरसि शिशिर इति तद्भावापन्ना हेमन्तस्य अपि ऋतुषु प्रथमतया

लक्षणया सर्वर्तुभ्यः शिशिर एवेह प्रधानमित्यपि लक्षितं भवति ॥ १३२ ॥

काकुस्वरपदच्छेदभेदाभिनयकान्तिभिः।
पाठो योऽर्थविशेषाय पठितिः सेह षड्विधा ॥

तत्र काक्वा यथा,

यदि मे वल्लभा दूती तदाहमपि वल्लभा।
यदि तस्याः प्रिया वाचस्तन्ममापि प्रियप्रियाः ॥

अत्रैकया काक्वा विधिरन्यया तु निषेधः प्रतीयते ॥१३३॥

स्वरेण यथा,

सुभ्रू त्वं कुपितेत्यपास्तमशनं त्यक्ता कथा योषितां
दूरादेव मयोज्झिताः सुरभयः स्रग्गन्धधूपादयः।

प्राधान्यमेव द्योतितमिति। तदुक्तम्। पडिकं मदूइपेसणमाणग्गहणे सुभासुरपहुय्यन्ती। हेमन्ति ओसुहाअ इसलिणमिअङ्गी विकामिणीणयओसो ॥ १३२ ॥

काकुस्वरेति। किञ्चिदेकपरतया प्रवृत्तसुच्चारणम् अर्थान्तरविवक्षया यदन्यथा क्रियते सा पठितिः। अन्यथाकरणञ्च काकुप्रभृतिभिः षड्भिरिति। तत्र। भिन्नकण्ठध्वनिर्धीरैः काकुरित्यभिधीयते। सा द्विधा। विधिकाकुर्निषेधकाकुश्च तयोर्निषेधे परोच्चारणान्यथाकरणेन विधिपर्य्यवसायिनी विधिकाकुः। यथा। अल्पमपि खलदन्तः सोढुं शक्येत हालहलदिग्धम्। धीरैर्न पुनरकारणकुपितखलालीकपटुवचनम्। एवंविधिपरोच्चारणान्यथाकरणेन निषेधव्यञ्जिकानिषेधकाकुसाम् उदाहरति। यदीति। यदि दूतीप्रिया तदाहमपि प्रियेत्यादि ऋजूक्त्या शठनायकविषया कृत्रिमा प्रीतिः प्रतीयते काक्वा तु तवैव नाहं प्रियेतीर्ष्यारोषः ॥ १३३ ॥

स्वराः श्रुतादय उदात्तादयश्च। नासीषां वेद इव काव्ये भूयान् प्रयोग इति किञ्चित् उदाहरति। सुभ्रूस्त्वमिति। चरणतलाग्रपतिते मयि दृष्टे सति त्वं प्रसीदेति दीर्घमाचोच्चारणे कुपितकान्ताप्रसादपरत्वं यथोक्तश्रुतकरणे तु दूरा-

रागं रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना
सत्यं त्वद्विरहाद् भवन्ति दयिते सर्वा ममान्धा दिशः ॥

अत्र दृष्टे इत्यत्र प्लुतस्वरकरणात् कुपितकान्ताप्रसादनपरमपि इदं वाक्यमुत्कुपितदृष्टिप्रसादनपरतां प्रतिपद्यते ॥१३४॥

पदच्छेदेन यथा,

सर्वक्षितिभृतां नाथ ! दृष्टा सर्वाङ्गसुन्दरी ।
रामा रम्ये वनान्तेऽस्मिन् मया विरहिता त्वया ॥

अत्र मया विरहितेत्येतावति पदच्छेदे पुरूरवसस्त्वया इत्येतावति तु पर्वतस्य वाक्यभेदो भवति ॥ १३५ ॥

ह्लानादौ तदनुशासनात् कुपितदृष्टिसम्बोधनबुद्धिरुपजायते । अश्नादयो हि द्वयोः साधारणा एवेति श्लेषोपादानमेवेति । एवं ह्रस्वस्य दीर्घकरणेन दीर्घस्य ह्रस्वकरणेन अर्थान्तरप्रतीतिः अवसेया । यथा विश्वामित्रो विश्वानर इति ऋषिराजर्षिविशेषौ प्रतीयेते । यथा युवतीति सम्बोधनप्रतीतिः । एवं मुदात्तादयोऽपि यथा दर्शनमुत्प्रेक्षणीयाः ॥ १३४ ॥

शृङ्खलाभङ्गः परिवर्त्तकयूर्णमिति चत्वारः छेदाः । तत्र पूर्वापरवर्णानाम् अन्योन्यसङ्कलनया स्थितिः शृङ्खला । यथा । कान्तारतरुतलासितमृगयुवरचितान्तरेति पठितिः तदा प्रियासम्भोगमण्डितहर्षितलुब्धकप्रचुरच्छन्नमध्येति प्रतीयते । सेयमन्योन्यं वर्णसङ्कलनया शृङ्खलेत्युच्यते । एकस्य शब्दस्य मध्ये विच्छेदेन द्वैधीकरणमात्रं भङ्गः । तमुदाहरति । सर्वेति । मया विरहितेत्येतावति समुदाये महियोगवती त्वया दृष्टेत्यष्टमकामावस्थाविष्टस्य पुरूरवसः पर्वतविषयं प्रश्नवाक्यं भवति । यदा तु मयेति विच्छिद्य पूर्ववाक्यसम्बन्धिक्रियते तदा त्वया विरहिता सती मया दृष्टेति पर्वतस्य उत्तरवाक्यं सम्पद्यते । वर्णान्तरकल्पनापरिवर्त्तः । यथा कलिकामधुगर्हणेति । अत्र यथा श्रुतवर्णपरिग्रहे कलिकामधुनो गर्हणानिन्देति प्रतीयते । यदा तु कलिकामधुग् अर्हणेति वर्णान्तरकल्पनया छेदस्तदा पूजैव कृष्णो कामधेनुरिति । पिण्डाक्षरविभागशूर्णम् । यथा । पश्य सलिलं पयोधेर्दूरसमुन्मुक्तशुक्तिमीनाङ्कान्तमिति । अत्र यथा श्रुते दुःखेन रसनीयमुद्भ्रान्तशुक्तिकोषं मत्स्याङ्कितपर्यन्तमिति प्रतीयते । यदा तु

पदभेदेन यथा,

येन ध्वस्तमनो भवेन बलिजित्कायः पुरास्त्रीकृतो
यो गङ्गां विदधेऽन्धकक्षयकरो यो वर्हिपत्रप्रियः।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यञ्च नामामराः।
सोऽव्यादिष्टभुजङ्गहारवलयस्त्वां सर्वदो माधवः॥

अत्र येन ध्वस्तमनोभवेनेत्यादेर्येन ध्वस्तम् अनोऽभवेनेत्यादेश्च पदभेदादुमाधवो माधव इत्यर्थद्वयं प्रतीयते। तयोश्च द्वयोरपि प्राधान्येनोपादानादङ्गाङ्गिभावेन प्रकृताप्रकृतरूपतया चानवस्थानात् परस्परमसम्बन्धेनायं श्लेषः। पदभेदेन

दूरसमुन्मुक्तशुक्तिमीनाक्रान्तमिति पिष्टचूर्णेन क्लेदसदा अत्यन्तहर्षयुक्तेति व्यक्तशोकेति च सम्बोधनद्वयं कृष्णस्य प्रतीयते॥ १३५॥

येनेति। ध्वस्तमनोभवेन दग्धकामेन बलिजिता नारायणस्य कायः पुरा त्रिपुरदाहव्यतिकरेऽस्त्रीकृतः शरतान्नीतः गङ्गां भागीरथीं दधे। अन्धको दैत्यविशेषस्तस्य क्षयो विनाशो बर्हिपत्री मयूरवाहनः कार्त्तिकेयः शशिमच्चन्द्रकलाङ्कितं शिरो विश्वमोहच्छिदुरस्य हर इति स्तुत्यञ्च नाम भुजङ्गा एव हारवलयानि यस्य सर्वदा सर्वकालमिति उमाधवपक्षे। माधवपक्षे तु। येन ध्वस्तं विनाशितमनःप्रकटमभवेन संसारबन्धरहितेन बलिं जितवान् यः कायः स पूर्वं समुद्रमथनावसरे अमृतगृहयालुदैत्यव्यामोहनाय स्त्रीरूपतान्नीतो अगङ्गीवर्द्धनाख्यङ्गा पृथिवीम् एकार्णवमग्नामुद्धृतवान् अन्धका यदुविशेषास्तेषां क्षयो निवासः। बर्हिणो मयूरस्य पत्रं पिच्छं तत् प्रियो बर्हि पत्रकृतापीडमिति गोपालध्याने गौतमेनाभिधानात्। शशिनं मथ्नातीति क्विप् शशिमद्राहुस्तस्य शिरो हर इति स्तुत्यञ्च नाम। भुजङ्गा गरुडः स इष्टो यस्य। रवे शब्दब्रह्मणि लयो यस्य स तथा सर्वदो यावदभिमतप्रद इति। ननु विभिन्नरूपाणां शब्दानामुच्चारणे तन्नतया श्लेष एव अर्थं न पठितिरित्यत आह। तयोरिति। श्लेषो हि श्लिष्यमाणयोः परस्परसम्बन्धे भवति। स च सम्बन्धी रूपतात्पर्यसम्बन्धलक्षणो वा अङ्गाङ्गिभावो वा उपमानोपमेय भावो वा यथाग्रे वक्ष्यते। न च अयमेकोऽत्राभिमतः किन्तु एकपरस्त्रीवोच्चारणे पदभेदेनार्थान्तरं गमयतीति पठितिरेवेयम्। एतेन समाध्युक्ति

तु पाठे पर्यायतोऽर्थद्वयप्रतीतेरियं श्लेषोपसर्जनात् पदभेद-पठितिः ॥ १३६ ॥

अभिनयेन यथा,

एइहमेत्तत्थणिआ एइहमेत्तेहिं अक्खिवत्तेहिम् ।
एइहमेत्तावत्था एइहमेत्तेहिं दिअहेहिं ॥ (भ)

अत्र इयन्मात्रस्तनीत्यादीनां तथाभूतहस्ताभिनयैः सह पठनात् तथाविधार्थविशेषो गम्यते ॥

अपदेशोऽप्यभिनयविशेष एव यथा,

इतः स दैत्यः प्राप्तश्रीर्नेत एवार्हति क्षयम् ।
इत्यात्मानमपदिश्य ब्रूते ॥ १३७ ॥

(भ) एतावन्मात्रस्तनी एतावन्मात्राभ्यामक्षिपत्राभ्याम् ।
एतावन्मात्रावस्था एतावन्मात्रैर्दिवसैः ॥

समासोक्तिभ्यामपि भेद उक्तः । तत् किमुच्चारणतन्त्रता नास्त्येवेत्यत आह । श्लेषोपसर्जनेति । यत्र हि यस्य प्राधान्येन विवक्षा तत्र तेन व्यपदेशो युक्तः । अतएव विवक्षान्तरेण श्लेषव्यवहारोऽपि अत्र समर्थनीय एव ॥ १३६ ॥

एइहमेत्तेति । अत्र सर्वपदानाम् अर्थान्तरसाधारणतया न तावदभिमत-परिमाणविशेषप्रतीतिरुपजायते यावत् उच्चारणसहकारिभूतप्रसारितकर-द्वयकोषप्रसृतिभिदङ्गुलिप्रसारिताङ्गुलीगणनारूपाभिनयप्रतिसन्धानं न भवति । तेन अभिनयपठितिरियं साक्षादिव वस्तु स्वरूपबोधिकाक्रियाभिमुख्यनयनात् अभिनय इत्युच्यते । तदिदमाह । तथाभूतेत्यादि । अपदेशोऽपीति । आत्मनिर्देशिका क्रियापदेशः । अस्य अभिनयविशेषत्वेऽपि कालिकरतया पृथगुपा-दानम् । यावच्च स्वरूपसमुच्चारणविशेषणं न अनुसन्धीयते न तावच्छ्रीप्राप्तिक्ष-मयोः कारणविशेषः प्रतीयत इति ॥ १३७ ॥

कान्त्या यथा,

यस्यारिजातं नृपतेरपश्यदवलम्बनम्।
ययौ निर्झरसम्भोघैरपश्यदवलम्बनम्॥

अत्रावलम्बनमवलं वनमिति पदे पदद्वये वा द्वितीयचतुर्थस्थानयोर्यौ वकारबकारौ तयोरन्तःस्थपवर्गाभ्यां पवर्गान्तःस्थाभ्यां वा कान्तिमतिपाठेऽर्थभेदो जायते॥ १३८॥

अपरे पुनः पठितिमन्यथा कथयन्ति।

पदपादार्द्धभाषाणामन्यथाकरणेन यः।
पाठः पूर्वोक्तसूक्तस्य पठितिं तां प्रचक्षते॥

तच्च पदान्यथाकरणं द्विधा प्रकृतितो विभक्तितश्च॥१३९॥

यस्यारिजातमिति। कान्तिश्छाया सा अप्रतिहतरूपा पदवर्णेषु न सम्भवतीति श्रुतिरूपा गृह्यते। तथा हि। अवलम्बनमिति अत्र द्वितीयचतुर्थस्थानस्थयोर्वकारबकारयोः क्रमेणान्तःस्थपवर्गभावानुसन्धाने अवलम्बनमित्येकपदतायां चाणहितमपश्यदित्यर्थः प्रतीयते। यदा तु द्वितीये अवलम्बनम् इत्यत्र तयोरेव पवर्गान्तःस्थभावानुसन्धानं भवति तदा बलं वनमिति छेदेन पदद्वयसम्पत्तौ बलरहितं सहनमरण्यं ययौ इत्यर्थान्तरप्रतीतिरूपजायते। तदिदमुक्तम्। पदे पदद्वये चेति। अपश्यत्। शयनभोजनशून्यं शयनं शीरदनमत्। निर्झरसम्भोगैः निर्झरजलमात्रोपयोगैः अतएव बलरहितम्। अत्र च यमकेन संसृष्टिरस्य बोद्धव्या। आवृत्तिमादाय यमकमन्यथा भविष्यति॥ १३८॥

अपरे पुनरिति। अन्यथेत्यतः परमपि शब्दोऽध्याहार्यः। पादाद्यन्यथाकरणेन अपि हि प्रकृतसुचारणमेव विशिष्यते। यदाहि। पूर्वोक्तसूक्तस्येति। अतएव श्लोकान्यथाकरणेन पठितिर्न सम्भवति। तेन प्रागुक्तभेदैः सह द्वादशप्रकारा पठितिरिति तात्पर्यम्। यद्यपि च पादाद्यन्यथाकरणमपि पदभेदप्रकार एव तथापि न तत्र पूर्वोक्तत्याग इह तु तत्परित्यागेन पदान्तरकल्पनमित्येतावान् विशेषः॥ १३९॥

तत्र प्रकृतितो यथा,

असकलहसितत्वात् चालितानीव कान्त्या
मुकुलितनयनत्वाद्व्यक्तकर्णोत्पलानि ।
पिबतु मधुसुगन्धीन्याननानि प्रियाणां
त्वयि विनिहितभारः कुन्तलानामधीशः ॥

अत्र त्वयि इत्यस्य स्थाने यदा मयि इति पठ्यते तदैतत् प्रार्थनावाक्यमपि अनुमतिवाक्यं भवति ॥ १४० ॥

विभक्तितो यथा,

सह भृत्यगणं सबान्धवं सहमित्रं ससुतं सहानुजम् ।
खबलेन निहन्ति संयुगे न चिरात् पाण्डुसुतः सुयोधनम् ॥

अत्र यदा पाण्डुसुतः सुयोधनमित्यस्य स्थाने पाण्डुसुतं सुयोधन इति पठ्यते तदैतदमङ्गलार्थमपि सुयोधने मङ्गलाय भवति ॥ १४१ ॥

पादान्यथाकरणेन यथा,

एकान्ते विजने रात्रावन्तर्वेश्मनि साहसे ।
न्यासापङ्गवने चैव दिव्या सम्भवति क्रिया ॥

अत्र यदा तृतीयपादस्थाने तन्वङ्गी यदि लभ्येतेति पाठो भवति तदैतत् परीक्षौपयिकमपि कामोपयिकं भवति ॥ १४२ ॥

तत्र पदं विभक्त्यन्तं विशेषणविशेष्यभेदेन द्विधा क्रियते इत्याह । पदान्यथाकरणं द्वेधेति ॥ १४० ॥ १४१ ॥

एकान्त इति । साहसे प्रच्छन्नाभिसारलक्षणे । प्रकाशात् प्रच्छन्नो गरीयानिति न्यायात् । दिव्या स्वभोगसोदरा क्रियावल्लक्षणा ॥ १४२ ॥

अर्द्धान्यथाकरणेन यथा,

तत्तावदेव शशिनः स्फुरितं गरीयो
यावन्न तिग्मरुचिमण्डलमभ्युदेति ।
अभ्युद्यते सकलधामनिधौ तु तस्मिन्
इन्दोः सिताब्भ्रशकलस्य च को विशेषः ॥

अत्र यदा मध्यमपादयोः स्थाने "यावन्न ताः किमपि गौरितरा हसन्ति ताभिः पुनर्विहसिताननपङ्कजाभिः" इति पठ्यते तदैतद्वीरार्थोक्तिरूपमपि शृङ्गारोक्तिरूपं सम्पद्यते ॥१४३॥

पादत्रयान्यथाकरणेन यथा,

त्यागेन युक्ता दिवमुत्पतन्ति
त्यागेन हीना नरकं व्रजन्ति ।
न त्यागिनां दुष्करमस्ति किञ्चित्
त्यागो हि सर्वव्यसनानि हन्ति ॥

अत्र यदा तुरीयपादमेवादाय पादत्रयान्यथाकरणेन वक्ष्यमाणः पाठो भवति तदैतत्त्यागप्रशंसार्थमपि त्यागनिन्दार्थं जायते ॥

तद् यथा,

त्यागो हि सर्वव्यसनानि हन्ती-
त्यलीकमेतद् भुवि संप्रतीतम् ।
जातानि सर्वव्यसनानि तस्या-
स्त्यागेन मे मुग्धविलोचनायाः ॥ १४४ ॥

गौरितरेति । घरूपेत्यादिना पूर्वपदङ्गस्य ॥ १४३ ॥

एतेषाञ्च पदाद्यन्यथाकरणानां परस्परसङ्करोऽपि भवतीत्यावेदयति । चाद्-त्रयस्य चेति ॥ १४४ ॥

भाषान्यथाकरणेन यथा,

किं तादेण णरेन्दसेहरसिहालीढग्गपादेण मे
किं वा मे ससुरेण वासवसहासींहासणद्धासिणा ।
ते देशा गिरिणो अ ते वणमही स च्चेअ मे वल्लहा
कोसल्लातणअस्स जत्थ चलणे वन्दे अ णन्दामि अ ॥

अत्र यदि भाषान्तरेण पठ्यते तदेतच्छौरसेनीभाषया सीतावाक्यं संस्कृतभाषया सुमन्त्रेण दशरथाय निवेदितं भवति ॥

तद् यथा,

किं तातेन नरेन्द्रशेखरशिखालीढाग्रपादेन मे
किं वा मे श्वशुरेण वासवसभासिंहासनार्द्धासिना ।
ते देशा गिरयश्च ते वनमही सा चैव मे वल्लभा
कौशल्यातनयस्य यत्र चरणौ वन्दे च नन्दामि च ॥

सेयमेवंप्रकारा पठितिः ॥ १४५ ॥

विभिन्नार्थैकरूपाया या वृत्तिर्वर्णसंहतेः ।
अव्यपेतव्यपेतात्मा यमकं तन्निगद्यते ॥ १४६ ॥

भाषाभेदेन कथं स्त्रीपुंसवचनता गम्यत इत्यत आह । तदेतच्छौरसेनीति । विभागन्यूनतामाशङ्क्य यथोक्तप्रकारेण समाधानमभिसन्धायाह । सेयमेवंप्रकारा पठितिरिति ॥ १४५ ॥

अथावृत्त्युपजीविनः अलङ्कारा लक्षयितव्यास्तेषां समग्रकाव्यपर्यन्तावृत्तिसमाश्रयणाद्यमकं प्रधानमित्याशयेनाह । विभिन्नेति । विभिन्नार्थेति अर्थाभेदव्यतिरेकपरम् । तेन द्वयोरेकस्य वा निरर्थकत्वेऽपि यमकमुपगृहीतं भवति । एवमपि सरोरस इत्यादौ अतिप्रसङ्ग इत्यत उक्तमेकरूपेति । रूपमानुपूर्वीविभिन्नार्था चासौ एकरूपा चेति विग्रहः । विविधधवेत्यादौ एकवर्णावृत्तौ अपि

तदव्यपेतयमकं व्यपेतयमकं तथा।
स्थानास्थानविभागाभ्यां पादभेदाच्च भिद्यते ॥ १४७ ॥
तत्र पादादिमध्यान्ताः स्थानं तेषूपकल्प्यते।
यदव्यपेतमन्यद्वा तत् स्थानयमकं विदुः ॥ १४८ ॥
चतुस्त्रिद्व्येकपादेषु यमकानां विकल्पना।
आदिमध्यान्तमध्यान्तमध्याद्याद्यन्तसर्वतः ॥ १४९ ॥
अत्यन्तं बहवस्तेषां भेदाः सम्भेदयोनयः।
सुकरा दुष्कराश्चैव दर्श्यन्ते तत्र केचन ॥ १५० ॥
तत्र चतुष्पादयमकेषु अव्यपेतमादिमकं यथा,
राजीवराजीवशलोलभृङ्गं मुणन्तमुणन्ततिभिस्तरूणाम्।

आवृत्तिसमुदाय एव यमकक्रममुल्लिखतीत्यभिसन्धाय संहतेः इत्युक्तम्। विभिन्नार्थैकरूपाया वर्णसंहतेर्या आवृत्तिः सा यमकमिति व्यवहितेनान्वयः ॥ १४६ ॥

आवृत्तिर्द्विधा अनावृत्ता व्यवहिता अव्यवहिता चेति ॥ १४७ ॥

सामान्यतो विभजते। अव्यपेतेति। व्यवायो व्यवधानम्। तदेतदुभयमपि स्थानादिभेदेन त्रिधा भवतीति पूर्वोक्तानुवादपूर्वकमवान्तरविभागमाह। तदिति। पाद आदिमध्यान्ता अर्थादेतेषु विशेषतोऽनुल्लिखदस्थानयमकमुक्तं भवति। एतदपि द्विधा ॥ १४८ ॥

चतुरादिपादविकल्पेन विषयतो भिद्यत इत्याह। चतुस्त्रीति। आदिश्च मध्यश्चान्तश्चेति आदिमध्यान्तास्त्रयः शब्दाः। मध्यान्तौ मध्यादौ आद्यन्तौ आदिमध्यान्तावेति मिलिता चत्वारः सङ्कीर्णाः। सर्वत इति। सार्वविभक्तिकस्त्रिः ॥ १४९ ॥

एवं पादविकल्पानामाद्यादिविकल्पानाञ्च परस्परयोजने अन्येऽपि बहवः प्रकारा ग्रन्थगौरवकारिणो भवन्तीत्याह। अत्यन्तेति। न च कठोरनीरसत्वात् अवश्यवक्तव्य इत्याह। दुष्करा इति। शिष्यव्युत्पत्तये तु कतिपये दर्शनीया इत्याह। तत्र केचनेति ॥ १५० ॥

राजीवराजीपद्मपङ्क्तिः तद्वशा लोलाः सस्पृहा भृङ्गा यत्र तम्। यतस्तरु

कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम् ॥
॥ १५१ ॥

तदेव मध्ययमकं यथा,

दधतमाकरिभिः करिभिः क्षतैः समवतारसमैरसमैस्तटैः ।
विविधकामहिता महिताश्मसः स्फुटसरोजवना जवना नदीः ॥
॥ १५२ ॥

तदेवान्तयमकं यथा,

व्यथितसिन्धुमनीरशनैः शनैरमरलोकवधूजघनैर्घनैः ।
फणभृतामभितो विततं ततं दयितरम्यलतावकुलैः कुलैः ॥१५३॥

आदिमध्ययमकं यथा,

घना घनाभस्य मही महीयसः
सुरासुराणां दयितस्य तस्य सा ।
धराधराकारगृहा गृहार्थिनो
बभूव भूमिर्नगरी गरीयसी ॥ १५४ ॥

मङ्क्तिभिरुच्चं घर्मं सुष्ठन्तमपहरन्तम् । कान्ती मनोज्ञोऽलकान्तस्यूर्णकुन्तलच्छटा यासां ताः । यस्मात् रक्षोभिः राक्षसैरक्षोभितमधर्षितम् । अत्र प्रथमे पादे पूर्वं सार्थकमपरमनर्थकं द्वितीयादिषु त्रयमपि अनर्थकम् । एवम् अन्यत्रापि यथायथमवगन्तव्यम् ॥ १५१ ॥

आकरीभिः प्रशस्ताकरयुक्तैः करिभिः परिणतिक्रीडासक्तैः । विविधेभ्यः कामेभ्यो हिताः । महितं पूजितं जवना वेगवती ॥ १५२ ॥

नीरशनैः न निर्गता दूरीभूता रशना: क्षुद्रघण्टिका येभ्यः काञ्चीगुणयुक्तैः । तेन स्थपुटकर्कशरत्नादिरचनया सिन्धुव्यथा पोषः शनैर्मन्दं घनैर्मांसलैः अभितो-विततं सर्वतो विस्तीर्णम् । फलभृताङ्कुलैस्ततं व्याप्तम् । लवङ्गवकुलमालती-सुरभिशीतलतया फणभृत्प्रियत्वम् ॥ १५३ ॥

घनाघनो मेघसदृशः श्यामो मही पृथ्वी तस्यां महीयान् पूज्यः । धराधरः पर्वतसदृशाकारगृहाः ॥ १५४ ॥

आद्यन्तयमकं यथा,

द्रुतं द्रुतं वह्निसमागतं गतं महीमहीनद्युतिरोचितं चितम् ।
समं समन्तादपगोपुरं पुरं परैः परैरप्यनिराकृतं कृतम् ॥१५५॥

मध्यान्तयमकं यथा,

उदयि ते दयिते जघनं घनं स्तनवती नवतीर्थतनुस्तनुः ।
सुमनसामनसा सदृशौ दृशौ द्युकुरु मे कुरु मेऽभिमुखं मुखम् ॥
॥ १५६ ॥

आदिमध्यान्तयमकं यथा,

सीमासी मानभूमिः फणिबलवलनोद्भावि राजीविराजी
हारी हारीतवह्निः परिसरसरणावस्तमालैस्तमालैः ।
देवादेवामरत्नः कृतभव भवतोऽग्रे न दीनो नदीनो
मुक्तामुक्ताच्छरत्नः सितरुचिरुचिरोल्लासमुद्रः समुद्रः ॥ १५७ ॥

वह्निसमागतं सद्द्रुतं विलीनम् अतएव द्रुतं शीघ्रं महीं गतं पृथिव्यां विलीय्य पतितमहीनया द्युत्या रोचितं शोभितम् । चितं निविड़ेन सन्निवेशेन स्थापितं समन्तात् सर्वतः समं सलक्ष्मीकमस्यपुटं वा । परैः शत्रुभिः परैः श्रेष्ठैः अनिराकृतं यदासीत् तदेव वह्निना हेममयं पुरमपगोपुरम् अपगतद्वारं महीं गतञ्च कृतमिति सम्बन्धः ॥ १५५ ॥

उदय उद्भवो विस्तारवत्त्वरूपस्तद्युक्तमुदयि । घनं मासलम् । नवेन तीर्थेन रजसा तनूकृता । स्त्रीरजः शास्त्रयोः तीर्थम् । सुमनसा कुसुमानाम् अनः शकटं तेन । सदृशौ सुमनसां मनसामिति पाठे सुमनसः सहृदयास्तन्मनसां सदृशौ संवादिनौ । द्यौश्च कुश्च द्युकू द्यावा पृथिव्यौ तयो रुमालवणाकरी-लावण्यविश्रान्तिस्थानत्वात् ॥ १५६ ॥

सीमा मर्य्यादा तस्यामासनशीलः । मानं परिमाणातिशयो मानः पूजा वा तद्भूमिः । फणिबलं भुजङ्गसमुदायस्तस्य वलनं तेन उद्भाविनी या राजी रेखा तया विराजनशीलः । हारीताः पक्षिविशेषास्तद्युक्तैः । परिसरसरणिस्तीर-मार्गस्तत्र अस्तमालैः चित्रमालासन्निवेशैः खण्डरूपतामापन्नैः इति यावत् । ईदृशैः

त्रिपादयमकेषु अव्यपेतयमकं यथा,

विशदा विशदामत्तसारसे सारसे जले।
कुरुते कुरुते नेयं हंसी मामन्तकामिषम् ॥

नास्य प्रचुरः प्रयोग इति शेषभेदा नोदाह्रियन्ते ॥ १५८ ॥

द्विपादयमकेषु अव्यपेतमादियमकं यथा,

करोति सहकारस्य कलिकोत्कलिकोत्तरम्।
मन्मनो मन्मनोऽप्येष मत्तकोकिलनिःस्वनः ॥ १५९ ॥

तदेव मध्ययमकं यथा,

तुलयति स्म विलोचनतारकाः कुरवकस्तवकव्यतिषङ्गिणि।
गुणवदाश्रयलब्धगुणोदये मलिनिमालिनि माधवयोषिताम् ॥
॥ १६० ॥

तमालैः हारी मनोहर इति सम्बन्धः। देवादेवाः देवासुराः तैः अमृतलाभेनान्तरवस्थानेन च आप्ताऽरचा यस्मात् स तथा कृतभवः सम्पादितोद्भवो नदीनामिनः स्वामी समुद्रो भवतीऽयं नदीनः काक्षा दीन एव। मुक्ताभिः अमुक्तानि अच्छानि रत्नानि यत्र स तथा। सितरुचिश्चन्द्रस्तेन रुचिरा मनोहरा उल्लाससुद्रा वृद्धिकाष्ठा यस्य स। तदेतेषाम् उदाहरणानां चतुर्षु अपि पादेषु यथोक्तं यमकमस्तीति चतुष्पादयमकप्रपञ्चोऽयम् ॥ ५७ ॥

एवं त्रिपादयमकप्रपञ्चोऽपि भवतीत्याह। त्रिपादयमकेष्विति। विशदा धवला विशन्त आमत्ताः सारसा यत्र तस्मिन्। सारसं सरःसम्बन्धि। मन्मथोन्मादयायितया कुत्सितं रुतं कुरुतम्। मध्यान्तादीनि त्रिपादयमकानि किमिति न उदाहृतानि इत्यत आह। नास्येति ॥ १५८ ॥

उत्कण्ठा उत्कलिका तदुत्तरं तटं कूलम्। मन्मनो अव्यक्तमधुरो मन्मनो मदीयं मनः ॥ १५९ ॥

मलिनि यो मलिनिमा कज्जलाभत्वं समत्वं माधवयोषितां यादवस्त्रीणां विलोचनतारकान्तुलयति स्मेति सम्बन्धः ॥ १६० ॥

अन्त्ययमकं यथा,

खण्डिताशंसया तेषां पराङ्मुखतया तया।
आविवेश कृपा केतूकृतोच्चैर्वानरं नरम्॥

एवमादिमध्यादीन्यपि द्रष्टव्यानि। एकपादयमकेषु अव्यपेतमाद्यन्तयोरनुल्लेखीति नोदाह्रियन्ते॥ १६१॥

मध्ययमकन्तु चतुर्थपाद एव उल्लिखति यथा,

विलुलितालकसंहतिराभृशन् मृगदृशां श्रमवारि ललाटजम्।
तनु तरङ्गततीः सरसां दलत्कुवलयं वलयन् मरुदाववौ॥१६२॥

एवमावृत्त्याधिक्येऽप्यव्यपेतमुदाहार्य्यं यथा,

वियद् वियद्दृष्टिपरम्परं परं घनाघनाली रसिता सितासिता।

केतूकृतो भगताङ्गीतः। उच्चैर्वानरो हनूमान्। नरोऽर्जुनः॥ १६१।

आद्यन्तयोरनुल्लेखीति। महाकविप्रयोगेषु विशेषयोगाकरतया प्रसिद्धेरभावोऽनुल्लेखो न तु असत्त्व एव। एवं मध्ययमकन्तु इत्यादौ बोद्धव्यम्। आमर्शनं प्रोञ्छनम्। दलत्कुवलयमिति क्रियाविशेषणम्। तरङ्गाणामितस्ततोवलनेन प्रौढतरकुवलयकलिकास्फुटनजातिः॥ १६२॥

आवृत्तिः सकृदावर्त्तनेनैव निर्वहति। तत् किम् असकृदावृत्तौ यमकं न भवति इत्यत आह। एवमिति। आवृत्तिसामान्यमधिकमनधिकं वा इदमपि आवृत्तिपदेन अभिमतमित्यर्थः। वियदाकाशम्। वियती अपगच्छन्ती दृष्टिपरम्परा यस्मात् तत्तथा परमुत्कृष्टरमणीयम्। घनाघनाली मेघपङ्क्तिः। रसिते स्तनिते आसिता अवलम्बिता। सिता शुभ्रा। सरांसि च सरस्यश्च सरः सरस्यः स्वरसारास्तत्कालोन्मीलितकूजितकान्तिप्रधानाः सारसाः पक्षिणो यत्र ताः तथाभूताः सभाग्टहरूपाः जलसमुदायो वा। सभाः सदीप्तिः ताराणां तारता निर्मलता प्रकर्षः किञ्चित् घनरोधसद्भावादौषत्तारता यस्यां सा तथा॥ १६३॥

आवृत्तीति। यज्जातीयमाद्यपादे पदमावृत्तं तज्जातीयमेव द्वितीयादिपादेषु अपि यथा स्थानमावर्त्तत इति प्रकारान्तरमपि आवृत्तिपदेनैव संगृहीतमित्यर्थः। यामत्रयाधीनाया मया। प्रहरत्रयविश्रान्ति यावत् दीर्घताप्रका-

सरःसरस्यः सरसारसारसाः सभा सभा रात्रिरतारतारता ॥१६३॥

आवृत्त्येकरूपतायामपि तत्रादियमकं यथा,

याम यामत्रयाधीनायामया मरणं निशा ।
यामयाम धियाऽस्वर्त्याया मया मथितैव सा ॥ १६४ ॥

तदेव मध्ययमकं यथा,

श्लिरायते यतेन्द्रियो न हीयते यतेर्भवान् ।
अमायतेयतेऽप्यभूत् सुखाय तेऽयते क्षयम् ॥ १६५ ॥

तदेवान्त्ययमकं यथा,

भवादृशा नाथ न जानते नते रसं विरुद्धे खलु सन्नतेनते ।
य एव दीनाः शिरसा नतेन ते चरन्त्यलं दैन्यरसेन तेन ते ॥
तदेतत्सर्वमप्यव्यवहितावृत्तेरव्यपेतयमकं भवति ॥ १६६ ॥

रया । निशा रात्रिः मरणं यामेति वियोगखिन्नस्य प्रार्थना । किञ्चित्येवमसङ्गलनाशास्त्र इत्यत आह । यामेति । धिया बुद्ध्या यामया जीवितसर्वस्वाभिमानगोचरतामनैषम् । सा अनया कल्पकोटिशताय मानया नया रजन्या असूनां प्राणानामार्त्तिः पीडा तया हारभूतया प्रायेण मथितैव भविष्यतीति सुकुमारतरकान्ता जीवितानध्यवसायोक्तिरियम् । अत्र यामेत्येव पदं पादचतुष्टयेऽपि आवृत्तमेवमुत्तरत्र ॥ १६४ ॥

आयतिरुत्तरकालविशुद्धिः । जितेन्द्रियो विजितेन्द्रियग्राम एवंभूतो भवान् यतेः न हीयते यतितुल्य एव भवतीत्यर्थः । अपि शब्दोऽभिन्नक्रमः । अमायता मायाशून्यत्वं सापि तव इयत्ते परिच्छेत्तुमशक्याय क्षयं विनाशमयते अगच्छते सुखाय अभूत् ॥ १६५ ॥

नतेः कुपितकामिनीप्रसादरूपाया रसो विप्रलम्भपृष्ठभावी मधुरतरः सम्भोगः किमिति तादृशा रसं न जानते यस्मात् सन्नता अवसादयोगिलम्बिनता प्रभुता एते हे विरुद्धे नैकत्र सम्भवतो न हि प्रभवो नमन्ति । एतदेव व्यतिरेकेण द्रढयति । य एवेति । ये दीनास्त एव नतेन शिरसा लक्षिताः । तेन हेतुना दैन्यरसेन अत्यन्तं चरन्ति व्यवहरन्तीति । अव्यपेतपदार्थं व्याचष्टे । तदेतत् सर्वम् इति ॥ १६६ ॥

अथ चतुर्षु पादेषु व्यपेतमादियमकं यथा,

काञ्चिप्रतोलीमनु कामिनीनां
काञ्चित्स्रवन्ती वनमातरिश्वा ।
काञ्चिप्रभृत्याभरणोज्झितानां
काञ्चिल्लुनीते सुरतश्रमार्त्तिम् ॥ १६७ ॥

तदेव मध्ययमकं यथा,

मदनदारुण उत्थित उच्छिखो मधुमदारुणहृणमुखच्छविः ।
तरुणिदारुण एष दिशः समं मम हृदारुणदाम्रवणानलः ॥ १६८ ॥

अन्त्ययमकं यथा,

तव प्रिया सञ्चरिता प्रमत्तया विभूषणं धार्य्यमिहांशुमत्तया ।
रतोत्सवामोदविशेषमत्तया न मे फलं किञ्चन कान्तिमत्तया ॥
॥ १६९ ॥

क्रमप्राप्तं व्यपेतमुदाहर्त्तव्यमित्याह । अथेति । काञ्चिन्नगरी तस्याः प्रतोली राजरथ्या तामनु लक्षीकृत्य । केन पानीयेनाञ्जनशीलाया स्रवन्ती नदी तद्वनमातरिश्वा वायुः । काञ्चिप्रभृतीनि मेखलाप्रमुखानि । काञ्चित् सर्वाङ्गीणालसभावसमर्पिकाम् अतएव मेखलाप्रभृतिभूषणत्यागः । अत्र प्रतिपादं काञ्ची काञ्चीत्यादिनैरन्तर्य्येण आवर्त्तते नव्यपेतम् । सान्तरत्वेन पुनरादिमध्ययमकमेव स्यादिति पादभेदेनैव अस्य सम्भवः ॥ १६७ ॥

मदन एव दारु काष्ठं तत उत्थितः शिखामञ्जरीच्छटाज्वाला च । स्वभावताम्रमेव मधुमदेन यद्दिगुणमरुणं हृणमुखं तच्छविर्दारुणो भयङ्करो मम हृदासमं दिशः अरुणत् रुद्धवान् । आम्रवणमेव तापकारितयाऽनलो वह्निः । अत्र यद्यपि प्रतिपादमपि व्यवायेन मध्ययमकं सम्भवति तथापि न तथोल्लेखीति पूर्वापरसदृशमेव उदाहृतम् ॥ १६८ ॥

सञ्चरिताप्रमत्तेति । सोत्प्रासं सम्बोधनद्वयम् । या तव प्रिया रतोत्सवामोदविशेषेण रतिकेलिहर्षप्रकर्षेण मत्ता तयेदमंशुमन्मणिकिरणकरम्बितं भूषणं धार्य्यम् । अर्हे कृत्यः । त्वया किमिति न धार्य्यमित्यत आह । न मे भूषण-

आदिमध्ययमकं यथा,

घनगिरीन्द्रविलङ्घनशालिना वनगता वनजद्युतिलोचना ।
जनमता दृशे जनकात्मजा तरुमृगेण तरुस्थलशायिनी ॥१७०॥

आद्यन्तयमकं यथा,

विहगाः कदम्बसुरभाविह गाः कलयन्त्यनुक्षणमनेकलयम् ।
भ्रमयन्नुपैति सुहुरभ्रमयं पवनश्च धूतनवनीपवनः ॥ १७१ ॥

मध्यान्तयमकं यथा,

मितमवददुदारं तां हनूमान् मुदारं
रघुवृषभसकाशं यामि देवि प्रकाशम् ।
तव विदितविषादो दृष्टकृत्स्नामिषादः
श्रियमनिशमवन्तं पर्वतं माल्यवन्तम् ॥ १७२ ॥

सम्पादयया कान्त्या किञ्चन फलम् । कामिनां मण्डनश्रीर्व्रजति हि सफलत्वं वल्लभालोकनेन इति न्यायात् ॥ १६९ ॥

अत्रापि सान्तरनिरन्तरप्रसङ्गे पादभेद एव सङ्करः सङ्कीर्णव्यपेतानि तु प्रतिपादमेव सम्भवन्तीत्युदाहरति । आदिमध्येति । घना गिरीन्द्रा माल्यवन्तमारभ्य सुवेलं यावद्गिरिपरम्परावनजं पद्मं जनानां मता सम्मता । तरुमृगः शाखामृगो हनूमान् । अत्र घनेत्यादिशब्दभागः पादचतुष्टयेऽपि गिरीन्द्रेत्याद्यनावृत्तव्यवहित एव आदिमध्ययोरावर्त्तत इति ॥ १७० ॥

गाः कूजितानि कदम्बसौरभानीतवर्हसुपयोदाः कलयन्ति कलरूपतां नयन्ति । कूजितक्रियान्तरालकाखो द्रुतमध्यविलम्बितात्मा अनेको लयः । अभ्रं मेघः नीपः कदम्बः । कदम्बवनधूननेन सर्वतः सौरभसञ्चारोपपत्तिः । अत्र विहगा इत्यादिकं प्रतिपादमाद्यन्तयोः अनावृत्तवर्णषट्कव्यवहितमेव आवर्त्तते ॥ १७१ ॥

मितमल्पाक्षरमरमत्यर्थमुदारमल्पाक्षरव्यञ्जकं मुदा हर्षेण रघुवृषभो रामस्तस्य सकाशो वासभूमिस्तया पुरस्कृतः । आमिषादा राक्षसाः । अत्र दारमित्यादिप्रतिपादं मध्यान्तयोः एव अनावृत्तवर्णपञ्चकव्यपेतमावर्त्तते ॥ १७२ ॥

आदिमध्यान्तयमकं यथा,

समं स सैन्येन समन्ततः समं पुरन्दरश्रीः पुरमुच्चगोपुरम् ।
मदालसां तां प्रमदां सुसम्मदां ययौ निधायाक्षययौवनां ययौ ॥
॥ १७३ ॥

त्रिपादयमकेषु व्यपेतमादियमकं यथा,

करेण ते रणेच्छान्तकरेण द्विषतां हताः ।
करेणवः क्षरद्रक्ता भान्ति सन्ध्याघना इव ॥

अस्यापि नातिप्रचुरः प्रयोग इति शेषभेदा नोदाह्रियन्ते ॥१७४॥

द्विपादयमकेषु व्यपेतमादियमकं यथा,

मुदा रमणमन्वीतमुदारमणिभूषणाः ।
मदभ्रमदृशः कर्त्तुमदभ्रजघना क्षमाः ॥

मध्ययमकं पुनरनुल्लेखीति परिह्रियते ॥ १७५ ॥

अन्तयमकं यथा,

इह मुहुर्मुदितैः कलभैरवः प्रतिदिशं क्रियते कलभैरवः ।

समं सह समं सश्रीकं सम्मदो हर्षः । ययुरस्यमेधीयोऽश्वः । अत्र प्रतिपादं समसित्यादिकमादिमध्यान्तेषु यथोक्तानाहतवर्णव्यवहितमावर्त्तन्ते ॥ १७३ ॥

द्विषतां शत्रूणाम् अन्तकरेण विनाशकारिणा करेण हस्तेन । करेणवो हस्तिनः । एवं द्वितीयादिपादगोचरं मध्यादियमकञ्च किमिति न उदाह्रियत इत्यत आह । अस्यापीति ॥ १७४ ॥

रमणं वल्लभं मुदा हर्षेण अन्वीतं सङ्गतं कर्त्तुं क्षमा इत्यन्वयः । उदारम् उत्कृष्टम् । मदेन भ्रमन्ती दृक् यासां ताः मदभं विपुलम् । अत्र यद्यपि चतुषु पादेषु यमकमस्ति तथापि द्वयोः द्वयोरेवावृत्तिः पर्य्यवस्यतीत्युदाहरणद्वयमिदं द्रष्टव्यमेवं प्रथमतृतीययोः प्रथमचतुर्थयोः द्वितीयतृतीययोः द्वितीयचतुर्थयोश्च व्यपेतमादियमकमवसेयम् । अनुल्लेखी व्याख्यात एव ॥ १७५ ॥

कलभाः करिशावका रव, शब्दः कलो मधुराव्यक्तो भैरवो भयङ्करः । अनु-

स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः॥१७६॥

एकपादयमकमिह शुद्धं न सम्भवति। तस्य स्थाने द्विपादयमकमेव उदाह्रियते॥

तदादियमकं यथा,

मधुरेणदृशां मानं मधुरेण सुगन्धिना।
सहकारोद्गमेनैव कथाशेषं करिष्यति॥ १७७॥

इहापि मध्ययमकमनुल्लेखीति परिह्रियते॥

अन्तयमकं यथा,

यस्याहुरतिगम्भीरजलदप्रतिमं गलम्।
स वः करोतु निःसङ्गमुदयं प्रति मङ्गलम्॥ १७८॥

एवमावृत्ताधिक्येऽपि यथा,

अवसितं हसितं प्रसितं मुदा
विलसितं क्वसितं स्मरभासितम्।

वनमिति वीप्सायामव्ययीभावः। चमरी चमरगवी। चयः समूहः। मरीचयः किरणाः। अत्रापि पूर्ववदेव द्विपादयमकं व्याख्येयमिति॥ १७६॥

एकपादयमकमिति। नैरन्तर्येणावृत्तावव्यपेतत्वम्। सान्तरत्वे तु आदिमध्यादिभावप्रसङ्ग इति शुद्धं न भवति तत् किमनुदाहरणीयमेव एतदित्यत आह। तस्येति। आवृत्तिरेकत्र एव सम्भवतीति एकपादगोचरता। सा तु प्रतियोगितया द्वितीयमपेक्षत इति पादान्तरस्वीकार इति कथञ्चित् प्रकृतिगणनासमाधानमेतत्। मधुश्चैत्रः। अनेन पूर्वावयवेन वसन्तो लक्ष्यते। एणदृशां हरिणलोचनानां मधुरेण मधुरास्वादेन सहकारोद्गमेन एव इत्येवकारेणासतामतीव तावद्विख्यातप्रभावातिशयाः पिकपञ्चमादयः सहकारप्रथमोद्गमावेश एव तु मानिनीमानग्रहवार्त्तानिरवशेषिते अत्युद्दीपनता प्रकर्षो ध्वन्यते॥ १७७॥

गम्भीरो मांसलो गलः कण्ठो मङ्गलं कल्याणम्। निःसङ्गमप्रत्यूहमुदयः सम्पत् तं प्रति॥ १७८॥

न समदाः प्रमदा हतसंमदाः
पुरहितं विहितं न समीहितम् ॥ १७९ ॥

आवृत्त्यैकरूपतायामपि तत्रादियमकं यथा,

सारयन्तसुरसा रमयन्ती सारभूतमुरुसारधरा तम्।
सारसानुकृतसारसकाञ्चिः सा रसायनमसारमवैति ॥ १८० ॥

मध्यान्तयमकं यथा,

लीलास्मितेन शुचिना मृदुनोदितेन
व्यालोकितेन लघुना गुरुणा गतेन।
व्याजृम्भितेन जघनेन च दर्शितेन
सा हन्ति तेन गलितं मम जीवितेन ॥ १८१ ॥

आद्यन्तयमकमादिमध्यान्तयमकं च इह अस्थानयमकत्व-प्रसङ्गात् न सङ्गच्छेते। आदिमध्यान्तयमकानि तु प्रथममेव उदाहृतानि ॥

अवसितं समाप्तं मुदा प्रसितमनुबद्धं हसितं सितं भष्टं स्वरेण भासितं शोभितं सम्मदो हर्षः। अत्र प्रतिपादं सितं सितमित्यादिद्वाभ्यामेव यमकं निर्व्यूढम्; तृतीयन्तु सितमित्यादिकमाधिक्यमेव प्रयोजयति तच्च सर्वमनावृत्तिव्यवहितमिति व्यपेतयमकमेव भवति ॥ १७९ ॥

सारयन्तम् आत्मसमीपम् आनयन्तम्। उरसा घनतरस्तनाद्यैः सारभूतं जीवितसर्वस्वतामापन्नमुरुर्महान् सार उत्कर्षः। अनुकृतसारसा सारसकूजित-संवादिनी। सारसा सशब्दा काञ्चिर्मेखला यस्याः सा तथा। सारसानुकृतेति जातिकालसुखादिभ्यः परा वक्तव्येति निष्ठायाः परनिपातः। रसायनं सर्वोप-द्रवहरं भेषजम् ॥ १८० ॥

शुचिना कान्तेन मृदुना कोमलेन उदितं भाषितं लघुना तरलेन गुरुणा स्तनजघनभारालसेन व्याजृम्भितेन प्रकटीभूतविस्तारप्रकर्षेण। अत्र तेन तेनेति मध्यान्तयोराहृतम् ॥ १८१ ॥

अत्र पुनः सूक्ष्मेणावृत्त्यष्टकेन श्लोकपादौ व्याप्ताविति अस्थानयमकमिदं सूक्ष्माव्यपेतमुच्यते ॥ १८६ ॥

श्लोके स्थूलमव्यपेतं यथा,

नगजा न गजा दयिता दयिता
विगतं विगतं ललितं ललितम्।
प्रमदाऽप्रमदाऽमहता महता-
मरणं मरणं समयात् समयात् ॥

अत्रावृत्त्यष्टकेन श्लोकोऽपि व्याप्त इति अस्थानयमकमिदं श्लोके स्थूलमव्यपेतमुच्यते ॥ १८७ ॥

श्लोक एव सूक्ष्ममव्यपेतं यथा,

विविधधववना नागगर्द्धनाना-
विविततगगनाऽनाम मज्जज्जनाऽना।
रुरुशशललना नावबन्धुन्धुनाना
मम हि हितनाऽनाननस्वस्वनाना ॥

बलभद्रं प्रति कृष्णवाक्यं समुद्रतीरभूवर्णनपरम्।

विविधानि धवानां तरुभेदानां वनानि यस्यां सा नागेषु

मतः। तदिदं वर्णद्वयावृत्त्या सूक्ष्मं न च अन्योन्यव्यवहितमव्यवहितमित्यव्यपेतं च भवति। तदेतदेकस्मिन्नपि पादे अनुक्तद्वयादिपादविकल्पेन च बोद्धव्यम् ॥१८६॥

नगजाः पर्वतजा दयिता वल्लभा। एवंविधा अपि हस्तिनी न दयिता न रचिताः। वीनां हंसप्रभृतीनां पक्षिणां गतं चंक्रमणं विगतमपगतं ललितं विलसितं ललितं भष्टम्। प्रमदा कान्ता अप्रमदा हर्षशून्या। आमश्चित्तव्यथा-रूपो रोगस्तेन हता महतां प्रकर्षशालिनाम् अरणं संग्रामवर्जितं मरणं विनाशः समयात् दैवात् समयात् सङ्गतमासीत् ॥ १८७ ॥

विविधानि धववनानि यस्यां सा तथा। धवो विट्खदिरः। नागान् सर्पान् हस्तिनो वा गर्ध्यन्ति अभिलषन्तीति नागगर्द्धाः। अङ्गा उपचिता नानावयो

सर्पेषु गर्द्धनाभिलाषेण बुभुक्षया कृष्टैः सकृष्टैर्नानाविधैर्विभिः पक्षिभिर्विततं व्याप्तं गगनं यस्यां सा। अनामेन अनमनेन मज्जन्तो जना यस्यां सा। बहूदकेत्यर्थः। यद्वा। अस्य विष्णोर्नामनि मज्जन्तस्तत्परा इति यावत्। तादृशा जना यस्यां सा। अविद्यमाना नरोऽर्वाचीना मनुष्या यस्यां सा। समासान्तविधेरनित्यत्वात् नञ्पूर्वत्वेति न कप्। यद्वा। अविद्यमान ओविष्णुर्यस्यां सा। यद्वा। अनामनि विष्णुनामनि मज्जद्भ्यस्तत्परेभ्यो जातं नानं यस्यां सानं ज्ञानं तत्वज्ञानमिति यावत्। न नमऽनं न अनं नानं रुरूणां मृगाणां चलनं क्रीड़नं यत्र सा। नौ आवयोरबन्धुं वैरिणं धुनाना नाशयन्ती हि निश्चितं मम हितं तनोति सा। अविद्यमानमाननं मुखं यस्य सः। मुखं विनैव जायमान इत्यर्थः। ईदृशो यः स्वस्वनः शब्दस्तत्र अनाः प्राणा यस्यां सा। उदकशब्दवतीत्यर्थः। अत्र सूक्ष्मतराभिरष्टाविंशत्या वृत्तिभिः श्लोको व्याप्त इति अस्यानयमकमिदं श्लोके सूक्ष्माव्यपेतमुच्यते॥ १८८॥

विचित्राः पक्षिणः तैर्विततं व्याप्तं गगनं यस्यां सा तथा। कल्लोलपरम्पराभिरनामं नमनशून्यम्। मज्जन्तः स्नान्तो जना यस्या सा। अना स्त्रीरूपा। रुरूणां मृगाणां चलनमुत्फालो यस्या सा तथाभूता नौ आवयोरबन्धुं शत्रुं धुनाना चिपन्ती। हरिप्रबोधे बलभद्रस्य कृष्णं प्रत्युक्तिः। यस्मात् मम हितमना हितं तनोति। अननो सुखशून्यो यः स्व आत्मा। तेन स्वनाना शब्दायमाना। शीलि चानश्। अनित्यमागमशासनमिति मुगभावः। यदि वा अननो सुखं विनाकृतः स्वकीयः स्वनो यस्याः सा। अनितीत्यना प्राणायुक्ता। अन्तर्णीतेवार्थं चैतत्। वर्णद्वयपर्यन्तमावृत्तिः सूक्ष्मता। सा एव एकवर्णगोचरा सूक्ष्मतरा॥ १८८॥

पादसन्धौ अन्यभेदोच्छेदेन स्थूलं यथा,

उपोढ़रागाप्यवला मदेन सा
मदेनसा मन्युरसेन योजिता।
न योजितात्मानमनङ्गतापिता
गतापि तापाय ममास नेयते॥

अत्रान्तादिसन्दंशादव्यपेतं प्रवर्त्तते। व्यपेतं तु पादसन्धिषु निर्वर्त्तत इति अस्थानयमकमिदं स्थूलावृत्तेः सन्धिस्थूलाव्यपेतमुच्यते॥ १८९॥

अन्यभेदानुच्छेदेन सूक्ष्मं यथा,

मतान्धुनानारमतामकामतामतापलब्धाग्रिमतानुलोमता।
मतावयत्युत्तमताविलोमतामताम्यतस्ते समता न वामता॥

पादसन्धाविति। स्वभेदे च अन्यभेदे च अन्यत्र व्यपेताव्यपेतयोः स्वत्वमन्यत्वं च व्याख्येयं प्रकरणात्। तत्रे प्रसङ्गे च यथासम्भवं सप्तमी योजनीया। मदेन प्राप्तारागापि तत एव मन्मथोन्माथेन तापिता उत्तापं गतापि यदात्मानमबलान योजितवती तं नूनं मदेन सा मदीयदुरितेन भूयोऽपि मानरसं प्रापिता स्यात्। अतएवेयते वक्तुमशक्याय सन्तापाय नासेति काक्वा तापप्रकर्षभणनम्। योजितेति। योजयतेर्गत्यर्थत्वमाश्रित्य कर्त्तरि क्तः। गत्यर्था कर्मकेत्यादौ चकारस्यानुक्तसमुच्चयार्थत्वाद्वा। अत्र प्रथमद्वितीययोस्तृतीयचतुर्थयोश्चान्तरतो विच्छिद्यपाठे क्रियमाणे सन्धिषु व्यपेतसङ्गः स्यात्। निरन्तरपठितौ तु स निवर्त्तते। यथैव च वृत्तौचितीवशात् सौभाग्यमुन्मिषति। तेन व्यपेतबाधादव्यपेतपुरस्कारस्तदिदमाह। अत्रेत्यादि। सन्दंशः सन्धानम्॥ १८९॥

मता सम्मतामारमतां योगिनामकामतां वीतरागतां धुनानाऽधः कुर्वाणा अतायीनायासस्तेन खञ्जोऽग्रिमतानुलोमते श्रेष्ठतानुकूल्ये यया सा। अतएवोत्तमताया विलोमतामतिरेकमयती न गच्छन्ती ईदृशी तवाताम्यतः संसारखेदेनाबाध्यमानस्य मतौ समता न तु वामता वैषम्यमिति॥ अत्र प्रतिपादमादिमध्यान्तेषु व्यपेतयमकमुपलभ्यते। सन्धिषु च सन्दंशपाठादस्थानयमकमव्यपेतञ्च।

अत्र व्यपेतानुच्छेदेनैव पादसन्धिषु अव्यपेतमुत्पद्यत इति अस्थानयमकमिदं सूक्ष्मावृत्तेः सन्धिसूक्ष्माव्यपेतमुच्यते ॥१९०॥

स्वभेदे पूर्वभेदानुच्छेदेन स्थूलं यथा,

सतमाः सतमालो यः पारापारायतः सदावोऽदावः।
लोकालोकानुकृतिः सह्यः स ह्ययमनभ्रकूटैः कूटैः॥

अत्र विषमपादयोः समपादावन्तेऽवतिष्ठमानावादियमकाद्यन्तयमकयोरादिमध्यान्तयमकतामापदयतः। पारापारेति सह्यः सह्य इत्यावृत्तौ स्थूले एवादिमध्ययमकव्यपदेशञ्च लभेते इति अस्थानयमकमिदं स्वभेदे पूर्वभेदानुच्छेदि स्थूलाव्यपेतमुच्यते ॥ १९१ ॥

तदेव स्वान्यभेदोच्छेदि सूक्ष्मं यथा,

सनाकवनितं नितम्बरुचिरं चिरं मुनिनदैर्नदैर्वृतममुम्।
मता फणवतोऽवतो रसपरा परास्तवसुधा सुधाऽधिवसति॥

न च पूर्वोपलब्धं बाध्यते। न वा सन्धौ विरतिरिति प्रसङ्गः सङ्गच्छते। तेन व्यपेतानुच्छेदकमेतदव्यपेतम्। अत्रापि वृत्तौचिती सर्वस्यायते ॥ १९० ॥

तमोऽत्र गहनता तया सतमाः सान्धकारं पारा नाम नदी तस्याः पारे आयतो विस्तीर्णो दावो वनं तद्बहुलत्वाददावो वनवह्निप्रभावरहितो लोकालोकचक्रवालाख्यः पर्वतः तदनुकृतिः तत्सदृशो यः सोऽयं सह्यनामा गिरिरभ्रकूटशून्यैः कूटैः शृङ्गैर्लक्षितः। द्विशब्दो वाक्यालङ्कारे। अत्र प्रथमतृतीययोरादौ द्वितीयचतुर्थयोरादन्तयोर्व्यपेतयमकमेव वर्त्तते। तदनुच्छेदेनैव सन्दश पाठादियमकयोरादन्तयमकयोश्चाव्यपेतादिमध्यान्तयमकता प्रकाशते। यतो द्वितीयचतुर्थपादयोरादिमध्यान्तयमकमेव मध्यमयमकभूमिकामवगाहते। अत्रापि वृत्तौचिती गवेषणीया। तदेतद्विवरणे व्यक्तमेवेति ॥ १९१ ॥

नाकवनिताः स्वर्गस्त्रियः ताभिः सहितं यतो नितम्बे स्वच्छन्दविहरणोचिते रुचिरं मनोज्ञं मुनिनदैः शोभनशब्दैर्महाफणवान् वासुकिरवतो रक्षतो रसपरा-

अत्र पादान्तादिषु व्यपेतं यदा मध्येषु अव्यपेतं तदु भयमपि पादान्तादिसंहियामव्यपेतमभिन्नजातीयं जायते। न च प्राचीनां मध्ययमकतां जहातीत्यस्यानयमकमिदं सूक्ष्मावृत्तेरन्यतो भेदेन स्वभेदानुच्छेदि सूक्ष्माव्यपेतमुच्यते। तदुभयमप्येवंविध एव छन्दसि द्रष्टव्यम् ॥ १९२ ॥

पादे स्थूलव्यपेतं यथा,

अखिद्यतासन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने।
भृङ्गावलिर्यस्य तटे निपीतरसा नमत्तामरसा न मत्ता ॥

अत्र माभूदव्यपेतप्रसङ्ग इत्येकमेवाक्षरं विहाय स्थूलावृत्तिद्वयेन श्लोकपादयोर्व्याप्तत्वादादिमध्यान्तता न सम्भवति इति अस्यानयमकमिदं स्थूलव्यपेतमुच्यते ॥ १९३ ॥

पाद एव सूक्ष्मं यथा,

करेणुः प्रस्थितोऽनेको रेणुर्घण्टाः सहस्रशः।

रसनीयेषु श्रेष्ठा। परास्तवसुधा त्यक्तभूभागा सुधा पीयूषम्। अत्र प्रतिपादं नितं नितमित्यादिकमव्यपेतम्। सन्धिषु च विरतिपाठे चिर चिरमित्यादिव्यपेत प्रतीयते। तत्र सन्दंशे क्रियमाणे व्यपेतं निवर्त्तते। अव्यपेतं तु मध्ययमकमवतिष्ठतएव। तत् सर्वमिदमव्यपेतमेव जायते। अत्रापि वृत्तौचितौ पूर्ववदेव शरणमित्युपसंहारे दर्शयति। उभयमपि चैतदिति। स्थूलसूक्ष्मभावेन सन्धियमकमुभयम् ॥ १९२ ॥

यस्य गिरेस्तटे रविमादित्यमुदग्रतापं दधानेऽपि भृङ्गावलिर्भ्रमरमाला न अखिद्यत। यतोऽरवि दधाने पद्मानां निधानभूते निपीतरसा आस्वादितमकरन्दा अतएव मत्ता नमन्ति तामरसानि यस्याः सकाशात् सा तथा। भ्रमनमितपद्मकुहरप्रवेशात् मधुरससेवया च भ्रमरमालया खेदो नाधिगतः। अत्र द्वितीयचतुर्थपादयोः रविन्दधाने रविन्दधाने इति रसा न मत्ता रसानमत्ता इति द्वाभ्यामेव वृत्तिभ्या व्याप्तत्वात् आद्यादिविभागासम्भवे अस्यानयमकमेवेदं व्यपेतन्तु कथं भवतीत्यत आह। माभूदिति ॥ १९३ ॥

करेऽणुः शीकरो जज्ञे रेणुस्तेन शमं ययौ॥

अत्र विषमपादयोः करेणुः करेणुरित्यादावावृत्तं समपादयोस्तु रेणुः रेणुरिति। तत्तु स्वापेक्षया न मध्यमन्यापेक्षया नादिः इति अस्थानयमकमिदं सूक्ष्मव्यपेतमुच्यते॥ १९४॥

श्लोके स्थूलव्यपेतं यथा,

जयन्ति! ते सदा देहं नमस्यन्ति जयन्ति ते।
भवान्यतो नमस्यन्ति सदादेहं भवान्यतः॥

अत्र स्थूलव्यपेतावृत्तिचतुष्टयेन श्लोकोऽपि व्याप्त इत्यादिमध्यान्ताभावात् अस्थानयमकमिदं स्थूलव्यपेतमुच्यते॥ १९५॥

स्थूल एव सूक्ष्मव्यपेतं यथा,

यामानीता नीतायामा लोकाधीराऽधीरालोका।

करेणुः हस्ती प्रस्थितश्चलितः तेन घण्टा रेणुः अशब्दायन्त। सहस्रश इति क्रियाविशेषणम्। करे स्थूलहस्तेऽणुः सीत्कारविकीर्णतया परमाणुमात्रभूतस्तेन शीकरेण। ननु विषमपादयोः आद्यक्षरविनाऽकरणेन मध्ये समपादयोः पुनरादावेव रेणुरित्यावृत्तिरस्ति तत् कथमस्थानयमकमिदमित्यत आह। तत्त्विति। अन्ते आवृत्तेरसम्भावितत्वादादौ मध्ये वा सा वाच्या। न चेयमपि सम्भवति। रेणु रेणुरिति शब्दभागमपेक्ष्य प्रवृत्तायामावृत्तौ तद्विरहात्॥ १९४॥

हे जयन्ति! ये तव देहं दुर्गातारादिरूपेण प्रपञ्चमानां मूर्त्तिं सदा नमस्यन्ति ते जयन्ति सर्वोत्कर्षेण वर्त्तन्ते। यतस्त एव भवान् संसारसरणिमस्यन्ति क्षिपन्ति। भवात् परमेश्वरादन्यताभेदस्ते नी नमतः श्रेयम आदानं ग्रहणं यत्र तादृशी ईहा चेष्टा यत्रेति इयमसनक्रियाविशेषणम्। अत्र जयन्ति त इति प्रथमद्वितीययोरादावन्तौ सदा देहमिति प्रथमचतुर्थयोरन्तादौ नमस्यन्तीति द्वितीयतृतीययोर्भवान्यत इति च तृतीयचतुर्थयोरादावन्तौ च स्थूलावृत्त्या व्याप्ताविति अनावृत्तभागाभावात् श्लोके स्थूलव्यपेतमस्थानयमकमिदम्॥ १९५॥

मानिभिरिता सङ्गता। यद्वा यामेन प्रहरमात्रेण अनीता प्रापिता अवून्

सेनासन्ना सन्ना सेना सारं हत्वाह त्वा सारम् ॥

अत्र यद्यपि यामायामेत्यादौ व्यपेतमाद्यन्तयमकं, नीतानीतेत्यादौ च मध्ययमकमव्यपेतं विद्यते, तथापि मण्डूकप्लुतिन्यायेन गतप्रत्यागतैर्यतेश्च नैतदुल्लिखति अपि तु श्लोकोऽपि द्वाभ्यां द्वाभ्यामक्षराभ्यां सूक्ष्मावृत्त्या व्याप्त इव लक्ष्यते। तेनास्यानयमकमिदमादिमध्यान्तानामभावात् सूक्ष्मावृत्तेः सूक्ष्मव्यपेतमुच्यते ॥ १९६ ॥

पादसन्धौ स्थूलव्यपेतं यथा,

हठपीतमहाराष्ट्रीदशनच्छदपाटला।
पाटलाकलिकानेकैरेकैका लिलिहेऽलिभिः ॥

जित्येत्यर्थः। आनीतः प्रापित आयामो वृद्धिर्यस्याः सा तथा। पालनेन लोकानामाधिभीरयति क्षिपतीति लोकाधीराधीरैः अप्राप्तसमरसम्भ्रमैः आलीक्यत इति धीरा लोकाः सह इना सेनान्यावर्त्तत इति सेना असन्ना अवसादरहिता एवम्भूता या सेना सा आसन्ना निकटवर्त्तिनी सती आरमरिसमूहं हत्वा स्वां स्वां सारं कार्यसिद्धिं ब्रवीति। ननु यामामायामालीकालीकेत्यादिकमाद्यन्तयोर्नीतानीतेत्यादिकं तु पदचतुष्टयस्यापि मध्य इति व्यपेतमाद्यन्तव्यपेतयमकं तु मध्ययमकमिति स्थानयमकमेवेदं सङ्करोऽपि न पृथग् यमकता प्रयोजयतीत्यत आह। अत्र यद्यपीति। यामेत्यादिकमादौ अनुसन्धाय वर्णचतुष्कव्यवधिना पादान्तेऽनुसन्धीयमानं मण्डूकप्लुतिं प्रयोजयतीति न तथा सोल्लेखम्। यामानीतेत्यादिस्थूलचतुष्कप्रत्यागतेन नीतायामेत्यादिना अत्यन्तसुदृभटेन यमकच्छाया तिरोधीयत इति च न सोल्लेखम्। मध्यादिकमव्यपेतं सोल्लेखमित्यपि न वाच्यम्। यामानीतेत्यादिबन्धच्छायार्पकयतिकरणेनानुल्लेखत्वात्। श्लोकस्तु द्वाभ्यां द्वाभ्यामावृत्तिभ्यां व्याप्त इति समुदायसोल्लेखतैव। तदिदमुक्तं मण्डूकप्लुत्यागतप्रत्यागतैर्यतेश्चेति। मध्ये यतिकृतो व्यवायो बोद्धव्यः। अत्रापि वृत्तौचित्यमनुसरणीयम् ॥ १९६ ॥

हठयानेन ताम्बूलरागो निःशेषितस्तेन प्राप्तपरभागसहजरागोन्मेषः। व्यव-

अत्रापि प्राग्वदेव यतिविच्छेदात् पूर्वोत्तरार्द्धयोः असंहितायां पाटलापाटलेत्यावृत्तेर्नाव्यपेतयमकत्वम्। न चैतत् पादयोः आदावन्ते च शक्यते वक्तुमपि तु एकस्य आदौ अन्यस्य चान्ते इति अस्थानयमकमिदं स्थूलावृत्तेः स्थूलव्यपेतमुच्यते। न चैतद्वाच्यमुपोढरागेत्यादौ काञ्चियमकेऽप्ययं न्याय इति तस्यैव तथाभूतलक्षणत्वात्॥ १९७॥

काञ्चियमक एवाव्यपेतास्थानयमकभेदे सूक्ष्मव्यपेतं यथा,

धराधराकारधरा धराभुजां
भुजा महीं पातुमहीनविक्रमाः।
क्रमात् सहन्ते सहसा हतारयो
रयोद्धुरा यानधुरा वलम्बिनः॥

अत्रान्त्यपादे धुराधुरेति सूक्ष्मव्यपेतं वर्त्तते॥ १९८॥

स्वभेदान्यभेदयोः स्थूलं सूक्ष्मञ्च यथा,

सालं वहन्ती सुरतापनीयं साऽलं तडिङ्गासुरतापनीयम्।
रत्नोभरत्नोभरसन्निकूटा लङ्का कलङ्काकलिकाद्रिकूटा॥

अत्र सालं सालमिति स्वभेदे सुरतापनीयं सुरतापनीयमिति स्थूलः रत्नोभरत्नोभेति लङ्का कलङ्केति अन्यभेदे कूटाकूटेति

धायकशब्दाभावे कथमिदं व्यपेतमित्यत आह। अत्र प्राग्वदिति। ननु उपोढरागेत्यादौ पूर्वोदाहृतेऽपि यतिविच्छेदादस्ति व्यवधानात् कोऽस्य विशेष इत्याशङ्क्याह। न चेति॥ १९७॥

धराधरः शेषो महीं पातुं सहत इत्यन्वयः॥ १९८॥

सालः प्राकारः सुराणां तापनं सन्तापजननं वस्त्रे हि तमलमत्यर्थं सा लङ्का। तपनीयं सुवर्णं तापनीयं च तद्भास्वरं चेति कर्मधारयः। रत्नाभरः समूहः तस्य चोभः प्रकर्षः कोचाहवः। त्रिकूटः सुवेलोऽकलङ्का

सूक्ष्मव्यपेते भेदो दृश्यते तदिदमस्थानयमकं स्थूलसूक्ष्मव्यपेतमुच्यते ॥ १९९ ॥

यत् सूक्ष्मभागं बह्वावृत्ति तदपि स्थूलसूक्ष्ममेव। यथा,

मधुरया मधुबोधितमाधवी मधुसमृद्धिसमेधितमेधया।
मधुकराङ्गनया सुहुरुन्मदध्वनिभृता निभृताक्षरमुज्जगे ॥२००॥

स्थानास्थानविभागोऽयमव्यपेतव्यपेतयोः।
क्रमेणोक्तस्तयोरेव पादभेदोऽथ कथ्यते ॥ २०१ ॥

तत्र व्यपेतभेदेषु प्रथमपादयोरावृत्तिर्यथा,

न मन्दया वर्जितमानसात्मया
नमन् दयावर्जितमानसात्मया।
उरस्युपास्तीर्णपयोधरद्वयं
मया समालिङ्ग्यत जीवितेश्वरः ॥ २०२ ॥

अत्रैव द्वितीयतृतीययोर्यथा,

दृश्यस्त्वयाऽपि पुरतः पयस्वानानाकलाली रुचिरेण नेत्रा।
नानाकलाली रुचिरेणनेत्रा देवी यदस्मादजनि स्वयं श्रीः ॥
॥ २०३ ॥

दोषरहिता अकलिकानि कलिरहितानि अद्रिकूटानि सुवेलशिखराणि यस्यां सा तथा ॥ १९९ ॥

यत् सूक्ष्मभागमिति। भागश्चो विविच्यमानं सूक्ष्ममेव वृत्तिभूयः तया तु स्थूलमिव प्रथत इति सूक्ष्मेऽजिकयाभिधानम् ॥ २०० ॥

क्रमप्राप्तमिदानीं पादयमकमुदक्रियत इत्याह। स्थानास्थानेति ॥ २०१ ॥

मन्दया तत्कालोचिते प्रतिपत्तिविधुरया आवर्जितो मान ईर्ष्यारोषलक्षणो यया सा तथा। सात्मा आत्मवती अनयोः कर्मधारयः। नमन् पादान्ते लुठन्नपि दयावर्जितो मानसात्मानौ यस्या इति बहुव्रीहिर्डाप् ॥ २०२ ॥

आनाकं स्वर्गाधिकलक्षणमुल्लासः तच्छीली रुचिरेण मनोहरेण नेत्रा नायकेन

एवं तृतीयचतुर्थयोरपि यथा,

स्मरानलो मानविवर्द्धितो यः स निर्वृतिं ते किमपाकरोति।
समन्ततस्तामरसेक्षणे न समं ततस्तामरसेक्षणेन ॥ २०४ ॥

व्यपेतभेदेषु प्रथमतृतीययोर्यथा,

सभा सुराणामबला विभूषिता
गुणैस्तवारोहि मृणालनिर्मलैः।
स भासुराणामबला विभूषिता
विहारयन्निर्विश सम्पदः पुराम् ॥ २०५ ॥

तत्रैव प्रथमचतुर्थयोर्यथा,

कलङ्कमुक्तं तनुमध्यनामिका स्तनद्वयी च त्वदृते न हन्त्यतः।
न याति भूतं गणने भवन्मुखे कलङ्कमुक्तं तनुमध्यनामिका ॥
॥ २०६ ॥

नानाकलानां चतुःषष्टिकानाम् आली परम्परा। एणनेत्रा हरिणलोचना। इयमपि स्त्रीविशेषणम् ॥ २०३ ॥

समं समकालं क्षणेन ततो विस्तीर्णस्तामनुभवैकसाक्षिचिन्तानुवृत्तिलक्षणान् निर्वृत्तिमरत्नं इति सीपालस्मसम्बोधनम्। समन्ततः सर्वतस्तामरसेक्षणे कमलनेत्रे न किमपाकरोतीति पूर्वेण सम्बन्धः। अबला। बलाख्येन दानवेन रहिता विभुना शक्रेणाध्यासिता सुराणां देवानां सभा मृणालनिर्मलैः तव गुणैः आरोहि यतोऽतः त्वं पुण्यं बला विभूषितास्त्रियोऽलङ्कृता विहारयन् भासुराणां सतां सम्पदो निर्विश इति आशंसा ॥ २०४ ॥ २०५ ॥

कलं मधुराव्यक्तं भाषितम्। तनोर्मध्यस्य भरेण अनामिकास्तनद्वयी च त्वां विहाय कं नायकं न हन्ति वशीकरोति। अतो जितेन्द्रियेषु प्रथमगणनीये त्वयि सति कलङ्कमुक्तं निर्दोषं तनुमधि शरीरमधिकृत्य भूतमनामिकाङ्गुलीनयातिपरस्य त्वत्सदृशस्य अभावात्। निर्दोषो हि लोके ऊर्द्धाङ्गुल्यानिर्दिश्यते ॥ २०६ ॥

एवं द्वितीयचतुर्थयोरपि यथा,

या बिभर्त्ति कलवल्लकीगुणस्वानमानमतिकालिमालया।
नात्र कान्तमुपगीतया तया स्वानमानमतिकालिमालया॥

॥ २०७ ॥

अर्द्धाभ्यासः समुद्गः स्यात्तस्य भेदास्त्रयो मताः।
व्यपेतश्चाव्यपेतश्च उभयात्मा च सूरिभिः॥ २०८॥

तेषु व्यपेतो यथा,

अनेकपादभ्रमदभ्रशालं मान्ये दृशा भीरुपतत्रिकूटम्।
अनेकपादभ्रमदभ्रशालं मान्ये दृशा भीरु पत त्रिकुटम्॥२०९॥

अव्यपेतो यथा,

घनं विदार्य्यार्जुनबाणपूगं घनं विदार्य्यार्जुनबाणपूगम्।
ससार बाणो युगलोचनस्य स सारबाणोऽयुगलोचनस्य॥ २१०॥

वल्लकीगुणस्वानो वीणाशब्दः तस्य मानं या बिभर्त्ति कालिम्नः श्यामतायाः आलया। कज्जलप्रभृतीनतीत्य वर्णप्रकर्षेण या स्थिता तया गातुमुपक्रान्तया भ्रमरमालया हेतुभूतया का नाम अत्र पर्वते कान्तं न नमति न प्रणमतीति न सुखेन नाम्यते इति अस्वानमाया प्रागासीत् सापि उद्दीपनप्रकर्षे निःशेषितमाना नमतीत्यर्थः॥ २०७॥ २०८॥

अनेकेषु पादेषु प्रत्यन्तपर्वतेषु भ्रमन्ति अभ्राणि मेघा एव सालो वरणः प्राकारो मान्याः पूजार्हा ईदृशा यथादृश्य तथैव मनोहारिणोऽभीरवो भयरहिताः पतत्रिकूटाः पक्षिसङ्घा अनेकपा हस्तिनस्तेषामदभ्र उत्कटो मदः तं भरन्ति धारयन्तीति मूलविभुजादित्वात् कप्रत्यये अनेकपादभ्रमदभ्राः साला वृक्षा यत्र। मान्येभीर्वितिसम्बोधनद्वयम्। मानः प्रङ्गारभावः तदर्हादृशा त्रिकूट पर्वतमालीकयेति। विदारी कन्दभेदः॥ २०९॥

अर्जुनः ककुभो बाणो गुल्मविशेषो पूगो गुवाकी द्वन्द्वद्वन्द्वत्वात् पाक्षिक एकवद्भावः। अर्जुनः पार्थः तस्य बाणपूगं शरसमूहः तं विदार्य भित्वा। अयुग-

व्यपेताव्यपेतौ यथा,

कलापिनां चारुतयोपयान्ति वृन्दानि लापोढ़घनागमानाम् ।
वृन्दानिलापोढ़घनागमानां कलापिनां चारुतयोऽपयान्ति ॥
पादत्रयाभ्यासस्तु नातिसुन्दर इति तद्भेदा नोदाह्रियन्ते ॥ २११ ॥

एकाकारचतुष्पादं महायमकमुच्यते ।
श्लोकाभ्यासश्च तत्राद्यं पुनरभ्यासमर्हति ॥ २१२ ॥

तत्राव्यपेतभेदे प्रथमं महायमकं यथा,

सभासमाना सहसा परागात् सभासमाना सहसापरागात् ।
सभासमाना सहसापरागात् सभासमाना सहसापरागात् ॥

॥ २१३ ॥

लोचनः त्रिनेत्र' किरातरूपधर तस्य स सारगतः सारवाण उत्कृष्टशब्दस्तेन सहितोऽयुगद्वितीयोऽलोचनस्य दुर्ज्ञानस्य । २१० ॥

के पानीये लपनशीला हंसास्तेषा वृन्दानि चारुतया मनोज्ञभावेनोपयान्ति सङ्गच्छन्ते । लापेन परस्परसंलापमात्रेणोढः प्राप्तो घनो निरन्तर आगम आगमन येषा वृन्दानिलो वात्या तेनापोढो निराकृतो घनागमो मेघदुर्दिनं कलापिनो मयूरा आरुतयः समन्तत' केकयितानि अपयान्ति तिरोभवन्ति । एकश्लोके पादत्रयाभ्यासस्य असम्भवात् श्लोकान्तरे च तया सौन्दर्याभावात् पादत्रयाभ्यासो न चिन्तनीय इत्यत आह पादत्रयेति ॥ २११ ॥

इदानीं क्रमप्राप्तं महायमकं लक्षयन्नाह । एकाकारेति । द्विविधमेकाकारं भवति । एकसावृत्तिचतुष्केण अपरमावृत्त्यष्टकेन तदिदमुक्तमाद्यं पुनरनावृत्तमिति । प्रतिपादसवान्तरावृत्तिभेदेनैव अष्टकनिर्वाहात ॥ २१२ ॥

भासः कान्तिर्मानश्चित्तमसुन्नतिः पूजा वा भासः शत्रुविधूनन' हसः स्मेरता । एतैः सह वर्त्तते इति सभासमाना सहसा । यतोऽपरागं चित्तकालुष्यमस्ति । भासमानैः शोभमानैः सह वर्त्तते । सभासमाना । सहसा मार्गशीर्षेण हेतुना प्रावृड्विच्छेद प्रादुर्भूतान् परागान् रजःकणान् अतति प्राप्नोति परागात् । भाकान्तिस्तया समाना सरूपास्तैः सहवर्त्तत इति सभासमाना । षोऽन्तकर्मणि । स्यन्ति परानिति ते सासैः सहवर्त्तत इति सहसा एवम्भूता असमाना अनुपमा

व्यपेतभेदे द्वितीयं महायमकं यथा,

प्रणवमदभ्रमदचलद्विपराजितमूढ़विमलमहितरङ्गम् ।
विरसं सदातिमिश्रितमच्युतधाम प्रतीतशिखिचरितवनम् ॥
॥ २१४ ॥

अव्यपेतभेदे आद्यस्य पुनरभ्यासो यथा,

समानयास मानया समानयासमानया ।
ममानयास मानया समान या समानया ॥ २१५ ॥
एकरूपेण वाक्येन द्वयोर्भणनमर्थयोः ।

सभाजनसमवायोऽपरागादपरस्मात् पर्वतात् सहसा शीघ्रं परागात् परागतेति ॥ २१३ ॥

प्रवणं प्रकृष्टतरवनं प्रनिरन्तः शरित्यादिना णत्वम् । अदभ्रेण महता मदेन दर्पेण चलन्तो ये वयः पक्षिणस्ते, पराजिता मूढवयो बालाः पक्षिणो यत्र तमलमत्यर्थं पूर्वोक्तरूपानमूढान् वीन् पक्षिणो मलते धारयतीति वा । अहिततरगं भुजङ्गव्याप्तावर्तस्थानं विरसमतलस्पर्शं तथा भूभागरहितं सदा सर्वकालं तिमिभिर्महामत्स्यैः श्रितमाश्रितमच्युतस्य भगवतो नारायणस्य धाम विश्रान्तिस्थानं प्रतीतः प्रख्यातः शिखी वडवानलस्तेन चरितवनं भक्षितजलोत्पीडमिति प्रथमश्लोकार्थः । प्रवणमदाः मदायत्तदर्पाः सततनिस्यन्दमानमदजलाश्च भ्रमन्तो ये सैनाकप्रभृतयः अचला द्विपाः करिमकराश्च तै. शोभितम् । ऊढा विमला स्वभावनिर्मलाः महिता. पूजिताः तरङ्गा येन तम् । विरस चारम् । सतीभिः शोभनाभिरातिभिः पक्षिविशेषैः मिश्रितं करम्बितं न च्युतं धाम तेजो यस्य तं प्रतीताः प्रत्यागताः शिखिनो मयूराः तैश्चरितवनं भ्रान्ततीरकानन समुद्रं पश्येति वाक्यान्तरवर्त्तिक्रियया सम्बन्ध इति द्वितीयश्लोकार्थः ॥ २१४ ॥

समानयेति । हे समान सखे या असमानया अविनयवतीनां धुरि गणनीयया अनयोः समानया समानया यासः प्रयत्नोमान ईर्ष्यारोषस्तौ समानौ यस्याः तया तया समानया चित्तानुवृत्तिसारूप्यं भजमानया पूजा सहितया असमानया अनुपमया सत्व मा मांसमानय सङ्गमयेति मन्मथोन्माथाविष्टस्य कस्यचिद्वयस्यप्रार्थना ॥ २१५ ॥

तन्नेण यत् स शब्दज्ञैः श्लेष इत्यभिशब्दितः ॥ २१६ ॥
प्रकृतिप्रत्ययौत्थौ द्वौ विभक्तिवचनाश्रयौ।
पदभाषोद्भवौ चेति शब्दश्लेषा भवन्ति षट् ॥ २१७ ॥

तेषु प्रकृतिश्लेषो यथा,

आत्मनश्च परेषाञ्च प्रतापस्तव कीर्त्तिनुत्।
भयङ्करूपते बाहुर्द्विषाञ्च सुहृदाञ्च ते ॥

अत्र कीर्त्तिनुदित्यत्र नौतिनुदत्योर्भयङ्करदित्यत्र करोति क्रन्तत्योश्च प्रकृत्योः क्विपि तुल्यं रूपमिति प्रकृतिश्लेषोऽयम् ॥ २१८ ॥

लिङ्गश्लेषोऽपि प्रकृतिश्लेष एव स यथा,

कुवलयदलद्युतामौ दृशा च वपुषा च कं न दर्शयते।
अधरीकृतप्रवालश्रियाङ्घ्रिणास्येन च नतभ्रूः ॥

वस्माद्वृत्तिसामान्याद्यमकानन्तरं श्लेषं लक्षयति। एकरूपेणेति। अर्थभेदेन शब्दा भिद्यन्त इति नये कथमेकेन वाक्येन द्वयोरुक्तिरित्यत आह। तन्नेणेति। श्लेषो हि सम्भेदलक्षणः स चात्र भिन्नानामपि शब्दानाम् उच्चारणसाम्येन प्रवर्त्तते। अनेकसम्बन्धानामेकरूपेण वर्त्तनं तन्नमित्युच्यते ॥ २१६ ॥

द्वयोरिति संख्या न विवक्षिता। त्रिप्रभृतीनामपि श्लेषसम्भवात्। विभागवाक्ये विभक्तीनां साक्षात् उपादानात् प्रत्ययपदं तदन्यपरं विशेषशोभाकरत्वं च विशेषोपादानप्रयोजनम् ॥ २१७ ॥

आत्मनः कीर्त्तिन्नौतीति परेषां शत्रूणां च नुदति क्षिपति द्विषा भयङ्करोति जनयति सुहृदा च भिनत्तीति धातुरूपप्रकृतिभेदाद्वार्थभेदः क्विप्प्रत्ययस्य साधारण्यात् ॥ २१८ ॥

ननु वर्णपदलिङ्गभाषाप्रकृतिप्रत्ययविभक्तिवचनानामिति कैश्चित्परिसंख्यातं ततश्चाष्टधा श्लेषो भविष्यतीत्यत आह। लिङ्गश्लेषोऽपीति। तदिदमुदाहरणीयमित्याह। स यथेति। दर्शयत इत्यात्मनेपदेन तटस्थमपि कं न हठाद्दर्शनाय प्रेरयति इति व्यज्यते। अधरीकृता जिता अधरत्वमापादिता च।

अत्र दृग्वपुषोरास्यचरणयोश्च कुवलयद्युतेत्यधरीकृतप्रवालश्रियेति च लिङ्गभेदेऽपि तुल्यरूपे विशेषणे इति लिङ्गश्लेषोऽयम् ॥ २१९ ॥

प्रत्ययश्लेषः सोद्भेदो निरुद्भेदश्च तयोराद्यो यथा,

तस्या विनापि हारेण निसर्गादेव हारिणी ।
जनयामासतुः कस्य विस्मयं न पयोधरौ ॥

अत्र हारिणाविति इनिणिनिप्रत्ययोरेकरूपत्वाद्विनापि हारेणेति च मत्वर्थीयोद्भेदात् सोद्भेदः प्रत्ययश्लेषोऽयम् ॥ २२० ॥

द्वितीयो यथा,

त्वदुद्धृता मयस्थानरूढव्रणकिणाकृतिः ।
विभाति हरिणीभूता शशिनो लाञ्छनच्छविः ॥

अत्र हरिणीभूतेति चूर्ङीपश्च तुल्यरूपतायां तदुद्भेदो नास्तीत्यनुद्भेदः प्रत्ययश्लेषोऽयम् ॥ २२१ ॥

ननु च कुवलयदलद्युतेति अधरीकृतप्रवालश्रियेति च प्रकृतिभागो न भिद्यते । तत्कथमयं प्रकृतिश्लेष इति । नैतत् । आविष्टलिङ्गद्वयविशेष्यलिङ्गद्वयसन्निधानात् अनाविष्टलिङ्गं विशेषणमवश्यम् उभयलिङ्गयाहि वाच्यम् । पचकप्रातिपदिकार्थपक्षे विभक्तिर्योतिकैव तथाच लिङ्गभेद इति विभिन्ने विशेषणप्रकृती मिथः संश्लिष्टे इति । अत्रेत्यादि ॥ २१९ ॥

तद्वाक्यस्थशब्दान्तरप्रकाशितः सोद्भेदो तथाभूतो निरुद्भेदः । मत्वर्थीये निप्रत्यये हारवन्तौ हारिणौ । अवश्यकार्थणिनिप्रत्यये सहृदयानां मनोहरत इति हारिणौ आनन्दघनरसचर्वणारूपी विस्मयी अद्भुतं च । अपिशब्देन विरोधद्योतकेन हारहीनयोरपि हारसम्बन्धी विस्मयरसार्पक इति मत्वर्थीयोन्मुद्रणात् सोद्भेदः । प्रत्ययश्लेषस्तु कथं भवतीत्यत आह । णिनिप्रत्यययोरिति ॥ २२० ॥

व्रणरूढिस्थानं श्यामं भवतीति लाञ्छनच्छायाभूता कीदृशी हरिणी हरिता व्रणादनुदात्तात्तीपधात्तीन इति ङीपि नादेशे च रूपम् । सेयं प्रतीयमान-

विभक्तिश्लेषो द्विधा भिन्नजातीययोः अभिन्नजातीययोश्च। तयोराद्यो यथा,

विषं निजगले येन बभ्रे च भुजगप्रभुः।
देहे येनाङ्गजो दग्धे जाया च स जयत्यजः॥

अत्र येन विषं निजगले भुजगराजश्च निजगले बभ्रे अङ्गजो देहे जाया च देहे दग्धे इति लिङ्गात्मनेपदप्रथमपुरुषैकवचनसप्तम्येकवचनान्तयोः एकरूपत्वात् विभिन्नार्थत्वात् भिन्नजातीसुप्तिङ् विभक्तिश्लेषोऽयम्॥ २२२॥

द्वितीयो यथा,

त्वमेव धातुः पूर्वोऽसि त्वमेव प्रत्ययः परः।
अनाख्यातं न ते किञ्चिन्नाथ केनोपमीयसे॥

अत्र धातुरिति प्रथमान्तस्य षष्ठ्यन्तस्य च एकरूपत्वात् भिन्नार्थत्वात् च अभिन्नजातीयसुब्विभक्तिश्लेषोऽयम्॥ २२३॥

गुणा नोत्प्रेक्षा। अहरिणरूपापि व्यवहारारूढहरिणतामापन्नेति च्विप्रत्यये च हरिणीभूते रूपम्। अत्र डीपच्वोर्वा न किञ्चिद्भेदकं निबन्धनमिति निरुद्भेदः प्रत्ययश्लेषोऽयम्। हरितहरिणरूपे प्रकृती अपि सभिन्ने एव। सङ्करस्य अदूषणत्वात्। एवं पूर्वोदाहरणेऽपि॥ २२१॥

निजगल इति गिरतेः कर्मणि लिटि रूपम्। येन विषं कालकूटाख्यं निगीर्णं निजे च गले कण्ठे भुजगराजो धृतो देह इति दहतेः तत्रैव रूपम्। अङ्गजः कामो येन दग्धः निजे च देहे शरीरे जाया पार्वती धृता स जयतीति। विवरणगतः सुबोध एव॥ २२२॥

धातुः जगन्निर्मातुरपि पूर्वं इत्यनेनादित्वमुक्तम्। परः प्रत्ययः कारणत्वरूपं न किञ्चिदनाख्यातम्। श्रुतिस्मृतीतिहासपुराणेषु प्रसिद्धावदानत्वात्। द्वितीयस्य अभावात् न केनचित् उपमानम्। अथान्तरे तु धातुः क्रियावचनशब्दरूपः पूर्व एव प्रकृतित्वात् ततः परः प्रत्ययः तिङादिरतः सर्वमाख्यातमेव पदं निष्पद्यते तेन च कथमुपमा न हि तिङन्तेनोपमानमस्ति भिन्नार्थत्वाच्चेति शब्दभेद-

वचनश्लेषो द्विधा सोद्भेदो निरुद्भेदश्च ।

तयोः सोद्भेदो यथा,

प्राज्यप्रभावः प्रभवो धर्मस्यास्तरजस्तमाः ।
मुक्तात्मानः शिवं नेमिरन्येऽपि ददतां जिनाः ॥

अत्र नेमिः इत्यन्येऽपीति एकवचनबहुवचनाभ्यां ददता-मित्यत्र तिङन्ते प्राज्यप्रभावः प्रभव इत्यादिषुच सुबन्तेषु एकवचनबहुवचनयोः उद्भेद इत्ययं सोद्भेदो नाम वचन-श्लेषः ॥ २२४ ॥

निरुद्भेदो यथा,

तनुत्वरमणीयस्य मध्यस्य च भुजस्य च ।
अभवन्नितरां तस्या वलयः कान्तिवृद्धये ॥

अत्राभवन्निति वलय इति पदयोस्तिङन्तसुबन्तयोः एक-वचनबहुवचने अनुद्भिन्ने एव श्लिष्येते इत्ययं निरुद्भेदो नाम वचनश्लेषः ॥ २२५ ॥

पदश्लेषो यथा,

अरिमेदः पलाशश्च बाहुः कल्पद्रुमश्च ते ।

दृढीकरणार्थमुक्तम् । एवं तिङामपि सम्भेद उदाहरणीयो यथा । सायन्तु नाम कवयस्तथापि विदितश्रमाः । वेदविद्यापतिर्वाचामहं वाचोरिवान्तरम् । अत्र वेदेति प्रथमोत्तमयोः पुरुषयोरेकवचने श्लिष्येते ॥ २२३ ॥

अत्र नेमिरिति । एकवचनबहुवचनाभ्यां विशेषणेषु सम्बन्धयोग्यताचेपात् तिङ्-वचनेषु सुब्वचनेषु च यथायथमर्थद्वयोन्मीलनाच्छब्दरूपद्वयोद्भेदः । एकवचनेन वलयः कङ्कणं बहुवचनेन च मध्यरेखा इति सुबन्तपदे । एतदौचित्ये तिङन्त-पदे च अभवन्निति वचनद्वयलाभः । न च अनयोः किञ्चिदुद्भेदकं निबद्धमिति निरुद्भेदोऽयं तदेतदाह । अत्रेत्यादि ॥ २२४ ॥ २२५ ॥

बालेवोद्यानमालेयं सालकाननशोभिनी ॥

अत्र प्रकृतिप्रत्ययविभक्तिवचनानां पृथगभिधानादभिधानमालोक्तानि प्रातिपदिकान्येव पदशब्देन उच्यन्ते। तेन पूर्वार्द्धे शत्रुमेदोमांसादस्ते बाहुरित्यर्थेनारिमेदपलाशाख्यवृक्षनाम्नीति श्लिष्येते॥ उत्तरार्द्धे सालानां काननेन शोभते इत्येवंशीलेयमुद्यानमालेव द्वयर्थेन सालकेन आननेन शोभत इत्येवंशीला बालेत्युपमानार्थः श्लिष्यते स एष पदश्लेषो नाम शब्दश्लेषः॥ २२६॥

वर्णश्लेषोऽपि पदश्लेष एव। स यथा,

त्वमेव देव पातालमाशानां त्वं निबन्धनम्।
त्वञ्चामरमरुद्भूमिरेको लोकत्रयात्मकः॥

अत्र त्वमेव पातालमित्यकारः पाश्चात्ये, त्वं च अमरमरु-

अरीणां मेदः शरीरधातुभेदः पलं मांसमश्नाति यः स तथा चकार उत्तरवाक्यापेक्षया। अरिमेदो विट्खदिरः पलाशः किंशुकः सालासरुविशेषाः तेषां काननमलकायूर्णकुन्तला: तत्सहितमाननञ्च। पूर्वोत्तरार्द्धयोः न एकवाक्यत्वमुदाहरणत्वात्। ननु विभक्त्यन्तात् नान्यत्पदं तत्र पूर्वभागेन प्रकृतिश्लेष उत्तरभागेन च प्रत्ययश्लेष उद्दिष्ट एव तत् कोऽन्यः पदश्लेष इत्यत आह। अत्रेति। प्रकृतिप्रत्ययभावविवक्षाविरहेनाममालोक्तानि प्रातिपदिकान्येव अवशिष्यन्त इत्यर्थः॥२२६॥

"अलङ्कारः शङ्काकरनरकपालं परिजनो विशीर्णाङ्गी भङ्गीवसु च वृष एको बहुवयाः। अवस्थेयं स्थाणोरपि भवति सर्वामरगुरोर्विधौ वक्रे मूर्ध्नि स्थितवति वयं के पुनरमी। इति वर्णश्लेषः काश्मीरकैः पृथगुदाहृत अत आह। वर्णश्लेषोऽपीति। अवयवाभेदे समुदायभेदासम्भवादवयवभेदे च समुदायभेदप्रौव्यात्पदश्लेषव्यवस्थितौ तत्रैवास्य अन्तर्भावो युक्त इति भावः। अलमत्यर्थं पाता रक्षिता आशानां निबन्धनं मनोरथसफलीकरणबीजमाशानां दिशां संश्लेषस्थानं चामरमरुद्भूमिः स्वर्लोको अमराणाम् इन्द्रादीनां भूमिरमरावत्यादिर्मरुतां च विवस्वदादीनां भूतिर्वैमानिकपथश्च अमरमरुद्भूमिश्च अमरभवमरुतामाश्रयश्च। कथमत्र

ङ्गमिरिति चकारः पौरस्त्येऽक्षरे श्लिष्टः पातालञ्चामरेति च पदं रचयति। सोऽयं पदश्लेष एव वर्णश्लेष उच्यते ॥ २२७ ॥

भाषाश्लेषो यथा,

कुरु लालसभूलेहे महिमोहहरे तुहारिविच्छिन्ने।
हरिणारिसारदेहे वरे वरं हर उमे भावम् ॥

अत्र, "ध्यानानीताञ्चरुद्राणीं कान्ताञ्च पुरतः स्थिताम्। रणेच्छुः कश्चिदानर्च दिव्यप्राकृतया गिरा ॥" तत्र रुद्राणीपक्षे हे उमे हरे भवे वरं श्रेष्ठं भावं कुरु किंभूते लालसभूलेहे लालसभूः कामस्तं लेढि वस्तस्मिन् तथा महिम्ना प्रभावेण ऊहं वितर्कमपहरति यस्तस्मिन् महिमोहहरे महेश्वरसन्निधौ हि सर्वज्ञानाभिभव इति श्रूयते। अतएव तोहन्ति अर्दयन्ति ये अरयस्तैर्विच्छिन्ने विरहिते अपरमप्यरीणां विच्छेदकारणमाह। हरिणारिसारदेहे हरिणारिः सिंहस्तस्य सारो बलं स देहे यस्य तस्मिन् वरे परिणेतरीति। उमाया एव वा

वर्णश्लेष इत्यत आह। अत्रेत्यादि। पतिचर्ष्टिभ्यामालञ् इति पतेरालञ्प्रत्यये पातालमिति रूपसिद्धावाकार एव मध्यवर्त्तिवर्णस्तत्रैव पुनरेकदेशप्रतिसन्धाने पातालमित्याकारश्च प्रतीयते। अत्र चैकः पूर्वपरयोरितिवचनादाकार एव श्रूयते तेनोत्तरः पौरस्त्येन संभिन्नः। एवं चकारस्य उत्तरसन्धौ व्याख्येयः ॥ २२७ ॥

दिव्या संस्कृता कृत्रिमा प्राकृता महाराष्ट्री भावश्चेतसो लयो लालस इच्छा तस्मात् भवतीति लालस भूः सङ्कल्पयोनिस्तत्कामस्य लेढीति कर्मण्यण्। ऊहस्तर्कः संशयपृष्ठभावी विपरीतप्रत्ययविशेषः। कथं तं हरतीत्यत आह। महेश्वरसन्निधौ इति। सन्निधिः साक्षात्काररूपः सर्वज्ञानानि संस्कारप्रवर्त्तकानि। तुहिर् अर्दने तोहतीति इगुपधत्वात् कप्रत्यये तुहा अरयो द्विधा आन्तरा बाह्याश्च। आन्तरा मदमानादयः षट्। बाह्याः क्षेत्रापहारकादयः। तत्र पूर्वावच्छेदे

इमानि सम्बोधनविशेषणानि। कान्तापक्षे तु हे कान्ते तव योऽयं हरिनार्या श्रियाः सार उत्कृष्टो देहस्तत्र यद्वरं श्रेष्ठं विलोचनाननस्तनजघनादि तन्मे भावमभिलाषं हरतु कामं पूरयतु इत्यर्थः। किम्भूते देहे, कुटिलालसभ्रूलेखे महिमोहहरे गृहे हारिणि विच्छिन्ने च तनुमध्यत्वादिभिरिति ॥२२८॥

यथा वा,

रुचिरं जितारिहेतिं जननमितं सामकायमकलङ्कम्।
सन्तममितञ्च मानय कमलासनमभिविराजन्तम्॥
भूतसंस्कृतभाषाभ्यां हिर्नमस्कृत्य माधवम्।
जगाम समरं कोऽपि कस्य श्रेयसि लप्सयः॥

तत्र भूतभाषायां यथा, रुचिरं मनोहरं जितारिहेतिं भग्नसपत्नायुधं जननैर्नमितं श्यामकायमकलङ्कं शान्तं शान्तरूपम् अमितम् अनन्तं च समुच्चये कमलासनं ब्रह्माणम्

च हरिणारिसारदेहत्वं हेतुरुक्तो हरिणारिसार इव सारो यस्य इति उत्तरपदलोपे-हरिणारिसारो देहो यस्येति विग्रहवाक्यमवसेयम्। यथा युत्यर्थकथनमात्र-सुमाया एवेत्यत्र जालस भूखिह इत्यच्प्रत्यये व्याख्येयम्। तुग्वदस्त्वार्थे। तुतुवतु ह्रतुव्भतुभ्भाङ्स इति सूत्रणात्। हरिनारी लक्ष्मीः तस्याः सकाशात् सारः प्रकर्षशाली देहः। पञ्चमीति योगविभागात् समासः। कुरुलाश्चूर्णकुन्तलाः। महीशब्देन भूगोलवर्त्तिनः प्राणिनोऽभिमताः तेषां मोहघ्न इति व्याख्येयम् विच्छिन्नो विभक्तावयवः॥ २२८॥

एवं पैशाचादिभिरपि संस्कृतस्य प्राकृतादेश्च परस्परसम्भेदनात् श्लेषो गवेषणीय इत्याशयवानाह। यथावेति। अकलङ्कं दोषरहितं मानयेति धात्वर्थस्य भाव्यत्वेन अन्वयात् पूजां कुर्वित्यर्थः। ब्रह्माणमभिलक्षीकृत्येति। रुचय आत्मीया अरा विद्यन्ते यस्य तदरिचक्रं हेतयः किरणाजननं जन्म सामानि कायति कीर्त्तयतीति अपवादविषये क्वचित् उत्सर्गः प्रवर्त्तत इति कर्मण्यण्। लप्सा अवगमवाः प्रसिद्धौ। वीनां पक्षिणां राजा गरुड़स्तमभि इतं गतं कमला

अभिलक्षीकृत्य विराजन्तं शोभमानं मानय पूजयेति ॥ संस्कृतभाषायां यथा। रुचिभिः रञ्जिता अरिहेतयः चक्रदीप्तयः येन तं, जननैः दशभिरवतारैर्मितं परिच्छिन्नं, सामानि कायति गायति यः स सामकायः तं, न विद्यते कला यस्य सोऽकलस्तं, कं सन्तं ब्रह्माणं सन्तम्, अं विष्णुम् इतं गतम्, अभि विराजं तं गरुत्मन्तमभिमन्तं तं प्रसिद्धं कमलासनं श्रिया संसक्तं मा नय मां प्रापयेति ॥ २२९ ॥

आवृत्तिर्या तु वर्णानां नातिदूरान्तरस्थिता।
अलङ्कारस्य विद्वद्भिरनुप्रासः प्रदर्श्यते ॥ २३० ॥
श्रुतिभिर्वृत्तिभिर्वर्णैः पदैर्नाम द्विरुक्तिभिः।

लक्ष्मीस्तस्या आसनमधिष्ठानं मा मानयेति ॥ अनुद्भटावृत्तेः चित्रात् उद्भटावृत्तिमनुप्रासं पूर्वं लक्षयति। आवृत्तिरिति। वर्णानामिति। वचनमतन्त्रम्। सारः सारस्वतीमूर्त्तिरित्यादौ एकवर्णावृत्तेरपि अनुप्रासत्वात्। तेन यमकव्यतिरिक्ता वर्णावृत्तिरनुप्रास इति लक्षणमुक्तं भवति। न च श्लेषेति प्रसङ्गः। तन्नाभ्यां विशेषात्। पूर्वजातिप्रतिबिम्बनेन बन्धच्छायायैकतयानुप्रासः अलङ्कारपदवीमध्यास्ते। न च निर्निमित्तमेव प्रतिबिम्बनमत आह। नातिदूरेति। अस्ति कश्चिदुच्चारणस्य शब्दस्य वा विशेषो यः शीघ्रमेव सत्कारमुद्बोधयतीति तद्वती वर्णावृत्तिः अभिप्रेता। अतएव प्राचीनवर्णजात्यनुगतः सहृदयावर्जकतया प्रकृष्टश्च वर्णानामनुप्रास इति काश्मीरिका निरुक्तिः ॥ २२९ ॥

एवं स्थिते सामान्यलक्षणविभागमाह। श्रुतिभिरिति। आवृत्तिर्द्विधा। वर्णमात्रावलम्बिनी समुदायगोचरा च। आद्यापि द्वेधा। सामान्यतो रूपतश्च। सामान्यमपि द्विधा। स्थानतो व्यापारतश्च। तत्र स्थानं कण्ठादिलक्षणं सैव श्रुतिः। श्रूयते हि तयाभिव्यक्तो वर्णो व्यापारोऽभिव्यञ्जनरूपः स एव रसविषये वर्त्तनं वृत्तिरुच्यते। श्रुतिभिरित्यादौ इत्थम्भूतलक्षणे तृतीया प्रायेणेति ॥ २३० ॥

श्रुत्यनुप्रासो हि श्लेषवटकः श्लेषश्च गुणान्तरसमकक्षतया अवतिष्ठमानो-वैदर्भीं प्रवीजयति। अनुप्रासान्तरं तु प्रौढिं वा माधुर्यं वा प्रकर्षयतीति न

लाटानामुक्तिभिश्चायं षट्प्रकारः प्रकाशते ॥ २३१ ॥
प्रायेण श्रुत्यनुप्रासस्तेष्वनुप्राप्तनायकः।
सनाथैव हि वैदर्भी भाति तेन विचिचिता ॥ २३२ ॥
निवेशयति वाग्देवी प्रतिभानवतः कवेः।
पुष्पैरसुमनुप्रासं ससमाधिनि चेतसि ॥ २३३ ॥

स त्रिधा ग्राम्यो नागर उपनागरश्च। तेषु ग्राम्यश्चतुर्द्धा मसृणो वर्णमसृणो वर्णोत्कटो वर्णानुत्कटश्च ॥
तेषां मसृणो यथा,

एष राजा यदा लक्ष्मीं प्राप्तवान् ब्राह्मणप्रियः।

तथानुकूल्यं कविशक्तिवशात् क्वचित् तदपि प्रयोजयतीति प्रायपदेन सूचितम्। स्थितिप्रयोजको लोकेनाथ इत्युच्यते तेषु नायक इत्येव वक्तव्ये पुनरनुप्रासपदमनुप्रासान्तरसाधारण्येनैव शब्दालङ्कारत्वं दर्शयितुम् अभिसमाधेयम्। विचिचिता आलेख्यमिव लेखया चमत्कारकारित्वमानीता ॥ २३१ ॥

कथं पुनरस्य अनुप्रासस्य पृथक्प्रयत्नानुसन्धेयस्यापि रसप्रकाशसामग्र्यामन्तर्भाव इत्यत आह। निवेशयतीति। अक्लिष्टपदवाक्यार्थस्फुरणं प्रतिभानं तदेव कथमित्यत आह। स समाधिनीति। पुष्पैरिति। तेन रसवत्त्वव्यवस्थितस्य कवेरह पूर्विकाक्लृप्तोऽनुप्रासो न पृथक्प्रयत्ननिर्वर्त्य इति तात्पर्यम्। ग्राम्यादिभेदोऽग्रे विवरिष्यते ॥ २३२ ॥

एकपदप्रतिभासमात्रानुमेयो मसृणः। रूपसाजात्येऽपि मसृणतान्यगभूतो वर्णमसृणः। उद्भटरूपसाजात्यानुविद्धो वर्णोत्कटः। अनुद्भटसाजात्यानुरोधेन किञ्चित् अभिभूतमसृणभावो वर्णानुत्कटः। एष राजेत्यादौ उदाहरणे षकाररेफौ मूर्द्धन्यौ। जकारयकारौ तालव्यौ दकारलकारौ दन्त्याविति प्रथमपादे तकारदकारौ दन्त्यौ पकारभकारावोष्ठ्यौ तकारधकारौ दन्त्याविति तृतीयपादे च निरन्तरं द्वितीयपादे रेफणकारौ मूर्द्धन्यौ चतुर्थपादे लकारसकारौ दन्त्यादिविनाक्रमेण सान्तरमावर्त्तनं नवरूपसाजात्यं क्वचिदुल्लिखतीति मसृण एवायम् ॥ २३३ ॥

अचिन्नतन्तुमयः पटः। एकजातीयकुसुमग्रथनात् प्राक्स्थिता इत्यादि।

तदा प्रभृति धर्मस्य लोकेऽस्मिन्नुत्सवोऽभवत् ॥

अत्र स्थानतः समानश्रुतीनां मूर्द्धन्यतालव्यदन्तौष्ठ्यकण्ठ्य-वर्णानां प्रथमतृतीयपादयोर्निरन्तरा द्वितीयचतुर्थपादयोश्च सान्तरा पट इव स्रग्दाम्नीव वा वर्णप्रदानान्मसृणैवावृत्तिः। सोऽयं श्रुत्यनुप्रासो मसृण इत्युच्यते ॥ २३४ ॥

वर्णमसृणो यथा,

स्थिता क्षणं पक्ष्मसु ताड़िताधराः
पयोधरोत्सेधनिपातचूर्णिताः।
वलीषु तस्याः स्खलिताः प्रपेदिरे
चिरेण नाभिं प्रथमोदबिन्दवः ॥

अत्र दन्त्यौ मूर्द्धन्यावोष्ठ्यौ डलयोरैक्येन दन्त्यपञ्चकं मूर्द्धन्य इत्यादिक्रमेण यद्यपि पूर्ववत् स्थानतः समानश्रुतितया मसृणैवावृत्तिः तथापि चित्रपट इव माल्यग्रथन इव वा। योऽयं क्षणं पक्ष्मसु ताड़िताधराः पयोधरो वली स्खलिताः प्रपेदिरे चिरेण नाभिं प्रथमोदबिन्दव इति नानावर्णात्मकः

अत्र थकारतकारादौ दन्त्यौ। षकारणकारौ मूर्द्धन्यौ। पकारमकारौ ओष्ठ्यौ। ताड़ितेत्यत्र डकारे लकारकल्पनया। सनलतधाः पञ्च दन्त्याश्च रेफो मूर्द्धन्य इति प्रथमपादे। द्वितीयपादे च घकारसकारौ नकारतकारौ दन्त्यौ इत्यादिना क्रमेण सान्तरा निरन्तरा च श्रुतित एव वर्णावृत्तिः पूर्ववत् उपलभ्यते। किन्तु तकारादीनां रूपतोऽपि स्थाने स्थाने पूर्वमसृणता न्यग्भूतैव आवृत्तिलीनायं वर्णमसृणः श्रुतिसाजात्यं च न क्वचिद्विघटते। अत्रैव निदर्शनद्वयम्। विमुञ्चेति। हारोचितसन्निवेशयोरपि स्तनयोरनुचितवल्कलबन्धसम्भावने हेतुरहार्य्यनिश्चयेति। अतएव मा मां कोऽपि वारयेदिति कातरता प्रादुर्भावादितस्ततो विलोलदृष्टिः। अत्र भकारमकारौ ओष्ठ्यौ। चकारयकारौ तालव्यौ इत्यादिना क्रमेण मसृणा इकारादीनां रूपसाजात्येऽपि मसृणता प्राधा-

सूत्रान्तरस्येव पुष्पान्तरस्येव वा स्थानभेदेन मसृण एव निवेशः। तेनैष श्रुत्यनुप्रासो वर्णमसृण इत्युच्यते ॥ २३५ ॥

वर्णोत्कटो यथा,

विमुच्य सा हारमहार्यनिश्चया विलोलदृष्टिः प्रविलुप्तचन्दना।
बबन्ध बालारुणबभ्रु वल्कलं पयोधरोत्सेधविशीर्णसंहति ॥

अत्र सर्वं पूर्ववत्। किन्तु तृतीयपादे बबन्ध बालारुणबभ्रु-वल्कलमिति वर्णाधिक्ययोगः। सोऽयं वर्णोत्कटो नाम श्रुत्यनुप्रासः ॥ २३६ ॥

वर्णानुत्कटो यथा,

ततः प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका।
न जातु बाला लभते स्म निर्वृतिं
तुषारसङ्घातशिलातलेष्वपि ॥

अत्र दन्त्यवर्णप्रायतया अतिमसृणत्वे शिलातलेषु इति दन्त्यवर्णाभ्यामेव वर्णस्तोमो दत्तः। सोऽयं वर्णानुत्कटो नाम श्रुत्यनुप्रासः। तेऽमी चत्वारः अपि अतिप्रसिद्धतया ग्राम्या उच्यन्ते ॥ २३७ ॥

न्यादर्णमसृणा च आवृत्तिरित्याह। अत्र सर्वमिति। वर्णोत्कटत्वं व्याचष्टे। वर्णाधिक्ययोग इति। उद्भटं हि रूपसाजात्यं वर्णोत्कटत्वम्। तच्च सरूपवर्णावृत्त्याधिक्येन इतीत्यर्थः ॥ २३४ ॥ २३५ ॥

ततः प्रभृतीति। तापोद्रेकादृत्तं दत्तमेव चन्दनमाख्यानभावेन रेणुभिरलकच्छटासु विशीर्यत इति द्वितीयकामावेशो ध्वनितः। अत्र तकारनकारौ दकारनकारौ इत्यादिना क्रमेण श्लोकसमाप्तिं यावत् बहवो दन्त्याः तेनैकश्रुतिव्याप्तस्य सन्दर्भस्य मसृणतायामतिशयः। शिलातलेति रूपसाजात्येन लकारौ उद्भूतश्रुतिकौ न च अधिकावृत्तिः अत्र अस्तीत्यनुत्कटता। न च श्रुतेः उद्भवेऽपि मसृणता

ग्राम्यवैपरीत्येन नातिप्रसिद्धौ नागरः। यथोच्यते,

एकत्वबुद्धिर्भेदेऽपि तत्त्वेऽप्येकत्वनिह्नवः।
यस्य वर्णस्य तं प्राहुरनुप्रासस्य जीवितम्॥

तत्र भेदेऽप्येकत्वबुद्ध्या समानस्थानयोर्यथा,

हरेर्लङ्घितघर्मांशुर्व्योम्नि दीर्घेण रंहसा।
बलिबन्धनघोरोऽङ्घ्रिरंहःसङ्घं निहन्तु वः॥

अत्र हकारस्य तुल्यस्थानेन घकारेण सह भेदेऽपि एकत्वबुद्धेस्तुल्यश्रुतित्वमिति भेदेऽपि एकत्वबुद्ध्या नागरानुप्रासोऽयम्॥ २३८॥

तथैवासमस्थानयोर्यथा,

उच्छलन्मत्स्यपुच्छाग्रदण्डपाताहताम्भसि।

न प्रक्रप्यत इति वर्णानुत्कटोऽयम्। ग्राम्यत्वं व्याचष्टे। तेऽमीचत्वारोऽपीति। श्रुतिसाजात्यस्य शब्दानुशासनेऽपि प्रसिद्धेरतिप्रसिद्धत्वम्॥ २३६॥ २३७॥

ग्राम्यवैपरीत्येनेति। ग्राम्यविरुद्धस्वभावो हि लोके नागर इत्युच्यते। अतिप्रसिद्धेरभावो विरोधः तेनालङ्कारसमयोपजीविपक्षषप्रसिद्धिः अनतिप्रसिद्धिः इत्युक्तं भवति। एतदेव पूर्वाचार्यमतेन विशदयति। यथोच्यत इति। एकश्रुतिकतया मानं हि श्रुतिसाजात्यमभिमतम्। श्रुतिश्च वास्तवीप्रतिपादनमात्रारूढा वेति न कश्चिद्विशेषः ततो भेदेऽपि एकत्वबुध्यानुप्रासिसिद्धिः। तत्त्वे एकत्वे। आपाततः साजात्यानवभासेऽपि सहृदयप्रणिधानेनावभासनं श्रुत्यनुप्रासप्रयोजकमेव। अनुप्रासस्य। अनुप्रासवतः सन्दर्भस्येत्यर्थः। विजातीययोरेकजात्यप्रतिबिम्बनं द्विधा भवति। स्थानसाम्ये तदसाम्ये च तयोराद्यमुदाहरति। तत्रेति। दीर्घेण रंहसेति। घोरोऽङ्घ्रिरिति। रंहः सङ्घमिति घकारहकारयोः स्थानसाम्येऽपि वैजात्यमस्त्येव। तथा पठितौ तुल्यवच्छ्रुतिः प्रतिभातीति सहृदयहृदयसाक्षिकोऽयमर्थः॥ २३८॥

अत्र त्यच्छकारयोरिति। चच्छौ तालव्यौ तसौ दन्त्याविति स्थानभेदः

जगदुद्यानमम्भोधावुन्ममज्ज ममज्ज च ॥

अत्र उच्छलन्मत्स्यपुच्छाग्रेति अत्र छकारयोरिव त्यकारस्यापि तुल्यश्रुतित्वमिति असमानस्थानत्वेन भेदेऽपि एकत्वबुद्ध्या नागरानुप्रासोऽयम् ॥ २३९ ॥

तत्त्वेऽप्येकत्वनिह्नवेन डकारवकारयकाराणां यथा,

क्रोड़े मा डिम्भमादाय चण्डि पीड़य वत्सा।
कर्णे ब्रूहि वयस्याया युवा यदयमुच्यते ॥

अत्र डकारादीनामीषत्स्पृष्टतादिभिरेकत्वेऽपि भेदावभास इति तत्त्वेऽपि एकत्वनिह्नवेन नागरानुप्रासोऽयम् ॥ २४० ॥

तथैव ढकारवकारलकाराणां यथा,

नवोढ़े त्वं कुचाभ्यापि नोपगूढ़ाय ढौकसे।
वहन् बाहुलते क्षीणो वरः पुलकलङ्घिते ॥

प्रकाश एव। तथापि पिण्डीभूताभ्या च लम्बीभूतमध्यपतितौ तसौ समानश्रुतिकाविति पठितौ सौभाग्यमर्पयतः तेनायमसमानस्थानयोरेकत्वबुद्ध्या नागरानुप्रास इति ॥ २३९ ॥

तत्त्वेऽपीति। द्रुतादौ वृत्तिमात्रं भिद्यते न तु रूपमिति महाभाष्यकारोक्तदिशा येषामेकस्थानत्वेऽपि ईषत्स्पृष्टतरत्वादिकृताभेदप्रथाते डकारादयः कतिपयेऽस्य विषयास्तानुद्दिश्य क्रमेणोदाहरति। क्रोड इत्यादि। अङ्कगतस्य बालकस्य वत्सा पीडनं संक्रान्तकर्णालिङ्गनमामनन्ति। अनेन किल प्रच्छन्नप्रियगोचरो गाढालिङ्गनमनोरथः प्रकटितो भवति। कर्णयोरुपांशु यदभिधीयते तेन तुल्यमिदमिति विदग्धसहचरीपरिहासोक्तिरियम्। अत्र च क्रोडडिम्भेत्यादौ डकारवकारयकाराणामीषत्स्पृष्टतरत्वादिभेदः श्रुतिसाजात्यं च सुप्रसिद्धमेवेति ॥ २४० ॥

ढकारवकारलकाराणामिति। वकारोदाहरणं दत्तमपि वर्णान्तरसरलतया पुनर्दीयते। उपगूढमालिङ्गनम्। अपिशब्दो भिन्नक्रमः। उपगूढायापि

अत्र ढकारादीनामीषत्स्पृष्टतादिभिरेकत्वेऽपि भेदावभास इति तत्त्वेऽपि एकत्वनिह्नवेन नागरानुप्रासोऽयम् ॥ २४१ ॥

उभयगुणयोगात् न अतिप्रसिद्ध उपनागरः। यथोच्यते,

डलयोरैक्यमित्यादिवाक्यैर्यस्यानुमीयते।
समानश्रुतितान्योन्यं सोऽनुप्रासः प्रशस्यते ॥

स डलयोरैक्येन यथा,

शयने यस्य शेषाहिः सनीडे वड़वानलः।
महासाहसिनामग्रं तमीड़े जड़शायिनम् ॥

सोऽयमुपनागरः श्रुत्यनुप्रासः ॥ २४२ ॥

णनयोरैक्येन यथा,

बाणैः क्षुण्णेषु सैन्येषु त्वया देव रणाङ्गणे।
हतशेषाः श्रयन्तो मे शून्यारण्यानि विद्विषः ॥

अत्र क्षुण्णेषु सैन्येषु शून्यारण्यानि इति नकारणकारयोः स्वल्पश्रुतित्वमेकत्वं वा भासत इति उपनागरोऽयं श्रुत्यनुप्रासः ॥ २४३ ॥

नढौकसे दूरे यतः कच ग्रहादिकेलिषु प्रवृत्तिर्लङ्घनेन सर्वाङ्गीणः पुलकोद्भेदो बहिर्व्यावर्त्तनमन्तरनुवर्त्तनं च मुग्धाङ्गना जातिः। अत्रापि ढकारादीनामीषत्स्पृष्टतादिभेदः सुबोध एव ॥ २४१ ॥

उभयगुणयोगादिति। प्रसिद्धाप्रसिद्धौ द्वौ गुणौ। प्रत्यक्षानुमानरूपोपायभेदादविरोधः तदेतदन्यमतेन विवृणोति। डलयोरैक्यमिति। सनीडः समीपं जलमज्जनशेषाहिवड़वानलानामनर्थनिदानतया प्रख्यातानामपि सेवया महासाहसिकानामग्रता। अत्र डकारलकारयोर्भिन्नश्रुतिताप्रत्यक्षत एव। श्रुतिसाम्यं पुनरनुमानात् प्रतीयते। एवमुत्तरोदाहरणेषु अपि बोद्धव्यम् ॥ २४२ ॥

क्षुण्णेषु सैन्येष्विति। ग्रन्थिमद्विन्ना नकारणकारयोः साम्यप्रतिभासः। रणाङ्गण इति। मध्यवर्त्तिनां संयोगेन साम्योन्मुद्रणम्। अङ्गणशब्दोऽधिकरण-

रलयोरैक्येन यथा,

विभिन्नवर्णा गरुड़ाग्रजेन सूर्यस्य रथाः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥

अत्र करीरनीलैरिति रेफलकारयोरैक्येन तुल्यश्रुत्या चतुर्षु अपि पादेषु अनुप्रासनिर्वहणमित्युपनागरोऽयं श्रुत्यनुप्रासः॥ २४४॥

दन्त्यतालव्यानामैक्येन यथा,

विद्यास्यन्दो वाग्विदां यः प्रसन्नः
पुण्यां वाचं देवतां तां नमामः।
यां ब्रह्माणश्चिन्तयन्तो विशोकाः
सा नो देयात् सूनृतासूनृतानि॥

अत्र दन्त्यतालव्यानामैक्येन तुल्यश्रुतितेत्युपनागरोऽयं श्रुत्यनुप्रासः॥ सर्वेऽपि चानुप्रासाः प्रायेण विसदृशवर्णान्तरिता एव स्वदन्ते। इति ओष्ठ्यकण्ठ्यादीनामिहानुप्रवेशो भवति॥ २४५॥

ल्युडन्तः। पृषोदरादित्वात्खल्युत्पादनमनार्षम्। एवं शूत्यारण्यानीत्यत्र व्याख्येयम्। आद्यन्तव्याख्यानमुपलक्षणमवसेयम्॥ २४३॥

निरन्तररेफग्रथनात्तीक्ष्णेव सकारस्य श्रुतिसाजात्यमुल्लिखतीति तदिदमाह। अत्र करीरनीलैरिति। एतदनुप्रासस्य सिद्ध्या चतुर्षु अपि पादेषु रेफानुप्रासनिर्वहणमपि कविशक्तिव्युत्पत्तिव्यञ्जकमुपपन्नं भवति इत्याह। चतुर्षु अपीति॥ २४४॥

विद्यास्यन्दः सारस्वतप्रवाहः सैव वाग्देवता शब्दब्रह्मरूपा तच्चिन्तया परब्रह्माधिगमनिःश्रेयीभूतया शोकस्य इष्टहानिजखेदस्य विच्छेदः। अत्र स्यन्दः प्रसन्न इति दन्त्यौ सकारौ ब्रह्माणश्चिन्तयन्तो विशोका इत्यादेशानादेशौ शकारौ तालव्यौ। पुनरन्ते सा सूनृतानीति त्रयो दन्त्याः सर्वेषां सम्भूय पाठे तुल्य श्रुति-

यथा ज्योत्स्ना चन्द्रमसं यथा लावण्यमङ्गनाम् ।
अनुप्रासस्तथा काव्यमलङ्कर्त्तुमयं क्षमः ॥ २४६ ॥
अनुप्रासः कविगिरां पदवर्णमयोऽपि यः ।
सोऽप्यनेन स्ववर्कितः श्रियं कामपि पुष्यति ॥ २४७ ॥
मुहुरावर्त्त्यमानेषु यः स्ववर्गेषु वर्त्तते ।
काव्यव्यापी स सन्दर्भो वृत्तिरित्यभिधीयते ॥ २४८ ॥
कार्णाटी कौन्तली कौङ्गी कौङ्कणी वानवासिका ।
द्राविडी माथुरी माली मागधी ताम्रलिप्तिका ॥ २४९ ॥
औड्री पौण्ड्रीति विद्वद्भिः सा द्वादशविधेष्यते ।
अथ लक्षणमेतासां सोदाहरणमुच्यते ॥ २५० ॥

तेव प्रतिभासत इति । ननु सजातीयानां निरन्तरसावापे कर्त्तव्ये किमिति विजातीयव्यवहितैः आवृत्तिरुदाक्रियत इति अत आह । सर्वेऽपि चेति ॥ २४५ ॥

श्लेषनिर्वाहकतया शब्दानुप्रासोऽलङ्कार इत्युक्तं तच्च सन्दर्भव्यापकतयैव निर्वहतीत्याह । यथेति । ज्योत्स्नालावण्ययोः सर्वाङ्गीणा श्लेषसुभगयोरेवालङ्कारताप्रसिद्धिः ॥ २४६ ॥

नन्वेव मनुप्रासान्तरविषयेऽपि शब्दानुप्रासः प्रसक्तस्तत्र च किमनेन करिष्यत इत्यत आह । अनुप्रासः कविगिरामिति । उक्तं हि "न घटनामन्तरेण काव्यभावः । न च काव्यमपहाय वर्णानुप्रासादीनामात्मलाभ" इति ॥ २४७ ॥

स्ववर्ग्येषु इति । स्वशब्द आत्मीयवचनः स्ववर्गे भवाः स्ववर्ग्याः क च टतपान्तस्थोष्मोपलक्षिताः सप्तवर्गाः स्ववर्ग्येषु वर्त्तत इत्यर्थकथनम् । माणिक्यस्तवकितहारस्तवावदन्योन्यालम्बनेन परभागलाभ इत्यभिप्रायतया च काव्यव्यापकेनैव सन्दर्भेण निरूप्यमाणा वर्ग्यावृत्तिर्वृत्त्यनुप्रास इति पर्यवसितोऽर्थः । वर्णानुप्रासाद्वेदो वक्ष्यते ॥ २४८ ॥

कर्णाटादिप्रभवकविहेतुवाग्गोचराः कार्णाटीप्रभृतयो न तु वृत्तीनां देशैः कश्चिदुपकारः । वनवासनामा दक्षिणापथे रम्या भगवती चिह्नितो देशः । भमभावीरिति । विषमिति इति परायणम् ॥ २४९ ॥ २५० ॥

तासु कवर्गानुप्रासवती कार्णाटी यथा,

कान्ते कुटिलमालोक्य कर्णकण्डूयनेन किम् ।
कामं कथय कल्याणि किङ्करः करवाणि किम् ॥ २५१ ॥

चवर्गानुप्रासवती कौन्तली यथा,

ज्वलज्जटिलदीपार्चिरञ्जनोच्चयचारवः ।
चम्पकेषु चकोराक्षि चञ्चरीकाश्चकासति ॥ २५२ ॥

टवर्गानुप्रासवती कौङ्की यथा,

कुम्भकूटाट्टकुट्टाककुटिलोत्कटपाणिरुट् ।
हरिः करटिपेटेन न द्रष्टुमपि चेष्टते ॥ २५३ ॥

तवर्गानुप्रासवती कौङ्कणी यथा,

मधुर्मधूनि गान्धर्वमन्दिरे मदिरेक्षणा ।
इन्दुरेन्दीवरं दाम काममानन्दयन्ति नः ॥ ५५४ ॥

पवर्गानुप्रासवती वानवासिका यथा,

प्रिया प्रगल्भा ताम्बूलं परिस्रुत् फुल्लमुत्पलम् ।
पृषत्काः पञ्चबाणस्य पञ्चमः पञ्चमध्वनिः ॥ २५५ ॥

अन्तःस्थानुप्रासवती द्राविड़ी यथा,

प्रियाललवलीतालतमालैलावनावली ।

अवहित्थप्रस्तावे कर्णकण्डूयितमोट्टायिताख्यः शृङ्गारभावजो विकारः ॥ २५१ ॥ २५२ ॥

कुम्भकूटं कुम्भाग्रं तदेव अट्टोऽट्टालकः । रुषहिंसायां यथोक्तेन पाणिना रुषलीति क्विप् । पेटः समूहः ॥ २५३ ॥

मधुर्वसन्तो गान्धर्वं गीतम् । अत्र धकारदकारानुप्रासैरासमाप्तिर्निर्वहणम् ॥ २५४ ॥

परिस्रुन्मदिरा । पृषत्का बाणाः पञ्चमः स्वरविशेषः तद्भूयिष्ठो ध्वनिः पञ्चमध्वनिः ॥ २५५ ॥

भाति पत्रलहिन्तालकृतपुण्ड्रा वधूरिव ॥ २५६ ॥

ऊष्मानुप्रासवती माथुरी यथा,

पुष्णती पुष्पधनुषं मुष्णती श्लोषविप्लुषः ।
मिषन्ती निर्निमेषेण चक्षुषा मानुषी न सा ॥ २५७ ॥

द्वित्रिवर्गानुप्रासवती मात्सी यथा,

कोकिलालापवाचालो मामेति मलयानिलः ।
उच्छलच्छीकराच्छाच्छनिर्झराम्भःकणोक्षितः ॥ २५८ ॥

द्वाभ्यां विदर्भितैकवर्ग्या मागधी यथा,

अघौघं नो नृसिंहस्य घनाघनघनध्वनिः ।
हन्याद् घुरुघुराघोरः सुदीर्घो घोरघर्घरः ॥ २५९ ॥

स्वान्त्यसंयोगिवर्ग्या ताम्रलिप्तिका यथा,

शिञ्जानमञ्जुमञ्जीराश्चारुकाञ्चनकाञ्चयः ।
कङ्कणाङ्कभुजा भान्ति जितानङ्ग तवाङ्गनाः ॥ २६० ॥

पत्रलाः सान्द्रपत्राः सिध्मादेः आकृतिगणत्वाल्लच् । पुण्ड्रतिलकः । अत्र लकारवकारानुप्रासाभ्यां सन्दर्भनिर्वाहः ॥ २५६ ॥

श्लोषो विरहदाहस्य विप्रुषस्तीक्ष्णा भागास्तैः श्लिष्टा एव वृत्त्यनुप्रासाः ॥ २५७ ॥

सङ्कीर्णाः पुनरन्ये पञ्च भवन्ति । तत्र सङ्करो द्विधा । विजातीयसंवलनभिद्यः सम्भेदेन संयोगरूपता च । कोकिलालापेत्यादौ कवर्गान्तस्यचवर्गानुप्रासाः स्फुटा एव । संयोगस्तु विद्यमानोऽपि न विवक्षितः ॥ २५८ ॥

विदर्भितः स्वान्तरायेण वैदर्भी प्रपञ्चशोभामानीतः । घुरुघुरेत्यव्यक्तानुकरणम् । अत्र आसमाप्तिकवर्गानुप्रासस्तवर्गान्तस्यानुप्रासाभ्यां विदर्भितः । एवमन्यत्रापि वैदर्भी गवेषणीया ॥ २५९ ॥

संयोगोद्विविधः सजातीयेनान्येन च । आद्यस्त्रिविधः स्ववर्ग्यान्तसरूपतदन्यसंयोगभेदात् । एते यथाक्रमं वृत्तित्रयं प्रयोजयन्तीत्याह । स्वान्त्यादि ।

सरूपसंयोगग्रथिता ओड्री यथा,

सल्लतापल्लवोल्लासी चित्तवित्तहरो नृणाम्।
मज्जतोज्जलसज्जासु नदीषु मलयानिलः॥ २६१॥

असरूपसंयोगग्रथिता पौण्ड्री यथा,

अस्तमस्तकपर्यस्तसमस्तार्कांशुसंस्तरा।
पीनस्तनस्थिता ताम्रकञ्चुकस्येव वारुणी॥ २६२॥
अकठोराक्षरादानं नातिनिर्वहणैषिता।
अशैथिल्यञ्च सत् कर्त्तुं इत्यनुप्रासभीयते॥ २६३॥
क्वचिदस्ति क्वचिन्नास्ति क्वचिदस्ति च नास्ति च।
वर्णानुप्रास एषा तु सर्वतोऽस्तीति भिद्यते॥ २६४॥

शिञ्जाना मधुरं शब्दायमाना मञ्जीरा नूपुराः। अत्र अपूर्वार्द्धे खान्यसंयोगिनौ चवर्गौ। उत्तरार्द्धे तु कवर्गाविति॥ २६०॥

सल्लः कमनीया लतानां पल्लवाः तदुल्लासनलाघवप्रवीणतया तीव्रता व्यतिरेकः। अतएव नृणां विदग्धमिथुनानां चित्तमेव सर्वस्वभूतं हरतीति। इज्जला निचुलाख्यैः सज्जाः सन्नद्धा निचुलनिकुञ्जसन्नद्धनदीमज्जनेन शीतलत्वमुन्मीलितम्॥ २६१॥

अस्तोऽस्ताचलः कस्य कमनीयम्॥ २६२॥

इत्यनुप्रासरसिकस्य कवेः प्रसजमानं दीपमपार्थं शिचालाह। अकठोरेति। तदुक्तम्। परुषाभिधायिवचनात् अनुकरणाच्च अपरत्र नो परुषम्। रचयेदयागतिः स्यात् तत्रापि क्रादयो क्रेषाः। अतिनिर्वाहे व्यक्तमेव वैरस्यं तदुक्तं सर्व एवानुप्रासाः प्रायेणेत्यादि। कोमलमात्रवर्ग्यनिर्वहणे तु शैथिल्यसम्भावनमिति॥ २६३॥

ननु अनुप्रासाद् वृत्तीनां को विशेष इत्यत आह। क्वचिदिति। क्वचिदवृत्तिभागे चरणाद्यात्मके भवत्येव क्वचित् पुनः अंशभेदेन भवति न भवति च। तावतैव तस्य अलङ्कारत्वं वृत्तिशरीरव्यापकतया निरूप्यमाणस्तु वर्ग्यान्तोऽन्य एवायं वर्णानुप्रासादृत्यनुप्रास इत्यर्थः॥ २६४॥

अन्ये पुनरन्यथा वृत्तिं व्याचक्षते।

स्पर्शादीनामसम्बन्धः सम्बन्धो वापि यो मिथः।
स्फुटादिबन्धसंसिद्ध्यै सेह वृत्तिर्निगद्यते ॥ २६५ ॥
काव्यव्यापी च सन्दर्भो वृत्तिरित्यभिधीयते।
सौकुमार्य्यमथ प्रौढिर्मध्यमत्वं च तद्गुणाः ॥ २६६ ॥
गम्भीरौजस्विनी प्रौढा मधुरा निष्ठुरा श्लथा।
कठोरा कोमला मिश्रा परुषा ललिता मिता ॥ २६७ ॥
इति द्वादशधा भिन्ना कविभिः परिपठ्यते।
कारणं पुनरुत्पत्तेस्त एवासां विजानते ॥ २६८ ॥

तासु गम्भीरा यथा,

अप्फन्दन्तेण णहं महिं च तड़िउद्दमाविअदिसेण।
दुन्दहिगम्भीररवं दुन्दभिअं अंबुवाहेण ॥ (म)

(म) आस्यन्दता (व्याप्नुवता) नभो महीं च तड़िद्व्याप्तदिशा।
दुन्दुभिगम्भीररवं दुन्दुभितमम्बुवाहेन ॥

अन्ये पुनरिति। वर्णानां वर्त्तनं वर्त्तनाधिष्ठानं च वर्त्तिपदेनाभिमतमावं सङ्घटनविघटनाभ्यां द्विधा। समस्तव्यस्तभेदेन सङ्घटनविघटने द्विधा। कादयो मावसानाः स्पर्शाः। आदिग्रहणादन्तस्थोष्मणोः सङ्घटनबहुलः सन्दर्भः। प्रस्फुटः विघटनबहुलः कोमल उभयबहुल उन्मिश्रः ॥ २६५ ॥

द्वितीयं वृत्तिशब्दार्थमाह। काव्यव्यापी चेति। अत्रापि दोषप्रसङ्गापाकरणार्थमाह। सौकुमार्य्यमिति। अतएव गुणाः। शैथिल्यपरुषत्वे तु दोषावित्यर्थः ॥ २६६ ॥ २६७ ॥

योगासंयोगयोः प्रतियोगिव्यवस्थाविरहात् कथं द्वादशप्रकारता व्यवस्थितिरित्याशयवानाह। कारणं पुनरिति ॥ २६८ ॥

दूषणप्रतिपत्तिसौकर्य्यात् तत्प्रसिद्ध्यैव पृथगुद्दाक्रियत इत्याह। तास्विति ॥

सैषा प्रायस्तवर्गपवर्गयोस्तृतीयचतुर्थानां पकारफकारयोश्च स्वसंयोगबिन्दुयोगाभ्यां जायते ॥ २६९ ॥

ओजस्विनी यथा,

पत्ताअ सीकराहअधाउसिलाजलणिसण्णराजिअजलअं।
सज्झं ओज्जरपहसिददरिमुहणिम्महिअवउलमइरामोअं॥ (य)

सेयं मूर्द्धन्यानां प्रथमचतुर्थपञ्चमद्वितीयस्तदाद्यत्या च प्रायो जायते ॥ २७० ॥

प्रौढा यथा,

कृत्वा पुंवत् पातमुच्चैर्भृगुभ्यो मूर्ध्नि थावृणां जर्जरा निर्झरौघाः।
कुर्वन्ति व्यामुत्पतन्तः स्मरार्त्तं स्वर्लोकस्त्रीगात्रनिर्वाणमत्र॥

सैषा प्रायेण मूर्द्धन्यानामन्तःस्थानां संयोगात् पूर्वगुरुत्वेन जायते ॥ २७१ ॥

(य) प्राप्ताश्च शीकराहतधातुशिलाजलनिषण्णराजितजलजम्।
सद्म निर्झरप्रहसितदरीमुखनिर्मथितवकुलमदिरामोदम्॥

अस्फुन्दनेण व्याप्तवता। उद्गता विश्वं व्याप्तम्। दुन्दुभिरन्तर्गतकास्यभाजनैर्निःस्वानविशेषो दुण्डभिश्च शब्दायितम्। यकारधकारौ तवर्गस्य वकारभकारौ पवर्गस्य ढतीयचतुर्थौ॥ २६९ ॥

सततशीकरसिच्यमानैरिकशिलातललुण्ठनेन जलदानां रञ्जनम्। विशीर्यपतनेनात्यन्तधवला निर्झरा एव हासो यस्य तादृशेन दरीमुखेनान्तः प्ररूढवकुलकुसुमामोदनिःसरणरञ्जितजलधरप्रतिबिम्बभूतताम्रनयनोन्मुद्रणात्। हासवकुलामोदाभ्यां च चौवतारीपरुषासमासोक्तिर्ध्वन्यत इत्याराध्याः। ओज्जरीर्झरो णिम्महिअ निःसृतम् ॥ २७० ॥

भृगवस्तटा भृगुपातस्य सुरस्त्रीसङ्गमः फलम्। अत्र कुर्वन् स्वर्लोकनिर्वृत्तेषु मूर्द्धन्यानामन्तःस्वसंयोगा ऊचैः शब्द इत्यादौ स्वभावगुरूणामपि पूर्वरूपसंयोगसन्निधौ छायाविशेषो भवतीत्याहुः केचित्॥ २७१ ॥

मधुरा यथा,

किञ्जल्कसङ्गी शिञ्जानभृङ्गलाञ्छितचम्पकः।
अयं मधुरुपैति त्वां चण्डि पङ्कजदन्तुरः॥

सैषा प्रायोऽनुस्वारपुरोवर्त्तिस्पर्शतया जायते॥ २७२॥

निष्ठुरा यथा,

स्वाङ्गश्लिष्टाद्रिजन्मानं नेत्राग्निः प्लुष्टमन्मथम्।
स्तौमि त्वाद्यं वृषज्ज्येष्ठं दैत्यश्रेण्यार्चिताङ्घ्रिकम्॥

सैषा प्रायःसंयोगभूयस्त्वेनोत्पद्यते॥ २७३॥

श्लथा यथा,

दयितजनविरहविगलितनयनोदकपीतहरिणमदतिलकम्।
वदनमपगतमृगमदमशिकरणिं वहति लोलदृशः॥

सेयं प्रायो व्यञ्जनानामसंयोगेन जन्यते॥ २७४॥

कठोरा यथा,

निसर्गनिर्गतानर्घघर्घरध्वनिहास्त्रिकम्।
चक्रे चक्रं युधि क्रामन्नलर्कः कर्कशार्कराक्॥

सैषा प्रायः कण्ठरेफादिसंयोगादुत्पद्यते॥ २७५॥

कोमला यथा,

दारुणरणे रणन्तं करिदारणकारणं कृपाणं ते।

अनुस्वारपुरोवर्त्तीति। अनुस्वारस्वरूपतदादेशौ अनुस्वारपदेन गृह्यते। तेन श्रमितहासेत्यादावनुस्वाराभावेऽपि न लक्षणमुदाहरणम्॥ २७२॥

स्वाङ्गेति। दिवि सीदन्तीति वृषदो देवाः सुषमादित्वात् षत्वम्। अत्रैकान्तरिताः संयोगाः सन्दर्भव्यापकाः प्रतीयन्ते। सोऽयमस्याः संयुज्यमाना विशेषेऽपि वृत्त्यन्तराद्विशेषो निष्ठुराद्वैपरीत्येन श्लेषोदाहरणं सुगमम्॥ २७३॥

करणिः स्राटश्यम्॥ २७४॥

रमणक्लृते रणरणकी पश्यति तरुणीजनो दिव्यः॥

सेयं रेफणकाराद्यसंयुक्तकोमलवर्णविरचनया निष्पद्यते॥२७६॥

मिश्रा यथा,

पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम्।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः॥

सैषा प्रायः कठोराणामोष्ठ्यकण्ठ्यमूर्द्धन्यानां बाहुल्यादिभिरुपलभ्यते॥ २७७॥

परुषा यथा,

जङ्घे निङ्घादिङ्घादोऽमौ कल्लाराल्लादितङ्कदः।
प्रसह्य मत्वा गर्ह्यत्वमर्हणार्हः शरन्मरुत्॥

सैषा प्रायेणोष्मणामन्तःस्थादिसंयोगैरवस्थाप्यते॥ २७८॥

ललिता यथा,

द्राविड़ीनां ध्रुवं लीलारेचितभ्रूलते मुखे।
आसज्य राज्यभारं स्वं सुखं स्वपिति मन्मथः॥

सैषा प्रायेण दन्त्यौष्ठ्यतालव्यानां मध्येऽन्तःस्थादिसंयोगैः स्थाप्यते॥ २७९॥

अमिता यथा,

वकुलकलिकाललामनि कलकण्ठीकलकलाकुले काले।

सैषाप्रायः कण्ठ्येति। कण्ठ्यरेफयोः क्वचिदन्यस्यापि आदिपदोपात्तस्य संयोगोऽवसेयः॥ २७५॥ २७६॥

बाहुल्यादिभिरिति। बाहुल्यात्त्वमिश्रणैः प्रादेशिकैरित्यर्थः॥२७७॥२७८॥

द्राविडीनामिति। किञ्चिदुन्नमनं रेचितम्। तेनाधिज्यकोदण्डक्रियाकारिभ्रूलतासनाथे दुःखराज्यभारारोपः। सुगममुदाहरणम्॥ २७९॥ २८०॥

कलया कलावतोऽपि हि कलयति कलिकास्त्रतां मदनः ॥
सेयममितयोरेव ककारलकारबन्धयोरनुप्रासेन प्रसूयते ॥२८०॥

इति द्वादशधा वृत्तिः कैश्चिद् या कथितेह सा ।
न गुणेभ्यो न वृत्तिभ्यः पृथक्त्वेनावभासते ॥ २८१ ॥
श्रुत्यनुप्रासवर्णानुप्रासयोरपि दुष्करा: ।
क्वचिद्भेदाः पृथक्कर्त्तुमस्यास्तेनेह नेष्यते ॥ २८२ ॥
यथाम्रातकपुष्पादि स्रगादेर्वर्ण उच्यते ।
वर्णावृत्तिस्तथा वाचां वर्णानुप्रास उच्यते ॥ २८३ ॥
स तु स्तवकवान् स्थानी गर्भो विवृतसंवृतः ।
गृहीतमुक्तः क्रमवान् विपर्य्यस्तोऽथ संपुटः ॥ २८४ ॥
मिथुनं वेणिका चित्रो विचित्रश्चेति वर्ण्यते ।
वर्णावृत्तिः प्रयोगेभ्यस्तेभ्यस्तेभ्यो मनीषिभिः ॥ २८५ ॥

तेषु स्थाने स्थानेऽनुप्रासविन्यासतः स्तवकवान् यथा,

यस्यावासीकृतहिमगिरेर्गुञ्जतां कुञ्जराणा-
माविश्चक्रे वनगजमदाघ्राणघोरायितानि ।

तदेतत् सर्वेषां मतं दूषयति । न गुणेभ्य इति । समता सौकुमार्य्यादि-गुणेषु भारतीप्रभृतिषु च वृत्तिषु यथायथमन्तर्भावः अवगन्तव्यः ॥ २८१ ॥

श्रुत्यनुप्रासवर्णानुप्रासयोरिति विषयसप्तमी । वर्णावृत्तेः वृत्त्यनुप्राससाधारण-त्वात् ॥ २८२ ॥

ततो वर्णानुप्रासं विशेषयन्नाह । यथाम्रातकेति । स्रगादेर्वर्णस्थानीया वर्णावृत्तिर्वर्णानुप्रासः । तत्र उपमानभूतवर्णविवरणं समानजातीयकुसुमादिविर-चितमालापटप्रभृतिषु यदन्तरान्तराविजातीयाम्रातकुसुमादिसन्निवेशनं तद्वर्ण इत्युच्यते । तदत्या वाचा वर्णावृत्तिः । सा वर्णानुप्रास इति सूत्रार्थः । स द्विधा । संयुक्तासंयुक्तवर्णनिरूप्यत्वात् । यथायथमेतत् उभयप्रपञ्चनम् ॥ २८३ ॥

स्तवकवदादयो द्वादशप्रकारास्तेषु क्वचित् क्वचित् संयोगावृत्तिःस्तवकवान् । अनुप्रासविन्यासादिति संयोगानुप्रासविन्यासतः ॥ २८४ ॥

दर्पोत्फुल्लस्फुरणविकटाकाण्डकाण्डूलगण्ड-
स्वेच्छाकाषव्रणितसरलानोकहस्कन्धगन्धः ॥

अत्र गुञ्जतां कुञ्जराणामित्यादेर्वर्णस्तवकस्य स्थाने स्थाने विन्यासादयं वर्णानुप्रासः स्तवकवानित्युच्यते ॥ २८६ ॥

नियतविवक्षितस्थानविशेषः स्थानी यथा,—

बाले मालेयमुच्चैर्न भवति गगनव्यापिनी नीरदानां
किं त्वं पक्ष्मान्तरालैर्मलिनयसि मुधा वक्त्रमश्रुप्रवाहैः ।
एषा प्रोद्दृप्तमत्तद्विपकटकपणक्षुण्णबिम्बोपलाभा
दावाग्नेर्व्योमलग्ना मलिनयति दिशां मण्डलं धूमलेखा ॥

अत्र पादप्रथमत्रिभागस्थानेषु बाले मालेयमित्यादि-नियमेन वृत्तिः सोऽयं वर्णानुप्रासः स्थानीत्युच्यते ॥ २८७ ॥

आवृत्तेर्वर्णान्तरायेण गर्भो यथा,

कालं कपालमालाङ्कमेकमन्धकसूदनम् ।
वन्दे वरदमीशानं शासनं पुष्पधन्वनः ॥

अत्र कालं कपालमालेत्यङ्कमेकमिति वन्दे वरदमीशानं शासनमित्यादिषु पकारवकारमकाररेफककारगर्भाधानादयं वर्णानुप्रासो गर्भ इत्युच्यते ॥ २८८ ॥

गुञ्जतां कुञ्जराणामकाण्डकण्डूलगण्डस्कन्धगन्ध इत्यत्र आवृत्तिचतुष्केण स्तवक-निर्वाहः । स्थानीति ॥ २८५ ॥ २८६ ॥

श्लोकपादेऽपि प्रथमादिभागकल्पनया स्थाननियमविवक्षा । तथाहि । बाले मालेयमिति प्रथमोभागो नीनो इति प्रतिभासारूढः तृतीयादिप्रथमपादे । एवं पक्ष्मान्तरालमलिनमुधामश्रुप्रभृतीनां द्वितीयादिपादेषु प्रथमादिभागकल्प-नाऽवसेया ॥ २८७ ॥

काल कालस्वरूपं एकमद्वितीयम् । कालं कपालेत्यत्र लकारावृत्तिः ककारेण व्यवधाने प्रकृते कपालेत्यत्र पकारो वर्णान्तरगर्भायमाण उपलक्ष्यते । एवं

स्थाने स्थाने विकाससङ्कोचाभ्यां विवृतसंवृतो यथा,

न मालतीदाम विमर्दयोग्यं न प्रेम नव्यं सहतेऽपराधान्।
म्लानापि न म्लायति केसरस्रग् देवी न खण्डप्रणया कथञ्चित्॥

अत्र प्रथमपादेन मालतीदामेत्यादिभिर्विकासः। द्वितीयपादे प्रेमेत्येकावृत्त्या सङ्कोचः। तृतीयपादे म्लानापि न म्लायतीत्येताभ्यां केशरस्रगित्येताभ्याञ्च विकाशः। चतुर्थेनेति सङ्कोचः। सोऽयं वर्णानुप्रासो विवृतसंवृत इत्युच्यते॥ २८९॥

चक्रवालवङ्गानोपादानाभ्यां गृहीतमुक्तो यथा,

लोलल्लवङ्गलवलीवलया निकुञ्ज-
कूजत् कपिञ्जलकुलायकुलावनद्धाः।
अध्यूषिरे कनकचम्पकराजिकान्ता
येनापरान्तविजये जलधेरुपान्ताः॥

अत्र अक्रवालक्रमः सुव्यक्त एव। सोऽयं वर्णानुप्रासो गृहीतमुक्त इत्युच्यते॥ २९०॥

क्रमेण द्वित्राणां त्रिचतुराणां वर्णानामसंयोगस्वराणामावृत्तिः क्रमवान् यथा,

---

मालाङ्गमित्यादौ लकारादिगर्भीकरणमवसेयम्। विवृतसंवृतौ निगदेनैव व्याख्यात एव॥ २८८॥

न मालतीदामेत्यादौ प्रथमपादे मकारावृत्तिर्द्वयेन विवरणं द्वितीयपादे सकृत्प्रयोगेण तस्यैव संवृतिसृतीयपादे नकारसकारयोः आवृत्त्या विवृतिश्चतुर्थे तु नेति संवरणम्। तदिह भूयो विकाशकिञ्चित्सङ्कोचकिञ्चित्विकाशसर्वथा सङ्कोचपरिपाट्या सन्दर्भनिर्वहणं शोभाकरमिति व्याचष्टे। अत्रेति॥ २८९॥

लोलदिति। कपिञ्जलो गौरतित्तिरिः। अपरान्तो देशविशेषः पूर्ववलनेन उत्तरग्रहणं चक्रवालम्। व्यञ्जनमात्रवलनमभिप्रेतं तेन वलीवलयेत्यत्रापि चक्रवालसिद्धिः॥ २९०॥

नितम्बगुर्वी गुरुणा प्रयुक्ता बधूर्विधात्रप्रतिमेन तेन।
चकार सा मत्तचकोरनेत्रा लज्जावती लाजविमोकमग्नौ॥

अत्र गुर्वी गुरुणा प्रयुक्तेति बधूर्विधात्र इति चकार चकोरेति लज्जावती लाजेति विमोकमग्नौ इति द्वयोस्त्रयाणां च स्वरसंयोगवर्णानां क्रमेणावृत्तिः। सोऽयं वर्णानुप्रासः क्रमवानित्युच्यते॥ २९१॥

क्रमवतां विपर्य्ययोपन्यासाद्विपर्य्ययो यथा,

प्रणवः प्रणवो यत्र प्रथमः प्रमथेषु यः।
रणवान् वारणमुखः स वः पातु विनायकः॥

अत्र व्युत्क्रमो व्यक्त एव सोऽयं वर्णानुप्रासो विपर्य्यय इत्युच्यते॥ २९२॥

स्वाद्यवर्णवर्त्तिना स्वरेण सह पादमध्यान्तयोरनुप्रासः संपुटम्। यथा, स्थिरापायः कायः प्रणयिषु सुखं स्थैर्य्यविमुखं
महारोगा भोगाः कुवलयदृशः सर्पसदृशः।

एवमुत्तरत्र। क्रमेणेति। द्वौ आरभ्यैव क्रमसम्भव ऊर्ध्वं चतुर्भ्यो विरसायते। तेन पञ्चबाणामित्यादिनोक्तमसंयोगस्वराणामिति अविवक्षितसंयोगस्वराणाम्। गुरुणेति अनुल्लङ्घनीयाज्ञता। तथा चलत्प्रयुक्त्या दुर्वहनितम्बभारालसमाया अपि कथञ्चित् पदविन्यासेन कान्तिविशेषो ध्वन्यते। स्वभावतामयोरपि नेत्रयोः तत्काले धूमा श्लेषाद् द्विगुणो राग इति उपमाने मत्तपदपोषः पूर्वार्द्धे द्वयोर्द्वयोः उत्तरार्द्धे त्रयाणामनुल्लङ्घितक्रमाणामेव व्यञ्जनानामावृत्तिरिति स्फुटं विवरणम्॥ २९१॥

क्रमवतामुपक्रान्त किञ्चित्क्रमाणामावृत्तौ तत् क्रमविपर्यासो व्युत्क्रमः॥२९२॥

स्वाद्येति। आवर्त्तनीयो वर्णः स्वपदेनाभिमतः तस्य पूर्वो यो वर्णस्तद्वर्त्तिना स्वरेण सह तस्यावृत्तिः। पादमध्यान्तयोरेवेति। मध्यसंश्लिष्टोपरितनभागचटितसमुद्गकतुल्यतया सम्पुटोऽनुप्रासः॥ २९३॥

गृहावेशः क्लेशः प्रकृतिचपला श्रीरपि खला
यमः खेरो वैरो तदपि न हितं कर्म विहितम् ॥

तदेतल्लक्षणेनैव व्याख्यातम्। सोऽयं वर्णानुप्रासः संपुटमित्युच्यते ॥ २९३ ॥

अन्तःपादमुपसंहारोपक्रमयोर्विवक्षितस्वरानुप्रासो मिथुनं यथा,

त्यज मनसि सदाहे हे स्मर स्थानमस्मिन्
ननु किरसि शरीरे रे किमिन्दोर्मयूखान्।
अयि परिहर वायो योगमङ्गैर्मदीयैः
प्रणयिनि समवेते ते भवन्तः सखायः ॥

तदेतन्निगदेनैव व्याख्यातम्। सोऽयं वर्णानुप्रासो मिथुनमित्युच्यते ॥ २९४ ॥

आवाक्यपरिसमाप्तेर्वर्णानुप्रासनिर्वाहो वेणिका यथा,

विद्राणे रुद्रवृन्दे सवितरि तरले वज्रिणि ध्वस्तवज्रे
जाताशङ्के शशाङ्के विरमति मरुति त्यक्तवैरे कुवेरे।
वैकुण्ठे कुण्ठितास्त्रे महिषमतिरुषं पौरुषोपघ्ननिघ्नं
निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा भवानी ॥

तदेतन्नातिदुर्बोधम्। सोऽयं वर्णानुप्रासो वेणिकेत्युच्यते ॥ २९५ ॥

अन्तःपादमिति। वृत्तौचितीवशात् च द्विखण्डलक्षणीभाविशेषेषु पादेषु मिथुनसिद्धिरवसेया। तदिदमुक्तमुपक्रमोपसंहारयोरिति। मिथुनं द्वन्द्वम् ॥२९४॥

विद्राण इति। उपघ्न आश्रयोनिघ्नः परवशः। अनुप्रासजातेरासमाप्तिनिर्वाहोऽभिमतः। व्यक्तयः पुनरन्या अन्या एवाभिमतासेन वृत्त्यनुप्रासाद्वैदोऽत एव वेणीतुल्यता। तत्र हि किल केशग्रथनानिर्व्यूढैव भक्तिः पुनरन्यान्येति ॥२९५॥

उक्तलक्षणेभ्योऽन्यश्चित्रः। यथा,

नीते निर्व्याजदीर्घामघवति मघवद्वज्रनिद्रानिदाने
निद्रां द्रागेव देवद्विषि मुषितरुषः संस्मरन्त्याः स्वभावम्।
देव्या दृग्भ्रस्तिसृभ्यस्त्रय इव गलिता राशयो रक्तताया
रक्षन्तु त्वां त्रिशूलक्षतिकुहरभुवो लोहिताम्भःसमुद्राः।

एवमन्येऽपि द्रष्टव्याः॥ २९६॥

एकवर्णावृत्तेर्वृत्त्यनुप्रासस्य वर्णान्तरवैचित्र्येण विचित्रो यथा,

चञ्चत्काञ्चनकाञ्चयो लयचलच्चोलाञ्चलैर्वञ्चिता-
श्चारीसञ्चरणैकचारुचरणाः सिञ्चन्ति चित्तं मम।
लीलाचञ्चुरचञ्चरीकरुचिभिश्चूलालकैश्चर्चिताः
किञ्चिच्चन्दनचन्द्रचम्पकरुचां चौर्य्यो मृगीलोचनाः॥२९७॥

अन्ये पुनरन्यथा चित्रविचित्रयोर्लक्षणं व्याचक्षते। तत्र यमकच्छायानुकारी चित्रः, स सवर्णानुप्रासवान् विचित्र इति।

उक्तलक्षणेभ्य इति। पूर्वोक्तवर्णानुप्रासेभ्य इति। तथा हि प्रकृतोदाहरणे-स्थाने स्थाने स्तवका विरचायां न स्तवकवान् विभागपरिहारेण न स्थानीवर्णान्तरा-यानुपपत्तौ न गर्भः सङ्कीर्णविकाशाभावेन न विवृतसंवृतः चक्रवालक्रमाभावेन न गृहीतमुक्तः। एवं क्रमविपर्य्यस्तमिथुनवह्निर्भावोऽवगन्तव्यः। आसमाप्तिनिर्व-हणाभावे वैशौमेदः स्फुट एव॥ २९६॥

एकवर्णावृत्तेरिति। 'वर्ग्यावृत्तौ हि कदाचित् एकवर्णावृत्तिरपि सन्दर्भ-व्यापिनी सम्भाव्यते। तस्यां प्रतीयमानायामेव अन्तरान्तरा नानाजातीये वर्णा-वृत्तिश्चित्रशोभादायिनी विचित्रानुप्रास इत्युच्यते। तथाहि। प्रकृतोदाह-रणे सन्दर्भसमाप्तिं यावदावर्त्तमाने एव चकारे काञ्चनकाञ्चेति लयचलदित्या-दिषु ककारलकाराद्यनुप्रासोद्भटभावेनैव वर्णावृत्तेर्न्यग्भाव इव प्रकाश्यते। चारी-सञ्चरणप्रकारा भौमी आकाशी च। चञ्चुरो मनोहरः चञ्चरीको भ्रमरः॥२९७॥

अन्ये पुनरिति। विभिन्नार्थैकरूपत्वं स्थानविभागालम्बनं व्यपेताव्यपेत-

तत्र चित्रो यथा,

सर्वाशारुधि दग्धवीरुधि सदा सारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमुन्मधुलिहि स्वच्छन्दकन्दद्रुहि ।
शुष्यत्स्रोतसि तप्तभूरिरजसि ज्वालायमानाम्भसि
ज्येष्ठे मासि खरार्कतेजसि कथं पान्थ व्रजन् जीवसि ॥२९८॥

विचित्रो यथा,

उद्यद्दर्हिषि दर्दुरारवपुषि प्रक्षीणपान्थायुषि
च्योतद्विप्लुषि चन्द्ररुक्षुषि सखे हंसद्विषि प्रावृषि ।
मा मुञ्चोच्चकुचान्तसन्नतगलद्बाष्पाकुलां बालिकां
काले कालकरालनीलजलदव्यालुप्तभास्वत्त्विषि ॥ २९९ ॥

वर्णावृत्तिरनुप्रास इति यः कृतलक्षणः ।
सोऽयं द्वादशधा भेदैः प्रविभज्य प्रदर्शितः ॥ ३०० ॥
समग्रमसमग्रं वा यस्मिन्नावर्त्तते पदम् ।
पदाश्रयेण स प्रायः पदानुप्रास उच्यते ॥ ३०१ ॥
विसर्गबिन्दुसंयोगस्वरस्थानाविवक्षया ।

भावश्च यमकच्छायावर्णानुप्रासवानिति । अतिशायने मतुप् । सर्वाशारुधीत्यादौ धिप्रभृतीनां विभिन्नार्थैकरूपाणां व्यपेतानामेव पादमध्यान्तयोः अवस्थितिः । एवमन्यपेतमप्युन्नेयम् । न अत्र वर्णानुप्रास उत्कट इति विचित्रात् भेदः ॥ २९८ ॥

अतएव उत्तरत्र स्फुटवर्णानुप्रासमुदाहरति ॥ २९९ ॥

तेऽमी शुद्धवर्णा वृत्तिप्रकाराः षट्त्रिंशल्लक्षिताः सामतं द्वादशतापन्नवर्णावृत्तयो लक्ष्यन्त इत्याह । वर्णावृत्तिरनुप्रास इति । द्वादशधेति । वीप्सा द्रष्टव्या ॥ ३०० ॥

समग्रमिति । पदालम्बनोऽनुप्रासः पदानुप्रासः तेन पदावयवमात्रालम्बनोऽपि पदालम्बन एव । तदिदमाह । पदाश्रयेणेति ॥ ३०१ ॥

आनिर्वाहाच्च स प्रायो यमकेभ्यो विभिद्यते ॥ ३०२ ॥
मसृणो दन्तुरः श्लक्ष्णः संपुटं संपुटावली।
खिन्नः स्तवकवान् स्थानी मिथुनं मिथुनावली ॥ ३०३ ॥
गृहीतमुक्तनामान्यस्ततोऽन्यः पुनरुक्तिमान्।
इति द्वादशभेदोऽयं मनीषिभिरिहेष्यते ॥ ३०४ ॥

तेषु मसृणो यथा,

स रणे वारणास्यस्य दशनेऽशनिसम्भवे।
चकार वलयाकारं भुजं भुजगभीषणम् ॥

सोऽयमसंयुक्तवर्णावृत्तेः पदानुप्रासो मसृण इत्युच्यते ॥ ३०५॥

दन्तुरो यथा,

स नैषधस्याधिपतेः सुतायामुत्पादयामास निषिद्धशत्रुः।
अनूनसारं निषधान्नगेन्द्रात् पुत्रं यमाहुर्निषधाख्यमेव ॥

अत्र निषिद्धशत्रुरिति पदे संयोगाधिक्येन दन्तुरता। सोऽयं पदानुप्रासो दन्तुर इत्युच्यते ॥ ३०६ ॥

श्लक्ष्णो यथा,

अप्येहि कान्ते वैदेहि देहि प्रतिवचो मम।
अरविन्दाक्षि दाक्षिण्यमलङ्कारो हि योषिताम् ॥

ननु यदि पदावृत्तिः अभिन्नार्था तदा पुनरुक्तिरेव भिन्नार्था चेत् यमकान्न भिद्यत इत्यत आह। विसर्गेति। बिन्दुः अनुस्वारः स्थानं कण्ठादिकम्। वृत्तेः पादादियमकताभावो निर्वाहः प्रायो निर्वाह इति योजना ॥३०२॥३०३॥३०४॥

वारणास्यो विनायकः। अत्र रणे रणेति शनेऽशनीति कारं कारमिति भुजं भुजेति पदं तदेकदेशावृत्तिः स्फुटमुपलभ्यते। मसृणा तु कथमित्यत आह। सोऽयमिति ॥ ३०५ ॥

अत्र स्वरेण सहावृत्तेः श्लक्ष्णता। सोऽयं पदानुप्रासः श्लक्ष्ण इत्युच्यते ॥ ३०७ ॥

संपुटं यथा,

सदर्प इव कन्दर्पस्तरला माद्दशां मतिः।
असार इव संसारः कुरुष्व मदनुग्रहम् ॥

अत्र इवशब्दस्यापवादत्वेनाव्यवधायकत्वादनुप्रासोऽयं संपुटमित्युच्यते ॥ ३०८ ॥

संपुटावली यथा,

करोति किं किरातोऽपि समाकृष्य शिलीमुखान्।
शिलीमुखान् समाकृष्य किङ्किरातः करोति यत् ॥

अत्र करोतीत्येकं संपुटं, किं किरातः किङ्किरात इति द्वितीयं, समाकृष्य समाकृष्येति तृतीयं, शिलीमुखान् शिलीमुखानिति चतुर्थम्। सोऽयं पदानुप्रासः संपुटावलीत्युच्यते ॥ ३०९ ॥

खिन्नो यथा,

कुलजातिसमाकुलीकृतानां सुखदसुखाशयमूढचेतनानाम्।

सनैषधेत्यादौ निषधरूपी वर्णसमुदायः पदैकदेशतामापन्नः साधारण एव। तदत्र दन्तुरता कीदृशीत्यत आह। अत्र निषिद्धेति ॥ ३०६ ॥ ३०७ ॥

सम्पुटवदेकरूपस्यैव खण्डस्य निरन्तरमावर्त्तनं सम्पुटम्। तत्कथमिव कं संशब्दैरन्तराये सम्पद्यत इत्यत आह। अत्र इव शब्दस्येति ॥ ३०८ ॥

करोति किङ्किरातोऽयमित्यादौ मध्ये शिलीमुखान् शिलीमुखानिति प्रथमं सम्पुटम्। तस्य बहिरावरणभूतं समाकृष्य समाकृष्येति द्वितीयं तस्यापि किङ्किरातः किङ्किरातेति तृतीयं तस्यापि करोति करोतीति चतुर्थम्। तदेतद्विपरीतव्याख्यया व्यञ्जयन्नाह। अत्र करोतीत्यादि ॥ ३०९ ॥

कुलेति। अत्र प्रथमपादे कुलेति अविवक्षितस्वरादिवर्णयुग्ममक्षरचतुष्टय-

अभवविभवलाभलोलुभानां भव भवबन्धविभेदनाय भूयः॥

अत्र रीतेरनिर्वाहात् खिन्नता। सोऽयं पदानुप्रासः खिन्न इत्युच्यते॥ ३१०॥

स्तवकवान् यथा,

भासयत्यपि भाषादौ कविवर्गे जगत्त्रयीम्।
के न यान्ति निबद्धारः कालिदासस्य दासताम्॥

सोऽयं वर्णानुप्रासवत् पदानुप्रासोऽपि स्थाने स्थाने निवेशात् स्तवकवानित्युच्यते॥ ३११॥

स्थानी यथा,

परं जोण्हा उण्हा गरलसरिसो चन्दणरसो
खदक्खारो हारो मलअपवणा देहतवणा।
मुणालो वाणालो जलदिअ जलद्दा तणुलदा
बरिट्ठा जं दिट्ठा कमलवअणा सा सुणअणा॥ (र)

सोऽयं पदानुप्रासः स्थाननियमात् स्थानीत्युच्यते॥ ३१२॥

(र) परं ज्योत्स्ना उष्णा गरलसदृशश्चन्दनरसः,
चतचारो हारो मलयपवना देहतपनाः।
मृणालो वाणालो ज्वलति च जलार्द्रा तनुलता,
बरिष्ठा यद् दृष्टा कमलवदना सा सुनयना।

व्यवधानेन कुलीत्यावृत्तिं द्वितीयतृतीयपादयोस्तु सुखदसुखेति अभवविभवेति चैकवर्णव्यवधानेन आवृत्तिश्चतुर्थपादे तु भवभवेति रीतिभङ्गो न च दोषः। प्रतीत्यव्यवधानात्॥ ३१०॥

वैचित्रीविशेषेण अलङ्कारभावो भासयतीत्यादौ आद्यन्तयोः दूरान्तरितैव आवृत्तिः। स्थाननियमस्तु न विवक्षितः। तदिदमुक्तं स्थाने स्थाने इति॥ ३११॥

जोण्हा उण्हा रिसो रसो इत्यादिका प्रतिपादं मध्यान्तस्थाननियमेन आवृत्तिः। चतोऽर्पितः चारः जलार्द्रा जलार्द्रे वस्त्रे॥ ३१२॥

मिथुनं यथा,

पुरः पारापारा तटभुवि विहारः पुरवरं
ततः सिन्धुः सिन्धुः फणिपतिवनं पावनमतः।
तदग्रे तूदग्रो गिरिरिति गिरेस्तस्य पुरतो
विशाला शालाभिर्ललितललनाभिर्विजयते॥

तदेतत् प्रतिपादं द्वयोर्द्वयोः पदानुप्रासयोर्विन्यासान्मिथुनम्॥ ३१३॥

मिथुनावली यथा,

शिरसि शरभः क्रोडे क्रोडः करी करटे रटन्
उरसि च रुरुर्मर्मण्येणः शिखी मुखरो मुखे।
कपिरपि हृदि क्लादौ दूराद्वरिर्द्विपजिद्वतो
धनुषि लघुता लक्ष्ये पूर्वो जयोऽस्य यशस्विनः॥

सेयं द्वयोर्द्वयोः पदानुप्रासयोर्निरन्तरमावृत्तिर्मिथुनावलीत्युच्यते॥ ३१४॥

गृहीतमुक्तो यथा,

पुन्नागनागकेशरकेशरपरिवासवासनासुरभिः।

पाराभिधाना नदी। अपारा पाररहिता। सिन्धुर्नदी सिन्धु नामा। विशाला उज्जयिनी। शालाभिरिति इत्यम्भूतलक्षणे तृतीया। अत्र पारापारेति सिन्धुसिन्धुरिति। दग्रे दग्रे इति शाला शालेति क्रमेण प्रथमादिपादेषु द्वयोरेव अनुप्रासयोर्विन्यासः। यद्यपि तृतीयपादे गिरिगिरीति द्वितीयमपि मिथुनं सम्भवति तथापि वर्णद्वयव्यवधानात् अनुल्लेखीति उपेक्षितवान्॥ ३१३॥

शिरसीति। शरभोऽष्टापदः क्रोडो वराहो रुरुर्बहुमृगो मृगो हरिः सिंहः। स्वरभागा विवक्षायां व्यञ्जनयुगलावृत्तिर्मिथुनम्। तदेव आवृत्तिभूमा मिथुनावली। शरभरेति क्रोड क्रोडेति करकरेति दवदवेत्यादिना क्रमेण सुप्रत्यभिज्ञानैव॥ ३१४॥

सुरभिर्मधुरमधुप्रियषट्चरणाचरणवान् प्राप्तः ॥

सोऽयं चक्रवालवत् पदानुप्रासो गृहीतमुक्त इत्युच्यते ॥ ३१५ ॥

पुनरुक्तिमान् यथा,

धूमाइ धूमकलुसे जलइ जलन्तात्तहत्तजीआवन्धे ।
पडिरअपडिउस्सदिसे रसइ रसन्त सिहरे धणुम्मि णहअलं ॥

(ल)

अत्र धूमादीनां पुनर्वचनात् पदानुप्रासोऽयं पुनरुक्तिमानित्युच्यते ॥ ३१६ ॥

वर्णावृत्तिरनुप्रासः पादेषु च पदेषु च ।
पूर्वानुभवसंस्कारबोधिनी पद्यदूरता ॥ ३१७ ॥

(ल) धूमायते धूमकलुषे ज्वलति ज्वलदात्तहत्तजीवाबन्धे ।
प्रतिरवप्रतिपूर्णदिशि रसति रसच्छिखरे धनुषि नभस्तलम् ॥

गृहीतमुक्तौ यथेति । पुन्नागः पुङ्गज इति प्रसिद्धः केसरो वकुलो भावना वासना सुरभिर्वसन्तो नानामधुपानलालसानाम् इतस्ततः षट्चरणानां चरण समणम् । अत्र चक्रवालक्रमो व्यक्त एव । आवृत्त्याधिक्याभावाच्च गृहीतमात्रस्यैव मोचनम् ॥ ३१५ ॥

पुनरुक्तिमानिति । वाच्याभेदात् पुनरुक्तिः सा यस्मिन्नावृत्तिलक्षणेन अनुप्रासे स पुनरुक्तिमान् । तात्पर्यभेदात् च न दोषः । धूमज्वलनरसनानामाकाशदेशव्यापितया धनुःप्रकर्षहारिण रामभद्रगतोत्साहशक्तिध्वननात् प्रकृतवीररसपोषः । अत्र धूमधूमेत्यादिना वाच्यभेदः ॥ ३१६ ॥

ननु वर्णावृत्तिरनुप्रासस्सामान्यलक्षणयुक्ता न चासौ पदाद्यावृत्तावस्तीत्यत आह । वर्णावृत्तिरिति । समुदायावृत्तिरपि वर्णावृत्तिरेव । न हि वर्णातिरिक्तः समुदायो नाम । इयांस्तु विशेषो यत्पूर्वजातीयतानुसन्धानमलङ्कारतां प्रयो-

लाटानुप्रासवर्गस्य यावद्भावलक्ष्यते गतिः ।
पदानुप्रासवर्गोऽपि तावद्भेव प्रपञ्च्यते ॥ ३१८ ॥
स्वभावतश्च गौण्या च वीप्साभीक्ष्णादिभिश्च सा ।
नाम्ना द्विरुक्तिभिर्वाक्ये तदनुप्रास उच्यते ॥ ३१९ ॥

सा स्वभावतो यथा,

कुर्वन्तोऽमी कलकलं मारुतेन चलाचलाः ।
प्रातर्गुलुगुलायन्ते गजा इव घनाघनाः ॥

अत्र कलकलमित्यादिषु स्वाभाविकी पुनरुक्तिरुपदिश्यते ॥ ३२० ॥

गौण्या यथा,

अमृतममृतं चन्द्रश्चन्द्रस्तथाम्बुजमम्बुजं
रतिरपि रतिः कामः कामो मधूनि मधून्यपि ।

जयति । तत्र च कार्य्यानुमेयः समयसन्निकर्षविशेष एव प्रयोजक इति । तदिदं दिङ्मात्रमुक्तम् ॥ ३१७ ॥

अन्येऽपि पदानुप्रासप्रकाराः स्वयमुत्प्रेक्षितव्या इत्याह । लाटेति । गतिः प्रकारः ॥ ३१८ ॥

क्रमप्राप्तं नाम द्विरुक्त्यनुप्रासं विभजते । स्वभावत इति । यद्यपि पदानुप्रासादौ नाम द्विरुक्तिरतिव्यापिका तथापि अर्थोपक्षेपोपनिपातिनी सह विवक्षिता । अर्थो द्विविधः । आभिधानिक उपाधिश्च । आद्यो गौणमुख्यभेदेन द्विप्रकारो द्वितीयोऽपि वीप्साभीक्ष्णादिरनेकविधो द्विरुक्तिरपि नाम शरीरसम्पादिका नाम्नः सतश्चेति द्वयी बोद्धव्या । अतएव द्विरुक्तस्यैवाभिधाशक्तियोगात् स्वभावत इत्युक्तम् ॥ ३१९ ॥

कुर्वन्त इति । चलाचला चञ्चलाः । चलतेरच्प्रत्ययेऽभ्यासस्य अकि रूपम् । गुलु इत्यव्यक्तानुकरणस्य डाचिद्विर्वचने च गुलुगुलेति नामसिद्धिः । अत्र कलकलादिपदानामर्थवत्त्वाद्यातद्विरुक्तिशरीराणां स्वभावत एव यथोक्तरूपव्यवस्थितिः ॥ ३२० ॥

इति न भजते वस्तु प्रायः परस्परसङ्करं
तदियमबला कान्तिं धत्ते कुतः सकलात्मिकाम् ॥

अत्रामृतममृतमित्यादिषु अभेदेऽपि भेदोपचारेण विशेषणविशेष्यभावः सामान्यविशेषभावाद् भवन् पुनरुक्तिवद्भासते ॥ ३२१ ॥

वीप्सा यथा,

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे।
देशे देशे न विद्वांसश्चन्दनं न वने वने ॥

सेयं द्रव्यवीप्सायां द्विरुक्तिः। एवं गुणजातिक्रियावीप्सायामपि द्रष्टव्यम् ॥ ३२२ ॥

प्रकारे गुणवचनस्येत्यादिरपि वीप्साप्रकार एव। यथा,

मानिनीजनविलोचनपातानुष्णवाष्पकलुषान् प्रतिगृह्णन्।

अमृतमिति। अत्र द्वितीयानाममृतादिपदानां द्विरुक्तिदोषेण तात्पर्य्यापर्य्यवसानादमृतादिगुणपरत्वे कल्पनीयेऽपि निष्कृष्टगुणपराणां सामानाधिकरण्यानुपपत्तेः तत्तदसाधारणगुणोपलक्षितामृतादिनिष्ठानामाद्यपदोपात्तसामान्यापेक्षो विशेष्यभावश्च विशेषणत्वं च निर्वहति। न च पर्य्यायानिवेशेऽर्थान्तरसंक्रमितवाच्यता सम्भवतीति पूर्वाचार्य्याः। सेयं गौणार्थपरवशा नाम द्विरुक्तिः ॥ ३२१ ॥

वीप्सेति। नानार्थानां युगपदेकेन पदेन केनचित् वक्तुर्व्याप्तिविवक्षा वीप्सा। सा प्रयोक्तृधर्मो द्विरुक्त्या व्यज्यते। अतएव या काचिदर्थसामर्थ्याक्लृप्ता द्विरुक्तिः सा सप्तवर्णादिवन्नाम द्विरुक्तिसमाख्यया प्रतिपाद्यते। शैले शैल इति। अत्र किञ्चित् एकमसाधारणगुणाश्रयं विवक्षन् तदितरस्य तज्जातीयस्य गुणसंस्पर्शमसहमानः अप्रस्तुतमेव शैलादिकं प्रस्तुतवान्। रोहणादिव्यतिरिक्तासु व्यक्तिषु माणिक्याद्यभावगुणव्याप्तिर्युगपदेव विवक्षिता। शब्दादुपसर्जनतया प्रतीयमानः सिद्धस्वभावः पदार्थो गुण इत्युच्यते। एवं क्रिययापि व्याप्तिरवसेया। सेयं द्रव्यवीप्सेति। शैलादीनां द्रव्याणामेकेन गुणादिना व्याप्तिमिच्छेत्यर्थः ॥ ३२२ ॥

प्रकारे गुणवचनस्येति। प्रकारः सादृश्यं तत्पूर्णगुणेन न्यूनगुणस्य साधा-

मन्दमन्दमुदितः प्रययौ खं भीतभीत इव शीतमयूखः ॥३२३॥

आभीक्ष्ण्ये यथा,

श्लेषं श्लेषं मृगदृशा दत्तमाननपङ्कजम्।
मया मुकुलिताक्षेण पायं पायमतृप्यत ॥

सोऽयमाभीक्ष्ण्ये णमुल् स चानुप्रयुज्यते इति पुनरुक्तिः ॥३२४॥

क्रियापदाभीक्ष्ण्याद्विरुक्तौ तु पुनरुक्तेरपि पुनरुक्तिर्यथा,

जयति जयति देवः श्यामकण्ठः पिनाकी
जयति जयति देवी लोकमाता भवानी।
जयति जयति धन्यः सोऽपि भक्तस्तयोर्यः
किमपरमिह धन्यं वर्ण्यते तावदेव ॥ ३२५ ॥

रणगुणान्वये भवति। एवं च अस्ति समानशब्दाभिधेयत्वं च व्याप्तिः। इयांस्तु विशेषो यदेकत्र सिद्धस्य अन्यत्र प्रतिबिम्बनं सादृश्यं शुद्धवीप्सायां तु युगपदेकस्य नानापदार्थसम्बन्ध इति। सोऽयं वीप्साप्रकारशब्दार्थः। अतएव प्रकारे गुणवचनस्येति पृथक् सूत्रितम्। इह तु वीप्सापदेनैव अयमर्थ उपयात्य इत्यभिप्रायः। मन्दं मन्दमिव उदित इति क्रियाविशेषणमुपमितमेवं भीतभीत इति कर्तृविशेषणमपि सादृश्यलक्षणगुणीत्प्रेक्षायामिव शब्दः ॥ ३२३ ॥

आभीक्ष्ण्येनेति। नित्यवीप्सयोः इत्यनेन नित्यत्वमाभीक्ष्ण्यमुक्तम्। यां किल क्रियां कर्त्ता प्राधान्येनानुपरत्या च कर्तुमिच्छति तद्रूपमाभीक्ष्ण्यम् अतएव तिङव्यक्तां च द्विरुक्तिरियमसाधारणी। उभयत्रैव क्रियाप्राधान्यप्रतीतेः। सिद्धे हि वस्तुनि पौनःपुन्यप्रतीतिः क्रियोपाधित एव न स्वरूपेण। ननु णमुलैवाभीक्ष्ण्याभिधानात् किं द्विरुक्तिः करिष्यत इत्यत आह। सेयमिति। न च आभीक्ष्ण्यं णमुलो वाच्यम्। तत्कार्ये तस्याभिधानात्। द्विरुक्तिसहितस्यैव तस्यानुपरतिव्यञ्जकत्वात्। स्वरूपार्थाभ्यामन्तरतमशब्दद्वयरूप आदेशो वा द्विरुच्चारणं वा द्विरुक्तिशब्दार्थः ॥ ३२४ ॥

न च अवश्यं द्वौ एवशब्दौ प्रयोक्तव्यौ किन्तु यावद्भिः अभिमतोऽर्थः प्रतीयते तावन्त आभीक्ष्ण्यशब्दाः प्रयोक्तव्याः तेनाव्यक्तमुद्दृश्यन्ते किन्तु तिङ्पदेषु एवेत्याह।

आदिग्रहणेन निर्मूलसम्भ्रमादयः परिगृह्यन्ते। तेषु निर्मूलादि यथा,

निर्मूलकाषं कषति स्वान्तमन्तः स्मरज्वरे।
लाजस्फोटं स्फुटन्त्याशु हृदये हारयष्टयः॥ ३२६॥

सम्भ्रमेण यथा,

अस्थीन्यस्थीन्यजिनमजिनं भस्म भस्मेन्दुरिन्दु-
र्गङ्गा गङ्गोरग उरग इत्याकुलाः सम्भ्रमेण।
भूषाविशेषोपकरणगणप्रापणव्यापृतानां
नृत्यारम्भप्रणयिनि शिवे पान्तु वाचो गणानाम्॥ ३२७॥

हर्षावेशविस्मयादयोऽपि सम्भ्रमस्य उपाधयो भवन्ति। तेषु हर्षसम्भ्रमेण यथा,

रुरुधुः कौतुकोत्तालास्ततस्तामममरावतीम्।

क्रियापदेति। यद्यपि एकैकवाक्यार्थसङ्कल्पा क्रियापदस्य इयमेव उच्चारणं तथापि काव्यापेक्षया बाहुल्यमवसेयम्॥ ३२५॥

आदिग्रहणेनेति। तत् तदितरप्रकरणप्रापितानां द्विरुक्तिप्रकाराणामादिपदेन उपयुक्तो विधेयः। तद्यथा। अर्वागर्वाग्वलवदुपलग्रन्थयः चेत्रशैला दूरे दूरे मणिमयदृषन्मेखलो रत्नसानुः। आरादारान्निधिरयमपां यद्दवीयो दवीयान् दुग्धाम्भोधिस्तदयमसदृक्किल्य एवादिशिल्पी। अत्रानुपूर्व्यं द्वे भवत इति द्विरुक्तिः। एवं स्वार्थे अवधार्यमाणे इत्यादयोऽपि द्विरुक्तिप्रकाराः स्वयमवसेया इत्याशयवानुपलक्षणतया किञ्चित् उदाहरति। निर्मूलकाषमिति। कषादिषु यथाविध्यनुप्रयोग इति तस्मिन्नेव प्रयुक्ते द्विरुक्तिसिद्धिः॥ ३२६॥

सम्भ्रमेणेति। भयसंवेगादात्मकः सम्भ्रमः संवेगस्वरा। स एव प्रकृतोदाहरणे द्विरुक्तिं प्रयोजयति॥ ३२७॥

ननु हर्षादिना महाकविप्रबन्धेषु द्विरुक्तिरुपलभ्यते। सा कथमुपयाच्चेत्यत आह। हर्षेति। हर्षादयोऽपि सम्भ्रमप्रयोजकास्तैः असाधारणतामापन्नैः

क्वार्जुनः क्वार्जुन इति ब्रुवत्यो नाकयोषितः ॥ ३२८ ॥

आवेगसम्भ्रमेण यथा,

कञ्चुकं कञ्चुकं मुञ्च हारं हारं परित्यज ।
हा हा दहति दावाग्निर्वस्त्रं वस्त्रमपाकुरु ॥

अत्र मुञ्च परित्यज दहति अपाकुरु इति क्रियापदेषु आवेगसम्भ्रमाभावात् न द्विरुक्तिः । तथाहि अरण्यानीप्रवेशे विजिगीषुद्विषां योषिद्दावाग्निसम्भ्रमावेगात् कयाप्येवमुच्यते ॥ तत्र प्रथमं कञ्चुक एवावेगसम्भ्रमः । स हि आगते दावाग्नौ उत्तारयितुमशक्यः । ततस्तद्व्यासङ्गहेतौ हारे, अनन्तरं परापतितदावाग्निदीप्ते वाससीति ॥ ३२९ ॥

विस्मयसम्भ्रमेण यथा,

अहो रूपमहोरूपमहो सुखमहो सुखम् ।
अहो मध्यमहो मध्यमस्याः सारङ्गचक्षुषः ॥

एतेषु समस्तेषु अपि सम्भ्रमेषु यावद् बोधमिति द्विरुक्तिः ॥ ३३० ॥

एवं त्रिरुक्तिरपि द्रष्टव्या,

जय जय जय श्रीमन् भोज प्रभाति विभावरी
वद वद वद शुल्कं विद्वन्निदं ह्यवधीयते ।

अवच्छिद्यमानः सम्भ्रमः अन्योऽन्यो भवति न च सम्भ्रमतां जहातीति सम्भ्रमद्विरुक्तिप्रकार एवायमित्यर्थः ॥ ३२८ ॥

निगूढगम्भीर उद्वेग आवेगः । ननु कञ्चुकं कञ्चुकमिति तन्मुञ्चेत्यादिकमावेगसम्भ्रमप्रभवमेव तत् कथं न द्विरुच्यत इत्यत आह । अत्रेति । कञ्चुकस्य हारेण हारस्योत्तरीयवाससा व्यासङ्गसम्भावनासम्भ्रमहेतुः ॥३२९॥३३०॥

सम्भ्रमे यावद्बोधमिति यावच्छब्दार्थमाविष्कुर्वाणः पूर्वोक्तमभिप्रेत्याह ।

शृणु शृणु शृणु त्वद्वत् सूर्य्योऽनुरज्यति मण्डलं
नहि नहि नहि क्ष्मामार्त्तण्डः क्षणेन विरज्यते ॥ ३३१ ॥
क्रियासमभिहारश्च क्रियाभ्यासश्च यः पुरा।
युक्तावुदाहृतः सोऽपि नामानुप्रास उच्यते ॥ ३३२ ॥
जायते न च दोषाय काव्येऽलङ्कारसङ्करः।
विभूषयति हारोऽपि स्तनौ ग्रीवां मृगीदृशाम् ॥ ३३३ ॥
अर्थाभेदे पदावृत्तिः प्रवृत्त्या भिन्नयेह या।
स सूरिभिरनुप्रासो लाटीय इति मीयते ॥ ३३४ ॥
स चाव्यवहितो व्यस्तः समस्त उभयः पुनः।
उभयश्चक्रवालश्च गर्भश्चैवाभिधीयते ॥ ३३५ ॥
यस्तु व्यवहितो नाम नेयत्ता तस्य शक्यते।

एवं त्रिरुक्तिरपीति। उपलक्षणञ्चेदम्। चतुरादिद्विरुक्तिः अदण्डवारिता एव ॥ ३३१ ॥

समभिहारो भृशत्वम् ॥ ३३२ ॥

ननु वाक्यार्थप्रयुक्त्यैव काव्यस्य सनाथीकरणात् किमनुप्रासेनेत्यत आह। जायते न चेति। उदाहरणेन अलङ्कार्यसङ्करवदलङ्कारसङ्करोऽपि लोकप्रसिद्ध एव शोभाहेतुरित्यभिमतमिति ॥ ३३३ ॥

क्रमप्राप्तं लाटानुप्रासं लक्षयति। अर्थाभेदे इति। लाटजनवल्लभोऽनुप्रासो लाटानुप्रासः। अर्थाभेदे कथं न पुनरुक्तिदोष इत्यत उक्तम् प्रवृत्त्या भिन्नयेति। तात्पर्य्यभेदेन इत्यर्थः। अतएव यमकाद्भेदः ॥ ३३४ ॥

स चेत्यनुक्तव्यवहितसमुच्चये चकारः। लाटानुप्रासः सामान्यतो द्विधा। अव्यवहितो व्यवहितश्च। अनावृत्तशब्दानन्तरितोऽव्यवहितः तदन्तरितश्च व्यवहितः। तयोरव्यवहितः षोढा भवति। व्यस्तः समस्तो द्वौ उभयाविति तावत् चत्वारस्तत्र उभयद्वयं द्विप्रकारकमिति सामान्यविशेषभावाभ्यां षड्भेदाव्याख्येयाः। उभयः पुनरिति। पुनः शब्दो व्यावृत्तौ पूर्वस्मादन्य एवायमेकशब्दाभिलप्य इत्यर्थः आद्योभयद्वयमग्रे वक्ष्यते ॥ ३३५ ॥

कर्त्तुमेकादिगणना पदवृत्त्यादिभङ्गिभिः ॥ ३३६ ॥

तेषु अव्यहितभेदेषु व्यस्तो यथा,

उअहिस्स जसेण जसं धीरं धीरेण गुरुअआ गरुअअं ।
रामो ठिइअ वि ठिइं भणइ रवेण अ रवं समुप्फुदन्तो ॥ (व)

अत्राव्ययानां द्योतकत्वादिभिर्व्यवधानं नाश्रीयते । न हि इवादेः शाकल्येऽपि पृथक्पदत्वम् अस्ति । यद्येवमिदमिहोदाहरणं युज्यते ॥

त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव ।
त्वन्मूर्त्तिरिव मूर्त्तिस्ते त्वमिव त्वं कृशोदरि ! ॥ इति ।

अस्त्येवैतत् । किन्तु यथा, "अमृतममृतं चन्द्रश्चन्द्रः" इत्यादिकमभेदेऽपि भेदोपचारान्नामद्विरुक्तिस्तथेयमित्युत्प्रेक्ष्यते ॥ ३३७ ॥

(व) उदधेर्यशसा यशः धैर्यं धैर्येण गुरुतया गुरुताम् ।
रामःस्थित्यापि स्थितिं भणति रवेण च रवं समभिक्रामन् ॥

द्वितीयं तु चक्रवालं गर्भश्चेत्युक्तव्यवहितस्य तर्हि कियन्तीभेदाः यत आह यस्मिन्निति । तेन बहुभावावान्तरविशेषतया नायं समग्रौर्षिकया गणित इत्यर्थः ॥ ३३६ ॥

तेषु इति । द्विरुक्तशब्दरूपेषु पूर्वपरयोर्नैकमपि समासान्तर्गतमिति व्यस्तः । एतेन समस्तादयो व्याख्याताः धैर्यगुरुताः इति नाम्नीर्य्यानुनिष्पादी वागनुभावो रस पूर्णकुम्भीच्छलनन्यायेन साक्षादिव तत्तत्प्रकर्षमर्पयन् शोभाविकाशहेतुः । समुप्फुन्दन्तो । समभिक्रामन् । ननु जसेण धीरेण गुरुअआ ठिइअ रवेण अ इति पदपञ्चके विभक्त्या तत् उत्तरयोः चकारद्वयेन च व्यवधानात् कथम्

समस्तो यथा,

अपहस्तितान्यकिशलयकिशलयशोभं विलोकयाशोकम्।
सखि विजिता पुरसुमनः सुमनः सुभगञ्च मधुतिलकम्॥

अत्र किशलय किशलय इति, सुमनः सुमन इति च समस्तानामेवाव्यवधानादयं लाटीयानुप्रासोऽव्यवहितसमस्तः पूर्वः पुनरव्यवहितव्यस्त इत्युच्यते॥ ३३८॥

उभयस्तु द्विधा प्रथमः असमस्तोऽपरो व्यस्तः प्रथमो व्यस्तोऽपरः समस्त इति च।

तयोः प्रथमो यथा,

जितलाटाङ्गनावक्त्रं वक्त्रं तस्या मृगीदृशः।
कस्य न क्षोभजनकं जनकं पुष्पधन्वनः॥

तदिदं लक्षणेनैव व्याख्यातम्॥ ३३९॥

द्वितीयो यथा,

नलिनी नलिनीनाथ! करसन्ततिसङ्गमात्।
विकचा विकचास्यानां कान्तानां हरति श्रियम्॥

अस्यापि लक्षणेनैवोक्तोऽर्थः॥ ३४०॥

व्यवहितभेद उदाहियत इत्याह। अत्रेति। अव्ययानामित्युपलक्षणम्। द्योतकत्वादिति विभक्तिसाधारणो हेतुः। पञ्चकप्रातिपदिकार्थत्वपक्षे विभक्तिर्द्योतिकैव शाकल्येऽपीति। अव्ययवाचकत्ववादी सोऽपि असत्वार्थानामिवाहीनां स्वातन्त्र्येण वाचकत्वं न मन्यते। यतो न पृथक्पदत्वमनुशिष्टवान्। तथाच द्योतकानां परशक्तिसहकारित्वेन तदनुप्रवेशात् स्वाङ्गमव्यवधायकमिति न्यायात्। ननु किमत्र क्लिष्टकल्पनया। अस्ति अव्यवहितोदाहरणमपि अन्यदपीति शङ्कते। यद्येवमिति। अत्र पूर्वार्द्धवर्त्तिद्वयमुदाहरणम् उत्तरार्द्धवर्त्तिनो द्वयस्य पूर्वतुल्यत्वात्। परिहरति। अस्तीति। अनन्वयमात्रमत्र उदाहरणम्। तत्र च अवश्यभेदकल्पनया विशेषणविशेष्यभावो वाच्यः तथाच गौणी नाम द्विरुक्तिः स्यादिति

स्वापेक्षया व्यस्तोऽन्यापेक्षया च समस्तो द्वितीयो व्यस्तः समस्त इति स द्वितीयोभयशब्दवाच्यः। सोऽपि द्विधा प्रतिपादमन्ताद्योर्गर्भ इवानुप्रासविन्यासात्। तयोः प्रथमश्चक्रबालं यथा,

जयति क्षुण्णतिमिरस्तिमिरान्वैकवल्लभः।
वल्लभीकृतपूर्वाशः पूर्वाशातिलको रविः॥

अत्र तिमिरवल्लभ पूर्वाशेति शब्दास्तिमिरादिशब्दापेक्षया व्यस्ताः, यथास्व पूर्वोत्तरपदापेक्षया च समस्ताः, पादान्ताद्योर्विनिवेशिता इति यथोक्तलक्षणानुगमाल्लाटीयानुप्रासोऽयमव्यवहितो व्यस्तसमस्तश्चक्रबालमित्युच्यते॥ ३४१॥

एतेन पादमध्येऽनुप्रासविन्यासाद् गर्भोऽपि व्याख्यातः। यथा

समाधवा माधवदत्तदृष्टिः सकौतुका कौतुकमन्दिरेस्तात्
सविभ्रमा विभ्रमदायिनी वः सपङ्कजा पङ्कजलोचना श्रीः॥
॥ ३४२॥

व्यवहितभेदेषु व्यस्तो यथा,

प्रकाशो यशसा देवः प्रकाशो महसा रविः।
दुःसहो विद्विषां स्वामी दुःसहस्तमसाञ्च सः॥

तदेतन्नातिदुर्बोधमिति न व्याक्रियते॥

सङ्करशङ्कया न उदाहृतमिति सिद्धान्ततात्पर्यसंक्षेपः। पूर्वः पुनरिति। समस्तानन्तरं व्यस्तविवरणं प्रतिपत्तिसौकर्यार्थम्॥ ३३७—४०॥

द्वितीयस्तुभयं विवेचयति। स्वापेक्षयेति॥ ३४१॥

तिमिरान्वा: चक्रवाकाः। यथा श्रुतिद्विरुक्तः पूर्वः पूर्वेण उत्तरश्च उत्तरेण समस्त इति पूर्वस्मात् विशेषः। सकौतुका कृतकङ्कणबन्धादिपरिणयमङ्गला॥ ३४२॥

अनेकगुण इति। आवृत्तिर्द्वैगुण्यादिना अनेकगुणत्वं न च गुणनायामियत्ताबधारणकारणमस्ति इति अभिसन्धाय तस्य इयत्ता न शक्यते कर्तुमिति पूर्व-

सोऽयमेकगुणो व्यस्तश्च लाटीयानुप्रासो व्यवहित इत्युच्यते ।
व्यस्त एवानेकगुणो यथा,

किञ्चिद्वच्मि न वच्मि वच्मि यदि वा किं वच्मि वच्मीदृशम्
दृश्यन्ते न भवादृशेषु यतिषु स्वेषामदोषे दमाः ।
ते किं सन्ति न सन्ति सन्ति यदि वा के सन्ति सन्तीदृशाः
सर्वस्तेषु गुणैर्गृहीतहृदयो लोकः कुतो वर्त्तते ॥

अत्र वच्मीति सन्तीत्येतयोरनेकगुणा वृत्तिः ॥ ३४३ ॥ ३४४ ॥

समस्त एकगुणो यथा,

चन्द्रानन चन्द्रदिनं मृगलोचन मृगशिरश्च नक्षत्रम् ।
तिथिरतिथिप्रियदशमी परतस्त्वेकादशी प्रहरात् ॥

ननु इह तिथिरित्यसमस्तम् । न केवलमसमस्तं भिन्नाथतया लाटीयानुप्रासोऽपि न संगच्छते । संगच्छते च केनचित् पदानुप्रासेन । न च लाटीयानुप्रासो वा नामानुप्रासो वा पदानुप्रासाद् भिद्यत इति ॥ ३४५ ॥

समस्तोऽनेकगुणो यथा,

ब्रह्माण्डच्छत्रदण्डः शतधृतिभुवनाम्भोरुहो नालदण्डः
क्षीणोनीकूपदण्डः क्षरदमरनदीपट्टिकाकेतुदण्डः ।

मुक्तम् । स्वेषामात्मीयानां मध्ये यः कश्चिद्दोषः तत्र दमा दण्डप्रकारा न दृश्यन्ते इति ॥ ३४३ ॥ ३४४ ॥

यद्यपि एकपरिहाराकारोदाहरणद्वयमुचितमेव तथापि कञ्चिद्विशेषं विवक्षन् आक्षिप्य समाधत्ते ननु इति । माभूदत्र असमासोऽन्यथापि न इदमुदाहरणमिह सङ्गतमित्याह । न केवलमिति । तत् किमनुप्रास एवायं न भवतीति पृच्छति । केन तर्हीति । उत्तरं पदानुप्रासेनेति । पदानुप्रासेन अर्थभेदाभेदौ विवक्षितौ । किन्तु पदाश्रयेण आवृत्तिमात्रं पदानुप्रासावृत्तिश्च लाटानुप्रासेऽपि अस्तीति सङ्गत्य अत्र इदमुदाहृतमित्यर्थः ॥ ३४५ ॥

ज्योतिश्चक्राक्षदण्डस्त्रिभुवनभवनस्तम्भदण्डोऽङ्घ्रिदण्डः
श्रेयस्त्रैविक्रमस्ते वितरतु विबुधद्वेषिणां कालदण्डः ॥

अत्रानेकशो दण्ड इत्यस्यावृत्तिः। आभ्यां व्यस्तसमस्तभेदोऽपि व्याख्यातः ॥ ३४६ ॥

यथा,

दशरश्मिशतोपमद्युतिं यशसा दिक्षु दशस्वपि श्रुतम्।
दशपूर्वरथं यमाख्यया दशकण्ठारिगुरुं विदुर्बुधाः ॥

अत्रानेकधा दशशब्द आवर्त्तते ॥ ३४७ ॥

अव्यवहितेऽपि द्वैगुण्यादेर्न विरोधः। यथा,

वस्त्रायन्ते नदीनां सितकुसुमधराः शक्रसङ्काशकाशाः
काशाभा भान्ति तासां नवपुलिनचराः श्रीनदीहंसहंसाः।
हंसाभाम्भोदमुक्तः क्षरदमलरुचिर्मेदिनीचन्द्रचन्द्र-
स्चन्द्राङ्कः शारदस्ते जयकटुपनतो विद्विषां कालकालः ॥३४८॥

व्यवहिताव्यवहितभेदेऽपि दृश्यते यथा,

धनैर्दुष्कुलीनाः कुलीनाः क्रियन्ते
धनैरेव पापान्नरा निस्तरन्ति।

शतधृतिर्ब्रह्मा। तस्य भवनभूतमम्बीरुहं पद्मं कूपदण्डः गुणवत्त्वः दशस्त्रिलोकी दशशब्दो व्यस्तोऽन्ये त्रयः समस्ताः ॥ ३४६ ॥ ३४७ ॥

ननु व्यवहित एव किं गुणनादिभेदो नेत्याह। अव्यवहितेऽपीति। वस्त्रायन्त इत्यादौ काशपदपरिहारेण उदाहरणम्। तत्र हि प्रथमः काशशब्दो भिन्नार्थ एव ॥ ३४८ ॥

यत्र व्यवहिताव्यवहितयोः एकवाक्यानुप्रवेशोऽस्ति तत्रापि गुणनाभेद उदाहरणीयः। दृश्यत इत्यनेन यद्वद्व्यवहिते भूयसी गुणना महाकविप्रबन्धेषु प्रतीयते न तद्वदव्यवहितेऽपीति पूर्वं व्यवहितमात्रे गुणनादिकमुपन्यस्तमिति तात्पर्यम्। धनैरिति। अत्र धनपदं व्यवधानेन वह्नीङ्गुणनामवलम्बमानमेव

धनेभ्यो हि कश्चित् सुहृन्नास्ति लोके
धनान्यर्जयध्वं धनान्यर्जयध्वम् ॥ ३४९ ॥

योऽपि चार्द्धाभ्यासः सोऽपि व्यवहिताव्यवहितभेद एव ॥ यथा,

यैस्त्वं साक्षात्कृतो नाथ तेषां कामेषु को ग्रहः।
यैस्त्वसाक्षात्कृतो नाथ तेषां कामेषु को ग्रहः ॥

अत्र पादापेक्षया व्यवहितत्वमर्द्धापेक्षया पुनरव्यवहितत्वं भवति ॥ ३५० ॥

द्विभागाभ्यासस्तु व्यवहित एव स्फुरते। यथा,—

श्रद्धायत्नौ यदि स्यातां मेधया किं प्रयोजनम्।
तावभौ यदि न स्यातां मेधया किं प्रयोजनम् ॥ ३५१ ॥

पादाभ्यासः पुनरव्यवहितो व्यवहितश्च दृश्यते। तयोः अव्यवहितो यथा,

सन्तः शृणुध्वं हृदये निदध्व-
मुत्क्षिप्य बाहू परिरारटीमि।
न सुभ्रुवां तुल्यमिहास्ति रम्यं
न सुभ्रुवां तुल्यमिहास्ति रम्यम् ॥ ३५२ ॥

चतुर्थपादे तु अव्यवहिता तु अनुप्रासेऽपि प्रविष्टमिति भवति व्यवहिताव्यवहितभेदता। सोऽयं पदाभ्यासो दर्शितः ॥ ३४९ ॥

एवं श्लोकार्द्धाभ्यासो व्यवहिताव्यवहितभेद एव भवतीत्याह। योऽपीति ॥ ३५० ॥

श्रद्धा यत्नाविति। अत्र यदि स्यातामिति पादभागेन सह पादावृत्तिस्त्रिभागावृत्तिर्भवति ॥ ३५१ ॥ ३५२ ॥

व्यवहितो यथा,

मुखेन लक्ष्मीर्जयति फुल्लपङ्कजचारुणा ।
दक्षिणेन करेणापि फुल्लपङ्कजचारुणा ॥ ३५३ ॥

इवाद्यावृत्तयोऽपि चात्रैव द्रष्टव्या यथा,

लीनेव प्रतिबिम्बितेव खचितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च ।
सा नश्चेतसि कीलितेव विशिखैश्चेतो भुवः पञ्चभि-
श्चिन्तासन्ततितन्तुजालनिविड़स्यूतेव लग्ना प्रिया ॥३५४॥

यमकानां हि यावन्त्यो वर्ण्यन्ते भेदभक्तयः ।
अनुप्रासस्य लाटानां भिदास्तावन्त्य एव हि ॥ ३५५ ॥

उपमादिवियुक्तापि राजते काव्यपद्धतिः ।
यद्यनुप्रासलेशोऽपि हन्त तत्र निवेश्यते ॥ ३५६ ॥

कुण्डलादिवियुक्तापि कान्ता किमपि शोभते ।
कुङ्कुमेनाङ्गरागश्चेत् सर्वाङ्गीनः प्रयुज्यते ॥ ३५७ ॥

मुखेनेति । फुल्लपङ्कजमिव चारुफुल्लेन पङ्कजेन चारुरिति यद्यपि वृत्त्यर्थो-भिद्यते तथापि पदानामभिन्नार्थत्वात् उदाहरणता ॥ ३५३ ॥

अर्थाभेद इति नार्थशब्दोऽभिधेयवचनः किन्तु शब्दप्रतिपाद्यमात्रवचन इत्या-शयवानाह । इवादीति ॥ ३५४ ॥

ननु अन्येऽपि पदावृत्तिप्रकाराः किमिति न उदाहृता इत्यत आह । यम-कानां हीति । भेदभक्तयोऽवान्तरप्रकारविच्छित्तयः स्थानास्थानपादभेदलक्षणाः श्लोकावृत्तिः परमत्र नास्तीति यमकादपकर्षः ॥ ३५५ ॥

प्रकरणान्ते अनुप्रासव्युत्पादनप्रयोजनमाह । उपमादीति । अनुप्रासलेशो-ऽपीति । वर्णाद्यनुप्रासः ॥ ३५६ ॥

श्रुतिवृत्त्यनुप्रासौ तु सन्दर्भव्यापकावेव प्रशस्तावित्युदाहरणव्याजेनाह । कुण्डला-दीति ॥ ३५७ ॥

श्रुतिवर्णानुप्रासावेकविधौ कुन्तलेषु गौड़ेषु ।
पदयोर्निरनुप्रासो द्वेधा त्रेधा च लाटेषु ॥ ३५८ ॥
वर्णस्थानस्वराकारगतिबन्धान् प्रतीह यः ।
नियमस्तद्बुधैः षोढ़ा चित्रमित्यभिधीयते ॥ ३५९ ॥

वर्णशब्देन चात्र स्वराणां पृथङ्निर्देशाद् व्यञ्जनान्येव प्रगृह्यन्ते । तत्र वर्णचित्रेषु चतुर्व्यञ्जनं यथा,

जजौजोजाजिजिज्जाजी तं ततोऽतिततातितुत् ।
भाभोऽभीभाभिभूभाभूराराररिररीररः ॥ ३६० ॥

एतदेव खण्डसरस्वतीषु कविषु न तथा काव्यसिद्धिरिति दर्शयन् द्रढयति । श्रुतिवर्णानुप्रासाविति ॥ ३५८ ॥

क्रमप्राप्तं चित्रलक्षणमवतारयति । वर्णेति । चित्रमालेख्यं तदिव जीवितस्थानीयध्वनिरहितं चित्रमिति काश्मीरकाः । तदसत् । ध्वनेः प्राधान्यानङ्गीकारात् प्रतीयमानमात्राभावस्य क्वचिदपि असम्भवात् । यद्वा आकृतिविशेषयुक्तं चित्रमिति तदपि न । अव्यापकत्वात् । अतो वर्णादिनियमेन प्रवृत्तमाश्चर्यकारितया चित्रमित्येव युक्तम् । वर्णा व्यञ्जनानि । स्थानं कण्ठादिः- स्वरा अकारादयः । आकारः पद्माद्याकृत्युन्मुद्रणम् । गतिः पटिति भङ्गविशेषः । बन्धो विविडिति प्रभृतिः ॥ ३५९ ॥

पद्मप्रभृतिनियमेन तथा शक्तिव्युत्पत्त्योरुत्कर्ष इति चतुरादि गृह्णाति । तत्रेति । अवश्यं योद्धाजाजी । जजेर्युद्धार्थात् आवश्यके णिनिः । जजायुद्धशौण्डाः । वेषामोजसा जातायाऽऽजिः सग्रामस्तं जयतीति क्विप् । तं वेणुदारिणं ततोऽनन्तरं अतिततान् । चतुरङ्गवस्त्रेन प्राप्तविस्तारान् । आतिनः सततगमनशीलान् । तुदतीति क्विप् । भानां दीप्तताराणां शुक्रबृहस्पत्यादीनामभेवाभा कान्तिः यस्येति उपमानपूर्वपदबहुव्रीहौ उत्तरपदलोपे च भामः अभियोभयशून्यानिभानभिभवतीति क्विप् । अभीभाभिभूस्तादृशी या भा तेजस्तस्या भूराश्रय आर जगाम अरिः शत्रुः बलभद्र इत्यर्थः । अरीणां रीः सञ्चरणं रीङ्गताविति धात्वनुसारात् । तस्या ईरी धूननं राति ददाति अरिररः ॥ ३६० ॥

त्रिव्यञ्जनं यथा,

देवानां नन्दनो देवो नोदनो वेदनिन्दिनाम् ।
दिवं दुदाव नादेन दाने दानवनन्दिनः ॥ ३६१ ॥

द्विव्यञ्जनं यथा,

भूरिभिर्भारिभिर्भीरौर्भूभारैरभिरेभिरे ।
भेरीरेभिभिरभ्राभैरभीरुभिरिभैरिभाः ॥ ३६२ ॥

एकव्यञ्जनं यथा,

न नोननुन्नो नुन्नोनो नाऽना नानानना ननु ।
नुन्नोऽनुन्नो ननुन्नेनो नाऽनेनानुन्ननुन्ननुत् ॥ ३६३ ॥

क्रमस्थसर्वव्यञ्जनं यथा,

कः खगीघङचिच्छौजा झाञ्जोटोठौडडढणः ।

देवः सृष्टिस्थितिसंहारक्रीडारतः दानवनन्दी हिरण्यकशिपुः तस्य दाने खण्डने यो नादो वचः कपाटपाटनकटकटाशब्दः तेन दिवं स्वर्गं दुदाव किमेतदित्याकस्मिकसम्भ्रमेण उपतापयामास । जगत्कण्टकनिराकरणाद् देवानां नन्दन आनन्दकृत् । वेदनिन्दिनाञ्च नोदनः प्रतिक्षेपकः । सामान्याभिप्रायेण एकवचनम् ॥ ३६१ ॥

भूरिभिर्बहुभिर्भारिभिः प्रकृतिसारभारवद्भिः अतिप्रमाणकायतया भुवोभारभूतैः अलः कांस्यभाजनो निःस्वानो भेरी तद्वद् रेभिभिः । रेभृशब्दे इति धात्वनुसारात् । अभ्राभैः प्रथमोन्नतमेघकान्तिभिः इभैर्दन्तिभिर्भियं रान्ति प्रयच्छन्तीति भीरा इभाः प्रतिद्विपा अभिरेभिरे अभियुक्ताः ॥ ३६२ ॥

ननो । नानानना विविधाकारवदना गणा ऊनेन हीनेन नुन्नोजितो नानपुरुषः तथानुन्न इन्नः प्रभुर्यस्य सोऽपि आत्मनि जीवति पुरुषोऽपुरुष एव । यतोऽननुन्नेनोऽजितप्रभुर्नुन्नोऽपि अनुन्न एव । तथानुन्ननुन्नः जित इव क्लीवतया पराभूत इति प्रकारे गुणवचनस्येति द्विरुक्तिः । तमपि योऽनुदति सनानेनाननिष्पापः बस्वच्छायार्पकान्यवर्णगुरुलोन्मेषमात्रप्रयोजकस्तकारो न वृत्तिशरीरान्तर्गत इति दिव्यं जनता नाशङ्कनीया ॥ ३६३ ॥

क्रमस्थेति । वर्णसमाम्नाये येन क्रमेण कादयो मावसानाः पठितास्तेन

त्यथोदधीन् पफर्वाभीर्मयोरिल्वाग्निषां सहः॥ ३६४॥

छन्दोऽचरव्यञ्जनं यथा,

सरत्सुरारातिभयाय जाग्रतो
जगत्यलं स्तोत्रजनस्य जायताम्।
स्मितं स्मरारेर्गिरिजास्यनीरजे
समेतनेत्रत्रितयस्य भूतये॥ ३६५॥

षड्जादिस्वरव्यञ्जनं यथा,

सा ममारिधमनीनिधानिनी सामधामधनिधामसाधिनी।

क्रमेण व्यञ्जननिवेशः। कः खगौघस्तत्प्रसिद्धावदानपक्षिसमूहस्तमञ्चतीति क्विनिसंयोगान्तलोपे कृते च खगौघाङ्क्विरूपम्। चित संविदं ञ्यति च्छिनत्तीति चिच्छं यदोजस्तत् नास्ति यस्य असौ अचिच्छौजाः। झसु अदने अस्मात् क्विप्। अनुनासिकस्य क्विझलोः क्ङितीति उपधादीर्घो मोनो धातोरिति नकार इति झान्परवल्लभञ्चकोत्रः पण्डितस्तोयुनाथुरिति नकारस्य ञकारः। अटाः संग्रामाङ्गणपर्यटनशीलाः सुभटान्तानीठते बाधत इति क्विप्। उठगताविति धातोरूपम्। वेषामीडीश्वरः। अडण्ड्यणोऽचपलः डण्ड्य इति अव्युत्पन्नं चपलवाचिप्रातिपदिकम्। तथा अभीर्भयरहितः। एवंविधः को नामायमुदधीन् पफर्व। पूरयामास इति प्रश्नः। उत्तरम् अरीन् लुनन्ति या आग्निषस्तासां सहः चमीमयोदैत्यराज इति॥ ३६४॥

छन्दोऽचरेति। म्यरसतजभनगालान्ताश्छन्दो विचिति वेदिभिः। दशैव वर्णा निर्णीताश्छन्दोरूपप्रसिद्धये। तन्मात्रव्यञ्जननिबद्धं छन्दोऽचरव्यञ्जनम्। सुबोधसुदाहरणम्॥ ३६५॥

षड्जादीति। सरिगामपधानिश्च वर्णाः सप्त स्वरादयः। षड्जादिकृतसङ्केता दृष्टा गान्धर्ववेदिभिः। तन्मात्रव्यञ्जनमयं षड्जादिव्यञ्जनम्। सह एव विष्णुना वर्त्तते इति सा लक्ष्मीः। अरीन् धमति तापयतीति धमतेर्लुटि बहुलवचनमन्यत्रापीति धमादेशः। एवंविधा मम भूयादिति शेषः। निधानिनी पद्मादिनिधानवती। साम्नः सान्त्वस्य धाम गृहम्। धनिनां धामसाधनी तेजः

मानिनी सगरिमाऽपपापपा सापगा समसमागमाऽसमा ॥

॥ ३६६ ॥

सुरजाचरव्यञ्जनं यथा,

खरगरकालितकण्ठं मथितगदं मकरकेतुमरणकरम् ।
तड़िदिति रुरुमुण्डहरं हरमन्तरहं दधे घोरम् ॥ ३६७ ॥

चतुःस्थानचित्रेषु निष्कण्ठ्यं यथा,

भूरिभूतिं पृथुप्रीतिमुरुमूर्त्तिं पुरुस्थितिम् ।
विरिञ्चिं सूचिरुचिधीः शुचिभिर्नुतिभिर्धिनु ॥ ३६८ ॥

निस्तालव्यं यथा,

स्फुरत्कुण्डलरत्नौघ मघवद्धनुकर्वुरः ।
मेघनादोऽथ संग्रामे प्रावृट्कालवदाबभौ ॥ ३६९ ॥

प्रसाधिका । मानिनी पूजावती सगरिमा गौरववती अपपापान् निष्कलुषान् पाति इति अपपापपा । सेति प्रसिद्धविभवा आपगा नदी तत्तुल्यः चणविसर्पि-भङ्गुरः समागमो यस्याः सा तथा । असमा अनुपमा ॥ ३६६ ॥

सुरजेति । पाठाचराणि सुरजे लहकारौ तथदधाच्छमौ रेफः । नणकखग-घङाश्चेत्यं षोड़श भरतादिकथितानि । तन्मात्रविरचितं सुरजाचरव्यञ्जनम् । सुबोधसुदाहरणम् ॥ ३६७ ॥

वर्णवत्स्थानेषु अपि चतुरादिनियमेन चित्रम् । यद्यपि चाष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु चेति । तथापि जिह्वामूलीयस्य स्वरत्वादुरस्यनासिक्ययोः काव्यप्रवेशाभावा-दुरो नासिकाजिह्वामूलपर्य्युदासेन स्थानपञ्चके चतुरादिनिरूपणम् । हे सूचि-रुचिधीः शुचिभिः शुद्धाभिर्नुतिभिः स्तुतिभिर्यथोक्तविशेषणं विरिञ्चिं ब्रह्माणं धिनु प्रीणयेति । अकुहविसर्जनीयाः कण्ठ्याः ॥ ३६८ ॥

कुण्डलरत्नौघ एव मघवतो धनुस्तेन कर्वुरो मेघनादनामा राक्षसः । इचु-यशाः तालव्याः ॥ ३६९ ॥

निर्दन्त्यं यथा,

पापापहारी रणकर्मशौण्डश्चण्डीशमिश्रो मम चक्रपाणिः ।
भूयाच्छ्रियापश्रमयेच्यमाणो मोक्षाय मुख्यामरपूगपूज्यः ॥
॥ ३७० ॥

निरौष्ठ्यं यथा,

नयनानन्दजनने नक्षत्रगणशालिनि ।
अघने गगने दृष्टिरङ्गने दीयतां सकृत् ॥ ३७१ ॥

निर्मूर्द्धन्यं यथा,

शलभा इव धावन्तः सायकास्तस्य भूभुजः ।
निपेतुः सायकच्छिन्नास्तेन संयुगसीमनि ॥ ३७२ ॥

त्रिस्थानचित्रेषु निरौष्ठ्यदन्त्यं यथा,

जीयाज्जगज्ज्येष्ठगरिष्ठचारश्चक्रार्चिषा कृष्णकडारकायः ।
हरिर्हिरण्याक्षशरीरहारी खगेशगः श्रीश्रयणीयशय्यः ॥३७३॥

निरौष्ठ्यमूर्द्धन्यं यथा,

अलिनीलालकलतं कं न हन्ति घनस्तनि ।
आननं नलिनच्छायनयनं शशिकान्ति ते ॥ ३७४ ॥

चण्डीशमिश्रः परमेश्वरैकशरीरतामापन्नो मुख्यामरा ब्रह्मादयः । तुलसा-दल्याः ॥ ३७० ॥

अघन इति । शरत्कालशोभया दृश्यतमे । उपूपभानीया श्रीष्ठ्याः ॥३७१॥

तेन कपिलेन राज्ञा तस्य कोसलाधिपस्य प्रसेनजितः । कटुरसा मूर्द्धन्याः ॥ ३७२ ॥

निरौष्ठ्यं दन्त्यमिति । चनेनैव द्विकान्तरपरिहारेण श्लोष्ठप्रसादो गवेषणीय ॥ ३७३ ॥

तथोत्तरत्रापि ॥ ३७४ ॥

द्विस्थानचित्रेषु दन्त्यकण्ठ्यै र्यथा,

अनङ्गलङ्घनालग्ननानातङ्का सदङ्गना ।
सदानघ ! सदानन्द ! नताङ्गीसङ्गसङ्गत ! ॥ ३७५ ॥

एकस्थानचित्रेषु कण्ठ्यै र्यथा,

अगा गां गाङ्गकाकाक गाहकाघककाकहा ।
अहाहाङ्ग खगाङ्गागकङ्गागखगकाकक ॥ ३७६ ॥

स्वरचित्रेषु ह्रस्वैकस्वरं यथा,

उरुगुं युगुरुं युत्सु चुक्रुशुस्तुष्टुवुः पुरु ।
लुलुभुः पुपुषुर्मुत्सु मुमुहुर्नु मुहुर्मुहुः ॥ ३७७ ॥

सदानघ ! अनवद्य ! सदैव प्रियालाभेनानन्दयुक्त । हे नताङ्ग्याः कस्याश्चिदन्यस्याः सङ्गे सङ्गत ! तव सदङ्गना शोभनाङ्गना कामाक्रमणया नानारूपतया वर्त्तते । अतस्तामनुकम्पस्वेति सोपालम्भप्रार्थनावाक्यार्थः ॥ ३७५ ॥

गाङ्गकं गङ्गासम्बन्धि जलं तस्य अकः कुटिला गतिः । अक अगकुटिलायां गताविति । तस्यां ककस्य तन्मध्यस्य गाहको विलोलकः कुत्सितमघं पापमघकं स एव काकस्तं हतवानघकाकहा । अन्ये तु विसर्गान्तं पठन्ति । तदा जहातेर्विचिरूपम् । एवंविधस्त्वङ्गां स्वर्गं अगाः याया इति । आशंसायाम्भूतप्रत्ययः । कीदृशः सन् हानं हाः न हा अहासा जिहीते प्राप्नोतीति आह हन्ताहशमङ्गं यस्य स खगो गरुडः सूर्य्यो वासोऽङ्गश्चिङ्गभूतो यस्य तादृशो गोऽर्थान्मेरुसद्वर्त्तिनः कङ्काख्या अगखगा वृक्षनिवासिनः पक्षिणस्तेऽपि आकाककाः गमनस्पृहयालवो यस्य स तथा आसान्तावदन्ये पतत्रिभिरपि अभिनन्दितगमन इत्यर्थः ॥ ३७६ ॥

स्वरचित्रेषु एकादिक्रमेण उपन्यासो ग्रन्थवैचित्र्यार्थः । उरुगुं विस्तीर्णवाचम् । युगुरुं खर्वासिनामाचार्य्यम् । युत्सुयुद्धार्थनिमित्तात् कर्मयोग इति सप्तमी । गीर्वाणभटाश्चुक्रुशुरार्त्ताः शरणं ययाचिरे । अतएव पुरु बहुधा तुष्टुवुः । युद्धप्रयोजनमाह । मुत्सु हर्षेषु लुलुभुः पुपुषुः पुष्टा बभूवुः नु वितर्के । मुहुर्मुहुर्वारं वारं किं मुमुहुर्मोहमासादितवन्तः । यतः क्रोशनादीनामव्यवस्थेति भावः ॥ ३७७ ॥

दीर्घैकस्वरं यथा,

वेधैरेनैरेशैरैन्द्रैरेजैरेलेजैनैः सैद्धैः।
मैत्रैर्नैकैर्धैर्य्यैर्वैरैर्दैः स्वैः स्वैरैर्दैवैस्तैस्तैः॥ ३७८॥

ह्रस्वद्विस्वरं यथा,

क्षितिस्थितिमितिक्षिप्तिविधिविन्निधिसिद्धिलिट्।
मम त्र्यक्ष नमद्दक्ष हर स्मरहर स्मर॥ ३७९॥

दीर्घद्विस्वरं यथा,

श्रीदीप्ती क्रीकीर्तीधीनीती गीः प्रीती।
एधेते द्वे द्वे ते ये नेमे देवेशे॥ ३८०॥

त्रिस्वरेषु ह्रस्वस्वरं यथा,

क्षितिविजितिस्थितिविहितिव्रतरतयः परगतयः।
उरु ररुधुर्गुरु दुधुवुः स्वमरिकुलं युधि कुरवः॥ ३८१॥

विधिर्विरिञ्चिः। ईलक्ष्मीस्तस्या इनः प्रभुर्विष्णुरीशो महादेव इन्द्रो वासव ईजः कामो लक्ष्मीपुत्रत्वात्। इला पृथ्वी जिनो बुद्धः सिद्धा देवविशेषा मित्रः सूर्यो रैदो धनदः कुबेरो दैवा शक्त्यतिरिक्ता मरुदादयः। एषां सम्बन्धिभिर्धैर्य्यैर्धृतिभिः स्वैर्वित्तैश्च नैकैरनेकविधैस्तैस्तैः प्रसिद्धरूपैरहं स्वैरैः सुष्ठु आसमन्तात् सम्यङ्नो भवानीत्याशंसा वै वाक्यालङ्कारे॥ ३७८॥

क्षितिः पृथ्वी तस्याः स्थितिः पालनं मितिर्मानं क्षिप्तिः संहारस्तद्विधिं वेत्ति। निधिसिद्धौ लिट्टीति क्विप्। नमन् भग्नतेजा दक्षो यस्मात्। स्मरहर कामदहन। त्र्यक्ष त्रिनयन हर महादेव मम स्मर। अधीगर्थयोगे कर्मणि षष्ठी। श्रीदीप्ती-लक्ष्मी तेजसी। क्रीकीर्तीलज्जायशसी। धीनीतीबुद्धिनयौ। गीः प्रीती वाक्-प्रमोदौ। इमे ये देवेशेऽपि नस्तस्ते द्वे तव एधेते वर्द्धेते॥ ३७९॥ ३८०॥

क्षितेर्विजितिर्विजयः स्थितेर्वर्णाश्रममर्य्यादालक्षणाया विहितिर्विधानं तदेव व्रतं तत्र रतिर्येषां परा श्रेष्ठा गतिर्ज्ञानं येषां ते तथा एवंविधाः कुरवः स्वरिणां कुलमुरु विस्तीर्णं ररुधुस्तदेव गुरु महद् दुधुवुः कम्पयामासुः॥ ३८१॥

चतुःस्वरेषु दीर्घस्वरं यथा,

आम्नायानामाह्वान्त्या वाग्गीतीरीतीः प्रीतीर्भीतीः ।
भोगो रोगो मोदो मोहो ध्येये चेच्छेत् क्षेमे देशे ॥ ३८२ ॥

प्रतिव्यञ्जनविन्यस्तस्वरं यथा,

तापेनोग्रोऽस्तु देहे नो हेये विल्लोभिनिन्दिना ।
जायाग्रे हि गुणिप्रेष्ठा हितोऽचेपोऽस्मृतोच्चिणी ॥ ३८३ ॥

तदेवापास्तसमस्तस्वरं यथा,

तपनग्रस्तदहन हयवल्लभनन्दन ।
जय ग्रहगणप्रष्ठ हतक्षप मतक्षण ॥ ३८४ ॥

आकारचित्रेषु अष्टदलं यथा,

या श्रिता पावनतया यातनच्छिदनी च या ।
याचनीया धिया माया या माया संस्तुता श्रिया ॥

आम्नायानां वेदानामन्त्या वाक् उपनिषत् सा हिताहितप्रतिपादनपरा किमाह । या गीतयस्ता ईतय उपसर्गाया: प्रीतय स्ता भीतयो भयानि यो भोग: सरोगो यो मोदो हर्ष: स मोहो न परमेवमाह किन्तु यावद्ध्येये ध्यातव्ये क्षेमे क्लेशरहिते देशे विषये मोक्षलक्षणे इच्छेत् इच्छा कुर्य्यादिति । वाशब्द: समुच्चये । अन्ये चकारमेव पठन्ति ॥ ३८२ ॥

हेये हातव्ये वस्तुनि या विल्लाभो विट्लाभ इति धात्वनुसारात् । तत्र ये लोभिनो लोभवन्त स्तन्निन्दनशीलेन तापेन तेजसा अर्थादुग्रश्चण्डरश्मि: स मम देहेऽस्तु तेजस्वीभवानीति यावत् । किमिति एव माशास्यत इत्यत आह । अस्मतस्यन्दिनि जायाग्रे कान्ताग्रे गुणिना प्रेष्ठा प्रियतमा अचेपो अविलम्ब एव हितोऽर्थत: समरस्य । इति दत्वाशिषं कोऽपि स्वस्मै कार्मुककर्मणे । जगाम समरं कर्णमरिलक्ष्मीस्वयम्वरम् ॥ ३८३ ॥

ग्रस्तदहन अभिभूतपावक हयवल्लभोरेवन्त: स तनयो यस्य हतक्षप अपहृतरात्रे मतक्षण सम्मतोत्सव ॥ ३८४ ॥

आश्रितेत्यादिकमुदाहरणं प्रागेव व्याख्यातमत: परं हारिहरी व्याख्या सापि

अत्र, कर्णिकायां न्यसेदेकं द्वे द्वे दिक्षु विदिक्षु च।
प्रवेशनिर्गमौ दिक्षु कुर्यादष्टदलाम्बुजे ॥ ३८५ ॥

प्रथमाष्टदलकमलबन्धः।



द्वियीयमष्टदलं यथा,

चर स्फारवर ज्वारवरकार गरज्वर।
चलस्फाल वलचालवल कालगल ज्वल ॥
अष्टधा कर्णिकावर्णः पत्रेष्वष्टौ तथापरे।

अत्रैव लिख्यते। तद्यथा। या देवी पवित्रत्वेनाश्रिता अनीचया तुङ्गया बुद्ध्या मायामस्याविद्याविस्तारस्य आयासं ग्लानिं विच्छेदं याचनीया यती यातनं नरकानुभवनीयं दुःखं छिनत्ति श्रिया स्तुता। अस्य न्यासमाह। कर्णिकायामिति। आद्यौ यावर्णः कर्णिकाया श्रितेति पावेति क्रमेण दिक्षु विदिक्षमष्टपत्रेषु। याश्रिता श्रियेत्यादौ दिग्दलेषु प्रवेशनिर्गमौ ॥ ३८५ ॥

चरस्फारेत्यादि। सञ्चरणशीलः स्फारो यो वरः तं चरति ददातीति। वरान् श्रेष्ठान् किरति क्षिपति क्लृणोति छिनत्ति वेति कर्मण्यण्। गरः काल-

तेषां सन्धिषु चाप्यष्टावत्र पत्रसरोरुहे ॥ ३८६ ॥

द्वितीयाष्टपत्रबन्धः ।



तृतीयमष्टपत्रं यथा,

न शशीश नवे भावे नमल्काम नतव्रत ।
नमामि माननमन न नुत्वानु नयं न यम् ॥

अत्र, प्राक्कर्णिकां पुनः पर्णं पर्णाग्रं पर्णकर्णिके ।

कूटः तस्य ज्वरी ज्वरणात् । ताण्डवारम्भे चलाः स्फोला यस्य बलक्षधवलदेहो लबलप्राप्तशक्ति कालगलनीलकण्ठज्वलदीप्यमानो भव । न्यासमाह । अष्टधेति । अत्र प्रथमार्द्धे एक एव रेफोऽष्टधा कर्णिकायाम् । अपरार्द्धस्य अन्ये अष्टौ लकारवर्जं दलेषु तेषां सन्धिषु अन्ये अष्टौ लकाराः ॥ ३८६ ॥

न शशीशेत्यादि । शशीशे चन्द्रे नवे भावे भक्तौ स्थित इति शेषः । त्वामहं न नमामि कामा नमाम्येव । नमन् भग्नः कामो यस्मात् नतमुपनतं व्रतं यस्य संयमिधौरेयत्वात् माननमनं शत्रूणामुन्नतिनाशनं नन्विति पूजा सम्बोधने । त्वा इति त्वामनुनयनविनयं कुर्वाणोऽयम् । न्यासमाह । प्राक्कर्णिकामिति । पूर्वं

प्रतिपत्रं व्रजेद्वीमानिह त्वष्टदलाम्बुजे ॥
एवं चतुष्पत्रषोड़शपत्रे अपि द्रष्टव्ये ॥ ३८७ ॥

तृतीयाष्टपत्रबन्धः ।



तयोश्चतुष्पत्रं यथा,

सासवा त्वा सुमनसा सा नतापीवरोरसा ।
सारधामेति सहसा साहसर्द्ध सुवाससा ॥
कर्णिकातो नयेदूर्द्ध्वं पत्राकाराच्चरावलीम् ।

कर्णिकाया आद्यौ नकारौ याह्यस्ततः शेति पर्णमध्ये शौति पर्णाग्रे पराङ्मुख्य-पर्णकर्णिकयोः शकारनकारौ पुनः कर्णिकातो दलाग्रगमागमेऽपि । अयमेव क्रमश्चतुर्दलपद्मे ॥ ३८७ ॥

सासवेत्यादि । सासवा आस्वादितमदिरा । पीवरेण स्तनाढ्येन उरसा नता । सारधामा उत्कृष्टकान्तिः सहसा सहास्या अकस्माद् वा शृङ्गारोद्दीपन-स्वभावेन मार्गशीर्षेण हेतुना शोभनेन वाससा च खचिता हे साहसर्द्धसर्वनिशी-

प्रवेशयेत् कर्णिकायां पद्ममेतत् चतुर्दलम् ॥ ३८८ ॥

चतुष्पत्रकमलबन्धः ।

षोडशपत्रं यथा,

नमस्ते महिमप्रेम नमस्यामतिमद्दम ।
क्षामसोम नमत्काम धामभीम समक्षम ॥
गोमूत्रिकाक्रमेण स्युर्वर्णाः सर्वे समाः समाः ।
मध्ये मवर्णविन्यासात् पद्मोऽयं षोड़शच्छदः ॥ ३८९ ॥

आभिसरणसाहसरसिक त्वामेति उपगच्छतीति । न्यासमाह । कर्णिकेति । सुबोधमेतदिति ॥ ३८८ ॥

षोडशपत्रमाह ॥ नमस्त इत्यादि । महिमनि प्रेमा यस्य तं नमस्य अमतिं-मतो दाम्यतीति अमतिमद्दम । क्षामः कलामात्रेण चूड़ासङ्गतः सोमो यस्य । नमन्भग्नः कामो यस्मात् । धाम्ना तेजसा भीम भयानक समा सकलव्युत्थानहेतु-साधारणी क्षमा यस्य अस्मै तानि सम्बोधनविशेषणानि ते तुभ्यं नमस्कुरुते कश्चि-दिति । न्यासमाह । गोमूत्रिकेति । वर्णा मकारव्यतिरिक्ताः समाः मकार-सहिताः समाः समा इति वीप्सा प्रतिवर्णं मकारसाहित्यबोधनार्था ॥ ३८९ ॥

षोड़शपत्रकमलबन्धः ।

अष्टपत्रमेव कविनामाङ्कं यथा,

रातावद्याधिराज्या विसररसविद् व्याजवाक् क्ष्मापकारा
राका पक्ष्माभशेषा नयननयनस्वा खया स्तव्यमारा ।
रामा व्यस्तस्थिरत्वा तुहिननर्नहितुः श्रीः करक्षारधारा
राधा रक्षास्तु मह्यं शिवममभवशिव्याखविद्यावतारा ॥

अष्टपत्रमेव कविनामाङ्कमाह । रातावद्येति । गौर्वाणसुभटः कश्चित् युयुत्सुर्दैत्यसेनया । तत्कालकृतसान्निध्यां मायादेवीपूजयत् । तथाहि । व्याज़ो माया सैव वायूपाव्याजशब्दोपपदं वागभिधानं यस्याः सा मह्यं रक्षा-स्विति सम्बन्धः । रातं दत्तमवद्यं दोषबहुलमाधिराज्यमवद्या आधयो यत्र तादृशं वा राज्यं यया विशिष्टं सरणं विसरस्तं राति प्रयच्छति यो रसोऽर्थाद्वीरस्तं वेत्ति विन्दति वा या क्ष्मायां पृथिव्यामपकारः पुत्रकलत्रादिरूपो यस्याः सकाशादिति

निविष्टाष्टदलन्यासमिदं पादार्द्धभक्तिभिः ।
अस्पृष्टकर्णिकं कोणैः कविनामाङ्कमम्बुजम् ॥
तत्राङ्को राजशेखरकमलः । एतेन चक्रमपि व्याख्यातम् ॥३९०॥

अष्टदलकमलबन्धः ।



गमकत्वात् बहुव्रीहिः । राका पूर्णिमा द्वादशवर्षदेशीयकन्यारूपा वा । पद्माभः शरीरसंलग्नः शेषः सर्पो यस्या नयनन्नीति स्वान्नयतीति यं नयनं दृष्टिर्ज्ञानमिति यावत् । तदेव स्वमात्मा यस्याः खे व्योम्नि यातीति खया सव्यो मारो मारणं कामो वा यस्याः सा रामा रमणीया स्त्रीरूपा वा व्यसं विनाशितं स्थिरत्वं यया तुहि-

चक्रं यथा,

स त्वं मानविशिष्टमाजिरभसादालम्ब्य भव्यः पुरो
लब्धावक्षयशुद्धिरुद्धुरतरश्रीवत्सभूमिर्मुदा।
मुक्त्वा काममपास्तभीः परमृगव्याधः स नादं हरे-
रेकौघैः समकालमभ्रमुदयौ रोपैस्तदा तस्तरे॥
पुरः पुरो लिखेत् पादानत्र त्रीन् षड्रीकृतान्।
तुर्य्यन्तु भ्रमयेन्नेमौ नामाङ्कश्चक्रसंविधिः॥

अत्राङ्कः माघकाव्यमिदं शिशुपालवधः॥ २९१॥

नं नयति प्रापयतीति नयतेर्डप्रत्यये तुहिनः चन्द्रः तस्य नहिर्तुर्जटाजूटे बन्धयितुः परमेश्वरस्य श्रीः शक्तिरूपा न हि अतिबध्नातीति नहेर्विचिनहं स्तुतिमासादयतीति सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इति क्विपि ढजन्तस्य रूपम्। कं सुखं राति ददातीति करः तस्य चारभूता दस्यवस्तेषां खड्गादिधारेव धाराच्छेत्री राधेति देव्याः पौराणिकं नाम समेति अव्ययं भावप्रधानं शिवे समं त्वं सान्ति परिच्छिन्दन्ति ये वशिनो योगिनस्तेषामपि व्यालविद्या क्षुद्रविद्यामवतारयति या सा तथा। न्यासमाह। निविष्टेति॥ अष्टभिः पादार्द्धैरष्टदलविरचना। यद्वर्णाष्टकं नाम्ना उत्तिष्ठति तदाह। राजशेखरकमल। कविकाव्यनामलाभात् अविभक्तिकत्वमपि अदोषः। एतेनेति। नामाङ्कपद्मकथनेन चक्रमपि नामाङ्कमवसेयम्॥ ३९०॥

स त्वमित्यादि। हरेर्नादं सिंहनादं रोपैर्वाणैः आजिरभसात् संग्रामहर्षादुद्धुरतरश्रीवत्सभूमिः उन्नतहृदयः सत्वमालम्ब्यमानेन विशिष्टमिति तद्विशेषणम्। प्राप्तपापविनाशो मुदा हर्षेण अपगतभीः शत्रुर्हरिणव्याधोऽसमाकाशं पिदधे तदा तस्मिन् काले सिंहनादं मुक्त्वा इति सम्बन्धः। न्यासमाह॥ पुर इति। पुरः पुरो लिखित्वाऽन्यानग्रे लिखेद्यथा षड्राः सम्पद्यन्ते॥ ३९१॥

षड्रचक्रबन्धः ।



एवं चतुरङ्गमपि यथा,

शुद्धं बद्धसुराखिसारविषमत्वग्रुग्जयातिस्थिर
भ्रष्टोद्धर्मरजः पदं गवि गवा चीणेन चञ्चद्भ्रुवा ।

यथा वा शुद्धमित्यादिचक्रं मे मम गवि वाचि शुद्धमकलुषं धर्मादुत्क्रान्त-मुद्धर्ममीदृशं यद्रजो राजसभावः तस्य पदं स्थानं तद्भ्रष्टं विनष्टं यस्मादस्माविधि-दिग्दैवपारतन्त्र्यं यत्र तथाविधं शुचा शोकेन च न वक्रीकृतमनपहृतम् अदभ्रमुप-

सत्यं चिन्तितगुप्तिरस्तविधिदिग् भेदं न चक्रं शुचा
चारोऽप्रांशुरदभ्रसुग्रतनु मे रम्यो भवानीरुचा ॥
अत्राङ्कः शुभ्रतरवाचा बद्धचितिचक्रं राजगुरुणेदं सादर-
मवादि ॥ ३८२ ॥

द्वितीयषड़रचक्रबन्धः ।



---

*चितं यद्वद्रं कल्याणं तत्तनु विस्तारयेति प्रार्थना । बद्धैरलङ्कारीकृतैः सुराणां ब्रह्मादीनां सारं शिरस्तदस्थिभिर्बद्धमुण्डमालाभिर्भयानकं । रुजां रोगाणां

गतिचित्रेषु गतप्रत्यागतं यथा,

वारणागगभीरा सा साराभीगगणारवा ।
कारितारिवधा सेना नासेधावरितारिका ॥

अत्रायुक्पादयोर्गतिर्युक्पादयोः प्रत्यागतिः ॥ ३९३ ॥

तदक्षरगतं यथा,

निशितासिरतोऽभीकोन्येजतेऽमरणा रुचा ।
चारुणा रमते जन्ये कोभीतो रसिताशिनि ॥

अत्र गत प्रत्यागगताभ्यां स एव श्लोकः ॥ ३९४ ॥

जयेनातिस्थिर । अचीरेण उपचितेन चञ्चदम्बुना साह्लादेन गवा वृषेण लक्षित । लक्ष्यमिति क्रियाविशेषणम् । चिन्तिता गुप्तिर्भूतानां रक्षा येन । चारीरमणीयः । उग्री महादेवस्वमप्रांशुः सर्वस्मात् उच्चैः परे स्थितो भवानीरुचा वामार्द्धस्थित-पार्वतीकान्त्या रमस्वन्निति सम्बन्धः । अत्र पूर्ववदेव न्यासः । अङ्कास्तु चत्वार इति विशेषः ॥ ३९२ ॥

इदानीं गतिचित्रप्रस्तावः । वारणेत्यादि । वारणा एव अगाः पर्वताः तैः गभीरा दुरवगाहा सारा श्रेष्ठा भियं येन यान्ति तादृशाना गणानामारवो यत्र । सारी वाभीगगणारवो यत्र । कारितः कृतो रीषा वधो यया । स्वार्थे णिच् । आसेधः परैः प्रतिषेधस्तेन हीना । वरिता सुभटैर्युद्धार्थमाहूता चरयो यस्यां सा तथा । वर ईप्सायामिति धातोः क्तप्रत्यये वरितेति रूपसिद्धिः । अत्र अयुक्पादयोः प्रथमतृतीययोः आनुलोम्येन वर्णावलीं गृहीत्वा तत्प्रतिलोमरूपौ युक्पादौ द्वितीयचतुर्थौ गृह्येते । पठितवर्णाद्वर्णान्तरसञ्चारी गतिस्तन्नियमनेन चित्रं गतिचित्रं स चात्र यथोक्तरूप एव ॥ ३९३ ॥

हे अमरणा मरणरहिता निशितखड्गरतो भयशून्यस्य रुचा तेजसा न्येजते न कम्पते । यो हि भीतः स कथं शब्दायमानाशनशीलरक्षः पिशाचादिसङ्कुले जन्ये संग्रामे दारुणाकारतुरगादिना रमते न कथञ्चिदित्यर्थः । अत्र सन्दर्भसमाप्तिपर्यन्तं या वर्णमाला गृहीता सैव समाप्तेः आरभ्य प्रत्यागत्या यावदारम्भं समाप्यत इति पूर्वम् अङ्केन एवमिति ॥ ३९४ ॥

श्लोकान्तरम्। यथा,

वाहनाऽजनि मानासे साराजावनमा ततः।
मत्तसारगराजेभे भारीहावज्जनध्वनि॥

अत्र प्रातिलोम्येनापरः श्लोको भवति यथा,

निध्वनज्जवहारीभा भेजे रागरसात्तमः।
ततमानवजारासा सेना मानिजनाहवा॥ ३९५॥

भाषान्तरगतं यथा,

इह रे बहला लासे बाला राहुमलीमसा।
सालका रसलीला सा तुङ्गालालि कलारत॥

अत्र प्रातिलोम्येनापरः प्राकृतश्लोको भवति॥ यथा,

तरला कलिला गातुं सालाली सरकालसा।
सामली महुरालावा सेलाला हव रेहइ॥ ३९६॥

वाहनेति। ततः अनन्तरं वाहना सेना अनमा नतिशून्या अजनि जाता। साराजौ उत्कृष्टसंग्रामे परमानासे परमानन्दपके मत्ताः सारगाः सीत्कर्षगतिशालिनो राजेभा राजदन्तिनो यत्र। भारिणः स्वामिना अर्पितसमरभराः। अतएव यथोचितचेष्टावन्तः तेषां जनानां ध्वनिः सिंहनादो यत्रेति क्रियाविशेषणमित्यनुलोमश्लोकार्थः। निध्वनन्तः स्वनन्तो जवेन वेगेन हारिण इभा यत्र। ततो विस्तीर्णो मानवजारासः सैनिकजन आरावः कोलाहलो यत्र। मानिजनानां साहङ्काराणां वीराणामाहवो द्वन्द्वयुद्धं यत्र। ईदृशी सेना रागरसात् परलक्ष्मीहरणरसेन तमो भेजे क्रोधमवापेति प्रतिलोमश्लोकार्थः॥ ३९५॥

इह रे इत्यादि। लासे नृत्ये बहला असङ्कुचिता राहुमलीमसा श्यामा सालका भूकर्णादिपरभागार्पकचूर्णकुन्तलवती रसाच्छृङ्गाराल्लीला यस्याः सा तथा तुङ्गा उच्चव्यवहारा एवंविधा सा बाला हे चतुःषष्टिकलारत अलालिलालिता लयेति संस्कृतश्लोकार्थः। कला गीतवाद्यनृत्यानां सङ्करीसहिता करणपटीयसी गातुं तरला त्वरिता सालाली नानावृक्षपङ्क्तिः तदीयेन सरकेण मधुना चलसा। श्यामा मधुरालापा सेला उत्तमा नारी "सेला स्यादुत्तमा नारीति देशीकोशे" इह

तदर्थानुगतं यथा,

विदिते दिवि केऽनीके तं यान्तं निजिताजिनि ॥
विगदं गवि रोद्धारो योद्धा यो नतिमेति न ॥

अत्र प्रातिलोम्येन स एव पदार्थः ॥ ३९७ ॥

तुरङ्गपदं यथा,

बाला सुकालबाला सा कान्तिलालकलालिता ॥
सखा सुतवतो सारा दर्पिका व्रतगर्हित ॥
क्रमात् पादचतुष्केऽस्य षड्भिः परिलेखिते ॥
तुरङ्गपदपातेन श्लोकोऽन्य उपजायते ॥

यथा,

बाला ललिततीव्रस्रा सुकला रागतर्पिका ।
सुदन्तिका वर्द्धिता वा सा कालातललासका ॥ ३९८ ॥

इरया मदिरया वर्त्तते सेला वारलधीरैकलक्ष्मरणादिति केचित् । तच्चिन्त्यम् । अलाभूषयिली । इवधवेति सम्बोधनम् । रेहइ राजते प्राकृतश्लोकार्थः । एवं भाषान्तराणामपि मतप्रत्यागती बोद्धव्ये ॥ ३९६ ॥

विदित इत्यादि । विदिते स्वर्वासिनामपि प्रसिद्धे निजिताः परेषामाजयो युद्धानि येन तादृशि अनीके समरे प्राप्तं गवि पराङ्मुखरूपाया वाचि विगदं हृदयज्वररहितं के नाम भटा योद्धारो न केऽपि सन्तीत्यर्थः । तद्धं यो योद्धा सन् कथमपि नतिं नम्रतां न एति न याति । अत्र तदर्थक एव प्रतिलोमश्लोकः । स यथा । नति मेति न योद्धा यो रोद्धारो विगदं गवि । निजिताजिनि यातं केऽनीके विदिते दिवि ॥ ३९७ ॥

बालेत्यादि । बाला षोडशवर्षदेशीया शोभनकृष्णकेशी कान्तिप्रदचूर्णकुन्तलशोभिता सखा आत्मसम्पद्युक्ता सुतवती पुत्रयुक्ता उत्कृष्टाभिमानात्मकशृङ्गारवती अभिलषितस्वविवाहादिव्रताकाङ्क्षा अतः तं भजस्वेति हृदये इति शेषः । न्यासमाह । क्रमादिति । ललितो मनोज्ञस्तीव्रः प्रवीणः स्र आत्मा यस्याः रागेण प्रेम्णा तर्पयति या शोभनदन्तयुक्ता वर्द्धितावासा सम्पूर्णीकृतसकलस्थाना कालो-

तुरङ्गपदबन्धः।

या१	ला३०	सु ९	का२०	ल३	वा२४	ला११	का२६
का१६	त्ति१९	ला२	ल२९	क१०	ला२७	ति४	ता२३
स३१	खा८	सु१७	त१४	व२१	ती ६	सा२५	रा१२
द१८	र्पि१५	का३२	व्र ७	त२८	ग १३	र्द्धि२३	त५

आहुरर्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि।
तदिष्टं सर्वतो भद्रं सर्वतो भ्रमणं यदि॥

तयोरर्द्धभ्रमं यथा,

समत्वरतिदे नित्यं सदरामर्षनाशिनि।
त्वराधिककसंनादे रमकत्वमकर्षति॥ ३९९॥

सर्वतोभद्रं यथा,

देवाकानिनि कावादे वाहिकाखखकाहि वा।
काकारिभभरे काका निखभव्यव्यभखनि॥ ४००॥

कृषाव्याहारखेन सह वर्त्तते या तखेलासका नर्त्तका यस्याः सा तथाभूता अधः-कृतसकलनर्त्तकलीकेत्यर्थः। एवम्भूता सा बाला त्वया उपभुक्तेति वाक्यार्थः॥३९८॥

स सत्वेति। सदराः सभयास्त्वराधिकानाङ्कसन् इतस्ततः सञ्चरन् नादो यत्र अतएव वीरान् प्रतिरमकत्वमकर्षति॥ ३९९॥

कनी दीप्तौ। देवानाकनितुं शीलं यस्य ईषद्वादी यत्र कस्य मस्तकस्य सन्ना सङ्गता आदौग्रहणं यत्रेति वा वाहिका पर्य्यायवहनम्। पर्य्यायार्हणो-त्पत्तिषु इति खुच्। सैव ख वित्तभूता येषामेवंविधा ये खका आत्मपत्नीयास्तानाञ्जिहीते इति विच्। कं मदजलमाकिरति इति काकारस्तादृश इभभरो हास्तिकं यत्र हेऽकाकाः सात्विका इति सम्बोधनम्। काकाः संग्रामलोलुपा वा क्वचित् कर्त्तर्यपि घञ्। निःखा निरात्मानो भव्या आभेयगुणास्तानपि व्ययन्ति स्खल-

बन्धचक्रेषु द्वितुचष्कचक्रबन्धो यथा,

जय देव नरेन्द्रादे लम्बोदर विनायक ।
जगदेधनचन्द्राभालङ्घिदन्त विभायते ॥

इह शिखरसन्धिमालां बिभृयादर्द्धं समाश्रितैर्वर्णैः ।
द्विचतुष्कं चक्रबन्धे नेमिविधौ चापरं भ्रमयेत् ॥ ४०१ ॥

द्विचतुष्कचक्रबन्धः ।

लेन उपबृंहयन्ति ये ते निखभव्यासेषां भखनि भर्त्सनशीले "भसभर्त्सने" इत्यतः क्तनिप् ॥ ४००॥

जयद इत्यादि । न ता इन्द्रादयो यस्मै स तथा जगता मेघनवर्द्धनचन्द्राभालङ्घिनीचन्द्रकान्तिविजयिनी दन्तप्रभाणामायतिः यस्य स तथा । व्यासमाह । इहेति । शिखरमालां सन्धिमालां च पूर्वार्द्धवर्णैः क्रमेण बिभृयात्पूरयेत् । नेमिविधौ चाऽपरमुत्तरार्द्धं भ्रमयेत् । इ ष्ट्वाटके मिथो वैपरीत्येन यत्र शिखरं द्विश्वाटकम् ॥ ४०१ ॥

द्विशृङ्गाटकबन्धो यथा,

करासञ्जवशे शङ्खगौरवस्य कलारसम्।
सन्धाय वलयांशङ्खामगौरीं मे वनात्मक॥
शृङ्गाद् ग्रन्थिं पुनः शृङ्गं ग्रन्थेः शृङ्गं व्रजेदिति।
द्विशृङ्गाटकबन्धेऽस्मिन्नेमिः शेषाक्षरैर्भवेत्॥

अत्राङ्को राजशेखरस्य॥ ४०२॥

द्विशृङ्गाटकचक्रबन्धः।

करैः किरणैः आसञ्जयतीति करासञ्जः खे व्योम्नि गौरवं यस्य स तथा वनात्मकजलस्वरूपचन्द्रकलासुरसमनुरागं सन्धाय कृत्वा अन्तःस्वच्छतया दृश्यनभो भागनेमिमहलयाकारोल्लेखिनीं मे मम अगौरीं श्यामा शङ्खामपनय। स्य इति क्रियापदम्। पूर्णो भवेति यावत्। वशेशम् आयत्तशङ्करमिति क्रियाविशेषणम्। न्यासमाह। शृङ्गादिति। शेषाक्षरैरिति। आद्यात्ककारादारभ्य यावत्समाप्ति-शेषाणि अक्षराणि तैर्नेमिरिति न्यासः। अत्र ग्रन्थिवर्णैरेव राजशेखरस्य इति नामाङ्कवर्णावली लभ्यते॥ ४०२॥

विविडितबन्धो यथा,

सा सती जयतादत्र सरन्ती यमितात्रसा ।
सारं परं स च जयी शमिताऽस्यन्दनेनसा ॥
शिखरादन्यतमात् वै प्रतिपर्वं भ्रमति रेखयाद्यर्द्धम् ।
नेमौ तदितरमर्द्धं विविड़ितचक्राभिधं बन्धे ॥ ४०३ ॥

विविड़ितचक्रबन्धः ।

विविड़ितबन्धस्तु पञ्चशृङ्गचक्रम् । तद्देवताम्नाये दर्शितम् । कर्पूरकुन्दगौरीं तनुमतनुकार्मुकभूकाम् । वरदानसुन्दरकरां विविड़ितचक्रस्थिता वन्दे । सेति । प्रसिद्धानुभावा सती गौरी सरन्ती निरर्गलप्रसरा न त्रस्यति इति अत्रसा अस्यन्दनेन स्थिरेण एनसा कल्मषेण शमिता विक्लवीभूता रहितेति यावत् । शमवैक्लव्ये । अत्र जगति परं सारं यं भगवन्तमिता सङ्गता । स च जयी महेश्वरो जयतादिति । न्यासमाह । शिखरादिति । अन्यतमाद्वा इति पाठः । अन्यतमस्मादिति पाठे तु सर्वनाभत्वं चिन्त्यम् । केचित्तु किं यत्तदेकान्येभ्य इति पठित्वा उतमहारिकां सर्वनामतामाहुः । गणे चान्यतरशब्दं न पठन्ति । अव्युत्पत्तिमात्रं चेदमनिर्द्धारितैकाभिधायकः तु अन्यतमशब्दः ॥ ४०३ ॥

शरयन्त्रबन्धो यथा,

नमस्ते जगतां गात्र सदानवकुलक्षय।
समस्तेऽज सतां नात्र मुदामवन लक्षय॥

चतुर्ष्वपि च पादेषु पङ्क्तिशो लिखितेष्विह।
आदेरादेस्तु रङ्गस्य पादैः पादः समाप्यते॥ ४०४॥

शरयन्त्रबन्धः।

न	म	स्ते	ज	ग	तां	गा	त्र
स	दा	न	व	कु	ल	क्ष	य
स	म	स्ते	ज	स	तां	ना	त्र
मु	दा	म	व	न	ल	क्ष	य

व्योमबन्धो यथा,

कमलावलिहारिविकासविशेषवहं जनकाङ्क
ननगामिकरं दिविसारमनारमणं जरतां न।

नमस्त इत्यादि। जगतां नाम रूपप्रपञ्चस्य गात्रभूतदानवकुलक्षयेण सहित-मुदां हर्षाणां रक्षक अजविष्णो अत्र जगति सतां मध्ये न कोऽपि ते तव समस्तो लक्षय दृक्पातेन अनुगृहाण मामितिशेषः। व्यासमाह। चतुर्षु अपीति। शेषं सुबोधम्॥ ४०४॥

कमलावलिषु पद्मखण्डेषु प्रश्लेषु हारी मनोज्ञो यो विकाशस्तस्य वीटारं जनैर्लोकैस्तुत्यं तदीयङ्कं शिरस्तनाङ्कचिह्नभूतनगगामि करं किन्तु विस्तरकिरण-

तमसां बलहानिविलासवशेन वरं जनकान्त
न नमामि चिरं सवितारमनादिमहं जगतां न ॥
अष्टादशशिखरचरीं गोमूत्रिकया चतुष्पदीं पश्येत् ।
यत्राद्यन्तैर्दृष्टां स ज्ञेयो व्योमबन्ध इति ॥ ४०५ ॥

व्योमबन्धः ।



मेव दिवि वैमानिकपथे सारभूतं जरतां परिणतानामनारमणं न किन्तु प्रीतिकरमेव तमसां बलहानौ यो विलासवशः सन्ततो व्यापारस्तेन वरमुत्कृष्टं जन-

सुरजबन्धो यथा,

सा सेना गमनारम्भे रसेनासौदनारता।
तारनादजना मत्तधीरनागमनामया॥
अत्र पादचतुष्केऽपि क्रमशः परिलेखिते।
श्लोकपादक्रमेण स्याद्रेखासु सुरजत्रयौ॥ ४०६॥

सुरजबन्धः।



कान्तलोकहृदयङ्गमभगतामनादिं न किन्तु आदिमेव एवंविधं भगवन्तं सवितारमहं न नमामि किन्तु नमाम्येव। न्यासमाह। अष्टादशेति। आद्यन्तेष्टेष्टामिति। पादाद्यन्तवर्णयोरैक्यादिति बोध्यम्॥ ४०५॥

अनारता अविच्छिन्नप्रहरणव्यापारा आसीत्। मत्तधीरनागमिति क्रियाविशेषणम्। रसेन वीरेण। महाप्राणशब्दजना। अत्र न्यासमाह। अत्र पादेति। अत्र पुटचतुष्कल्पनया सुरजत्रयोन्मेषः॥ ४०६॥

एकाक्षरसुरजबन्धो यथा,

सुरानन त्वां न न हाननष्टये पुनः स्तुवेऽनर्घधनप्लवाननम् ।
मनस्यनूनप्रधनप्रधूननं सकाननस्थाननदीननर्दनम् ॥
श्लोकस्यैतस्य पादेषु लिखितेषु चतुर्ष्वपि ।
विस्मदङ्करीह स्याच्चतुरेकाक्षरावली ॥ ४०७ ॥

एकाक्षरसुरजबन्धः ।



सुराणां देवानामाननं मुखं तद्भूतवक्त्रे । हाननष्टये हानिनाशायत्वात् न न स्तुवे । किन्तु स्तौम्येव । पुनरिति देवतान्तरव्याहृत्तौ स्तुत्याहृत्तौ वा । अनर्घे धनौघप्राणने यस्मात् । अनप्राणन इति धात्वनुसारात् । प्रणतानां मनसि यदूनमनादिभवपरम्परानुपाति प्रधनं व्यसनं तस्य धूननं प्रतिक्षेपकं स काननेषु वनगहनेषु स्थानेषु नदीनस्य पयोराशेरिव नर्दनं कोलाहलो यस्येति । व्याससमाहः । श्लोकस्य एतस्येति । प्रथमपादस्यादक्षरादारभ्य चतुर्थपादस्यमक्षरं

मुरजप्रस्तारो यथा,

तालसारप्रभा राका तारकापतिदंसिता ।
मारधामा रमाधौता वलयामास सागरम् ॥
क्रमेणैवास्य पादेषु प्रसृतेषु चतुर्ष्वपि ।
तुर्य्यान् मुरजमार्गेण श्लोकोऽयमुपजायते ॥
वरकारप्रदं धीरं तारधामाऽसमासिका ।
सा लतामालयाऽमाऽप ताराभाऽतिरसागता ॥ ४०८ ॥

मुरजप्रस्तारः ।



यावदेकजातीयाक्षरचतुष्कावलीं गृहीत्वा परावृत्य तज्जातीयानामेव चतुष्टयी गृह्यते । तेनैकमुरजोन्मुद्रणामपरत्रापि अनेनैव प्रकारेणाक्षोऽदाहरणे एकाक्षरमुरजत्रयी भवतीति न्यासार्थः ॥ ४०७ ॥

तालतरीर्यत्सारं खाद्यभागः तत्प्रभेव अवदाता प्रभा यस्याः । राका पूर्णिमा-तारकापतिना चन्द्रेण दंसिता कवलिता । मारस्य कामस्य धाम स्थानं यत्र ।

उदाहरणमात्रञ्चैतत्। तेन गतिचित्रादिगोमूत्रिकादयोऽन्येऽपि चित्रप्रकारा भवन्ति॥

गतिरुच्चावचा यत्र मार्गे सूत्रस्य गोरिव।
गोमूत्रिकेति तत् प्राहुर्दुष्करं चित्रवेदिनः॥

तेषु पादे गोमूत्रिका यथा,

काङ्क्षन् पुलोमतनयास्तनताडितानि
वक्षःस्थलोच्छ्रितरयाञ्चनपीड़ितानि।
पायादपायभयतो नमुचिप्रहारी
मायामपास्य भवतोऽम्बुमुचां प्रसारी॥

सेयमयुग्मतः पादगोमूत्रिका॥ ४०९॥

रमया लक्ष्म्या अधीताऽभ्यस्ता सलक्ष्मीकेत्यर्थः। बलयामास चालितवती। बलवन्तं वा चकार। विन्मती लृगित्यनुशासनात्। क्रमेणैवेति। तुर्याच्च पादप्रथमाच्चरात् उपक्रमे येन येन मार्गेण सुरजाक्रतिर्लभ्यते। तेनायमपरः श्लोको भवति। वरस्य ईप्सितस्य वस्तुनः कारः कारणं तत्प्रदं तारं दीप्तं धाम कान्तिः यस्याः। असमा अनन्यसाधारणी आसिका स्थितिर्यस्याः सा नायिका लतामालया सङ्केतलतामण्डपेन असमाङ्गे आप प्राप्तवती। तारा रोहिणीप्रभृतिस्तदात्मा। तारैर्निर्मलमौक्तिकैर्वा भाति या। अतिशयितेन रसेन पूर्णा उपगता सङ्गता। प्रकृतोदाहरणेऽष्टाक्षरप्रस्तावान्तःपाती यः प्रकारस्तदन्तःपाती सुरजाक्षरैर्लभ्यते॥ ४०८॥

ननु यावत् उदाहृतमेव किं गत्यादिचित्रं तथा सति किं गोमूत्रिकादीनां पृथग्भागविभागव्याघातः स्यादित्यत आह। उदाहरणमात्रं चैतदिति। गतिः पठिति सञ्चारो वर्णानामुच्चावचं वा ऊर्ध्वाधःपर्यायेण प्रवृत्ता। मायां संसारबन्धमपास्य दुःखभयात्पायादिति सम्बन्धः। न्यासो यथा। अयुग्मतः प्रथमात् तृतीयाच्च उपक्रम्य द्वितीयचतुर्थपादसन्दंशेन गोमूत्रिकया प्रथमद्वितीययोस्तृतीयचतुर्थयोश्च परस्परसुन्देषणमितीयमयुक्पादगोमूत्रिका॥ ४०९॥

पादगोमूत्रिकाबन्धः।



युग्मतो यथा,

देवः शशाङ्कशकलाभरणः पिनाकी
देयः शमैकविकलेभरणः सनागः।
चित्ते महासुरजनेन शुभं विधत्तां
चित्तं महासुरजनानतभङ्गधन्वा ॥ ४१० ॥

अर्द्धश्लोकगोमूत्रिका यथा,

चूड़ाप्रोतेन्दुभागद्युतिदलिततमस्कन्दलीचक्रबालो
देवो देयादुदारं शममरजनतानन्दनोऽनन्यधामा।
क्रीड़ाधूतेशभामा द्युसदनतनिमच्छेदनौ च भ्रुवा नो
देहे देवौ दुरीरं दममरतनतानन्दिनोमान्यधामा ॥ ४११ ॥

महासुरजनेन ब्रह्मादिना चित्ते देवौ धारणीयः शमनैकेन विकलीकृत इभरणो गजासुरयुद्धं येन शुभं कल्यपरहितं विधत्तामविशेषेण संसारिणामेव। अत्र पूर्ववत्समपदम् उपक्रम्य विषमपादसन्दर्शन समाप्तिरिति विशेषः तेनैव युक्पादगोमूत्रिका ॥ ४१० ॥

इन्दोर्भागः खण्डं शं कल्याणम् अमरजनता देवसमूहो नास्ति अन्यद्धाम स्थान यस्य सोऽनन्यधामा। स्वात्माराम इत्यर्थः न परं देवौ देवौ च। भ्रुवा भ्रूक्षेपेण दुरीरं दुरपनयं नोऽस्माकं देहे दम देयादिति सम्बन्धः॥ धूतेशभामाप्रणयेन अपहृतपरमेश्वरप्रणयरोषा। भामक्रीडे इति धात्वनुसारात्। द्युसदना देवाः। अरतमविश्रान्तम्। नन्दिना नता उमा गौरी अपूर्वं धाम तेजो यस्याः ॥ ४११ ॥

श्लोकगोमूत्रिकायां प्रथमश्लोको यथा,

पायाद्वश्चन्द्रधारी सकलसुरशिरोलीढपादारविन्दो
देव्या रुद्धाङ्गभागः पुरदनुजदवः स्थानसंविन्निधानम्।
कन्दर्पक्षोददक्षः सरमसुरबधूमण्डलीगीतगर्वो
दैत्याधीशान्धकेनानतचरणनखः शङ्करो भव्यभाव्यः॥ ४१२॥

द्वितीयो यथा,

देयान्नश्चण्डधामा सलिलहरकरो रूढकन्दारविन्दो
देहे रुग्भङ्गरागः सुरमनुजदमत्यागसम्पन्निधानम्।
मन्दं दिक् क्षोभदश्रीः मदमदरबधूखण्डनागीरगम्यो-
ऽदैत्ये धौवन्धहानावततरयनयः शंपरो दिव्यसेव्यः॥४१३॥

विपरीतगोमूत्रिकायां प्रथमः श्लोको यथा,

विनायकं दानसुगन्धिवक्त्रं स्मिताननं मन्दचरं कथासु।
नमामि विघ्नावलिहारिसारं मतीसुतं शङ्करवल्लभं च॥

विपरीतश्लोको यथा,

चलन्मतालव्यशमं सुभालं संसारहारं बहुविप्रमान्यम्।
सुधाकरं चन्द्रसमं नतोऽस्मि सवर्णगर्भं नवकाव्यनाथम्॥४१४॥

परास्यदानवस्य दर्वी दावाग्निः स्थानायाः घनायाः सविदो निदानम्। दैत्याधीशेन अन्धकेन आनतचरणो भव्यानामुत्तमानां भाव्यो ध्येयः॥ ४१२॥

रूढकन्दानि अरविन्दानि यस्मात् प्रणतानां रुगनुरागो यस्य सुराणां मनुजानां च दमस्मूलान् दमतीति वा। त्यागसम्पदो निधानमाश्रयो दिशां क्षोभदायिका श्रीः यस्य सदे उपवने सदरा सभया या वधूः तदीयानां खण्डनगिरां निर्भर्त्सनवचसामविषयः। अदैत्ये हीनदैत्ये धौवन्धहानाय संसारबन्धविच्छित्तये विस्तीर्णरयो नयो यस्य शं सुखं पिपर्त्ति पूरयतीति शम्परो दिव्यः सेव्यश्चेति एवंविधः चण्डधामा रविर्नोऽस्माकं देहे भद्रं कल्याणं देयादित्यर्थः॥ ४१३॥

मन्दचरं मदालसगमनं कथासु भक्तदेवानां वार्त्तासु सहाशयतया स्मेराननम्। विघ्नपरम्पराहारिणाञ्च सारसुतकृष्टम्। चलन्तीनां लतानामारम्भ-

भिन्नच्छन्दोगोमूत्रिकायां प्रथमश्लोको यथा,

नमत चन्द्रकलामयमण्डनं नगसुताभुजसङ्गतकन्धरम् ।
हरमभाग्यरदं स्तवसादरं शमितरावणशासनविक्रमम् ॥

द्वितीयश्लोको यथा,

कामदं चण्डकस्त्रं मदामर्दिनं
नागदन्ताज्यजय्यं गदाकर्बुरम् ।
धीरशोभाभरव्यस्तकं मासुरं
नौमि नारायणख्याममं विभ्रमम् ॥ ४१५ ॥

संस्कृतप्राकृतगोमूत्रिकायां संस्कृतश्लोको यथा,

स्कन्दो रुन्दर्द्विमिष्टां वितरतु सरलो दारितारातिवर्गे
मस्यन्दोऽमन्दसज्जो भवभयकलने सङ्करे केलिकारी ।
सन्दोहोल्लाघलासी जन इह बलिहा चण्डताभूरखर्वो
देवीजोराजदोहे महिमनि निरतो विक्रमाड़म्बरेण ॥

सान्वनं येन बहुविप्रमान्यं द्विजराजशेखरत्वात् । समानवर्णमध्यगम् । नवेन कम्बुनाव्यसुपचितम् । आद्यश्लोकस्याधस्तादिपरीतो द्वितीयश्लोको लिख्य. । ततः क्रमगोमूत्रिकया परस्परोल्लेखः ॥ ४१४ ॥

अभाग्यस्य रद विलिखक नाशकमिति यावत् । कामदं वाञ्छितप्रदं चण्डमुग्र कस्त्रं कमनीयञ्च परेषा दर्पमर्दनशील नागस्य कालियाख्यस्य दंष्ट्राभिः कुवलयापीडाख्यस्य हस्तिनो वा विषाणाभ्या या आजिः सयामः तत्र अजय्यं जेतुमशक्यम् । गदया नानारत्नखचितया कर्बुरं चित्रमिति यावत् । स्कन्दः कार्त्तिकेयः । रुन्दां विपुलां दारिते शत्रुसमूहे सस्यन्दः स्फुरद्रूपो मन्दः स्वस्थचित्तः भवभयस्य ससारत्रासस्य कलने चेपण इह जने मर्त्यलोके सन्दोहेन य उल्लाघः सामर्थ्यम् । नीरोगत्वात् तेन लसनं शीलः बलिनां हन्ता । चण्डतायाः तैक्ष्ण्यस्य भूराशयोऽखर्वः सर्वेषामुपरिवर्त्तमानः देवीजसां राज्ञां खण्डयित्री ईहा चेष्टा यत्र तादृशे महिमनि निरतो विहरणे सञ्चरणे सफलः । उद्भूतः

प्राकृतश्लोको यथा,

चन्दो कन्दप्पमित्तं विहरणसहलो हारितारापबन्धो
सच्छन्दो वन्दणिज्जो कुवलयदलनो सङ्करे मेलिकारी।
कन्दोट्टोल्लासलासी जअइ सिवसिहामण्डलीभूअखण्डो
देत्ता जोण्हा जलोहे विहिअणिअरई विब्भमाणं वलेण ॥

॥ ४१६ ॥ (व)

समसंस्कृतप्राकृतेन पादगोमूत्रिका यथा,

बाला विलासावलिहारिहासा लोलामला भावसहा सहावा।
देहं हरन्ती सरसा सुरामा गेहं चरन्ती सहसाभिरामा ॥

॥ ४१७ ॥

अर्द्धगोमूत्रिकाप्रस्तारो यथा,

नमो दिवसपूराय सुतामरसभासिने।
नतभव्यारिदाराय सुसारलयभाविने ॥

(व) चन्द्रः कन्दर्पमित्रं विहरणसफलो हारितारापबन्धः
स्वच्छन्दो वन्दनीयः कुवलयदलनः शङ्करे मेलिकारी।
कन्दोट्टोल्लासलासी जयति शिवशिखामण्डलीभूतखण्डः
दत्तज्योत्स्नाजलौघो विहितनिजरतिर्विभ्रमाणो बलेन ॥

शुभाशुभसूचकत्वात्। मेलिकारी सङ्गमकरी चूडामणित्वात्। ऐक्यकारी वा तन्मूर्त्तित्वात्। कन्दोदं कुमुदमिहाभिमतं तद्विकाशेन चलनशीलो ज्योत्स्ना जलौघान् ददत्। विभ्रमाणो बलेन विहितानिजे आत्मनि रतिर्येन स तथा। विलासावलिषु हारी विकाशी यस्याः लीला चला अमला निर्मला भावाननेकविधान् वा सहते सा भावसहा। हावः क्रीडाविशेषो दिवसान् पूरयतीति दिवसपूरा तस्मै सुष्ठु तामरसेषु भासनशीलाया। नता भव्या यस्मै अरीन्दारयतीति अरिदारः। ततः कर्मधारयः। नताना भव्यानामरिदारेति वा। नता भव्या अरिदारा यस्मिन्निति वा। सुष्ठु सारो लयः तत्र लयन तं भावयति यस्मै।

अत्र गोमूत्रिकाश्लोकोऽयमुत्तिष्ठति,

नतदिव्यासदाराय सुमामलसभामिने ।
नमो भवरिपूराय सुतारस्यभाविने ॥ ४१८ ॥

अर्द्धगोमूत्रिका बन्धः ।



गोमूत्रिकाधेनुर्यथा,

मम स्फुरतु चिद्गतः सततचिन्त्यरक्षा मतिः
समस्तरविचित्रितस्तुतरुचिः स्मरक्षेमकृत् ।
समर्द्धिरतचिन्तितः कृतविचित्ररत्यामयो
नमस्करणचिह्नितः स्मितरुचिर्हरः सामरः ॥
चतुर्णामपि पादानां क्रमेण व्युत्क्रमेण च ।
इयं गोमूत्रिकाधेनुर्वैपरीत्यवशेन च ॥ ४१९

नता दिव्या देवा यस्मै । असदविद्यमानमरिचक्रं यस्य । ततः कर्मधारयः शोभनाना सामां लसनेन भासनशीलाय भानि नक्षत्राण्यावरितुं शीलं यस्येति भवरि आकाशं पूरयति व्याप्नोति एवम्भूताय । सुष्ठुतार उच्छ्रितो यो रक्षो वेगो गमनं तेन भाविने ॥ १५—१८ ॥

प्रथम भेदः ।

म	स	स	न
म	म	म	म
स्फु	स्त	र्द्धि	स्क
र	र	र	र
तु	वि	त	ण
चि	चि	चि	चि
ङ्ग	वि	न्ति	ङ्गि
तः	त	तः	त
स	स्तु	क्त	स्मि
त	त	त	त
त	रु	वि	रु
चि	चिः	चि	चि
न्य	स्म	त्र	र्हं
र	र	र	रः
त्वा	त्वे	त्वा	सा
म	म	म	म
तिः	क्तत्	यो	रः

द्वितीय भेदः ।

१ नमस्फु	२ समस्त	३ समर्धि	४ नमस्क
२ समस्त	३ समर्धि	४ नमस्क	१ नमस्फु
३ समर्धि	४ नमस्क	१ नमस्फु	२ समस्त
१ नमस्फु	३ समर्द्धि	२ समस्त	४ नमस्क
१ नमस्फु	४ नमस्क	२ समस्त	३ समर्द्धि
२ समस्त	४ नमस्क	१ नमस्फु	३ समर्द्धि
४ नमस्क	३ समर्द्धि	२ समस्त	१ नमस्फु
३ समर्द्धि	२ समस्त	१ नमस्फु	४ नमस्क
२ समस्त	१ नमस्फु	४ नमस्क	३ समर्द्धि
४ नमस्क	२ समस्त	३ समर्द्धि	१ नमस्फु
४ नमस्क	१ नमस्फु	३ समर्द्धि	२ समस्त
३ समर्द्धि	१ नमस्फु	४ नमस्क	२ समस्त

नमस्फु	नमस्क	समस्त	समर्धि	पद्मिनी
नमस्क	समस्त	समर्धि	नमस्फु	
समस्त	समर्धि	नमस्फु	नमस्क	
समर्धि	नमस्फु	नमस्क	समस्त	

चतुर्थभेदः ।

नमस्फु	समस्त	समर्द्धि	नमस्क
समस्त	समर्द्धि	नमस्क	नमस्फु
समर्द्धि	नमस्क	नमस्फु	समस्त
नमस्क	नमस्फु	समस्त	समर्द्धि

पञ्चमभेदः ।

नमस्फु	समर्धि	समस्त	नमस्क
समर्धि	समस्त	नमस्क	नमस्फु
समस्त	नमस्क	नमस्फु	समर्धि
नमस्क	नमस्फु	समर्धि	समस्त

षष्ठभेदः ।

ममस्फु	नमस्क	समस्त	समर्धि
नमस्क	समस्त	समर्धि	ममस्फु
समस्त	समर्धि	ममस्फु	नमस्क
समर्धि	ममस्फु	नमस्क	समस्त

सप्तमभेदः ।

समस्त	समर्धि	ममस्फु	नमस्क
समर्धि	ममस्फु	नमस्क	समस्त
ममस्फु	नमस्क	समस्त	समर्धि
नमस्क	समस्त	समर्धि	ममस्फु

अष्टमभेदः ।

नमस्क	ममस्फु	समस्त	समर्धि
ममस्फु	समस्त	समर्धि	नमस्क
समस्त	समर्धि	नमस्क	ममस्फु
समर्धि	नमस्क	ममस्फु	समस्त

नवमभेदः ।

समर्धि	नमस्क	ममस्फु	समस्त
नमस्क	ममस्फु	समस्त	समर्धि
ममस्फु	समस्त	समर्धि	नमस्क
समस्त	समर्धि	नमस्क	ममस्फु

दशमभेदः ।

समर्धि	ममस्फु	समस्त	नमस्क
ममस्फु	समस्त	नमस्क	समर्धि
समस्त	नमस्क	समर्धि	ममस्फु
नमस्क	समर्धि	ममस्फु	समस्त

एकादशभेदः ।

ममस्कृ	समस्त	समर्धि	नमस्क	५
समस्त	समर्धि	नमस्क	ममस्कृ	६
समर्धि	नमस्क	ममस्कृ	समस्त	७
नमस्क	ममस्कृ	समस्त	समर्धि	८

१	२	३	४		२	१	३	४		१	२	४	३
२	३	४	१		३	२	४	१		२	३	१	४
३	४	१	२		४	३	१	२		३	४	२	१
१	३	२	४		३	१	२	४		१	३	४	२
१	४	२	३		४	१	२	४		१	४	३	२
२	४	१	३		४	२	१	३		२	४	३	१
४	३	२	१		३	४	२	१		४	३	१	२
३	२	१	४		२	३	१	४		३	२	४	१
२	१	४	३		१	२	४	३		२	१	३	४
४	२	३	१		२	४	३	१		४	२	१	३
४	१	३	२		१	४	३	२		४	१	२	३
३	१	४	२		१	३	४	२		३	१	१	४

१	१	१	२	२	२	३	३	३	४	४	४
२	३	४	३	४	१	४	१	२	१	२	३

म ति: स क्षत् स यो न र:

म

स्कृ च्च स्त चे द्धि त्या स्क सा

र

तु न्त्य वि ख्य तं व्र ण र्हं

चि

द्ध त त्रि रू न्ति वि द्धि रू

त:

स स्कृ क्ष ख्य

शतधेनुर्यथा,

वन्द्या देवी पर्वतपुत्री नित्यं मधु-
मधुरकमलवदना पुरन्ध्र्यधिदेवता

म क्रत् स रः न यो स तिः	स
म	स्फ
स्फु चे र्द्धि सा स्क त्या स्त चा	क्त
र	स्म
तु स्म त र्हं ण व्र वि न्य	तः
चि	ह्न रु न्ति क ङ्गि वि त्रि त
ह्न रु कि न्त ङ्गि वि त्रि त	चि
तः	तु स्म त र्हं ण व्र वि न्य
स्म	र
क्त	स्फु चे र्धि सा स्क त्या स्त चा
स्फ	म
स	म क्रत् स रः न यो स तिः

ममस्फुरत्विति । ममचिद्गती मदीयां संविदमारूढः सामरः स देवी हरः स्फुरतु । सततं चिन्तनीयरचायां मतिः सततं चिन्तनीये रचामती वा यस्य । समस्तैर्द्वादशभिरपि रविभिरादित्यैर्विचित्रिता आलेख्यीकृता स्तुता प्रशस्ता रुचिः कान्तिर्यस्य । स्मरस्य चेमं कुशलं क्रन्तति च्छिनत्तीति स्मरचेमक्रत् । समशब्दः सर्वपर्यायो गणे पठ्यते । सर्वासु अणिमादिकृद्धिषु रतैश्चिन्तितः प्रसभं ध्यातः पतिवियोगात् विचित्राया रतेरामयाः कृता येन नमस्कारेण चिङ्गिता प्रणाम-पृच्छभाविनी प्रसादजन्मा स्मितप्रभा यस्य । स तथा । अस्या न्यासमाह । चतुर्णा-मिति । क्रमेण पादानां नैरन्तर्येण प्रथमद्वितीयाभ्यां द्वितीयतृतीयाभ्यां तृतीय-चतुर्थाभ्यामिति त्रयः क्रमभेदाः । व्युत्क्रमेण पादान्तरायेण प्रथमतृतीयाभ्यां प्रथम-चतुर्थाभ्या द्वितीयचतुर्थाभ्यामिति व्युत्क्रमभेदाः त्रयो वैपरीत्यवशेन चतुर्थादितः प्रथमं यावत् योजनेन अत्रापि क्रमव्युत्क्रमाभ्या षट्प्रकाराः । तेऽमी द्वादश-भेदा गुह्याः । एषा व्यतिकरजन्मानः पुनरन्ये चतुर्विंशतिर्भवन्ति । तत् यथा प्रथमतृतीयाभ्या च प्रथमद्वितीयाभ्या प्रथमचतुर्थाभ्या च द्वितीयतृतीयाभ्यां च प्रथमचतुर्थाभ्या च तृतीयचतुर्थाभ्या च प्रथमतृतीयाभ्यां चेति द्रष्टव्यम् । तदेव-मेक एव गीसूत्रिकाश्लोको यथोक्तरीत्या षट्त्रिंशद्गीसूत्रिकातर्णकान् प्रसूते इति इयं गीसूत्रिकाधेनुः ॥ ४१९ ॥

देवैः स्तुत्या किन्नरगेया भक्त्या वर-
चरितमहिषमथनी जगत्त्रयनायिका ।
सिद्धैर्ध्येया केशरियाना काम्या रण-
चतुररसिकहृदया त्रिलोचनवल्लभा
धीरैः पूज्या दर्पणपाणिर्नूनं गुणि-
निलयलटभललिता सतीषु धुरन्धरा ॥ २
यतिर्विच्छेदिनी ह्येषा श्लोकधेनुरनुत्तमा । ३
छन्दोभेदाच्छतमियं प्रसूते श्लोकतर्णकान् ॥ ४ ५ २० ॥

लब्धम् ।

७	६	५	४	३	२	१
१	२	३	४	५	६	७
७	२१	३५	३५	२१	७	१

वन्द्या	देवैः	सिद्धैः	धीरैः
देवी	स्तुत्या	ध्येया	पूज्या
पर्वतपुत्री	किन्नरगेया	केसरियाना	दर्पणपाणिः
नित्यं	भक्त्या	काम्या	नूनं
मधुमधुर	वरचरित	रणचतुर	गुणिनिलय
कमलवदना	महिषमथनी	रसिकहृदया	लटभललिता
सुरेश्वरिदेवता	जगत्त्रयनायिका	त्रिलोचनवल्लभा	सतीषु धुरन्धरा

८ वंदे
९ वंप
१० वंनि
११ वंम
१२ वंक
१३ वंपु
१४ देप
१५ देनि
१६ देम
१७ देक
१८ देपु
१९ पनि
२० पम
२१ पक
२२ पपु
२३ निम
२४ निक
२५ निपु
२६ पक
२७ मपु
२८ कपु
२९ वंदेप
३० वंपनि
३१ वंनिम
३२ वमक
३३ वंकपु
३४ देपनि
३५ देनिम
३६ देमक
३७ देकपु
३८ देपुव
३९ पनिम
४० पमक
४१ पकपु
४२ पपुवं
४३ पवदे
४४ निमक
४५ निकपु
४६ निपुव
४७ निवंदे
४८ निदेप
४९ मकपु
५० मपुवं
५१ मवंदे
५२ मदेप
५३ मपनि
५४ कपुवं
५५ कवंदे
५६ कदेप
५७ कपनि
५८ कनिम
५९ पुवंदे
६० पुदेप
३१ पुपनि
३२ पुनिम
६३ पुमक
६४ वंदेपनि
६५ वंपनिम
३६ वंनिमक
६७ वमकपु
३८ वकपुवं
३९ देपनिम
७० देनिमक
७१ देमकपु
७२ देकपुवं
७३ देपुवंदे
७४ पनिमक
७५ पमकपु
७६ पकपुवं
७७ पपुवंदे
७८ पवंदेप
७९ निमकपु
८० निकपुवं
८१ निपुवंदे
८२ निवंदेप
८३ निदेपनि
८४ मकपुवं
८५ मपुवदे
८३ मवंदेप
८७ मपनिम
८८ मपुदेनि
८९ कपुवंदे
९० कवंदेप
९१ कदेपनि
९२ कपनिम
९३ कनिमक
९४ पुवंदेप
९५ पुदेपनि
९६ पुपनिम
९७ पुनिमक
९८ पुमकपु
९९ वदेपनिम
१०० वपनिमक
१ वनिमकपु
१ देपनिमक
३ देनिमकपु
४ देमकपुवं
५ पनिमकपु
६ पमकपुवं
७ पपुवंदेप
८ निमकपुवं
९ निकपुवंदे
१० निपुवंदेप
११ मकपुवंदे
१२ मपुवंदेप
१३ मवदेपनि
१४ कपुवंदेप
१५ कवंदेपनि
१६ कदेपनिम
१७ पुवंदेपनि
१८ पुदेपनिम
१९ पुपनिमक
२० वंदेपनिमक
२१ पुवंदेपनिम
२२ कपुवंदेपनि
२३ मकपुवंदेप
२४ निमकपुवदे
२५ पनिमकपुव
२६ देपनिमकपु
२७ वदेपनिमकपु

सहस्रधेनुर्यथा,

नखमुखपाणिकण्ठचिकुरैर्गतिभिः
सहसास्मितेन ललिते सुदृशा
मणिशशिपद्मकम्बुचमराः करिणः
सुतनोः सुधाच हसिता हरिणाः।
फणिगणसिद्धमाध्यदयिता न समाः
सकलास्त्वया च खभुवश्छलिता-
स्तव बलरूपराप्यविजिता नितरां
विबुधाश्चिराय चरितैश्चतुरैः॥

पदविच्छेदिनी ह्येषा श्लोकधेनुरनुत्तमा।
छन्दोभेदाद्दशशतीं प्रसूते श्लोकतर्णकान्॥ ४२१॥

वन्द्येति। वरेण देवताप्रसादेन चरितो निरर्गलप्रसरो गुणानामाश्रयो लटभं मनोज्ञं च ललितं विलासो यस्याः सातथा यतिविच्छेदीति। अत्र करणम्। प्रतिलोमं विनिचिप्यमनुलोममथ चिपेत् स्थितेनागन्तुकं हन्यादीप्सितेन विभाजयेत्। स्थितं प्रतिलोमभागन्तुकं क्रमविन्यस्तमीप्सितं हि प्रतिलोमस्य क्रमेण फलं गुणकारस्यैव अनुलोम भागहार। अनेन क्रमेणैकयतियोजने सप्त श्लोकाः। यतिद्विकयोजने च एकविंशतिः। यतित्रिकयोजने च पञ्चत्रिंशत्। यतिचतुष्कयोजनेऽपि तावन्त एव। यतिपञ्चकयोजने पुनरेकविंशतिः। षड्यतियोजने सप्तसप्तयतियोजने त्रिकः सर्वमेलनेन च सप्तविंशत्यधिकं शतम्। अत्र च क्रियाहीनत्वेन कारकविहीनत्वेन च पदावयवत्तया पादावयवमात्रत्वेन च निरर्थकान् षड्विंशतिमपास्य धेनुश्लोक एक एव वृत्तभेदेन शतं श्लोकतर्णकान् प्रसूते। तथाहि। प्रथमद्वितीयचतुर्थीभिर्यतिभिः अत्युक्ता जातिः। तृतीयपञ्चमीभ्यां सुप्रतिष्ठा। षष्ठ्या गायत्री। सप्तम्या चोष्णिगिति। एकगणनायां वृत्तभेदः। एवं द्विकादिगणनेऽपि गवेषणीयम्॥४२०॥

नखेति। हे ललिते गौरि तव शोभनया दृशा सुतनोः शोभनस्य शरीरस्य। साध्या देवविशेषाः खभुवो ग्रहतारादयः। राप्यत इति राप्यम्। आसुवपिरपिवपिचमयेति रापतिभाषितमित्यर्थः। दर्पेति पाठेन वा योजनीयम्। पदविच्छेदिनीति। पादानि अत्र प्रतिपादं सुषाकलशाभिधाने छन्दसि षड्

अयुतधनुर्यथा,

क्रिये जयसि जृम्भसे सृजसि जायसे
त्रायसे स्तुषे मृषसि मृष्यसे हृषसि प्रीयसे।
स्तुषे मृडसि होडसे कुडसि गल्भसे क्लीवसे
ह्रुषे हरसि रज्यसे रजसि राजसे भ्राजसे॥
एषा तु पदविच्छेदिन्येव धनुः क्रियापदैः।
सम्बोधनाग्रगैर्दृष्टास्त्राभिः श्लोकायुतप्रसूः॥ ४२२॥

लक्षधनुर्यथा,

दुर्गे भद्रे सुभद्रेऽदिति सुरभि दिते सैंहिके गौरि पद्मे
नित्ये हृद्ये वरेण्ये कलि कमलिकले कालिके चण्डि चण्डे।
नन्दे पुण्ये शरण्ये शचि शवरि शिवे भैरवे रात्रि सन्ध्ये
छाये माये मनोज्ञेऽवनि जननि जये मङ्गले देहि शं नः॥

विभज्यन्ते। यद्यपि द्वितीयतृतीयपादयोः चकाराभ्यां नकारेण चतुर्थपादे तवेति पदाधिक्यं तथापि आद्यपादार्थानुरोधेन समुच्चीयमाननिषिध्यमानार्थानुरञ्जकत्वेन सम्बोध्यमानार्थानुयायितया चकारनकारयोः तवेति च तत्पादावयवरूपा एवेति तदसत्कल्पमेव। तथाच षड्भ्यः पदत्रये उपादीयमाने सप्तदशाक्षरायाः जातौ यथा संख्यानुरोधेनाद्यङ्के प्रस्ताररचनाक्रमेण दश विकल्पाः तृतीयचतुर्थयोश्च पादयोस्तावन्तस्तावन्त एवेति। दशभिराहतैर्दशभिः शतम्। शतेन चाहतैर्दशभिः सहस्रं तर्णकाः श्लोकाः समुत्पद्यन्त इतीयं सहस्रधेनुः॥ ४२१॥

क्रिये इति। हे क्रिये! कर्मन्। मिष स्पर्द्धायाम्। पौङ्पाने मृडसुखने तुदादौ होडृ अनादरे। कुडसंहारे। रज्यसे आसजसि। रजसि मत्सरयसि। राजसे शोभसे। भ्राजसे जाज्वल्यसे। एषेति। इह पृथ्वीनामनि च्छन्दसि। षड्भ्यः सम्बोधनाङ्गे पदचतुष्टये उपादीयमाने एकादशाक्षरायाः जातौ प्रस्ताराल्पत्वेन यदि वा छन्दभेदस्य शब्देनाप्रतिपादितत्वात् तद्दीऽपि उदाहरणीय इति तस्यामेव रथोद्धताभिधाने च्छन्दसि दशसु विकल्पेषु प्रतिपादं भवन्तु दशभिः शतं शतेन सहस्रं सहस्रेण च दशसहस्राणि तर्णकाः श्लोकाः समुत्पद्यन्त इतीयमयुतधेनुः॥ ४२२॥

दुर्ग इति सम्बोधनैरिति। अत्र हि [illegible] छन्दसि पादत्रय-

सम्बोधनैरियं धेनुः क्लृप्ता सैकक्रियापदैः ।
लक्षत्रयं सहस्राणि षष्टिं श्लोकान् प्रसूयते ॥
एषान्त्यपदभेदेन सम्भ्रमादिद्विरुक्तिभिः ।
यावद्बोधं पुनः सूते प्रयुतं श्लोकतर्णकान् ॥ ४२३ ॥

कोटिधेनुर्यथा,

स्थूलं दत्से सूक्ष्मं धत्से
भुवि भवसि नभसि रमसे रमे दिवि मोदसे

पदानुरोधेनान्त्यपादद्वयेन एकैकमेव पदं तुर्यपादे परिकल्प्यमिति सर्वत्र नवसु पदेषु स्थितेषु पदचतुष्टये पदपञ्चके च उपादीयमाने प्रथमे आपातालिकाया पञ्चविंशतौ द्वितीये एकया प्राच्यवृत्त्या सह वैतालीयके यदि वा पञ्चभिः प्राच्यवृत्तिभिः सममौपच्छन्दसिके चतुर्विंशतौ तृतीयवैतालीये एव चतुर्विंशतौ चतुष्पदे प्राच्यवृत्तिद्वये सममापातलिकाया षोडशभिरेकया प्राच्यवृत्त्या वैतालीयप्राच्यवृत्त्या सह वैतालीयैः षड्भिस्तथैवौपच्छन्दसिके द्वाभ्यामिति चतुर्विंशतौ विकल्पेषु प्रभवत्सु पञ्चविंशत्याहतेषु चतुर्विंशतौ शतानि षट् । षड्भिः शतैराहतेषु पञ्चविंशतौ सहस्राणि । पञ्चदश । तैराहतेषु चतुर्विंशतौ लक्षाणि त्रीणि सहस्राणि च षष्टिः तर्णकाः श्लोकाः समुत्पद्यन्त इतीयं लक्षत्रेयं । एषेति तथाहि अत्र पादद्वये नवसु तुर्यपादे च दशसु । त्रये पदचतुष्के पदपञ्चके च उपादीयमाने प्रथमे औपच्छन्दसिके एकस्य पदस्य द्विरुक्त्या विंशतौ यदि वा आपातालिकायां दश । वैतालीये पञ्चदशसु औपच्छन्दसिके उदीच्यवृत्तिद्वयेन यद्वैतालीये चतसृभिः उदीच्यवृत्तिभिः सममेकोनविंशतिरिति च पञ्चविंशतौ तृतीयस्मिन्नौपच्छन्दसिके पञ्चभिः प्राच्यवृत्तिभिः सममेकादश । वैतालीये तथैव चतुर्दश औपच्छन्दसिके तिसृभिः प्राच्यवृत्तिभिः सह षडिति विंशतौ तृतीयस्मिन्नौपच्छन्दसिके तिसृभिः उदीच्यवृत्तिभिः सम पञ्चविंशतौ चतुर्थे त्वापातालिकायामेक एव । द्विरुक्त्यादिना षोडशभिः प्राच्यवृत्तिभिः सममशीतौ विकल्पेषु प्रभवत्सु विंशत्याहतपञ्चविंशतौ पञ्चविंशत्या द्वाविंशतौ पञ्चशताधिकानि द्वादशसहस्राणि तैः अपि आहतेषु अशीतौ दशलक्षाणि तर्णकश्लोकाः समुत्पद्यन्त इति इयं प्रयुतधेनुः ॥ ४२३ ॥

स्थूलमिति । प्रेष इति इष गतावित्यस्य क्विपि चैतन्ये गद्युगार्थे । स च सेव चसे रमे जये चलरुचे इति देव्याः सम्बोधनपदानि । सम्बोधनैरिति । अत्र भुजङ्गविजृम्भिते छन्दसि एकादशभ्यः पदेभ्यः पञ्चसु षट्सु च पदेषु उपादीय-

छिन्त्से वाढं भिन्त्से गाढं
रुषि मिषसि धनुषि मनुषे जये युधि विजृम्भसे।
स्वल्पं शेषे कल्पं प्रेषे
चिति चरसि यशसि यतसे चले युधि गल्भसे
ब्रूषे वामं सूषे कामं
हृदि विशसि वचसि सचसे रुचे दृशि दीप्यसे॥
सम्बाधनैर्द्वितीयान्तैः सप्तम्यन्तैः क्रियापदैः।
श्लोककोटीरियं तिस्रः सार्द्धा धेनुः प्रसूयते॥
यदा तु सम्भ्रमादिभ्यो भवन्त्यस्या द्विरुक्तयः।
स्थूलादीनां तदा चैषा दशकोटीः प्रसूयते॥ ४२४॥

कामधेनुर्यथा,

या गौः शौः श्रौ धीः स्त्रौ ह्रो भौ र्जू र्मूस्तू सू र्धूः प्रू भूः
स्रुक् स्रग् युग् भुग्रुक् शुक् त्रट् द्विट् युत् क्रुत् चिद्विद्युग्दिग् द्युः।
ऋक् दृग् वा मा मृत् क्लृप्ता मा सुत् क्षुत् काऽमा हा द्यौ गौः
सा सा या मा मे धा वे धा मे ना मा ते त्वं मे नौः॥

मानेषु जगती जातौ प्रसिद्धाचरोज्ज्वला जलधरमाला नवमालिनी छन्दःसु सप्ततौ। द्वितीये पूर्वेषु। चन्द्रवर्त्मद्रुतविलम्बितमणिमालाप्रभवत्सु च शते तृतीयेऽस्मिन् प्रथमपादच्छन्दस्येव पञ्चाशति चतुर्थपादे द्वितीयपादच्छन्दस्येव शतेषु विकल्पेषु प्रभवत्सु सप्तत्या हतेषु शतेषु सप्तति सहस्राणि शतैराहतायाः सप्तति-सहस्रैः आहतेषु पञ्चाशल्लक्षाणि त्रीणि सहस्राणि च पञ्चाशतैः आहते शते कोट्यस्तिस्रः सार्द्धास्तिस्रः श्लोकाः सम्पद्यन्त इतीयं कोटिधेनुः। यदा त्विति। तथाहि पदत्रये पदचतुष्के पदपञ्चके च उपादीयमाने पूर्वस्यामेव जातौ प्रथम-द्वितीयचतुर्थेषु पादेषु प्रत्येकं जलधरमालाप्रभाच्छन्दसोरेकस्य द्वयोर्द्विरुक्त्या शते तृतीयस्मिंश्च पूर्वयोर्मणिमालोज्ज्वलानवमालिनीतामरसेषु छन्दःसु तथैव शते विकल्पेषु प्रभवत्सु शतेन आहते शते दशसहस्राणि तैश्च आहते शते दशलक्षाणि तैः अपि आहते शते कोट्यस्तिस्रः श्लोकाः सम्पद्यन्त इतीयमेव दशकोटिधेनुः॥४२४॥

यागीरिति। पदयहादिति। तथाहि। पञ्चदशभ्यः पदेभ्यः क्रमव्युत्क्रमाभ्यां नवादिपदयोगे अङ्गीक्रियमाणे द्वितीजातेरारभ्य प्रतिजातिपादे ये विकल्पा-

पदग्रहाद् यथाकामं कामधेनुरियं तु नः ।
परार्द्धानां परार्द्धानि प्रसूते श्लोकतर्णकान् ॥
एकाक्षरादिच्छन्दोभिर्गतिबन्धादिभेदतः ।
उक्तानुक्तानि चित्राणि सर्वाण्येषा प्रसूयते ॥
सकृदुच्चारणे चास्या गच्छत्येका विनाड़िका ।
तत् षष्ट्या नाड़िका ताभिः षष्ट्याहोरात्रमृच्छति ॥
प्रणवादिनमोऽन्ताभिः पदान्यस्या जयन्ति ये ।
सर्वभाषासु वाक् तेषामविच्छिन्ना प्रवर्त्तते ॥
सिद्धैर्मन्त्रपदैः सेयं शास्त्राण्यालोच्य निर्मिता ।
जपतां जुह्वतां देवी सर्वान् कामान् प्रयच्छति ॥
स्थितेनागन्तुकं हन्यादौपितेन विभाजयेत् ।
तद्भेदास्ते भवन्त्येवमन्येष्वपि हि योजयेत् ॥ ४२५ ॥

यानं यातीति या काविच्चया । गिरणं गृणतीति वाक्-चगीः । शरणं शीः शृणातीति शीः । श्रयतीति शोभा लक्ष्मीश्च श्रीः । ध्यानं ध्यायतीति बुद्धिर्धीः । स्त्रेव स्त्रृणातिमन्त्राक्षरं स्त्री । ह्रीच्छतीति माया लज्जा च ह्रीः । बिभेतीति भयकालोभयं च भीः । ज्वरो गतिर्जरा च जूः । मूर्च्छामोहसमुच्छाययोर्बन्धनं च मूः । त्वराहिंसात्वरते च तूः । सूयते सवनं सुष्ठु उच्च सूः । अग्रे भागे भारं धूर्वहतीति धूः । पुरीपालनं पूरणं च पूः । भूमिर्भवनं लोकश्च भूः । यज्ञपात्रं स्रवतीति स्रवणं स्रुक् । पुष्पमालापङ्क्तिश्च स्रज्यत इति

लेरुत्तरोत्तरम् आहन्यमानैर्यदि वा समस्तेऽपि श्लोके षष्टिपदेभ्यः चतुर्विंशत्यष्टाविंशत्यादिपदयोजनायां गायत्रीजातिरारभ्य प्रतिजाति ये विकल्पास्तैः परार्द्धेभ्यः परार्द्धानि तर्णकश्लोकाः समुत्पद्यन्त इतीय परार्द्धपरार्द्धधेनुः । एकाक्षरेति अर्थत्रयप्रतिपादकत्वेन प्रतिपाद पदत्रये परिकल्प्यमानेऽनेकविधच्छन्दोभिरुक्तानि चतुर्व्यञ्जनादीनि अनुक्तानि खड्गप्रभृतीनि सर्वचित्राण्येषैव यथाकामं प्रसूत इत्यर्थः ॥४२५॥

स्रक्। योगः समाधिः समश्च युक्। भोजनं पालनं कौटिल्यं च भुक्। रोगो दीप्तिर्भङ्गश्च रुक्। शोकः शुचित्वं दीप्तिश्च शुक्। अभिलाषः पिपासा हिंसा च तृट्। द्वेषः शत्रुबलमभिलाषश्च द्विट्। शुद्धं मिश्रणमिश्रणञ्च युत्। क्रोधः क्रुध्यतीति रुद्रशक्तिश्च क्रुत्। चेतनाचिनोति चयनञ्च चित्। ज्ञानं सत्ताविभवलाभश्च वित्। मोक्षो मोहो मुञ्चतीति मुक्। आशा अतिसर्गश्च उपदेशो दिक्। क्रीड़ाविजिगीषा व्यवहारश्च द्यूः। श्रुतिवाक्यं विवेचनं च हिंसा च ऋक्। दृष्टिर्ज्ञानं पश्यतीति दृक्। गतिर्गन्धनं विकल्पश्च वा। लक्ष्मीर्मानं शब्दावयवश्च मा। मृत्तिकामरणं मृङ्गातीति मृत्। क्लन्तति करोति करणं च क्लत्। दीप्तिर्मानं भातीति भा। शब्दः शब्दावयवश्च प्रतिषेधश्च मा। हर्षो मोद आमोदश्च मुत्। बुभुक्षात् क्षुत्क्षोदश्च क्षुत्। प्रश्नः सुखं काननं च का। अमतीत्यमापीड़ार्थोऽलक्ष्मीशब्दावयवश्च अमा। द्वारं द्वास्थ उपायश्च द्वाः। स्वर्ग आकाशो देवन च द्यौः। वाग्भूमिर्धनुश्च गौः। सह एन अकारेण विष्णुना वर्त्तत इति सा लक्ष्मीः सा। सानन्तदो रूपं च सा प्रतिदानं शब्दावयवश्च सर्वनाम च सा। इष्टा अयत इति शब्दावयवश्च या। चन्द्रकलामहदर्थश्च मा। लक्ष्मी सम्बोधनं चतुर्थ्यन्त पञ्चम्यन्तं च मे। धात्री पोषयित्री शब्दावयवश्च धा। धारणं पोषणं शब्दावयवश्च वे। शब्दावयवोऽस्मदर्थो लक्ष्मीसम्बोधनं च मे। प्रतिषेधः पुरुषवाची शब्दावयवश्च ना। मिमीते मातेति शब्दावयवश्च मा। तदर्थो युष्मदर्थश्च लक्ष्मीसम्बोधनं च ते। युष्मदर्थो भावप्रत्ययः शब्दावयवश्च त्वम्। शब्दावयवास्मदर्थौ च मे। जलयानम्। न विद्यते और्द्विवचनं यस्यां सा अद्वितीयेत्यर्थः। शब्दावयवश्च नौः।

दुष्करत्वात् कठोरत्वाद्दुर्बोधत्वाद् विनाऽवधेः ।
दिङ्मात्रं दर्शितं चित्रे शेषमूह्यं महात्मभिः ॥
उक्तिप्रत्युक्तिमद् वाक्यं वाकोवाक्यं विदुर्बुधाः ।
द्वयोर्वक्त्रोस्तदिच्छन्ति बह्वनामपि सङ्गमे ॥
ऋजूक्तिरथ वक्रोक्तिर्वैयात्योक्तिस्तथैव च ।
गूढप्रश्नोत्तरोक्ती च चित्रोक्तिश्चेति तद्भिदा ॥
तासु ऋजूक्तिर्द्विधा ग्राम्योपनागरिका च ।

तत्र ग्राम्या यथा,

जन्ती मणुरन्धु रुच्चुकुहुन्तुण्ड-
उण्ण उको विहंसण होमि ।
महोमि भारुं चुले मिल्लासितो
विकिणकु वाणउं उज्जुअक्खु कहाहि ॥
वाणउ उज्जुमाइ गहिल्लउ अणवि
को मल्हणउ वारिज्जन्तु णट्ठाइ ।
करइ वलिवंउउ वे कक्करु मच्छलु अहिमुहं
हि तरुणिहिं अच्छासइ दुक्करु ॥

सेयमुभयतोऽपि ऋजुनैव मार्गेणोक्तिप्रत्युक्त्योः समा प्रवृत्तिरिति सेयमृजूक्तिर्नाम वाकोवाक्यम् ।

सैवोपनागरिका यथा,

बाले नाथ विमुञ्च मानिनि रुषं रोषान्मया किं कृतं
खेदोऽस्मासु न मेऽपराध्यति भवान् सर्वेऽपराधा मयि ।
तत् किं रोदिषि गद्गदेन वचसा कस्याग्रतो रुद्यते
नन्वेतन्मम का तवास्मि दयिता नास्मीत्यतो रुद्यते ॥

सेयमेकतः काक्वा कुटिलेऽतिविषमेयमृजूक्तिर्नाम वाकोवाक्यम् । वक्रोक्तिर्द्विधा, निर्व्यूढा अनिर्व्यूढा च ।

तयोर्निर्व्यूढा यथा,

किं गौरि मां प्रति रुषा, ननु गौरहं किं
कुप्यामि कां प्रति, मयौत्यनुमानतोऽहम्।
जानामि सत्य मनु मानत एव सत्व-
मित्थं गिरो गिरिभुवः कुटिला जयन्ति॥

सेयमावाक्यपरिसमाप्तेर्निर्वाहान्निर्व्यूढेति वक्रोक्तिर्वाकोवाक्यम्।

अनिर्व्यूढा यथा,

केयं मूर्ध्नि मन्धकारे, तिमिरमिह कुतः सुभ्रु कान्तेन्दुयुक्ते,
कान्ताप्यत्रैव कामिन्ननु भवति मया पृष्टमेतावदेव।
नाहं द्वन्द्वं करोमि व्यपनय शिरस स्तूर्णमेनामिदानी-
मेवं प्रोक्तो भवान्या प्रतिवचनजड़ः पातु वो मन्मथारिः॥

सेयमनिर्वाहादनिर्व्यूढेति वक्रोक्तिर्नाम वाकोवाक्यम्। ते इमे उभे अपि श्लेषवक्रोक्ती भवतः। वैयात्योक्तिर्द्विधा स्वाभाविकी नैमित्तिकी चेति।

तयोः स्वाभाविकी यथा,

नादेयं किमिदं जलं, घटगतं नादेयमेवोच्यते,
सत्यं नाम पिबामि, कत्यपटषः पौतेन नाम्नाभवन्।
किं वर्णा अपि सन्ति नाम्नि, रहितं किं तैरलं त्वं कुतो,
यस्मादेव भवान्, भगिन्यसि ततस्तेनैव मां बाधसे॥

अत्र स्वैरिण्याः सहजाद् वैयात्यात् स्वाभाविकीयं वैयात्योक्तिर्नाम वाकोवाक्यम्॥

नैमित्तिकी यथा,

कुशलं राधे, सुखितोऽसि कंस, कंसः क्व नु क्व सा राधा।
इति पारीप्रतिवचनैर्विलक्षहासो हरिर्जयति॥

अत्र गोत्रस्खलिते विपक्षनाम्नैव वैयात्येनोत्तरं दत्तमिति नैमित्तिकीयं वैयात्योक्तिर्वाक्कोवाक्यम् ॥

गूढोक्तिर्द्विधा मुख्या गौणी च। तयोर्मुख्या यथा,

केशव यमुनातीरे व्याहृतवानुषसि हंसिकां कोऽद्य।
कान्ताविरहभयातुरहृदयः प्रायः प्रियेऽहं सः ॥

अत्र प्रिये हंस इत्यत्रावर्णलोपे प्रिये अहं स इत्यर्थस्य मुख्ययैव वृत्त्या गूढत्वादियं मुख्या गूढोक्तिर्नाम वाक्कोवाक्यम् ॥

गौण्या यथा,

निरर्थकं जन्म गतं नलिन्या यया न दृष्टं तुहिनांशुबिम्बम्।
उत्पत्तिरिन्दोरपि निष्फलैव कृता विनिद्रा नलिनी न येन ॥

ताविमौ पूर्वोत्तरार्द्धयोरन्योन्योक्त्या गूढकामलेखावितीयं गौणी गूढोक्तिर्नाम वाक्कोवाक्यम् ॥

प्रश्नोत्तरोक्तिर्द्विधा, अभिधीयमानहृद्या प्रतीयमानहृद्या च। तयोराद्या यथा,

क्व प्रस्थितासि करभोरु! घने निशीथे
प्राणाधिको वसति यत्र जनः प्रियो मे।
एकाकिनी वद बिभेषि कथं न बाले!
नन्वस्ति पुङ्खितशरो मदनः सहायः ॥

सेयं हृद्गतप्रष्टव्यस्यैव स्पष्टमभिधयैव अभिधानादभिधीयमानहृद्या नाम प्रश्नोक्तिर्वाक्कोवाक्यम् ॥

द्वितीया यथा,

कियन्मात्रं जलं विप्र जानुदघ्नं नराधिप!।
तथापीयमवस्था ते न हि सर्वे भवादृशाः ॥

सेयं शब्दविद्यावैशारद्यस्य हृद्यस्य प्रतीयमानत्वात् प्रतीयमानहृद्या नाम प्रश्नोक्तिर्वाक्कोवाक्यम् ॥

चित्रोक्तिर्द्विधा चित्रा विचित्रा च। तयोराद्या यथा,

लभ्यन्ते यदि वाञ्छितानि यमुनाभागीरथीसङ्गमे
देव प्रेष्यजनस्तदेष भवतो भर्त्तव्यतां वाञ्छति।
नन्वेतन्मरणेन किं नु मरणं कायान्मनोविच्युतिः
दीर्घं जीव मनस्तवाङ्घ्रिकमले कायोऽत्र नस्तिष्ठति॥

तदिदं सङ्कल्पितोक्तिप्रत्युक्तिभ्यां जीवतोऽपि जन्मान्तरफलावाप्तिसाधनेन आश्चर्यहेतुरिति चित्रा नाम चित्रोक्तिर्वाकोवाक्यम्॥

द्वितीया यथा,

कोऽयं भामिनि, भूषणं कितव ते, शोणः कथं, कुङ्कुमात्,
कूर्पासान्तरितः प्रिये विनिमयः, पश्यापरं कास्ति मे।
पश्यामीत्यभिधाय सान्द्रपुलको मृद्नन् मृडान्याः स्तनौ
हस्तेन प्रतिनिर्जितेन्दुरवतात् द्यूते हसन् वो हरः॥

अत्र उक्तिप्रत्युक्त्योः अनन्तरं स्तनमर्दनवैचित्र्यादिना परिसमाप्तेर्विचित्रोक्तिसंज्ञमिदं वाकोवाक्यम्।

प्रहेलिका सकृत् प्रश्नः सापि षोढा च्युताक्षरा।
दत्ताक्षरोभयं सुष्टिर्बिन्दुमत्यर्थवत्यपि॥
क्रीडागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमन्त्रणे।
परव्यामोहने चापि सोपयोगाः प्रहेलिकाः॥

तासु च्युताक्षरा यथा,

पयोधरभराक्रान्ता संनमन्ती पदे पदे।
पदमेकं न का याति यदि हारेण वर्जिता॥

अत्र विहङ्गिका काहारेण वर्जिता न यातीति वक्तव्ये हारेण वर्जितेत्युक्तम्। अतः का इत्यक्षरस्य च्युतत्वात् च्युताक्षरेयम्॥

दत्ताक्षरा यथा,

कान्तयानुगतः कोऽयं पीनस्कन्धो मदोद्धतः ।
मृगाणां पृष्ठतो याति शंवरो रूढ़यौवनः ॥

अत्र शवर इति शंवर इति अनुस्वाराक्षरस्य दत्तत्वात् दत्ताक्षरेयम् ॥

च्युतदत्ताक्षरा यथा,

विदग्धः सरसो रागी नितम्बोपरिसंस्थितः ।
तन्वङ्ग्यालिङ्गितः कण्ठे कलं कूजति को विटः ॥

अत्र विट इत्यस्मिन् पदे विकारे च्युते घकारे दत्ते घटः कूजति इति द्वितीयोऽर्थो भवतीति सेयं च्युतदत्ताक्षरा ॥

अक्षरमुष्टिर्यथा,

अतिः अतिः अन्न अलं प्रीद्य रद्य जद्य फद्य ।
मेला मेला मेलं मेलं फस फस फस फस ॥

सा इयमक्षराणां मुष्टिः इति अक्षरमुष्टिका । अत्र पादश्चतुष्पङ्क्तिलिखितायां चतुर्भिर्मुरजबन्धैः श्लोक उपतिष्ठति । स यथा,

अद्य मे सफला प्रीतिरद्य मे सफला रतिः ।
अद्य मे सफलं जन्म अद्य मे सफलं फलम् ॥

बिन्दुमती यथा,

तवाववादः प्रत्यब्धि पताकाः प्रतिसङ्गरम् ।
फलं प्रत्यङ्गुतोपायं यशांसि न नु न क्वचित् ॥

इत्यनेन श्लोकेनोक्तार्थस्य यथास्थितस्वरानुस्वारविसर्जनीयसंयोगस्य श्लोकान्तरस्य बिन्दुभिरेव सूचनाक्रम इति बिन्दुमती । तद् यथा,

०ु००ा ०ु००ा ०ा०ा ०'०ु०ॅ ०'०ु०ॅ ००ः ।
०ा०ॅ ०ा००ॅ ि०ि०ः ००ॅ० ०० ी०ॅ०ः ॥

निर्भेदः, उदधावुदधावाज्ञा संयुगे संयुगे जयः।
साहसे साहसे सिद्धिः सर्वत्र तव कीर्त्तयः॥

अर्थप्रहेलिका यथा,

उत्तप्तकाञ्चनाभासं संदष्टदशनच्छदम्।
सरसं चुम्बते हृष्टैर्वृद्धैरपि किमुज्ज्वलम्॥

सेयमपि सूचितस्यैव पक्वाम्रफलमित्यस्य द्व्यर्थपदप्रयोगेण अवगतेः अर्थप्रहेलिका।

क्रियाकारकसम्बन्धे पादाभिप्रायवस्तुभिः।
गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिनः॥

तेषु क्रियागुप्तं यथा,

स्तो न जघनभराभिराममन्दं गमनमिदं मदिरारुणेक्षणायाः।
कथमिह सहसा विलोकयन्तो मदनशरज्वरजर्जरा युवानः॥

अत्र जघनभराभिराममन्दं मदिरारुणेक्षणाया गमनं विलोकयन्तो हे युवानः कथमिव यूयं मदनशरज्वरजर्जरा न स्त इति क्रियापदस्य स्तनशब्देन जघनसान्निध्याद् गोपितेन क्रियागूढमिदम्।

कारकगुप्तं यथा,

पिबतस्ते शरावेण वारि कह्लारशीतलम्।
केनेमौ दुर्विदग्धेन हृदये विनिवेशितौ॥

अत्र शरावेति कर्मकारकस्य गूढत्वात् कारकगूढमिदम्।

सम्बन्धगूढं यथा,

न मयागोरसाभिज्ञं चेतः कस्मात् प्रकुप्यसि।
अस्थानरुदितैरेभिरलमालोहितेक्षणे॥

अत्र न मे आगोरसाभिज्ञं चेत इति सम्बन्धिपदस्य मयेति तृतीयाभ्रान्त्या गोपितत्वादिदं सम्बन्धगूढम्।

पादगूढं यथा,

द्युवियद् गामिनी तारसंरावविहतश्रुतिः ।

हैमीषु माला शुशुभे—

अत्र पूर्वार्द्धस्थितैर्द्वितीयप्रथमसप्तमपञ्चमैकादशनवमत्रयोदशषोड़शाक्षरैश्चतुर्थपादो गूढ़ उत्थाप्यः। यथा, विद्युतामिव संहतिरितीदं पादगूढ़म्। अभिप्रायगूढ़ं यथा,

जइ देअरेण भणिआ खग्गं घेत्तुण राउलं वच्च ।

ता किं सेवअ बहुए हसि ऊण वलोइअं सअणम् ॥ (श)

अत्र निरीक्षितमनेनात्र पुरुषायितलक्ष्मपदलाक्षादिकं तेन नियुङ्क्ते मां नृकर्मणीत्यभिप्रायेण बध्वाः शयनावलोकनमित्यभिप्रायगूढ़म्। वस्तुगूढ़ं यथा,

पानीयं पातुमिच्छामि त्वत्तः कमललोचने ! ।

यदि दास्यसि नेच्छामि न दास्यसि पिबाम्यहम् ॥

अत्र दास्यसीति दासीलक्षणस्य वस्तुनो गूढ़त्वादिदं वस्तुगूढ़म् ।

यस्तु पर्य्यनुयोगस्य निर्भेदः क्रियते पदैः ।

विदग्धगोष्ठ्यां वाक्यैर्वा तं हि प्रश्नोत्तरं विदुः ॥

अन्तः प्रश्नवहिःप्रश्नवहिरन्तःसमाह्वयैः ।

जातिपृष्टोत्तराभिख्यैः प्रश्नैस्तदपि षड्विधम् ॥

तेषु अन्तःप्रश्नं यथा,

काहमस्मि गुहा वक्ति प्रश्नेऽमुस्मिन् किमुत्तरम् ।

कथमुक्तं न जानासि कदर्थयसि यत् सखे ॥

(श) यदि देवरेण भणिता खड्गं गृहीत्वा राजकुलं व्रज ।

तत् किं सेवकबध्वा हसित्वावलोकितं शयनम् ॥

अत्र कदर्थयसीति पदं कथमुक्तं रेफयकारयुक्तं दर्थ्यसीति स्यात्। अतो वाक्यान्तरे प्रश्नोत्तरस्योक्तत्वाद् अन्तः प्रश्नमिदम्।

बहिः प्रश्नं यथा,

भद्र मानवकाख्याहि कीदृशः खलु ते पिता।
वेलान्दोलितकल्लोलः कीदृशश्च महोदधिः॥

अत्र मज्जन् मकर इत्यस्य उत्तरस्य प्रश्नाद्बहिरुक्तत्वाद् बहिःप्रश्नमिदम्।

बहिरन्तःप्रश्नं यथा,

सुभद्रां क उपायंस्त प्रश्नेऽस्मिन् य उत्तरः।
स कीदृक् कपिमाचष्टे व्योम्नि पर्णस्थितिः कुतः॥

अत्र वायुत इत्युत्तरेण प्रश्नाद्बहिरुक्तेन वायुतो नरो वानरो भवतीति सुभद्रोपयन्ताप्युच्यते। तेनैतत् बहिरन्तःप्रश्नं भवति। जातिप्रश्नं यथा,

कीदृशा भूमिभागेन राजा आन्तोऽनुमीयते।
प्राङ्गणं कुरुतेत्युक्ताः किमाहुस्तदनिच्छवः॥

"हैमेवारकरच्छिना नाजिरं करवामहै" इत्युत्तराभ्यां गतोत्तराख्यानं प्रश्नोत्तरजातिरभिधीयते। जातिप्रश्नमिदम्।

पृष्टप्रश्नं यथा,

को सो जोअणवाउ को दण्डाणं दुवे सहस्साइ।
का काली का मधुरा किंशुकपृथुकाननच्छायम्॥ (घ)

अत्र य एव प्रश्नाः, कः स योजनपादः को दण्डानां द्वे सहस्रे इत्यादयः, त एव क्रोशो योजनपादः कोदण्डानां द्वे

(घ) कः स योजनवाइः को दण्डानां द्वे सहस्रे॥

सहस्रे इत्यादीनि उत्तराणि भवन्ति। एवं का कालौ का मधुरा किं शुकपृथुकाननच्छायमिति उत्तरं किमभिहितशेषस्य प्रष्टव्यमिति पृष्टप्रश्नम्।

उत्तरप्रश्नं यथा,

किं वसन्तसमये वनभक्षः पृष्टवान् स पृथुलोमविलेखः।
उत्तरञ्च किमवापतुरेतौ काननाद तिमिराद पिकालौ॥

अत्र प्रश्नस्य हे काननाद हे तिमिराद पिकालौत्येतदपि कालौत्येतदेव उत्तरप्रश्नमिदम्॥

यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम्।
तदध्येयं विदुस्तेन लोकयात्रा प्रवर्त्तते॥
काव्यं शास्त्रेतिहासौ च काव्यशास्त्रं तथैव च।
काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्॥

तेषु काव्यं यथा,

यदि स्मरामि तां तन्वीं जीविताशा कुतो मम।
अथ विस्मृत्य जीवामि जीवितव्यसनेन किम्॥

तदिदं उक्तिप्राधान्यात् काव्यमित्युच्यते॥

शास्त्रं यथा,

स्निग्धोन्नतायतनुतास्रनखौ कुमार्य्याः
पादौ समोपचितचारुनिगूढगुल्फौ।
श्लिष्टाङ्गुली कमलकान्तितलौ च यस्या-
स्तामुद्वहेद् यदि भुवोऽधिपतित्वमिच्छेत्॥

अत्र स्निग्धत्वादेः शब्दस्य प्राधान्यमिति शासनाच्छास्त्रमिदम्॥

इतिहासो यथा,

हिरण्यकशिपुर्दैत्यो यां यां स्त्रियाप्युदैक्षत।
भयाद् भ्रान्तैः सुरैश्चक्रे तस्यै तस्यै दिशे नमः॥

सोऽयमतीतार्थप्राधान्यादितिहासः॥

काव्यशास्त्रं यथा,

नान्दीपदानि रतनाटकविघ्नशान्ता-
वाशाचराणि परमाण्यथ वा स्मरस्य ।
दष्टेऽधरे प्रणयिणा विधुताग्रपाणि-
सीत्कारशुष्करुदितानि जयन्ति नार्य्याः ॥

अत्र काव्येन शास्त्रमभिहितम् इतीदं काव्यशास्त्रम् ॥

काव्येतिहासो यथा,

स सञ्चरिष्णुर्भुवनान्तरेषु यां
यदृच्छयाशिश्रयदाश्रयः श्रियाम् ।
अकारि तस्यै मुकुटोपलस्खलत्-
करैस्त्रिसन्ध्यं त्रिदशैर्दिशे नमः ॥

अत्र प्रागुक्तस्यैवेतिहासार्थस्य काव्येनाभिधानात् काव्येतिहासोऽयम् ॥

शास्त्रेतिहासो यथा,

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥

अत्र धर्मार्थकाममोक्षाणामितिहासे निवेशितत्वात् अयं शास्त्रेतिहासः ॥

श्रव्यं तत् काव्यमाहुर्यन्नेक्ष्यते नाभिधीयते ।
श्रोत्रयोरेव सुखदं भवेत् तदपि षड्विधम् ॥
आशीर्नान्दी नमस्कारो वस्तुनिर्देश इत्यपि ।
आक्षिप्तिका ध्रुवा चेति शेषो ध्येयं भविष्यति ॥

तत्राशीर्यथा,

भूयाद्वः श्रेयसे देवः पार्वतीदयितो हरः ।
पातु वः परमं ज्योतिरवाङ्मनसगोचरः ॥

अत्र आशंसायां लिङ् लोट् च । तदिदं वाक्यद्वयमाशीः ॥

नान्दी यथा,

भद्दं भोदु सरस्सइअ कइणो नन्दन्तु वासाइणो
अण्णअणं पि परं पअट्टउ वरा वाणीच्छइल्लप्पिया ।
वच्छोमी तह मागही फुरउ णो सा किं च पञ्चालिआ
रीदीओ विलिहन्तु कव्वकुसला जोण्हं चओरा विअ ॥ (स)

सेयं रङ्गमङ्गलान्तस्वस्त्ययनं नान्दी ।

नमस्कृतिर्यथा,

जयति ब्रह्मभूः शम्भुर्वन्देमहि महेश्वरम् ॥
इदं गुरुभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ॥

सेयं स्तुतिर्नमस्क्रिया नमस्कृतिरेव भवति ॥

वस्तुनिर्देशो यथा,

अस्युद्दामजटाभारभ्राम्यद्गङ्गाम्बुशेखरः ।
आदिदेवो हरो नाम सृष्टिसंहारकारणम् ॥

सोऽयं कथाशरीरव्यापिनो वस्तुनो नायकस्य निर्देशो वस्तुनिर्देशः ॥

आक्षिप्तिका यथा,

पअपीड़िअमहिसासुरदेहेहिं
भुअणभअलुआवसलिलेहेहिं ।
सुरसुहदेत्तवलिअधवलच्छिहिं
जअइ सहासं वअणु महलच्छिहिं ॥ (ह)

(स) भद्रं भवतु सरस्वत्याः कवयो नन्दन्तु व्यासादयः
अन्येषामपि परं प्रवर्त्ततां वरा वाणी च्छेकप्रिया ।
वच्छोमी तथा मागधी स्फुरतु नः सा किं च पञ्चालिका
रीतीर्विलिखन्तु काव्यकुशला ज्योत्स्नां चकोरा इव ॥

(ह) पदपीड़ितमहिषासुरदेहैः भुवनभयजावकमश्रिलेखैः ।
सुरसुखदात्तवलितधवलाक्षैः जयति सहासं वदनं महालक्ष्म्याः ॥

सेयमभिधित्सितरागविशेषप्रयोगमात्रफलं वचनमाच्छिन्निका। ध्रुवा यथा,

मअवहणिमित्तणिग्गअमइंदसुण्णं गुहं णिएऊण।
लद्धावसरो गहिउण मोत्तिआइं गओ वाहो॥ (क)

सेयं पात्रप्रवेशरसानुसन्धानादिप्रयोजना ध्रुवा।

यदाङ्गिकैकनिर्वर्त्यमुज्झितं वाचिकादिभिः।
नर्त्तकैरभिधीयेत प्रेक्षणाचेडिकादि तत्॥
तल्लास्यं ताण्डवं चैव कुलिकं शम्पया सह।
हल्लीसकं च रासश्च षट्प्रकारं प्रचक्षते॥

तेषु लास्यं यथा,

उच्चिउ पालि पिअ पंथहिं जंतउ।
पेक्खमि हत्थ होइ जइ लोअणवन्तउ॥ (ख)

तदिदं शृङ्गाररसप्रधानत्वात् लास्यम्॥

ताण्डवं यथा,

सुअवहवइअरं णिसुणिअ दारुण-
रोसविसट्टपहररुहिरारुण।
जलिउ जाअइ णरु रिउसंन्तावणु
अणलसरिच्छु जे होइ महारणु॥ (ग)

इदं वीररसप्रधानत्वात् ताण्डवम्।

(क) मृगवधनिमित्तनिर्गतसृगेन्द्रशून्यां गुहां निरूप्य।
लब्धावसरो गृहीत्वा मौक्तिकानि गतो व्याधः॥

(ख) उच्चा पालिः प्रियः पथा याति, प्रेक्षे हस्तं भवति यदि लोचनवान्॥

(ग) सुतवधव्यतिकरं निशम्य दारुणरोषविसृष्टप्रहाररुधिरारुणः।
ज्वलितो जायते नरो रिपुसन्तापनोऽनलसदृशो यदि भवति महारणः॥

छलिकं यथा,

णिसुणिउ पच्छा तुरअरउ भुण्डि हिंसि हसन्ति ।
णिअकन्त डाढ़जुअलेहिं पुणु पुणु ण अ डसन्ति ॥ (घ)

इदन्तु शृङ्गारवीरप्रधानत्वाच्छलिकम् ॥

शम्पा यथा,

वीहेसि हरिमुहि अउ होहि मं गले लेहि सइ ।
कन्दइ रिट्ठासुरुमारिउ कण्ठवलिउ ण पइ ॥ (ङ)

तदिदं छलिकमेव किन्नरविषयं शम्पा ।

हल्लीसकं यथा,

चन्दणधूसरअं आउलिअलोअणअं
हासपरम्मुहअं णीसासकिलासिअअं ।
दुम्मणदुम्मणअं सङ्कामिअमण्डणअं
माणिणिआणणअं किं तुज्झ करट्ठिअअं ॥ (च)

मण्डलेन तु यत् स्त्रीणां नृत्यं हल्लीसकन्तु तत् ।
तत्र नेता भवेदेको गोपस्त्रीणां हरिर्यथा ॥

हल्लीसकमिदम् ॥

(घ) निशम्य पश्चात् तुरगरवं शूकरी हिंसार्थं हसति ।
निजकान्तं दष्ट्रायुगलेन पुनः पुनर्न च दशति ॥

(ङ) बिभेषि हरिमुखि अपि भव मां च गले गृहाण सदा ।
क्रन्दति रिष्टासुरमारितः कण्ठवलितो न पतिः ॥

(च) चन्दनधूसरमाकुलितलोचनं हासपराङ्मुखं निश्वासक्लिशितम् ।
दुर्मनसां दुर्मनस्कं संक्रामितमण्डनं मानिन्याननं किं तव करस्थितम् ॥

रासो यथा,

अइ दुम्मणदुम्मणआ अज्ज किं णो पुच्छामि तुमं ।
ण जिविज्जइ जेण विलासो पलिहिज्जइ को स जणो ॥ (छ)

तदिदं हल्लीसकमेव तालबन्धविशेषयुक्तं रास इत्युच्यते ॥

अङ्गवाक्सत्वजाहार्य्याः सामान्यश्चित्र इत्यमी ।
षडत्राभिनयास्तद्वदभिनेयं वचो विदुः ॥

तेष्वाङ्गिकाभिनयवद् यथा,

दोर्दण्डाः क्व धृताङ्गदाः क्व च शिरानद्धौ भुजौ द्वाविमौ
वक्त्राणि क्व नु कान्तिमन्ति वलिमत् क्वेदं ममेदं मुखम् ।
वाचस्ताः क्व जितार्णवध्वनिघनाः क्वायं वचः संयमो
हेलाकम्पितभूधरः क्व चरणन्यासः क्व मन्दा गतिः ॥

अत्राङ्गिकाभिनयानां प्रतिपादितत्वात् इदमाङ्गिकाभिनयम् ॥

वाचिकाभिनयवद् यथा,

दुर्वारां मदनशरव्यथां वहन्त्या
तन्वङ्ग्या यदभिहितं पुरःसखीनाम् ।
तद्भूयः शिशुशुकसारिकाभिरुक्तं
धन्यानां श्रवणपथातिथित्वमेति ॥

अत्र वाचिकाभिनयानां प्रतिपादनादिदं वाचिकाभिनयम् ॥

सात्विकाभिनयवद् यथा,

वारं वारं तिरयति दृशोरुद्गमो वाष्पपूरः
तत्संकल्पोपहितजड़िमस्तम्भमभ्येति गात्रम् ।
सद्यः स्विद्यन्नयमविरतोत्कम्पलोलाङ्गुलीकः
पाणिर्लेखाविधिषु नितरां वर्त्तते किं करोमि ॥

(छ) अयि दुर्मनस्क दुर्मनस्क अद्य किं नो पृच्छामि त्वाम् ।
न जीव्यते येन विलासः परिक्रियते किमिति जनः ॥

अत्र वाष्पजाड्यस्तम्भस्वेदकम्पानां प्रतिपादितत्वादिदं सात्विकाभिनयम् ॥

आहार्य्याभिनयवद् यथा,

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोमपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधोवासश्च माञ्जिष्ठकम्
पाणौ कार्मुकमक्षसूत्रवलये दण्डोऽपरः पैप्पलः ॥

अत्राहार्य्याभिनयानां प्रतिपादितत्वादिदं आहार्य्याभिनयम् ।

सामान्याभिनयवद् यथा,

राहोश्चन्द्रकलामिवाननचरीं दैवात् समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।
आतङ्काद् विकलं द्रुतं करुणया विक्षोभितं विस्मयात्
क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्त्तताम् ॥

अत्र चतुर्णामभिनयानां प्रयोगादिदं सामान्याभिनयम् ।

चित्राभिनयवद् यथा,

व्यतिकर इव भीमस्तामसो वैद्युतश्च
क्षणमुपहतचक्षुर्वृत्तिरुद्भूय शान्तः ।
कथमिह न वयस्यस्तत् किमेतत् किमन्यत्
प्रभवति हि महिम्ना स्वेन योगीश्वरीयम् ॥

अत्र हस्ताध्यायपदाध्याययोः कथितत्वाच्चित्राभिनयमिदम् ॥

चतस्रो विंशतिश्चैताः शब्दालङ्कारजातयः ।
शब्दसन्दर्भमात्रेण हृदयं हर्त्तुमीशते ॥

इति श्रीमहाराजाधिराजश्रीमद्भोजराजविरचिते
सरस्वतीकण्ठाभरणे शब्दालङ्कारनिर्णयो नाम
द्वितीयः परिच्छेदः ।

तृतीयः परिच्छेदः ।

—:○:—

अलमर्थमलङ्कर्त्तुर्ये व्युत्पत्त्यादिवर्त्मना ।
ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया ॥ १ ॥
जातिर्विभावना हेतुरहेतुः सूक्ष्ममुत्तरम् ।
विरोधः सम्भवोऽन्योन्यं परिवृत्तिर्निदर्शनम् ॥ २ ॥
भेदः समाहितं भ्रान्तिर्वितर्को मीलितं स्मृतिः ।
भावः प्रत्यक्षपूर्वाणि प्रमाणानि च जैमिनेः ॥ ३ ॥
तेषु, नानावस्थासु जायन्ते यानि रूपाणि वस्तुनः ।
स्वेभ्यः स्वेभ्यो निसर्गेभ्यस्तानि जातिं प्रचक्षते ॥ ४ ॥

क्रमप्राप्तार्थालङ्कारलक्षणाय परिच्छेदारम्भः । तत्र विभागोपयुक्तं सामान्यलक्षणमाह । अलमर्थमिति । विशिष्टा उत्पत्तिर्व्युत्पत्तिर्जातिरवच्छेदकः प्रकारः । आदिशब्दादिविधशक्तिप्रतिबन्धादयो विभावनाद्यवच्छेदास्त्रयोविंशतिः । अर्थालङ्कारसंज्ञयेति । अर्थशोभानिवृत्तिहेतुर्विच्छित्तिः अर्थालङ्कार इति स्फुटलक्षणम् ॥ १ ॥

विभागं दर्शयति । जातिरिति ॥ २ ॥

प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानि जैमिनेः प्रमाणानि षट् । तेनैव क्रमेण लक्षणानि आख्यातुं प्रत्यक्षपूर्वाणीत्युक्तम् । साहित्यस्य सर्वपारिषद्यत्वान्नानादर्शनरीत्युपजीवनमुचितमेव ॥ ३ ॥

नाम्येव असौ अर्थालङ्कारो यः स्वरूपं न आश्रयत इति प्राथम्यं जातेरेवेत्याह । तेषु इति । कालकृतो विशेषोऽवस्था । तामधिकृत्य जायन्ते वस्तु स्वरूपव्यभिचारिणि उत्पद्यन्ते । ननु एवं "य एते यज्वानः प्रथितमहसो येऽप्यवनिपा महाढ्यो याश्चैताः कृतमपरसंसारकथया । अहो ये चाप्यन्ये फलकुसुमनम्रा विटपिनो जगत्येवंरूपा विलसति महदेषा भगवति ।" इत्यादावपि जातित्वं स्यादित्यत आह । स्वेभ्यः स्वेभ्य इति । स्वभावभूतानीत्यर्थः । कविप्रतिभामात्रप्रकाश्यनीयरूपोद्भवं जातिरिति लक्षणम् । लौकिकविकल्पविषयोऽपि प्रतिभया भासत

अर्थव्यक्तेरियं भेदमियता प्रतिपद्यते ।
जायमानमियं वक्ति रूपं सा सार्वकालिकम् ॥ ५ ॥
स्वरूपमाश्रयो हेतुरिति तद्भेदहेतवः ।
ते संस्थानादयस्तेषु सा विशेषेण शोभते ॥ ६ ॥
तत्र स्वरूपसंस्थानमवस्थानं तथैव च ।
वेशो व्यापार इत्याद्यैः प्रभेदैर्बहुधा स्थितम् ॥ ७ ॥
मुग्धाङ्गनाभर्कस्तिर्यङ् नीचपात्राणि चाश्रयः ।
देशः कालश्च शक्तिश्च साधनानि च हेतवः ॥ ८ ॥

तेषु संस्थानं यथा,

स दक्षिणापाङ्गनिविष्टमुष्टिं नतांसमाकुञ्चितसव्यपादम् ।
ददर्श चक्रीकृतचारुचापं प्रहर्त्तुमभ्युद्यतमात्मयोनिम् ॥

एव । यदाह । रसानुगुणशब्दार्थचिन्तास्तिमितचेतसः । क्षणं विशेषस्पर्शोत्थी प्रज्ञैव प्रतिभा कवेः । स हि चक्षुर्भगवतः तृतीयमिति गीयते । येन साक्षात्करोत्येष भावास्त्रैलोक्यवर्त्तिन इति ॥ ४ ॥

उक्तमेव विशेषमभिसन्धायाह । अर्थव्यक्तेरिति । वस्तुस्वरूपोल्लेखनरूपार्थव्यक्तिरर्थगुणेषु उक्ता । तत्र सार्वकालिकं रूपमुपजनापायान्तरालव्यापकमित्यर्थः । अत्र तु जायमानमागन्तुनिमित्तं समवधानप्रभवं व्यभिचरितमित्यर्थः । विच्छित्तिप्रकारयोः असङ्करात् पृथक् शोभार्पणाच्च युक्तो व्यतिरेकस्तेन स्वभावोक्तिरेवार्थव्यक्तिरिति यत् केनचिदुक्तं तदपास्तम् ॥ अतएव जात्यन्तरप्रकाराणामपि पृथगलङ्कारता स्यादिति न युक्तमवान्तरवचसैव व्याघातात् । न हि सामान्यविशेषयोर्विभागो भवति ॥ ५ ॥

स्वरूपमिति । आश्रयविशेषहेतुविशेषव्यतिरिक्तोऽवच्छेदकप्रकारः स्वरूपम् । एतदेव विभजते । ते संस्थानादय इति । ननु किमनेन प्रपञ्चेन पूर्वाभिहितरूपमात्रस्यैव जातित्वादित्यत आह । तेषु सेति । विशेषेण शोभाहेतुरेव हि अलङ्कारोऽस्ति चात्र तथा भाव इति भावः ॥ ६ ॥

तत्र स्वरूपं द्विधा । शरीरावयवसन्निवेशलक्षणमतादृश्यञ्च । आद्यमपि बुद्धिकारितमतथाभूतञ्च । तदेतदाह । तत्र स्वरूपमिति । आदिपदेन वृत्तादिस्वरूपपरिग्रहः ॥ ७ ॥

शक्तिः पदार्थानां सामर्थ्यम् । साधनानि कर्त्तादीनि षट् ॥ ८ ॥

अत्र धनुर्धरेण एवमङ्गानि सम्यग् बुद्धिपूर्वकं स्थापनीयानीति संस्थानमिदं जातिभेदः ॥ ९ ॥

अवस्थानभेदेन यथा,

पादावष्टम्भनम्रीकृतमहिषतनोरुल्लसद्बाहुमूलम्
शूलं प्रोल्लासयन्त्याः सरलितवपुषो मध्यभागस्य देव्याः।
विश्लिष्टस्पष्टदृष्टोन्नतविरलवलिव्यक्तगौरान्तराला-
स्तिस्रो वः पान्तु लेखाः क्रमवशविकसत्कञ्चुकप्रान्तमुक्ताः ॥

अत्र स्त्रियाः शूलप्रोल्लासनादौ व्यापारे बुद्धिकारितमपि शरीरावस्थानमीदृशं जायते इतीदमवस्थानं नाम जातिभेदः॥

वेशो यथा,

कसपिट्ठधूसरत्थणि महुमअतम्बच्छि कुवलआहरणे।
कस्स कअ चुअमञ्जरि पुत्ति तुए मण्डिओ गामो ॥१०॥ (ज)

(ज) चणपिष्टधूसरस्तनि मधुमदताम्राक्षि कुवलयाभरणे।
कस्य कृते चूतमञ्जरि पुत्रि त्वया मण्डितो ग्रामः ॥

अत्र धनुर्धरेणेति। तदुक्तम् अपाङ्गे दक्षिणां सृष्टिं वामं विन्यस्य मस्तके। पादमाकुञ्चयेद्वामं लक्ष्ये निश्चललोचन इति। अत्र सर्वस्यैव धनुर्धरस्य एवंविधशरीरावयवसन्निवेशो भवति न कामस्यैव इति नाश्रयविशेषो विवक्षितः। एवमुत्तरत्रापि ॥ ९ ॥

पादावष्टम्भेति। उल्लसद्बाहुमूलमिति प्रोल्लसनक्रियाविशेषणम्। संवलितवपुषा इति मध्यभागविशेषणम्। अतएव वलीनां विश्लेषो मिथो विभागः। उपरि शरीराकर्षणात् कञ्चुकप्रान्तापसरणम्। मुसलोल्लासनादौ दृष्टमिदमबुद्धिजमेव नारीणां रूपमिति भगवतीविषये प्रविबिम्बनमतिस्फुटमेव। तदाह आदाविति ॥ १० ॥

अत्र वसन्तोत्सवे ग्रामतरुणीनामयं वेशो जनमनःप्रमोदाय जायते इति वेशो नामायं जातिभेदः ॥ ११ ॥

व्यापारो यथा,

अग्रे गतेन वसतिं परिगृह्य रम्या-
मापात्यसैनिकनिराकरणाकुलेन ।
यान्तोऽन्यतः प्रुतकृतस्वरमाशु दूरा-
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥ १२ ॥

अत्र तादृशव्यापारे व्यापृतानामीदृशमेव स्वरूपं जायत इति व्यापारनामायं जातिभेदः ।

आश्रयेषु मुग्धयुवतिर्यथा,

सहिआहिं भणमाणा थणए लग्गं कुसुम्भ पुप्फन्ति ।
मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइं ॥ १३ ॥ (झ)

अत्र मुग्धवध्वाश्रितक्रियास्वरूपभणनात् इयं मुग्धाङ्गनाश्रिता जातिः ॥

(झ) सखिभिर्भण्यमाना स्तने लग्नं कुसुम्भपुष्पमिति ॥
मुग्धवधूर्हस्यते प्रस्फोटयन्ती नखव्रणान् ॥

अत्र वसन्तोत्सव इति । यद्यपि अत्र कालः पात्रं चास्ति तथापि संवाहणम उलिझविवर उराहइअम्बिरइ अऊणतालङ्कम् । मिटिला अन्तं सवणा अरम्भिसारेइ एक्कावि । इत्यादौ न सङ्करः कादाचित्कस्तु असौ गुण एव । वेषस्य कथं रञ्जकतेत्यवशिष्यते । तत्राह । जनमनःप्रमोदायेति । रुच्यर्थित्वव्युत्पत्तीनां प्रतिपक्षगतानामक्षुण्णत्वादिति भावः ॥ ११ ॥

अग्रे गतेनेति । अत्र उद्बाहुनेति यद्यपि अवस्थानमस्ति तथापि तत्परिहारेण उदाहरणमसङ्कीर्णम् । सहिआहिं भणमाणा थणए लग्गङ्कुसुम्भपुप्फन्ति । मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइम् । इत्यत्रैकस्याः कदाचित् वितर्कायेदमपि वाक्यं बहूनान्तु नेति बहुवचनस्वरसः । कुसुम्भकेसराणि उच्चेतुं बाहंबाहमसौ क्षेत्रं प्रविशतीति मन्यावना । मग्धा अपरिशीलिताभिमानिकमखा

अर्भकाश्रिता यथा,

आक्रोशन्नाह्वयन्नन्यानाधावन् मण्डलं रुदन्।
गाः कालयति दण्डेन डिम्भः शस्यावतारिणीः॥

अत्रार्भकाश्रितव्यापारस्वरूपोक्तेरियमर्भकाश्रिता जातिः॥१४॥

तिर्य्यगाश्रया यथा,

लीढ़व्यस्तविपाण्डुराग्रनखयोराकीर्णदीर्णं मुखम्
विन्यस्याग्रिमयोर्युगे चरणयोः सद्यो विभिन्नद्विपः।
एतस्मिन्मदगन्धवासितसटः सावज्ञतिर्य्यग्वलत्-
सृक्कान्ताहतिधूतलोलमधुपः कुञ्जेषु शेते हरिः॥

अत्र सिंहस्वरूपभणनादियं तिर्य्यगाश्रया जातिः॥ १५॥

नीचाश्रया यथा,

भद्रं ते सदृशं यदध्वगपतेः कीर्त्तिस्तवोद्घुष्यते
स्थाने रूपमनुत्तमं सुकृतिना दानेन कर्णो जितः।
इत्यालोच्य चिरं दृशा करुणया शीतातुरेण स्तुतः
पान्थेनैकपलालमुष्टिरुचिना गर्वायते हालिकः॥

अत्र हीनपात्रहालिकस्वरूपोक्तेरियं नीचाश्रया जातिः॥१६॥

वधूः प्रथमपरिणीता। प्रस्रीद्यमानमपि त्वया नापसरतीत्यहो तव सौकुमार्य्यमिति चाटुगर्भं हसितमतएव प्रियतया तस्यानुवन्धो वर्त्तमाननिर्देशेन व्यज्यते। एतदग्रिमोदाहरणव्याख्याने क्रियाव्यापारग्रहणमुपलक्षणमतो न व्यापारसङ्करः। अन्ये त्वाहुः। आश्रयावच्छेदेन बहिर्भावोऽत्र भेदहेतुरिति॥ १२—१४॥

लीढेति। व्यस्त विगतरुधिरम्। सावज्ञं तिर्यक् चलन्ती ये सृक्कणी-ताभ्यानाहता इति सम्बन्धः। यथैकत्र कुञ्जे स्वपतः स्वरूपं तथान्यत्रापीति बहुवचनरहस्यम्। अतएव न देशहेतु भङ्गा। अत्र सिंहेति। मदवास-नया विशेषितत्वादिति भावः॥ १५॥

भद्रमिति। करुणा कार्पण्यव्यञ्जकविशेषशालिनी। गर्वायते अगर्ववानेव सगर्ववान् भवति। शब्दादौ लक्षणतादर्थ्यलक्षणात्॥ १६॥

अत्र वसन्तोत्सवे ग्रामतरुणीनामयं वेशो जनमनःप्रमोदाय जायते इति वेशो नामायं जातिभेदः ॥ ११ ॥

व्यापारो यथा,

अग्रे गतेन वसतिं परिगृह्य रम्या-
मापात्यसैनिकनिराकरणाकुलेन ।
यान्तोऽन्यतः प्रुतकृतस्वरमाशु दूरा-
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥ १२ ॥

अत्र तादृशव्यापारे व्यापृतानामीदृशमेव स्वरूपं जायत इति व्यापारनामायं जातिभेदः ।

आश्रयेषु मुग्धयुवतिर्यथा,

सहिआहिं भणमाणा थणए लग्गं कुसुम्भ पुप्फन्ति ।
मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइं ॥ १३ ॥ (झ)

अत्र मुग्धवध्वाश्रितक्रियास्वरूपभणनात् इयं मुग्धाङ्गनाश्रिता जातिः ॥

(झ) सखिभिर्भण्यमाना स्तने लग्नं कुसुम्भपुष्पमिति ॥
मुग्धवधूर्हस्यते प्रस्फोटयन्ती नखव्रणान् ॥

अत्र वसन्तोत्सव इति । यद्यपि अत्र कालः पात्रं चास्ति तथापि संवाह्यमानं उलिझविवर उराहइअम्बिरइ अऊणतालङ्कम् । मिटिला अन्तं सवणा अरम्भिसारिइ एक्कावि । इत्यादौ न सङ्करः कादाचित्कस्तु असौ गुण एव । वेषस्य कथं रञ्जकतेत्यवशिष्यते । तत्राह । जनमनःप्रमोदायेति । रुच्यर्थित्वव्युत्पत्तीनां प्रतिपत्तृगतानामनुसत्वादिति भावः ॥ ११ ॥

अग्रे गतेनेति । अत्र उद्बाहुनेति यद्यपि अवस्थानमस्ति तथापि तत्परिहारेण उदाहरणमसङ्कीर्णम् । सहिआहिं भणमाणा थणए लग्गङ्कुसुम्भपुप्फन्ति । मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइम् । इत्यत्रैकस्याः कदाचित् वितर्कायेदमपि वाक्यं बहनान्तु नेति बहुवचनस्वरसः । कुसुम्भकेसराणि उच्चेतुं वारंवारमसौ चेतं प्रविशतीति सम्भावना । मग्धा अपरिशीलिताभिमानिकमखा

साधनहेतुर्यथा,

उपनिहितहलीषासार्गलद्वारमारात्
परिचकितपुरन्ध्रीसारिताभ्यर्णभाण्डम् ।
पवनरयतिरस्त्रीवारिधाराः प्रतीच्छन्
विशति बलितशृङ्गः पामरागारमुच्चा ॥

अत्र जायमानक्रियाहेतुभूतयोः कर्तृकर्मणोः साधनयोः स्वरूपवर्णनादयं साधनहेतुर्नाम जातिभेदः ॥ २० ॥

प्रसिद्धहेतुव्यावृत्त्या यत् किञ्चित् कारणान्तरम् ।
यच्च स्वाभाविकं वापि विभाव्यं सा विभावना ॥ २१ ॥
शुद्धा चित्रा विचित्रा च त्रिविधा सा निगद्यते ।
शुद्धा यत्रैकमुद्दिश्य हेतुरेको निवर्त्तते ॥ २२ ॥

सामानाधिकरण्यात् स्पर्शस्य स्पर्शत्वाविशेषे तु शक्तिरेव प्रयोजिका वाच्येत्यर्थः ॥ १९ ॥

उपनिहितेति । अगारद्वारस्य हलीशावरुद्धतया दुष्प्रवेशत्वमतएव वह्निश्चिरं विलम्बात् । प्रत्येषणवेशनयोर्वर्त्तमानता । उपलक्षणं चेदं तेन करणादयोऽप्युदाहार्य्याः ॥ २० ॥

पक्षे स्वभावपर्य्यवसानमस्तीति जातेः किञ्चिदपकृष्टा विभावना विभावयितुमाह । प्रसिद्धेति प्रसिद्धस्पर्शहेतोर्विभाव्यतया प्रसिद्धग्रहण नियमेन तद्भावापत्तिमूलत्वाच्छाया: तेन न विरोधः । तथा हि यमह अवहि अतुङ्गमित्यादौ वर्द्धनजन्यमन्यदेव तुङ्गत्वमन्यच्च पारमेश्वरमाज्ञानिकमिति तयोरभेदाध्यवसायः । एतदेवाभिसन्धाय काश्मीरकैः अतिशयोक्तिः अस्या मूलमुक्ता । यदिति निपातो यत्रार्थे । यद्यपि कारणाभावेऽपि कार्य्योत्पत्तिरित्येव लक्षणं तथापि मह्या सज्ञाकरणप्रयोजनं किमित्याशङ्कायां इयं विभाव्यनाह । तदयमत्र सत्येपी यथोक्ता तावद्विभावना । सा द्वयी । कारणान्तरपर्य्यवसिता स्वभावपर्य्यवसिताचेति ॥ २१ ॥ २२ ॥

अत्र वसन्तोत्सवे ग्रामतरुणीनामयं वेशो जनमनःप्रमोदाय जायते इति वेशो नामायं जातिभेदः ॥ ११ ॥

व्यापारो यथा,

अग्रे गतेन वसतिं परिगृह्य रम्या-
मापात्यसैनिकनिराकरणाकुलेन ।
यान्तोऽन्यतः प्रुतकृतस्वरमाशु दूरा-
दुद्बाहुना जुहुविरे मुहुरात्मवर्ग्याः ॥ १२ ॥

अत्र तादृशव्यापारे व्यापृतानामीदृशमेव स्वरूपं जायत इति व्यापारनामायं जातिभेदः ।

आश्रयेषु मुग्धयुवतिर्यथा,

सहिआहिं भणमाणा थणए लग्गं कुसुम्भ पुप्फन्ति ।
मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइं ॥ १३ ॥ (झ)

अत्र मुग्धवध्वाश्रितक्रियास्वरूपभणनात् इयं मुग्धाङ्गनाश्रिता जातिः ॥

(झ) सखिभिर्भण्यमाना स्तने लग्नं कुसुम्भपुष्पमिति ॥
मुग्धवधूर्हस्यते प्रस्फोटयन्ती नखव्रणान् ॥

अत्र वसन्तोत्सव इति । यद्यपि अत्र कालः पात्रं चास्ति तथापि संवाहनम उलिझविवर उराहइअम्बिरइ अऊणतालङ्कम् । मिटिला अन्तं सवणा अरम्भिसारेइ एक्कावि । इत्यादौ न सङ्करः कादाचित्कस्तु असौ गुण एव । वेषस्य कथं रञ्जकतेत्यवशिष्यते । तत्राह । जनमनःप्रमोदायेति । रुच्यर्थित्वव्युत्पत्तीनां प्रतिपक्षगतानामक्षुण्णत्वादिति भावः ॥ ११ ॥

अग्रे गतेनेति । अत्र उद्बाहुनेति यद्यपि अवस्थानमस्ति तथापि तत्परिहारेण उदाहरणमसङ्कीर्णम् । सहिआहिं भणमाणा थणए लग्गङ्कुसुम्भपुप्फन्ति । मुद्धबहुआ हसिज्जइ पप्फोडन्ती णहवणाइम् । इत्यत्रैकस्याः कदाचित् वितर्कायेदमपि वाक्यं बहूनान्तु नेति बहुवचनस्वरसः । कुसुम्भकेसराणि उच्चेतुं बारंबारममी स्तनं प्रविशन्तीति मन्यावना । मग्धा अपरिशीलिताभिमानिकमखा

प्रसिद्धो हेतुः संभृतत्वादिर्व्यावर्त्यते, कारणान्तरञ्च स्तनोद्भेद-धातूपचयलावण्यलक्ष्मीलाभादिर्विभाव्यते। सेयं चित्रा नाम कारणान्तरविभावना ॥ २६ ॥

सैव स्वाभाविकत्वविभावनायां यथा,

णमह अविट्ठिअतुङ्गं अविसारिअवित्थअं असीणअगहिरं।
अप्पलहुअपरिसल्लं असाअपरमत्थपाअडं महुमहणं ॥ -(अ)

अत्र एकमेव मधुमथनमुद्दिश्य अनेकस्तुङ्गत्वादेः प्रबहुत्वादिः प्रसिद्धो हेतुर्व्यावर्त्यते, स्वाभाविकत्वञ्च तं प्रति एषां विभाव्यते। सेयं चित्रा नाम स्वाभाविकत्वविभावनायां विभावना ॥ २७ ॥

तथैव गौर्भङ्ग्या यथा,

वक्त्रं निसर्गसुरभि वपुरव्याजसुन्दरम्।
अकारणरिपुस्तस्या निर्निमित्तं सुहृच्च मे ॥

(अ) नमत अविष्ठितुङ्गम् अप्रसारिताविस्तृतम् अन्यूनगभीरम्।
अप्रलघुकपरिश्लक्ष्णमज्ञातपरमार्थप्रकटं मधुमथनम् ॥

असम्भृतमिति। ननु मण्डनस्य सम्भरणपूर्वकतया प्रसिद्धेरस्तु विभावना। अनासवाख्यं करणं मदस्य कामस्य पुष्पव्यतिरिक्तमस्त्रमित्यत्र तु कथम्। तथा हि। करणमिति करणे भावे वा ल्युट्। आद्ये मदस्य करणमासवो वयन्तु ततो भिन्नमिति कदाचित् व्यतिरेकः स्यात् न तु विभावना। द्वितीयेऽपि वयो मदस्य क्रिया आसवनाम्नो न भवतीति न सङ्गतम्। एवं पुष्पव्यतिरिक्तमस्त्रमित्यत्रापि विकल्प्य यथायथं दूषणं वाच्यम्। तत्कथमेतत्। उच्यते। करणं क्रिया आसवमासव्यातीत्यासवाख्यम्। स्त्र्याख्यवत्प्रत्ययविधिः। न तथाभूतमनासवाख्यम्। हेतुतया न क्वचिदासवबोधकम्। तथा हेतुप्रतिषेध एव भङ्ग्या दर्शितो भवति। अस्त्रमपि क्रियारूपं तत्पुष्पव्यतिरिक्तं पुष्पच्युतं विना पुष्पेभ्य इति पूर्ववन्नेयम्। स्तनोद्भेदित्यादौ न अर्थसन्देहः ॥ २६ ॥ २७ ॥

अत्र उत्तरयोर्विरहसमागमादिकारणान्तरविभावनयोः स्वाभाविकीभ्यां प्राग्विभावनाभ्यां यथासङ्ख्यं विशेष उक्तः। सेयं विभावनया एव विभावनायां विशेषोक्तेस्तथैव गौर्भङ्ग्या विचित्रा नाम विभावना भवति ॥ २८ ॥

सैवान्यया गौर्भङ्ग्या यथा,

वनेचराणां वनितासखानां दरीगृहोत्सङ्गनिषक्तभासः।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥

अत्र अतैलपूराः सुरतप्रदीपा इति स्वाभाविकत्वविभावनायां शेषपदार्थैः अविभावनारूपैर्विशेष उक्तः। सेयमन्यया गौर्भङ्ग्या विचित्रा नाम विभावना भवति ॥ २९ ॥

क्रियायाः कारणं हेतुः कारको ज्ञापकश्च सः।
अभावश्चित्रहेतुश्च चतुर्विध इहेष्यते ॥ ३० ॥

वक्त्र निसर्गसुरभीति। तस्या यथोक्ते वक्त्रवपुषी समाकारणरिपुर्निनिमित्तसमुद्भवेत्यन्वयी विवक्षितप्रतीति लाभाच्च न अर्थान्तरैकवाचकत्वलक्षणो दोषः। यथासंख्यमिति। तयोः अथ एकैकं प्रति सम्पादनलक्षणविशेषार्पणलक्षणत्वात् ॥२८॥

शेषपदार्थैरिति वनितासखत्वादिभिः सुरतादुपपादकैः ॥२९॥

हेतु प्रतिषेधी विभावनायामुक्तोऽथ हेतुरेव क इत्यपेक्षायां हेतुलक्षणमाह क्रियायाः कारण हेतुरिति। उपपत्तौ क्रियायामेव सर्वस्य निमित्तभावो निरूप्यत इत्यभिसन्धाय क्रियाया इत्युक्तमिति कश्चित् तदसत्। द्रव्यगुणक्रियाविषये हेतुः क्रियामात्रविषयश्च कारकमिति प्रकीर्णकवृत्तौ विभागकरणात् क्रियाग्रहणस्येह निष्फल स्यात्। तस्मादत्र क्रियां प्रति अवधिभावो निरूप्यते तत्र द्वयी गतिः निमित्तत्वमात्रविवक्षा कारकत्वविवक्षा वा आद्येऽपि आश्रितावधिभावस्य वस्त्वन्तरपरहेतुभावविवक्षा अवस्तुत्वविवक्षा वा द्वितीयेऽपि कारकत्वक्रियानुबन्धिव्यापारत्वम्। प्रधानक्रियानुकूलक्रियान्तरसमावेश इति यावत्। तद् द्विविधं शब्दाभिहितमतथाभूतञ्च आद्यं कारकविभक्तेर्विषयो द्वितीयं हेतु विभक्तेः द्वयमपि च क्रियाविषयमेव। षण्णामपि कारकाणां क्रियाघटितमूर्त्तित्वात्। अवस्तुभूतं तु निमित्तमभावात्मकतया न विक्रियते। विकाराभावाच्च न क्रियाविशिष्टमतथाभावे। न च कारकमिति तृतीय एव प्रकारः प्रसिद्धकार्य्य-

यः प्रवृत्तिं निवृत्तिञ्च प्रयुक्तिं चान्तरा विशन् ।
उदासीनोऽपि वा कुर्य्यात् कारकं तत् प्रचक्षते ॥३१॥

तेषु प्रवर्त्तकः क्रियाविष्टो यथा,

अयमान्दोलितप्रौढचन्दनद्रुमपल्लवः ।
उत्पादयति सर्वस्य प्रीतिं मलयमारुतः ॥

सोऽयं यथोक्तो मलयमारुतः प्रीत्युत्पादनक्रियासमावेशात् प्रवर्त्तको नाम कारकहेतुभेदः ॥ ३२ ॥

स एव क्रियानाविष्टो यथा,

तस्य राज्ञः प्रभावेन तदुद्यानानि जज्ञिरे ।
आर्द्रांशुकप्रबालानामास्पदं सुरशाखिनाम् ॥

अत्र प्रभावः क्रियायामनिविशमान एव हेतौ तृतीयां प्रयोजयति न कर्त्तरीति क्रियायामनाविष्टोऽयं कारकहेतुभेदः ॥ ३३ ॥

निवर्त्तकक्रियाविष्टो यथा,

चन्दनारण्यमाधूय स्पृष्ट्वा मलयनिर्झरान् ।
पथिकानां प्रमाथाय पवनोऽयमुपस्थितः ॥

कारणभावविपर्य्यासेनोपनिबद्ध्यमानो हेतुरास्थ्यैकारितया चित्र आरोपितमपि च हेतुत्वं हेतुत्वमेवेति भवति चतुर्थः प्रकारो बहिरसम्भाव्यमानस्यापि कविप्रतिभासंरम्भोत्थाप्यतया चमत्कारविशेषार्पणादृत्यैव अलङ्कारता । यदाह । को हि प्रतीतिमात्रकाव्ये वस्तुस्थितिं भावयेदिति । तदेतत् सर्वमभिसन्धाय विभागमाह । कारक इत्यादि ॥ ३० ॥

असतः सत्ताप्रवृत्तिः सतोऽपगमो निवृत्तिः प्रवर्त्तमानस्य प्रवर्त्तनाप्रयुक्तिः अन्तराविशन्नुपात्तक्रिय उदासीनोऽतथाभूतः । तेन कारकस्य षट् प्रकाराः ॥ ३१ ॥ ३२ ॥

तस्य राज्ञः प्रभावेनेत्यत्र सदपि कर्त्तृत्वमविवक्षितमती हेतुमात्रविवक्षायां याज्ञिकी तृतीया भवतीत्याह । हेतौ तृतीयामिति । करणभावस्तु सम्भावित एव । प्रभावमात्रस्य तत्क्रियाव्यभिचारात् ॥ ३३ ॥

अत्रैवंविधस्य पवनस्य पथिकप्रमाथसाधनक्रियायां कर्त्तृत्वेनावेशान्निवर्त्तको नामायमाविष्टक्रियः कारकहेतुभेदः ॥ ३४॥

स एव क्रियानाविष्टो यथा,

प्रजागरात् खिलीभूतस्तस्याः स्वप्नसमागमः ।
वाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपि ॥

अत्र समागमनिवृत्तावनिविशमानः प्रजागरः तृतीयार्थे पञ्चमीं प्रयोजयति । वाष्पः पुनर्दानक्रियावेशाद्दर्शनक्रियायामनाविशन् कर्मसम्बन्धात् ताम् अप्रधानभावेन च उपगृह्णाति । इति अनाविष्टक्रियो नाम निवर्त्तकोऽयं कारकहेतुभेदः ॥ ३५॥

प्रयोजकः क्रियाविष्टो यथा,

तस्मिन् जीवति दुर्द्धर्षे हतमप्यहतं बलम् ।
हनूमत्युज्झितप्राणे जीवन्तोऽपि मृता वयम् ॥

अत्र बलप्रत्युज्जीवनमरणक्रिययोः सप्तमीवाच्यनैमित्तिकाधिकरणकारकभावेन हनूमानाविशन् प्रयोजको भवतीति क्रियाविष्टोऽयं प्रयोजको नाम कारकहेतुभेदः ॥ ३६ ॥

प्रमाथसाधनक्रियायां कर्त्तृत्वेनेति निष्ठाप्रत्ययेनोपात्तेनेति भावः ॥ ३४ ॥

खिलीभावो निवृत्तिः । तृतीयार्थ इति । हेतावबधित्वाप्रतीतेः अपादानभावेन सम्भावितः । दानक्रियेति । स्यादत्र दर्शनक्रियासमावेशो यदि दानक्रियाया वशः स्यात् । स एव तु नास्ति नञा निषेधादित्यर्थः ॥ ३५ ॥

तस्मिन् जीवतीति । जीवनमरणयोर्बलस्यैव स्वातन्त्र्यं हनूमान् प्रयोजयति प्रयोजकता चास्य ते एव जीवत्युज्झितप्राण इति पदाभ्यामुपात्तं चमत्कारकमिदं भवतीत्याह । सप्तमीवाच्येति । ननु चाङ्गुल्यग्रे मदकलघटां दर्शयन्तीव धूर्त्ता इत्यादौ काल्पनिकादावपि सप्तमीभावात् कथं कारकतेत्यत आह । नैमित्तिकेति । अन्यस्यासम्भवादिति भावः ॥ ३६ ॥

स एव क्रियानाविष्टो यथा,

मानयोग्यां करोमीति प्रियस्थाने स्थितां सखीम् ।
बाला भ्रूभङ्गजिह्माक्षी पश्यति स्फुरिताधरा ॥

अत्र मानाभ्यासक्रियाया भ्रूभङ्गजिह्माक्षिप्रेक्षणादिरूपाया आत्मन्येवात्मनः समावेशो न भवतीति क्रियानाविष्टोऽयमिति शब्दाभिधेयप्रयोजको नाम कारकहेतुभेदः ॥३७॥

द्वितीया च तृतीया च चतुर्थी सप्तमी च यम् ।
क्रियानाविष्टमाचष्टे लक्षणं ज्ञापकञ्च यः ॥ ३८ ॥

स द्वितीयावाच्यो यथा,

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रबालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥

मानयोग्यामिति । भ्रूभङ्गजिह्माक्षिस्फुरिताधरादिप्रेक्षणारूपायां मानाभ्यासक्रियायाम् बालायाः स्वातन्त्र्यम् । तादृशीं तु तामिति शब्दनिर्देश्योऽभिप्रायविशेषः प्रयुङ्क्ते तस्य तु न क्रियान्तरमुपात्तमुपात्तायास्तु मानक्रियायाः स्वात्मनि समावेशोऽनुपपन्नः । अभिप्रायोऽपि हि व्यापारप्रचयरूपक्रियान्तर्भूत एव यदाह महाभाष्यकारः या किञ्चित्तदभिसन्धिपूर्वकं प्रेषणमध्येषणं वा [illegible]स्य इत्यर्थः । स्मरणादिकञ्चास्य व्यापारः सम्भवतीति अतो नाकारकत्वं वाच्यम् । तदेतदभिसन्धायाह । आत्मन्येवात्मन इति ॥ ३७ ॥

इह पञ्चैव लक्षणे विभक्तयो विहिताः तद्यथा अनुर्लक्षणे लक्षणेत्थम्भूतेत्यादिना संज्ञां विधाय कर्मप्रवचनीययुक्त इति द्वितीया । येनाङ्गविकार इत्यम्भूतलक्षण इत्येताभ्यां तृतीया । उत्पातेन ज्ञापिते इति चतुर्थी यस्य च भावेन भावलक्षणमिति सप्तमी । षष्ठी च अनादरे इति षष्ठी तदेतदाह । द्वितीया चेति । षष्ठीमग्रे वक्ष्यति षष्ठी च अनादर इति सूत्रे चकारस्य समुच्चयतया न प्रधाना सेति नात्र तुल्यकक्षतया गणिता ॥ ३८ ॥

क्रियानाविष्टं स्वव्यापारशून्यं तटस्थमेव यद्व्याप्रियते । तेन कारकाद्भेदः । अत्र हि क्रियानाविष्टस्य एव इन्दुमत्या इति इन्दुमतीसालम्बनविभावीकृत्यमानाः शृङ्गारचेष्टास्तयैव अवच्छिन्यन्ते । तदवस्था एव च लक्ष्यन्ते तत्रो भवति हेतुत्वं लक्षण-

अत्र क्रियानाविष्टतयैव इन्दुमत्यां महीपतीनां शृङ्गारचेष्टा भवन्त्यो लक्ष्यन्ते। सोऽयं लक्षणहेतुः प्रतिना योगे द्वितीयामुत्पादयति ॥ ३९ ॥

तृतीयावाच्यमित्थम्भूतलक्षणं यथा,

कण्ठे कालः करस्थेन कपालेनेन्दुशेखरः।
जटाभिः स्निग्धताम्राभिराविरासीद् वृषध्वजः ॥

अत्र कण्ठे काल इत्यादीनि क्रियायामनिविशमानान्येव वृषध्वजं विज्ञापयन्ति, यथा जटाभिस्तापस इति ॥ ४० ॥

तृतीयावाच्य एव अङ्गविकारलक्षणं यथा,

स बाल आसीद्वपुषा चतुर्भुजो मुखेन पूर्णेन्दुनिभस्त्रिलोचनः।
युवा कराक्रान्तमहीभृदुच्चकैरसंशयं सम्प्रति तेजसा रविः ॥

त्वमवधित्वं चेति। ननु कथमत्र द्वितीया। यावता हेतुत्वात् तृतीयया भवितव्यामित्यत आह। द्वितीयामिति। नाप्राप्तायां तृतीयायामियं विधीयमानाबलवती तां बाधत इत्यर्थः ॥ ३९ ॥

अत्र कण्ठे काल इत्यादीनीति। यद्यपि कपालेन जटाभिरित्येव उदाहरणं तथापि प्रसङ्गादितरद्व्याख्यानम्। ज्ञापकत्वमुभयत्रापि तुल्यविभक्तिवाच्यतायान्तु विशेषः। तेन अन्योऽपि एवं जातीयो लक्षणप्रकारः स्वयमूहनीय इत्युक्तं भवति यद्वक्ष्यति। उपलक्षणञ्च एतदित्यादिना। उक्तमेव प्रसिद्धोदाहरणेन द्रढयति। यथा जटाभिरिति। यथा हि इत्थम्भूतस्य तेनैव प्रकारेण प्रकारवती लक्षणं जटा भवन्ति तथेहापि कपालादिकमिति भावः। तृतीया वाच्य एवेति। सूत्रे अङ्गपदेन अङ्गी लक्ष्यते। तस्य च सम्बन्धिनियमात् अङ्गवाचिनः तृतीया भवति। अङ्गं च द्विविधमाजानिकमौपचारिकं च द्वयमपि इह विवक्षितं विकारादिकं च इत्थम्भूतलक्षणमेवेदम्। अतएव सूत्रक्रमो नादृत इत्याशयवान् व्याचष्टे। अत्र वपुषेति। विकृतिरवस्थान्तरप्राप्तिः। गौनासायेति। ननु उत्पातेनाविष्टेन यज्ज्ञाप्यते तत्र चतुर्थीति लक्षणमेव अस्य अवाच्यं प्रतिभाति नैतत् नैतत् लक्ष्यलक्षणभावोऽसौ अभिधीयते न तु लक्ष्ये ततश्च यतो विधीयते तस्य लक्षणीयतामर्यादितरस्य लक्षणतां बोधयतीति। अगदरजः प्रभृतयस्तु कथम् अमङ्गलरूपा इत्यवशिष्यते तत्राह। अत्र गौर्या इत्यादि। ननु तथापि लक्षण-

अत्र वपुषा चतुर्भुजो मुखेन त्रिलोचनस्तेजसा रविः इति अङ्गविकारैः अङ्गिनो विकृतिर्लक्ष्यते, यथा अक्ष्णा काण इति ॥ ४१ ॥

चतुर्थीवाच्यमुत्पातलक्षणं यथा,

गोनासाय नियोजितागदरजाः सर्पाय बद्धौषधिः।
कण्ठस्थाय विषाय वीर्य्यमहते पाणौ मणीन् बिभ्रती।
भर्त्तुर्भूतगणाय गोत्रजरतीनिर्दिष्टमन्त्राक्षरा
रक्षत्वद्रिसुता विवाहसमये प्रीता च भीता च वः ॥

अत्र गौर्य्या विवाहमङ्गलानौचित्येन उत्पातरूपैः अगदरजोनियोगादिभिर्भगवद्गता गोनासादयो ज्ञाप्यन्ते। यथा वाताय कपिला विद्युदिति। ततश्च उत्पातेन ज्ञाप्यमान इति सम्बन्धस्य उभयनिष्ठत्वात् तादर्थ्य इव लक्ष्यवाचिनश्चतुर्थी न लक्षणवाचिनः। तृतीयाविषयापहारात् एकयैव विभक्त्या उभयगतस्यापि सम्बन्धस्य राज्ञः पुरुष इतिवदुक्तत्वात् तृतीयापि न भवति ॥ ४२ ॥

सप्तमीवाच्यं भावलक्षणं यथा,

इति शासति सेनान्यां गच्छतस्ताननेकधा।
निषिध्य हसता किञ्चित् तस्थे तत्रान्धकारिणा ॥

अत्र सेनान्यः पलायमानगणानुशासनक्रियायाम् अन्धकारैः

वाचिन एव चतुर्थीति कथमवसितमित्यत आह। ततश्चेति। यथा तादर्थ्यस्य उभयनिष्ठत्वेऽपि कङ्कणाय कनकमित्यत्र कार्य्यवाचिन एव चतुर्थी न तु कारणवाचिनस्तथेहापि सम्बन्धस्य उभयाश्रयत्वेऽपि लक्ष्यवाचिन एव चतुर्थी न तु लक्षणवाचिन इत्यर्थः। तर्हि तृतीया कथं न भवतीत्यत आह। एकया एव चेति। सम्बन्धस्य सम्बन्धिनावेव विशेषत्वेन लक्षणमपि चतुर्थ्यैव प्रतिपादयत्यथ उक्तार्थत्वात् कथं तृतीया भवतीति शुद्धप्रातिपदिकार्थाभिधाने प्रथमेति भावः ॥ ४० ॥ ४१ ॥

यस्य च भावेन भावलक्षणमित्यस्य सूत्रस्यार्थस्तु यस्य वस्तुनो भावेन क्रियया वस्त्वन्तरस्य भावः क्रिया लक्ष्यते तद्वचनात् सप्तमीत्यत आह। अत्र सेनान्य

स्वप्रकाशनक्रिया लक्ष्यते। यथा गोषु दुह्यमानासु गत इति। उपलक्षणञ्चैतत्। तेन अन्यदपि भावलक्षणं शस्त्राद्यभिधेयमुपलक्ष्यते यथात्रैव हसता तस्य इति ॥ ४३ ॥

यथा वा,

यज्वभिः संभृतं हव्यं विततेष्वध्वरेषु सः।
जातवेदोमुखान् मायी मिषतामाच्छिनत्ति नः ॥

इति अनादरोपाधिके भावलक्षणे षष्ठी अपि भवतीति ॥

अभावः प्रागभावादिभेदेनेह चतुर्विधः।
घटाभावादिभेदात्तु तस्य संख्या न विद्यते ॥ ४४ ॥

तेषु प्रागभावो यथा,

अनभ्यासेन विद्यानामसंसर्गेण धीमताम्।
अनिग्रहेण चाक्षाणां व्यसनं जायते नृणाम् ॥

अत्र विद्यानभ्यासादेः प्रागभावस्य व्यसनादिकारणत्वम् ॥४५॥

प्रध्वंसाभावो यथा,

गतः कामकथोन्मादो गलितो यौवनज्वरः।
गतो मोहश्चुता तृष्णा कृतं पुण्याश्रमे मनः ॥

इति। हसता तस्य इति लक्षणे शतृविधिः। लक्षणहेत्वोः क्रियाया इति सूत्रणात् ॥ ४२ । ४३ ॥

अभावसामान्यसभावप्रमाणनिरूपणप्रस्तावे "असत्तायाः पदार्थानामिति" अनेन वक्ष्यति। तेनात्र सामान्यलक्षणं न कृतवान्। स द्विविधस्तादात्म्यप्रतियोगिकः संसर्गप्रतियोगिकश्च। द्वितीयस्त्रिधा। प्रागभावप्रध्वंसात्यन्ताभावभेदात्। तदाह। प्रागभावादिरिति। ननु न प्रागभावादिरेकोऽस्ति प्रतियोगिभेदेन भेदादित्यत आह। घटादीति। अनेन रूपेण संख्या नास्त्येव सामान्य तु प्रागभावत्वादिकमाश्रित्य चातुर्विध्यं सोऽयन्तु शब्दस्यार्थः ॥ ४४ ॥

अनभ्यासेनेति। यावत् विद्यां न अभ्यस्यन्ति तावन्न धीमद्भिः संसृज्यन्ते यावच्च अक्षाणि न निगृह्णन्ति तावद्व्यसनमिति विवक्षितम्। तेन नात्यन्ताभावसङ्करः।

अत्र कामकथोन्मादगमनादेः प्रध्वंसाभावस्य पुण्याश्रमानुसन्धानकारणत्वम् ॥४६॥

इतरेतराभावो यथा,

वनान्यमूनि न गृहाण्येता नद्यो न योषितः।
मृगा इमे न दायादास्तन्मे नन्दति मानसम् ॥

अत्र वनानि अमूनि न गृहाणीत्यादेरितरेतराभावस्य मनःप्रमोदकारणत्वम् ॥ ४७ ॥

अत्यन्ताभावो यथा,

अत्यन्तमसदार्य्याणामनालोचितचेष्टितम्।
अतस्तेषु विवर्द्धन्ते निर्विबन्धा विभूतयः ॥

अत्रानालोचितचेष्टितस्यात्यन्ताभावो विभूतीनां निर्विघ्नवृद्धिहेतुः ॥ ४८ ॥

एतेनाभावाभावोऽपि व्याख्यातः।

तत्र प्रागभावाभावो यथा,

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥

आराध्यास्वाहुः। शिचापरस्यास्य श्लोकस्यापि अन्यप्रयोजनकतया न अत्यन्ताभावसङ्कर इति ॥ ४५ ॥ ४६ ॥

वनान्यमूनीति। इदमिदन्न भवतीति प्रतीतिसाक्षिक एवान्योन्याभावः। वैधर्म्यन्तु भेदाख्यमलङ्कारान्तरं किञ्चिद्धर्मसन्तर्भाव्यैव स्वरूपस्यापि भेदव्यवहारपात्रता ॥ ४७ ४८ ॥

वस्तुन उत्पाद इति। भाव एव अभावाभावव्यवहारभूमिः। अभावव्यवहारविषयमात्रस्य च विभागः कृतोऽस्ति च प्रागभावादेः प्रध्वंसादिरूपतेति न न्यूनता विभागवाक्यस्य आशङ्कनीया। तेनेति। भूतभव्यसमुच्चारणे भूतं भव्यायेति-

अत्र वस्तुन उत्पादः प्रागभावाभाव उच्यते। तेनेह सहकारमञ्जरीणामुद्भेदस्य पथिकनारीणां मरणे कारणत्वम् ॥४९॥

प्रध्वंसाभावाभावो यथा,

पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनम्
पायाद्वः परिरब्धमब्धिदुहितुः कान्तेन कान्तं वपुः।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
यस्मै सोऽच्युतनाभिपद्मवसतिर्वेधाः शिवं ध्यायति ॥

अत्र यथोक्तेन वपुषा योऽयमालिङ्गनेऽपि विधिनिवासनाभिपङ्कजानुपघातः, स इह वस्तुनोऽवस्थानमेव प्रध्वंसाभावाभाव उच्यते। स चेहाच्युतनाभिपङ्कजनिवासिनो विधेर्मनोनिर्वाणकारणं भवति ॥ ५० ॥

विदूरकार्य्यः सहजः कार्य्यानन्तरजस्तथा।
युक्तो न युक्त इत्येवमसङ्ख्यास्त्रिहेतवः ॥ ५१ ॥

न्यायात् मञ्जरीणामुद्भेदस्य कारकतालाभोऽन्यथावाक्यभेदेन किञ्चित् स्यात्। प्रागभावात् प्रागभावाभावभङ्ग्या च समस्तमञ्जरीसमुद्भेदेन वसन्तप्रौढिध्वननात् प्रकृतविप्रलम्भः पोषः ॥ ४९ ॥

पीन श्रोणीति। निभृतं दुर्लक्ष्यम्। अब्धिदुहितापि सर्वाङ्गीणमाश्लेषमभिलषति भगवानपीति कान्तेन कान्तमित्येताभ्यामभिव्यज्यते। उपलक्षणञ्च इदम्। तादात्म्यात्यन्ताभावाभावौ अपि उदाहरणीयौ। यथा। अवनिरुदकं तेजो वायुर्नभः शशिभास्करौ पुरुष इति यत्कैश्चिद्भिन्ना वदन्ति तनूस्तव तदनघवचो वैचित्रीभिर्निरावरणस्य ते विदधति यः पूरोन्मीलन्मृषाभिरिरापमाम्। अत्र भिन्न इत्यन्योऽन्याभावमुपन्यस्य निरावरणस्य मृषेत्येताभ्यां निषेधः। यथा च। न विद्यते यद्यपि सर्ववासनागुणानुबन्धिप्रतिभानमद्भुतम्। श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्। अत्र न विद्यत इति अत्यन्ताभावमुपन्यस्य कमपीति प्रतिभासताभिधानेन प्रतिषेधः ॥ ५० ॥

विदूरकार्य्य इति। कार्यान्तरभाव्यवस्थासम्पाद्यं प्रागवस्थावत एव कार्य्यम्

तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः ।
कार्य्याः काव्येषु वैचित्र्यं यथा ते कर्त्तुमीशते ॥५२॥

तेषु विदूरकार्य्यो यथा,

अनश्रुवानेन युगोपमानमलब्धमौर्वीकिणलाञ्छनेन ।
अस्पृष्टखड्गत्वरुणापि चामीद्रक्षावती तस्य भुजेन भूमिः ॥

सोऽयं बाल्य एव नवयौवनकार्य्यकरणात् विदूरकार्य्यो नाम चित्रहेतुः ॥ ५३ ॥

सहजो यथा,

समसेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलञ्चारिमण्डलम् ॥

अत्र राज्याभिषेकरिपुमण्डलाक्रमणयोर्हेतुमद्भावेन सत्यपि पौर्वापर्य्ये क्षिप्रकारित्वात्तुल्यमेव कार्य्यकारणभावो विवक्षितः । तेन सहजो नाम अयं चित्रहेतुः ॥ ५४ ॥

कार्य्यानन्तरजो यथा,

पश्चात् पश्यस्य किरणानुदीर्णं चन्द्रमण्डलम् ।
प्रागेव हरिणाक्षीणामुदीर्णो रागसागरः ॥

अत्र चन्द्रोदयलक्षणाद्धेतोः पूर्वकालमेव रागसागर उदीर्ण इति कार्य्यस्य उदयलाभः । स इह गुणवृत्त्याश्रयणेन हेतावतिशयं पुष्यतीत्ययं कार्य्यानन्तरजो नाम चित्रहेतुः ॥ ५५ ॥

उपजायमानं यत्रोच्यते स विदूरकार्य्यस्तच्च कार्य्यं शक्तिविशेषाधीनमिति बाल्येऽपि प्रभावातिशयदर्शनाद्भुतेनैव रक्षाकृतेति गौणवृत्तिव्यपाश्रयता । सहजः कार्य्यं सहोत्पत्तिकतया निबद्धः । कारणशक्तिप्रकर्षात् समकालमिव कार्य्यं प्रति भासते तेन हेतु शक्तिप्रकर्षाभिव्यक्तिरत्र मूलम् । यदयं ददति यथा वा कर्त्तुमीशत इति एव मनन्तरजेऽपि । किं कारणं पूर्वमुत कार्य्यमस्ति स एव व्यङ्ग्यः । युक्तेऽपि कारणगुणानुविधायिकार्य्यमसदेवारोप्यते न प्रसुक्तेति तदेव विपरीतमिति गौणवृत्त्याश्रयता ॥ ५१—५४ ॥

युक्तो यथा,

गुणानुरागमिश्रेण यशसा ते प्रसर्पता ।
दिग्वधूनां मुखे जातमकस्मादर्द्धकुङ्कुमम् ॥

अत्र दिग्वधूमुखेषु ते गुणानुरागः कुङ्कुमं यशस्तु चन्दनमित्ययं युक्तो नाम गौणवृत्तिव्यपाश्रयश्चित्रहेतुः ॥ ५६ ॥

नयुक्तो यथा,

न मीलयति पद्मानि न नभोऽप्यवगाहते ।
त्वन्मुखेन्दुर्ममासूनां हरणायैव यस्यति ॥

अत्र मुखेन्दोः पद्मनिमीलादि न युज्यते इति नयुक्तो नाम चित्रहेतुः ॥ ५७ ॥

एवं शब्दस्य प्रकारवाचित्वात् व्यधिकरणादयः प्रयुज्यन्ते यथा,

सा बाला वयमप्रगल्भवचसः सा स्त्री वयं कातराः
सा पीनोन्नतिमत् पयोधरयुगं धत्ते सखेदा वयम् ।
सा क्रान्ता जघनस्थलेन गुरुणा गन्तुं न शक्ता वयम्
दोषैरन्यजनाश्रितैरपटवो जाताः स्म इत्यद्भुतम् ॥

अत्राभिव्यक्तमेव व्यधिकरणत्वं कार्य्यकारणयोः प्रतीयते इति अयं व्यधिकरणो नाम चित्रहेतुः ॥ ५८ ॥

वस्तुनो वा स्वभावेन शक्तेर्वा हानिहेतुना ।

ननु व्यक्तिभेदेऽपि हेतोः असंख्यता चेत् विवक्षिता किमेवं शब्देन अधिकेनेत्यत आह । एवं शब्दस्येति । प्रकारस्य उपाधेरेव भेदो विवक्षितो न तु व्यक्तिमात्रस्येति भावः । सा बालेति । बाल्यादीनां सामानाधिकरण्य एव प्रागल्भ्यादिकं प्रति हेतुभावः प्रतीतः स इह गौणवृत्तिव्यपाश्रयतया उपनिबद्ध्यमानः कान्तिम् आवहति । तथा हि अन्यत्प्रागल्भ्यं बालायाः सरस्वतीकवितवाङ्मयाद्यसामर्थ्यलक्षणमन्यच्च नायकप्रकाण्डे कथमेषां नियन्त्रणा स्यादित्यनध्यवसायलक्षणं तयोश्च तद्भावापत्तिरत्र व्यक्तैव । एवं कातरत्वादौ बोद्धव्यम् ॥ ५५—५८ ॥

आदिग्रहणेन स्वहेतुकतया कार्य्यहेतुकतया च उपनिबद्ध्यमानः सङ्कलितो

अकृतात्मीयकार्य्यः स्यादहेतुर्व्याहतस्तु यः ॥ ५९ ॥

तत्राकृतकार्य्यो वस्तुस्वभावेन यथा,

न विरचिता ललाटतटलास्यकरी भ्रुकुटि-
र्न परुषहुङ्कृतेन मधुरस्मितमन्तरितम्।
न तव निशुम्भसम्भ्रमवशादपि दारुणया
भगवति चेष्टया कलुषितं वदनाम्बुरुहम् ॥

अत्र निशुम्भसम्भ्रमस्य हेतोः अनुत्पादितभ्रुकुट्यादिदारुण-चेष्टाद्वारेण भगवतीमुखाम्बुरुहकालुष्यस्य करणे यदसामर्थ्यं तत्र तन्मुखाख्यस्य वस्तुनः स्वभावो निमित्तमिति स्वभावादनुत्पादितकार्य्योऽयमहेतुः ॥ ६० ॥

स एव शक्तेर्हानिहेतुना यथा,

अनुरागवती सन्ध्या दिवसस्तत्पुरःसरः।
अहो दैवगतिश्चित्रा तथापि न समागमः ॥

अत्रानुरागवत्वतत्पुरःसरत्वयोः समागमहेत्वोः सामर्थ्य-

भवति। हेतोरनन्तरं तद्विपरीतमहेतुं लक्षयन्नाह। वस्तुन इति। हेतुतया प्रतीतोऽपि कार्य्यं न करोतीत्यभिधीयमानोऽहेतुः स द्विविधः स्वरूपेण कार्य्यव्यभिचारी व्यापारविरोधेन वा तथाभूतोऽपि च कार्य्यं यन्न करोति तत्र द्वयं निबन्धनं यद्गत कार्य्यमुपजनयितव्यं तस्य वस्तुनः स्वभावः हेतुत्वाभिमतस्य शक्तिहानिर्वा सापि द्विधा आत्यन्तिकोऽभावः। प्रतिबन्धमात्रं वा। तत्र वस्तुस्वभावेन शक्तेरत्यन्तासत्त्वेन च द्विरूपस्वरूपाव्यभिचारीकृतात्मीयकार्य्य इत्यनेनोक्तम्। वस्तुस्वभावेन शक्तिप्रतिबन्धेन च द्विप्रकारोऽपि च व्यापाराव्यभिचारी व्याहत इत्यनेन। यद्यपि शक्तेरत्यन्तासत्त्वे हेतुभाव एव न भवति। तथापि गुणवृत्त्या हेतुभावाध्यासो बोद्धव्यः। सा च गुणवृत्तिः श्लेषोपहिता अन्याहशी भवति। अत्र निशुम्भेति ॥ ५९ ॥

ननु च अत्र चेष्टाया हेतुत्वं तृतीयया प्रतीयत इति सा हेतुत्वेन वक्तुमुचितेत्यत आह। भ्रुकुट्यादिदारुणचेष्टाद्वारेणेति अन्यथा निशुम्भसम्भ्रमवशादिति पञ्चमीसङ्गता स्यादिति भावः ॥ ६० ॥

विघाते दैवगतिः कारणमिति शक्तेर्हानिहेतुनायमकृतस्वकार्य्यो नामाहेतुः ॥ ६१ ॥

वस्तुनः स्वभावेन व्याहतो यथा,

नीवीबन्धोच्छ्वसनशिथिलं यत्र यच्चाङ्गनानां
क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु।
अर्चिस्तुङ्गानभिमुखगतान् प्राप्य रत्नप्रदीपान्
क्षौमूढ़ानां भवति विफलप्रेरणा चूर्णमुष्टिः ॥

अत्र रत्नप्रदीपनिर्वापणे चूर्णमुष्टेः अपरित्यक्तस्वरूपस्यापि विघाते रत्नप्रदीपाख्यवस्तुस्वभावः कारणमित्ययं वस्तु स्वभावेन व्याहतो नाम अहेतुभूतः।

स एव शक्तेर्हानिहेतुना यथा,

शम्भोरुद्धतनृत्यकर्मणि करे कङ्कालमाद्यं हरेः
सङ्घट्टस्फुटितेन्दुमण्डलगलत्पीयूषसञ्जीवितम्।
तत्कालप्रणते सुरद्विषि नवे दृष्ट्वा विलासं श्रियः
कुर्वत्कोपकषायितेन मनसा मिथ्योत्प्लुतिः पातु वः ॥

अत्र कोपकषायितमनसस्तस्य उत्प्लुतिकरणसमर्थस्यापि ईश्वरकरग्रहणान्मिथ्यापदाधीयमानः प्रतीतो व्याघातः। ततोऽस्य शक्तेर्हानिहेतुना व्याहतो नाम अहेतुभेदः ॥ ६२ ॥

यस्तु कारणमालेति हेतुसन्तान उच्यते।

अनुरागो लौहित्यं प्रीतिश्च। पुरःसरीऽग्रे गमनशीलः सन्निधौ स्थितश्च ॥ ६१ ॥

अमृतसेकजीवितकङ्कालशक्तिप्रतिबन्धे को हेतुरत आह। ईश्वरकरग्रहणादिति। ननु कोपकषायितमनस्त्वम् उत्पादितकार्य्यमेव कथमन्यथा कुर्य्यादित्युच्यतेऽत आह। मिथ्यापदेति ॥ ६२ ॥

इह केचित्कारणमालापृथगलङ्कार इत्युक्तं पूर्वस्य उत्तरोत्तरं प्रति हेतुभावोक्तिः तन्नचणम्। स द्विविधोऽभिधीयमानः प्रतीयमानो वा। उभयथापि नाहे-

पृथक् पृथगसामर्थ्यात् सोऽप्यहेतोर्न भिद्यते ॥ ६३ ॥
एकोऽभिधीयमानेषु हेतुत्वेषु भवेत्तयोः ।
प्रतीयमानेष्वपरः कारणत्वेषु जायते ॥ ६४ ॥

तयोराद्यो यथा,

जितेन्द्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते ।
गुणाधिके पुंसि जनोऽनुरज्यते जनानुरागप्रभवाश्च सम्पदः ॥

अत्र जितेन्द्रियत्वादीनामुत्तरोत्तरं प्रति हेतुभूतानामपि सम्पदुत्पत्तौ पूर्वपूर्वसव्यपेक्षायां समुदितानामेव कारणत्वं साधनादिपदैरभिधीयत इति सोऽयमभिधीयमानहेतुत्वं कारणमालेत्यहेतुभेदः ॥ ६५ ॥

द्वितीयो यथा,

पीणत्तणदुग्गेज्जं जस्स भुआअन्त णिट्ठुरपरिग्गहिअं
रिट्ठस्स विसमवलिअकंठं दुक्खेण जीविअं वो लीणं ॥ (ट)

अत्र जीवितदुःखातिक्रमणे कण्ठस्य वलनं वलनस्य निष्ठुरग्रहणं निष्ठुरग्रहणस्यापि पीनत्वं दुर्विगाह्यत्वे हेतुरिति प्रतीयमानकारणत्वं कारणमाला इति अहेतुभेदः ॥ ६६ ॥

(ट) पीनस्तनदुर्वाह्यं यस्य भुजयन्त्रनिष्ठुरपरिगृहीतम् ।
रिष्टस्य विषमवलितकण्ठं दुःखेन जीवितमतिक्रान्तम् ॥

तोर्व्यतिरिचत इत्याह । यस्त्विति । यद्यपि प्रथमस्य प्रथमं हेतुभावो निवृत्त-एव तथापि उत्तरस्य प्रथममुखनिरीक्षणप्रवृत्तस्य उत्तरं प्रति भावः अभिधीयते । न हि स्वतन्त्रस्येव हेतुभावे कारणमाला भासते ॥ ६३—६४ ॥

तदिदमेकदेशद्वारा व्यञ्जयन्नाह । अत्र जितेन्द्रियत्वादीनीति । अत्र जीविते दुःखातिक्रमण इति । यद्यत्र हेतुमाला न स्यात्तदा परस्परानपेक्षाणामुपन्यासे वाक्यार्थपोषो न स्यादिति ॥ ६५—६६ ॥

इङ्गिताकारलक्ष्योऽर्थः सूक्ष्मः सूक्ष्मगुणात्तु सः ।
सूक्ष्मात् प्रत्यक्षतः सूक्ष्मोऽप्रत्यक्ष इति भिद्यते ॥ ६७ ॥

वाच्यः प्रतीयमानश्च सूक्ष्मोऽत्र द्विविधो मतः ।
इङ्गिताकारलक्ष्यत्वं लक्ष्मसामान्यमेतयोः ॥

तत्रेङ्गितलक्ष्यमभिधीयमानसूक्ष्मं यथा,

तां प्रत्यभिव्यक्तमनोरथानां महीपतीनां प्रणयाग्रदूत्यः ।
प्रवालशोभा इव पादपानां शृङ्गारचेष्टा विविधा बभूवुः ॥

अत्र स्वयंवरमिलितानां राज्ञां राजपुत्रीं प्रति प्राप्तिलक्षणस्य मनोरथस्याभिधीयमानस्य शृङ्गारचेष्टात्मकेन इङ्गितेन व्यङ्ग्यत्वादयमिङ्गितलक्ष्योऽभिधीयमानः सूक्ष्मभेदः ॥ ६८ ॥

तदेवाकारलक्ष्यं यथा,

सा यूनि तस्मिन्नभिलाषबन्धं शशाक शालीनतया न वक्तुम् ।

लक्षणात्मकहेतुविशेषस्य साधर्म्यादनन्तरं सूक्ष्मं लक्षयति । इङ्गितेति । इङ्गितमाकार इङ्गिताकारौ चेत्यर्थः । शरीरावयवव्यापार इङ्गितम् । रूपादेरन्यथात्वादाकारः सूक्ष्मार्थदर्शनं सूक्ष्मत्वमित्यर्थगुणेषु उक्तं तेन पौनरुक्त्यमाशङ्क्याह । सूक्ष्मगुणात्तु स इति । हृदयसंवादभागि विचतुरहृदयसंवेद्यस्य । अतएव अतिसूक्ष्मार्थस्य प्रत्यक्षायमाणत्वात् सूक्ष्मनामार्थगुणः । यथा हि कवेः प्रतिभा सूक्ष्मविशेषोल्लेखिनी तथा तन्मूलकः शब्दोऽपीति स्फुटाभतया प्रत्यक्षप्रमेयज्ञानमुत्पद्यते । तथा हि अन्योऽन्यसंवलितेत्यादौ दम्पत्योर्मिथोऽनुस्मृतिलक्षणस्य प्रेम्णः कतिपयसंवेद्यस्यापि शब्दबलात् प्रत्यक्षायमाणत्वमनुभवसिद्धमेव तदेतदाह । सूक्ष्मात्प्रत्यक्ष इति । सूक्ष्मालङ्कारे तु कविप्रतिभाया लिङ्गविषयत्वाच्छब्दोऽपि तद्विषय एव । लिङ्गाच्च प्रतीतिः उत्पद्यमाना सामान्यपुरस्कारेण प्रवृत्ता न प्रत्यक्षवत्तद्विशेषोल्लेखवतीति सूक्ष्मगुणवैधर्म्यं तदिदमुक्तम् । सूक्ष्मो प्रत्यक्ष इति । अत्र कैश्चित् प्रतीयमानस्य सूक्ष्मस्य भाव इति संज्ञां विधाय अलङ्कारान्तरमुक्तं तदसत् । सूक्ष्मसामान्यलक्षणेन क्रीडीकरणादित्याह । इङ्गिताकारलक्ष्यत्वमिति । एतेन लक्ष्यत्वपुनरुक्त्याशङ्का परिहृता । अत्र स्वयंवरेति । न च शृङ्गारचेष्टाप्रत्यर्पितस्य मनोरथशब्देनाभिधानमर्थपुनरुक्तमिति वाच्यम् । न हि यथानुरागात्मा वेन

रोमाञ्चलक्ष्येण स गात्रयष्टिं भित्वा निराक्रामदरालकेश्याः॥

अत्र अभिलाषबन्धो रोमाञ्चलक्ष्येण गात्रयष्टिं भित्त्वा निराक्रामत् इत्यनेन अभिधीयमान आकारलक्ष्यः सूक्ष्मभेदोऽभिहितः॥ ६९॥

तदेव उभयलक्ष्यं यथा,

त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्द्धत।
उद्दामरागपिशुना च्छायां कापि मुखाम्बुजे॥

अत्र त्वदर्पितदृश इति इङ्गितं छाया कापि मुखाम्बुज इत्याकारः। ताभ्याम् उद्दामरागपिशुना इत्यनेन अभिधीयमानस्य आननरागस्य सूक्ष्मरूपतया लक्ष्यमाणत्वादयमभिधीयमानोभयलक्ष्यः सूक्ष्मभेदः॥ ७०॥

प्रतीयमानमिङ्गितलक्ष्यं यथा,

वाहित्ता पडिवअणं ण देइ रूसेइ एक्कमेक्कम्मि।
अज्जा वज्जेण विणा पदीप्पमाणे णईकच्छे॥ (ठ)

अत्र प्रतिवचनादानपरिजनप्रकोपाभ्यां प्रदीप्यमाने नदीकच्छे इति हेतुना प्रत्याय्यमानः सङ्केतकुड्याङ्गदाहोद्भववधू-

---

(ठ) व्याहृता प्रतिवचनं न ददाति रुष्यति एकैकस्मिन्।
आर्य्या वज्रेण विना प्रदीप्यमाने नदीकच्छे॥

चित्तवृत्तयः स्फुटा उपस्थाप्यन्ते तथा स्वशब्देनेति विस्तरेण प्रपञ्चमेव वक्ष्यामः। स्वशब्दस्तु किमर्थमित्यवशिष्यते तत्र ब्रूमः। स्वयंवरसमाजप्रवेशादिना येषां सामान्यत उत्कण्ठाप्रतीतिः प्रथममवतीर्णा आसीत्तेषामिन्दुमतीसन्निधौ तदनुभावबलेन असंख्यसूक्ष्मविशेषवती सैव अभिव्यक्तेति दृढानुबन्धलक्षणस्य प्रेम्णः प्रकर्षकाष्ठां पुष्णाति। एवमन्यत्रापि॥ ६७—७०॥

अत्र प्रतिवचनादानमिति। न हि प्रतिवचनप्रदानाभावमात्रमत्र चम-

मनस्तापो वाक्यार्थत्वेन लक्षित इति अयमिङ्गितलक्ष्यः प्रतीयमानः सूक्ष्मभेदः ॥ ७१ ॥

सामाइ सामलीए अद्धच्छिपलोअसुहसोहा ।
जम्बूदलकअकण्णावतंस भमदि हलिअउत्ते ॥ (ङ)

अत्रार्द्धाक्षिप्रलोकनमुखश्यामताभ्यामाकाराभ्यां जम्बूदलकल्पितावतंस इत्यनेन प्रतीयमानः सङ्केतगमनभ्रंशसम्भवः श्यामाया मनस्तापो लक्ष्यते इति अयमाकारलक्ष्यः प्रतीयमानः सूक्ष्मभेदः ॥ ७२ ॥

तदेव उभयलक्ष्यं यथा,

प्रयच्छतोच्चैः कुसुमानि मानिनी विपक्षगोत्रं दयितेन शम्भिता ।
न किञ्चिदूचे चरणेन केवलं लिलेख वाष्पाकुललोचना भुवम् ॥

अत्र चरणेन भूमिलेखनमिङ्गितं दृशोर्वाष्पाकुलत्वमाकारस्ताभ्यां गोत्रस्खलनोद्भवो मानिन्या मनस्तापः लक्ष्यते इत्ययम् इङ्गिताकारलक्ष्यः सूक्ष्मभेदः ॥७३॥

पदार्थानान्तु यः सारस्तदुत्तरमिहोच्यते ।

(ङ) श्यामायाः श्यामलतया अर्धाक्षिप्रलोकसुखशोभा ।
जम्बूदलकृतकर्णावतंसः भ्रमति हलिकपुत्रे ॥

त्कारि इतरस्मादन्यदपि सम्भवादतः प्रतिवचनप्रदानाभिप्राया विपरीतचित्तवृत्तिविशेषोन्नायिका समीपदेशापसरणादिलक्षणा क्रिया काचित् प्रतिवचनप्रदानपदेनाभिमता । न च प्रकोपोऽपि अनुभवरूपतामनासादयन् स्वादनीयतामासादयतीति नूनं तेनापि भ्रूभङ्गादिरूपा क्रियैवाभिसंहितेत्याशयवतीक्तम् इङ्गिताभ्यामिति । यद्येवं तर्हि काव्यशोभानिर्वाहात् किमनेन लक्षितेनेति । न हि यथोक्तप्रतिवचनाद्यदानप्रकोपाभ्यां कश्चिद् विवक्षितार्थलाभ इति भावः ॥७१—७३ ॥

विभज्यमानस्य सरूपतया सूक्ष्मानन्तरम् उत्तरलक्षणमाह । पदार्थानान्विति । सारः सर्वस्यायमानम् उत्कर्षशालि वस्तु । पदार्थानामिति निर्द्धारणे षष्ठी । उत्तरमिति अन्वर्थं नाम । उत्कृष्टत्वमुदीर्यः तत्रैव प्रकर्षसरणः । धर्मधर्मिरूपाभ्या-

सधर्मधर्मिरूपाभ्यां व्यतिरेकाच्च भिद्यते ॥ ७४ ॥

तेषु धर्मस्वरूपं यथा,

दानं वित्ताहृतं वाचः कीर्त्तिधर्मौ तथायुषः।
परोपकरणं कायादसारात् सारमुद्धरेत् ॥

अत्र दानसत्यकीर्त्यादीनां वित्तादिवस्तुधर्माणां सारभूतानामुद्धारादयं धर्मरूपः सारः ॥ ७५ ॥

धर्मिरूपो यथा,

मधुविकचसितोत्पलावतंसं
शशिकरपल्लवितञ्च हर्म्यपृष्ठम्।
मदनजनितविभ्रमा च कान्ता
सुखमिदमर्थवतां विभूतयोऽन्याः ॥

अत्र मधुप्रभृतीनां विभूतिभ्यः सारभूतानामुद्धरणादयं धर्मिरूपः सारः ॥ ७६ ॥

अथ व्यतिरेकेण धर्मरूपो यथा,

पोढ़महिलाणं जं जं सुसिक्खिदं तं रए सुहावेइ।

मिति। व्यस्तसमस्ताभ्याम्। धर्म उपसर्जनं परप्रवणतया प्रतीयमानं वस्तु। अतथाभूतन्तु धर्मिरूपं तदयमर्थः। प्रसिद्धवस्तुमध्ये कस्यचित् उत्कर्षवत्तया निर्द्धारणमुत्तरम्। तत्त्रिधा। धर्मरूपं धर्मिरूपमुभयञ्च। आद्ययोराद्ययोः प्रत्येकं प्रकारद्वयम्। निर्द्धार्य्यमाणस्य शुद्धस्य उपादानं निर्धार्य्यानन्तरव्यतिरेकिधर्मवत्तया वा। तदिदमाह। व्यतिरेकाच्चेति। अन्यस्यापि सामान्यविशेषरूपतया रूपत्वमिति षट्प्रकारमुत्तरमिति ॥ ७४ ॥

वित्तादिवस्तु धर्माणामिति। पञ्चम्या विभागः प्रत्यायितः स च संश्लेषपूर्वक एवेति दानादीनाम् उपसर्जनताप्रतीतिः ॥ ७५ ॥

विभूतिभ्य इति। विभूतयः प्रथमानिर्दिष्टास्तेन पूर्ववन्नामूषां धर्मिभावेन प्रतीतिभासोऽस्तीति विशिष्टमध्यादिरूपं वस्तु न अङ्गभावेन गम्यत इति ॥ ७६ ॥

जं जं असिक्खिअं णववहूणं तं तं रइं देइ ॥ (ढ)

अत्र प्रौढानां सुशिक्षितं सुरतकर्म अप्रौढस्त्रीणां पुनरशिक्षितं सुखयतीति कर्मान्तरलक्षणेभ्यो धर्मेभ्यः सुशिक्षिताशिक्षितरतकर्मलक्षणा धर्माः स्त्रीधर्माव्यतिरेकेण प्रतिपाद्यन्ते इति धर्मव्यतिरेकरूपोऽयं सारः ॥ ७७ ॥

व्यतिरेकेण धर्मिरूपो यथा,

राज्ये सारं वसुधा वसुधायां पत्तनं पुरे सौधम् ।
सौधे तल्पं तल्पे वराङ्गनानङ्गसर्वस्वम् ॥

अत्र वसुधादयो धर्मिण उत्तरोत्तरक्रमेण पूर्वतः पूर्वतो व्यतिरिच्यन्त इत्ययं धर्मिव्यतिरेकः सारः ॥ ७८ ॥

एतेन धर्मधर्मिस्वरूपोऽपि व्याख्यातः । स द्विधा सामान्यतो विशेषतश्च । तत्र सामान्यतो यथा,

गीतशीतांशुताम्बूलकर्पूरवनितादिभिः ।
असारोऽप्येष संसारः सारवानिव लक्ष्यते ॥

(ढ) प्रौढमहिलाना यत् यत् सुशिक्षितं तद् रतये सुखयति ।
यद् यदशिक्षितं नववधूनां तत् तद् रतिं ददाति ॥

अप्रौढस्त्रीणामिति । षष्ठ्या धर्मधर्मिभावोऽभिहितः । तर्हि निर्द्धारणं कस्मादित्यत आह । कर्मान्तरेति । रत इत्यनेन सामान्यत उपादानात् प्रौढस्त्रीसम्बन्धिनो ललितस्य सुशिक्षितत्वं विशेषमुपादाय मुग्धस्त्रीसम्बन्धिनोऽसुशिक्षितत्वं व्यतिरेकी विशेष उपात्तः ॥ ७७ ॥

अत्र वसुधादय इति । निर्द्धारितात् वसुधामात्रात् पत्तनवती वसुधा व्यतिरिच्यते । वसुधावत्पत्तनात् सौधवत्पत्तनवत् सौधात्तल्पवत्सौधात्तल्पादराङ्गनावदिति तदिदमुक्तमुत्तरोत्तरक्रमेणेति ॥ ७८ ॥

अत्र गीतादीनामिति । न हि गीतादौ कश्चिद्विशेष उक्तः अतएवादिशब्दोऽपि सजीवस्तथापि दध्यादीनाम् अङ्गभावः प्रतीयत इत्यत आह । ढतीया-

अत्र गीतादीनां जगतः सारभूतानामविशेषेणैव सर्वेषाम् उपादानाद्धेतुतृतीयान्ततया च संसारसारवत्त्वेऽङ्गभावादयं सामान्यतो धर्मधर्मिरूपः सारः॥

विशेषतो यथा,

अवैमि पूतमात्मानं दृष्टेनैव द्विजोत्तमाः!।
मूर्ध्नि गङ्गाप्रपातेन धौतपादाम्भसा च वः॥

अत्र गङ्गाप्रपातसप्तर्षिपादोदकयोर्विशेषेण सारभूतयोरुपादानात् हिमवतः पूतत्वे च अङ्गभूतत्वादयं विशेषतो धर्मधर्मिरूपः सारः॥

विरोधस्तु पदार्थानां परस्परमसङ्गतिः।

न्ततया चेति। तृतीयया हि कारकत्वमुक्तं कारकं च क्रियोपसर्जनरूपमित्यर्थः। अत्र गङ्गाप्रपातेति। प्रपातपादोदकयोर्गङ्गायाः सप्तर्षिभिश्च विशेषितत्वादङ्गतामुपपादयति। हिमवतः पूतत्वे चेति व्यतिरेकोत्तरे विरुद्धधर्माक्रान्तिरसौति सङ्गत्या विरोधलक्षणमाह। विरोधस्त्विति। परस्परसङ्गतिः असम्बन्धः सहानवस्थानमिति यावत्। तेन सहानवस्थाननियतयोः सहानवस्थानोक्तिर्विरोध इति तात्पर्य्यसंक्षेपः स च प्रकृतो दोषः। अप्रकृतस्तु द्विधा। श्लेषोपधानेन अन्यथा चाऽन्यथा भावस्त्विधा। सहानवस्थितयोः प्रायोदर्शनमात्रेण नैयत्यारोपः। यथा "क्व युवतिमार्दवमित्यादौ" विरुद्धधर्मोक्तिविषयस्याचिन्त्यप्रभावातिशयत्वेन प्रसिद्धिर्वा। यथा "दिग्वासा यदीत्यादौ" विरोधस्य आरोपमात्रेण सरूपतया प्रतिपत्तिमात्रं वा। यथा सा उप्परस्त्रीत्यादौ। सर्वश्च अयं विरोधोऽभिधीयमानः प्रतीयमानश्च। अथादिशब्देन योऽभिधीयते सोऽभिधीयमानः प्रतीयमानस्तु तद्विना कृतो यथा भट्टबाणस्य। यत्र मातङ्गगामिन्यः शीलवत्यश्च गौर्यो विभवरताश्च श्यामाः पद्मरागिण्यश्च धवलद्विजशुचिवदनामदिरामोदिश्वसनाः प्रमदा इति। इहान्यैः अलङ्कारकारैः असङ्गतिप्रत्यनीकाधिकविषमाख्यमलङ्कारचतुष्टयं विरोधात् पृथक्लक्षितं तल्लक्षणानि। सम्बन्धे यस्य यत्कार्य्यमसम्बन्धेऽपि तस्य तत्। न बाध्यते चेत् तामाहुरलङ्कृतिम् असङ्गतिम्। प्रत्यनीकमभिप्रेतं कार्य्यमप्राप्य यत्पुनः। विरुद्धकार्य्यसम्प्राप्तिर्भवेत्तेनैव हेतुना। परिमाणादियोगेन व्यवस्थानमुपेयुषः। अव्यवस्थाभिधानं यदधिकं तत् प्रचक्षते। कारणेन विरूपं यत्कार्य्य-

असङ्गतिः प्रत्यनीकमधिकं विषमश्च सः ॥ ७९ ॥

तेषु विरोधः शुद्धो ग्रथितश्च । तयोः आद्यो यथा,

क्व युवतिमार्दवं क्व च महाहवदारुणता
क्व च वलयौ करः क्व करिदन्तजमुष्टिरसिः ।
क्व च नवयौवनं क्व कुसुमायुधनिःस्पृहता
तव ललनाविचेष्टितविरुद्धमहो ललितम् ॥

अत्र युवतिमार्दवादीनां महाहवदारुणतादीनाञ्च शुद्धानामेव परस्परमसङ्गतत्वादयं शुद्धविरोधः ॥ ८० ॥

द्वितीयो यथा,

दिग्वासा यदि तत् किमस्य धनुषा शस्त्रस्य किं भस्मना
भस्माथास्य किमङ्गना यदि च सा कामं परिद्वेष्टि किम् ।
इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वामिनो
भृङ्गी सान्द्रशिरावनद्धपरुषं धत्तेऽस्थिशेषं वपुः ॥

अत्र दिग्वासस्त्वादीनामुत्तरोत्तरग्रथनादन्योन्यासङ्गतादयं ग्रथितनामा विरोधभेदः ॥ ८१ ॥

असङ्गतिर्यथा,

सा उप्पण्डि गोट्ठ उहि णो क्खीकावि विसगंठि ।

मुक्तवदुच्यते । आश्चर्यकारि तत्प्राहुर्विषमं शब्दवुद्धय इति । तदेतेषां लक्षणाभेदाद्विरोध एवान्तर्भावी न हि एभ्यः अवान्तरभङ्गिभेदमात्रेण सामान्यान्तर्भावो न भवतीत्याशयवानाह । असङ्गतिः प्रत्यनीकमिति ॥ ७९ ॥

शुद्धानामेवेति । एकेनैव प्रतियोगिना सह अनवस्थानीक्तौ विरोधनिर्वाहात् ॥ ८० ॥

उत्तरोत्तरग्रथनादिति । यद्यपि एकेन विरोधिना सहोक्तौ विरोध्यन्तरेण अपि तथाभावमासादयन्नेव ग्रथितस्तथापि उत्तरग्रथनया शोभाविशेषार्पको भवतीत्यभिप्रायः ॥ ८१ ॥

भिडि पञ्चल्लिउ सो मरइ जस्स ण लग्गइ कंठि ॥ (ण)

अत्रायं विषग्रन्थिर्यस्य कण्ठे न लगति स म्रियत इत्येतयोः परस्परमसङ्गतेः अयमसङ्गतिर्नाम विरोधभेदः ॥ ८२ ॥

प्रत्यनीकं यथा,

उत्कण्ठा सन्तापो रणरणको जागरस्तनोस्तनुता ।
फलमिदमहो मयाप्तं सुखाय मृगलोचनां दृष्ट्वा ॥

अत्र मृगलोचनादर्शनस्य किल निर्वृतिः फलं मया तु तां दृष्ट्वा अन्तस्तापादिकं प्राप्तमिति प्रत्यनीकफलत्वादयं प्रत्यनीकाख्यो विरोधः ॥ ८३ ॥

अधिको यथा,

एको दाशरथिः कामं यातुधानाः सहस्रशः ।
ते तु यावन्त एवाजौ तावद्भा दृष्टशे स तैः ॥

अत्र एकस्य दाशरथेः अनेकसङ्ख्यैर्यातुधानैः यत् समरकर्म तत्र तैः अस्य तावद्भा दृश्यमानत्वेनैकसङ्ख्याविरुद्धमाधिक्यं गम्यते इति अयमधिकाख्यो विरोधः ॥ ८४ ॥

विषमं यथा,

दिशामलीकालकभङ्गतां गतस्त्रयीवधूकर्णतमालपल्लवः ।
चकार यस्याध्वरधूमसञ्चयो मलीमसः शुक्लतरं भवद्यशः ॥

अत्र मलीमसाध्वरधूमसञ्चयेन यद् यशसः शुक्लीकरणं तद्

(ण) सा उत्पन्ना गोष्ठभुवि नवीनैव कापि विषग्रन्थिः ।
भियते प्रत्युत स म्रियते यस्य न लगति कण्ठे ॥

विषग्रन्थेः कण्ठसम्बन्धेन मारकत्वं प्रतीतम् । वर्ण्यमानाया रूपस्य तु अतथाभूतस्यैव इति व्यक्तो विरोधः ॥ ८२ ॥

अत्र मृगलोचनादर्शनस्यैव इति यद्यपि एकस्य विरुद्धकार्यकारित्वं न विरुद्धं

यादृशादेव जायते तत् तादृगेव भवतीति प्रसिद्धेर्वैषम्यात् परस्परम् अमङ्गतेरयं विषमाख्यो विरोधः ॥ ८५ ॥

प्रभूतकरणालोकात् स्यादेवमिति सम्भवः ।
स विधौ वा निषेधे वा द्वये वा न द्वयेऽपि वा ॥ ८६ ॥

एषु विधिविषयो यथा,

त्वय्यादातुं जलमवनते शार्ङ्गिणो वर्णचौरे
तस्याः सिन्धोः पृथुमपि तनुं दूरभावात् प्रवाहम् ।
प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टीः
एकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥

अत्र त्वयि जलमादातुम् अवनते सति तस्याः सरितः प्रवाहो मध्यनिविष्टेन्द्रनीलमणिर्मुक्तागुण इव गगनगतिप्रेक्षणीयो भविष्यतीति विधेः सम्भाव्यमानत्वात् अयं विधिविषयः सम्भवः ॥ ८७ ॥

तथापि यथैव प्रवृत्त्या किञ्चित्कार्य्यं कर्तुमुद्यतो न तथैव तद्विरुद्धं करोति तदेतत् सुखायेति चतुर्थ्या द्योत्यते ॥ ८३—८५ ॥

सामग्र्येकदेशसद्भावमात्रेण कार्य्यसद्भावे स्थिते विरोधच्छायामूलत्वमिति तदनन्तरं सम्भवः प्राप्तावसर इत्याह । प्रभूतेति । भूयांसि कारणानि दृष्ट्वा कार्य्यमुत्पत्स्यते नापि दैवात् कदाचित् न स्यादिति ज्ञानसम्भवः । न चायं संशय एव । न हि स्याद्वा नवेति दोलायते नापि वितर्कः । व्यापारोपसाभावात् । क्व तर्हि अयमन्तर्भवति । न क्वचिज्ज्ञानान्तरस्येव उच्यमानत्वात् । अनिश्चयरूपतामात्रेण तत्र अन्तर्भाव इति प्रसङ्गात् । नापि भ्रान्तिर्न्यग्भूतबाधपुरःसरत्वात् । भ्रान्तौ तु सिद्धाया बाधोत्पत्तिरिति वक्ष्यते । सविधौ वा निषेधे वेति । सम्भवो विषयनियतो विधिनिषेधोभयानुभयरूपश्चतुर्विधो विषयः अप्रवृत्तप्रवर्त्तनं द्विरूपम् । प्रयोजकगत प्रयोज्यगतञ्च । आद्यं प्रयुक्त्याख्यं शब्दालङ्कारे विधिद्वारेण इत्यनेन उक्तम् । द्वितीयन्तु भूतभवनलक्षणमिहोच्यते । सम्प्रसक्तस्याभावो निषेधः । एतेन उभयानुभयरूपौ व्याख्यातौ ॥ ८६ ॥

अत्र त्वयि जलमिति । अप्रेक्षणीयस्य प्रेक्षणीयताभवनं विधिः ॥ ८७ ॥

निषेधविषयो यथा,

परस्य भूयान् विवरेऽभियोगः प्रसह्य संरक्षणमात्मरन्ध्रे।
भीष्मेऽप्यसम्भाव्यमिदं गुरौ वा न सम्भवत्येव वनेचरेषु॥

अत्र इदं भीष्मद्रोणयोः असम्भाव्यमानं धनुर्वेदकौशलम् अस्मिन् वनेचरे न सम्भवतीति निषेधविषयः सम्भवः॥ ८८॥

विधिनिषेधविषयो यथा,

उत्पश्यामि द्रुतमपि सखे! मत्प्रियार्थं यियासोः
कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते।
शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः
प्रत्युद्यातः कथमपि भवान् गन्तुमाशु व्यवस्येत्॥

अत्र द्रुतमपि यियासोः कालक्षेपं तव उत्पश्यामि इति विधिरूपः, कथमपि भवान् गन्तुमाशु व्यवस्येदिति निषेधरूपस्तदेवं विधिनिषेधयोः असम्भाव्यमानत्वात् अयमुभयविषयः सम्भवः॥ ८९॥

अनुभवविषयो यथा,

तस्याः पातुं सुरगज इव व्योम्नि पूर्वाद्रिलम्बी
त्वच्छेदच्छस्फटिकविशदं तर्कयेस्तिर्यगम्भः।

अस्मिन् वनेचर इति। परविवराभियोगे स्वविवररक्षारूपबहुतरकारणालोकान्नाय वनेचर इति निषेध एव सम्भाव्यते॥ ८८॥

कालक्षेपं तवोत्पश्यामीति उत्पश्यामि सम्भावयामि अकालक्षेपवतः कालक्षेपभवनं विधिः। कथमिवेति काकूपस्थितो गमनाभावो निषेधः। न च वाच्यं द्वौ अत्र सम्भवौ तथाच नैकोऽपि उभयविषय इति। यतो यैव कालक्षेपसामग्री सैव शुक्लापाङ्गैरित्यादिकारणसहकृता निषेधमपि विषयीकरोति अतः सम्भवभेदेन किञ्चित् प्रमाणमिति॥ ८९॥

अत्र यदि त्वमेवं कुर्या इति। न तावदत्राभावः प्रतीयते इति न निषेध

संसर्पन्त्याः सपदि भवतः स्रोतसि च्छायया सा
स्यादस्थानोपगतयमुनासङ्गमेनाभिरामा ॥

अत्र यदि त्वमेवं कुर्य्यास्तदेवं स्यादिति विधिनिषेधयोः अनवगतेरयम् अनुभवविषयः सम्भवः ॥ ९० ॥

एतेन विधिनिषेधयोर्विकल्पविषयोऽपि व्याख्यातः। यथा,

यदि भवति सुखानां वाक्पटूनां सहस्रं
निरुपममवधानं जीवितं चातिदीर्घम्।
कमलमुखि! तथापि क्षम्यतेऽस्य कर्त्तुं
सकलगुणविचारः शक्यते वा नवेति ॥

तदेतत् निगदेनैव व्याख्यातम् ॥ ९१ ॥

द्रोणस्य सम्भवः खार्य्यां शते पञ्चाशतो यथा।
तथान्ये सम्भवं प्राहुः सोऽनुमानान्न भिद्यते ॥९२॥९३॥

भिद्यते तु, यदि अनिश्चयः स्यात् यथा,

रुद्धापाङ्गप्रसरमलकैरञ्जनस्नेहशून्यं
प्रत्यादेशादपि च मधुनो विस्मृतभ्रूविलासम्।

सम्भवः। विधिसम्भवोऽपि नास्ति। यो हि व्यवस्थितकारणदर्शनेन व्यवस्थितस्यैव भवनस्य सम्भवः स विधिसम्भवशब्देन अभिधीयते न च इह तथा। तदिदमुक्तमनवगतेरिति ॥ ९० ॥

तदेतन्निगदेनेति। परस्परव्यभिचारिणोः एकत्र सम्भाव्यमानत्वादिति व्यक्तौ विकल्प इत्यर्थः ॥ ९१ ॥

पूर्वेषां सम्भवलक्षणमुपन्यस्य दूषयति। द्रोणस्येति। समुदायज्ञानादेकदेशज्ञानं सम्भव इति प्राच्यानामभिप्रायः। तथाच समुदायस्य समुदायिव्याप्तत्वादियं खारी द्रोणवती खारीत्वादिति सुलभमनुमान एवास्यान्तर्भाव इत्यर्थः ॥९२॥

कथं तर्हि तवापि सम्भवो भिद्यते सामग्रीकार्य्यव्याप्तिति तत्रापि अनुमानमेव भविष्यतीत्यत आह। भिद्यत इति। न हि सामग्री दृष्टा यतः कार्य्यमनुमीयते किन्तु प्रभूतकारणदर्शनेन कार्य्यस्य ज्ञानमन्यदेवोत्पद्यत इति वक्तव्यं तथाच अस्माकं दर्शने युक्तः पृथग्भावः ॥ ९३ ॥

त्वय्यासन्ने नयनमुपरिस्पन्दि शङ्के मृगाक्ष्याः
मीनक्षोभाकुलकुवलयश्रीतुलामेष्यतीति ॥

अत्र यथा खार्य्यां द्रोणः शते पञ्चाशदिति नियमः। नैवम् विप्रलम्भे अलकानामकल्पनमनञ्जनमक्ष्णोर्मधुनो वा प्रत्यादेशः, सुहृदुदन्तलाभारम्भे वा नयनस्पन्दनानि सम्भाव्यन्ते च प्रभूतकारणालोकादित्येषोऽपि विधिरूप एव सम्भवः॥ ९४ ॥

अन्योन्यमुपकारो यस्तदन्योन्यं त्रिधा च तत्।
वाच्यं प्रतीयमानञ्च तृतीयमुभयात्मकम् ॥ ९५ ॥
अन्योन्यचूलिकान्योन्यभ्रान्तिरन्योन्यमेकता।
अन्योन्यालङ्कृतिरन्तस्त्वयमेतदिहेष्यते ॥ ९६ ॥

यस्तु उदाहरणविशेषं न प्रतिसन्धत्ते तं बोधयितुमुदाहरणान्तरमाह। रुद्धापाङ्गेत्यादि। एव विश्लेषदुःखेन कर्षिता यथाऽचेतनानामपि अलकानां करुणोत्पन्नैव लक्ष्यते। तस्मादिय मा जलधरं द्राक्षीदिति निसर्गचपलस्य अपाङ्गस्य प्रसरमवरुन्धन्ति। स्निग्धपदेन नयनाञ्जनयोः अनुपधिरनुबन्धो व्यज्यते। तेन मिथोमैत्रीयोग्यत्वम्। तेन तन्नयनादन्यत्र न अञ्जनं कान्तिमाप्नोतीति कोऽपि लावण्यप्रकर्षस्तथाभूतस्यापि अञ्जनस्य त्यागे यदेकता न तया न आत्मानमपि प्रतिसन्धातुं समर्थेति व्यनक्ति। एवं पदान्तरेषु अपि स्वरसोऽनुसन्धेयः विप्रलम्भरूपकारणालोकादलकाकल्पनादिकं प्रियतमदूतप्रत्यासत्तिलक्षणकारणालोकाच्च उपरिनयनस्पन्दन सम्भाव्यत इति सम्भवद्वयमत्रेति व्याख्यानेन स्फुटयति। अत्र यथा खार्य्यामिति ॥ ९४ ॥

परस्परोपकारकयोः एकस्य विशेषं दृष्ट्वाऽपरस्य विशेषो ज्ञायत इति सम्भवसाम्यात् तदनन्तरमन्योन्यलक्षणमाह। अन्योन्यमिति। विशेषार्पणमुपकारो न च इय परिवृत्तिः स्थितस्यानपनयनात् दानप्रतिदानाभावाच्च। विशेषस्तु नानारूपस्तद्वाक्यार्थीभूतरसानुगामितया तत्र तत्रीन्नीयते। विभागं दर्शयति। त्रिधेति। अभिधीयमानं विशेषतः शब्देन उपात्तं सामान्यतः शब्देन विषयीकृतं विशेषतस्तु प्रतीयमानम् एवेति उभयात्मकम्। द्वाभ्याम् अन्यतोऽप्रतीयमानम्। अन्योन्यचूलिकादिलक्षणानि ग्रन्थकार एव स्फुटीकरिष्यति ॥ ९५ ॥ ९६ ॥

तेषु अभिधीयमानम् अन्योन्यमिह यथा,

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननाद् बभूव साधारणो भूषणभूष्यभावः ॥

अत्र अन्योन्यशोभाजननेन इत्यादिना उपकार्योपकारकभावस्य द्वयोरपि अभिहितत्वादभिधीयमानमिदम् अन्योन्यम् ॥ ९७ ॥

प्रतीयमानं यथा,

उड्ढच्छो पिअइ जलं जह जह विरलङ्गुली चिरं पहिओ ।
पाआपालिआवि तह तह धारं तणुअं पि तणुएइ ॥ (त)

अत्र पथिकप्रपापालिकयोर्मिथोऽनुरागे यत् एकस्य विरलाङ्गुलिना करेण पानीयपानमन्यस्याः सुतरां वारिधारातनूकरणं तेन परस्परम् उपकार्योपकारकभावात् प्रतीयमानमिदम् अन्योन्यम् ॥ ९८ ॥

प्रतीयमानाभिधीयमानं यथा,

गोलाविसमोआरच्छलेण अप्पा उरम्मि से मुक्को ।
अणुअम्पाणिद्दोसं तेणवि सा गाढमुपऊढा ॥ (थ)

(त) ऊर्द्धाच्छः पिबति जलं यथा यथा विरलाङ्गुलिश्चिरं पथिकः ।
प्रपापालिकाऽपि तथा तथा धारां तनुमपि तनूकरोति ॥

(थ) गोदाविषमावतारच्छलेन आत्मा उरसि तया मुक्तः ।
अनुकम्पानिर्दोषं तेनापि सा गाढमुपगूढा ॥

कण्ठस्येति । बन्धुरो नम्रः । निस्तलो वर्त्तुलः ॥ ९७ ॥

अत्र पथिकेति । मिथोऽनुराग इत्यनेन परस्परानुरागसंवर्द्धनमेव अत्र विशेषार्पणमिति मतम् । तथाहि करस्य विरलाङ्गुलिकरणे कथमहमेतां चिराय पश्यामीति प्रपापालिकाभिप्राय एव वर्द्धितो भवति । एवमपि वारिधारातनूकरणे बोद्धव्यम् । न च अयम् एवंविधः अर्थः केनापि शब्देन अभिहित इति भवति प्रतीयमानता ॥ ९८ ॥

अत्र गोदावरीविषमावतारव्याजेन तया तस्य उरसि आत्मा क्षिप्तः तेनापि अनुकम्पानिर्दोषं सा गाढम् उपगूढेति अभिधीयमानः परस्परानुरागात् उपकार्य्योपकारकभावः प्रतीयते इति उभयात्मकमिदम् अन्योन्यम् ॥ ९९ ॥

अन्योन्यचूड़िका यथा,

शशिना च निशा निशया च शशी
शशिना निशया च यथा गगनम् ।
भवता च सभा सभया च भवान्
सभया भवता च तथा भुवनम् ॥

अत्र निशाशशिनो सभाभवतोश्च परस्परमुपकार्य्योपकारकभावे वर्त्तमानयोः यदिदं गगनं जगतीं च प्रति द्वयोः उपकारकत्वं चूड़िकेव उपर्य्युपरि लभ्यते सेयमन्योन्यचूड़िका ॥ १०० ॥

अन्योन्यभ्रान्तिर्यथा,

जम्बूनां कुसुमोत्करे नवमधुन्यारब्धपानोत्सवाः
कीराः पक्वफलाशया मधुकरीश्चुम्बन्ति मुञ्चन्ति च ।

वक्तृप्रतिपाद्यादिविशेषपर्य्यालोचनेन एव ध्वननमुन्मिषति । अत्र गोदावरीति । पूर्ववत्प्रतीयमानोऽपि परस्परमुपकारस्थलेन अनुकम्पानिर्दोषशब्दाभ्याम् अभिधया स्पृश्यत इत्युभयरूपम् । न च शब्दोपात्ते किं ध्वननेन इति वाच्यम् । भिन्नविषयत्वात् ॥ ९९ ॥

अत्र निशाशशिनोरिति । चूडिका शिखा । सा यथा शरीरतदवयवेभ्यो भिन्नैव उपलक्ष्यते तथात्रापि निशाशशिनोः सभाभवतोः परस्परमुपकारकत्वम् अभिसन्धाय द्वयोर्द्वयोः गगनजगतीप्रत्युपकारकत्वम् अन्यदेवाभिधीयते । न च एतावतैव विशेषेण पृथग्भावः । अन्योन्यालङ्कारकवलीकृतस्यैव तस्य सम्भवात् ॥ १०० ॥

अत्र जम्बूकुसुमेति । न हि तैमिरिककेशप्रत्ययवद्भ्रान्तेः अलङ्कारता अपि तु

एतेषामपि नीलकिंशुकदलैरेभिः समानत्विषां
पुष्पभ्रान्तिभिरापतन्ति सहसा चञ्चूषु भृङ्गाङ्गनाः ॥

अत्र जम्बूकुञ्जस्थितमधुकरीषु शुकशकुन्तानां या पक्वजम्बूफलभ्रान्तिर्या च मधुकरीणां शुकचञ्चूषु किंशुककुसुमभ्रान्तिः सा इयमन्योन्यभ्रान्तिरन्योन्यस्मात् अपृथगेव ॥१०१॥

अन्योन्यात्मकता यथा,

प्रफुल्लतापिञ्छनिभैरभीषुभिः शुभैश्च सप्तच्छदपांशुपाण्डुभिः ।
परस्परेण च्छुरितामलच्छवी तदेकवर्णाविव तौ बभूवतु ॥

अत्र श्यामपाण्डुतयोः परस्परव्यतिरेकेण एकवर्णकरणात् अन्योन्यमेकता नाम भ्रान्तिभेदोऽन्योन्यात् पृथगेव ॥ १०२ ॥

व्यत्ययो वस्तुनो यस्तु यो वा विनिमयो मिथः ।
परिवृत्तिरिहोक्ता सा काव्यालङ्कारलक्षणे ॥ १०३ ॥
सा त्रिधा व्यत्ययवती तथा विनिमयात्मिका ।
तृतीया चोभयवती निर्दिष्टा काव्यसूरिभिः ॥ १०४ ॥

त्रिधापि चासौ मुख्यामुख्यभेदाद् द्विधाभूय षोढा सम्पद्यते । तासु व्यत्ययवती मुख्या यथा,

कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ।

उद्भूतसादृश्यमूलाया एव तथाच चमत्कारिवस्त्वन्तरोपमापर्य्यवसायित्वमिति भ्रान्तिसंसर्ग एव विशेषार्पण उपकारः । अन्योन्यवचनेन परस्परगामिता तस्य तेनैव दर्शितेति अन्योन्यलक्षणाश्लेषात् कथं पृथग्भवतीति एतेन अन्योन्यैकता व्याख्याता ॥ १०१ ॥ १०२ ॥

परस्परनिरूप्यतासाम्यात् क्रमप्राप्तां परिवृत्तिं निरूपयति । व्यत्यय इति । वस्तुस्थितिविपर्य्यासवचनं परिवृत्तिरिति स्फुटमेव लक्षणम् ॥ १०३ ॥

सा त्रिधा । एकस्यानस्थितस्य वस्तुनः स्थानान्तरप्राप्तिवचनेन दानप्रतिग्रहवचनेन उभयवचनेन वा । तदाह । सा त्रिधेति ॥ १०४ ॥

उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिललितानां हा विचित्रो विपाकः ॥

अत्र यत् कुमुदवनादीनाम् अपश्रीकत्वादिकं यच्च अम्भोजखण्डादीनां श्रीमत्त्वादिकं मुख्यमेव प्रातरुपलभ्यते सेयं व्यत्ययवती मुख्या नाम परिवृत्तिः ॥ १०५ ॥

व्यत्ययवती अमुख्या यथा,

जो तीअ अहरराउ रत्तिं उव्वासिओ पिअअमेण ।
सोच्चिअ दीसइ गोसे सवत्तिणअणेसु संकन्तो ॥ (द)

अत्र प्रियतमेन रात्रौ उद्वासितस्य अधररागस्य येयं सपत्नीलोचनेषु संक्रान्तिः प्रातरमुख्या तेन इयममुख्या व्यत्ययवती परिवृत्तिः ॥ १०६ ॥

विनिमयवती मुख्या यथा,

प्रस्रवोत्तम्भदसुरभीणि निम्नगायाः
क्रीडन्तो गजपतयः पयांसि कृत्वा ।

(द) यस्तस्याः अधररागः रात्रौ उद्वासितः प्रियतमेन ।
स एव दृश्यते प्रभाते सपत्नीनयनेषु संक्रान्तः ॥

सर्वत्र मुख्यवृत्त्या गौणवृत्तिव्यपाश्रयेण वा तथा भावोक्तिरिति षट्प्रकारत्वं दर्शयति । त्रिधापि च असाविति । कुमुदवनमिति । कुमुदवनानुकूलत्वाद् हिमरश्मेः श्रीमत्वं प्रीतिरुदयश्च अपसृतानि प्राप्तानि पुनरम्भोजखण्डचक्रवाकौ हिमांशूनामिति व्यक्तौ व्यत्ययः । मुख्यत्वं ग्रन्थ एव व्यक्तम् ॥ १०५ ॥

अत्र प्रियतमेनेति । ताम्बूलादिहेतुकोऽन्य एव अधररागोऽन्यश्च मत्सरहेतुकः कषायतालक्षणो नयनगामीति तयोः अभेदाध्यवसायी यत्तत्पदाभ्यां प्रतीत इति गौणीवृत्तिः । प्रकाश्यते च शब्दवृत्त्या अधरस्थानस्थितस्य नयनस्थानप्राप्तिरिति तावतैव अलङ्कारनिर्वाहः ॥ १०६ ॥

किञ्जल्कव्यवहिततामरदानलेखैः
उत्तेरुः सरसिजगन्धिभिः कपोलैः ॥

अत्र करिकपोलमदामोदस्य अम्भोजरजःपरिमलस्य च सरित्सलिलद्विपकपोलपाल्योर्मुख्यत्वेनैव परस्परोपकारकरणादियं विनिमयवती मुख्या नाम परिवृत्तिः ॥ १०७ ॥

विनिमयवती अमुख्या यथा,

तस्य च प्रवयसो जटायुषः स्वर्गिणः किमिह शोच्यतेऽधुना ।
येन जर्जरकलेवरव्ययात् क्रीतमिन्दुकिरणोज्ज्वलं यशः ॥

अत्र जर्जरकलेवरं दत्त्वा शशिकिरणशुभ्रं यशः क्रीतमित्यमुख्ययैव वृत्त्या विनिमयोक्तेः अमुख्येयं विनिमयवती परिवृत्तिः ॥ १०८ ॥

उभयवती मुख्या यथा,

लोचनाधरकृताहृतरागा वासिताननविशेषितगन्धा ।
वारुणी परगुणात्मगुणानां व्यत्ययं विनिमयञ्च वितेने ॥

अत्र वारुण्या यदधराद्रागोऽपहृत्य चक्षुषोर्निक्षिप्तः तेन इयं व्यत्ययवती यच्च मुखामोदवासितया स्वामोदेन मुखामोदो विशेषितस्तेन विनिमयवती तदियमुभयथापि मुख्यवृत्त्यैव उक्तेति मुख्येयम् उभयवती परिवृत्तिः ॥ १०९ ॥

अत्र करिकपोलेति । गजेन्द्राणां मदजलचन्द्रकयोः स्वाश्रितयोः नदीषु संक्रामणं नदीस्थितयोश्च किञ्जल्काम्भोजपरिमलयोर्ग्रहणं तेन दानप्रतिदानवत्तया विनिमयो भवति ॥ १०७ ॥

अत्र जर्जरेति । मूल्यार्पणक्रययोः अत्र बाधाद्वाक्त एव उपचारः शब्दवृत्तिस्तु पूर्ववदेव कुण्ठैवेति भवति विनिमयः १०८ ॥

लोचनाधरेति । लोचनाधरयोः यथासंख्यं कृतः अहृतो रागो यया सा तेन लोचने कृतोऽधरादपनीत इति व्यत्ययः । वासिते आनने विशेषितो गन्धो यस्याः सा तथा । तेन तया मुखं वासितं मुखेन च सेति भवति विनिमयः । पर-

उभयवती अमुख्या यथा,

किं चित्रं यदि देवेन भूभृतः करदीकृताः।
देवोऽपि दापितः किं तैर्न पुनः पृष्ठतः करम्॥

अत्र भूभृताम् अकरदानां यत् करप्रदानं जिगीषोश्च यत् पृष्ठे हस्तनिक्षेपः स एव द्रव्यगुणादीनां स्थानादिपरिवृत्तौ व्यत्ययः। यच्च देवेन भूभृतः करदीकृताः देवोऽपि तैः पृष्ठतः करं दापित इति सोऽयं दानप्रतिपादनलक्षणो विनिमयः। एतदुभयमपि इह श्लिष्टपदाभिधेयत्वात् अमुख्यवृत्त्यैव उच्यमानम् उपलभ्यते इति उभयवती इयममुख्या परिवृत्तिः॥ ११०॥

दृष्टान्तः प्रोक्तसिद्ध्यै यः सिद्धेऽर्थे तन्निदर्शनम्।
पूर्वोत्तरसमत्वे तदृजु वक्रञ्च कथ्यते॥ १११॥

तेषु पूर्वमृजु यथा,

उदयन्नेव सविता पद्मेष्वर्पयति श्रियम्।
विभावयति भूतीनां फलं सुहृदनुग्रहः॥

गुणात्मगुणानामिति। परगुणानामिति परगुणानां व्यत्ययः आत्मगुणानां विनिमय इति सम्बन्धः। कर्तृत्वमुत्प्रेक्षितं तदेतत् दर्शयति। अत्रेति॥१०९॥११०॥

एकत्र प्रतीतस्य अन्यत्र प्रत्ययः परिवृत्तौ तथा दृष्टान्तेऽपीति तदनन्तरं दृष्टान्तं लक्षयति। दृष्टान्त इति। प्रोक्तस्य प्राकरणिकस्य सिद्धिर्निश्चयः। ननु अनुमानाङ्गमपि दृष्टान्ताभिधानं पृथगलङ्कारः स्यादित्यत आह। सिद्धेऽर्थ इति। सिद्ध एवार्थे कञ्चिद्विशेषमावेदयितुं दृष्टान्तोक्तिः निदर्शनम्। साध्ये तु अर्थे अनुमानमिति विभागः। पूर्वं दार्ष्टान्तिकोक्तिं समाप्य पश्चाद्दृष्टान्तोक्तिरिति द्वितीयः। एकयैव उक्त्या दृष्टान्तदार्ष्टान्तिकयोरुक्तिरिति तृतीयस्तदाह। पूर्वोत्तरसमत्व इति। यत्र शब्दत एव तुल्यतिवृत्तता दृष्टान्तदार्ष्टान्तिकयोः अनुगम्यते तत् ऋजुनिदर्शनम्। यत्र तु पर्य्यवसितायामुक्तौ सहृदयपर्य्यालोचनया तत् वक्रम्। तदेतदाह। ऋजुवक्रं चेति। तेन निदर्शनस्य षड्भेदाः॥१११॥

अत्र ऋजूक्त्यैव पूर्वं दृष्टान्तः पश्चाद्दार्ष्टान्तिकं प्रदर्शितमिति इदम् ऋजुपूर्वञ्च निदर्शनं सूर्य्यदृष्टान्तेन विभूतीनां सुहृदनुग्रहः फलमिति विज्ञापयति ॥ ११२ ॥

तदेव वक्रं यथा,

पण्णउडीअं वि जलिऊण हुअवहो जलइ जण्णवाडम्मि ।
णहु ते परिहरिअव्वा विसमदसासंठिआ पुरिसा ॥ (घ)

अत्रापि पूर्वं दृष्टान्तः पश्चात् दार्ष्टान्तिकं किन्तु यथा पूर्वञ्च उदीयमानः सविता सुहृत्सङ्घेषु श्रियम् अर्पयतीति तुल्येतिवृत्तता ऋजूक्त्या शब्देन एव अभिधीयते । नैवम् अत्र । किं तर्हि ज्वलनेतिवृत्तेन तुल्यं तत्तु सत्पुरुषाणाम् इतिवृत्तमशाब्दम् उक्तिचातुर्य्यात् प्रतीयते तत् इदं पूर्वञ्च वक्रञ्च निदर्शनम् ॥ ११३ ॥

(घ) पर्णकुटीमपि ज्वालयित्वा हुतवहो ज्वलति यज्ञवाटेऽपि ।
न हि ते परिहर्त्तव्या विषमदशासंस्थिताः पुरुषाः ।

सूर्य्यदृष्टान्तेनेति । ऋद्धिभिः सुहृदनुगृह्यत इति निष्ठोऽर्थः किन्तु तदेतदेव तासां फलमिति विशेषमभिधातुं सूर्य्यदृष्टान्तोपन्यासः । अत्र सम्बद्धतासुहृत्त्वम् अनुग्रहत्वं चेति शब्दत एव सूर्य्यादिषु दृष्टान्तदार्ष्टान्तिकाभिमतेषु प्रतीयत इति ऋजुत्वमित्यर्थः ॥ ११२ ॥

पण्णउडीति । पण्णपदं स्त्रीक्लृप्तदेशीयं पर्णे । अत्रापीति । दृष्टान्तेऽपि पर्णकुटीज्वलनादिकं विशेषणम् उपात्तं न च तद्दार्ष्टान्तिके सम्भवति शब्देन वा प्रत्याय्यते किन्तु बिम्बप्रतिबिम्बन्यायेन अत्र भवति । तथाहि यथा पर्णकुट्यां हुतवहस्य ज्वलनं यज्ञवाटे च तथा अव्यवस्थितचित्ततया यामीणोऽविदग्धयुवतिप्रसक्तो भूत्वा अन्यच्च नागरिकासु विदग्धासु रज्यते सोऽपि न त्याज्य इत्युक्तिचातुर्य्यात्तुल्येतिवृत्तता मन्यतेऽतो वक्रत्वमित्याह । किन्तु यथेति ॥ ११३ ॥

उत्तरमृजु यथा,

हिअए तिरच्छी पइ समुहं पच्छा गहिअकडक्खस्स ।
पहिअ एक्कज्जे गोरडी णं चउहट्ठउ वच्छ ॥ (न)

अत्र ऋजूक्त्या शब्दत एव अभिधीयमानसाधर्म्यं दार्ष्टान्तिकमभिधाय उत्तरकालं दृष्टान्तोऽभिहितः तदिदम् उत्तरमृजुनिदर्शनम् ॥ ११४ ॥

तदेव वक्रं यथा,

उपरि घनं घनपटलं दूरे दयिता किमेतदापतितम् ।
हिमवति दिव्यौषधयः कोपाविष्टः फणी शिरसि ॥

अत्रापि दार्ष्टान्तिकमभिधाय उत्तरकालमेव दृष्टान्तो निहितस्तदिदमुत्तरमृजु निदर्शनम् किन्तु यथा पूर्वस्मिन् हृदये तिर्य्यगित्यादिभिः शब्द एव ऋजूक्त्या साधर्म्याभिधानं नैवमत्र तथा अपि तु किमेतत् आपतितमिति उक्तिचातुर्येण विपर्य्ययेण च लिङ्गसङ्ख्या यथासङ्ख्यानां तदेतत् उत्तरं वक्रञ्च निदर्शनम् ॥ ११५ ॥

(न) हृदये तिरश्चीना प्राप्ता सम्मुखं पश्चाद्गृहीतकटाक्षस्य ।
पथिकस्य एकैव गौरता ननु चतुष्पथे व्रजन्ती ॥

हिअएति । पथिकस्य अभिलाषितया योषित्सा एकैव । हृदये स्मरणारूढा सती लग्ना अतएव तिरच्छी तिर्य्यक्शल्यायमाना पथिकसम्मुखाभिमुखस्य तस्य चलितत्वात् पश्चाच्च गृहीतकटाक्षा पश्चाद्भूतेन गृहीतश्चमत्कृतः कटाक्षो यस्या एकज्जे एकैव जिरवधारणे । णं ननु चतुष्पथेषु मार्गेषु कश्चित् सम्मुखता कश्चित्तिरश्चीनतां कश्चित् पश्चाद्भावं धत्ते । गौरी तु पथिकस्य एकैव तथेति । अत्र ऋजूक्त्या शब्दत एवेति । तिर्य्यक्त्वादीनाम् उभयगामिनां शब्देन उपादानात् प्रतीतिमात्रेण च न अलङ्कारनिर्वाहः अपि तु तदेतदापतितमित्युक्तिचातुर्य्येणेति । ननु च उपरीत्यनेन व्यवधानमुपात्तं दृष्टान्तेऽपि शब्द एव प्रतिफलति तत्कथं वक्रत्वमित्यत आह । विपर्य्ययेणेति । घनपटलं नपुंसकं फणी पुमान् दयिता च एकवचनवती औषधयो बहुवचनालिङ्गिताः घनपटलं

समसृजु यथा,

याति चन्द्रांशुभिः स्पृष्टा ध्वान्तराजी पराभवम् ।
सद्यो राजविरुद्धानां दर्शयन्ती दुरन्तताम् ।

अत्र राजविरुद्धानामिति श्लिष्टपदेन दर्शयन्तीति वर्त्तमानकाललक्षणात् सद्य इति तद्धितेन समकालमेव दृष्टान्तदार्ष्टान्तिकयोः शब्दत ऋजूक्त्यैव उक्तत्वादिदमृजुसमञ्च निदर्शनम् ॥ ११६ ॥

तदेव वक्रं यथा,

ण उण वरकोअण्डदण्डए पुत्ति माणुसेवि एवमेअ ।
गुणवज्जिए ण जाअइ वंसुप्पण्णेवि टङ्कारो ॥ (प)

अत्र न केवलं कोदण्डदण्डके मानुषेऽपि एवमेव इति इतरयोगवद्वक्रतया युगपदभिधानं गुणवर्जितवंशोत्पन्नेऽपि टङ्कारो न जायत इति श्लिष्टपदत्वेऽपि व्यतिरेकमुखेन गुण-

---

(प) न पुनर्वरकोदण्डदण्डके पुत्रि मानुषेऽपि एवमेव ।
गुणवर्जिते न जायते वंशोत्पन्नेऽपि टङ्कारः ॥

पूर्वं दार्ष्टान्तिकमुपक्रम्य दृष्टान्तोक्तौ न पूर्वं फणी निर्दिष्टः ततो लिङ्गसंख्यानां विपर्य्ययो भवति तदयमर्थेन शब्दत एव उपरिपर्य्यवस्थानं दूरत्व च दृष्टान्तयोः प्रतीयते शिरसि स्थितवतीति एताभ्याम् अन्यथाकारं बोधितत्वात् । फलतस्तु स एवार्थ इति वक्रतैवेति ॥ ११४ ॥ ११५ ॥

यातीति । राजा चन्द्री नृपतिश्च । तदनयोः श्लिष्टोक्तिविषयतया न पूर्वापरभावो विभाव्यते । चन्द्रांशुपराभूतध्वान्तराजीनृपतिविरुद्धदुरन्तयोरपि दर्शयन्तीति शब्दा सद्य इति तद्धितेन च समत्वम् । किन्तु ध्वान्तराजीपराभवं यातीति दृष्टान्तोक्तौ सत्यां मध्ये राजविरुद्धानामिति दार्ष्टान्तिकमुक्त्वा पुनरपि दृष्टान्तविशेषणं दर्शयन्तीति उक्तम् । अतएव उक्तिकवक्रीकृतत्वात् दृष्टान्तदार्ष्टान्तिकयोः समत्वमिति आशयवान् व्याचष्टे । अत्र राजविरुद्धानामिति ॥ ११६ ॥

णउण वरेति । गुणो धैर्य्यादिस्तन्त्री च वंशकुलं वैणश्च । टङ्कारोऽव्यक्तात्

वृत्त्या च अभिधानात् धनुषि इव मानुषेऽपि गुणवति एव महान् शब्दो भवतीति वक्रोक्त्या साधर्म्यावगतिः। तदिदम् अशाब्दत्वादिभिः पूर्वाद् भिद्यमानं समं वक्रञ्च निदर्शनम्॥ ११७॥

शब्दोपात्ते प्रतीते वा सादृश्ये वस्तुनोर्द्वयोः।
भेदाभिधानं भेदश्च व्यतिरेकश्च कथ्यते॥ ११८॥
स्वजातिव्यक्त्युपाधिभ्यामेकोभयभिदा च सः।
सादृश्याद् वैसादृश्याच्च भिन्नः षोढाभिजायते॥११९॥

करणं ख्यातिश्च। इतरेतरयोगवदिति। यथा हि "त्वन्मुखं पुण्डरीकं च फुल्ले" इत्यत्र फुल्लं च इति इतरेतरयोगेन एकशेषे एकयोक्त्या फुल्लेति द्वाभ्यां सम्बद्धाते तथा विनापि एकशेषं गुणवच्छिए वंसुप्पसे टङ्कार इति युगपदन्वीयन्ते। ननु यथा राजविरुद्धानामित्यत्र शेषेण ऋजुत्व तथात्रापि भविष्यतीत्यत आह। श्लिष्टपदत्वेऽपीति। धनुषीव मानुषेऽपि महान् शब्दो भवतीति विवक्षितम्। न च व्यतिरेकमुखेन उपनयेऽयमर्थः शब्दादवगम्यते, प्रतीयते चार्थ इति युक्तं वक्रत्वम्। ननु व्यतिरेकेण एव कथं न तु तुल्यवृत्तिता सम्मतेति अत आह। गुणवृत्त्या चेति। सत्यमेतत् तथापि द्वयोर्वर्णनीययोर्गुणादिकयोः अभेदाध्यवसायी वक्तव्यः। तथा गौणवृत्तिव्यपाश्रयेणैव वक्रत्वम्। तदिदमुक्तं व्यतिरेकमुखेन गुणवृत्त्या चेति॥ ११७॥

व्यतिरेकं विना दृष्टान्तदार्ष्टान्तिकभावाभावाद् व्यतिरेकाभ्यां तल्लक्षणमाह। शब्दोपात्त इति। भेदाभिधानं वैधर्म्यकथनम्। एवञ्चेत् मेरुसर्षपयोरपि तथाभिधानमलङ्कारः स्यादत उक्तं सादृश्ये वस्तुनोरिति। उपमानोपमेययोः इत्यर्थः। सादृश्य द्विधा। शब्दोपात्त च अशब्दोपात्तमपि ध्वननानुमानादिभिः अवगम्यते इति न विरोधस्तदिदमुक्तं प्रतीते चेति। तदयमर्थः। उद्भूतचमत्कारिसादृश्ययोः वैरस्योक्तिः व्यतिरेकः स्वरूपाख्यस्तु पृथग्भेदो नास्त्येवेति उक्तम्॥११८॥

विभाग दर्शयति। स्वजातीयेति। येन रूपेण वैयतिरेक्यमुपादीयते तद्रूपवन्तं व्यतिरेकप्रतियोगिन परिकल्प्य ततो व्यतिरेकोऽपीति स्वजातिव्यतिरेकः प्रथमःप्रकारः। द्वितीयस्तु सैव व्यक्तिविधर्मेति एतत् प्रकारद्वयं यथासंख्यमभिधीयमानसादृश्ययोरिति मूलभेदद्वयं तथैव अपरमेकानेकलक्षणं प्रकारद्वयं तत्रैव अन्यत्सादृश्यवैसादृश्यरूपं द्वयमिति क्रमेण षोढाभेदो विवक्षितः। यथा

तत्र शब्दोपात्तसादृश्ये स्वजातिव्यतिरेको यथा,

अरत्नालोकसंहार्य्यमवार्य्यं सूर्य्यरश्मिभिः ।
दृष्टिरोधकरं यूनां यौवनप्रभवं तमः ॥

अत्र यौवनप्रभवस्य तमसस्तमोजात्या सह दृष्टिरोधकरमिति सादृश्यमुक्त्वा अरत्नालोकसंहार्य्यमवार्य्यं सूर्य्यरश्मिभिः इति व्यतिरेको विहितः । सोऽयं स्वजातिव्यतिरेकः ॥ १२० ॥

प्रतीयमानसादृश्ये स्वव्यक्तिव्यतिरेको यथा,

अस्सोस्सेहिं सुचरिअसअहिं अणुदिणं वड्ढिअ माणु ।
अप्पण वि णहु महु पि अह अप्पाणेण समाणु ॥ (फ)

अत्र प्रतीयमानोपमानसादृश्योपचरितभेदात् आत्मव्यक्तेः अन्यैरन्यैश्च सुचरितशतैः स्वव्यक्तित एव भेदोऽभिहितः सोऽयं स्वव्यक्तिव्यतिरेकः ॥ १२१ ॥

शब्दोपात्तसादृश्य एको व्यतिरेको यथा,

प्रेयानेव वृषस्तथापि सततं भूतिस्तवापि स्थिरा
दुर्गाया भवतापि भूधरभुवः सम्यग् गृहीतः करः ।

(फ) अन्यै रन्यैः सुचरितशतैरनुदिनं वर्द्धते मानः ।
अस्यापि न खलु महानपि अथात्मना समानः ॥

च स्वजातिव्यक्तिव्यतिरेकयोः प्रतीयमानाभिधीयमानसादृश्यगामिता न सम्भवति तथाग्रे वक्ष्यते ॥ ११९ ॥

अत्र यौवनप्रभवस्येति । यौवनकृतम् अज्ञानलक्षणम् अन्यदेव तमोऽन्यच्च अन्धकाररूपं तयोः तद्भावापत्तिरियमेव कल्पना अस्माभिरुक्ता । अनेन तु प्रकारेण रसः पुष्यतीति अलङ्कारमध्ये गणनम् ॥ १२० ॥

अस्सोस्सेहिं अन्योन्यैर्मानोऽहङ्कारः पूजा वा । यौ तु कल्पितभेदाधिकरणत्वेन उपात्तौ विरोधिधर्मवत्तया शब्दात् प्रतीयेते तयोः निर्यत्नत्वादिकमिति भवति सादृश्यं प्रतीयमानम् ॥ १२१ ॥

प्रेयानेवेति । वृषो गौर्धर्मश्च । भूतिः सम्पद् भस्म च दुर्गा गौरी विषमा च भूधरभूः गिरिजा पर्वतसूनिश्च करो हस्तो राजदण्डश्च । वाहिनीशः समुद्रः सेना-

निर्व्याजं परमेश्वरत्वमियता नोयासि वक्तुं जनैः
हेलोल्लासितवाहिनीशमथने यन्नो विषादी भवान् ॥

अत्र प्रियवृषत्वादिभिः अभिहितसादृश्ययोः उपमानोपमेययोः उपमेयस्य एव यथोक्तसादृश्यविषये विषादित्वयुक्तमिति एकव्यतिरेकोऽयम् ॥ १२२ ॥

स एव प्रतीयमानसादृश्यो यथा,

सकलङ्केन जड़ेन च साम्यं दोषाकरेण ते कीदृक् ।
अभुजङ्गः समनयनः कथमुपमेयो हरेणासि ॥

अत्र प्रतीयमानसादृश्यस्य पूर्वार्द्धे चन्द्रोपमानस्य सकलङ्कतादिः उत्तरार्द्धेन वर्णनीयोपमेयस्य अभुजङ्गत्वादिरेकस्य एव भेदकः स्वधर्मोऽभिहितः सोऽयमपि एकव्यतिरेक एव ॥१२३॥

शब्दोपात्तसादृश्ये उभयव्यतिरेको यथा,

अभिन्नवेलो गम्भीरावम्बुराशिर्भवानपि ।
असावञ्जनसङ्काशस्त्वञ्च चामीकरद्युतिः ॥

अत्र द्वयोरपि अभिधीयमानसादृश्यमुपन्यस्य उभयोरपि पृथक् पृथग् भेदकः स्वधर्मोऽभिहितः सोऽयम् अभिधीयमानसादृश्ययोः उभयव्यतिरेकः ॥ १२४ ॥

स एव प्रतीयमानसादृश्ययोर्यथा,

त्वन्मुखं पुण्डरीकञ्च द्वयोरप्यनयोर्भिदा ।

पतिश्च । विषादी विषभक्षकोऽवसादवांश्च । यद्यपि अत्र अनुरूपं सादृश्यं नास्ति तथापि शब्दसादृश्येनापि उपमा प्रवर्त्तत एव । यथा सकलङ्कं पुरमेतज्जात सम्प्रति सितांशुबिम्बमिवेति । अतएव उभयालङ्कारत्वम् उपमायाः ॥ १२२ ॥

सकलङ्केनेति । कलङ्कोऽपवादी लाञ्छनञ्च । जड़ो मूर्खः शीतलश्च । अभुजङ्गो न वेश्यापतिः अविद्यमानसर्पश्च । समनयनो युगनयनः सर्वान् समन्नयतीति च । आह्लादकत्वादिकं चन्द्रेण अनिरुद्धैश्वर्य्यादिकं परमेश्वरेण सादृश्यं प्रतीयते ॥ १२३ ॥

कमलं जलसंरोहि त्वन्मुखं त्वदुपाश्रयम् ॥

तदेतत् निगदेनैव व्याख्यातम्। सोऽयं प्रतीयमानसादृश्ययोः उभयव्यतिरेकः ॥ १२५ ॥

अभिधीयमानसादृश्ययोः सदृशव्यतिरेको यथा,

त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनी।
भ्रमद् भ्रमरमम्भोजं लोलदृष्टिमुखं तु ते ॥

अत्र मुखाम्भोजयोः फुल्ले सुरभिगन्धिनी इति पदाभ्याम् अभिधीयमानसादृश्ययोः सदृशमेव। भ्रमद्भ्रमरत्वं लोलदृष्टित्वञ्च भेदकमुपन्यस्तमिति सोऽयं शब्दोपात्तसादृश्ययोः सदृशव्यतिरेकः ॥ ॥ १२६ ॥

स एव प्रतीयमानसादृश्ययोर्यथा,

चन्द्रोऽयमम्बरोत्तंसो हंसोऽयं तोयभूषणम्।
नभो नक्षत्रमालीदमिदमुत्कुमुदं पयः ॥

अत्र पूर्वार्द्धे चन्द्रहंसयोः प्रतीयमानसादृश्ययोः अम्बरोत्तंसत्वतोयभूषणत्वे उत्तरार्द्धेन तु नभःपयसोः नक्षत्रमालित्वोत्कुमुदत्वे सदृशे एव भेदके सोऽयं प्रतीयमानसादृश्ययोः सदृशव्यतिरेकः ॥ १२७ ॥

अभिहितसादृश्ययोः असदृशव्यतिरेको यथा,

शशाम वृष्टिर्मेघानामुत्सङ्गे तस्य भूभृतः।
विरराम न रामस्य धारासन्ततिरश्रुणः ॥

अत्र भूभृदित्यनेन साक्षादुपात्तसादृश्ययोः राममाल्यवतोर्योऽयमुत्सङ्गे समस्ताश्रुधारापातो यश्च मेघवृष्टेः अभावः तदिदम् उभयोः असदृशमेव भेदकं सोऽयम् अभिधीयमानसादृश्ययोः असदृशव्यतिरेकः ॥ १२८ ॥

अभिन्नेति। वेला मर्यादा तीरञ्च। गम्भीरोऽतलस्पर्शे अचलितचित्तवृत्तिश्च ॥ १२४—१२७ ॥

स एव प्रतीयमानसादृश्ययोर्यथा,

अभ्रूविलासमसृष्टमदरागं मृगीक्षणम्।
इदन्तु नयनद्वन्द्वं तव तद्गुणभूषितम्॥

अत्र कान्तामृगीक्षणयोः प्रतीयमानसादृश्ययोः भ्रूविलासमदरागौ तदभावौ च विसदृशौ भेदकाविति सोऽयं प्रतीयमानसादृश्ययोः असदृशव्यतिरेकः॥ १२९॥

सदृशासदृशव्यतिरेकाभ्यामिव तदुभयव्यतिरेको यथा,

निर्मलेन्दु नभो रेजे विकचाब्जं बभौ सरः।
परं पर्य्यश्रुवदनौ मन्नतुर्भ्रातरावुभौ॥

अत्र नभःसरसोः प्रतीयमानसादृश्ययोः निर्मलेन्दुत्वं विकचाब्जत्वं च प्राग्वदेव सदृशे भेदके। ताभ्यां च मुखचन्द्रमुखकमलाभ्यां मनोहराह्लादकत्वाभ्यां च प्रतीयमानसादृश्ययोरेव रामलक्ष्मणयोर्येयं मुखपर्य्यश्रुता तनौ च म्लानिः निर्मलेन्दुताविराजमानत्वयोः विकचाब्जत्वशोभमानत्वयोश्च सा विसदृशीति सोऽयं सदृशासदृशभेदकत्वकृतभेद एव तत् उभयव्यतिरेकः॥ १३०॥

एतेनैकव्यतिरेकादिसम्भेदोऽपि व्याख्यातः। यथा,

मिथ्या देव भुजेन तेऽल्पविभवः कल्पद्रुमः स्पर्द्धते
न ह्येनं भुवनत्रयाभयमहासत्री कृपाणोऽत्यति।
तुल्यस्तत्र भवान् प्रयागविटपी यस्यैतदेकार्णवे
कायान्तर्विनिवेश्य विश्वमखिलं शाखासु शेते हरिः॥

शशाम वृष्टिरिति भूभृतो राज्ञश्च॥ १२८—१२९॥

ताभ्यां च मुखं चन्द्रेणेति। मुखस्य चन्द्रकमलभावो नादिकविकल्पनासिद्ध इति तेनापि रूपेण प्रतीयमानसादृश्यत्वमुक्तम्॥ १३०॥

ननु मिथो व्यतिरेकिभेदगणनमनुपपन्नं सदृशासदृशव्यतिरेकवदेकादिव्यतिरे-

अत्र वर्णनीयबाहुकल्पद्रुमयोः अभिमतफलदायित्वादिभिः प्रतीतसादृश्ययोः भुवनत्रयाभयप्रदायी वर्णनीयबाहौ कृपाणो भेदक इति एकव्यतिरेकः। तथा वर्णनीयबाहोः प्रयागवटस्य च प्राग्वदेव प्रतीयमानसादृश्ययोः एकस्य भुवनत्रयाभयमहासत्त्वो कृपाणः शाखासु शेते। अन्यस्य तु महाप्रलये स्वकायान्तर्निवेशिताखिलविश्वो वैकुण्ठः। ताविमौ तयोः सदृशावेव भेदकौ हरिकृपाणयोः वा श्यामतादिभिः प्रतीयमानसादृश्ययोरिमावेव धर्मौ भेदकौ सोऽयमेवंप्रकारो व्यतिरेकसङ्कर उन्नेयः। स्वजातिव्यतिरेके प्रतीयमानसादृश्यं स्वव्यक्तिव्यतिरेके च अभिधीयमानसादृश्यं यदि उदाहरणं दृश्यते सम्भवति वा तदा तदपि उदाहार्य्यम् ॥ १३१ ॥

कार्य्यारम्भे सहायाप्तिर्दैवादैवकृतेह या।
आकस्मिकी बुद्धिपूर्वाभयी वा तत् समाहितम् ॥१३२॥

तत्र आकस्मिकी दैवकृता यथा,

मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः।
उपकाराय दिष्ट्येदमुदीर्णं घनगर्जितम् ॥

कस्यापि सम्भवादित्यत आह। एतेनेति। प्राग्वदेवेति। अभिमतफलदायित्वादिभिः। एवम्प्रकार इति। न हि एकवाक्यस्थतामात्रेण तथा चमत्करोति यथाऽङ्गाङ्गिभावादिभिः परस्परग्रथनया इति। सैव प्रकारपदेन अभिहिता। यदि उदाहरणं दृश्यते सम्भवति वा इति। न हि स्वजातिव्यतिरेके द्वयोः अभेदाध्यवसायः सादृश्यमन्तरेण चमत्कारम् अर्पयतीति कल्पितमेव वाच्यम्। न च कल्पनाशब्दमन्तरेण इति प्रतीयमानसादृश्यसम्भवः सादृश्यस्य भेदाधिष्ठानत्वात्। स्वव्यक्तिव्यतिरेकेऽपि असम्भवः तथाभूतमेव तु शब्देन उपादीयत इति स्वादत उक्तं यदि दृश्यत इति ॥ १३१ ॥

सहकारित्वं व्यतिरेकनिरूप्यमतो व्यतिरेकानन्तरं समाहितलक्षणमाह। कार्य्यारम्भ इति। सहायः प्रकृतकार्य्यकारणस्य सहकारी तेन अवङ्गारता

अत्र माननिराकरणोपक्रमे कालोत्पन्नस्य आकस्मिकघन-गर्जितस्य मानविध्वंसे सहकारित्वात् आकस्मिकीयं दैवकृता सहायसम्पत्तिः॥ १३३ ॥

आकस्मिकी एव अदैवकृता यथा,

अनुशासतमित्यनाकुलं नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छितस्तमभीयाय पराशरात्मजः ॥

अत्र भीमानुशासनोपक्रमकाल एव व्यासागमनस्य तदुपकारित्वात् आकस्मिकी इयम् अदैवकृता सहायाप्तिः॥ १३४ ॥

बुद्धिपूर्वा दैवकृता यथा,

कल्पान्ते शमितत्रिविक्रममहाकङ्कालदण्डस्फुर-
च्छेषस्यूतनृसिंहवक्रनखरप्रोतादिकोलामिषः ।
विश्वैकार्णवताविशेषमुदितौ तौ मत्स्यकूर्मावुभौ
कर्षन् धीवरतां गतोऽस्य तु जगन्मोहं महाभैरवः ॥

अत्र प्रलयसमये महेश्वरेण समापयितुम् उपक्रान्तानां त्रिविक्रमादीनां योऽयं तद्भुवा वड़िशादिना मत्स्यकूर्मयोः आकर्षणप्रकारः स भगवता भैरवेण बुद्धिपूर्वकम् उपकल्प्यमानो दैवात् तथाभूतैः एव तैः सम्पद्यते इति बुद्धिपूर्वेयं दैवकृता सहायाप्तिः ॥ १३५ ॥

बुद्धिपूर्वा अदैवकृता यथा,

मूले पञ्च ततश्चतुष्टयमिति स्रक् सन्निवेशैः शिरः

आकस्मिकी अचिन्तितपूर्वा बुद्धिपूर्वाद् विपरीता । आकस्मिक्यादीनां प्रत्येकं दैवादैवकृतसम्बन्धे षट्प्रकारं समाहितमित्यर्थोक्तम् ॥ १३२ ॥ १३३ ॥

व्यासागमनस्येति । व्यासेन सम्पाद्यमानस्य तेन अदैवकृतेति ॥ १३४ ॥

दैवात् तथाभूतैरेवेति । नरसिंहनखादीनां वड़िशाद्युचितमूर्त्तिशालिनां दैवमेव निमित्तं वड़िशादिचिन्तया च विषयीकृता इति बुद्धिपूर्वता ॥ १३५ ॥

पुष्पैरन्यतमावलोकनमितैरुच्छोणितैरर्चिते ।
हस्तस्पर्शवशेन मूर्ध्नि दशमं मूर्द्धानमारोपयन्
शम्भोरद्भुतसाहसैकरसिकः कैर्न श्रुतो रावणः ॥

अत्र योऽयं दशवदनेन स्वयं छिन्नैः शिरोभिर्भगवतः शम्भोः अभ्यर्चनाप्रकारः उपक्रान्तः तत्र मूले पञ्च ततः चतुष्टयमिति शिरोविरचनाप्रपञ्चो बुद्धिपूर्वको अदैवकृतः क्रियमाणोऽस्य कर्मणः समाप्तौ सहकारिकारणतामासादयतीति अयमदैवकृतो बुद्धिपूर्वकः समाहितभेदः ॥ १३६ ॥

आकस्मिकी बुद्धिपूर्वा दैवकृता यथा,

सा कौमुदी नयनयोर्भवतः सुजन्मा
तस्या भवानपि मनोरथबन्धबन्धुः ।
तत्सङ्गमं प्रति सखे ! न हि संशयोऽस्ति
यस्मिन् विधिश्च मदनश्च कृताभियोगः ॥

अत्र योऽयं माधवस्य मालतीं प्रति समाममाभिलाषः तत्र इयं मालत्या आकस्मिकी बुद्धिपूर्वा च तथा प्रवृत्तिः सा उभयी अपि दैवकृता च सहायाप्तिः समाहितभेदः ॥ १३७ ॥

मूले पञ्चेति । अधोऽधः स्थूलपुष्पसन्निवेश उपर्युपरि तनुरिति दूर्वापूजाप्रकारः प्रसिद्धः । अन्यतमालोकननिमित्तैः आरोपितैः । अत्र लोकप्रसिद्धपूजाप्रकारः कार्यभूत उपर्युपरि तनुसन्निवेशनिष्पादनं सहकारि । इदं च रावणप्रयत्ननिष्पाद्यत्वात् अदैवकृत बुद्धिपूर्वं च भवतीति अन्यतमेन मूर्ध्ना अन्यतमस्य आरोपणं न नवमच्छिदपर्यन्तम् आसीत् । पूजास्वरूपेण एव भगवांस्तुष्यति न तथा विदितेन इत्यभिप्रायवतो निस्तरङ्गा भक्तिरेव साहसस्य अद्भुतत्वम् ॥ १३६ ॥

अत्र योऽयं माधवस्येति । विधिश्च मदनश्च कृताभियोग इत्यनेन मालत्याः पूर्वानुभावाः कथ्यन्ते ते च द्विधा भवन्तीति आकस्मिकी दैवपूर्वसहायसम्प्राप्तिः ॥ १३७ ॥

आकस्मिकौ बुद्धिपूर्वा च अदैवकृता यथा,

दृष्टिर्वन्दनमालिका स्तनयुगं लावण्यपूर्णौ घटौ
शुभ्राणां प्रकरः स्मितं सुमनसां वक्त्रप्रभा दर्पणः।
रोमाञ्चोद्गम एव सर्षपकणः पाणौ पुनः पल्लवौ
स्वाङ्गैरेव गृहं प्रियस्य विशतस्तन्व्या कृतं मङ्गलम्॥

अत्र आगच्छतः प्रियस्य इयं वन्दनमालिकादिमङ्गलक्रिया मनःपरितोषहेतुः तस्याः तन्व्या इङ्गिताकारैरेव यन्निवर्त्तनं सोऽयमाकस्मिकः स्वबुद्धिपूर्वकश्च तत्सहकारिकारणत्वात् अदैवकृतश्च समाहितभेदः॥ १३८॥

भ्रान्तिर्विपर्य्ययज्ञानं द्विधा सापि प्रयुज्यते।
अतत्त्वे तत्त्वरूपा च तत्त्वे चातत्त्वरूपिणी॥ १३९॥
अतत्त्वे तत्त्वरूपा या त्रिविधा सापि पठ्यते।
अबाधिता बाधिता च तथा कारणबाधिता॥ १४०॥

अत्रागच्छतः प्रियस्येति। मङ्गलक्रियामात्रं न चमत्कारास्पदमत उक्तं मनःपरितोषहेतुरिति। स्मितं बुद्धिपूर्वम्। रोमाञ्चो न बुद्धिपूर्वः। एवं दृष्ट्यादौ यथायथं वेदितव्यमिति॥ १३८॥

बुद्धिपूर्वाया सद्भावासौ क्वचित् भ्रान्तिरपि अस्ति ततः तदनन्तरं तां लक्षयति। भ्रान्तिरिति। अतस्मिंस्तदिति निश्चयो भ्रान्तिः। विपर्य्ययो न च एव संशयादय इत्युक्तपूर्वम्। सा द्विधा। यस्य यत्र असद्भावः तस्य तत्र सद्भावारोपः यस्य वा यत्र सद्भावस्तस्य तत्र असद्भावारोपः सोऽयं भावाभावकृतो नियमो भ्रान्तिबाधनियमेऽपि क्वचित् वा आरोपन्यासो भवति क्वचित् न भवति। उपन्यासो द्विरूपः। अभिधया वृत्त्यन्तरेण च। यत्र बाधोपन्यासे बाधितानुपन्यासे वा अबाधिता तस्मिन् एव वाक्ये अविज्ञातबाधेत्यर्थः। उपन्यासेतरप्रकारेण ज्ञातबाधकाबाधिता। बाधकारणोक्तेः बाधपर्य्यवसानाभिप्रायत्वात् तदेतद् दर्शयति। अबाधिता बाधिता चेति॥ १३९॥ १४०॥

तत्र अतत्त्वे तत्त्वरूपाऽबाधिता यथा,

मोहविरमे सरोसं थोरत्थणमण्डले सुरवहूणम् ।
जेण करिकुम्भसम्भावणाइ दिट्ठी परिट्ठविआ ॥ (ब)

अत्र सुरवधूस्तनमण्डले करिकुम्भत्वेन गृहीते तत्त्वरूपे यन्मिथ्यैव तत्त्वारोपणं न च अनन्तरं बाधकोपन्यासकृतस्तेनेयम् अबाधिता अतत्त्वे तत्त्वरूपा भ्रान्तिः ॥ १४१ ॥

अतत्त्वे तत्त्वरूपा बाधिता यथा,

हसिअं सहत्थतालं सुक्खवड़ं उपगएहिम् ।
पहिएहिं पत्तप्फलसरिच्छे उड्डीणे पूसवन्दम्मि ॥ (भ)

अत्र पत्रफलितोऽयं न्यग्रोध इति अतत्त्वरूपे तत्त्वबुद्धौ उत्पन्नायां य उत्तरकालम् अपत्रतानिष्फलताप्रत्ययः तेन इयम् अतत्त्वे तत्त्वरूपाख्या बाधिता भ्रान्तिः ॥ १४२ ॥

(ब) मोहविरमे सरोषं स्थूलस्तनमण्डले सुरवधूनाम् ।
येन करिकुम्भसम्भावनया दृष्टिः परिस्थापिता ॥

(भ) हसितं सहस्तताल सुख्यवटसुपगतैः ।
पथिकैः पत्रफलसदृशे उड्डीने शुकवृन्दे ॥

मोहविरम इति । परिट्ठविआ व्यवस्थापिता । तत्रैव परिपूर्वस्य तिष्ठतेः प्रसिद्धत्वात् । सरोषमिति समवायिविशेषणं न च तदन्तरेण क्रिया सद्भावः । तेन मोहेऽपि न प्रक्रान्तरसानुभावस्वरूपतामहासीदिति व्यज्यते । इत्थं च दृढानुबन्धोऽसौ रसो यद् बलवत्तरविरोधसम्पर्केऽपि न कार्कश्यमगादिति स्थूलस्तनमण्डले सुरवधूपदैः प्रकाश्यते सम्भावनया न तु पूर्वोत्पन्नज्ञानेन । करिकुम्भाना दृढतरवासनत्वात् । अबाधिता इत्यत्र यथा अर्थाभिमतस्तथा दर्शयति । बाधकोऽपन्यासमिति ॥ १४१ ॥

हसिअमिति । पूसः शुकी वन्दं वृन्दम् । शुकचञ्चुपुच्छानां पक्वन्यग्रोधफलनवपलाशसादृश्यम् । यद्यपि न अत्र बाधोऽभिहितः तथापि उड्डीण इत्यनेन अर्थाभावविषया प्रतीतिः क्रियते । कथमन्यथा हसितहस्ततालरूपकार्य्यस्य अपन्यासः स्यात् ॥ १४२ ॥

अतत्त्वे तत्त्वरूपा कारणबाधिता यथा,

कनककलशस्वच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम् ।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन्
जयति जनितव्रीडाहासः प्रियाहसितो हरिः ॥

अत्र श्यामायाम् आत्मद्युतौ असितसिचयप्रान्तबुद्धिः अतत्त्वे तत्त्वरूपा प्रियाहसितेन च कारणेन यद् बाधिता सैषा अतत्त्वे तत्त्वरूपा कारणबाधिता भ्रान्तिः ॥ १४३ ॥

अतत्त्वरूपा तत्त्वे या सापि त्रैविध्यसिद्धये ।
हानोपादानयोर्हेतुरुपेक्षायाश्च जायते ॥ १४४ ॥

तत्र तत्त्वेऽतत्त्वरूपा हानहेतुर्यथा,

सो मुद्धमिओ मिअतिण्हिआहिं तह दूणो हआसाहिम् ।
जह सब्भावमईणं वि णईणं परम्मुहो जाओ ॥ (म)

अत्र पारमार्थिकीषु अपि नदीषु मृगतृष्णाप्रतारितः सन् यन्न मृगः पयः पातुं प्रतिपद्यते प्रत्युत त्यजति तेन इयं तत्त्वेऽपि अतत्त्वरूपा हानहेतुर्भ्रान्तिः ॥ १४५ ॥

(म) स मुग्धमृगो मृगतृष्णिकाभिः तथा दूनो हताशाभिः ।
यथा सद्भावमयीनामपि नदीनां पराङ्मुखो जातः ॥

अत्र श्यामायामिति । न अत्र पूर्वोदाहरणशब्देन कथाचिदपि वृत्त्या अर्थाभावो विषयीकृतः किन्तु प्रकारान्तरेण उन्नीयते । तथा हि नायकेनांशुकापहरणलीलायितेऽपि यदिदं राधायाः सिचयावरोधाङ्गचलनभूचेपादिमुग्धाङ्गनोचितविभ्रमविरोधि हसितं तत्कारणं बाधयेति ॥ १४३ ॥ १४४ ॥

हानं द्विविधं प्रवृत्त्यभावो विपरीतश्च प्रथमो द्विधापि अत्र अभिमतमिति व्याख्यानेन स्फुटयति । न प्रतिपद्यते प्रत्युत त्यजतीति ॥ १४५ ॥

तत्त्वे अतत्त्वरूपोपादानाहेतुर्यथा,

समर्थये यत् प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्त्ततेऽन्यथा।
अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभावितप्रियः॥

अत्र अङ्गीकृतलताकरूपोर्वशीपरिष्वङ्गसुखनिमीलिताक्षस्य पुरूरवसः शापान्ताविर्भूतसत्यरूपायामपि तस्यां येयं पूर्वानुभूतैवंविधानेकविप्रलम्भसम्भावनया नयनयोः अनुन्मीलनबुद्धिः सेयं तत्त्वेऽपि अतत्त्वरूपोपादानहेतुः भ्रान्तिः॥ १४६॥

तत्त्वेऽपि अतत्त्वरूपोपेक्षाहेतुर्यथा,

चिक्रंसया कृत्रिमपत्रिपङ्क्तेः कपोतपालीषु निकेतनानाम्।
मार्जारमप्यायतनिश्चलाङ्गं यस्यां जनः कृत्रिममेव मेने॥

अत्र तत्त्वरूपेऽपि मार्जारे कृत्रिमोऽयमिति बुद्धौ जातायां तस्यां प्रयोजनत्त्वेन यदुपेक्षणं सेयं तत्त्वेऽपि अतत्त्वरूपोपेक्षाहेतुर्भ्रान्तिः॥ १४७॥

भ्रान्तिमान् भ्रान्तिमाला च भ्रान्तेरतिशयश्च यः।
भ्रान्त्यनध्यवसायश्च भ्रान्तिरेवेति मे मतम्॥

तत्र भ्रान्तिमान् यथा,

कपाले मार्जारो पय इति करान् लेढि शशिन-
स्तरुच्छिद्रे प्रोतान् विसमिति करी सङ्कलयति।

समर्थयेदिति। विभावितप्रिय इति युक्तः पाठः। प्रियादिषु पूर्ववद्भाव-प्रतिषेधात्। न अत्र अभावारोपः स्फुटोऽवगम्यत इति प्रकरणमादाय व्याचष्टे। अत्र अङ्गीकृतेति। न च वाच्यं दीक्षायमानतया संशयरूपमिदं ज्ञानमिति। यतो नास्त्येव अत्र प्रियतमा तथापि तदारोपेण मनसापातिवाहनमुचितमिति जानतः पुरूरवसोऽनुबन्धप्रकर्षः पुष्यति न अन्यथेति सहृदयहृदयसाक्षिकमिदं तदेतत् मनाक् स्फुटयति। पूर्वानुभूता एवंविधेति॥ १४६॥

प्रयोजकत्वेन यदुपेक्षणमिति। या वृत्तिं निवृत्तिं वा न प्रसूते सा अपेक्षाबुद्धिः एवमर्थः॥ १४७॥

रतान्ते तल्पस्थान् हरति दयिताप्यंशुकमिति
प्रभामत्तश्चन्द्रो जगदिदमहो विभ्रमयति ॥

अत्र इन्दुमरीचिषु पयःप्रभृतिभ्रान्तिभूम्ना अयं भ्रान्तिमान् नाम भ्रान्तेरेव भेदः ॥ १४८ ॥

भ्रान्तिमाला यथा,

नीलेन्दीवरशङ्कया नयनयोर्बन्धूकबुद्ध्याधरे
पाणौ पद्मधिया मधककुसुमभ्रान्त्या तथा गण्डयोः।
लीयन्ते कवरीषु बान्धवजनव्यामोहजातस्पृहा
दुर्वारा मधुपाः कियन्ति तरुणि। स्थानानि रक्षिष्यसि ॥

अत्र युवत्यवयवेषु नयनादिषु मधुव्रतानां येय नीलोत्पलादिबुद्धिः सेयं मालाक्रमेण उपजायमाना भ्रान्तिमाला भ्रान्तेरेव भेदः ॥ १४९ ॥

भ्रान्त्यतिशयो द्विधा वितर्कहेतुः विपर्य्ययहेतुश्च। तयोः पूर्वमुपमाभ्रान्तिमाचक्षते द्वितीयन्तु भ्रान्त्यतिशयमेव। तत्र उपमाभ्रान्तिर्यथा,

हृतोष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभेर्निपतद्भिरङ्कितम्।
च्युतं रुषा भिन्नगतेरसंशयं शुकोदरश्याममिदं स्तनांशुकम् ॥

अत्र शाद्वलेऽपि समुत्पन्नस्तनांशुकभ्रमस्य पुरूरवसो योऽयं सादृश्यातिशयितो वितर्कः सेयमुपमाभ्रान्तिः ॥ १५० ॥

भ्रान्तिमानिति। भूम्नि मतुप्। भूमार्थौ द्विविधौ बहूनां भ्रान्तीनाम् एकविषयत्वं भिन्नविषयाणां वा समानकर्तृता। आद्यो भ्रान्तिमतो विषयो द्वितीयो भ्रान्तिमालायाः। न हि भ्रान्तिमति मालाक्रमनियमोऽस्ति। युगपदपि भिन्नकर्तृकाणां भ्रायमानत्वात्। भ्रान्तेः अतिशयः शब्दोपनीतप्रकर्षो भ्रान्तिरिति स्वकार्यभूतं वितर्कमादाय प्रतीयमानो विपर्य्ययहेतुर्भ्रमान्तरानुबन्धी ॥ १४८॥१४९॥

तयोः पूर्वमिति। तत्रैव प्रतियतो मध्ये मनाक् व्यतिरेकमुल्लिखते तत् नूनम्

भ्रान्त्यतिशयो यथा,

दिश्याद्भूर्जटिजूटकोटिसरिति ज्योत्स्नालवोद्भासिनी
शाशाङ्की कलिका जलभ्रमिवशाद्भ्राग्दृष्टनष्टा मुदम्।
यां चञ्चच्छफरीभ्रमेण मुकुलीकुर्वन् फणालीं मुहु-
र्मुञ्चन् लक्ष्यमहिर्जिघृक्षतितमामाकुञ्चनप्राञ्चनैः॥

तत्र गङ्गाम्भःप्रतिफलितां रजनिकरकलामालोकयतो वासुकेर्यियं शफरीभ्रमेण मुकुलीकुर्वन् फणालीं शफरीयमित्यध्यासिता विपर्ययबुद्धिः सोऽयं भ्रान्त्यतिशयो नाम भ्रान्तेरेव भेदः॥ १५१॥

भ्रान्त्यनध्यवसायोऽपि द्विधा सालम्बनो निरालम्बनश्च। तयोः सालम्बनो यथा,

विरहिणिहिअअकअंतहिं णिसाअइ
तक्खणि छाइज्जइ अलिणिवहेहिं चित्तेण चूअवणि।
अह तासुवि मअरन्देहिं सोसंदाणिअइ
जह ण कलम्बो ण अम्बो ण जम्बू जाणिअइ॥ (य)

अत्र न कदम्बो नाम्रो न जम्बूरिति ज्ञायते इति त्रया-

(य) विरहिणी हृदयकृतान्तैर्निर्नीयते तत्क्षणे छाद्यतेऽलिनिवहैश्चित्तेन चूतवनी।
अथ तास्वपि मकरन्दैः बध्यते यथा न कदम्बो नाम्रो न जम्बूर्ज्ञायते॥

भेदाभेदतुल्यतया मनसि सादृश्यं प्रवर्त्तत इति भावः। असंशयमिति पदेन प्रकर्षो वितर्कश्च प्रत्यायितः॥ १५०॥

जिघृक्षतितमामिति। तिङश्चेति तमपि किमेत्तिङव्ययघादाम् द्रव्यप्रकर्षे इत्याम्॥ १५१॥

भ्रान्तेः अनध्यवसायोऽनिर्धार्यमाणविषयता। अनिर्द्धारितविषयतया कथमा-

णामिवावलम्बनभूतत्वात् सालम्बनो नामायं भ्रान्त्यनध्यवसायो भ्रान्तिभेदः॥ १५२॥

निरालम्बनो यथा,

उभौ रम्भास्तम्भावुपरि विपरीतौ कमलयो-
स्तदूर्द्ध्वं रत्नाश्मस्थलमथ दुरूहं किमपि यत्।
ततः कुम्भौ पश्चात् विसकिसलये कन्दलमये
तदन्विन्दाविन्दीवरमधुकराः किं पुनरिदम्॥

अत्र उर्वादिषु युवत्यवयवेषु उत्पन्नरम्भास्तम्भभ्रान्तेर्योऽयमतत्समुदाये किमिदमित्यालम्बनं विना कुतोऽनध्यवसायः स एष निरालम्बनो नाम भ्रान्त्यनध्यवसायो भ्रान्तेरेव भेदः॥ १५३॥

ऊहो वितर्कः सन्देहनिर्णयान्तरधिष्ठितः।
द्विधासौ निर्णयान्तश्चानिर्णयान्तश्च कीर्त्यते॥ १५४॥

लम्बननिरालम्बनयोर्भेद इत्यत आह। त्रयाणामिव आलम्बनभूतत्वादिति। उक्तिभङ्ग्या विषयोपादानादित्यर्थः॥ १५२॥

आलम्बनं विनेति। विषयानिर्द्धारणं व्यक्तीकृतम्॥ १५३॥

मिथ्याप्रतीतिसामान्यादनन्तरं वितर्कलक्षणमाह। ऊह इति। ऊह इति यस्य प्रसिद्धिः स इत्यर्थः। पर्य्यायशब्देनापि लक्षणं क्रियत एव। यथा घटपदार्थतया व्यावृत्तौ सन्दिहानस्य कलशपदार्थतया निश्चयवतो यः कलशः स घट इति। कथमसौ संशयविपर्य्ययाभ्यां भिद्यत इत्यत आह। सन्देहेति। सन्देही नानाकोटिकस्तथाभूतामेव जिज्ञासां प्रसूते तर्कस्तु तदनन्तरभावी नियतकोटिकः तथाभूतामिति। कालस्वरूपकार्य्यभेदात् संशयतो भेद इति। एवं विपर्य्ययतोऽपि। स हि तर्कान्तरभावी निश्चयात्मकः प्रवृत्त्यादिहेतुभूतश्च। तदयं तर्काभासस्य विपर्य्ययापर्य्यवसायिनो विषयविभागः कृतः स तु तर्कस्य विषयविभागः स्फुट एव सन्देहनिर्णययोर्मध्ये तदधिष्ठितः स तद्वर्त्ती विभागमाह। द्विधासौ इति। निर्णयान्तरोपन्यस्तः फलभूतानिश्चयः अतथाभूतो निर्णयान्तो निश्चयः॥ १५४॥

तत्त्वानुपात्यतत्त्वानुपाती यश्चोभयात्मकः ।
स निर्णयान्त इतरो मिथ्यामिथ्योभयात्मकः ॥ १५५ ॥

तेषु निर्णयान्तस्तत्त्वानुपाती यथा,

मैनाकः किमयं रुणद्धि गगने मन्मार्गमव्याहतं
शक्तिस्तस्य कुतः स वज्रपतनाद् भीतो महेन्द्रादपि ।
ताक्ष्यः सोऽपि समं निजेन विभुना जानाति मां रावणं
आः ज्ञातं स जटायुरेष जरसा क्लिष्टो बधं वाञ्छति ॥

अत्र निरूपितलक्षणे वितर्के जटायुरेष इति तत्त्वानुपाती निर्णयान्तो वितर्कः ॥ १५६ ॥

स एवातत्त्वानुपाती यथा,

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः
शृङ्गारैकनिधिः स्वयं नु मदनो मासो नु पुष्पाकरः ।
वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो
निर्मातुं प्रभवेत् मनोरममिदं रूपं पुराणो मुनिः ॥

अत्र किमिदं रूपं निर्मातुं यथोक्तः पुराणो मुनिः प्रभवेद्-तश्चन्द्रादिषु अन्यतमेन प्रजापतिना भवितव्यमिति अतत्त्वानुपातित्वात् अतत्त्वानुपाती अयं निर्णयान्तो वितर्कः ॥ १५७ ॥

स एव उभयात्मको यथा,

चित्ते निवेश्य परिकल्पितसत्वयोगात्
रूपोच्चयेन रचिता मनसा कृता नु ।

प्रमिति विपर्य्ययरूपतया द्विविध इत्याशयवान् निर्णयार्थं विभजते । तत्त्वानुपातीति ॥ १५५ ॥

मैनाकः किमयमिति । किमयमिति काक्वा पूर्वं दोलायमानचित्तस्य नियतकोटिस्पर्शी ज्ञानविशेष उपनीयते स एव तर्कः । एवम् अन्यत्रापि ॥ १५६ ॥ १५७

स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

सोऽयं तत्त्वानुपातित्वात् अतत्त्वानुपातित्वाच्च उभयात्मा निर्णयान्तो वितर्कः॥ १५८॥

अनिर्णयान्तो मिथ्यारूपो यथा,

अद्रेः शृङ्गं हरति पवनः किं स्विदित्युन्मुखीभि-
र्दृष्टोच्छ्रायशकितचकितं मुग्धसिद्धाङ्गनाभिः।
स्थानादस्मात् सरसनिचुलादुत्पतोदङ्मुखः खं
दिङ्नागानां पथि परिहरन् स्थूलहस्तावलेपान्॥

अत्र किमिदमद्रेः शृङ्गं पवनो हरतीति मेघं प्रति कल्पनाया मिथ्यात्वाद् वस्तुनश्च अनिर्णयान्तो मिथ्यारूपो वितर्कः॥ १५९॥

स एव अमिथ्यारूपो यथा,

अयमसौ भगवानुत पाण्डवः
स्थितमवाङ्मुनिना शशिमौलिना।
समधिरूढमनेन नु जिष्णुना
स्विदिति वेगवशान्मुमुहे गणैः॥

अत्र भगवत्पार्थयोः अमिथ्यारूपत्वेन वेगवत्वादेकस्य अनिर्णयान्तोऽमिथ्यारूपो वितर्कः॥ १६०॥

उभयात्मेति। स्त्रीरत्नसृष्टिरित्यनेन तत्त्वानुपाती अपरेत्यनेन अतत्त्वानुपाती-प्रकाशितः॥ १५८॥

मिथ्यामिथ्यारूपौ बाधिताबाधितविषयौ। अबाधितोऽपि तर्को भवति एव। यथा यदस्य नीलं रूपं नीलोत्पलमिति॥ १५९॥

अत्र भगवत्पार्थयोरिति। भगवत्पार्थयोः अवस्थानयोः समाधिरोहारोह-योश्च न किञ्चिद् बाधकमस्ति च ज्ञानस्य विशेषः प्रत्यक्षत इति॥ १६०॥

अनिर्णयान्त उभयात्मा यथा,

मायास्विदेषा मतिविभ्रमो वा
ध्वस्तं नु मे वीर्य्यमुताहमन्यः ।
गाण्डीवमुक्ता हि यथा पुरा मे
पराक्रमन्ते न शराः किराते ॥

अत्र मायादीनां विकल्पानां मिथ्यारूपत्वात् मम शराः किराते न व्याप्रियन्ते इत्यस्य अमिथ्यारूपत्वात् अनिर्णयान्तत्वाच्च अयम् अनिर्णयान्त उभयरूपो वितर्कः ॥ १६१ ॥

वस्त्वन्तरतिरस्कारो वस्तुना मीलितं स्मृतम् ।
पिहितापिहिते चैव तद्गुणातद्गुणौ च तत् ॥ १६२ ॥

अत्र मीलितम् अभिधीयमानगुणेन प्रतीयमानगुणेन च वस्तुना सम्भवति ।

तयोराद्या यथा,

एत्तो वि ण सच्चविओ गोसे पसरन्तपल्लवारुणच्छाओ ।
मज्जणतंबेसु महो तअ महतंबेसु लोअणेसु अमरिसो ॥ (क)

(क) आगच्छन्नपि न दृष्टः प्रातः प्रसरत्पल्लवारुणच्छायः ।
मज्जनताम्रयोर्मदस्तथा मदताम्रयोर्लोचनयोरमर्षः ॥

अत्र मायादीनामिति । न परमेश्वरस्य मायाच्छद्मना शक्तौ मतिभ्रमो न ध्वंसो वीर्य्यस्य । न वा अर्जुनादेव अर्जुनस्य अन्यत्वमिति विषयबाधात् ॥ १६१ ॥

मीलिते भान्तिः अस्तीति भान्त्यनन्तरं मीलितलक्षणमाह । वस्त्वन्तरेति । वस्तूनामिति श्लिष्ट षष्ठी । वस्त्वन्तरेण तिरस्कारे इति कर्मणि । वस्त्वन्तरस्य तिरस्कार इति कर्त्तरि । फलतः स एवार्थः । तथाच उत्कृष्टगुणेन अपकृष्टगुणस्य तिरस्करणं न्यग्भावनमिति लक्षणार्थः । पृथग्रूपतिरस्कारेण एकरूपतापत्तिर्मीलितमुच्यते तथाच कातन्त्रम् । मीलितं युक्तमुच्यत इति । अभिप्रायपूर्वः तिरस्कारो द्विविधः सिद्धाभिप्रायफलः असिद्धाभिप्रायफलश्च । यथाक्रमं पिहितापिहिते । न च एतावता विशेषेण पृथग्भावः, सामान्यलक्षणव्याप्तत्वात्

अत्र मज्जनताम्रयोः लोचनयोः मदरागः मदताम्रयोः कोपानुरागः साक्षादभिधीयमानेनैव गुणेन तिरस्क्रियमाणो निदर्शित इत्यभिधीयमानेन वस्तुना एतन्मीलितम् ॥ १६३ ॥

प्रतीयमानेन यथा,

पियदंसणसुहेण मुउलिआइं जइ से ण होन्ति णअणाइं।
ता केण कण्णरइअं लक्खिज्जइ कुवलअं तिस्सा ॥ (ख)

अत्र प्रियदर्शनसुखेन मुकुलितयोरेव लोचनयोः तस्याः कर्णकुवलयं लक्ष्यते न तु अमुकुलितयोरिति वस्तुना वस्त्वन्तरतिरस्कारः प्रतीयमानगुणतया उपपादित इति प्रतीयमानगुणेन वस्तुना मीलितमिदम् ॥ १६४ ॥

पिहितं यथा,

पाअड़िअणेहसब्भावविब्भमं तीअ जह तुमं दिट्ठो।
संवरणवावडाए अण्णो वि जणो तह ण जाणादु ॥ (ग)

अत्र प्रकटितस्नेहसद्भावविभ्रमं यथा तथा तया त्वमवलोकितः न एतदन्यजनो जानात्विति सर्व्वत्र स्निग्धदृष्टिपातेन पिहितमपि एतन्मीलितभेद एव ॥ १६५ ॥

(ख) प्रियदर्शनसुखेन मुकुलिते यद्यस्या न भवेतां नयने।
तत् केन कर्णरचितं लक्ष्यते कुवलयं तस्याः ॥

(ग) प्रकटितस्नेहसद्भावविभ्रमं तथा यथा त्वं दृष्टः।
संवरणव्यापृतया अन्योऽपि जनस्तथा न जानातु ॥

अवान्तरभङ्गीनामानन्त्याच्च। स्वरूपगुणेन तिरस्कारः तद्गुणो विरूपगुणेन अतद्गुणः। एतावपि मिलितविशेषाविति स्फुटम् ॥ १६२ ॥

विभागमाह। अत्र मीलितमिति। मज्जनं स्नानम्। अत्र ताम्रपल्लवारुणरागपदाभ्याम् अभिधीयते गुणः ॥ १६३ ॥

ननु पियदंसणेत्यादौ कथं मीलितं न हि अत्र तिरस्कारः केनापि शब्देन प्रत्याय्यत इत्यत आह। न तु अमुकुलितयोरिति। यदि मुकुलिते न स्यातां कथं

अपिहितं यथा,

दिट्ठाइ जं ण दिट्ठो आलविआए वि जस्स आलविओ।
उवआरो जस्स कओ ताअअ कलिअं छइल्लेहिं ॥ (घ)

अत्र दृष्टया यन्न दृष्टः, सम्भाषितया यन्न सम्भाषितः न च अभ्यागतोपचारो विहितस्तेन तदनुरागः परं न पिहितः प्रत्युत छादनेन छेकानां प्रकटित इति अपिहिताख्योऽयं मौलितभेदः ॥ १६६ ॥

तद्गुणो यथा,

गोरङ्गउ तरुणीअण जोण्हाइं अहिसरइ
सिअणेवच्छपडिच्छऊ वल्लहवड्ढरइ।
तच्छाअहिं पुण चल्लिअउ सामलांगओ
णीलवेसवहो तहिं मअणु मंति अहिं ॥ (ङ)

अत्र गौराङ्गस्तरुणीजनः सितनेपथ्यो ज्योत्स्नायां श्यामस्तु नीलनेपथ्यः तस्याः छायासु गच्छतीति तद्गुणाख्यं मौलितमिदम् ॥ १६७ ॥

अतद्गुणो यथा,

कर्कन्धूफलमुच्चिनोति शबरी मुक्ताफलाकाङ्क्षिणी
क्रुद्धोलूककदम्बकस्य पुरतः काकोऽपि हंसायते।

घ) दृष्टया यन्न दृष्ट आलपितयापि यन्नालपितः।
उपचारो यन्नकृतस्तेन च कलितं छेकैः ॥

(ङ) गौराङ्गस्तरुणीजनो ज्योत्स्नायामभिसरति सितनेपथ्यं प्रतीत्य वल्लभवड्ढरतिः।
तच्छायासु पुनश्चलितः श्यामलाङ्गो नीलवेशवहस्तत्र मदनो मन्त्रीभूत ॥

कुवलयं लक्ष्यत इति तर्कस्य तिरस्कारपर्यवसानादिति भावः मूर्त्तिरूपादिकः प्रतीयमानो गुणः ॥ १६४—१६५ ॥

ननु दृष्टयापि दृष्ट इत्यपि कथमलङ्कारः। न हि अत्र शक्तिरस्तीत्यत आह। प्रत्युतेति। छेका विदग्धाः तैरास्वाद्यमानत्वादावर्जकत्वं काव्यस्येत्यर्थः ॥ १६६ ॥

कीर्त्या ते धवलीकृते त्रिभुवने क्ष्मापाललक्ष्मीः पुरः
कृष्णं वीक्ष्य बलोऽयमित्युपहितव्रीड़ं शनैर्जल्पति॥

अत्र कर्कन्धूफलानाम् अपगतनिजगुणत्वात् अतद्गुणाख्यं मीलितमिदम्॥ १६८॥

सदृशादृष्टचिन्तादेरनुभूतार्थवेदनम्।
स्मरणं प्रत्यभिज्ञानस्वप्नावपि न तद्वहिः॥ १६९॥

तत्र सदृशार्थं यथा,

अदृश्यन्त पुरस्तेन खेलाः खञ्जनपङ्क्तयः।
अस्मर्य्यन्त विनिःश्वस्य प्रियानयनविभ्रमाः॥

अत्र खञ्जनपङ्क्तिदर्शनात् तत्सदृशप्रियानयनविभ्रमस्मरणात् तत्सदृशदर्शनजं स्मरणमिदम्॥ १७०॥

अदृष्टाद् यथा,

मुनिसुताप्रणयस्मृतिरोधिना मम वियुक्तमिदं तमसा मनः।
मनसिजेन सखे! प्रहरिष्यता धनुषि चूतशरश्च निवेशितः॥

अत्र मुनिसुताप्रणयस्मृतिरोधिना तमसा मे मनो वियुक्तम् इति अदृष्टकृतं स्मरणमिदम्॥ १७१॥

अत्र कर्कन्धूफलानामिति। विरूपगुणानामित्यर्थः॥ १६७॥ १६८॥

मीलिते ज्ञानमस्तीति साजात्यादनन्तरं स्मृतिं लक्षयति। सदृशेति। सदृशात् ज्ञायमानसादृश्यात् प्रयवजा स्मृतिश्चिन्तादिर्यस्य। अर्थमग्रे कथयिष्यति। अनुभूतार्थवेदनं समानविषयानुभवनियतज्ञानविशेषरूपं स्मरणम्। प्रत्यभिज्ञानमपि पूर्वानुभूतविषयमेव। एवं स्वप्नेऽपि॥ १६९॥

अत्र खञ्जनेति अत्र खञ्जनपङ्क्तिश्चेत् अवलोकिता अनन्तरमेव प्रियास्मरणमासीदिति कार्य्यकारणभावः अवगम्यते। स च कारणतासादृश्यमनन्तरभाव्यखञ्जनज्ञानस्य अस्तीति च प्रतीतं सादृश्यमितिभावः॥ १७०॥

अत्र मुनिसुतेति। तमोलक्षणस्य प्रतिबन्धकस्य अपगमे स्मरणरूपं कार्य्यम्

चिन्तया यथा,

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्य्यासं जातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव जातं वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं दृढयति ॥

अत्र प्रत्यक्षेषु अपि स्रोतस्तरुविपिनादिषु स्मरणस्य चिन्ताजन्यत्वादिदं चिन्तोद्भूतं स्मरणम् ॥ १७२ ॥

आदिग्रहणात् परप्रयत्नाद् यथा,

दर्शनपथमायाता साक्षादिव तन्मयेन हृदयेन ।
स्मृतिकारिणा त्वया पुनरपि चित्रीकृता कान्ता ॥

अत्र परकृतात् प्रयत्नविशेषात् चिन्तायाः प्रवृत्तत्वादिदमपि स्मरणमेव ॥ १७३ ॥

स्वप्नाद् यथा,

जाने स्वप्नविधौ ममाद्य चुलुकोत्सेकं पुरस्तादभूत्
प्रत्यूषे परिवेषमण्डलमिव ज्योत्स्नाप्रसन्नं महः ।
तस्यान्तर्नखनिस्तुषीकृतशरच्चन्द्रप्रभैरङ्गकैः
दृष्टा काप्यबला बलात्कृतवती सा मन्मथं मन्मथम् ॥

अत्र स्वप्नस्य चिन्ताजन्यत्वात् स्वप्नस्मृतिरपि स्मरणमेव ॥ १७४ ॥

प्रत्यभिज्ञानं यथा,

गृहीतो यः पूर्वं परिणयविधौ कङ्कणधरः
सुधामूर्त्तेः पादैरमृतशिशिरैर्यः परिचितः ।
स एवायं तस्यास्तदितरकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥

आवश्यकमित्यर्थः । यदि स्वप्नस्मृतिरपि स्मरणमेव तदा कतमदत्र सादृश्यादिषु कारणमत उक्तम् । चिन्तादीति ॥ १७१—१७४ ॥

अत्र गृहीतो यः पूर्वं स एवायं तस्याः पाणिरिति प्रत्यभिज्ञानमपि स्मरणमेव ॥ १७५ ॥

अभिप्रायानुकूल्येन प्रवृत्तिर्भाव उच्यते ।

सोद्भेदोऽथ निरुद्भेदश्चैकतश्चाभितश्च सः ॥ १७६ ॥

तत्र एकतः सोद्भेदो यथा,

गेण्ह पलोएह इमं विअसिअवअणा पिअस्स अप्पेइ ।

घरणी सुअस्स पढ़मुब्भिण्णदन्तजुअलकिअवोलं ॥ (र)

अत्र सुतस्य दन्तोद्गमादहम् उपभोगयोग्यास्मीति गृहिण्या एवमभिप्रायः प्रकर्षविकाशिनयनतया उद्भिद्यते न पुनः पत्युरित्येकतः सोद्भेदोऽयं भावः ॥ १७७ ॥

अभिहितः सोद्भेदो यथा,

सालोए च्चिअ सूरे घरिणी घरसामिअस्सा घेऊण ।

णेच्छन्तस्सवि पाए धुअइ हसन्ती हसन्तस्स ॥ (ल)

(र) गृहाण प्रलोकय इमं विकसितवदना प्रियस्य अर्पयति ।
गृहिणी सुतस्य प्रथमोद्भिन्नदन्तयुगलकृतवचनम् ॥

(ल) सालोक एव सूर्ये गृहिणी गृहस्वामिनी गृहीत्वा ।
अनिच्छतोऽपि पादौ धावयति हसन्ती हसतः ॥

प्रत्यभिज्ञास्वरूपं दर्शयति । यः पूर्वं स एवायमिति । ननु सूत्रे स्वप्रात् पूर्वं प्रत्यभिज्ञानमुद्दिष्टं पश्चात् उदाक्रियत इति कथमेतत् । अत्र उदाहरणक्रमेऽपि लिपिप्रमादोऽयमिति आराध्यपादाः ॥ १७५ ॥

अभिमतसुखादिवस्तुचिन्तननियमादनन्तरं भावलक्षणं तदाह । अभिप्राय इति । अभिमतवस्तुचिन्ताभिप्रायः तदानुकूलतया प्रवृत्तिः क्रियालक्षणाभावः । अतएव सूत्राद् भेदः प्रवृत्तिप्रतिपादकेन स्वार्थप्रकाशद्वारा प्रकाश्यमानोऽभिप्रायः । क्वचित् पदान्तरवृत्तिसहकृतेन प्रकाश्यते क्वचित् केवलेन । ताविमौ सोद्भेदनिरुद्भेदौ । मिथोऽनुबन्धविषयश्चायं चमत्करोति । तत्र प्रवृत्तिरुच्यमाना अनेन न तस्य उच्यते । तयोर्वा तदिदमाह । एकतश्च अभितश्चेति अभिप्रायोद्भावना-

अत्र सालोक एव सूर्य्ये गृहपतेर्गृहागमनं गृहिण्याश्च यत् पादधावनं तदावाभ्यामद्य वेश्मनो न निर्गन्तव्यमिति भावः स च द्वयोरपि हासेन अभिहितः उद्भिद्यत इत्यभिहितः सोऽङ्गे दोऽयं भावः ॥ १७८ ॥

एकतो निरुङ्गे दो यथा,

सालिवणगोविआए उड्डीवन्तीअ पूसविन्दाइं ।
सव्वङ्गसुन्दरीएवि पहिआ अच्छीइ पेच्छन्ति ॥ (व)

अत्र अतिसौन्दर्य्येण देवीभ्रान्त्या शालिवनगोपिकाम् आलोकयतां पथिकानां तदक्षिनिरीक्षणे अयमभिप्रायः शालिवनतिरस्कारेण देवमानुषयोः विशेषभूतः पङ्गामेव भूमिस्पर्शो भूम्यस्पर्शो वा न लक्ष्यते इति तदक्षिणी एव पश्यामः यदीयं निमिषति तदा मानुषीयं यदि न निमिषति तदा देवीयम् इति सर्वाङ्गसुन्दर्य्या अपि पथिकानामेव जायमानो न इह केनचित् कर्मणा उद्भिद्यत इत्येकतो निरुङ्गे दश्चायं भावः ।

अभितो निरुङ्गे दो यथा,

गोलातटट्ठिअं पेच्छिऊण गहवइसुअं हालिअसोण्हा ।
आढत्ता उत्तरिउं दुक्खुत्तारादइ पअवीए ॥ (श)

अत्र आगच्छन्तीं हालिकस्नुषां दृष्ट्वा गृहपतिसूनोः गोदा-

(व) शालिवनगोपिकाया उच्चाटयन्त्याः शुकवृन्दान् ।
सर्वाङ्गसुन्दर्य्या अपि पथिका अक्षिणी प्रेक्षन्ते ॥

(श) गोदावरीतटावस्थितं दृष्ट्वा गृहपतिसुतं हालिकस्नुषा ।
आरब्धा उत्तरितुं दुःखोत्तारया पदव्या ॥

दशायां रूढः स्वादपदवीमासाद्य चमत्कारमावहति । अतएव तत्कार्य्ययोः प्रवृत्तेः अनुभावरूपतया तथा वा न कुण्ठते हृदयम् ॥ १७६ ॥ १७७ ॥

न इह केनचिदिति । तथाच शब्दान्तरस्य व्यापारो नास्तीत्यर्थः ॥ १७८ ॥

वरीतटे यदवस्थानं यश्च तमवलोक्य तस्या दुरुत्तरमार्गेण अवतरणारम्भः तत्र अयं तयोरभिप्रायः हस्तावलम्बदानेन आवयोः अङ्गसङ्गमः सम्पद्यतामिति स चाभितः द्वयोरपि जायमानो न इह केनचित्कर्मणा उद्भिद्यते इत्यभितो निरुद्भेदश्चायं भावः।

हृद्यं सूक्ष्मञ्च भिद्येत न हि भावात् कथञ्चन।
हृद्योदाहरणं तत्र तैरिदं प्रतिपाद्यते॥ १७९॥

हिअए रोसुब्भिण्णं पाअप्पहरं सिरेण पत्थन्तो।
णह उदओ एमाणं सिणीअथोरंसुअं रुण्णं॥

अत्र हृदये उद्भूणपादप्रहारं यदयं शिरसा प्रार्थितवान् यच्च तयासौ न ताड़ितस्तत्र हृदये वल्लभा वसतीति भावः। स च प्रार्थनारोदनाभ्याम् उद्भिद्यमानः सोद्भेदो भावः हृद्य इत्युच्यते॥ १८०॥

निरुद्भेदस्तु यो भावः स सूक्ष्मस्तैर्निगद्यते।
इङ्गिताकारलक्ष्यात् स सूक्ष्मात् स्याद्भूमिकान्तरम्॥१८१॥

यथा, कदा नौ सङ्गमो भावीत्याकीर्णं वक्त्रमन्मथम्।
अवेत्य कान्तमबला लीलापद्मं न्यमीमिलत्॥ १८२॥

अत्र वक्त्रमन्मथतायाम् इङ्गिताकारयोः अप्रतीतमानत्वाद् भावगतेः भूमिकान्तरमिदं भवति।

हृद्यमिति। अभिमतस्य वस्तुनो हृदयावच्छेदेन वृत्तिमभिसन्धाय प्रवृत्तिः। तत्र यद्यपि विशेषलेशोऽस्ति तथापि भावसामान्यलक्षणाक्रान्तः तत्रैवान्तर्भविष्यति॥ १७९॥ १८०॥

ननु च सूक्ष्मः कथं पूर्वोक्तात् सूक्ष्माद् भिद्यत इत्यत आह। इङ्गिताकारलक्ष्यादिति। कदा नौ सङ्गमो भावीति अभिप्रायस्य व्यञ्जकं नेङ्गितं न विकारो वा कान्तस्य कश्चिदुपात्तः। अवेत्यादिप्रकाशिताभिप्रायानुगुणा काचित् अस्ति क्रिया वा कथमन्यथा तमुद्दिश्य लीलापद्मनिमीलनं सङ्गच्छते तस्मात् अन्यमेव इदं सूक्ष्मं भावलक्षणाक्रान्तम्॥ १८१॥ १८२॥

पद्मसंमीलनाच्चात्र सूचितो निशि सङ्गमः ।
आश्वासयितुमिच्छन्त्या प्रियमङ्गजपीड़ितम् ॥

अत्र अनुकार्य्यानुकरणे अपि भूमिकान्तरिते एव भवत इति सोऽयं निरुद्धेदो भाव एव सूक्ष्म इत्युच्यते ॥ १८३ ॥

प्रत्यक्षमक्षजं ज्ञानं मानसञ्चाभिधीयते ।
स्वानुभूतिभवञ्चैवमुपचारेण कथ्यते ॥ १८४ ॥

तत्र अक्षजं द्विधा युगपदेकशश्च । तयोर्युगपद् यथा,

क्रान्तकान्तवदनप्रतिबिम्बे भग्ननालसहकारसुगन्धौ ।
स्वादुनि प्रणिहितालिनि शीते निर्ववार मधुनीन्द्रियवर्गः ॥

अत्र मदिराश्रयाणां मुखप्रतिबिम्बसौगन्ध्यस्वादुताश्रय-

उत्तरार्द्धस्य उदाहरणं व्युत्पादयति । अत्र पद्मसम्मीलनाच्चेति । एवं चैतत्प्राप्तम् इङ्गितलक्ष्यत्वमत आह । तत्र चेति । पद्ममीलनम् अनुकार्य्यं कान्ताहस्ताङ्गुलीजनितमनुकरणं रात्रौ समागमो भविष्यतीति कान्तागतोऽभिप्रायः । न तु निमीलनम् अनुकार्य्याद् व्यभिचरितमेतमर्थम् अवबोधयतीत्यर्थः ॥ १८३ ॥

ज्ञानसङ्गत्यनन्तरं प्रमाणरूपालङ्कारप्रस्तावस्तत्र अन्येषां प्रमाणानां प्रत्यक्षमूलकत्वात् प्रथमं प्रत्यक्षलक्षणमाह । प्रत्यक्षमिति । साक्षात्कारः प्रत्यक्षमिति प्रसिद्धं तस्य विभागमाह । अक्षजमिति । अक्षं बहिरिन्द्रियं तस्मात् जातम् । मानसं बाह्येन्द्रियानपेक्षेण मनसा जनितम् । स्वानुभूतिः सहजा चिच्छक्तिः तस्या उत्पन्नम् । शरीराभिघाताद्यभिभूते प्रत्याहारतिरस्कृते वा मनसि यत् कदाचिदतिस्फुटाभं ज्ञानमुत्पद्यते न तस्य मनो निबन्धनता शक्यतेऽभिधातुमिति चिच्छक्तिमेव आश्रयते । ननु इन्द्रियजन्य एवालोके साक्षात्कारिताप्रसिद्धेः कथमनुभूतिभवं तथेत्यत आह । उपचारेणेति । यदि इन्द्रियजन्ये साक्षात्कारितानियमः तदा उपचारेण परिगणनं अथ भावनादिबलेन विनापि इन्द्रियं भवतीति पक्षस्तदा मुख्यत एवेति भावः ॥ १८४ ॥

युगपदिति । एकस्मिन् वाक्ये घ्राणरसनचक्षुस्त्वक्श्रोत्राणां पञ्चानामपि युगपत्प्रतीत्याभिधानाद् यौगपद्यं न रसानुगुणतया यौगपद्यात् चमत्कारितामाव-

त्वगैत्यानां दृग्घ्राणरसनश्रवणत्वगिन्द्रियप्रत्यक्षता प्रतीयते ॥ १८५ ॥

एकशो यथा,

मन्दमन्दविगलत्तपमीषच्चक्षुरुल्लसितपक्ष्म दधत्या ।
वीक्ष्यते स्म शनकैर्नवबध्वा कामिनो मुखमधोमुखयैव ॥ १८६ ॥

तदेतच्चाक्षुषम् ॥ १८७ ॥

एवं श्रावणादीनि अपि उदाहरणीयानि ।

मानसमपि द्विधा सुखादिविषयमनुभूतार्थविषयञ्च । तयोः सुखादिविषयं यथा,

अस्तोकविस्मयमपि स्मृतपूर्ववृत्तमुद्भूतनूतनभयज्वरजर्जरं नः ।
एकक्षणत्रुटितसंघटितप्रमोदमानन्दशोकशवलत्वमुपैति चेतः ॥

एतन्निगदेनैव व्याख्यातम् ॥ १८८ ॥

अनुभूतार्थविषयं यथा,

पिहिते वासागारे तमसि सूचीमुखाग्रसंभेद्ये ।
मयि च निमीलितनयने तथापि कान्तामुखं व्यक्तम् ॥

इदमपि न अतिदुर्बोधमिति न व्याख्यातम् ॥ १८९ ॥

स्वानुभूतिभवं द्विधा मिथ्यात्मकम् अमिथ्यात्मकञ्च । तयोर्मिथ्यात्मकं यथा,

अथ दीर्घतरं तमः प्रवेक्ष्यन् सहसा रुग्णरयः स संभ्रमेण ।
निपतन्तमिवोष्णरश्मिमुर्व्यां वलयीभूततरुं धराञ्च मेने ॥

इतीति । द्विधापि अलङ्कारकाण्डे परिसंख्यानमुचितम् । मानसं द्विधेति । संयुक्तसमवायनियमितम् एकम् अपरन्तु संस्कारनियमितम् । संस्कारलक्षणया हि प्रत्यासत्त्या यथा स्मरणातिरिक्तं प्रत्यभिज्ञानं तथा इदमपीति न किञ्चित् अनुपपन्नम् ॥ १८५—१८७ ॥

निगदेनैवेति । यदि विस्मयादीन् अयं न साक्षात्कृतवान् कथमुद्देशः तम्

तदिदमिन्द्रियेषु मनसि च अनवतिष्ठमानम् आत्मन्येव अवतिष्ठते ॥ १९० ॥

अमिथ्यात्मकं यथा,

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः
प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये
दधत्यन्तस्तत्त्वं किमपि यमिनस्तत् किल भवान् ॥

अस्य आत्मविषयता व्यक्तैव योगिभिरुद्गीयते ॥ १९१ ॥

लिङ्गाद्युल्लिङ्गिनो ज्ञानमनुमानं तदुच्यते।
पूर्ववच्छेषवच्चैव दृष्टं सामान्यतश्च यत् ॥ १९२ ॥
फलसामर्थ्यभेदेन द्विधैतद् भिद्यते पृथक्।
उदाहरणमेवैषां रूपव्यक्तेर्भविष्यति ॥ १९३ ॥

आचष्टीत्यर्थः। इदमपीति। व्यक्तमित्यनेन साक्षात्कारो दर्शितः। न हि स्मरणेन व्यक्तता भवति आत्मन्येव अवतिष्ठते स्वानुभूतिमात्रयत इत्यर्थः ॥१८८—१९०॥

योगिभिरिति। निदिध्यासनबलसाक्षात्मनो ज्ञानस्य योगिमात्रे प्रसिद्धविषयत्वात् न हि अस्य ज्ञानादयस्तथा तं परिचिन्वन्ति यथा योगिन इत्यर्थः ॥१९१॥

अनुमानलक्षणमाह। लिङ्गादीति। यस्य येन सह अविनाभावलक्षणा व्याप्तिः सन्दिग्धसाध्यधर्मधर्मिरूपपक्षवृत्तिताद्रूपा पक्षवृत्तिताद्रूपा पक्षधर्मता च गृह्यते तस्मात् तस्य प्रतीतिः अनुमानं यथा धूमाद्वह्निः स हि यथाविधे सिद्धस्तथाविधसन्निधानं सूचयति। तत्र यस्मात् प्रतीतिः उत्पद्यते तल्लिङ्गं चिह्नं व्याप्तिविशिष्टपक्षे धर्मतासंज्ञापकमित्यर्थः। इतरल्लिङ्गं ज्ञापकमस्य अस्तीति कृत्वा पूर्ववच्छेषवत् सामान्यतो दृष्टभेदात् त्रिविधमनुमानमयं ग्रन्थकृतैव व्याख्यातमिति न वितन्यते ॥ १९२ ॥

फलसामग्र्येति। यद्यपि ज्ञानमनुमानमित्युक्तं तथापि तस्य साधारणमेव क्वचित् अनुपन्यासप्रधानं वाच्यम्। क्वचित् कारणीभूतलिङ्गपरामर्शोपन्यासप्रधानमिति भवति यथोक्तो विशेषः अनुमानशब्दो हि भावल्युडन्तः करणे ल्युडन्तो वा आद्ये फलं द्वितीये सामग्र्यं करणमित्यर्थः उपन्यासप्रधानता दुरूहेत्यत आह। उदाहरणमेवेति ॥ १९३ ॥

तेषु यत्र कारणं दृष्ट्वा कार्य्यमनुमीयते तत् पूर्ववत् यथा,

अविरलविलोलजलदः कुटजार्जुननीपसुरभिवनवातः।
अयमायातः कालो हन्त हताः पथिकगेहिन्यः॥

अत्र वर्षर्त्तोः कारणभूतात् कार्य्यभूतविरहिणीनां मरणम् अनुमीयते तेनैतत् पूर्वं कारणमिह अस्तीति पूर्ववदुच्यते॥ १९४॥

यत्र कार्य्यं दृष्ट्वा कारणमनुमीयते तच्छेषवत् यथा,

सावज्ञमागमिष्यन्नूनं पतितोऽसि पादयोस्तस्याः।
कथमन्यथा ललाटे यावकरसतिलकपङ्क्तिरियम्॥

अत्र यावकरसतिलकपङ्क्तेः कार्य्यभूतायाः कारणभूतं पादपतनमनुमीयते तेनैतच्छेषः कार्य्यमिहास्तीति शेषवदुच्यते॥ १९५॥

यत्र न कार्य्यं न कारणं केवलमविनाभावमात्रं प्रतीयते तत् सामान्यतो दृष्टं यथा,

गज्जन्ते खे मेहा फुल्ला णीवा पणट्ठिआ मोरा।
णट्ठो चन्दुज्जोओ वासारत्तो हला पत्तो॥ (च)

(च) गर्जन्ते खे मेघाः फुल्ला नीपाः प्रनर्त्तिता मयूराः।
नष्टश्चन्द्रोद्योतो वर्षर्त्तुः सखि! प्राप्तः॥

कार्य्यभूतविरहिणामिति पथिकगेहिनीनां दशम्यवस्था ज्ञायमाना वाक्यार्थः अतः फलीपन्यासदत्तभरमेवेद काव्यमित्यभिप्रायः। आयातश्चेज्जलदागमः तदा पूर्वप्रवृत्त इव पथिकनारीविनाशो लक्ष्यत इति निष्ठाप्रत्ययेन द्योत्यते॥ १९४॥

कथमन्यथेति। न इयमर्थापत्तिः किन्तु तथाभूता नायकस्य ललाटेऽलक्तकबिन्दुविशेषपङ्क्तिः प्रमदापदावपातप्रतिबद्धेति। न च अलकबिन्दुपङ्क्तिज्ञानं तथा खदते यथा विपक्षचरणावनमनानुमेयस्य ज्ञानं फलभूतं तत् किल विपक्षगोचरामीर्ष्यां व्यञ्जयद्विप्रलम्भप्रकर्षं पुष्णाति॥ १९५॥

गज्जन्त इति। अत्र समये मेघगर्जितादिभिः कालोपाधिभिः अनुमान

अत्र वर्षर्त्तुरविनाभूतैः मेघगर्जितादिभिः सामान्येनैव अनुमीयते इति सामान्यतो दृष्टमिदम्। तानि एतानि भावसाधने अनुमानशब्दे फलपक्षे उदाहरणानि भवन्ति ॥१९६॥

यदा पुनः करणसाधनोऽनुमानशब्दः तदा अनुमीयते अनेनेति अनुमानशब्देन यथोक्तं लिङ्गमुच्यते। यदाह।

अनुमेयेन सम्बद्धं प्रसिद्धञ्च तदन्विते।
तदभावे च यन्नास्ति तल्लिङ्गमनुमापकम्॥

तत् पूर्ववति यथा,

अइ सहि! वक्कुल्लाविहिं च्छहिहिसि गोत्तस्स मत्थए छारम्।
अच्चन्तदत्तदिट्ठेण सामिवलिएण हसिएण। (छ)

अत्र एवंप्रकारया वक्रोक्त्या एवंविधेन हसितेन उपलक्षिता त्वमग्रतो गोत्रं दूषयिष्यसीति कारणतो यत्र कार्य्यानुमानं तदिदं सामग्रीपक्षे पूर्ववदित्युच्यते॥ १९७॥

(छ) अयि सखि! वक्रालापैश्छादयिष्यसि गोत्रस्य मस्तके भस्म।
अत्यन्तदत्तदृष्टेन सामिवलितेन हसितेन॥

तेन कार्य्यकारणभावः। अत्र हि न पृथक् मेघगर्जितादिज्ञानं तथा चमत्कारभावहेति यथा वर्षारात्रिज्ञानप्रतिबद्धम्। स हि ज्ञातः केतककर्णपूरादिविदग्धनेपथ्यपरिग्रहौत्सुक्यं प्रवासिनायकागमनौत्सुक्यं वा जनयतीति भावः॥ १९६॥

अनुमेयेनेति। अनुमेयेन पक्षेण तस्यैव साध्यवत्तयानुमेयत्वात्। यदाह। न एव चोभयात्मा यं गम्यो गमक इष्यते। प्रसिद्धेनैकदेशेन गम्यः सिद्धेन बोधक इति। तदन्विते साध्यान्विते प्रसिद्धं प्रकर्षेण सिद्धम्। व्याप्यतयाधिगतम्। तदभावे। साध्याभावे यतोऽनुमापकं ततो लिङ्गम्। पूर्ववतीति। पूर्वं कारणमनुमापकं यस्यास्ति तत्पूर्ववल्लिङ्गं तस्मिन्ननुमापयितव्यलिङ्गज्ञानविषयतया पूर्वं कारणमाश्रयतीति पूर्ववत्। सोऽयमर्थः सप्तम्या द्योतितः। कारणत इति। यथा हि वक्र आलापो सुग्धाङ्गनाप्रकृत्यौचित्यागतं हसितं ध्वननशक्त्याविषयतया कान्तिमर्पयति न तथा शब्दाभिलपितं चारित्रास्खण्डनम् इति साहित्यसुहृदाविदामतिप्रकाशमेव॥ १९७॥

शेषवति यथा,

दीसइ ण चूअमउलं अत्ता ण अ वाइ मलअगन्धवहो।
एइ वसन्तमासं सहि! जं उक्कण्ठिअं चेअं॥ (ज)

अत्र उत्कण्ठालक्षणेन कार्येण वसन्तः कारणभूतोऽनुमीयत इति सामग्रीपक्षे इदं शेषवदित्युच्यते॥ १९८॥

सामान्यतो दृष्टं यथा,

आविर्भवन्ती प्रथमं प्रियायाः सोच्छ्वासमन्तःकरणं करोति।
सन्तापदग्धस्य शिखण्डियूनो वृष्टेः पुरस्तादचिरप्रभेव॥

सेयं विद्युदिव वृष्टिं कामन्दक्यपि प्रथमत उपलभ्यमाना अविनाभावेन मालत्यागमनं गमयतीति सामग्रीपक्षे सामान्यतो दृष्टमेतत्॥ १९९॥

यदाप्तवचनं तद्धि ज्ञेयमागमसंज्ञया।
उत्तमं मध्यमञ्चाथ जघन्यञ्चेति तत्त्रिधा॥ २००॥

तत्र उत्तमं द्विधा विधिरूपं निषेधरूपञ्च। तयोर्विधिरूपं यथा,

दमं दानं दयां शिक्षेत् स्तनयित्नुर्वदत्यसौ।

(ज) दृश्यते चूतमुकुलमद्य न च वाति मलयगन्धवहः।
एति वसन्तमासः सखि! यदुत्कण्ठितं चेतः॥

एतमिति। चूतमञ्जरीमलयपवनयोः अग्रे समुत्कण्ठितमत्र चमत्कारास्पदम्। तथाहि। यथा प्रियस्य सन्निधास्यतः सम्भावना लोकोत्तराभिमानप्रतिष्ठिता भवति न तथा सन्निधानमिति सहृदयसाक्षिकोऽयमर्थः। एवं सामान्यतो दृष्टोदाहरणे बोद्धव्यम्॥ १९८॥ १९९॥

यदाप्तवचनमिति। आप्तो यथार्थशब्दवक्ता। उत्तमं श्रुतिमूलम्। अतएव तस्य अवश्यानुष्ठेयत्वाभिधानम्। मध्यममनादिलोकव्यवहारमूलं तदेव न अवश्यानुष्ठेयम् इत्यनेन प्रकाशयिष्यते। उभयविधा बहिः फलसंवादि जघन्यम्॥ २००॥

दट्ठूइ इति। जलदध्वनितनानानादस्य अनुकरणं तच्छितयव्याजेन जलधरी

ददद इति वाग्देवी दयध्वं दत्त दायते ॥

अत्र च एषा दैवी वागनुवदति यत् स्तनयित्नुर्ददद इति दयध्वं दत्त दायते इति तदेतत् त्रयं शिक्षेत् दमं दानं दयामिति श्रुतेस्तदेतत् विधिरूपमाप्तवचनम् ॥ २०१ ॥

निषेधरूपं यथा,

निवार्य्यतामालि ! किमप्ययं वटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥

अत्र उत्तरार्द्धोक्तनिषेधानुवादवर्द्धितव्युत्पत्तेर्वयस्याया योऽयम् अपवदमानवटुनिवारणोपदेशः तस्य महान्तो न अपभाषितव्या इति वाक्यार्थतात्पर्य्यादयं निषेधरूप आगमः । तदेतदुभयमपि अवश्यानुष्ठेयत्वादुत्तमम् ॥ २०२ ॥

मध्यमं द्विधा निर्दिष्टवक्तृकम् अनिर्दिष्टवक्तृकञ्च ।

तयोराद्यं यथा,

कल्याणी वत गाथेयं लौकिकी प्रतिभाति मे ।
एति जीवन्तमानन्दो नरं वर्षशतादपि ॥

अत्र जीवन्नरः पश्यति भद्रमिति अयमेवार्थो निर्दिष्ट-

वदति । दयध्वम् । दत्त । दायते इति । दैवीवागतो दमदानदयाः कर्त्तव्या इति विधिः पर्य्यवस्यति । बुद्धीन्द्रियनियमो दमः दानदये प्रसिद्धे मूलभूतां श्रुतिं दर्शयति । अत्र तदेतत् एवेति ॥ २०१ ॥

ननु न केवलं यो महतोऽपभाषते इत्यादिवर्त्तमानापदेशात् कथं विधित्वमत आह । अत्र उत्तरार्द्धेति । अपभाषणस्य निन्दार्थवादेन निषेधविधिः कल्प्यते तेन महान्तो न अपभाषितव्या इति वचनव्यक्तिः उन्नीयत इति ॥ २०२ ॥

अत्र जीवन्नर इति । एषा चिरन्तनी लोकगाथा तन्मूलत्वम् एति जीवन्तमित्या-

वक्तृकः। तदेतत् सर्ववाक्यानां विधिनिषेधयोः पर्य्यवसानात् प्राणैषणायां पतितव्यमिति विधिरूपमाप्तवचनम् ॥ २०३ ॥

द्वितीयं यथा,

अक्षे वसति पिशाचः पिचुमन्दे दिनपतिर्वटे यक्षः।
विश्राम्यति पद्मे श्रीस्तिष्ठति गौरी मधूकतरौ।

तदिदम् अनिर्दिष्टवक्तृकम् अनादिलोकप्रसिद्धिपरम्परायातम् ऐतिह्यम्। अत्रापि सर्ववाक्यानां विधिनिषेधयोः पर्य्यवसानात् तस्मादक्षं न सेवेत, पिचुमन्दं न निकृन्तेत, वटं न छिन्द्यात्, पद्मं न मूर्ध्नि बिभृयात्, मधूकं न पदा स्पृशेत् इत्यध्याहारो भवति। सोऽयं निषेधरूप आगमः। उभयमपि एतत् न अवश्यानुष्ठेयमिति मध्यमम् ॥ २०४ ॥

जघन्यं द्विधा काम्यं निषिद्धञ्च। तयोः काम्यं यथा,

मुंडइआचुण्णकसाअसाहिअं णावणाइं ण विइण्णं।
तेल्लं पलिअत्थणीणं वि कुणेइ पिणुण्णए थणए ॥ (झ)

तदेतत् पूर्ववत् विधिरूपं काम्यमाप्तवचनम् ॥ २०५ ॥

निषिद्धं यथा,

वयं बाल्ये बालांस्तरुणिमनि यूनः परिणता-
वपौच्छामो वृद्धान् परिणयविधानस्थितिरियम्।

(झ) मुण्डितिकाचूर्णकषायसाधित नावनमवनतयोर्वितीर्णम्।
तैलं पतितस्तनीनामपि करोति पीनोन्नतौ स्तनौ ॥

ऐरागमस्य। अत्रापि प्राग्वदेव स्तुत्यर्थवादेन जीवनाय यतितव्यमिति विधिः कल्प्यते। तदिदमुक्तं सर्ववाक्यानामिति ॥ २०३ ॥

तदिदमनिर्दिष्टप्रवक्तृकमिति। एतेन ऐतिह्यमागम एवान्तर्भूतमिति दर्शितम्। अज्ञातवक्तृकस्य आगमस्यैव तथा प्रसिद्धेरिति। अत्रापीति पिशाचवासादिभिरनुवादैः पूर्ववद्विधयः कल्प्यन्ते ॥ २०४ ॥

मुण्डइव इति। मुण्डितिका अलम्बुसा। कषायः क्वाथो जलं नावनं नस्यम्। काम्यमिति। पीनोन्नतस्तनकामनावतीभिरेव क्रियमाणत्वात् ॥ २०५ ॥

त्वयारब्धं जन्म क्षपयितुमकाण्डेन विधिना
न नो गोत्रे पुत्रि ! क्वचिदपि सतीलाञ्छनमभूत् ॥

तदेतत् निषेधरूपं निषिद्धमेवास्मवचनम् उभयमपि चैतत् मूलकारिकाभिः संसृज्येत इत्यादिदोषान्न अनुष्ठेयमिति जघन्यम् ॥ २०६ ॥

सदृशात् सदृशज्ञानमुपमानं द्विधेह तत् ।
स्यादेकमनुभूतेऽर्थेऽननुभूते द्वितीयकम् ॥ २०७ ॥

तयोरनुभूतार्थविषयं यथा,

सर्वप्राणप्रवणमघवन्मुक्तमाहत्य वज्र-
स्तत्संघट्टाद्विघटितबृहत्खण्डमुच्चण्डरोचिः ।
एवं वेगात् कुलिशमकरोद्व्योम विद्युत्सहस्रैः
भर्त्तुर्वज्रज्वलनकपिशास्ते च रोषाट्टहासाः ॥

अत्र रामकराक्षिप्यमाणभग्नधूर्जटिधनुर्विमुक्तज्योतिश्छटासहस्रसंकुलमाकाशं पश्यतो रावणदूतस्य इयं स्वयं दृष्टेषु प्रभुवज्रःस्खलविदीर्णवज्रशकलविस्फूर्जथुषु तद्रोषाट्टहासेषु वियद्व्यापिषु तत्साटश्यबुद्धिः । तदिदमनुभूतविषयं नाम उपमानं मीमांसका वर्णयन्ति ॥ २०८ ॥

अननुभूतविषयं यथा,

तां रोहिणीं विजानीहि ज्योतिषामत्र मण्डले ।
समूहस्तारकाणां यः शकटाकारमाश्रितः ॥

त्वयारब्धमित्यादौ गणिकया सती चारित्रावस्था न भवितव्यमिति स्फुटो निषेधविधिजघन्यत्व व्याचष्टे । उभयमपि च एतन्मूलकारिकाभिरिति ॥२०६॥२०७॥

सदृशादिति । इह मीमांसका वर्णयन्ति । उपमानमपि सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति । अस्यार्थः । सादृश्यं सादृश्यज्ञानज्ञायमानसादृश्यमिति-वत् । तदेव उपमानं कुत इत्यत आह । असन्निकृष्टे सदृशान्तररूपेऽर्थे यतो

अत्र यथाविधः शकटाकारस्तथाविधो रोहिणीतारकासमूहाकार इत्येवम् अवधारितोपदेशस्य तदाकारतारकचक्रदर्शनादिदं तद्रोहिणीशकटमितीति येयं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः तदिदमननुभूतविषयम् उपमानं नैयायिकाः समुन्नयन्ति ॥ २०९ ॥

तथाभूतार्थविज्ञानजनकत्वेन हेतुना।
नास्मादभिनयालेख्यमुद्राविम्बादयः पृथक् ॥ २१० ॥

तेषु अभिनयो यथा,

वरविवरणिग्गअदलो एरण्डो साहइव्व तरुणाणम्।
या एत्थ वरे हलिअवहू एदहमेत्तत्थणी वसइ ॥

अत्र पयोधरातिपरिणाहसूचकोत्तानप्रसारिताङ्गुलिहस्ताभिनयसन्निभैरण्डदलसन्निवेशदर्शनात् स्वयम् अदृष्टेऽपि हालिकवधूस्तनपरिणाहे पूर्वानुभूतैवंविधस्तनपरिणाहसम्बन्धप्रति-

---

बुद्धिमुत्पादयति तेन भवति सदृशात् सदृशप्रतिपत्तिरुपमानम्। न सदृशादननुभूतज्ञानमुत्पद्यतेति प्रसङ्गात्। तेन इदम् अनुभूतविषयमेव नैयायिकानां तु अननुभूतविषयमेव उपमानं तथाहि। नागरकेण यदा आरण्यकः पृष्ट आचष्टे यथा गौस्तथा गवय इति। तदा खलु नागरकस्य अतिदेशवाक्यार्थम् अनुस्मरतो गाव्य सादृश्यप्रतियोगिनं जानतो यद्गवये गौसादृश्यज्ञानं तदुपमानं प्रमाणं तेन अयं गवयशब्दवाच्य इति संज्ञिसम्बन्धज्ञानं पश्चात् उपजन्यते सोपमितिरिति। तत्र सदृशादबुद्धौ विपरिवर्त्तमानाद् यत् सदृशज्ञानं सदृशे गवये संज्ञासंज्ञिसम्बन्धज्ञानमित्यर्थः। उदाहरणादिकं निगदव्याख्यातम् ॥ २०८—२१० ॥

वरविवरेति। ग्रामतरुणैः अनन्यवद्धान्तःकरणैर्हालिकवधूस्तनाभोगो मुसलोल्लासनादौ वारंवारमनुभूतस्य तुल्याकारदृतिविवरप्रसूनैरण्डदलदर्शनादेव बुद्धिमारोहतीति सा बुद्धिर्मीमांसकोपमिति मध्यमध्यासे। कथम् एरण्डदलसन्निवेशस्याभिनेयता। अनुकारो हि अभिनयः नचासौ तत्र सम्भवति। अत आह।

पत्तिः तदिदमनुभूतार्थविषयमुपमानमेव अभिनय इति उत्प्रेक्ष्यते ॥ २११ ॥

आलेख्यं यथा,

तवालेख्ये कौतूहलतरलतन्वीविरचिते
विधायैका चक्रं रचयति सुपर्णासुतमधः ।
अथास्विद्यत्पाणिस्त्वरितमपमृज्यैतदपरा
करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति ॥

अत्र यदानुभूतनायकसन्दर्शनायाः स्वरूपालेख्यप्रदर्शनादु एवम्भूतः स इति वितानमुत्पद्यते गोपनार्थञ्च तथाभूतयोरेव देवकुलादिदृष्टविष्णुकामयोः प्रतीतिर्भवति तदेतदनुभूतार्थविषयं भवति। यदा पुनरननुभूतनायकादिसन्दर्शनाया इत्यमाप्तोपदेशः एवम्भूतः सुपर्णकेतुश्चक्रपाणिर्विष्णुर्भवति एवम्भूतो मकरध्वजः पुष्पचापः कामो भवति। यादृशाविमौ तादृशश्च स ते मनोरथभूमिः केवलमस्य गरुत्मदादयो न विद्यन्ते तदा तदुत्तरकालमालेख्यगततदाकारदर्शनात् सोऽयं मम प्रेयानिति मद्विधया कयापि लिखितो भविष्यतीति तद्गोपयाम्येनं

हस्ताभिनयसन्निवेशैरिति । उत्तानप्रसारिताङ्गुलिहस्तसन्निवेशेन वस्त्वन्तरपरिणाहप्रतिबिम्बनं लोकप्रसिद्धं तदिह अपि एरण्डदलविस्तारदर्शनात् तदन्तरितमेव जायत इत्यर्थः ॥ २११ ॥

तवालेख्य इति । तदप्राप्तिकर्शिता चित्रप्रतिमादिना परिनोदनेन कथं चिदात्मानं धारयतीति तन्वीपदेन ध्वन्यते । न च जीवितमात्रार्थिनां सा किन्तु त्वदाकृतिदर्शनकुतूहलेन उद्विग्ना सती निगूढमपि अभिप्रायमालेख्यनिर्माणेन व्यनक्तीति कौतूहलतरलपदाभ्यां व्यज्यते । एकेति । या राधादिप्रणयपात्रं वशीकृतत्रिभुवनमाजानुसुकुमारं देवकीनन्दनम् आगमेषु बहुधाऽश्रौषीत् । अथेति । या निर्यन्त्रणप्रार्थनीयताविरोधिनं देवताभावमनुसन्धत्ते । तया त्रैलोक्यातिशायिसौभाग्यप्रकर्षस्य पुष्पेषोः चिह्नभूतौ चापमकरौ लिखिताविति ।

विष्णुचिह्नाभ्यामिति गरुत्मच्चक्रेऽधः प्रदेशहस्तयोः केतुहस्तयोर्निवेशयति। अथापरा प्रतिविधित्सुर्गोपयन्ती प्रकाशयन्ती च प्रत्यासन्नोपमानं मन्मथाकारमाचिख्यासुः करे पौष्पं चापं मकरमुपरिष्टाच्च लिखति। अत्राकृतौ पदार्थे या इमास्तयोर्लोकानां सोऽयमिति विष्णुरिति काम इति च संज्ञासंज्ञिसम्बन्धप्रतिपत्तयः। तदिदमनुभूतार्थविषयमुपमानमालेख्यमाख्यायते ॥ २१२ ॥

मुद्रा यथा,

सचकितमिव विस्मयाकुलाभिः
शुचिसिकतास्वतिमानुषाणि ताभिः।
क्षितिषु ददृशिरे पदानि जिष्णो-
रुपहितकेतुरथाङ्गलाञ्छनानि ॥

अत्र चक्रध्वजाङ्कितजिष्णुपादमुद्रादर्शनात् सेयममानुषी पादमुद्रा भवतीति संज्ञासंज्ञिसम्बन्धप्रतिपत्तिः। तदिदमननुभूतार्थविषयम् उपमानमेव मुद्रेत्युच्यते। यदपि च अदृष्टेऽपि

अथ स्विद्यत्पाणिस्खरितमित्येतैर्व्यज्यते। अत्र उदाहरणे द्विविधमपि उपमानं दर्शयति। तत्र मीमांसकपक्षे तावत् तन्त्राख्येयम् उन्मुदितं दृष्ट्वा काचित् अनुभूतपूर्वं नायकं जानाति। सादृश्याविशेषाच्च कृष्णकामावपि प्रत्येति। तदा सदृशात् प्रतिपत्तिरुपमानं भवति। नैयायिकपक्षे तु यदा सामान्यतो नायकागमे उत्पन्नपूर्वानुरागाया विशेषतश्च प्रत्यङ्गलावण्यमजानन्त्या इत्थम्भूताकारौ कृष्णकामौ यादृशौ तादृशस्तव प्रेयानित्याप्तोपदेशश्रवणानन्तर गृहीतचित्राकारायाः तत् तच्छब्दाभिधेयता प्रतिपत्तिरुपमानमिति। कथं चित्रे कामादि पदप्रयोग इत्यत आह। आकृताविति। रेखोपरेखादिसन्निवेशे चित्रतुरगन्यायेनेति भावः ॥ २१२ ॥

सचकितेति। ननु चरणमुद्रया जिष्णुचरणानुमानमत्र प्रतिभाति। तत्कथमुपमानेनान्तर्भाव इत्यत आह। यदपि चेति। अत्राविशेषस्य चरण-

जिष्णुपदे मृगीदृशामीदृशः स इति अनुमानज्ञानं तदपि उपमानार्थनिबन्धनमेव।

अपि चास्त्यनुमानेऽपि सादृश्यं लिङ्गलिङ्गिनोः।
पदेन यत्र कुब्जेन कुब्जः पादोऽनुमीयते ॥ २१३ ॥

प्रतिबिम्बं यथा,

दर्पणे च परिभोगदर्शिनी पृष्ठतः प्रणयिनो निषेदुषः।
वीक्ष्य बिम्बमनुबिम्बमात्मनः कानि कान्यपि चकार लज्जया ॥

अत्र यदा तावदेव सम्बन्धग्रहः कीदृशं स्वं मुखं यादृशमादर्शे प्रतिबिम्बं तदालोकनात् अदृष्टेऽपि स्वमुखे येयमीदृशं मे मुखमिति प्रतिपत्तिः। तदिदमननुभूतार्थविषयम्। यदा पुनरित्थमाप्तोपदेशाद् यादृशं वस्तु तादृशमादर्शादौ प्रतिबिम्बं तदापि प्रियप्रतिबिम्बालोकनादिदं तन्मम प्रियप्रतिबिम्बमिति इयं संज्ञासंज्ञिसम्बन्धप्रतिपत्तिस्तदपि अननुभूतार्थविषयम्। यदा तु चित्रादिषु अनुभूतस्वमुखदर्शनायाः प्रतिबिम्बदर्शनादनेन सदृशं मे मुखमिति प्रतिपत्तिर्दृष्टप्रियतमाकारायाश्च प्रतिबिम्बाकारदर्शनादेतदाकारो मम प्रेयानिति प्रतिपत्तिः प्रतिबिम्बसन्निधौ प्रतिबिम्बोदयो दृष्टस्तदिह सन्निहितेन तेन भवितव्यमिति यो व्रीडाविकारभूतस्तदानुभूतविषयमेतदुपमानं प्रतिबिम्बमित्याचक्षते ॥ २१४ ॥

विशेषप्रतिबन्धे सत्यपि सदृशात् सदृशज्ञानमुत्कटं तादृशेन च व्यपदेशो भवतीत्यर्थः। एतदेव दार्वाचार्यसम्मत्या द्रढयति। अपि चेति ॥ २१३ ॥

प्रतिबिम्बासन्निधाविति। प्रसङ्गाद्यदर्थमनुमानं व्याख्यातं तद्दर्शयति। व्रीडाविकार इति। अतएव प्रधानमात्रस्य उपसंहारः ॥ २१४ ॥

प्रत्यक्षादिप्रतीतोऽर्थो यस्तथा नोपपद्यते ।
अर्थान्तरञ्च गमयत्यर्थापत्तिं वदन्ति ताम् ॥ २१५ ॥
सर्वप्रमाणपूर्वत्वादेकशोऽनेकशश्च सा ।
प्रत्यक्षपूर्विकेत्यादिभेदैः षोढा निगद्यते ॥ २१६ ॥

तासु प्रत्यक्षपूर्विका एकशो यथा,

निर्णेतुं शक्यमस्तीति मध्यं तव नितम्बिनि ! ।
अन्यथाऽनुपपत्त्यैव पयोधरभरस्थितेः ॥

अत्र स्तनभरनितम्बयोर्मध्यं न उपलभ्यते स्तनभारावस्थानञ्च दृश्यते तत्र येयं पयोधरभरस्थितिः सा अन्यथानुपपद्यमाना धारकं मध्यमनुपलभ्यमानं बोधयति सेयं प्रत्यक्षपूर्विका अर्थापत्तिरेकश एवेह विवक्षिता । इयमपि हि एवं बहुशो भवति यत्तदर्थापत्तिलब्धं मध्यं तदपि धारणशक्तिमन्तरेण तत् कर्मासमर्थमिति तस्यापि शक्तिः कल्प्यते । सेयम् अर्थापत्तिपूर्विका अर्थापत्तिः । यश्चायमर्थापत्तिविकल्पस्य मध्यस्य उपलम्भाभावः सोऽपि प्रकारान्तरेण असम्भवत्कान्तिकार्श्ययोरुत्कर्षं ब्रूते

अर्थापत्तिं लक्षयति । प्रत्यक्षादिति । प्रमाणप्रतीतस्य अर्थस्य अन्यथाकरणानुपपत्तिज्ञानेन प्रसूतं ज्ञानमर्थापत्तिः । अनुपपद्यमानार्थप्रत्यायकं च प्रमाणं प्रत्यक्षादिभेदात् षट्प्रकारमतः तत्पूर्वाऽर्थापत्तिः अपि षोढा सम्पद्यते । यदर्थान्तरं गमयति तामर्थापत्तिं वदन्तीति । अर्थान्तरगतिरेव अर्थापत्तिरिति व्यक्तम् ॥ २१५ ॥

एकश इति । एकप्रमाणपूर्वा । अनेकशोऽनेकप्रमाणपूर्वाः कथं तर्हि षोढा अत उक्तम् । प्रत्यक्षपूर्विकेत्यादिभेदैरिति । व्याख्यातमेतत् ॥ २१६ ॥

अत्र स्तनभरेति । स्तनभरस्थितिः प्रत्यक्षगृहीता सा चाधारमन्तरेण अनुपपद्यमाना मध्यं कल्पयति । सा च कल्पनाऽर्थापत्तिः । अनुपलभ्यमानमिति । अन्यथा प्रत्यक्षगृहीतेऽर्थे किमर्थापत्त्या । अत्रैव उदाहरणेन एकशो व्याख्यातुं

सा च इयम् अभावपूर्विकाऽनुपपत्तिर्भवति। न च एतदिह शाब्दमपि तु वाक्यार्थसामर्थ्याद् गम्यते ॥ २१७ ॥

प्रत्यक्षादिपूर्विका अनेकशो यथा,

एतदालोक्य लोलाक्षि ! रूपमप्रतिमं तव।
कल्पयामः कलातत्वं गुरुतामादिवेधसः ॥

अत्र इदं रूपमप्रतिमं तवेति प्रत्यक्षपूर्वता अभावपूर्वता च व्यक्तमेव प्रतीयते तेनेयमनेकशः। अत्रापि येयं रूपस्य अप्रतिमतान्यथानुपपद्यमाना कलातत्त्वगुरुविनिर्मितत्वमात्मनोऽवस्थापयति स उर्वश्यहल्यादिरूपोपमानज्ञानपूर्विका या तत् कर्त्तुः अर्थापत्तिकल्पिता कलातत्त्वगुरुता सापि तथाविधशक्तिकल्पनापूर्विकेति उपमानपूर्विकार्थापत्तिपूर्विका च इयमर्थापत्तिः सापि तत्कर्त्तुर्वेधसः कलातत्त्वगुरुता तथाभूतशक्त्याधारता वा सापि अनुमानत आगमतो वा तस्य कल्प्यत इति अनुमानपूर्विका चेयमर्थापत्तिः। न च एतत् चतुष्टयमिहापि शाब्दमपि तु वाक्यार्थसामर्थ्याद् गम्यते ॥ २१८ ॥

एकशोऽनुमानपूर्विका यथा,

कपोलपुलकेनास्याः सूचितो मदनज्वरः।
मनो निरन्तरासक्तं सख्यः कथयति प्रिये ॥

शक्यत इत्याह। इयमपीति। शक्तिर्मीमांसकनये नित्या अतीन्द्रिया अभावेऽभावेनैव गृह्यत इति मध्यानुपलम्भोऽभावप्रमाणपूर्वकः। कान्तीति। अश्रुतप्रभावतिरस्कृतं हि नयनमासन्नमपि न मध्यग्रहणसमर्थमिति भावः ॥ २१७ ॥

अप्रतिममिति। प्रतिमाशून्यं रूप विशिष्टमेव तत्र विशेषणांशेऽभावस्य व्यापारः। विशेष्यांशे प्रत्यक्षस्य। पूर्ववत् इह अपि व्याख्यानमाह। अत्रापीति। प्रतिमाभावज्ञानं प्रतिमाज्ञानपूर्वकं प्रतिमा च सादृश्यं तच्च सह शब्दहृदयदर्शनवेद्यमिति अस्ति पूर्वमुपमानम् ॥ २१८ ॥

तत्र योऽयं कपोलपुलकेन अनुमीयमानो मनोभवज्वरः स मनसः प्रिये निरन्तरासक्तिमन्तरेणानुपपन्न इति अनुमानपूर्विकेयमर्थापत्तिः।

अनेकश उपमानादिपूर्विका यथा,

त्वदास्येन्दू समौ दृष्ट्वा तदिदं कल्पयामहे।
अन्योन्यगामि लावण्यमनयोरेव केवलम्॥

अत्र त्वदास्येन्दू समौ दृष्ट्वा इति उपमानपूर्वकता अर्थापत्तेः प्रत्यक्षपूर्वता च शब्दत एव प्रतीयते। या च मिथः सादृश्यानुपपत्तिलभ्या लावण्यान्योन्यगामिता सापि तथाविधं विधातारमन्तरेण न सङ्गच्छत इत्यादि इहापि पूर्ववद्वाक्यार्थसामर्थ्यतोऽवगन्तव्यम्॥ २१९॥

एकशोऽभावपूर्विका यथा,

एतदास्यं विना हास्यं निवेदयति सुभ्रुवः।
प्रियापराधदण्डानां मनो भाजनतां गतम्॥

अत्र सुभ्रुव इत्यनेन विलासवत्याः समस्तप्रशस्तलक्षणयोगो लक्ष्यते। तथाविधायाश्च वक्त्रे विलासहासस्य अभावोऽनुपपद्यमानः शोकव्यतिरिक्तमात्मकारणं कल्पयतीति अभावपूर्विकेयमर्थापत्तिः॥ २२०॥

अनेकशोऽर्थापत्त्यादिपूर्विका यथा,

दृष्ट्वा विभ्रमिणीमेतां विद्मो लीलागुरु स्मरम्।
स्मरञ्च मृगशावाक्ष्या मनस्यस्याः कृतास्पदम्॥

अत्र विभ्रमिणीति प्रशंसायां मत्वर्थीयस्तेन विभ्रमाणाम्

हास्यभावस्य अन्यथापि उपपत्तेः कथमर्थापत्तिरित्यत आह। अत्र सुभ्रुव इति॥ २१९॥ २२०॥

उत्कर्षो लक्ष्यते। ते च अन्योपदेशादसम्भवन्तो मन्मथमुपाध्यायं बोधयन्ति। तस्याग्रतः पार्श्वतो वा अनुपलभ्यमानस्य तन्मनसि अवस्थानं लक्ष्यते। सेयमाद्या प्रत्यक्षपूर्विका द्वितीया च अर्थापत्तिपूर्विका अर्थापत्तिर्भवति। अयमेव च मनोभूर्मनसि कामिनीनां सम्भवतीति आप्तोपदेशादागमपूर्विकापि भवति ॥२२१॥

असत्ता या पदार्थानामभावः सोऽभिधीयते।
प्रागभावादिभेदेन स षड्विध इहेष्यते ॥ २२२ ॥

तेषु प्रागभावो यथा,

सग्गं अपारिजाअङ्कोत्थुहलच्छीविरहिअं महुअमहस्स उरम्।
सुमरामि महणपुरओ अमुद्ध अन्दञ्च हरअडापब्भारम् ॥
२२३ ॥ (ञ)

प्रध्वंसाभावो यथा,

धृतिरमितागतिश्रुताविगतं गेयमृतुर्निरुत्सवः।
गतमाभरणप्रयोजनं परिशून्यं शयनीयमद्य मे ॥२२४॥

इतरेतराभावो यथा,

कर्णोत्पलं न चक्षुस्ते न चक्षुः श्रवणोत्पलम्।
इति जानन्नपि जनो मन्यते नेत्रदीर्घताम् ॥२२५॥

(ञ) स्वर्गमपारिजातं कौस्तुभलक्ष्मीविरहितं मधुमथनस्योरः।
स्मरामि मथनपुरतोऽमुग्धचन्द्रं च हरजटाप्राग्भारम् ॥

इत्यमेव अन्यथोपपत्तिमाशङ्क्याये व्याचष्टे। अत्र विभ्रमिणीमिति मत्वर्थीयार्थमाह। प्रशंसायामिति ॥ २२१ ॥

अभावं लक्षयति। असत्तेति। प्रागसत्त्वमुत्तरासत्त्वमिति असत्तारूपेणैव प्रागभावादयो व्यवतिष्ठन्ते इतरेतराभावेऽपि अन्यरूपतया अन्यस्याभाव इति असत्तात्मकत्वम्। प्रागभावादयः पूर्वोल्लिखिताश्चत्वारः। अत्यन्ताभावविशेषसामान्याभावाभ्यां सह षड्भावाः। तयोर्विशेषसमये वक्ष्यामः ॥ २२२ ॥

सग्गं अपारिजाअमिति निगदव्याख्यातः। प्रागभावः। यथा अभावपूर्विकायाम् अर्थापत्तौ करणभेदानुमानमुक्तं तथा अत्रापि बोद्धव्यं पारिजातप्राग-

अत्यन्ताभावो यथा,

जज्जं ण होइ सारं तं सो देइत्ति किमत्थ अच्छेरम्।
अणहोत्तं पिहु दिण्णन्तइ दोहग्गं सवत्तीणम् ॥२२६॥ (ट)

अन्ये पुनरन्यथा अत्यन्ताभावमाचक्षते। यथा,

प्रसीद सद्यो मुञ्चेमञ्चण्डिमानं मनोगतम्।
दृष्टमात्रेऽपि ते तत्र रोषः खकुसुमायते ॥२२७॥

सामर्थ्याभावो यथा,

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातले ॥

त एते षडपि निगदैरेव व्याख्याताः ॥ २२८ ॥

अभावाभावोऽपि अभाव एव। तत्र प्रागभावप्रध्वंसौ यथा,

उद्यानसहकाराणामनुद्भिन्ना न मञ्जरी।
देयः पथिकनारीणां सतिलः सलिलाञ्जलिः ॥ २२९ ॥

(ट) यद्यस्य भवति सारं त स ददाति किमत्राश्चर्यम्।
अभवदपि खलु दत्तं तया दौर्भाग्यं सपत्नीनाम् ॥

भावस्य प्रमेयरूपता व्यक्तैव। अभावोऽभावेनैव प्रतीयत इति। दर्शने तत्करणतया शब्दानुपात्तोऽपि योग्यप्रमाणाभावोऽवगम्यते। एवमुत्तरेषु अपि स्वयमूहनीयम् ॥ २२३—२२६ ॥

स्थानान्तरप्रमितस्य स्थानान्तरे त्रैकालिकोऽभावविशेषो अत्यन्ताभाव इति दर्शनमाश्रित्य चतुष्टयमध्यपाती तावदत्यन्ताभाव उदाहृतः। इदानीं पञ्चमाभावोचितविशेषमत्यन्ताभावं दर्शयति। अन्ये पुनरिति। सौगतादयः। अत्यन्तासत् प्रतियोगिकोऽभावोऽत्यन्ताभावः। यथा खपुष्पस्याभाव इति उदाहरणं स्फुटम् ॥ २२७ ॥

सामर्थ्याभावो योग्यताभावः। अनेनैव रूपेण सरसतामासादयन्नुपात्तः ॥ २२८ ॥

अभाव एवेति। अभावव्यवहारपात्रमेव तथाभूतस्यैव लक्षणमित्युक्तं पुरस्तात् ॥ २२९ ॥

प्रध्वंसप्रागभावो यथा,

न मर्त्यलोकस्त्रिदिवात् प्रहीयते म्रियेत नाग्रे यदि वल्लभो जनः ॥ २३० ॥

प्रध्वंसप्रध्वंसो यथा,

निवृत्तमेव त्रिदिवप्रयोजनं भूतः स चेज्जीवत एव जीवति ॥ २३१ ॥

प्रध्वंसप्रागभावप्रध्वंसो यथा,

नामिलितमस्ति किञ्चित्काञ्चीदेशस्य सर्वथा नाथ ! ।
प्रसरतु करस्तवायं प्रकृतिकृशे मध्यदेशेऽपि ॥ २३२ ॥

प्रध्वंसप्रध्वंसस्य प्रध्वंसो यथा,

एषा प्रवासं कथमप्यतीत्य
यातां पुनः संशयमन्यथैव ।
को नाम पाकाभिमुखस्य जन्तो-
र्द्वाराणि दैवान्यपि धातुमीष्टे ॥ २३३ ॥

इतरेतराभावाभावो यथा,

शासनेऽपि गुरुणि व्यवस्थितं कृत्यवस्तुनि नियुङ्क्ष्व कामतः ।
त्वत्प्रयोजनधनं धनञ्जयादन्य एष इति माञ्च मावगाः ॥

वल्लभजनमरणं प्रध्वंसः स नञा निषिध्यते स तु निषेधः प्रागसत्त्वरूप एव । अतः स चेदिति मरणोत्तरमभावो भवन् प्रध्वंसी भवति । स च असम्भवन्नपि शब्देन सम्भाव्यमानः कान्तिकारणं भवतीति अलङ्कारकक्षामारोहति ॥२३० २३१॥

प्रध्वंसप्रागभावाभाव इति । मरणेन प्रध्वंसनं तस्याभावः समस्तेन नञा तस्यापि अभावो भिन्नेन प्रतिपादितः ॥ २३२ ॥

प्रध्वंसस्य प्रध्वंसाभाव इति । कथमपीत्यनेन प्रवासे दशम्यवस्था कटाचिता तस्यात्ययः प्रध्वंसप्रध्वंसः पुनः सङ्गममित्यनेन तस्यापि प्रध्वंसः ॥ २३३ ॥

अत्यन्ताभावस्य सामर्थ्याभावस्य च प्रध्वंसाभावो यथा,

अनाप्तपुष्पोपचयैर्दुरापा फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसम्पदेषा वृष्टेर्दिवो वीतबलाहकायाः ॥
एते नातिदुर्बोधा इति न व्याकृताः ॥ २३४—२३५ ॥

अर्थालङ्कृतयोऽप्येताश्चतुर्विंशतिसङ्ख्यया ।
कथिताः काव्यविज्ञानां चित्तप्रह्लादहेतवे ॥ २३६ ॥

इति श्रीमहाराजाधिराजश्रीमद्भोजराजविरचिते
सरस्वतीकण्ठाभरणनाम्नि अलङ्कारशास्त्रे अर्थालङ्कारः
तृतीयः परिच्छेदः ॥

सुबोधमन्यत् ॥ २३४—२३६ ॥

उक्तार्थालङ्काराणां संख्यामाह । अर्थालङ्कृतय इति ॥

श्रीरामसिंहदेवाज्ञामादाय रचितो मया ।
दर्पणाख्यः सदा तेन तुष्यतु श्रीसरस्वती ॥
रत्नेश्वरो नाम कवीश्वरोऽसौ विराजते काव्यसुधाभिषेकैः ।
दुस्तर्कचक्राहतदुर्विदग्धां वसुन्धरां पल्लवयन्नजस्रम् ॥
अद्य स्फुरतु वाग्देव्याः कण्ठाभरणकौतुकम् ।
मयि ब्रह्ममनोवृत्तौ कुर्वाणे रत्नदर्पणम् ॥

इति श्रीमन्महाराजरामसिंहस्य आज्ञावशंवदेन पण्डितवरेण श्रीरत्नेश्वरेण
विरचिते दर्पणाख्ये सरस्वतीकण्ठाभरणविवरणेऽर्थालङ्कारः
तृतीयः परिच्छेदः ।

सरस्वतीकण्ठाभरणे

चतुर्थः परिच्छेदः ।

शब्देभ्यो यः पदार्थेभ्य उपमादिः प्रतीयते ।
विशिष्टोऽर्थः कवीनां स उभयालङ्क्रिया मता ॥ १ ॥
उपमा रूपकं साम्यं संशयोक्तिरपह्नुतिः ।
समाध्युक्तिः समासोक्तिरुत्प्रेक्षाऽप्रस्तुतस्तुतिः ॥ २ ॥
सतुल्ययोगितोल्लेखः ससहोक्तिः समुच्चयः ।
साक्षेपोऽर्थान्तरन्यासः सविशेषा परिष्कृतिः ॥३॥
दीपकक्रमपर्य्यायातिशयश्लेषभाविकाः ।
संसृष्टिरिति निर्दिष्टास्ताश्चतुर्विंशतिर्बुधैः ॥ ४ ॥
तत्र, प्रसिद्धेरनुरोधेन यः परस्परमर्थयोः ।
भूयोऽवयवसामान्ययोगः सेहोपमा मता ॥ ५ ॥

वाग्देवीं हृदये ध्यात्वा श्रीजीवानन्दशर्मणा ।
चतुर्थाख्ये परिच्छेदे व्याख्येयं क्रियते मया ॥

शब्दालङ्कारा अर्थालङ्काराश्च उक्ताः इदानीं उभयालङ्कारान् निर्दिशति शब्देभ्य इति । शब्देभ्यः श्रूयमाणपदप्रकृतिभ्यः पदार्थेभ्यश्च तत्तच्छब्दनिष्पन्नपदप्रतीयमानेभ्यः अर्थेभ्यः य उपमादिः प्रतीयते अनुभूयते, स कवीनां विशिष्टः चमत्कारकृदित्यर्थः अर्थः वस्तु । सा उभयालङ्क्रिया शब्दार्थालङ्कार इत्यर्थः मता कथिता विधेयप्राधान्यात् स्त्रीत्वम् ॥ १ ॥

तस्य चतुर्विंशतिविधत्वमित्याह उपमेति । १ उपमा २ रूपकं ३ साम्य ४ संशयोक्तिः ५ अपह्नुतिः ६ समाध्युक्तिः ७ समासोक्तिः ८ उत्प्रेक्षा ९ अप्रस्तुतस्तुतिः १० तुल्ययोगिता ११ उल्लेखः १२ सहोक्तिः १३ समुच्चयः १४ आक्षेपः १५ अर्थान्तरन्यासः १६ विशेषः १७ परिष्कृतिः १८ दीपकः १९ क्रमः २० पर्य्यायः २१ अतिशयः २२ श्लेषः २३ भाविकः २४ संसृष्टिः । इति ताः चतुर्विंशतिः उभयालङ्क्रियाः बुधैः विद्वद्भिः निर्दिष्टाः निरूपिताः । २ । ३ । ४ ।

तासु उपमां लक्षयति तत्रेति प्रसिद्धेः कविसमयस्येति भावः अनुरोधेन वशत

एकाभिधीयमाने स्यात् तुल्ये धर्मे पदार्थयोः ।
प्रतीयमानेऽप्यपरा द्विविधाऽपि च सा त्रिधा ॥ ६ ॥
पदवाक्यप्रपञ्चाख्यैर्विशेषैरुपपद्यते ।
पृथगष्टविधत्वेन ताश्चतुर्विंशतिः पुनः ॥ ७ ॥
समासात् प्रत्ययाच्चैव द्विविधा स्यात् पदोपमा ।
या समासोपमा तत्र चतुर्धा साभिपद्यते ॥ ८ ॥
इवार्थान्तर्गतेरेका सामान्यान्तर्गतेः परा ।
अन्तर्भूतोभयार्थान्या सान्या सर्वसमासभाक् ॥ ९ ॥

तासु अन्तर्भूतेवार्था यथा,—

मुखमिन्दुसुन्दरं ते बिसकिसलयकोमले भुजालतिके ।
जघनस्थली च सुन्दरि ! तव शैलशिलाविशालेयम् ॥

अर्थयोः उपमानोपमेयः परस्पर अन्योन्य यः भूयसां बहुतराणाम् अधिकाना-मित्यर्थः अवयवानां अङ्गाना सामान्यानां साधारणधर्माणाञ्च योगः समावेशः सा इह शास्त्रे अलङ्कारशास्त्रे इत्यर्थः उपमानता उपमा उक्तेति शेषः ॥ ५ ॥

तद्भेदान् क्रमेण दर्शयति एकेत्यादि । पदार्थयोः उपमानोपमेययोः तुल्ये धर्मे अभिधीयमाने अभिधया प्रतिपाद्यमाने सति एका एकप्रकारा, अप्रतीयमाने अभिधया अप्रतिपाद्यमाने इत्यर्थः अपि अपरा अन्यप्रकारा । तदेव द्विविधापि वाच्यप्रतीयमानत्वभेदेन द्विप्रकारापि सा उपमा पदवाक्यप्रपञ्चाख्यै विशेषैः त्रिधा त्रिप्रकारा उपपद्यते भवति । तदेवं षट्प्रकारा उपमा, ततश्च पृथगष्टविधत्वेन अष्टभेदेन चतुर्विंशतिः पुनः उपमा भवति ॥ ७ ॥

समासादिति । तत्र पदोपमा समासात् समासगतत्वात् प्रत्ययात् प्रत्ययगतत्वाच्च द्विविधा स्यात् । तत्र या समासोपमा समस्तपदगता उपमा सा चतुर्धा अभिपद्यते भवति । तत्र इवार्थस्य अन्तर्गतेः समासान्तर्गतत्वात् एका एकप्रकारा सामान्यस्य साधारणधर्मस्य अन्तर्गतेः समासस्येति भावः परा द्वितीयेत्यर्थः । अन्या तृतीया अन्तर्गतौ समासस्येति भावः उभयोः इवार्थस्य सामान्यधर्मस्य चेत्यर्थः अर्थौ यस्यां तथाभूता । अन्या चतुर्थी इत्यर्थः सर्वसमासभाक् समस्तपदेनैव सर्वेषामिवार्थसाधारणधर्मोपमानानां त्रयाणामेव भजनादिति भावः ॥ ८॥ ९ ॥

मुखमिति । हे सुन्दरि ! ते तव मुखम् इन्दुसुन्दरं इन्दुवत् स इव सुन्दरं कान्तं भुजे

अत्रेन्दुरिव सुन्दरमिन्दुसुन्दरमितीवार्थः, उपमानानि सामान्यवचनैः इति समासेनैवोक्तः । एवं बिसकिसलय इव कोमले शैलशिलेव विशालेति । सेयमन्तर्गतेवार्था नाम समासोपमासु पदोपमाभक्तिः ॥ १० ॥

अन्तर्भूतसामान्या यथा,—

चन्द्रसरिसं मुहं से अमअसरिच्छो अ मुहरसो वि सो ।
सकअग्गहरहसुज्जलचुम्बणं कस्स सरिसं से ॥

अत्र चन्द्रेण सदृशं चन्द्रसदृशं मुखम्, अमृतेन सदृक्षः अमृतसदृक्षो मुखरस, इति समासे सुन्दरमधुरादि सामान्यशब्दप्रयोगो न श्रूयते प्रतीयते च सदृशादिद्योतकात् इति सामान्यधर्म्मस्य सौन्दर्य्यमाधुर्य्यादेः उपमाने प्रसिद्धस्य उपमेये समासेनैव प्रतिपादितत्वात् इयमन्तर्भूतसामान्या नाम समासोपमासु पदोपमाभक्तिः ॥ ११ ॥

अन्तर्भूतोभयार्था यथा,—

कमलकरा रम्भोरु कुवलअणअणा मिअङ्कवअणा सा ।

वाह्वलतिके इव भुजालतिके बिसकिसलये इव मृणालपल्लवाविव कोमले तव इयं जघनस्थली नितम्बदेशश्च कटिपुरोभागो वा शैलस्य पर्वतस्य शिलेव विशाला महती गुर्व्वी इत्यर्थः । इयं समासस्य अन्तर्गत इवार्थ इति पदोपमाभक्तिः पदघटिता उपमा तस्या भक्तिर्विभागः ॥ १० ॥

चन्दसरिसमिति । चन्द्रसदृशं मुखमस्या अमृतसदृक्षश्च मुखरसोऽपि सः ।
सकचग्रहरसोज्ज्वलचुम्बनं कस्य सदृशं तस्याः ॥ इति सं

चन्द्रेति । अस्याः कान्तायाः मुखं चन्द्रेण सदृशं तुल्यं सः मुखस्य रसः अपि अमृतेन सुधया सदृक्षः सदृशः । तस्याः सकचग्रह केशग्रहणपुरःसरमित्यर्थः रसोज्ज्वलं रसेन रागेण उज्ज्वलम् उद्रिक्तं चुम्बनं कस्य वस्तुनः सदृशं तुल्यम् ? केन वस्तुना उपमीयते इत्यर्थः न केनापीति भावः । इयम् अन्तर्भूतः समासस्येति भावः सामान्यः साधारणधर्म्मः सौन्दर्य्यादिर्यस्याः तथाभूता चन्द्रसदृशसुन्दरमिति अमृतसदृक्षमधुर इति वक्तव्ये सुन्दरादिपदाप्रयोगादिति भावः ॥ ११ ॥

कहं णु णवचम्पअङ्गी मुणालबाहुपि आतवइ ॥

अत्र कमलमिव ताम्रौ रम्भा इव पीवरौ कुवलयमिव श्यामे मृगाङ्क इव प्रेक्षणीयं नवचम्पकमिव गौरं मृणालमिव कोमलौ करौ ऊरू नयने वदनम् अङ्गं बाहू यस्याः सा तथोक्तेति अन्यपदार्थेन समासेनैव द्योतकसामान्ययोः उक्तत्वात् इयमन्तर्भूतैव सामान्या नाम समासोपमासु पदोपमाभक्तिः ॥ १२ ॥

सर्वसमासा यथा,—

शरदिन्दुसुन्दरमुखी कुवलयदलदीर्घलोचना सा मे।
दहति मनः कथमनिशं रम्भागर्भाभिरामोरुः ॥

अत्र उपमानोपमेयधर्माणामिन्दुसुन्दरादिपदैः इवार्थस्य समासेनैवाभिधानं सर्वं समासे स्यादिति सर्वसमासोपमा नाम इयं समासोपमासु पदोपमाभक्तिः ॥ १३ ॥

या प्रत्ययोपमेत्युक्ता काव्यविद्भिः पदोपमा।
चतुर्धा भिद्यते सापि प्रत्ययार्थप्रभेदतः ॥ १४ ॥

कमलेति प्रा०। कमलकरा रम्भोरुः कुवलयनयना मृगाङ्कवदना सा।

कथ नु नवचम्पकाङ्गी मृणालबाहुरपि आतपतीव ॥ स्पष्टम्।

इयम् अन्यपदार्थेन भिन्नपदार्थबोधकेन समासेनैव बहुव्रीहिणैवेत्यर्थः द्योतकसामान्ययोः इवसाधारणधर्म्मयोरित्यर्थः ॥ १२ ॥

शरदिति। शरदिन्दुरिव सुन्दरं मुखं यस्याः सा कुवलयदले इव नीलोत्पलपत्रे इव दीर्घे आयते लोचने यस्याः तथाभूता रम्भायाः कदल्याः गर्भाविव अभ्यन्तरभागाविव अभिरामौ ऊरू यस्याः तथाविधा सा कान्तेति शेषः मे मम मनः कथम् अनिशं निरन्तरं दहति अतिशयेन तापयतीत्यर्थः। इयम् उपमानसामान्यधर्म्मोपमेयाना समासेन द्योतकस्य इवार्थस्य अभिधानात् सर्वसमासासमासेनैव सर्वम् औपम्यसाधक यस्यां तथाभूता ॥ १३ ॥

प्रत्ययोपमाभेदमाह येति। काव्यविद्भिः या पदोपमा प्रत्ययोपमा प्रत्ययनिष्पन्नत्वात् प्रत्ययसाध्या पदोपमेत्यर्थः इति उक्ता कथिता सापि प्रत्ययार्थानां प्रभेदतः पार्थक्यात् चतुर्धा भिद्यते पृथक्क्रियते ॥ १४ ॥

प्रत्ययो ह्युपमेये स्यादुपमानेऽपि कश्चन।
तत् सामान्ये भवेत् कश्चिदिवार्थे कश्चिदिष्यते ॥ १५ ॥
तेषां वशात्तदुपमा भवेत् तद्व्यपदेशभाक्।
उदाहरणमेवास्या रूपव्यक्त्यै निदर्श्यते ॥ १६ ॥

तत्र प्रत्ययस्य उपमेयस्यार्थे यथा,—

"सो ध्वाङ्क्षविरावी स्यादुष्ट्रक्रोशी च कोकिलः
खरनादी मयूरोऽपि त्वञ्चेद्वदसि वाग्मिनि!।

अत्र कर्त्तर्युपमाने इत्यनेन यदा उपमाने उपपदे ध्वाङ्क्ष इव विरौतीति सामानाधिकरण्येन कर्त्तर्येव प्रत्ययः तदा उपमेयस्य अर्थो भवति। एवमुष्ट्रक्रोशी खरनादीत्येतयोरपि द्रष्टव्यम्। सा इयम् उपमेयार्थप्रत्यया नाम प्रत्ययोपमासु पदोपमाभक्तिः ॥१७

प्रत्यय इति। हि यतः प्रत्ययः उपमेये स्यात् तथा कश्चन कोऽपि प्रत्ययः उपमाने स्यात्। कश्चित् प्रत्ययः तयोः उपमेयोपमानयोः सामान्ये साधारणधर्मे भवेत् कश्चित् प्रत्यय इवार्थे इष्यते ॥ १५ ॥

तेषामिति। तेषां प्रत्ययानां वशात् हेतुत्वात् तत् उपमाप्रत्ययोपमा इत्यर्थः तद्व्यपदेशभाक् तत्तत्प्रत्ययनामशालिनी भवेदित्यर्थः। अस्याः प्रत्ययोपमायाः उदाहरणमेव निदर्शनमेव रूपस्य आकारस्य व्यक्त्यै प्रकटनाय निदर्श्यते निरूप्यते ॥१६॥

हंसेति। हे वाग्मिनि सुवचने! मधुरभाषिणीत्यर्थः चेत् यदि त्वं वदसि जल्पसि तदा हंसः ध्वाङ्क्ष इव द्रोणकाक इव विरौतीति तथाभूतः द्रोणकाकवत् कर्कशनाद इति भावः स्यात् भवेत्। कोकिलश्च उष्ट्र इव क्रोशतीति उष्ट्रक्रोशी उष्ट्रवत् विस्वरस्वन इत्यर्थः मयूरः अपि खरः गर्दभः स इव नदतीति खरनादी स्यादित्यन्वयः। अचेति कर्त्तरि उपमाने इत्यनेन इति सूत्रेणेत्यर्थः। प्रत्ययः इनिप्रत्ययः इत्यर्थः। उपमेयस्य हंसस्येति भावः अर्थे अर्थबोधकत्वे इत्यर्थः भवति असौ प्रत्यय इति शेषः। तथा उष्ट्रक्रोशीत्यत्र खरनादीत्यत्र च उपमाने उपपदे उष्ट्र इव क्रोशतीति खर इव नदतीत्येतयोः सामानाधिकरण्येन कर्त्तर्येव इनिप्रत्ययः उपमेययोः कोकिलमयूरयोरेवार्थबोधकतेति भावः। उपमेयार्थप्रत्यया उपमेयस्य अर्थे प्रत्ययो यस्यां तथाभूतेत्यर्थः ॥ १७ ॥

प्रत्ययस्य उपमानार्थे यथा,—

पूर्णेन्दुकल्पवदना मृणालीदेश्यदोर्लता ।
चक्रदेशीयजघना सा स्वर्गेऽपि न दृश्यते ॥

अत्र पूर्णेन्दुरिव पूर्णेन्दुः इत्यादिकया उपचारवृत्त्या यद्यपि पूर्णेन्दुप्रभृतय उपमानशब्दा अपि उपमेयेषु वदनादिषु वर्त्तन्ते तेभ्यश्च यद्यपि स्वार्थे एव स्वार्थिकाः कल्पबादयो भवन्ति । तथापि ते शब्दशक्तिस्वाभाव्याद् गुणभूतमुपमानार्थमात्रं ब्रुवते । यथा शुक्लादिभ्यः तरबादयः । तथा हि अयं शुक्लोऽयञ्च शुक्लोऽयमनयोः शुक्लतर इत्युक्ते शौक्ल्यस्यैव प्रकर्षो गम्यते न शौक्ल्यवतः । सेयमुपमानार्थप्रत्यया नाम प्रत्ययोपमासु पदोपमाभक्तिः ॥१८॥

सामान्यार्थप्रत्ययेन यथा,—

सूर्य्यायति सुधारश्मिर्मन्मथोऽतिमृतायते ।
मृतस्य कान्ताविरहे स्वर्गोऽपि नरकीयति ॥

अत्र उपमानादाचारे इत्यादिभिः सूर्य्यादिभ्यः क्यजादय आचारलक्षणक्रियाविशेष उत्पद्यमाना उपमानोपमेययोः सामान्य एव उत्पद्यन्त इति सेयं सामान्यार्थप्रत्यया नाम प्रत्ययोपमासु पदोमाभक्तिः ॥ १९ ॥

पूर्णेति । पूर्णेन्दुः पूर्णचन्द्रः तत्सादीषदूनं तत्सदृशमित्यर्थः एवमन्यत्र, वदन यस्याः तथोक्ता मृणाली विसलता तस्या ईषदूना दोर्लता भुजवल्ली यस्याः तथाविधा चक्रं मण्डलाकारविशेषः तत्सादीषदूनं जघनं यस्याः तथाभूता सा तादृशीत्यर्थः कान्ता स्वर्गेऽपि सुरलोकेऽपि न दृश्यते। अत्र प्रत्ययानां कल्पादीनामुपमानपदेभ्यो विधीयमानानां उपमानप्रकर्षप्रतिपादकत्वादुपमानार्थतेति भावः ॥ १८ ॥

सूर्य्यायतीति । कान्ताविरहे मृतस्य मृतवत् स्थितस्येत्यर्थः सुधारश्मिश्चन्द्रः सूर्य्यायति सूर्य्य इवाचरति मन्मथः कामः अतिमृतायते अतिशयेन मृत इवाचरति मृतमपि आत्मानं तदुपरि प्रहरतीति भावः । तथा स्वर्गोऽपि नरकीयति नरकमिवाचरति । स्वर्गेऽपि न सुखमिति भावः। इयं सामान्यार्थप्रत्यया सामान्यो

इवार्थप्रत्ययेन यथा,

एक एव हि भूतात्मा भूते भूते व्यवस्थितः ।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥

अत्र तेन तुल्यं क्रिया चेद्दतिः इत्यनेन चन्द्रशब्दात् चन्द्रेण तुल्यं दृश्यत इतीवार्थ एव प्रत्ययो न तु तुल्यक्रियार्थे अन्यथा दृश्यत इति इवार्थ इव तुल्यक्रिया प्रयोगोऽपि न स्यात् । तदप्रयोगेऽपि च गौरिव गवय इत्यादौ वतिः प्रसज्येत । सेयमिवार्थप्रत्यया नाम प्रत्ययोपमासु पदोपमाभक्तिः ॥ २० ॥

वाक्योपमा तु या तत्र द्वैविध्यं सापि गच्छति ।
एका पदार्थयोः साम्ये परा वाक्यार्थयोर्मिथः ॥ २१ ॥

आद्या पूर्णा च लुप्ता च लुप्तपूर्णा तथैव च ।
पूर्णलुप्तेति चाख्याता कविमुख्यैश्चतुर्विधा ॥ २२ ॥

तत्र, पूर्णा सामान्यधर्मस्य प्रयोगे द्योतकस्य च ।
उपमानस्य च भवेदुपमेयस्य चैव हि ॥ २३ ॥

साधारणौ अर्थौ आचारलक्षणौ तादृशौ प्रत्ययौ क्यच्क्यन्तौ यस्यां तथाभूता ॥ १९॥

एक इति । एक एव अद्वितीय एव भूतात्मा जीवात्मा भूते भूते प्रतिभूतं व्यवस्थितः जलचन्द्रवत् जलप्रतिबिम्बितचन्द्रवत् एकधा एकप्रकारः बहुधा बहुप्रकारश्च दृश्यते । इयम् इवार्थप्रत्यया इव शब्दस्य अर्थ इव अर्थो यस्य तादृशः प्रत्ययः यस्या तथाभूता ॥ २० ॥

वाक्येति । तत्र उपमाख्यित्यर्थः या तु वाक्योपमा वाक्यघटिता उपमा, सापि द्वैविध्यं गच्छति प्राप्नोति एका पदार्थयोः मिथः परस्परं साम्ये परा अन्या वाक्यार्थयोः मिथः साम्ये सादृश्ये भवतीति शेषः ॥ २१ ॥

आद्येति । आद्या प्रथमा पदार्थयोः साम्यघटितेत्यर्थः पूर्णा च लुप्ता च लुप्तपूर्णा च तथा पूर्णलुप्ता चेति कविमुख्यैः कविश्रेष्ठैः चतुर्विधा आख्याता कथिता ॥ २२ ॥

यथा, कमलमिव चारुवदनं मृणालमिव कोमलं भुजायुगलम् ।
अलिमालेव सुनीला तथैव मदिरेक्षणे कवरी ।

अत्र कमलमृणालालिमालादीनामुपमानद्योतकतुल्यधर्मोपमेयवाचकानां चतुर्णामपि पदानां पृथक् पृथक् प्रयोगे पदार्थयोः सादृश्याभिधीयमानत्वात् इयं पूर्णा नाम पदार्थोपमासु वाक्योपमाभक्तिः ॥ २४ ॥

लोपे सामान्यधर्मस्य द्योतकस्य च योपमा ।
प्रतीयमानसादृश्ये इयोर्लुप्तेति तां विदुः ॥ २५ ॥

यथा,—न पद्मं मुखमेवेदं न मृगौ चक्षुषी इमे ।
न केसराणि कान्ताया इमास्ता दन्तपङ्क्तयः ॥

अत्र कान्तामुखादौ उपमेये पद्मादिविपर्य्ययज्ञानप्रत्याख्यानेन इवादीनामभावेऽपि कान्त्यादिलुप्तधर्मप्रतीतेर्लुप्ता नाम इयं पदार्थोपमासु वाक्योपमाभक्तिः ॥२६॥

पूर्णां लक्षयति तवेति । तत्र तासां मध्ये सामान्यधर्मस्य द्योतकस्य इवादेः उपमानस्य उपमेयस्य च प्रयोगे उपादाने इति यावत् पूर्णा भवतीति शेषः ॥ २३ ॥

कमलमिति हे मदिरेक्षणे ! मत्तखञ्जनलोचने ! मदिरी मत्तखञ्जन इति कोषः वदनं मुखं कमलमिव चारु सुन्दरम् । भुजायुगलं मृणालमिव कोमलं मृदुलं तथा कवरी केशपाशः अलिमालेव भ्रमरपङ्क्तिरिव सुनीला अतिकृष्णा । तवेति सर्वत्राध्याहार्य्यम् । अत्र पदार्थयोः कमलवदनायाः मृणालभुजयोः अलिमालेव केशपाशयोः उपमानोपमेययोः द्योतकस्य इवशब्दस्य साधारणधर्मस्य चादेश्च प्रयोगात् पूर्णोपमेति भावः ॥ २४ ॥

लुप्तां लक्षयति लोपे इति सामान्यधर्मस्य द्योतकस्य च लोपे अप्रयोगे इति यावत् या उपमा इयोः उपमानोपमेययोः प्रतीयमानसादृश्ये साम्यप्रतीतावित्यर्थः तां उपमां लुप्तेति विदुः जानन्ति ॥ २५ ॥

उदाहरति यथेति । इदं पद्मं न मुखमेव । इमौ भृङ्गौ न इमे चक्षुषी, न केसराणि न किञ्जल्काः, इमास्ता दन्तपङ्क्तयः । कान्ताया इति सर्वत्र अन्वेति । अत्र सामान्यधर्मस्य कान्तादेर्द्योतकस्य च इवादेः अप्रयोगात् लुप्तोपमा ॥ २६ ॥

लोपे सामान्यधर्मस्य लुप्तपूर्णेति गद्यते।

यथा,—राजीवमिव ते वक्त्रं नेत्रे नीलोत्पले इव।

रम्भास्तम्भाविवोरू च करिकुम्भाविव स्तनौ॥

अत्र सामान्यधर्मेऽपि लुप्ते प्रतीयमानसादृश्यादेव पदार्थयोः उपमानोपमेयभावस्य परिपूर्णत्वे लुप्तपूर्णा नाम इयं पदार्थोपमासु वाक्योपमाभक्तिः॥ २७॥

द्योतकस्य तु लोपे या पूर्णा लुप्तेति सा स्मृता॥ २८॥

यथा,—त्वन्मुखं पुण्डरीकञ्च फुल्ले सुरभिगन्धिनौ।

कोमलापाटलौ तन्वि! पल्लवश्चाधरश्च ते॥

अत्र तन्त्रेण सदृशयोः अनभिधानात् सादृश्यस्य पुनरुपमानोपमेयभावविवक्षा तेन श्लेषतोऽन्यत्वे सति इतरेतरयोगेन उपमानोपमेययोः एकशेषेण च तद्विशेषणयोः समुदायेनाभिधानात् इवादिमन्तरेणापि उपमानादीनां चतुर्णामपि पूर्णत्वे सति उक्तार्थत्वात् इवादिर्लुप्यत इति पूर्णलुप्ता नाम इयं पदार्थोपमासु वाक्योपमाभक्तिः॥ २९॥

यापि वाक्यार्थयोः साऽपि चतुर्धैकेवशब्दिका।

नैकेवशब्दिकेवादिशून्या वैधर्म्यवत्यपि॥ ३०॥

लुप्तपूर्णां लक्षयति लोपे इति। सामान्यधर्मस्य लोपे लुप्तपूर्णेति गद्यते कथ्यते। उदाहरति यथेति। हे कान्ते! इति अध्याहार्य्यम्। ते तव वक्त्रं वदनं राजीवमिव पद्ममिव नेत्रे नीलोत्पले इव। ऊरू च रम्भास्तम्भाविव कदलिकाण्डाविव, स्तनौ करिकुम्भाविव। अत्र सामान्यधर्मः काण्डत्वादिर्लुप्त इति लुप्तपूर्णेति॥ २७॥

पूर्णलुप्ता लक्षयति द्योतकस्येति। द्योतकस्य इवादेर्लोपे अप्रयोगे या उपमा सा पूर्णलुप्तेति स्मृता कथिता॥ २८॥

उदाहरति यथेति। हे तन्वि! तव मुखं पुण्डरीकं पद्मञ्च फुल्ले विकसिते सुरभिगन्धी ययोः तथाभूते। पल्लवश्च ते अधरश्च कोमलापाटलौ कोमलौ आपाटलौ आरक्तौ चेत्यर्थः। अत्र द्योतक इवादिशब्दोऽप्रयुक्तः॥ २९॥

तासु एकेवशब्दा यथा,

पाण्ड्योऽयमंसार्पितलम्बहारः क्लृप्ताङ्गरागो हरिचन्दनेन ।
आभाति बालातपरक्तसानुः सनिर्झरोद्गार इवाद्रिराजः ॥

अत्र हिमवत्पाण्ड्ययोर्निर्झरहारयोर्बालातपहरिचन्दनयोश्च परस्परमुपमानोपमेयविवक्षायां विशेषणविशेष्यभावपरिकल्पनेन वाक्यार्थयोर्द्वयोरेव कल्पितत्वात् एकेनैव इवशब्देन तयोः परस्परमुपमानोपमेयभावोऽभिहित इतीयम् एकेवशब्दा नाम वाक्यार्थोपमासु वाक्योपमाभक्तिः ॥ ३१ ॥

अनेकेवशब्दा यथा,—

दिने दिने सा परिवर्द्धमाना लब्धोदया चान्द्रमसीव रेखा ।
पुपोष लावण्यमयान्विशेषान् ज्योत्स्नान्तराणीव कलान्तराणि ॥

अत्र क्रियापदस्य वाक्यार्थद्वयैकतापत्तिहेतोः सकर्मकत्वात् कर्त्तुः कर्मणश्च उपमानात् पृथक् इवशब्दप्रयोग इति सेयमभिधीयमानसादृश्या अनेकेवशब्दा नाम वाक्यार्थोपमासु वाक्योपमाभक्तिः ॥ ३२ ॥

येति । वाक्यार्थयोः साम्ये यापि उपमा सापि चतुर्धा चतुःप्रकारा भवति एक इवशब्दः यस्यां सा एकेवशब्दिका एका । नैके बहवः इवशब्दा यस्यां सा नैकेवशब्दिका द्वितीया । इवादिशून्या तृतीया । वैधर्म्यवती विरुद्धधर्म्मशालिनी चतुर्थी ॥ ३० ॥

उदाहरति पाण्ड्य इति । अंसे स्कन्धदेशे अर्पितः निहितः लम्बः लम्बमान इत्यर्थः हारो यस्य तथोक्तः हरिचन्दनेन रक्तचन्दनविशेषेण क्लृप्तः रचितः अङ्गरागः अङ्गविलेपनं येन यस्य वा तथाभूतः । अयं पाण्ड्यः तदाख्यदेशाधिपतिरित्यर्थः बालातपेन रक्तः सानुः प्रस्थभागः यस्य तथाविधः निर्झरोद्गारेण सह वर्त्तमानः सनिर्झरोद्गारः अद्रिराज इव पर्वतराज इव आभाति शोभते । रघुवंशे इन्दुमतीस्वयम्वरे इन्दुमतीं प्रति सख्या उक्तिरियम् ॥ ३१ ॥

दिने इति । दिने दिने प्रतिदिनं परिवर्द्धमाना वृद्धिं गच्छन्ती लब्धोदया प्राप्तोदया चन्द्रमस इयं चान्द्रमसी लेखेव कलेव ज्योत्स्नान्तराणि चन्द्रिकाभेदानि

अनिवादिशब्दा यथा,—

दिवो जागर्त्ति रक्षायै पुलोमारिर्भुवो भवान्।
असुरास्तेन हन्यन्ते सावलेपा नृपा त्वया॥

अत्र वर्णनीययोः पुलोमारिभवतोः द्यावाभूम्योः असुराणामवलिप्तपार्थिवानाञ्च तुल्यक्रियासमावेशात् इवादिमन्तरेणापि वाक्यार्थानां परस्परम् उपमानोपमेयभावोऽवगम्यत इति इयम् अनिवादिशब्दा नाम वाक्यार्थोपमासु वाक्योपमाभक्तिः॥३३॥

वैधर्म्यवती यथा,—

ग्रहितः प्रधनाय माधवानहमाकारयितुं महीभुजा।
न परेषु महौजसश्छलादपकुर्वन्ति मलिम्लुचा इव॥

अत्र सत्यपि उपमाने सत्यपि उपमेये सत्यपि च इवशब्दे महौजसां मलिम्लुचानाञ्च योऽयं छलापकरणं नाम वस्तुधर्मः स उपमान एव न नियम्यत इति वैधर्म्यवती नाम इयं वाक्यार्थोपमासु वाक्योपमाभक्तिः॥ ३४॥

कलान्तराणीव कलाविशेषानिव लावण्यमयान् मुक्ताफलेषु छायायाः तरलत्वमिवान्तरा प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते इति लक्षणान् कान्तिविशेषपूर्णानित्यर्थः विशेषान् अवयवान् पुपोष दधारित्यर्थः। कुमारसम्भवे पार्वतीजन्मनि तदीयरूप वर्णनमिदम्। अत्र कर्त्तुरुपमानात् कर्म्मणश्चोपमानात् इवशब्दयोः प्रयोग इति अनेकेवशब्दोपमा॥ ३२॥

दिव इति। पुलोमारिः इन्द्रः दिवः स्वर्गस्य रक्षायै रक्षार्थं जागर्त्ति, भवान् भुवः पृथिव्या रक्षार्थं जागर्त्ति इत्यन्वयः। तेन पुलोमारिणा सावलेपाः सगर्वाः असुराः त्वया नृपाः शत्रव इति भावः सावलेपा इत्यत्रापि अन्वेति हन्यन्ते बध्यन्ते। अत्र इवादिशब्दाप्रयोगेऽपि वाक्यार्थयोः उपमानोपमेयभावः प्रतीयते इति अनिवादिशब्दा॥ ३३॥

ग्रहित इति। महीभुजा राज्ञा महीभृतेति पाठान्तरं अह प्रधनाय युद्धाय माधवान् आकारयितुं आह्वातुं ह्वतिराकारणाह्वानमित्यमरः। ग्रहितः प्रेषितः। ननु शत्रुनिग्रहे अन्येषामुपायानां सत्त्वेऽपि कथमाकारणमित्यत्राह नेति। महौ-

यत्रोक्तिभङ्ग्या वाक्यार्थसादृश्यमवगम्यते ।
वाक्यार्थयोर्विस्तरतः सा प्रपञ्चोपमेष्यते ॥ ३५ ॥
सा तु प्रकृतरूपा स्याद्रूपेण विकृता तथा ।
तयोः प्रकृतरूपा सा विज्ञेया च चतुर्विधा ॥ ३६ ॥
स्यात् समस्तोपमा तद्वदेकदेशोपमा परा ।
मालोपमा तृतीया स्याच्चतुर्थी रसनोपमा ॥ ३७ ॥

तासु समस्तोपमा यथा,—

अलिवलयैरलकैरिव कुसुमस्तवकैः स्तनैरिव वसन्ते ।
भान्ति लता ललना इव पाणिभिरिव किशलयैरधिकम् ॥

अत्र वसन्तलक्ष्मीपरिसंस्कृतलतानां ललनानाञ्च प्रतीयमानसादृश्यानाम् उपमानोपमेयभावविवक्षायां येयम् अलिवलयादिभिः अलकादीनां प्रतीयमानसादृश्यानामेव पृथक् पृथक् इवशब्दप्रयोगवतीति विस्तारेण वयविनोऽवयवानाञ्चेति सामस्त्येन वाक्यार्थयोः औपम्योक्तिभङ्गिः । सेयं समस्तोपमा नाम प्रकृतरूपोपमासु प्रपञ्चोपमा भक्तिः ॥३८॥

जसः महातेजसः पुरुषा इति शेषः मलिम्लुचा इव तस्करा इव छलात् छलमाश्रित्येत्यर्थः परेषु शत्रुषु न अपकुर्वन्ति अत्र महौजसा मलिम्लुचानाञ्च उपमेयोपमानभावे सत्यपि छलापकरणं विरुद्धधर्म्म इति वैधर्म्म्यवती ॥ ३४ ॥

यत्रेति । यत्र उक्तेः सन्दर्भस्य भङ्ग्या चातुर्य्येण वाक्यार्थयोः सादृश्यं साम्यं अवगम्यते प्रतीयते सा वाक्यार्थयोः विस्तरतः विस्तारात् बाहुल्यादित्यर्थः प्रपञ्चोपमा इष्यते कथ्यते इति भावः ॥ ३५ ॥

सेति । सा तु प्रपञ्चोपमा प्रकृतरूपा प्रस्तुतरूपा तथा रूपेण विकृता विकृतरूपा चेति द्विविधा स्यात् । तयोर्मध्ये सा प्रकृतरूपा च चतुर्विधा विज्ञेया ॥ ३६ ॥

स्यादिति । समस्तोपमा एका, एकदेशोपमा अपरा, मालोपमा तृतीया, रसनोपमा चतुर्थी स्यात् ॥ ३७ ॥

अलिवलयैरिति । वसन्ते लताः अलकैः चूर्णकुन्तलैरिव अलिवलयैः स्तनैरिव कुसुमस्तवकैः पाणिभिरिव करैरिव किशलयैः नवपल्लवैः अतएव ललना

एकदेशोपमा यथा,—

कमलदलैरधरैरिव दशनैरिव केशरैर्विराजन्ते।
अलिवलयैरलकैरिव कमलैर्वदनैरिव नलिन्यः॥

अत्र नलिनीनां विलासिनीनाञ्च परस्परमुपमानोपमेयभावे वक्तव्ये विलासिनीलक्षणमुपमानार्थमेव अवयवान्तराणि च यानि स्तनाद्युपमेयानि तानि परित्यज्य कमलमेवैकं तदवयवैर्दलादिभिः सह अधरादिभिः उपमानैः पृथक् पृथगिव प्रयोगात् विस्तरेणोपमितं तेनेयमेकदेशोपमा नाम प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः॥ ३९॥

मालोपमा यथा,—

सोहव्व लक्खणमुहं वणमालव्व विअलं हरिवइस्स उरं।
कित्तिव्व पवणतणअं आसव्व वलाइ से विलग्गइ दिट्ठी॥

अत्र रामदृष्टेर्लक्ष्मणमुखादिविशिष्टाः शोभाद्युपमानमालया प्रतीयमानसादृश्यया विस्तरेणोपमितेर्मालोपमा नामेयं प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः॥ ४०॥

रसनोपमा यथा,—

चन्द्रायते शुक्लरुचाथ हंसो हंसायते चारुगतेन कान्ता।
कान्तायते स्पर्शसुखेन वारि वारीयते स्वच्छतया विहायः॥

इव कान्ता इव अधिकं यथा तथा भान्ति शोभन्ते। अत्राङ्गाङ्गिनां सर्वेषामेव उपमानोपमेयभाव इवशब्दैः प्रत्येकमवगमात् समस्तोपमा॥ ३८॥

कमलेति। नलिन्यः पद्मिन्यः अधरैरिव कमलदलैः दशनैरिव केशरैः किञ्जल्कैः अलकैरिव अलिवलयैः वदनैरिव कमलैः विराजन्ते। इयमेकदेशवर्त्तिन्युपमेति नव्याः॥ ३९॥

सोहव्वेति प्रा०। शोभेव लक्ष्मणमुखं वनमालेव विकटं हरिपतेरुरः। कीर्त्तिरिव पवनतनयं आशेव वलात्यस्य विलगति दृष्टिः॥ इति सं

शोभेति। अस्य रामस्य दृष्टिः शोभेव लक्ष्मणस्य मुखं वनमालेव हरिपतेः सुग्री-

अत्र चन्द्रादीनां शौक्ल्यादिभिरभिधीयमानसादृश्यैर्हंसादिभिर्येयं रसनान्यायेन पश्चाद्बलनया विस्तरवती हेतुमती च प्रत्ययोपमापङ्क्तिः तया इह एकवाक्यताकरणेन शरद्वर्णनीयतोयवर्णनमिति सेयं रसनोपमा नाम प्रकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥ ४१ ॥

इतीमास्ताश्चतस्रोऽपि रूपेण प्रकृतेन याः ।
उपमानाश्चतस्रोऽन्या विकृतेन प्रचक्ष्महे ॥ ४२ ॥
विपर्य्यासोपमा तासु प्रथमाथोभयोपमा ।
अथोत्याद्योपमा नाम तुरीयाऽनन्वयोपमा ॥ ४३ ॥

तासु विपर्य्यासोपमा यथा,—

यत्त्वन्नेत्रसमानकान्ति सलिले मग्नं तदिन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायानुकारी शशी ।
येऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

वस्य विकटं विशालं उरः वक्षस्थलं कीर्त्तिरिव पवनतनय हनूमन्तम् आश्रेव बलानि वानरसैन्यानि विलगति आविशति ॥ ४० ॥

चन्द्रायते इति । अथ इदानीमित्यर्थः हंस शुक्लरुचा श्वेतकान्त्या चन्द्रायते चन्द्र इव आचरति । कान्त्या चारुगतेन मनोहरगमनेन हंसायते हंस इव आचरति । वारि स्पर्शसुखेन कान्तायते कान्तेव आचरति । विहायः आकाशं स्वच्छतया निर्मलतया वारीयते वारीव आचरति । शरद्वर्णनमिदम् ॥ ४१ ॥

इतीति । रूपेण प्रकृतेन या उपमाः उक्ता इति शेषः ताः चतस्रोऽपि इति एवं रूपाः इमाः प्रागुक्तप्रकारा इत्यर्थः । विकृतेन रूपेण च अन्याः चतस्रः उपमानाः उपमा इत्यर्थः प्रचक्ष्महे प्रब्रूमः ॥ ४२ ॥

विपर्य्यासेति । तासु चतसृषु मध्ये विपर्य्यासोपमा प्रथमा, अथ द्वितीया उभयोपमा अथ तृतीया उत्याद्योपमा, तुरीया चतुर्थी अनन्वयोपमा नाम ॥ ४३ ॥

यदिति । हे प्रिये ! तव नेत्रस्य समाना कान्तिर्यस्य तत् यत् इन्दीवरं

अत्र नेत्र दीनामुपमेयत्वमिन्दीवरादीनामुपमानत्वमिति प्रसिद्धौ येयमत्यनुरागान्नेत्रादिषु आधिक्यबुद्धिर्नात्यनुरागादिन्दीवरादिषु तदनुकारबुद्धिस्तयेह रामेण विरहिणा अभिधीयमानसादृश्यानाममीषां परस्परम् उपमानोपमेयभावः प्रसिद्धेर्विपर्य्यासेन कल्पित इति मेयं विपर्य्यासोपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥ ४४ ॥

उभयोपमा यथा,—

तवाननमिवाम्भोजमम्भोजमिव ते मुखम्।
निलीनां नलिनीं षण्डे कथं नु त्वां लभेमहि ॥

अत्रापि अत्यन्तसादृश्यादेकस्मिन् पक्षे प्रसिद्धेर्विपर्य्यास इति मेयं प्रतीयमानसादृश्योभयोपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥ ४५ ॥

उत्प्रेक्षोपमा यथा,—

उभौ यदि व्योम्नि पृथक् प्रवाहावाकाशगङ्गापयसः पतेताम्।
तदोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥

नीलोत्पलं तत् सलिले जले मग्नं तिरोहितमित्यर्थः। तव मुखस्य छायां कान्तिं अनुकरोतीति तादृशः शशी चन्द्रः मेघैः अन्तरितः आच्छादितः। तव गमनं अनुकरोतीति तथाविधा गतिर्येषां तथोक्ता ये राजहंसाः तेऽपि गताः मानसं सर इति शेषः। वर्षासु मानसं यान्ति हंसा इति कविसमयप्रसिद्धेः। अतः तव सादृश्येन यः विनोदः सन्तोषः स एव तन्नाव अपि दैवेन प्रतिकूलेनेति भावः मे मम न चम्यते न सह्यते ॥ सीतामुद्वह्य गच्छतो रामस्य सीतां प्रत्युक्तिः। अत्रोपमानादीनामिन्दीवरादीनामुपमेयताप्रतिपादनाद् विपर्य्यास इति विपर्य्यासोपमा ॥ ४४ ॥

तवेति। अम्भोजं पद्मं तव आननमिव, ते तव मुखं अम्भोजमिव। नु भोः षण्डे नपुंसके निलीनां सङ्गतां नलिनीं पद्मिनीं त्वां कथं लभेमहि प्राप्नुमः। कस्यचित् कामिनः कामपि कापुरुषसङ्गतां कान्तां प्रति साभिलाषोक्तिः। अत्र उभयोरेव उपमानोपमेयभावप्रतिपादनात् उभयोपमा ॥ ४५ ॥

अत्रोपमानार्थमुत्प्राद्योपमेयेन प्रतीयमानमभिधीयमानञ्च सादृश्यमभिहितमिति सेयमुत्प्राद्योपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥ ४६ ॥

अनन्वयोपमा यथा,—

त्वन्मुखं त्वन्मुखमिव त्वद्दृशौ त्वद्दृशाविव ।
त्वन्मूर्त्तिरिव मूर्त्तिस्ते त्वमिव त्वं कृशोदरि ! ॥

अत्र त्वमेवेदृशी नान्या त्वत्सदृशीति अनन्वये सति उपमानोपमेयभावविवक्षया एकस्यापि वस्तुनोभेदमुपकल्प्य प्रतीयमानसादृश्यमौपम्येनाभिहितमिति सेयमनन्वयोपमा नाम विकृतरूपोपमासु प्रपञ्चोपमाभक्तिः ॥ ४७ ॥ १ ॥

इति उपमालङ्कार निरूपणम् ॥

यदोपमानशब्दानां गौणवृत्तिव्यपाश्रयात् ।
उपमेये भवेद्वृत्तिस्तदा तद्रूपकं विदुः ॥ ४८ ॥

उभाविति । आकाशगङ्गापयसः मन्दाकिनीसलिलस्य उभौ प्रवाहौ व्योम्नि आकाशे यदि पृथक् पतेतां तदा तमालनील तमालतरुवत् नीलं कृष्णवर्णम् आमुक्ता आगृहीता लम्बितेति यावत् मुक्तालता मुक्ताहारः यत्र तथाभूतं अस्य कृष्णस्य वक्षः उरस्थलम् उपमीयते सोपमानं क्रियते । अत्र सम्भावनया उत्प्राद्यमानस्य उपमानस्य प्रतिपादनात् उत्प्राद्योपमा ॥ ४६ ॥

त्वन्मुखमिति । हे कृशोदरि ! तव मुखं तव मुखमिव, त्वत् दृशौ तव दृशाविव, ते मूर्त्तिः तव मूर्त्तिरिव, त्वं त्वमिव । अत्रैकस्यैव उपमानोपमेयत्वप्रतिपादनादनन्वयोपमा ॥ ४७ ॥

इति उपमानिरूपणम् ।

अथ रूपकं लक्षयति यदेति । यदा गौणवृत्तिव्यपाश्रयात् गौणी सादृश्यवती वृत्तिः लक्षणा तस्याः समाश्रयात् तामाश्रित्येत्यर्थः उपमानशब्दानां उपमेयपदार्थानां उपमेये वृत्तिः वर्त्तनं संक्रमणमित्यर्थः भवेत् तदा तत् रूपकं विदुः जानन्ति ॥ ४८ ॥

शब्दार्थोभयभूयिष्ठभेदात्त्रेधा तदुच्यते।
शब्दभूयिष्ठमेतेषु प्रकृतं विकृतं तथा ॥ ४९ ॥
अर्थभूयिष्ठमप्याहुः प्राधान्येऽङ्ग्यङ्गयोर्द्विधा।
द्विधैवोभयभूयिष्ठं शुद्धसङ्कीर्णभेदतः ॥ ५० ॥
चतुर्धा प्रकृतं तेषु शब्दभूयिष्ठमुच्यते।
समस्तं व्यस्तमुभयं सविशेषणमित्यपि ॥ ५१ ॥

तेषु समस्तं यथा,—

पाणिपद्मानि भूपानां सङ्कोचयितुमीशते।
त्वत्पादनखचन्द्राणामर्चिषः कुन्दनिर्मलाः।

अत्र उपमितं व्याघ्रादिभिः सामान्याप्रयोगे इति समासे पद्मानीव पद्मानि चन्द्रा इव चन्द्रा इत्यभेदोपचारेणोत्पन्नसादृश्यात् पाणीनां नखानाञ्च पद्मचन्द्रादिभिरभिधाने सामान्येवादिशब्दाप्रयोगादुपमानार्थस्तिरोभूत इति सोऽयं गौणशब्दव्यपाश्रयः समासहेतुकः समस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥ ५२ ॥

शब्देति। शब्दार्थोभयभूयिष्ठभेदात् शब्दभूयिष्ठभेदात् अर्थभूयिष्ठभेदात् शब्दार्थभूयिष्ठभेदात् तत् रूपकं त्रेधा त्रिप्रकारं उच्यते कथ्यते। एतेषु त्रिषु भेदेषु शब्दभूयिष्ठं रूपकं प्रकृतं तथा विकृतमिति द्विधा भवतीति शेषः ॥ ४९ ॥

अर्थेति। अर्थभूयिष्ठमपि रूपकं क्वचित् अङ्गिनः क्वचित् अङ्गस्य प्राधान्येन द्विधा आहुः कथयन्ति। उभयभूयिष्ठं शब्दार्थभूयिष्ठं शुद्धसङ्कीर्णभेदतः शुद्धोऽविमिश्रः सङ्कीर्णः विमिश्रः तयोर्भेदादित्यर्थः द्विधैव द्विप्रकारमेव ॥ ५० ॥

चतुर्धेति। तेषु रूपकभेदेषु मध्ये प्रकृतं शब्दभूयिष्ठं समस्तं समासघटितं व्यस्तं असमस्तं उभयं व्यस्तसमस्तं तथा सविशेषणमिति चतुर्धा उच्यते ॥ ५१ ॥

पाणीति। तव पादयोः चरणयोः ये नखा एव चन्द्राः तेषां कुन्दनिर्मलाः कुन्दकुसुमवत् स्वच्छाः अर्चिषः प्रभाः भूपानां प्रतीपनृपाणां पाणय एव पद्मानि तानि सङ्कोचयितुं सम्मीलयितुम् अञ्जलीकर्तुमिति भावः ईशते प्रभवन्ति। राजानः

व्यस्तं यथा,—

अङ्गुल्यः पल्लवान्यासन् कुसुमानि नखार्चिषः ।
बाहू लते वसन्तश्रीस्त्वं नः प्रत्यक्षचारिणी ॥

अत्रापि पूर्ववत् पल्लवकुसुमलतावसन्तश्रीशब्दानां गुणवृत्त्याश्रयेणाङ्गुलीनखार्चिर्बाहुवर्णनीयनायिकाभिः सह सामानाधिकरण्यात् सामान्येवादिशब्दाप्रयोगाच्च तिरोभूतेऽप्युपमानार्थे समासो न कृत इत्यसमस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥ ५३ ॥

समस्तव्यस्तं यथा,—

स्मितं मुखेन्दो ज्योत्स्ना ते प्रभाम्बु कुचकुम्भयोः ।
दोर्लतापल्लवे पाणौ पुष्पं सखि नखार्चिषः ॥

अत्र मुखेन्दोः स्मितमेव ज्योत्स्ना, कुचकुम्भयोः प्रभैवाम्बु, दोर्लतयोः पल्लवभूते पाणौ नखार्चिष एव पुष्पमिति समस्तानामसमस्तानाञ्च गौणशब्दानामुपमातिरस्कारेण दर्शितत्वादिदं समस्तव्यस्तरूपं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥ ५४ ॥

तव चरणोपान्ते कृताञ्जलयः तिष्ठन्तीति भावः । अत्र पाणिपद्मानीत्यादिसमासाश्रयाणां समस्तरूपम् ॥ ५२ ॥

अङ्गुल्य इति । तव अङ्गुल्यः पल्लवानि तथा नखार्चिषः नखप्रभाः कुसुमानि आसन् । बाहू लते आस्तामिति शेषः अतः त्वं नः अस्माकं प्रत्यक्षचारिणी सम्मुखसञ्चारिणी वसन्तश्रीः वसन्तलक्ष्मीः । अत्राङ्गुल्यः पल्लवानीत्यादिषु समासानाश्रयणात् व्यस्तरूपम् ॥ ५३ ॥

स्मितमिति । हे सखि ! ते तव मुखेन्दोः मुखचन्द्रस्य स्मितं मन्दहसितं ज्योत्स्ना, कुचकुम्भयोः प्रभा अम्बु जलं दोर्लतापल्लवे भुजलतापल्लवशालिनीत्यर्थः पाणौ नखार्चिषः नखमयूखाः पुष्पम् । अत्र मुखेन्दोरिति समस्तं स्मितं ज्योत्स्नेति व्यस्तमिति समस्तव्यस्तम् ॥५४॥

सविशेषणं यथा,—

हरिपादः शिरोलग्नजह्नुकन्याजलांशुकः।
जयत्यसुरनिःशङ्कसुरानन्दोत्सवध्वजः॥

अत्र यथोक्तविशेषणविशिष्टो यो हरिपादो, यश्च हरिहतासुरेभ्यो निःशङ्कानां सुराणामानन्दोत्सवे ध्वजः तयोः सविशेषणयोरेव प्रतीयमानसादृश्ययोः परस्परमुपमानोपमेयभाव इति सविशेषणं नाम प्रकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः। तदेतच्चतुष्टयमपि प्रकृतसमासादिशब्दैर्निबद्धमिति प्रकृतमुच्यते॥५५

चतुरो विकृतस्यापि प्रभेदान् प्रतिजानते।
परम्पराथ रशना माला रूपकरूपकम्॥ ५६॥

तेषु परम्परा यथा,—

ववसाअ रइपओसो रोसगइन्ददिढसिंखलापडिबन्धो।
कहं कहं बि दासरहिणो जअकेसरिपञ्जरो गओ घणसमओ॥

अत्र दाशरथिसम्बन्धिनो व्यवसायस्य रविणा रोषस्य गजेन्द्रेण जयस्य केशरिणा सहोपमानोपमेयभावकल्पनया यदेकं रूप-

---

हरीति। शिरसि अग्रे लग्नं संसक्तं जह्नुकन्या गङ्गा तस्य जलमेव अंशुकं वसनं यस्य तथाभूतः हरिपादः हरे विष्णोः चरणः असुरेभ्यः हरिपरिभूतेभ्यः इति भावः निःशङ्काः निर्भयाः ये सुराः देवाः तेषां आनन्देन यः उत्सवः अभ्युदयविशेषः तस्य ध्वजः सन् जयति सर्वोत्कर्षेण वर्त्तते। अत्रासुरेत्यादि विशेषणात् सविशेषणं प्रकृतं शब्दभूयिष्ठम्॥ ५५॥

चतुर इति। विकृतस्यापि रूपकस्य चतुरः प्रभेदान् प्रतिजानते प्रतिज्ञया निर्दिशन्ति कवय इति शेषः। परम्परा, रशना, माला, रूपकरूपकम्॥ ५६॥

व्यवसायेति। व्यवसाय रविप्रदोषी रोषगजेन्द्रदृढशृङ्खलाप्रतिबन्धः। कथं कथमपि दाशरथेर्जयकेशरिपञ्जरो गतो घनसमयः॥ सं०

व्यवसायेति। घनसमयः वर्षाकालः दाशरथेः रामस्य सीतावियोगिन इति

णम् अथैतत्सम्बन्धितया प्रदोषशृङ्खलाप्रतिबन्धपञ्जराणां द्वितीयं ततः त्रयाणामपि घनसमयेन तृतीयं तेनेयं रूपकपरम्परा नाम विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥५७॥

रशना यथा,—

किशलयकरैर्लतानां करकमलैर्मृगदृशां जगज्जयति ।
नलिनीनां कमलमुखैर्मुखेन्दुभिर्योषितां मदनः ॥

अत्र किशलयकरैः करकमलैः कमलमुखैर्मुखेन्दुभिरिति रशनाक्रमेण शब्दानां सन्दर्भ उपलभ्यमानस्तदर्थानां मनोभुवो जगद्विजये लतादिसम्बन्धात् करणभावमनुमापयतीति रशना नामैतद् विकृतरूपकेषु शब्दभूयिष्ठरूपकभेदः ॥५८॥

माला यथा,—

स्वामी दुर्नयवारणव्यतिकरे शौर्योपदेशे गुरुः
विश्रम्भे हृदयं नियोगसमये दासो भये चाश्रयः ।

भावः व्यवसायः उद्योगः शत्रुजयार्थमिति भावः स एव रविः सूर्यः तस्य प्रदोषः रजनीमुखं यथा रजनीमुखे रवेरस्तगमनं तथा वर्षाकाले शत्रुजयोद्योगविरतिरिति भावः । रोषः क्रोधः रावणं प्रतीति भावः स एव गजेन्द्रः तस्य दृढः कठिनः दुर्भेद्य इति भावः शृङ्खलाबन्धः शृङ्खलया विरोधः इत्यर्थः गजेन्द्रो यथा दृढशृङ्खलया निबध्यते तथा क्रोधोऽपि नियन्त्रित इति भावः । तथा जय एव केशरी सिंहः तस्य पञ्जरः निरोधगृहमित्यर्थः यथा केशरी पञ्जरे नियम्यते तथा शत्रुजयोऽपि नियन्त्रित इति भावः कथं कथमपि अतिकष्टेनेत्यर्थः गतः अतिक्रान्तः ॥ ५७ ॥

किशलयेति । मदनः कामः लतानां किशलया एव कराः तैः मृगदृशां मृगाक्षीणां करा एव कमलानि तैः नलिनीनां कमलान्येव मुखानि तैः तथा योषितां नारीणां मुखान्येव इन्दवश्चन्द्राः तैः जगत् जयति ॥ ५८ ॥

स्वामीति । कर्णः मम को वा न ? अपि तु सर्व एव सर्वाभ्युदयहेतुरिति भावः तथाहि दुर्नयः दुर्नीतिरेव वारणः हस्ती तस्य व्यतिकरे उद्रेके इत्यर्थः स्वामी

दाता सप्तसमुद्रसीमरशनादामाङ्किताया: क्षिते:
सर्वाकारमही स्वयंवरसुहृत् को वा न कर्णो मम ॥

अत्र स्वाम्यादीनां मालोपमादिक्रमेण निरूपितत्वात् मालारूपकं नाम विकृतरूपकेषु शब्दभूयिष्ठरूपकभेद: ॥५९॥

रूपकरूपकं यथा,—

मुखपङ्कजरङ्गेऽस्मिन् भ्रूलता नर्त्तकी तव।
लीलानाट्यामृतं दृष्टी सखि! यूनां निषिञ्चति ॥

अत्र मुखमेव पङ्कजं तदेव रङ्ग: भ्रूरेव लता सैव नर्त्तकी लीलैव नाट्यं तदेवामृतमिति रूपितानामपि रूपणेन समासेन रूपकरूपकं नामायं विकृतरूपकेषु शब्दभूयिष्ठरूपकभेद:। तदेतच्चतुष्टयमपि परम्परादिभिर्विकृतसमासादिशब्दै र्निबद्धमिति विकृतमुच्यते ॥ ६० ॥

समस्तञ्चासमस्तञ्च युक्तञ्चायुक्तमेव च।
चतुर्धाङ्गिप्रधानं स्यादर्थभूयिष्ठरूपकम् ॥ ६१ ॥

नियन्ता प्रभुरित्यर्थ: दुर्नयमार्गात् निवारक इति भाव:। और्य्यस्य वीरभावस्य उपदेशे शिक्षायां गुरु: उपदेष्टा। विश्रम्भे विश्वासे हृदयं स्वान्तम्। नियोगसमये आज्ञायामित्यर्थ: दास: किङ्कर:। भये उपस्थिते इति शेष: आश्रय: सहाय: सप्तसमुद्रा एव सीमान: ते एव रशनादामानि काञ्चीकलापा: तै: अङ्किताया: अलङ्कृताया: क्षिते: सप्तार्णववेष्टिताया: पृथिव्या इत्यर्थ: दाता जयेनेति भाव: तथा सर्वाकारमही सर्वप्रकारा पृथ्वी तस्या: स्वयंवरे सुहृत् सखा। सर्वा पृथ्वी मां यत् स्वयं वृणोतिस्म तव कर्ण एव हेतुरिति भाव.। दुर्योधनस्योक्तिरियम् ॥ ५९ ॥

मुखेति। हे सखि! तव अस्मिन् मुखमेव पङ्कज तदेव रङ्ग: नृत्यक्षेत्रं तस्मिन् भ्रूरेव लता सैव नर्त्तकी लीला एव नाट्यं तदेव अमृतं यूनां तरुणाना दृष्टी निषिञ्चति वर्षति ॥ ६० ॥

समस्तेति। अर्थभूयिष्ठरूपकम् अङ्गि प्रधानं प्राधान्येन अवयविघटितमित्यर्थ: समस्तम् असमस्तं युक्तम् अयुक्तञ्चेति चतुर्धा स्यात् ॥ ६१ ॥

तेषु समस्तं यथा,—

ताम्राङ्गुलिदलश्रेणिनखदीधितिकेशरम् ।
ध्रियते मूर्ध्नि भूपालैर्भवच्चरणपङ्कजम् ॥

अत्र समस्तोपमायामिव पादाख्यः पङ्कजाख्यश्चावयवी परस्परमुपमानोपमेयभूतः प्रतीयमानाभिधीयमानसादृश्यैरङ्गुलिश्रेणिनखदीधितिभिर्दलश्रेणिकेसरैश्च सह सामस्त्येन रूपितस्तद्योग्यस्थानविन्यासेन चार्थस्य प्राधान्यमभिहितमिति समस्तं नाम रूपकमिदमङ्गिप्रधानरूपकेषु अर्थभूयिष्ठरूपकभेदः। न चैतद्वाच्यम्। पाणिपद्मानि भूपानामित्यादेरुदाहरणादिदं न भिद्यते इति। तत्र हि। वाक्ये नखार्चिषां क्रियासमावेशेन प्राधान्यमवगम्यते न नखचन्द्राणां ततश्च न रूपकम्। पाणिपद्मानीत्यस्य तु यद्यपि सङ्कोचक्रियायामस्ति समावेशस्तथापि न तानि वर्णनीयत्वेन उपन्यस्तानि। अपि तु जिगीषुभाववर्णनाङ्गतया। अतः समावेशमात्रभणनान्न तत्र पाणिपद्मानां नापि नखचन्द्राणामर्थप्राधान्यमपि तु शब्दप्राधान्यमेव। इह तु चरणपङ्कजताम्राङ्गुलिदलश्रेण्यादिविशेषणविशिष्टस्य भूपालमौलिविनिवेशनेन प्राधान्यं प्रतीयत इति उभयमपि निरवद्यम् ॥ ६२ ॥

असमस्तं यथा,—

अकस्मादेव ते चण्डि ! स्फुरिताधरपल्लवम् ।
मुखं मुक्तारुचो धत्ते घर्माम्भःकणमञ्जरीः ॥

ताम्रेति। ताम्रा रक्ताः अङ्गुलय एव दलश्रेणयः यस्य तथोक्तं नखानां दीधितय एव केशरा यस्य तथाभूतं भवतः चरण एव पङ्कजं पद्मं भूपालैः राजभिः प्रतीपैरिति भावः मूर्ध्नि ध्रियते गृह्यते ॥ ६२ ॥

अकस्मादिति। हे चण्डि ! कोपने ! ते तव मुखम् अकस्मादेव सहसैव

अत्राप्येकदेशोपमाक्रमेण अधरपल्लवस्वेदाम्बुकणमञ्जरीणां सहजाहार्य्यावयवानामभिधानादुपमानावयविनश्चानभिधानादिदमसमस्तं नाम रूपकमङ्गिप्रधानेषु अर्थभूयिष्ठरूपकभेदः। अत्रापि च मुख्यवस्तुनः स्फुरिताधरपल्लवमिति विशेषणविशिष्टस्य घर्माम्भःकणमञ्जरीधारणक्रियासमावेशः प्राधान्यं ख्यापयति ॥ ६३ ॥

युक्तं यथा,—

स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गमिदम् मुखम्।
न कस्य नन्दनं सुभ्रु! सुरभिश्वसितानिलम् ॥

अत्र स्मितपुष्पोज्ज्वलं लोलनेत्रभृङ्गं सुरभिश्वसितानिलं ते मुखं न कस्य नन्दनमिति पुष्पभृङ्गादीनां परस्परं युक्तुपपत्तेर्युक्तं नामायमङ्गाङ्गिप्रधानरूपकेषु अर्थभूयिष्ठो रूपकभेदः। अत्र यद्यपि नन्दनमिव नन्दनमिति गौणवृत्तिव्यपाश्रयः शब्द एव समस्तविशेषणैः परिष्क्रियते तथापि नन्दयतीति कृदभिहितक्रियासमावेशे मुखाख्यस्यैव वस्तुनः प्राधान्यमवगम्यते। तस्य त्वपक्रियत इत्यर्थप्रधानमेवैतत् ॥ ६४ ॥

अयुक्तं यथा,—

इदमार्द्रस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम्।
जगन्नेत्रेन्दुरस्माकं कथं तापाय कल्पते ॥

अत्र ज्योत्स्नोत्पलयोरयोगाज्जगन्नेत्रेन्दोश्च मुखस्य सन्तापका-

---

स्फुरित, अधर एव पल्लवः यस्य तादृशं सत् मुक्तारुचः मौक्तिकप्रभाः घर्माम्भसां कणाः बिन्दव एव मञ्जर्यः ताः धत्ते धारयति ॥ ६३ ॥

स्मितेति। हे सुभ्रु! इदं मुखं स्मितमेव पुष्पं तेन उज्ज्वलं लोले चञ्चले नेत्रे एव भृङ्गौ यत्र तथाभूतं सुरभिः श्वसितानिलः निश्वासवायुः यस्मिन् तादृशम् अतएव कस्य जनस्य नन्दयतीति नन्दनम् आनन्दजननं न? अपि तु सर्वस्यैव-

रणमिदमयुक्तं नामाङ्गिप्रधानरूपकभेदेषु अर्थभूयिष्ठरूपकभेदः। अत्रापि पूर्ववन्मुखाख्यवस्तुनो विशेषणैः परिष्करणमिति तस्यैव प्राधान्यमवगम्यते ॥ ६५ ॥

भेदानङ्गप्रधानस्य चतुरोऽवयवाश्रयान्।
सहजाहार्य्यतद्योगतद्वैषम्यैः प्रचक्षते ॥ ६६ ॥

तेषु सहजावयवं यथा,—

पप्फुरिअउट्ठदलअं तक्खणविगलिअरुहिरमहुविच्छडम्।
उक्खडिअकण्ठणालं पडिअं फुडदसणकेसरं मुहकमलम् ॥

अत्र ओष्ठादीनां दलादीनाञ्च मुखाम्भोजावयवानां स्फुरितविगलितोत्खण्डितस्फुटविशेषणविशिष्टानां परस्परमुपमानोपमेयभावरूपितानां मुखपक्षे कमलपक्षे च सहजत्वं गम्यत इति सहजावयवो नामायमङ्गप्रधानरूपकेषु अर्थभूयिष्ठरूपकभेदः। नैतद्वाच्यम्। ताम्राङ्गुलिदलश्रेणीत्यादेः अर्थ-प्रधानभेदादिदं न भिद्यते इति। तत्र हि भूपालमौलिधारणक्रियासमावेशेनाव-

---

त्यर्थः। इदमिति आर्द्रं स्मितमेव ज्योत्स्ना चन्द्रिका यस्य यत्र वा तथोक्तं स्निग्धं स्नेहवर्षिणी प्रणयवर्षिणी इति यावत् नेत्रे एव उत्पले यत्र तथाभूतं जगतां नेत्राणि नयनानि तेषां इन्दुश्चन्द्रः अतिप्रीतिकरत्वेन सन्तापहरमिति भावः। इदं मुखं तवेति शेषः अस्माकं तापाय कथं कल्पते? कथं ताप ददातीत्यर्थः। विरहिण उक्तिरियम् ॥ ६४ ॥ ६५॥

भेदानिति। अङ्गप्रधानस्य रूपकस्य अवयवाश्रयान् अङ्गाश्रयान् चतुरः भेदान् सहजाहार्य्यतद्योगतद्वैषम्यैः सहजभावेन आहार्य्यभावेन तदुभयोर्योगेन तयोर्वैषम्येण च प्रचक्षते कथयन्ति कवय इति शेषः ॥ ६६ ॥

प्रस्फुरिता इति। प्रस्फुरितोष्ठदलं तत्क्षणविगलितरुधिरमधुविच्छायम्।
उत्खण्डितकण्ठनालं पतितं स्फुटदशनकेशरं मुखकमलम् ॥

प्रस्फुरितेति। प्रस्फुरितः ओष्ठ एव दलं यस्य तथोक्तं तस्मिन् क्षणे विगलितं विस्रुतं रुधिरमेव मधु यस्मात् तथोक्तं उत्खण्डितः उत्कृत्तः कण्ठ एव नालो यस्य

यविनः प्राधान्यं विवक्षितमिह तु पतनक्रियायामवयवानाम्। अतएव ते तत्र स्फुरितादिविशेषणैर्विशिष्यन्ते ॥ ६७ ॥

आहार्य्यावयवं यथा,—

तो कुम्भअण्णपडिवअणदण्डपरिघट्टिआमरिसघोरविसो।
गलिअंसुअणिम्मोओ जाओ भीसणअरो दसाणणभुअओ ॥

अत्र कुम्भकर्णप्रतिवचनममर्षोऽशुकमिति दशाननपक्षे दण्डो घोरविषं निर्मोक इति भुजगपक्षे ये अवयवाः तेषाम् आहार्य्यत्वात् इदमाहार्य्यावयवं नाम रूपकमङ्गप्रधानरूपकेषु अर्थभूयिष्ठरूपकभेदः। अत्रापि कुम्भकर्णसम्बन्धपरिघट्टितगलितविशिष्टानाम् अवयवानामेव दशाननभुजगभीषणतरीकरणक्रियायां प्राधान्यम् अवगम्यते ॥ ६८ ॥

उभयावयवं यथा,—

यस्या बीजमहङ्कृतिर्गुरुतरो मूलं ममेति ग्रहो
नित्यत्वस्मृतिरङ्कुरः सुतसुहृद्भृत्यादयः पल्लवाः।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे त्वच्चरणार्हणापरशुना तृष्णालता लूयताम् ॥

तादृशं स्फुटा दशना एव केशरा यस्य तादृशं मुखमेव कमलं विच्छायं विगतशोभं यथा तथा पतितम् ॥ ६७ ॥

स कुम्भकर्णप्रतिवचनदण्डपरिघट्टितामर्षघोरविषः।
गलितांशुकनिर्मोको जातो भीषणतरो दशाननभुजगः ॥

स इति। कुम्भकर्णस्य प्रतिवचनं विरुद्धं प्रत्युत्तरं तदेव दण्डः तेन परिघट्टितः जनितः अमर्षः क्रोध एव घोरं विषं यस्य तथाभूतः गलितं क्रोधजनितकम्पेन स्खलितं अंशुकं वसनमुत्तरीयमिति भावः तदेव निर्मोकः कञ्चुकः यस्य तथोक्तः दशाननः रावण एव भुजगः आशीविषः भीषणतरः अतिभयङ्करः जातः ॥ ६८ ॥

यस्या इति। हे जगदीश इति अध्याहार्य्यम्। यस्याः तृष्णालतायाः बीजं मूलकारणं अहङ्कृतिः अहङ्कारः, ममेति गुरुतरः अतिमहान् ग्रहः पुत्रकलत्रादिसम्पद् मम इति ज्ञानं मूलं कन्दः हेतुरिति भावः नित्यत्वस्मृतिः अहम् अविनश्वर

अत्र बीजं मूलम् अङ्कुरः पुष्पं फलमिति लतापक्षे सहजाः तृष्णापक्षे पुनरहङ्कृत्यादयः आहार्यावयवा इति तदिदं सहजाहार्याणाम् अवयवानां परस्परम् उपमानोपमेयभावरूपणेन उभयावयवं नाम रूपकमिदम् अङ्गप्रधानरूपकेषु अर्थभूयिष्ठरूपकभेदः। अत्रापि च अहङ्कारममताधीव्यस्मरणसुतादिदारपरिग्रहपराभवदुर्गतीनाम् अवयवानामेव बीजादिरूपेण रूपितानां भगवदाराधनकुठारेण तृष्णालता लूयतामिति प्रार्थनक्रियया समावेशेन प्राधान्यम् अवगम्यते ॥ ६९ ॥

विषमावयवं यथा,—

मदरक्तकपोलेन मन्मथस्त्वन्मुखेन्दुना।
नर्त्तितभ्रूलतेनालं मर्दितुं भुवनत्रयम् ॥

अत्र इन्दुना मुखावयवो रूपितो भ्रुवौ च तदवयवौ लतावयविभ्यां मदरक्तौ तु कपोलौ न केनापीति सर्वतो वैषम्याद्विषमावयवं नाम रूपकम् इदम् अङ्गप्रधानरूपकेषु अर्थभूयिष्ठरूपकभेदः। अत्रापि मदरक्तनर्त्तितयोः कपोलभ्रुवोरेव मन्मथस्य जगत्त्रितयमर्दनक्रियायां प्राधान्यं साधकतमत्वं गम्यते ॥ ७० ॥

आधारवन्निराधारं केवलं व्यतिरेकि च।
इति शब्दार्थभूयिष्ठं शुद्धमाहुश्चतुर्विधम् ॥ ७१ ॥

इत्येवं ज्ञानमित्यर्थः अङ्कुरः प्ररोहः। सुतसुहृद्भृत्यादयः पल्लवाः किशलयाः। दाराणां पत्न्या इत्यर्थः परिग्रहः ग्रहणं स्वत्वः काण्डः, परिभवः क्लेशः सांसारिक इति भावः पुष्पम्। दुर्गतिर्दुरवस्था अधोगतिरिति यावत् फलं तव चरणयोः अर्हणा अर्चना एव परशुः कुठारः तेन त्वच्चरणार्चनविघ्नकारिणीति भावः स मम तृष्णा एव लता लूयतां छिद्यताम् ॥ ६९ ॥

मदेति। मन्मथः कामः मदेन मद्यपानेन रक्तौ कपोलौ यस्य तेन तथा नर्त्तिते भ्रुवौ एव लते यत्र तथाभूतेन तव मुखमेव इन्दुः चन्द्रः तेन भुवनत्रयं मर्दितुं विलोडितुमित्यर्थः अलं समर्थः अलं व्यर्थसमर्थयोरित्यमरः ॥ ७० ॥

तेषु आधारवद् यथा—

सोहइ विसुद्धकिरणो गअणसमुद्दअणिवेलालग्गो ।
तारामोत्तापअरो फुडविहडिअमेहसिप्पिसमुहविमुक्को ॥

अत्र समुद्रत्वेन रूपितं गगनमाधारं परिकल्प्य रजनिमेघतारकौघानां वेलाशुक्तिमुक्ताफलप्रकराणां च प्रतीयमानाभिधीयमानसादृश्यानां शब्दप्राधान्यताऽर्थप्राधान्यतश्च रूपणं कृतमिति आधारवन्नाम रूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः ॥ ७२ ॥

निराधारं यथा,—

वणराइकेसहत्था कुसुमाउह सुरहि सञ्चरन्तधअवडा ।
ससिअरमुहुत्तमेहा तमपडिहत्था विसेत्ति धुमुप्पीडा ॥

अत्र धूमोत्पीड़ानां वनराजिकेशहस्तत्वेन कुसुमायुधसुरभिसञ्चरद्ध्वजपटत्वेन शशिकरमुहूर्त्तमेघत्वेन तमःप्रतिहस्तत्वेन च रूपितानां निराधाराणामेव शब्दप्राधान्यम् अर्थप्राधान्यञ्च

आधारवदिति। शुद्धम् अविमिश्रं शब्दार्थभूयिष्ठं रूपकम् आधारवत् साधारमित्यर्थः निराधारम् आधाररहितं केवलं व्यतिरेकि व्यतिरेकविशिष्टञ्च वैशिष्ट्यवदित्यर्थः इति चतुर्विधम् आहुः ॥ ७१ ॥

शोभते विशुद्धकिरणो गगनसमुद्रे रजनिवेलालग्नः ।
तारामौक्तिकप्रसरः स्फुटविघटितमेघशुक्तिसमूहविमुक्तः ॥ सं

शोभते इति। गगनमेव समुद्रः तस्मिन् विशुद्धकिरणः उज्ज्वलकिरणः रजनिरेव वेला जलभागः तटभागो वा वेला स्यात्तीरनीरयोरित्यमरः अत्र लग्नः संसक्तः स्फुटं स्पष्टं यथा तथा विघटिता विदलिता मेघा एव शुक्तिसमूहाः तेभ्यः विमुक्तः मेघावरणशून्य इति भावः तारा नक्षत्राण्येव मौक्तिकानि मुक्ताफलानि तेषां निकरः समूहः शोभते राजते ॥ ७२ ॥

वनराजिकेशहस्ताः कुसुमायुधसुरभिसञ्चरद्ध्वजपटाः ।
शशिकरमुहूर्त्तमेघा तमःप्रतिहस्ता विज्ञापयन्ति धूमोत्पीडाः ॥ सं

वनेति। वनराजेः केशहस्ताः हस्तस्थितकेशा इत्यर्थः कुसुमायुधस्य कामस्य

अवधार्य्यत इति निराधारं नाम रूपकमिदं शुद्धरूपकेषु शब्दार्थभूयिष्ठरूपकभेदः ॥ ७३ ॥

केवलं यथा,—

वेल्लितभ्रु गलद्घर्मजलमालोहितेक्षणम् ।
विवृणोति मदावस्थामिदं वदनपङ्कजम् ॥

अत्र अवयविन एव केवलस्य वदनपङ्कजमिवेति रूपणादस्य शब्दप्राधान्यं वेल्लितभ्रूप्रभृतिविशेषणोपादानाच्च अर्थप्राधान्यमेव लक्ष्यते तेन केवलं नाम रूपकमिदं शुद्धरूपकेषु उभयभूयिष्ठरूपकभेदः ॥७४॥

व्यतिरेकवद् यथा,—

अनाघ्रातं पुष्पं किसलयमलूनं कररुहैः
अनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघम्
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः ॥

अत्र पुष्पकिसलयरत्नमधुपुण्यफलानाम् अनाघ्रातमित्यादिविशेषणापादितव्यतिरेकाणां प्रतीयमानसादृश्येन शकुन्तला-

---

सुरभयः सुगन्धाः सञ्चरन्तः प्रसरन्तः ध्वजपटाः ध्वजाग्रनिहितवसनानि शशिनश्चन्द्रस्य कराः किरणाः तेषु मुहूर्त्तमेघाः अल्पक्षणावरकत्वादिति भाव तमसः अन्धकारस्य प्रतिहस्ताः प्रतिरूपा इत्यर्थः धूमोत्पीडाः धूमोद्गारा: विज्ञापयन्ति कार्य्यादिकमिति शेषः ॥ ७३ ॥

वेल्लितेति । वेल्लिते सञ्चालिते भ्रुवौ यत्र तत् गलन्ति घर्म्मजलानि स्वेदसलिलानि यस्मात् तथोक्तम् आलोहिते आरक्ते ईक्षणे नेत्रे यत्र तथाविधम् इदं वदनमेव पङ्कज पद्मं मदावस्था मद्यपानजनितां दशां विवृणोति व्यक्तीकरोति ॥ ७४ ॥

अनाघ्रातमिति । विधिः विधाता दैवं वा इह जगति कं जनं अनाघ्रातं केनापि नाघ्रातपूर्वमित्यर्थः पुष्पं कररुहैः नखैः अलूनम् अखण्डितं किशलयं नवपल्लवम् अनाविद्धम् अच्छिद्रीकृतं रत्नम् अनास्वादितः रसो यस्य तादृशं केनापि प्राक् नास्वादितरसमित्यर्थः नवम् अपूर्वं मधु अखण्डं पूर्णं पुण्यानां सुकृतानां फल-

रूपेण रूपणादर्थतः शब्दतश्च प्राधान्यमवधार्य्यत इति व्यतिरेकवन्नामरूपकमिदं शुद्धरूपकेषु उभयभूयिष्ठरूपकभेदः ॥ ७५ ॥

अथ सङ्कीर्णभेदानां चतुष्टयमिहोच्यते।

स्यात् सावयवसङ्कीर्णं तथाऽनवयवाह्वयम् ॥ ७६ ॥

तथैवोभयसङ्कीर्णं श्लेषोपहितमित्यपि।

सेषा रूपकभेदानां विंशतिश्चतुरुत्तरा ॥ ७७ ॥

तेषु सावयवसङ्कीर्णं यथा,—

रइअरकेसरणिवहं सोहइ धवलब्भदलसहस्सपरिगअम्।

महुमददंसणजोग्गं पिदामहुप्पत्तिपङ्कअं व्व णहअलम् ॥

अत्र पितामहोत्पत्तिपङ्कजमिव नभस्तलं शोभते इत्युपमानोपमेयभावेन अवयविनोरभेदस्य अविवक्षायामुपमैव न रूपकम्। रविकरधवलाभ्रदलसहस्रयोः केशरनिकरदलसहस्रयोश्च प्रतीयमानाभिधीयमानसादृश्ययोश्च सहजाहार्य्यावयवभूतयोः अभेदोपचारेण रूपणमिति सावयवरूपेण उपमायाः सङ्कीर्ण-

---

मिव च अनघं निर्दोषं सर्वावयवानवद्यमित्यर्थः तत् रूपं भोक्तारं भोगशीलं अत्र शीलार्थतृचोयोगे कर्म्मणि षष्ठी निषेधः। ससुपस्थास्यति ससेविष्यते इति न जाने। शकुन्तलायाः प्रथमदर्शने राज्ञो दुष्मन्तस्य वितर्कः। अत्र पुष्पादिषु रूपितेषु अनाघ्रातत्वादिक वैशिष्ट्यमिति व्यतिरेकवत्। अखण्डं पुण्यानां फलमिव इति इव शब्दप्रयोगात् उत्प्रेक्षा चेति द्वयोः संसृष्टिरिति विभाव्यम् ॥ ७५ ॥

अथेति। अथानन्तर संकीर्णभेदानां चतुष्टयम् इह अस्मिन् प्रकरणे उच्यते। एकं सावयवसङ्कीर्णं द्वितीय अनवयवाह्वयं तृतीयम् उभयसङ्कीर्णं चतुर्थं श्लेषोपहितं स्यात्। सा एषा रूपकभेदानां चतुरुत्तरा विंशतिः चतुर्विंशतिप्रकारं रूपकमित्यर्थः ॥ ७६ ॥

रविकरकेसरनिवहं शोभते धवलाभ्रदलसहस्रपरिगतम्।

मधुमददर्शनयोग्य पितामहोत्पत्तिपङ्कजमिव नभस्तलम् ॥ सं

रवीति। रवेः सूर्य्यस्य कराः किरणा एव केसराः किञ्जल्काः तेषां निवहः समूहः यत्र तत् धवलानि शुभ्राणि अभ्राणि मेघा एव दलानि तेषां सहस्रैः

द्वयोर्यत्रोक्तिचातुर्य्यादौपम्यार्थोऽवगम्यते ।
उपमारूपकान्यत्वे साम्यमित्यामनन्ति तत् ॥ ८२ ॥
तदानन्त्येन भेदानामसङ्ख्यं तस्य तूक्तयः ।
दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्तिरेव च ॥ ८३ ॥
तत्रेवादेः प्रयोगेण दृष्टान्तोक्तिं प्रचक्षते ।
इवादेरप्रयोगेण प्रपञ्चोक्तिं मनीषिणः ॥ ८४ ॥
वस्तु किञ्चिदुपन्यस्य न्यसनात्तत्सधर्मणः ।
साम्यप्रतीतिरस्तीति प्रतिवस्तूक्तिरुच्यते ॥ ८५ ॥
तत्र क्रियाजातिगुणद्रव्ययोगादिहेतुके ।
साम्ये पूर्वादिभेदेन दृष्टान्तोक्तिर्विधीयते ॥ ८६ ॥

न्तर गच्छन्निति ध्वनिः। जलदसमयः घनागमः नायकश्चेति ध्वनिः। तेन वितीर्णं दत्तं पीनः स्थूलः पयोधरः मेघः स्तनश्चेति ध्वनिः तत्र लग्नं संसक्तम् इन्द्रधनुः सौभाग्यस्य प्रियवाल्लभ्यस्य प्रथमं मुख्यं चिह्नं लक्षणं सरसम् आर्द्रं नखक्षतपदमिव नखप्रहारचिह्नमिव प्रम्लायति प्रकर्षेण म्लानिं विलयमिति भावः गच्छतीत्यर्थः। शरद्वर्णनमिदम् ॥ ८१ ॥ इति रूपकालङ्कारनिरूपणम्।

साम्यं लक्षयति द्वयोरिति। यत्र उक्तिचातुर्य्यात् वाग्भङ्ग्या द्वयोः प्रस्तुताप्रस्तुतयोः औपम्यार्थः सादृश्यार्थः अवगम्यते प्रतीयते तत् उपमारूपकयोः अन्यत्वे विभिन्नत्वे सति तत्र न उपमा न च रूपक सङ्गच्छते इत्येवं स्थिते सतीत्यर्थः साम्यं नाम अलङ्कारम् आमनन्ति कथयन्ति बुधा इति शेषः ॥ ८२ ॥

तदिति। तत् साम्यं भेदानाम् आनन्त्येन अशेषत्वेन असङ्ख्य सङ्ख्यया वक्तुम् अशक्यम्। तु किन्तु तस्य उक्तयः नामानि दृष्टान्तोक्तिः प्रपञ्चोक्तिः प्रतिवस्तूक्तिरिति त्रीणि इति शेषः ॥ ८३ ॥

तत्रेति। तत्र दृष्टान्तोक्तिप्रभृतिषु मध्ये इवादेः द्योतकस्येति भावः प्रयोगेण दृष्टान्तोक्तिं तथा इवादेः अप्रयोगेण अनुपादानेन प्रपञ्चोक्ति मनीषिणः विद्वांसः प्रचक्षते कथयन्ति ॥ ८४ ॥

वस्त्विति। किञ्चित् किमपि वस्तु उपन्यस्य उक्त्वा तत्सधर्मणः तत्समानधर्मस्य न्यसनात् योजनात् साम्यप्रतीतिरस्ति यत्रेति शेषः इत्येषा प्रतिवस्तूक्तिः उच्यते ॥ ८५ ॥

सा क्रियायोगनिमित्तसाम्या दृष्टान्तोक्तिः सामान्यतः पूर्वा यथा,—

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत्॥

अत्र दृष्टान्तदार्ष्टान्तिकयोरनाविष्टलिङ्गत्वादवश्याभिधेयत्वाच्च स्थित इत्यादिषु न लिङ्गभेददोषः। अभिधीयमानस्यानादिक्रियायोगजनितं साम्यं समस्तमूर्त्तिमत् साधारणञ्च पूर्वमेव छायादृष्टान्तः सेयं क्रियायोगनिमित्तसाम्या सामान्यतः पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः॥ ८७॥

सा एव क्रियागुणयोगनिमित्ता विशेषतः पूर्वा यथा,—

सअलुज्जोइअवसुहे समत्थजीअलोअवित्थरन्तपआवे।
ठाइ ण चिरं रविंव्व विहाणपडिदावि मइलदा सप्पुरिसे॥

अत्र जगदुद्द्योतनक्रियाप्रतापगुणयोगहेतुसाम्यमसाधारणञ्च सूर्य्यदृष्टान्त इति विशेषतः क्रियागुणयोगनिमित्तेयं पूर्वा नाम दृष्टान्तोक्तिः साम्यभेदः॥८८॥

तत्रेति। तत्र तन्मध्ये क्रिया गत्यादयः जातिः गोत्वादिका गुणाः शुक्लादयः द्रव्याणि एकव्यक्तिवाचकानि तेषां योगादिः हेतुः कारणं यस्य तथाभूते साम्य पूर्वादिभेदेन दृष्टान्तोक्तिः विधीयते निर्दिश्यते॥ ८६॥

स्थितः इति। भूपतिः दिलीपः स्थितः दण्डायमानः सन् स्थितां दण्डायमानाम् आसनस्य उपवेशनस्य बन्धेन रचनेन धीरः निश्चलः आसीनः सन्नित्यर्थः निषेदुषी निषण्णा कृतासनामित्यर्थः जलाभिलाषी पानीयार्थी सन् जलमाददाना पिबन्तीं ता नन्दिनीम् अतएव छायेव प्रतिबिम्बमिव अन्वगच्छत् अनुचचार। अत्र क्रियायोगसाम्यम्॥ ८७॥

सकलोद्योतितवसुधे समस्तजीवलोकविसृण्वत्प्रभावे।
तिष्ठति न चिरं रवाविव विधानपतितापि मलिनता सत्पुरुषे॥ स

सकलेति। सकलं समग्रं यथा तथा उद्योतिता उद्भासिता वसुधा पृथिवी येन तथाभूते समस्तेषु जीवलोकेषु विसृण्वन् विस्तारं गच्छन् प्रभावो यस्य तादृशे

द्रव्ययोगनिमित्तसाम्येव सामान्यत उत्तरा यथा,

उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।
मलीमससुखा वर्त्तिः प्रदीपशिखया यथा,

अत्र द्रव्ययोगकृतं साम्यं सामान्यरूपश्च प्रदीपः पश्चात् प्रदीपशिखावर्त्तिर्दृष्टान्तः सैयं यथोक्तरूपोत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः ॥ ९३ ॥

सैव क्रियागुणयोगनिमित्तसाम्या विशेषतो यथा,

तो ताणं हदच्छाअं णिच्चललोअणसिहं पउत्थपदावं ।
आलेक्खपदीवाणं व्व णिअं पअदिचटुलत्तणं पि विअलिअं ।

अत्र हतच्छायमित्यादीनामन्तर्गतगुणत्वेन क्रियाविशेषणत्वात् क्रियागुणयोगनिमित्तं निजं प्रकृतिचटुलत्वमपि विगलितमिति गुणयोगनिमित्तं च साम्यं सामान्यविशेषरूपश्चालेख्यप्रदीपदृष्टान्त इति क्रियागुणयोगनिमित्तेयं विशेषत उत्तरा नाम दृष्टान्तोक्तिः साम्यभेदः। अथ दृष्टान्तोक्तेर्दृष्टान्तालङ्कारस्य च को विशेषः। उच्यते लौकिकपरीक्षकाणां यस्मिन् अर्थे बुद्धिसाम्य स दृष्टान्त इत्यर्थं प्रति तु न कश्चिद्विशेषः। उक्तिं प्रति

उज्ज्वलेति। उज्ज्वल आलोकः कान्तिः आभा च यस्याः तथाभूतया त्वया त्यक्ता विरहिता नगरीति शेषः। प्रदीपशिखया त्यक्ता मलीमससुखा स्निग्धा वर्त्तिर्यथा दग्धेव न राजते न शोभते ॥ ९३ ॥

ततस्तेषा हतच्छायं निश्चललोचनशिखं प्रवसत्प्रतापम् ।
आलेख्यप्रदीपानामिव निजं प्रकृतिचटुलत्वमपि गलितम् ॥ सं

तत इति। ततः तदनन्तर तेषा रणप्राज्ञाना योधानामिति शेषः आलेख्यप्रदीपानामिव चित्रलिखितदीपानामिव निजं स्वकीय प्रकृतिचटुलत्व स्वभावचापल्यमपि हृता छाया कान्तिः आलोकश्च यत्र तथोक्तं निश्चलानि स्थिराणि लोचनान्येव शिखा यस्मिन् तथाभूतं तथा प्रवसन् नश्यन् प्रतापः पराक्रमः प्रकृष्टतापजननं तेजश्च यस्मिन् तादृश सत् गलित विच्युतम् ॥

लौकिकेति। लौकिकपरीक्षकाणा लोकव्यापारपरिदर्शकानां बुद्धिसाम्यं बुद्धेः

तु पुनरनेको विद्यते तद् यथा। दृष्टान्तदार्ष्टान्तिकयोर्भिन्ने वाक्ये निर्देशो दृष्टान्तालङ्कारः, एकवाक्ये निर्देशो दृष्टान्तोक्तिः। साध्यधर्मसिद्धये दृष्टान्तालङ्कारः, साधर्म्यसिद्धये दृष्टान्तोक्तिः। इवाद्यप्रयोगे दृष्टान्तालङ्कारः, इवादिप्रयोगे तु दृष्टान्तोक्तिः। अतएव उभयालङ्कारः स पुनरर्थालङ्कार इति।

साम्योत्कर्षापकर्षोक्तिरुपमानोपमेययोः।
प्रकृता विकृता चेति प्रपञ्चोक्तिः प्रदर्श्यते ॥ ९४ ॥

सोपमानोपमेययोः साम्येन प्रकृता यथा,

अरण्यबीजाञ्जलिदानलालितास्तथा च तस्यां हरिणा विशश्वसुः
यथा तदीयैर्नयनैः कुतूहलात् पुरः सखीनामभिमीत लोचने ॥

अत्र मृगलोचनोपमानानां तल्लोचनोपमेययोश्च साम्यमविकृतानामेव प्रतीयते सेयं सामान्येन प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ ९५ ॥

प्रतीतेः सादृश्यम्। अर्थं प्रतिपाद्यम्। उक्तिं वचनम्। दृष्टान्तदार्ष्टान्तिकयोः दृष्टान्तो निदर्शनं दार्ष्टान्तिकः दृष्टान्तेन, समर्थनीयं वस्तु तयोः। साध्यधर्मसिद्धये साध्यस्य प्रतिपाद्यस्य प्रस्तुतस्येत्यर्थः धर्मः गुणक्रियारूपः तस्य सिद्धये समर्थनाय। साधर्म्यसिद्धये समानधर्मवस्तुसाधनार्थम्। उभयालङ्कारः शब्दार्थालङ्कारः ॥

प्रपञ्चोक्तिं लक्षयति साम्येति। उपमानोपमेययोः साम्यस्य साधर्म्यस्य उत्कर्षः अपकर्षः तयोरुक्तिः कीर्त्तनं प्रपञ्चोक्तिः सा च प्रकृता विकृता चेति द्विधा प्रदर्श्यते ॥ ९४ ॥

अरण्येति। हरिणाः मृगाः अरण्यस्य बीजाञ्जलिः नीवाराञ्जलिः तस्य दानं तेन लालिताः पोषिताः सन्तः तस्यां पार्वत्यां तथा विशश्वसुः विश्वासं जग्मुः, यथा सखीनां सहचरीणां पुरः अग्रतः समक्षमित्यर्थः कुतूहलात् कौतुकात् तदीयैः तत्सम्बन्धिभिः मृगसम्बन्धिभिरित्यर्थः नयनैः लोचने नयने अभिमीत परिमितवती। केचित्तु तपश्चरणसमये स्वनयनयोः ईदृग्व्यापारस्य विलासधर्मत्वात् सखीनां लोचने अभिमीतेति व्याचक्षते ॥ ९५ ॥

प्रकृतैव उपमानोत्कर्षेण यथा,

गर्वमसम्बाधमिमं लोचनयुगलेन वहसि किं मुग्धे ! ।
सन्तीदृशानि दिशि दिशि सरःसु ननु नीलनलिनानि ॥

अत्र तव द्वे लोचनोत्पले एव सरसां पुनर्बहूनि नीलोत्पलानि इति उपमानोत्कर्षः प्रकृत एव प्रतीयते । सा इयम् उपमानोत्कर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ ९६ ॥

सैव उपमानापकर्षेण यथा,

अन्यतो नय मुहूर्त्तमाननं चन्द्र एष सरले ! कलामयः ।
मा कदाचन कपोलयोर्मलं संक्रमय्य समतां नयिष्यति ॥

अत्र उपमानस्य मलिनताकृतोऽपकर्षः प्रकृत एव प्रतीयते । सेयम् उपमानापकर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ ९७ ॥

सैव उपमानस्य किञ्चिदुत्कर्षेण यथा,

आपातमात्ररसिके ! सरसीरुहस्य
किं बीजमर्पयितुमिच्छसि वापिकायाम् ।

गर्वमिति । हे मुग्धे ! सुन्दरि ! त्वं लोचनयुगलेन असंबाधं दुरपनेयमित्यर्थः असंबाह्यमिति पाठे असंबाह्यं संवोढुमनर्हमित्यर्थः गर्वम् अहङ्कारं किं कथं वहसि ? । ननु भोः दिशि दिशि सरःसु सरोवरेषु ईदृशानि एवम्प्रकाराणि त्वल्लोचनसदृशानीति भावः नीलनलिनानि नीलोत्पलानि बहूनीति भावः सन्ति विद्यन्ते ॥ ९६ ॥

अन्यत इति । हे सरले ! अकुटिले ! आननं मुखं मुहूर्त्तं कियन्तं कालम् अन्यतः अन्यस्यां दिशि चन्द्रीदृग्रहितायामिति भावः नय परावर्त्तयेत्यर्थः कथमित्याह चन्द्र इति । एषः कलामयः षोडशकलात्मकः चन्द्रः कदाचन कपोलयोः त्वन्मुखस्येति भावः मलं खं कलङ्कमित्यर्थः संक्रमय्य संक्रान्तं कृत्वा समतां तुल्यतां मा नयिष्यति तव कपोलौ निष्कलङ्कौ स्वमलसंक्रमणेन स्वसमौ मा करोतु इति निष्कर्षः ॥ ९७ ॥

कालः कलिर्जगदिदं न कृतज्ञमज्ञे !
स्थित्वा हरिष्यति तवैव मुखस्य शोभाम् ॥

अत्र उपमानस्य उपमेयात् ईषदुत्कर्षः प्रकृत एव प्रतीयते। सेयम् ईषदुत्कर्षेण प्रकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ ९८ ॥

उपमानोपमेययोः साम्यापत्त्या विकृता यथा,

घरिणीए महाणसकम्मलग्गमसिमइलिएण हत्थेण।
छित्तं मुहं हसिज्जइ चन्दावत्थं गअं पइणा ॥

अत्र उत्कृष्टोपमेयस्य मसीमालिन्यवैकृतेन उपमानसाम्यम् आपाद्यमानं प्रतीयते। सेयम् उपमानोपमेययोः साम्यापत्त्या विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ ९९ ॥

विकृतैव उपमेयस्य उत्कर्षापत्त्या यथा,

रत्तुप्पलदलसोहा तीअ वि चसअम्मि सुरहिवारुणीभरिए।
मअतंवेहिं मणहरपडिमापड़िएहिं लोअणेहिं लहुइआ ॥

आपातेति। हे आपातमाधुरसिके ! अविमृष्यानुरागिणि। हे अज्ञे मुग्धे ! वापिकायां दीर्घिकायां सरसीरुहस्य कमलस्य बीजम् अर्पयितुं रोपितुं किं कथ इच्छसि अभिलषसि निष्फलस्तेऽभिलाषो विपरीतफलस्य इत्याह काल इति। कालः समयः अयमिति शेषः कलिः अधर्ममय इति भावः इदं जगत् न कृतज्ञं कृतोपकारं न जानातीत्यर्थः। स्थित्वा स्थितिं प्राप्य इत्यर्थः इदं बीजमिति शेषः तवैव उत्पादयित्वा इति भावः मुखस्य शोभां श्रियं हरिष्यति चोरयिष्यति अत्र कमलोत्पत्तिः तव मुखश्रीहरणादेव भविष्यतीति भावः यद्वा तव मुखस्य शोभां जेष्यति-इत्यर्थः। अत्र पूर्वार्धे उपमेयस्योत्कर्षः। पक्षान्तरे उपमानस्योत्कर्ष इति विभाव्यम् ॥ ९८ ॥

घरिण्या महानसकर्मलग्नमसिमलिनेन हस्तेन।
छिन्नं मुखं हस्यते चन्द्रावस्थां गतं पत्या ॥ सं

घरिण्येति। घरिण्या गृहिण्या महानसकर्मणि रन्धनकर्मणि लग्ना संसक्ता या मसिः तया मलिनः तेन हस्तेन छिन्नं स्पृष्टं संक्रान्तमलमिति भावः अतएव

अत्र उपमेयस्य मधुमदताम्रत्ववैकृत उत्कर्षः प्रतीयते। सेयम् उपमेयोत्कर्षेण विकृता नाम प्रपञ्चोक्तिः साम्यभेदः॥ १०० ॥

सैव उपमेयापकर्षापत्त्या यथा,

मृगं मृगाङ्कः सकलं सदाङ्के बिभर्त्ति तस्यास्तु मुखं कदाचित्।
कपोलदेशे मृगनाभिपत्रमिषात् सखे! तस्य ततोऽपकर्षः॥

अत्र मृगाङ्कः सकलं मृगं सदा बिभर्त्ति तन्मुखञ्च कदाचित् मृगनाभिमात्रमेव पत्रम् इति उपमेयस्य वाचनिकी अपकर्षापत्तिः प्रतीयते, सेयम् उपमेयापकर्षापत्त्या विकृता नाम प्रपञ्चोक्तिः साम्यभेदः॥ १०१ ॥

सैवोपमेयस्य साम्यापत्त्या उपमानोत्कर्षेण च यथा,

न मर्त्यलोकस्त्रिदिवात् प्रहीयते म्रियेत नाग्रे यदि वल्लभो जनः।
निवृत्तमेव त्रिदिवप्रयोजनं मृतः स चेज्जीवत एव जीवति॥

चन्द्रावस्थां गतं सकलङ्कचन्द्रवत् जातमिति भावः मुखं दृष्ट्वा इति अध्याहार्य्यं पत्या दृश्यते॥ ९९॥

रक्तोत्पलदलशोभा तस्याश्चषके सुरभिवारुणीभरिते।
मदतामैर्मनोहरप्रतिमापतितैर्लोचनैर्लघ्वी॥ सं

रक्तेति। सुरभिः सौरभवती या वारुणी सुरा तया भरिते आपूरिते चषके पानपात्रे मनोहरप्रतिमापतितैः शोभनप्रतिबिम्बपतितैः मदताम्रैः मद्यपानात् रक्ततां गतैः तस्याः कान्तायाः लोचनैः रक्तोत्पलदलानां शोभा लघ्वी कृता इति शेषः॥ १००॥

मृगमिति। हे सखे! मृगाङ्कः चन्द्रः सदा सर्वस्मिन् काले मृगं कलङ्कमिति भावः अङ्के उत्सङ्गे बिभर्त्ति धत्ते। तु किन्तु तस्याः कान्तायाः मुखं कदाचित् कपोलदेशे मृगनाभिपत्रमिषात् कस्तूरीपत्ररचनाव्याजात् कलङ्कं बिभर्त्तीत्यन्वयः ततः कारणात् तस्य चन्द्रस्य सर्वकालकलङ्कधारिण इति भावः अपकर्षः हीनत्वम्॥ १०१॥

नेति। यदि वल्लभो जनः प्रियजनः अग्रे न म्रियेत न निधनं गच्छति तदा

अत्र उपमेयस्य यथोक्तधर्मयोगे सति उपमानेन पूर्वार्द्धे साम्यम् उत्तरार्द्धे तु किञ्चित् उत्कर्षो भवति सेयं यथोक्ता विकृता नाम प्रपञ्चोक्तिः साम्यभेदः ॥ १०२ ॥

प्रतिवस्तूक्तिरप्यस्मिन्नृज्वी वक्रा च कथ्यते ।
दृष्टान्तोक्तेश्च सा च्छायां प्रपञ्चोक्तेश्च गाहते ॥ १०३ ॥

सा दृष्टान्तोक्तिच्छायया विधौऋजुः पूर्वा च यथा,

तन्मन्ये हिमभासस्तारानिकरेण कान्तिरुच्छेद्या ।
यत्तस्या मुखमेतद् यदि युवतिमुखानि विजयन्ते ॥

अत्र तदिन्दोः तारकौघेण कान्तिरुच्छेद्या पूर्वम् ऋजूक्त्या दृष्टान्तरूपं पश्चाद् यदेतन्मुखं युवतिमुखानि विजयन्ते इति ऋजूक्त्यैव दार्ष्टान्तिकरूपं प्रतिवस्तु उपन्यस्तमिति। सेयं दृष्टान्तोक्तिच्छायया विधौ ऋज्वी पूर्वा च प्रतिवस्तूक्तिः साम्यभेदः ॥ १०४ ॥

सैव उत्तरा वक्रा च यथा,

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥

मर्त्यलोकः त्रिदिवात् स्वर्गात् न प्रहीयते नापक्रम्यते। चेत् यदि मृतः स प्रियजन इत्यर्थः जीवत एव प्रियजनस्येति शेषः जीवति प्राणिति तदा त्रिदिवस्य स्वर्गस्य प्रयोजनम् उपयोगः निवृत्तमेव । न कोऽपि स्वर्गाय यतेतेति भावः ॥ १०० ॥

प्रतिवस्तूक्तिं लक्षयति प्रतीति । अस्मिन् ग्रन्थे प्रतिवस्तूक्तिरपि ऋज्वी सरला वक्रा कुटिला च कथ्यते । सा दृष्टान्तोक्तेश्च प्रपञ्चोक्तेश्च छायां सादृश्यं गाहते आश्रयति ॥ १०२ ॥

तदिति । यदि युवतीनां अन्यासां तरुणीनां मुखानि तस्याः महिलायाः यदेतत् मुखं विजयन्ते पराजयन्ते तत्तदा तारानिकरेण नक्षत्रनिचयेन हिमभासः चन्द्रस्य कान्तिः उच्छेद्या निर्जेया इति मन्ये । तारानिकरेण चन्द्रपरिभवः अन्यनारीवदनैः तन्मुखपरिभवस्तुल्य इति भावः ॥१०३॥१०४॥

अत्र शुद्धान्तदुर्लभमिति वक्रोक्त्या पूर्वं दार्ष्टान्तिकरूपं वस्तु उपन्यस्य पश्चात् दूरीकृताः खलु गुणैरिति वक्रोक्त्यैव दृष्टान्तरूपं प्रतिवस्तु उपन्यस्तमिति। सेयं दृष्टान्तोक्तिच्छायया विधौ वक्रोत्तरा च प्रतिवस्तूक्तिः साम्यभेदः ॥ १०५ ॥

दृष्टान्तोक्तिच्छायया निषेधे ऋजुः पूर्वा यथा,

न मालतीदाम विमर्दयोग्यं न प्रेम नव्यं सहतेऽपराधान्।
म्लानापि न म्लायति केसरस्रग् देवी न खण्डप्रणया कथञ्चित् ॥

अत्र न मालतीदाम विमर्दयोग्यमिति म्लानापि न म्लायति केसरस्रगिति च ऋजूक्तिभ्यामेव पूर्वं दृष्टान्तरूपे वस्तुनी प्रतिषिध्य उत्तरकालं न प्रेम नव्यं सहतेऽपराधानिति देवी न खण्डप्रणया कथञ्चिदिति च दार्ष्टान्तिकरूपे प्रतिवस्तुनी ऋजूक्त्यैव प्रतिषिद्धे। सेयं निषेधे ऋज्वी पूर्वा च दृष्टान्तोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभेदः ॥ १०६ ॥

सैव उत्तरा च वक्रा च यथा,

मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात् ॥

अत्र कथं वा स्यादिति वक्रया निषेधोक्त्या दार्ष्टान्तिक-

शुद्धान्तेति। यदि आश्रमवासिनोऽपि तपोवनवर्त्तिनोऽपि अतिक्लेशेन जीवत इति भावः जनस्य इदं शुद्धान्तदुर्लभं राजान्तःपुरदुष्प्रापं वपुः शरीरं स्यादिति शेषः तदा वनलताभिः अयत्नपरिवर्द्धिताभिरिति भावः गुणैः निजैर्मनोहरत्वादिभिरित्यर्थः उद्यानलताः उपवनवल्ल्यः यत्नपरिवर्द्धिता इति भावः दूरीकृताः खलु निर्जिता एव ॥ १०५ ॥

नेति। मालतीनां दाम माला न विमर्दयोग्यं न विमर्दसहमित्यर्थः। नव्यम् अभिनवं प्रेम अपराधान् दोषान् न सहते न क्षमते। केसरस्रक् वकुलमाला म्लानापि न म्लायति दीर्घकालमम्लानैव तिष्ठतीति भावः। देवी पुराणप्रणयवतीति भावः कथञ्चित् न खण्डप्रणया न प्रणयभङ्गमिच्छतीति भावः ॥ १०६ ॥

मभिधाय पश्चान्न वसुधातलात् प्रभातरलं ज्योतिरुदेतीति वैयधिकरण्यवक्रयैव निषेधोक्त्या दृष्टान्तोऽभिहितः। सेयं निषेधे वक्रोत्तरा च दृष्टान्तोक्तिच्छायया प्रतिवस्तूक्तिः साम्यभेदः॥ १०७॥

प्रपञ्चोक्तिच्छायया विधौ ऋज्वी यथा,

तरङ्गय दृशोऽङ्गने! पततु चित्रमिन्दीवरं
स्फुटीकुरु रदच्छदं व्रजतु विद्रुमः श्वेतताम्।
क्षणं वपुरपावृणु स्पृशतु काञ्चनं कालिकाम्
उदञ्चय मुखं मनाग् भवतु च द्विचन्द्रं नभः॥

अत्र प्रथम-चतुर्थपादयोः उपमानोपमेयसाम्यं वैकृतं द्वितीय-तृतीयपादयोरुपमानापकर्षः प्रकृत इति। सेयं प्रपञ्चोक्ति-च्छायया विधौऋज्वी नाम प्रतिवस्तूक्तिः साम्यभेदः॥१०८॥

सैव विधौ वक्रा यथा,

एक्कोणमिअभुअभङ्गे विमलकवोले
वअणम्मि तुइ समअच्छि तिरिच्छणअणे।
एहु ससिबिम्बउ कलङ्कगारउ पय्यरउ क्खित्तउ
उप्परेण भमाइ अणिमच्छणखप्परउ॥

मानुषीष्विति। मानुषीषु नरजातीयरमणीषु अस्य रूपस्य आकृतेः सौन्दर्यस्य वा कथं वा केन प्रकारेण वा सम्भवः स्यात्? नैव कथमपीत्यर्थः। तथाहि प्रभातरलं कान्तिपूर्णं ज्योतिः वसुधातलात् पृथ्वीतलात् न उदेति न उदयं प्राप्नोति॥ १०७॥

तरङ्गयेति। अङ्गने! कान्ते! दृशः नयनानि तरङ्गय सञ्चालय, चित्रं मनोहरम् इन्दीवरं नीलोत्पलं पततु दृष्टिं देहीति भावः रदच्छदम् ओष्ठम् अधरञ्च स्फुटीकुरु व्यक्तीकुरु विद्रुमः प्रवालं श्वेततां व्रजतु पराभवादितिभावः। सम्भाषश्चेति निष्कर्षः। वपुः शरीरं क्षणम् अपाकुरु आवरणशून्यं कुर्वित्यर्थः काञ्चनं स्वर्णं कालिकां मालिन्यं स्पृशतु मलिनीभवतु इत्यर्थः। मनाक् किञ्चित् मुखम् उदञ्चय उन्नमय, नभः आकाशं द्विचन्द्रं चन्द्रद्वयशोभितमित्यर्थः भवतु च॥ १०८॥

अत्र उपमेयोत्कर्षो वैकृतः उपमानापकर्षः प्राकृतः प्रकाशत एव या पुनः इयम् उत्तरार्द्धेन रूपकेण उपमानापकर्षस्य उक्तिभङ्गिः तया इयं प्रपञ्चोक्तिच्छायया विधौ वक्रा नाम प्रतिवस्तूक्तिः साम्यभेदः ॥ १०९ ॥

सैव निषेधे ऋज्वी यथा,

दातारो यदि कल्पशाखिभिरलं यद्यर्थिनः किं तृणैः ?
सन्तश्चेदमृतेन किं ? यदि खलास्तत् कालकूटेन किम् ? ।
किं कर्पूरशलाकया यदि दृशोः पन्थानमेति प्रिया ?
संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम् ? ॥

अत्र उपमेयोत्कर्षः ऋजूक्तौरव च निबद्ध इति सेयं प्रपञ्चोक्तिच्छायया निषेधे ऋजूनाम प्रतिवस्तूक्तिः साम्यभेदः ॥ ११० ॥

सैव निषेधे वक्रा यथा,

तद्वक्त्रं यदि मुद्रिता शशिकथा तच्चेत् स्मितं का सुधा
तच्चक्षुर्यदि हारितं कुवलयैस्तान्येव किं धिङ्मधु ।

दातार इति । यदि दातारः वदान्याः दानशीला इत्यर्थः पुरुषाः सन्तीति शेषः तदा कल्पशाखिभिः कल्पतरुभिः अलं कल्पतरवो निष्प्रयोजना इति भावः । यदि अर्थिनः भिक्षुकाः सन्तीति शेषः तदा तृणैः किम् ? भिक्षुकास्तृणवदवज्ञेया इति भावः । चेद् यदि सन्तः सज्जनाः सन्ति, तदा अमृतेन किम् ? परितृप्तिसाधने अमृत सत्पुरुषश्च समानमेवेति भावः । यदि खला दुर्जनाः सन्तीति शेषः तत् तदा कालकूटेन महाविषेण किम् ? न किमपि प्रयोजनमित्यर्थः उभयोः समदुःखदायित्वादिति भाव. । यदि प्रिया दृशोः पन्थानं दृष्टिपथम् एति आगच्छति तदा कर्पूरशालकया किम् ? न किमपि प्रयोजनम् उभयोरपि तुल्यतया नयनप्रीतिकरत्वादिति भावः । संसारे सत्यपि विद्यमानेऽपि यदि अपरम् इन्द्रजालं मायिकव्यापारविशेषः अस्ति तेनापि इन्द्रजालेन किम् ? न किमपि प्रयोजनमित्यर्थः संसारेन्द्रजालयोः तुल्यत्वादिति भावः ॥१०९॥११० ॥

धिक् कन्दर्पधनुर्भ्रुवौ च यदि ते किं वा बहु ब्रूमहे
तत् सत्यं पुनरुक्तवस्तुविरसः सर्गक्रमो वेधसः॥

अत्र उपमानापकर्षो वक्रोक्त्या च निषेधः शेषं पूर्ववत् ते इमे द्वे अपि मालोपमाच्छायया प्रपञ्चोक्तौ पूर्वे पुनः उपमाच्छाययेति मन्तव्यम्।

इति साम्यालङ्कारनिरूपणम्।

अर्थयोरतिसादृश्याद् यत्र दोलायते मनः।
तमेकानेकविषयं कवयः संशयं विदुः॥ १११॥
तत्रैकविषयोऽनेको यस्मिन्नेकत्र शङ्क्यते।
यस्मिन्नेकमनेकत्र सोऽनेकविषयः स्मृतः॥ ११२॥

तदिति। यदि तत् वक्त्रं वदनं स्यादिति शेषः तदा शशिनः चन्द्रस्य कथा मुद्रिता विलुप्ता भवेदिति शेषः। तद्वक्त्रस्यैव जितशशिनः तत्कार्य्यकारित्वादिति भावः। चेत् यदि तत् स्मितं मृदुहसितं स्यादिति शेषः तदा सुधा अमृतं का? कुत्सितेति भावः। तत् स्मितापेक्षया सुधाया अपकृष्टत्वादितिभावः। तत् चक्षुः नयनं यदि स्यादितिशेषः तदा कुवलयैः नीलोत्पलैः हारितं परिभूतमित्यर्थः। चेत् यदि ताः गिरः वाचः स्युरिति शेषः तदा मधु धिक् निन्द्यमित्यर्थः धिङ्निर्भर्त्सननिन्दयोरित्यमरः। यदि ते भ्रुवौ स्याताभिति शेषः तदा कन्दर्पधनुः कामकार्मुकं धिक् निन्दामीत्यर्थः। वा अथवा किं बहु ब्रूमहे वदामः? वेधसः विधातुः सर्गक्रमः सृष्टिनियमः पुनरुक्तवस्तुनि विमुखः पराङ्मुखः विरत इत्यर्थः एकरूपं वस्तु द्वितीयं न सृज्यते इत्येवं सृष्टिनियम इति भावः तत् सत्यं यदेतदिति शेषः॥

संशयालङ्कारं निर्दिशति अर्थयोरिति। अर्थयोः अभिधेययोरतिशयेन सादृश्यात् यत्र मनः दोलायते एतदिदम् अन्यद्वेति द्वैधीभावमवलम्बते इत्यर्थः कवयः एकानेकविषयम् एकविषयम् अनेकविषयञ्चेति द्विविधं संशयं विदुः जानन्ति॥ १११॥

तत्रेति। तत्र तयोर्मध्ये यस्मिन् एकत्र वस्तुनीति शेषः अनेकः अर्थः शङ्क्यते आशङ्क्यते स एकविषयः। यस्मिन् अनेकत्र वस्तुनि एकं वस्तु शङ्क्यते इत्यन्वयः सः अनेकविषयः स्मृतः कथितः॥ ११२॥

तयोः आद्योऽभिधीयमानसादृश्यो यथा,

आहारे विरतिः समस्तविषयग्रामे निवृत्तिः परा
नासाग्रे नयनं यदेतदपरं यच्चैकतानं मनः ।
मौनं चेदमिदं च शून्यमखिलं यद्विश्वमाभाति ते
तद् ब्रूयाः सखि ! योगिनी किमसि भोः ! किं वा वियोगिन्यसि ॥

अत्र एकस्मिन् वस्तुनि वस्तुद्वयस्य अभिधीयमानसामान्यप्रत्यक्ष तद्विशेषप्रत्यक्षादुभयविशेषस्मरणाच्च यो विमर्षः सोऽयम् एकविषयः संशयः ॥ ११३ ॥

स एव प्रतीयमानसादृश्यो यथा,

किं पद्ममन्तर्भ्रान्तालि किं ते लोलेक्षणं मुखम् ? ।
मम दोलायते चित्तं पश्यतस्त्वां घनस्तनि ! ॥

अत्र मुखलक्षणे लोचनलक्षणे चैकस्मिन्नेव वस्तुनि पद्मलक्षणं भ्रमर-लक्षणञ्च अपरमपि वस्तु प्रतीयमान-सादृश्यम् आशङ्क्यते सोऽयमपि एकविषय एव संशयः । अनेकवस्तुविषयो द्विधा शुद्धो मिश्रश्च ॥ ११४ ॥

आहारे इति । भोः सखि ! आहारे भोजने विरतिः अप्रवृत्तिरित्यर्थः ते इति सर्वत्र योज्यम् । समस्ता विषयाः भोग्यवस्तूनि तेषां ग्रामे समूहे सर्वस्मिन् व्यापारे इति भावः परा एकान्ता निवृत्तिः अप्रवृत्तिरित्यर्थः यत् नासाग्रे नयनम् एतत् अपरम् अन्यत्, यच्च मनः एकातानम् एकाग्रम् । इदं मौनं तूष्णीम्भावश्च यद् विश्वम् अखिलं समग्रं जगत् इदञ्च ते शून्यम् आभाति भासते, तत् तस्मात् योगिनी समाधिनिरता किमसि ? किंवा वियोगिनी असीति ब्रूहि कथय ॥ ११३ ॥

किमिति । हे घनस्तनि पीनपयोधरे ! एतदित्यध्याहार्यम् एतत् अन्तर्भ्रान्तः अलिर्भ्रमरः यस्य तथाविधं पद्मं किम् ? ते तव लोलेक्षणं चञ्चलनयनं मुखं किम् ? त्वां पश्यतः अवलोकयतः मम चित्तम् इत्थं दोलायते द्वैधमवलम्बते ॥ ११४ ॥

तयोः प्रतीयमानसादृश्यः शुद्धो यथा,

वाला भंभुरभोली उल्लसिअणिअंसिणी
गहणं सुणिअ विणिक्कन्ता णिद्दाए भेम्मली ।
राहुवि तीअ मुहु जोहइ पुणु जोहइ
गअणु भुल्लेओ णहु आणइ दोण्हवि चन्दुकं वणु ॥

अत्र द्वयोः प्रतीयमानसादृश्ययोः बालिकामुखचन्द्रयोरेकश्चन्द्र एव विशङ्कत इति सोऽयं अनेकविषयः शुद्धः संशयः ॥ ११५ ॥

अभिधीयमानसादृश्यो मिश्रो यथा,

द्वावप्येतावभिनवजपापुष्पभासां निवासौ
तिष्ठत्यन्ते द्वयमपि वियन्मण्डलस्योपसन्ध्यम् ।
अस्तं को यात्युदयति च कः को रविः कः शशाङ्कः
का च प्राची तदिह न वयं का प्रतीचीति विद्मः ॥

अत्र द्वयोरभिधीयमानसादृश्ययोः सूर्याचन्द्रमसोः प्राचीप्रतीच्योः वा तदन्यतममेकमेव वस्तु पर्यायतो विशङ्कते इति अनेकविषयोऽयं मिश्रः संशयः । उपलक्षणञ्च एतत् तेन वितर्कोत्त्रयादयोऽपि संशयोक्तावेव द्रष्टव्याः ॥ ११६ ॥

तद्यथा,

सरोजपत्रे परिलीनषट्पदे विशालदृष्टेः स्विदमू विलोचने ।

वाला निष्कपटोल्लसित निवसनाग्रहणं श्रुत्वा विनिष्क्रान्ता निद्रया श्याकुला । राहुरपि तस्या मुखं पश्यति पुनः पश्यति गगन भ्रान्तिमान् खलु न जानाति द्वयोरपि चन्द्रः कः ।

द्वाविति । द्वावपि एतौ रविशशाङ्कौ अभिनवजवापुष्पस्य भासां प्रभाणां निवासौ आश्रयौ रक्ताविलर्थः द्वयमपि एतयोरिति शेषः उपसन्ध्यं सन्ध्याकाले सायं प्रातश्चेति भावः बिभक्त्यर्थे अव्ययीभावः । वियन्मण्डलस्य आकाशमण्डलस्य अन्ते चरमे भागे तिष्ठति । कः अस्तं याति कश्च उदयति उदयं गच्छति, कः रविः सूर्यः कश्च शशाङ्कः चन्द्रः ? प्राची पूर्वा दिक् का ? प्रतीची पश्चिमा च का ? तदेतत् इह जगति वयं न विद्मः न जानीमः ॥११५॥११६॥

शिरोरुहाः स्वित् नतपक्ष्मसन्ततेर्द्विरेफवृन्दं नु निशब्दनिश्चलम् ॥
अगूढहासस्फुटदन्तकेशरं मुखं स्विदेतद्विकचं नु पङ्कजम् ।
इति प्रलीनां नलिनीवने सखीं विदाम्बभूवुः सुचिरेण योषितः
युग्यम् ॥

यथा च,

मुहे मअक्खलिउल्लावे ण्हाणोल्लए चिउरेवि
णिस्सिअसणसारे समोत्तिअहारे उरे ।
कालन्तरे तरलच्छिहु मअणु समुल्लसइ
माहहु पुणु थणगुड़रे ण मुणइ कहिं वसइ ॥

कः पुनर्वितर्कसंशययोर्विशेषः, उच्यते । निर्णयासन्नो वितर्कः

सरोजपत्रे इति । एते इत्यध्याहार्य्यम् एते परिलीनः ससक्तः षट्पदः भ्रमरः यथोः तथाभूते सरोजपत्रे पद्मपत्रे वा विशाला आयता दृष्टिर्यस्याः तथाभूतायाः सख्याः विलोचने नयने अमू स्वित् किम् ? नवा पक्ष्मणां नेत्रलोम्नां सन्ततिः समूहः यस्याः तथाभूतायाः सख्याः शिरोरुहाः केशाः स्वित् किम् ? निशब्दनिश्चलं द्विरेफाणां भ्रमराणां वृन्दं सङ्घः नु ? किम् ? अगूढेन स्फुटेन हासेन स्फुटाः प्रकटा दन्ता एव केशराः किञ्जल्काः यत्र तादृशं मुखं स्वित् ? किम् ? सख्या इति शेषः । एतत् विकच प्रफुल्लं पङ्कजं पद्मं नु किम् ? योषितः नार्य्यः नलिनीवने प्रलीनां संसक्तां सखीं कामपि सङ्गिनीं नारीं इति अनेन प्रकारेण सुचिरेण बहुना क्षणेन विदाम्बभूवुः निश्चिक्युः ॥

मुखे मदस्खलितोल्लापे स्नानप्रुतेषु चिकुरेष्वपि
निर्निवसनसारे समौक्तिक हारे उरसि ।
कालान्तरे तरलाक्ष्णोर्मदनः समुल्लसति
माधवः पुनः स्तनकुड्मले न मन्यते क्व वसति ॥

मुखे इति । मदनः कामः मदेन स्खलितः अस्फुटतां गत इत्यर्थः उल्लापः भाषणं यत्र तादृशे मुखे वदने स्नानप्रुतेषु स्नानार्द्रेष्विति यावत् शोषणार्थं मुक्तबन्धनेष्विति भावः चिकुरेषु केशेषु निर्निवसनसारे निवसनस्य अभावः निर्निवसनं वसनाभाव इत्यर्थः तेन सारः उत्कर्षः यस्य तादृशे समौक्तिक-

वितर्कासन्नश्च संशयः। संशयानो हि वितर्कस्य कोटिमारुह्य ततो विभ्रष्टस्तत्त्वमभिनिविशते। यथा पूर्ववाक्ये विदाम्बभूवुरिति। संशयमेव वा विगाहते यथा माहइ पुणु थणगुड्डरे ण मुणइ कहि वसइ। शब्दाश्च किं स्विदादयः तुल्यरूपा एव संशयविपर्य्ययोरिति दुरवबोधस्तद्विशेषः। नन्वेवं वितर्कादयोऽपि उभयालङ्काराः स्युः सत्यं किन्तु उक्तिपक्षे परार्थानुमानवत् स्वरूपपक्षे स्वार्थानुमानवदिति। अयमेव चोक्तिशब्दस्यार्थः तेन स्वरूपमात्रोक्तौ संशयवितर्कादयोऽपि अर्थालङ्काराः। उक्तिप्राधान्ये तु उभयालङ्काराः॥ ११७॥

अपह्नुतिरपह्नुत्य किञ्चिदन्यार्थदर्शनम्।
औपम्यवत्यनौपम्या चेति सा द्विविधोच्यते॥ ११८॥
वाच्ये प्रतीयमाने च सादृश्ये प्रथमा तयोः।
तथाभूते द्वितीया स्यादपह्नोतव्यवस्तुनि॥ ११९॥

हारे मुक्ताहारशोभिनि इत्यर्थः उरसि वक्षसि तथा कालान्तरे समयविशेषे विलासावसरे इत्यर्थः तरलयोश्चञ्चलयोः अक्ष्णोः नयनयोः समुल्लसति परिस्फुरति कामोद्दीपत्वादेतेषामिति भावः। पुनः किन्तु माधवः वसन्तः स्तनकुड्मले समुल्लसतीति पूर्वेणान्वयः किन्तु क्व कुत्र वसतीति न मन्यते न ज्ञायते जनैरिति शेषः सादृश्ये कामस्य समुद्दीपनोपकरणे विद्यमाने माधवस्य प्रयोजनं नास्तीति भावः॥

क इति। विशेषः भेदः। निर्णयासन्नः निर्णयस्य निश्चयस्य सन्निहित इत्यर्थः। संशयानः सन्दिहन् कोटिम् अग्रभागम्। ततः वितर्ककोटेः भ्रष्टः विच्युतः तत्त्वं निर्णयबुद्धिम् अभिनिविशते आश्रयति। संशयविपर्य्ययौ सन्देहवितर्कयोः। दुरवबोधः दुर्ज्ञेयः। तद्विशेषः तयोर्भेदः। अपह्नुतिं लक्षयति अपह्नुतिरिति। किञ्चित् वस्तु अपह्नुत्य निषिध्य अन्यस्य अर्थस्य वस्तुनः दर्शनं प्रतिपादनम् अपह्नुतिः। सा च औपम्यवती अनौपम्या चेति द्विविधा उच्यते॥ ११७—११८॥

वाच्ये इति। तयोर्द्विविधयोः औपम्यवत्यनौपम्ययोः सत्ये प्रथमा औपम्यवती

अनौपम्यवती भूयः पूर्वापूर्वा च कथ्यते ।
तासामुदाहृतिष्वेव रूपमाविर्भविष्यति ॥ १२० ॥

तत्र अभिधीयमाना औपम्यवती यथा,

गिम्हे दवग्गिमसिमइलिआइं दीसन्ति विंझसिहराइं ।
आसासु पउत्थवइएण होन्ति णवपाउसब्भाइं ॥

अत्र नवप्रावृड्भ्राणां विन्ध्यशिखरैः अभिधीयमानसादृश्यैः अपह्नुतत्वात् अभिधीयमाना औपम्यवती अपह्नुतिः ॥ १२१ ॥

प्रतीयमाना औपम्यवती यथा,

न केतकीनां विलसन्ति सूचयः प्रवासिनो हन्त हसत्ययं विधिः ।
तडिल्लतेयं न चकास्ति चञ्चला पुरः स्मरज्योतिरिदं विजृम्भते ॥

अत्र केतकीसूचीनां विधिविहसितैः प्रतीयमानसादृश्यैः तडिल्लतायाश्च स्मरज्योतिषा अपह्नुतत्वाद् इयं प्रतीयमाना औपम्यवती अपह्नुतिः ॥ १२२ ॥

सादृश्ये साम्ये वाच्ये अभिधीयमाने प्रतीयमाने चेति द्विधा भवतीति । द्वितीयापि अनौपम्येत्यर्थः अपह्नोतव्य वस्तुनि तथाभूते वाच्ये प्रतीयमाने च द्विविधा भवति ॥ ११९ ॥

अनौपम्यवतीति अनौपम्यवती च भूयः पुनः पूर्वा अपूर्वा च कथ्यते । उदाहृतिषु उदाहरणेषु तासाम् औपम्यवत्यादीनाम् अपह्नुतीनां रूपं लक्षणम् आविर्भविष्यति प्रकटिष्यति ॥ १२० ॥

ग्रीष्मे दावाग्निमसिमलिनानि दृश्यन्ते विन्ध्यशिखराणि ।
आशासु प्रवसत्पथिकेन भवन्ति नवप्रावृड्भ्राणि ॥ सं

ग्रीष्मे इति । ग्रीष्मे निदाघे दावाग्निर्वनानल एव मसिः तेन मलिनानि दग्धत्वात् मलिनीकृतानि विन्ध्यस्य पर्वतस्य शिखराणि शृङ्गाणि प्रवसन् देशान्तरं गच्छन् पथिकः तेन विरहिणेति भावः नवानि प्रावृषः वर्षाया अभ्राणि मेघा दृश्यन्ते ॥ १२१ ॥

नेति । केतकीनां सूचयः अग्राणि न विलसन्ति विकसिततया न स्फुरन्ति, हन्त खेदे अयं विधिः दैवं प्रवासिनो विरहिण इत्यर्थः हसति । नैष केतकी-

अनौपम्या अभिधीयमानापह्नोतव्यवस्तुः पूर्वा यथा,

राजकन्यानुरक्तं मां रोमोद्भेदेन रक्षकाः।
अवगच्छेयुराः ज्ञातमहो शीतानिलं वनम्॥

अत्र राजकन्यानुरागलक्षणस्य रोमाञ्चकारणस्य रक्षकावगतिहेतोः पूर्वमेव अभिहितस्य च वनानिलशैत्यलक्षणेन कारणान्तरेण अपह्नवः। न चैतयोः सादृश्यमस्ति। सेयम् अनौपम्याभिधीयमानापह्नोतव्यवस्तुः कार्य्यात् पूर्वं कारणोपन्यासेन पूर्वेति उच्यते॥ १२३॥

सैव अपूर्वा यथा,

आनन्दाश्रुप्रवृत्तं मे कथं दृष्टैव कन्यकाम्।
अक्षि मे पुष्परजसा वातोद्धूतेन पूरितम्॥

अत्र आनन्दाश्रुप्रवृत्तमिति पूर्वं कार्य्यस्य पश्चाद् दृष्टैव कन्यकामिति कारणस्य उपन्यासः। शेषं पूर्ववत् सेयमभिधीयमानापह्नोतव्यवस्तुः अनौपम्यापह्नुतिः अपूर्वेति उच्यते॥ १२४॥

सूचीविकासः किन्तु प्रवासिनः प्रति विधातुर्हासोऽयमिति भावः। इयं चञ्चला तडिल्लता विद्युद्वल्ली न चकास्ति न दीप्यते, पुरः अग्रतः इदं स्मरस्य कामस्य ज्योतिः विजृम्भते विस्फुरति। विरहिनामुद्दीपकोऽयं वर्षागम इति भावः॥१२२॥

राजेति। रक्षकाः अनुचरा इति भावः रोमोद्भेदेन रोमाञ्चोद्गमेन मां राजकन्यायामनुरक्तम् अवगच्छेयुः जानीयुः। आः इत्यव्ययम् आमिति पाठान्तरं वनं शीतोऽनिलो यस्मिन् तथाभूतं ज्ञातम्। अत्र राजकन्यानुरागजनितसात्त्विकभावोदयात् रोमाञ्चोद्गमः शीतानिलसङ्गाद् जात इत्यन्यथा प्रकटितमिति भावः॥१२३॥

आनन्देति। कन्यकां दृष्टैव कथं मे मम आनन्दाश्रु आनन्दबाष्पं प्रवृत्तं प्रसृतम्। वातोद्धूतेन वातचालितेन पुष्परजसा पुष्पपरागेण मे मम अक्षि नेत्रं पूरितम् आकीर्णम्। अत्र कन्यादर्शनजानुरागात् आनन्दाश्रुरूपसात्त्विकभावोदयः पुष्परजसा पूरितनेत्ररूपकारणान्तरेणान्यथा कृत इति भावः॥ १२४॥

अनौपम्यैव प्रतीयमानापह्नोतव्यवस्तुः पूर्वा यथा,

उप्पेल्लिअ वइकारिल्लआइं उच्चेसि दइअवच्छलिए।
कण्टअविलिहिअपीणुण्णअत्थणि उत्तम्भसु एताहे॥

अत्र च एतस्याः स्तनयोः उपपतिना नखक्षतं कृतमपि तु कण्टकैरिति प्रतीयमानापह्नोतव्यं वस्तु प्रकाशते। पूर्ववदेव च पूर्वार्द्धे तु कारणस्य उपन्यासः पश्चिमार्द्धे तु कार्य्योपदेशो दृश्यते। सेयमनौपम्या प्रतीयमानापह्नोतव्यवस्तुः पूर्वा नाम अपह्नुतिः अपह्नुत्य किञ्चिदन्यार्थदर्शनमिति लक्षणयोगात् जायते॥

सैव अपूर्वा यथा,

कस्स व ण होइ रोसो दट्ठ ण पिआइ सव्वणं अहरम्।
सभमरपउमाघाइ णिवारिअवामे! सहसु एण्हिम्॥

अत्रापि न अस्या उपपतिना अधरो व्रणितः किं तर्हि भ्रमरेणेति प्रतीयमानापह्नोतव्यं वस्तु। पूर्वार्द्धे तु सव्रणमधरमिति कार्य्यम् उपन्यस्य पश्चिमार्द्धे सभ्रमरकमलाघ्रायिणीति कारणम् उपन्यस्तम्। सेयम् अनौपम्या प्रतीयमानापह्नोतव्य-वस्तुः अपूर्वा च यथोक्तलक्षणयोगात् जायते॥ १२५॥

उत्क्रम्यवचनकारिणि! लतामुच्चैरुदस्यापच्छलितायाम्।
कण्टकविलिखितपीनोन्नतस्तनि उत्तम्भस्वेदानीम्॥

कस्य वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि! वारितवामे! सहस्वेदानीम्॥ स

कस्येति। प्रियायाः पत्न्याः अधरं सव्रणं दशनक्षतमिति यावत् दृष्ट्वा कस्य जनस्य वा रोषः क्रोधः न भवति? अपितु सर्वस्यैव भवतीत्यर्थः। हे सभ्रमरपद्माघ्रायिणि! भ्रमरयुक्तपद्मघ्राणकारिणि! वारिता निवारिता मा जिघ्र पद्ममेतदिति-निषिद्धापि वामा प्रतिकूला अश्रुतमदवचनेत्यर्थः तत्सम्बुद्धौ इदानीं सहस्व सह्यं कुरु भर्तृकोपमिति शेषः। अत्र सख्या उपपतिदष्टमधरं भङ्ग्या उपन्यस्तं भ्रमरकृतमेतत् क्षतमिति अन्यथाकृतमिति भावः॥ १२५॥

समाधिमन्यधर्माणामन्यतारोपणं विदुः।
निरुद्भेदोऽथ सोद्भेदः स द्विधा परिपठ्यते ॥ १२६ ॥

तयोः निरुद्भेदो यथा,

दूरपरिवड्ढराए अवऊहन्तम्मि दिणअरे अवरदिसम्।
असहन्ति व्व किं लिम्मइ पिअदमपच्चक्कदूसणं दिणलच्छी ॥

अत्र दिनकरदिनलक्ष्मीप्रतीचीनां समारोपितनायकनायिकाप्रतिनायिकाधर्माणां दूरप्रतिबद्धराग इत्यादिभिः श्लिष्टपदैः अनुद्भेदः। एवमन्यधर्माध्यारोपात् अयं निरुद्भेदः समाधिभेदः ॥

सोद्भेदो यथा,

वल्लहे लहुवोलं तइ एत्तइ पुणु बहु वलि
किज्जमि तामरसिणि तुझ्झ रोसहु थिरहु।
जेण णौरग्गलु जप्पइ किंपि णिजावअणु
ताव हिमेण विसित्ति झत्थि पुलुट्ठतसु ॥

अत्रापि प्रियतमव्यलीकासहिष्णुः कापि कामिनी हिमानीप्लुष्टां कमलिनीमालोक्य तस्यामात्मधर्मान् प्रिये च सूर्यधर्मान् आरोपयति। ते च वलिः क्रियेऽहं तव रोषस्य इत्यादिभिः पदैरुद्भिद्यमाना इह प्रतीयन्त इति अयं सोद्भेदः समाधिभेदः।

समाधिं लक्षयति समाधिमिति। अन्यस्य वस्तुनः धर्माणां गुणक्रियारूपाणाम् अन्यत्र अपरस्मिन् वस्तुनि आरोपणं समाधिं विदुः जानन्ति। स समाधिः निरुद्भेदः अथ पक्षान्तरे सोद्भेद इति द्विधा द्विप्रकारः परिपठ्यते कथ्यते॥ १२६ ॥

दूरपरिबद्धरागे अवगूहति दिनकरे अपरदिशम्।
असहमानेव किं लीयते प्रियतमप्रत्यक्षदूषणं दिनलक्ष्मीः ॥ सं

दूरेति। दूरम् अत्यन्तं परिबद्धः अधिगतः रागो लौहित्यम् अनुरागश्च येन तथाभूते दिनकरे सूर्ये अपरां दिशं पश्चिमामित्यर्थः अन्यां नायिकाञ्चेति ध्वन्यते अवगूहति आश्रयति आलिङ्गति चेति ध्वन्यते सति दिनलक्ष्मीः दिवसश्रीः

अन्यश्चान्यधर्माश्च अन्यधर्मा इति व्युत्पत्त्या धर्मिणोऽपि अध्यासे समाधिरिष्यते ॥ १२७ ॥

सधर्माणां धर्मिणश्च यथा,

चन्द्रज्योत्स्नाविशदपुलिने सैकतेऽस्मिन् सरय्वा-
वादद्वैतं सुचिरमभवत् सिद्धयूनोः कयोश्चित् ।
एको ब्रूते प्रथमनिहतं केशिनं कंसमन्यः
स त्वं तत्त्वं कथय भवता को हतस्तत्र पूर्वम् ? ॥

अत्र संबोध्य वर्णनीये विष्णुस्वरूपस्य धर्मिणस्तद्धर्माणां च अध्यासादयं धर्मिधर्माध्यासरूपः समाधिः ॥ १२८ ॥

धर्मिण एव अध्यासो यथा,

प्राप्तश्रीरेष कस्मात् पुनरपि मयि तं मन्यखेदं विदध्यात्
निद्रामप्यस्य पूर्वमनलसमनसो नैव सम्भावयामि ।
सेतुं बध्नाति कस्मात् पुनरयमखिलद्वीपनाथानुयातः
त्वय्यायते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

नायिका चेति गम्यते प्रियतमस्य स्वामिनः प्रत्यक्षदूषणं समक्षकृतापराधम् असहमानेव सोढुमशक्नुवतीव लीयते किम् ? लयं गच्छति किम् ? ॥ १२७ ॥

वल्लभे लघुवदत्यागच्छति पुनर्बहुबलिक्रिये तामरसि तव रोषस्य स्थिरस्य ।
येन निरर्गलं जल्पति किमपि यावज्जनस्तावद्विमेन प्रविश्य प्रुष्टासि ॥

चन्द्रेति । चन्द्रस्य ज्योत्स्नया चन्द्रिकया विशदं स्वच्छं पुलिनं तीयोत्थितस्थलं तीयोत्थितं तत् पुलिनमित्यमरः । तादृशे अस्मिन् सरय्वाः सैकते सिकतामये देशे कयोश्चित् सिद्धयूनोः देवयोनियुवकयोः सुचिरं दीर्घकालं वादद्वैधं तर्कविषयकं मतद्वयमित्यर्थः अभवत् । एकः तयोरिति शेषः केशिनं केशिनामानम् असुरं प्रथमं निहतम् अन्यः कंसं प्रथमनिहतं ब्रूते कथयति । स त्वमुभयोर्निहन्ता त्वमित्यर्थः तत्त्वं यथार्थं कथय ब्रूहि भवता तत्र तयोर्मध्ये पूर्वं को हतः व्यापादितः ॥ १२८ ॥

प्राप्तश्रीरिति । एषः प्राप्ता श्रीर्लक्ष्मीः राजसम्पच्च येन तथाभूतः पुनरपि मयि कस्मात् तं मन्यखेदं मन्यनजनितं क्लेशं विदध्यात् ? श्रीलाभार्थं पूर्वं मम

अत्र प्राप्तश्रीरेष कस्मात् इत्यादिभिः मन्थखेदादिधर्माणां निवर्त्तितत्वात् प्राप्तश्रीरित्यादीनाञ्च श्लेषेणैव अभिधानात् त्वयीति वर्णनीयपदे विष्णुस्वरूपस्य धर्मिण एव अध्यासात् तद्धर्माणां चअनध्यासात् अयं धर्म्याध्यासरूपः समाधिः ॥१२९॥

समाधिमेव मन्यन्ते मौलितं तदपि द्विधा।
धर्माणामेव चाध्यासे धर्मिणां वान्यवस्तुनि ॥ १३० ॥

अत्र अन्यधर्माणामेव अन्यवस्तुनि अध्यासान्मौलितं यथा,—

पल्लविअं विअ करपल्लवेहिं पप्फुल्लिअं विअ णअणेहिं।
फलिअं विअ पीणपओहरेहिं अज्जाए लावण्णं ॥

अत्र पल्लवितमिव पुष्पितमिव फलितमिव इत्युत्प्रेक्षया लता-धर्माणां लावण्यधर्मिणि धर्माध्यारोपो दृश्यते। करपल्लवा-

---

मन्थनं कृतम् इदानीं तत्प्राप्तावपि कथं मम क्लेशदानमिति भावः। ननु निद्रार्थं मदाश्रयणमिति चेत् तदपि न इत्याह निद्रामिति अनलसम् आलस्यरहितं कर्मसु अभ्युद्यतमिति भावः मनो यस्य तथाभूतस्य अस्य पूर्वं कार्य्यनिर्वहणात् प्रागित्यर्थः निद्रामपि नैव सम्भावयामि सर्वं जगद्व्यापारं समाप्य अलसमनसोऽस्य निद्राश्रवणादिति भावः। ननु सेतुबन्धनार्थं पुनरागमनमित्याशङ्क्य तदपि नेत्याह सेतुमिति पुनः अयम् अखिलद्वीपनाथानुयातः समस्तद्वीपाधिपतिपरिवेष्टितः कस्मात् सेतुं बध्नाति सेतुबन्धने वानरचमूमात्रसहायता आसीदेतत् तु तथा नेति भावः। हे राजन्नित्यर्थः हे राजन्। त्वयि आयाते तीरभूमौ उपस्थिते सति इति पूर्वोक्तान् वितर्कान् दधतः पयोधेः समुद्रस्य कम्प इव आभाति प्रकाशते। भगवद्विष्णुसदृशस्त्वमिति भावः। राजप्रशस्तिरियम् ॥१२९॥

मौलितं लक्षयति समाधिमिति समाधिमेव मौलितं मन्यन्ते। तदपि धर्माणां धर्मिणां वा अन्यवस्तुनि अध्यासे आरोपे सति द्विधा भवति धर्माध्यासः धर्म्यध्यासश्चेति ॥ १३० ॥

पल्लवितमिव करपल्लवैः प्रस्फुटितमिव नयनैः।
फलितमिव पीनपयोधरैरार्य्याया लावण्यम् ॥ सं

पल्लवितमिति। आर्य्यायाः मान्यायाः भवत्या इति भावः लावण्यं सौन्दर्य्यं

दीनां चानुपात्तव्यापारहेतुत्वेन साधकतमत्वेन वा प्राधान्यं लक्ष्यते। सोऽयमन्यवस्तुनि पुनरन्यधर्माणामिव आरोपेण मौलितं नाम समाधिभेदो भवति। स तु उद्देशे समाध्युक्तिः इत्युक्तिग्रहणात् लभ्यते ॥ १३१ ॥

धर्माणां धर्मिणश्च यथा,—

देहो व्व पडइ दिअहो कण्ठच्छेओ व्व लोहिओ होइ रई।
गलइ रुहिरं व्व सइ घोलइ केसकसणं सिरम्मि अ तिमिरं ॥

अत्र देहादयो यथोक्तक्रियावन्तो जन्तुबधक्रियायां निबद्धा दिवसादिभिः उपमेया दिवसावसानक्रियायां मौलिताः तदेतद् गुणक्रियावतां द्रव्याणां प्रधानक्रियाध्यारोपे धर्मिधर्माध्यासे मौलितं नाम समाधेरेव भेदो भवति ॥ १३२ ॥

इति समाध्युक्त्यलङ्कारनिरूपणम् ॥

यत्रोपमानादेवैतदुपमेयं प्रतीयते।
अतिप्रसिद्धेस्तामाहुः समासोक्तिं मनीषिणः ॥ १३३ ॥

करा: पल्लवा इव तैः पल्लवितमिव सञ्जातपल्लवमिव नयनैः प्रस्फुटितमिव विकसितमिव, पीनपयोधरैः फलितमिव सञ्जातफलमिव ॥ १३१ ॥

देह इव पतति दिवसः कण्ठच्छेद इव लोहितो भवति रविः।
गलति रुधिरमिव संज्ञा घूर्णते केश इव शिरसि च तिमिरम् ॥ स

देह इति। दिवसः देह इव पतति दिवसावसान देहावसानमिव दुर्विषह-मिति भावः रविः सूर्यः कण्ठच्छेद इव छिन्नकण्ठ इव लोहितः रक्तः भवति रवेर्लौहित्यं सन्ध्याकालभवं कण्ठच्छेदवत् क्लेशकरमिति भावः। संज्ञा चेतना रुधिरमिव गलति अपगच्छति छिन्नकण्ठात् यथा रुधिरगलनं तथा देहात् अस्मात् संज्ञागम इति भावः तिमिरम् अन्धकारः शिरसि केश इव घूर्णते प्रसरति च विरहिणीनां केशसंयमननिषेधादिति भावः विरहिणीनां दिवावसानविधुराणाम् उक्तिरियम् ॥ १३२ ॥

समासोक्तिं लक्षयति यत्रेति। यत्र अतिप्रसिद्धेः हेतोः उपमानादेव एतस्य

प्रतीयमाने वाच्ये वा सादृश्ये सोपजायते।
श्लाघां गर्हामुभे नोभे तदुपाधीन् प्रचक्षते॥ १३४॥
विशेष्यमात्रभिन्नापि तुल्याकारविशेषणा।
अस्त्यसावपराप्यस्ति तुल्यातुल्यविशेषणा॥ १३५॥
संक्षेपेणोच्यते यस्मात् समासोक्तिरियं ततः।
सैवान्योक्तिरनन्योक्तिरुभयोक्तिश्च कथ्यते॥ १३६॥

तत्र प्रतीयमानसादृश्या श्लाघावती यथा,—

उत्तुङ्गे कृतसंश्रयस्य शिखरिण्युच्चावचग्रावणि
न्यग्रोधस्य किमङ्ग तस्य वचसा श्लाघासु पर्य्याप्यते।
बन्धुर्वा स पुराकृतः किमथवा सत्कर्मणां सञ्चयो
मार्गे रूक्षविपत्रशाखिनि जनो यं प्राप्य विश्राम्यति॥

अत्र न्यग्रोधेनैव उपमानेन प्रतीयमानसादृश्यस्य वर्णनीयवदा-

उपमानस्य उपमेयं प्रतीयते, मनीषिणः विद्वांसः तां समासोक्तिं आहुः कथयन्ति॥ १३३॥

प्रतीयमाने इति। सा सादृश्ये प्रतीयमाने गम्यमाने वा वाच्ये अभिधीयमाने सति उपजायते भवति। प्रतीयमानसादृश्या वाच्यसादृश्या च समासोक्तौ श्लाघां प्रशंसां गर्हां निन्दां उभे न उभे च भजत इति शेषः तदेवं श्लाघावती प्रतीयमानसादृश्या, गर्हावती प्रतीयमानसादृश्या श्लाघावती वाच्यसादृश्या गर्हावती वाच्यसादृश्या चेति श्लाघागर्हा उभयवतीति चेति पञ्चविधा नोभयवती चेति षड्विधा समासोक्तिरिति फलितं तदुपाधीन् तस्याः समासोक्तेः उपाधीन् धर्मान् विशेषान् वक्ष्यमाणरूपानिति भावः प्रचक्षते कथयन्ति बुधा इति शेषः॥ १३४॥

विशेष्येति। स समासोक्तिः विशेष्यमात्रेण भिन्ना भेदवती अपि तुल्याकारविशेषणा अस्ति। अपरापि तुल्यातुल्यविशेषणा अस्ति॥ १३५॥

संक्षेपेणेति। यस्मात् संक्षेपेण उच्यते ततः तस्मात् हेतोः इयं समासोक्तिरिति व्युत्पत्त्या लभ्यते। सैव समासोक्तिः अनन्योक्तिः अन्योक्तिः उभयोक्तिश्च कथ्यते॥ १३६॥

उत्तुङ्गे इति। अङ्गेत्यामन्त्रणम् अङ्ग भोः उत्तुङ्गे अत्युन्नते उच्चावचग्रावणि विविधप्रस्तरवति शिखरिणि पर्वते कृतसंश्रयस्य प्ररूढस्येति यावत् तस्य न्यग्रोधस्य

न्योपमेयस्य उक्तत्वात् तच्छ्लाघयैव एतच्छ्लाघा प्रतीयते इति सेयं प्रतीयमानसादृश्या श्लाघावती समासोक्तिः ॥ १३७ ॥

सैव गर्हावती यथा,—

किं जातोऽसि चतुष्पथे यदि घनच्छायोऽसि किं छायया
सम्पन्नः फलितोऽसि किं यदि फलैः पूर्णोऽसि किं सन्नतः ।
हे सद्वृक्ष ! सहस्व सम्प्रति शिखाशाखाशताकर्षण-
क्षोभोन्मोटनभञ्जनानि जनतः स्वैरेव दुश्चेष्टितैः ॥

अत्र उपमानभूतस्य सद्वृक्षस्य व्याजगर्हणया तदुपमेयः कोऽपि सत्पुरुषो विगर्ह्यत इति सेयं प्रतीयमानसादृश्या गर्हावती नाम समासोक्तिः ॥ १३८ ॥

सैव उभयवती यथा,—

निष्कन्दामरविन्दिनीं स्वपुटितोद्देशां स्थलीं पल्वले
जम्बालाविलमम्बु कर्तुमपरा सूते वराही सुतान् ।

वटस्य वचसा वाक्येन श्लाघासु प्रशंसासु विषये किं पर्य्याप्यते किं परिसमाप्यते ? न किमपीत्यर्थः वचनातीतप्रशस्तिरयमिति भावः । स न्यग्रोधः पुराकृतः पूर्वलब्धः बन्धुर्वा किम् ? अथवा सत्कर्मणां पुण्यकार्य्याणां सञ्चयः समूहः पान्थजनानामिति शेषः । जनः रूक्षविपचशाखिनि कर्कशपचशूल्यतरौ मार्गे पथि यं प्राप्य आश्रित्य विश्राम्यति अध्वक्लेशमपनयतीत्यर्थः ॥ १३७ ॥

किमिति । यदि घना निविड़ा छाया यस्य तथाभूतः असि भवसि तदा चतुर्णां पथानां समाहारः चतुष्पथं तस्मिन् सर्वदिगागतसमूहे इति भावः बहुजनाश्रितवंशे इति ध्वनिः किं कथं जातोऽपि उत्पन्नोऽसि ? छायया सम्पन्नः सन् किं फलितः सञ्जातफलः असि ? यदि फलैः पूर्णः असि ? ततः तदा किं नतः नम्र इत्यलभ्यफल इति भावः असीति शेषः हे सद्वृक्ष ! सुतरो ! सम्प्रति इदानीं स्वैरेव निजैरेव दुश्चेष्टितैः दुष्कृतैः जनतः लोकात् शिखायाः चूडायाः अग्रविटपस्येत्यर्थः शाखाशतानाञ्च आकर्षणं क्षोभः शातनम् उन्मोटनं भञ्जनं तानि सहस्व सह्यानि कुरु ॥ १३८ ॥

निष्कन्दामिति । अपरा अन्या वराही शूकरी अरविन्दिनीं पद्मिनीं निष्कन्दां

दंष्ट्रायां चतुरर्णवोर्मिपटलैराप्लावितायामियम्
यस्या एव शिशोः स्थिता विपदि भूः सा पुत्रिणी पोत्रिणी ॥

अत्र पूर्वार्द्धे गर्हा उत्तरार्द्धे श्लाघा गम्यते। सेयं प्रतीयमानसादृश्या उभयवती समासोक्तिः ॥ १३९ ॥

अनुभयवती यथा,—

इतः स्वपिति केशवः कुलमितस्तदीयद्विषाम्
इतश्च शरणार्थिनः शिखरिपक्षिणः शेरते।
इतोऽपि वड़वानलः सह समस्तसंवर्त्तकैः
अहो विततमूर्जितं भरसहञ्च सिन्धो र्वपुः ॥

अत्र गर्हा श्लाघा वा विस्मयोक्तावेव अस्तमयते। सेयं प्रतीयमानसादृश्या अनुभयवती नाम समासोक्तिः ॥ १४० ॥

निर्मूषां स्थलीं भूमिं स्थपुटितः विषमीकृतः कुट्टित इत्यर्थः उद्देशो भागो यस्याः तथाभूतां तथा पल्वले अल्पसरसि अम्बु जलं जम्बालाविलं कर्द्दममलिनं कर्त्तुं सूतान् शावकान् सूते जनयति किन्तु इयं भूः पृथ्वी विपदि कल्पान्तसङ्कटे यस्याः शिशोः शावकस्य चतुरर्णवोर्मिपटलैः चतुःसमुद्रतरङ्गसञ्चयैः आप्लावितायाम् आपूरितायां दंष्ट्रायां दशनमण्डले दण्डाग्रे इत्यर्थः स्थिता स्थितिमकृतेत्यर्थः सा पोत्रिणी वराही पुत्रिणी पुत्रवती। जगति बहुपुत्रप्रसविनी अस्ति किन्तु ते पुत्राः केवलं लोकानिष्टाय, किन्तु कस्या अपि रत्नभूतपुत्रप्रसवेन लोकानां महोपकारः साध्यते इति प्रतीयते इति प्रतीयमानसादृश्या समासोक्तिः ॥ १३९ ॥

इत इति। इतः अस्मिन् विभागे इति भावः केशवः नारायणः स्वपिति निद्राति इतः अत्र विभागे तस्य केशवस्य इमे तदीयाः द्विषः शत्रवः अथवा तस्य इमे तदीया देवा इत्यर्थः तेषां द्विषः शत्रवः असुरा इत्यर्थः तेषां कुलं वृन्दं देवैः पराजितमिति भावः तिष्ठतीति शेषः। इतश्च अस्मिन् प्रदेशे शरणार्थिनः पक्षच्छेदीयते शक्रे आश्रयार्थिन इत्यर्थः शिखरिणः पर्वता एव पक्षिणः पक्षवन्तः पर्वता इत्यर्थः शेरते तिष्ठन्तीति भावः इतोऽपि अस्मिंश्च प्रदेशे समस्तैः सर्वैः संवर्त्तकैः तदाख्यमेघविशेषैः सह वड़वानलः अस्तीति शेषः अतः सिन्धोः समु-

अभिधीयमानसादृश्या श्लाघावती तुल्याकारविशेषणा यथा,

नालस्य प्रसरो जलेष्वपि कृतावासस्य कोषे रुचिः
दण्डे कर्कशता मुखे च मृदुता मित्रे महान् प्रश्रयः।
आमूलं गुणसंग्रहव्यसनिता द्वेषश्च दोषाकरे
यस्यै सा स्थितिरम्बुजस्य वसतिर्युक्तैव तत्र श्रियः॥

अत्र अम्बुरुहसत्पुरुषयोः परस्परमुपमानोपमेयभावस्य अतिशयप्रसिद्धेः उपममानेनैव श्लेषवत् तुल्यविशेषणपदाभिधीयमानसादृश्यमुपमानमेव अवगम्यते। सेयम् अभिधीयमानसादृश्या श्लाघावती तुल्यविशेषणा नाम समासोक्तिः॥ १४१॥

प्रतीयमानाभिधीयमानसादृश्या श्लाघागर्हावती तुल्यातुल्यविशेषणा यथा,—

उपाध्वं तत् पान्थाः पुनरपि सरो मार्गतिलकम्
यदासाद्य स्वेच्छं विलसथ विलीनक्लमभराः।
इतस्तु चाराब्धेर्जरठकमठक्षिप्तपयसो
निवृत्तिः कल्याणी न पुनरवतारः कथमपि॥

इस्य वपुः शरीरम् अहो आश्चर्यं विततं विस्तृतम् अहो ऊर्जितम् बलवत् अहो भारसहत्वं भारक्षमत्वं॥ १४०॥

नालस्येति। जलेषु तोयेषु मध्ये उलयोरैक्यात् जडेष्विति गम्यते कृतः आवासः स्थितिः येन तथाभूतस्यापि यस्य अम्बुजस्य पद्मस्य नालस्य दण्डस्य प्रसरः समुन्नतिः आलस्य प्रसरः न इति गम्यते। जडमध्ये कृतवासस्य आलस्यसम्भव इति भावः कोषे कुड्मले घनसञ्चये इति गम्यते रुचिः अनुरागः। दण्डे नालदण्डे दुष्टनिग्रहे इति गम्यते कर्कशता काठिन्यं निर्दयता च। मुखे उपरिभागे वचने च मृदुता कोमलता, मित्रे सूर्ये सुहृदि च महान् प्रश्रयः विनयः प्रीतिरित्यर्थः इत्थम् आमूलं मूलादारभ्य गुणानां नालस्य प्रसरादीनां संग्रहे समाश्रये व्यसनिता आसक्तिः अनुराग इति यावत् दोषाकरे चन्द्रे दोषाणां दुराचाराणाम् आकरः समूहः तस्मिन्निति गम्यते द्वेषश्च विरोधश्चेत्यर्थः एषा उक्तरूपा स्थितिर्मर्यादा सदाचार इत्यर्थः तत्र अम्बुजे श्रियः शोभायाः लक्ष्म्याश्च वसतिः स्थितिः युक्तैव अनुरूपैव॥ १४१॥

उपाध्वमिति। हे पान्थाः पथिकाः! पुनरपि भूयोऽपि तत् मार्गतिलकम्

अत्र पूर्वार्द्धे अभिधीयमानसादृश्ययोः श्लाघा पश्चिमार्द्धे तु प्रतीयमानसादृश्ययोर्गर्हा अवगम्यते सेयम् उभयवती तुल्यातुल्यविशेषणाभिधीयमानप्रतीयमानसादृश्या समासोक्तिः ॥१४२॥

अन्योक्तिर्द्विधा स्वजातौ जात्यन्तरे च। तयोः स्वजातौ यथा,—

लक्ष्मीपयोधरोत्सङ्गकुङ्कुमारुणितो हरेः।
बलिरेष स येनास्य भिक्षापात्रीकृतः करः॥

अत्र हरिशब्देन बलिशब्देन वा कश्चित् समानेतिवृत्तः पुंविशेष एव उच्यते, सेयं स्वजातिविषयान्योक्तिः संक्षेपोक्तिरूपत्वात् समासोक्तिरेव ॥ १४३ ॥

जात्यन्तरे यथा,—

पिबन् मधु यथाकामं भ्रमरः फुल्लपङ्कजे।
अप्यसन्नद्धसौरभ्यं पश्य चुम्बति कुड्मलम्॥

अत्र भ्रमरशब्देन कश्चित् कामी फुल्लपङ्कजशब्देन कापि प्रौढाङ्गना कुड्मलशब्देन कापि मुग्धाङ्गना अभिधीयते। सेयम् अन्यजातिविषयान्योक्तिः समासोक्तिरेव भवति। अन्योक्ति-

---

अध्वनो ललाटभूषणभूतमित्यर्थः सरः सरोवरम् उपाध्व सेवध्वम् अवगाहध्वमिति यावत् यत् सरः आसाद्य प्राप्य विलीनाः गताः क्लमभराः क्लान्तिसमूहा येषां तथाभूताः सन्तः स्वेच्छं स्वच्छन्द विलसथ विहरथ। जरठेन अतिस्थविरेण कमठेन कूर्मेण चिप्तानि विलोड़ितानि पयांसि जलानि यस्य तादृशस्य भीषणजलजन्तुशीलिन इति भावः इतः अस्मात् चाराब्धेः लवणसमुद्रात्तु निवृत्तिः विरतिः कल्याणी शुभकरीत्यर्थः कथमपि पुनरत्र अवतारः अवतरणम् अवगाहनमिति भावः न कल्याणी कल्याणकर इति शेषः। अत्र सज्जनदुर्जनयोः श्लाघा गर्हे गम्येते॥१४२॥

लक्ष्मीति। एषः स बलिः दानवराजः येन बलिना लक्ष्म्याः पयोधरयोः स्तनयोः उत्सङ्गे मध्ये यः कुङ्कुमः गन्धचूर्णाङ्गरागविशेषः तेन अरुणितः रञ्जितः अस्य हरेः वामनरूपिणो विष्णोः कर: पाणिः भिक्षापात्रीकृतः भिक्षाभाजनं कृत इत्यर्थः॥ १४३ ॥

पिबन्निति। भ्रमरः फुल्लपङ्कजे विकसितकमले यथाकामं यथेच्छं मधु

शब्देन इह अध्यासविषया तद्भावापत्तिरुच्यते यथैष ब्रह्मदत्त इति। सा द्विधा शुद्धा चित्रा च ॥ १४४ ॥

तयोः शुद्धा यथा,—

सुधाबद्धग्रामैरुपवनचकोरैरनुसृतां
किरन् ज्योत्स्नामच्छां नवलवलिपाकप्रणयिनीम्।
उप प्राकाराग्रं प्रहिणु नयने तर्कय मनाक्
अनाकाशे कोऽयं गलितहरिणः शीतकिरणः ॥

अत्र कस्याश्चित् मुखे चन्द्रमसमध्यास्य कश्चिदेवं ब्रूते सा चेयं पूर्वार्द्धे अभिधीयमानतुल्यविशेषणा पश्चिमार्द्धे पुनरनाकाशे कोऽयं गलितहरिण इत्यत्र अतुल्यविशेषणा समासोक्तिरेव अनन्योक्तिः एकस्यैव चाध्यासात् इयं शुद्धेत्युच्यते ॥ १४५ ॥

चित्रा यथा,—

कमलमनभ्रसि कमले च कुवलये तानि कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥

अत्र अध्यासः पूर्ववद्वैचित्र्यञ्च निगदेनैव व्याख्यातं सेयम् अन-

---

पिबन् अपि असन्नद्धम् अनुपगत सौरभ्य यस्य तथाभूतमपि कुड्मलं चुम्बति पश्य अवलोकय ॥ १४४ ॥

सुधेति। सुधायाम् अमृतपाने इति भावः बद्धः समवेतः ग्रामः सङ्घातः येषां तथाभूतैः उपवनचकोरैः आरामचकोरपक्षिभिः अनुसृताम् अनुगतां नवः लवलिपाकः पक्वलवलिफलमित्यर्थः तस्य प्रणयवतीं तत् सदृशीमिति भावः अच्छां विशदां ज्योत्स्नां चन्द्रिका प्रभामिति भावः किरन् वर्षन् कोऽयं गलितहरिणः निष्कलङ्क इत्यर्थः शीतकिरणः चन्द्रः अनाकाशे आकाशभिन्ने देशे वर्त्तते इति शेषः उपप्राकाराग्र प्राकाराग्रसमीपे नयने प्रहिणु निक्षिप व्यापारयेत्यर्थः मनाक् ईषत् तर्कय विचारय ॥ १४५ ॥

कमलमिति। अनभ्रसि निर्जलदेशे इत्यर्थः कमलं पद्मं वर्त्तते इति शेषः कमले मुखे च कुवलये नीलोत्पले द्वे वर्त्तेते इति शेषः तानि कमलकुवलयानि कनकलतिकायां स्वर्णलतायां वर्त्तन्ते इति शेषः सा च कनकलतिका सुकुमारा

न्योक्तिः समासोक्तिरेव अनेकाध्यासवैचित्र्यात् चित्रा इति उच्यते ॥ १४६ ॥

उभयोक्तिर्यथा,—

लावण्यसिन्धुरपरैव हि केयमत्र
यत्रोत्पलानि शशिना सह संप्लवन्ते।
उन्मज्जति द्विरदकुम्भतटी च यत्र
यत्रापरे कदलिकाण्डमृणालदण्डाः ॥

अत्र अपूर्वेयं लावण्यसिन्धुः इत्यन्योक्तिः यत्र उत्पलानि शशिना सह संप्लवन्त इत्यनन्योक्तिः सेयम् उभययोगादुभयोक्तिरपदिश्यते। उपलक्षणञ्च एतत्। तेन अन्या अपि या उपमानोपमेयविषये संक्षेपोक्तिः सापि समासोक्तिरेव भवति ॥ १४७ ॥

यथा,—

इन्दुर्लिप्त इवाञ्जनेन जड़िता दृष्टिर्मृगीणामिव
प्रम्लानारुणिमेव विद्रुमलता श्यामेव हेमप्रभा।
पारुष्यं कलया च कोकिलवधूकण्ठेष्विव प्रस्तुतम्
सीतायाः पुरतश्च हन्त शिखिनां बर्हाः सगर्हा इव ॥

सुकोमला सुभगा वल्लभा अतिप्रीतिकरी चेत्यर्थः का इयम् उत्पातपरम्परा विपत्सङ्ततिरित्यर्थः ॥ १४६ ॥

लावण्येति। अत्र प्रदेशे का इयम् अपरैव अन्यैव लावण्यसिन्धुः लावण्यसरित् अस्तीति शेषः यत्र लावण्यसिन्धौ उत्पलानि कुमदानि शशिना चन्द्रेण सह संप्लवन्ते सन्तरन्ति विहरन्तीत्यर्थः। यत्र लावण्यसिन्धौ द्विरदस्य हस्तिनः कुम्भतटी च गजकुम्भद्वयञ्चेति यावत् उन्मज्जति उन्नत्या विराजते यत्र च लावण्यसिन्धौ अपरे अन्ये कदलिकाण्डमृणालदण्डाः रम्भास्तम्भौ मृणालदण्डौ चेत्यर्थः विलसन्तीति शेषः। कस्याश्चित् नायिकायाः सुखनेत्रसनीरुभुजदर्शनविमुग्धस्य कामिन उक्तिरियम् ॥ १४७ ॥

इन्दुरिति। सीतायाः पुरतः अग्रतः इन्दुः चन्द्रः अञ्जनेन कज्जलेन लिप्त इव

अत्र संक्षेपतः सीताशब्दवाच्यस्य मुखादेरवयवसमूहस्य आश्रयत इन्दुरञ्जनेन इव लिप्तो जड़ितेव मृगीणां दृष्टिः प्रम्लानमिव आरुण्यं विद्रुमस्य श्यामेव हेमकान्तिः परुषा इव कोकिलालापाः सगर्हा इव शिखिनां बर्हा इति उत्प्रेक्षोक्तेः अनुक्तान्यपि तदुपमेयानि मुखादीनि प्रतीयन्ते। सेयमपि संक्षेपोक्तिः समासोक्तिरेव भवति। कः पुनः समासोक्तेः समाध्युक्तेर्वा विशेषः उच्यते। यत्र प्राकरणिकेऽप्राकरणिको धर्मोऽध्यास्यते सा समाध्युक्तिर्यथा। "असहन्ति व्व कि लिम्मइ पिअअमपच्चक्खदूसणं दिणलच्छी" इति। यत्र पुनः अप्राकरणिके प्राकरणिकधर्मः सा समासोक्तिर्यथा। पिबन् मधु यथाकामं भ्रमरः फुल्लपङ्कजे इति। ननु धर्मिणोऽध्यासे समानमिति चेत् न। स त्वं तत्वं कथय भवता को हतस्तत्र पूर्वमित्यादिषु अनाकाशे कोऽयं गलितहरिणः शीतकिरण इत्यादिषु च प्रव्यक्त एव अध्यासविशेषो दृश्यते। एकत्र मनसा अन्यत्र तु वचसेति सोऽयं समाध्युक्तेः समासोक्तेश्च भेदो भवति ॥ १४८ ॥

इति समासोक्त्यलङ्कारनिरूपणम् ।

अन्यथावस्थितं वस्तु यस्यामुत्प्रेक्ष्यतेऽन्यथा ।
द्रव्यं गुणः क्रिया वापि तामुत्प्रेक्षां प्रचक्षते ॥ १४९ ॥

मृगीणां दृष्टिः जड़ितेव जाड्य गतेव, विद्रुमलता प्रवालवल्ली प्रकर्षेण म्लानः रक्तिमा यस्याः तथाभूतेव, हेम्नः काञ्चनस्य प्रभा श्यामेव मलिनेव, कोकिलवधूकण्ठेषु कलया मधुरेण स्वरविशेषेण पारुष्यं कार्कश्यं प्रस्तुतमिव गृहीतमिव, शिखिनां मयूराणां बर्हाः पिच्छानि सगर्हा इव निन्द्या इव इन्तेति आश्चर्यसूचकमव्ययम् ॥ १४८ ॥

उत्प्रेक्षा लक्षयति अन्यथेति। अन्यथा अन्यप्रकारेण अवस्थितं वस्तु द्रव्यं गुणः क्रिया वा यस्याम् अन्यथा अन्येन प्रकारेण उत्प्रेक्ष्यते सम्भाव्यते तामुत्प्रेक्षां प्रचक्षते कथयन्ति तदेवमुत्प्रेक्षा द्रव्योत्प्रेक्षा गुणोत्प्रेक्षा क्रियोत्प्रेक्षा चेति त्रिधा भवति ॥ १४९ ॥

तासु द्रव्योत्प्रेक्षा यथा,—

देहस्था दर्पणे यस्य पश्यति प्रतिमामुमा।
अन्यार्द्धार्द्धमिवोत्पन्नमर्द्धनारीश्वरान्तरम्॥

अत्र प्रतिबिम्बरूपेण दर्पणेऽन्यथावस्थितस्य अर्द्धनारीश्वररूपलक्षणस्य द्रव्यस्य यदपरार्द्धोत्पन्नार्द्ध-नारीश्वरान्तर-रूपेण द्रव्यान्तररूपेण उत्प्रेक्षणं सेयम् उत्प्रेक्षा द्रव्योत्प्रेक्षेति भवन्ति॥ १५०॥

गुणोत्प्रेक्षा यथा,—

पल्लविअं विअ करपल्लवेहिं पप्फुल्लिअं व्व णअणेहिं।
फलिअं विअ पीणपओहरेहिं अज्जाए लावण्णं॥

अत्र करपल्लवादिरूपेण अन्यथावस्थितस्य अङ्गलावण्यलक्षणस्य यदेतत्पल्लवितत्वादिरूपेण अन्यथोत्प्रेक्षणं सेयम् उत्प्रेक्षा गुणोत्प्रेक्षेति भवति॥ १५१॥

क्रियोत्प्रेक्षा यथा,—

सेनागजाः स्वकरपल्लवलेखनीभिः
गण्डस्थलान्मदमसीर्मुहुराददानाः।

देहस्थेति। उमा पार्वती देहस्था ईश्वरस्य देहे अर्द्धरूपेण स्थितेत्यर्थः सती दर्पणे प्रतिमाम् अन्यार्द्धार्द्धमिव उत्पन्नम् अतएव अर्द्धनारीश्वरान्तरम् अन्यप्रकारम् अर्द्धनारीस्वरूपमित्यर्थः वामांशे ईश्वरार्द्धे दक्षिणांशे स्वस्यार्द्धं दर्पणे वैपरीत्यदर्शनादिति भावः पश्यति अवलोकयति॥ १५०॥

पल्लवितमिव करपल्लवैः प्रस्फुटितमिव नयनैः।
फलितमिव पीनपयोधरैरार्य्याया लावण्यम्॥ सं

पल्लवितमिति। आर्य्याया माननीयायाः सख्या देव्या वा। लावण्यं मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते इत्युक्तलक्षणा कान्तिरित्यर्थः करा एव पल्लवाः तैः पल्लवितमिव सञ्जातपल्लवमिव नयनैः प्रस्फुटितमिव विकसितमिव पीनाः स्थूलाः पयोधराः स्तनाः तैः फलितमिव सञ्जातफलमिव॥ १५१॥

मन्ये नरेन्द्र ! तव तोयधितीरतालीपत्रोदरेषु विजयस्तुतिमालिखन्ति ॥

अत्र सेनागजानां गण्डस्थलेभ्यो लेखन्याकारैः करैर्मसीरूपस्य मदपयसो यदादानं यश्च अस्य तीरतालीपत्रोदरेषु मद्भावर्णतया निक्षेपः स उक्तरूपेण अन्यथोत्प्रेक्ष्यते इति सेयम् उत्प्रेक्षा क्रियोत्प्रेक्षा भवति ॥ १५२ ॥

उत्प्रेक्षावयवो यश्च या चोत्प्रेक्षोपमानता ।
मतश्चेति न भिद्यन्ते तान्युत्प्रेक्षास्वरूपतः ॥ १५३ ॥

तत्र उत्प्रेक्षावयवो यथा,—

अङ्गुलीभिरिव केशसञ्चयं संनिगृह्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥

अत्र अङ्गुलीभिः केशेषु गृहीत्वा प्रियामुखं चुम्बति सा च लोचने निमीलयतीति प्रायोवादः । तत्र मुखचुम्बनादि-

---

सेनागजा इति । हे नरेन्द्र ! नृपते ! सेनागजाः रणहस्तिन इत्यर्थः मुहुः पुनः पुनः निजाः करपल्लवाः शुण्डाविस्तारा एव लेखन्यः ताभिः गण्डस्थलात् स्वात् कपोलदेशात् मदाः दानवारीण्येव मसयः ता आददानाः गृह्णन्तः सन्तः तोयधेः समुद्रस्य तीरेषु याः ताल्यः तालीवनानि तासां पत्रोदरेषु पत्राभ्यन्तरेषु तव विजयस्तुतिं विजयप्रशस्तिम् आलिखन्ति मन्ये उत्प्रेक्षे अत्र मन्ये इत्युत्प्रेक्षावाचकम् । मन्ये शङ्के ध्रुवं प्रायोनूनमित्येवमादयः । उत्प्रेक्षावाचकाः शब्दा इव शब्दोऽपि तादृश इत्युक्तेः ॥ १५२ ॥

उत्प्रेक्षेति । यस्य उत्प्रेक्षावयवः या च उत्प्रेक्षोपमानता, मतश्च तदाख्य उत्प्रेक्षाविशेषश्चेत्यर्थः तानि उत्प्रेक्षास्वरूपतः उत्प्रेक्षालक्षणादित्यर्थः न भिद्यन्ते न पृथगभिधानं लभन्ते इति भावः ॥१५३॥

अङ्गुलीभिरिति । शशी चन्द्रः अङ्गुलीभिः केशसञ्चयं कुन्तलनिचयमिव मरीचिभिः मयूखैः तिमिरम् अन्धकारं सन्निगृह्य निरस्य कुड्मलीकृतानि मुकुलीकृतानि सरोजानि लोचनानीव यस्य तथाभूतं रजन्या मुखं चुम्बतीव ॥

क्रिया प्रधानमङ्गीभूता प्रतीयते, केशग्रहणाच्चिनिमीलनेन चाङ्गभूते प्रधाने तत्र अङ्गीभूतायाः क्रियायाः उत्प्रेक्षणेनावयवभूता क्रियोत्प्रेक्षिता भवति। यथा हि कुड्मलीकृतसरोजलोचनम् इत्यत्र नोत्प्रेक्षापदम् एवमङ्गुलीमरीचिभिः तिमिरकेशसञ्चयं संनिगृह्य इत्यत्रापि तत्र प्राप्नोति। मरीच्यङ्गुलिसंनिगृहीततिमिरकेशसञ्चयमित्येवं वा वक्तव्यं भवति। तत्र योऽयमवयवक्रियायामपि अन्यपदार्थोक्तद्वितीयावयवक्रियाविलक्षण इव प्रयोगेण पृथक् पदतया वाक्यकल्पः, स इव अस्यापि व्याख्यानपरत्वेन अप्यनुयोज्यमानः कविभिः उत्प्रेक्षावयव इत्युच्यते। अन्ये पुनर्यत्र प्रधानक्रिया नोत्प्रेक्ष्यते अवयवक्रिया तु उत्प्रेक्ष्यते तम् उत्प्रेक्षावयवं वर्णयन्ति ॥१५४॥

यथा,—

लीनेव प्रतिबिम्बितेव लिखितेवोत्कीर्णरूपेव च
प्रत्युप्तेव च वज्रलेपघटितेवान्तर्निखातेव च।
सा नश्चेतसि कीलितेव विशिखैश्चेतोभुवः पञ्चभिः
चिन्तासन्ततितन्तुजालनिविड़स्यूतेव लग्ना प्रिया ॥

तेषां मते पूर्वोदाहरणमुत्प्रेक्षावयवो न भवति ॥ १५५ ॥

उत्प्रेक्षोपमा यथा,—

किंशुकव्यपदेशेन तरुमारुह्य सर्वतः।
दग्धादग्धामरण्यानीं पश्यतीव विभावसुः ॥

लीनेति। सा प्रिया नः अस्माकं चेतसि मनसि लीनेव लयं गतेव, प्रतिबिम्बितेव प्रतिफलितेव उत्कीर्णं खोदितं रूपं यस्याः तथाभूतेव चेतोभुवः कामस्य पञ्चभिः विशिखैः शरैः कीलितेव विद्धेव, तथा चिन्तानां मनोरथानां सन्ततिः समूह एव तन्तुजालं सूत्रनिचयः तेन स्यूतेव सीवनं गतेव लग्ना संसक्ता। कथमपि मनसोऽभिष्क्रष्टुं न शक्येति भावः। अत्र प्रधानक्रिया लग्ना नोत्प्रेक्ष्यते ॥ १५४—१५५ ॥

किंशुकेति। विभावसुः अग्निः किंशुकानां पलाशकुसुमानां व्यपदेशेन छलेन

अत्र व्यपदेशशब्देन किंशुककुसुमानामग्निसादृश्यमभिधाय दर्शनक्रियोत्प्रेक्ष्यत इति सेयम् उत्प्रेक्षोपमा। पूर्वस्मिन्नपि उदाहरणे मरीचिभिः अङ्गुलीभिरिव तिमिरं केशसञ्चयमिव संनिगृह्य इत्युपमानार्थानुप्रवेश उत्प्रेक्षायां द्रष्टव्यः। सेयम् उत्प्रेक्षोपमा चोत्प्रेक्षैव भवति ॥ १५६ ॥

मतं यथा,—

यदेतच्चन्द्रान्तर्जलदलवलीलां वितनुते
तदाचष्टे लोकः शशक इति नो मां प्रति तथा।
अहं त्विन्दुं मन्ये त्वदरिविरहाक्रान्ततरुणी-
कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुम् ॥

अत्र कटाक्षोल्कापातव्रणकिणकलङ्काङ्कितततनुमिन्दुम् अहं मन्ये इत्यनेन स्वमतद्वारकमुत्प्रेक्षायाः समर्थनं कृतमित्ययं मताभिधान उत्प्रेक्षा या एव प्रकारः ॥ १५७ ॥

इति उत्प्रेक्षालङ्कारनिरूपणम्।

अप्रस्तुतप्रशंसा स्यादस्तोतव्यस्य या स्तुतिः।
कुतोऽपि हेतोर्वाच्या च प्रत्येतव्या च सोच्यते ॥ १५८ ॥

सर्वतः समन्तात् तरुं वृक्षम् आरुह्य दग्धा अदग्धा तां कियतीं दग्धां कियतीमदग्धामित्यर्थः अरण्यानीं महारण्यं पश्यतीव अवलोकयतीव ॥ १५६ ॥

यदिति। चन्द्रान्तः चन्द्रमण्डले यदेतत् वस्त्विति शेषः जलदलवस्य मेघखण्डस्य लीलां विलासं वितनुते धत्ते इत्यर्थः कृष्णमेघबिन्दुरिवाभातीति यावत् लोकः तत् शशकः मृगविशेष इति आचष्टे कथयति मां प्रति नो तथा प्रतीभातीति शेषः अहं तत् शशकं नैव ब्रवीमि इति भावः। अहन्तु इन्दुं चन्द्रं तव अरीणां शत्रूणां त्वया निहतानामिति भावः विरहेण वियोगेन आक्रान्ताः विधुरिता इत्यर्थः याः तरुण्यः युवत्यः तासां कटाक्षा एव उल्काः तासां पातः उद्दीपकत्वेन क्रोधात् निक्षेप इति भावः तेन यद् व्रणं क्षतं दहनमिति यावत् तस्य यः किणः कृष्णवर्णचिह्नविशेषः, स एव कलङ्कः अपयशश्चिह्नविशेषः तेन अङ्किता आक्रान्ता आश्रितेत्यर्थः तनुः कलेवरं यस्य तथाभूतं मन्ये सम्भावयामि ॥ १५७ ॥

अप्रस्तुतप्रशंसां लक्षयति अप्रस्तुतेति। कुतोऽपि कस्मादपि हेतोः कारणात्

सा च धर्मार्थकामानां प्रायोऽन्यतमबाधया ।
स्वाभिप्रायप्रसिद्ध्या च जायमानेह दृश्यते ॥ १५९ ॥

तासु धर्मबाधया वाच्या यथा,—

मेदश्छेदकृशोदरं लघु भवत्युत्साहयोग्यं वपुः
सत्त्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः ।
उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले
मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः ॥

अत्र यथोक्तैर्हेतुभिः स्वाभिप्रायसाधनेन यदिदमीदृग्विनोदः कुतः इति साक्षात् मृगयाभिनन्दनं सेयं वाच्या नाम प्रस्तुतस्तुतिः अहिंसा परमो धर्म इति धर्मं बाधते ॥ १६० ॥

धर्मबाधयैव प्रत्येतव्या यथा,—

अस्तीतव्यस्य स्तोतुमनर्हस्य या स्तुतिः प्रशंसन सा अप्रस्तुतप्रशंसा स्यात् सा च वाच्या अभिधीयमाना प्रत्येतव्या प्रतीयमाना च उच्यते कथ्यते । सा च इह अस्मिन् प्रकरणे धर्मार्थकामानां त्रयाणां अन्यतमस्य बाधया व्याघातेन स्वाभिप्रायस्य प्रसिद्ध्या प्रसाधनेन च जायमाना उत्पद्यमाना प्रायः बाहुल्येन दृश्यते । तदेव धर्मबाधया वाच्या धर्मबाधया प्रतीयमाना, अर्थबाधया वाच्या अर्थबाधया प्रतीयमाना, कामबाधया वाच्या कामबाधया प्रतीयमाना चेति षड्विधा अप्रस्तुतप्रशंसेति फलितम् ॥ १५८—१५९ ॥

मेद इति । वपुः शरीरं मेदसां वपातिरेकजनितस्थौल्यानां छेदेन अपगमेन श्रमजनितेनेति भावः कृशं क्षीणम् उदरं यस्य तथोक्तम् अतएव लघु अभारवदित्यर्थः उत्साहयोग्यम् उद्यमार्हं भवति । सत्त्वानां प्राणिनां श्वापदानामिति यावत् चित्त मनः भयक्रोधयोः सतोः विकृतिमत् विकृत चित्तं लक्ष्यते अनुभूयते । इषवः शराः चले चञ्चले धावतीति यावत् लक्ष्ये शरव्ये सत्त्वे इति शेषः यत् सिध्यन्ति प्रविशन्तीति भावः स च चललक्ष्यप्रवेश इत्यर्थः धन्विनां धनुर्धराणाम् उत्कर्षः महत्त्वमित्यर्थः । अतः मृगयां व्यसनं मिथ्यैव वदन्ति लोका इति शेषः ईदृक् एतादृशः विनोदः आनन्दः कुतः ? कस्माद् भवतीति शेषः मृगयातुल्यं विनोदस्थान नास्तीति भावः ॥ १६० ॥

कालाक्खरदुस्सिक्खिअ बालअ रे लग्गा मम कण्ठम्मि ।
दोण्हं व णरअणिवासो समअं जइ होइ ता होउ ॥

अत्र कालाक्षरदुःशिक्षितेत्यनेन लिपिज्ञानादिभिरधीतधर्मशास्त्राभिमतरूपकपोगण्डः कोऽपि कयापि अविनयवत्या सोपालम्भं एहि रे कण्ठे लगेति अभियुज्यते। तत्र यदि ते मतमेव कृते नरकः स्यात् स यद्यावयोः सहैव नासौ नरक इति किं तर्हि स्वर्ग इति सोऽयं स्वाभिप्रायसाधनात् महासाहसे नियोगस्तस्येह साक्षादप्रस्तुतस्यास्तोतव्यस्य स्तुतिः प्रतीयते सेयं प्रत्येतव्या नाम अप्रस्तुतप्रशंसा परस्य दारान् मनसापि नेच्छेदिति धर्ममेव बाधते ॥ १६१ ॥

अर्थबाधया वाच्या यथा,—

पङ्गो ! बन्ध्यस्त्वमसि न गृहं यासि योऽर्थे परेषां
धन्योऽन्ध ! त्वं धनमदवतां नेक्षसे यन्मुखानि ।
श्लाघ्यो मूक ! त्वमपि कृपणं स्तौषि नार्थाशया यः
स्तोतव्यस्त्वं वधिर ! न गिरं यः खलानां शृणोषि ॥

कालाक्षरदुःशिक्षित बालक । रे लग्न मम कण्ठे।
द्वयोरेव नरकनिवासः स्वमत यदि भवति तदा भवतु ॥ सं

कालाक्षरेति । कालेन कृष्णवर्णेन अक्षरेण दुःशिक्षितः असुशिक्षित इत्यर्थः तत् सम्बुद्धिः धर्मशास्त्रपाठेन अरसिक इति भावः रे बालक । शिशुवदनभिज्ञ-इत्यर्थः मम कण्ठे लग कण्ठं धृत्वा मामालिङ्गस्व इति भावः । कस्याश्चित् कामुक्याः कमपि अधीतधर्मशास्त्रमजातस्त्रीसङ्गं युवकं प्रत्युक्तिरियम् । नन्वेव कृते परनारी-सङ्गात् नरकं स्यादित्यत्राह द्वयोरिति द्वयोरेव आवयोः नरके निवासः भवतीति शेषः यद्येतादृशाचरणे नरकं स्यात् तत्र केवल तव ममापि भविष्यति तथा सति उभयो-रेकत्रावस्थानात् सोऽपि स्वर्गवास एवेति भावः अतः यदि स्वमतं स्वस्य अभीष्टं भवति, तादृश नरकमिति भावः तदा भवतु ॥ १६१ ॥

पङ्गो इति । हे पङ्गो ! पादविकल ! त्वं वन्ध्योऽसि प्रशंसनीयोऽसि, यस्त्वम्

अत्र स्तोतव्यानां पङ्ग्वन्धमूकबधिराणां बन्ध्यधन्यश्लाघ्यस्तोतव्यपदैः साक्षादभिनन्दनादियं वाच्या नामाप्रस्तुतप्रशंसाभिमानोऽर्थसिद्धिं बाधते ॥ १६२ ॥

अर्थबाधयैव प्रत्येतव्या यथा,—

कामं वनेषु हरिणास्तृणानि खादन्त्ययत्नसुलभानि ।
विदधति धनिषु न दैन्यं ते किल पशवो वयं सुधियः ॥

अत्र ते किल पशवो वयं सुधिय इति मृगाणामसाक्षादभिनन्दनं तेनेयम् अस्तोतव्यानाम् अमीषां वाक्यार्थत्वेन स्तुतिप्रतीतेः प्रत्येतव्या नामाप्रस्तुतप्रशंसा मनस्विनोऽर्थसिद्धिं बाधते ॥ १६३ ॥

कामबाधया वाच्या यथा,—

ण मुअन्ति दीहसासं ण रुअन्ति ण होन्ति विरहकिसिआओ ।
धण्णाओ ताओ जाणं बहुवल्लह ! वल्लहो ण तुमं ॥

अत्र धन्यास्ता यासां त्वं न वल्लभ इति या इयम् अतिरक्तायाः

अर्थे अर्थनिमित्तं परेषां धनिनामित्यर्थः गृह न यासि न गच्छसि, हे अन्ध ! चक्षुर्विकल । त्वं धन्यः पुण्यवानित्यर्थः यत् यत धनमदवता धनगर्वितानां जनानां मुखानि न ईक्षसे नावलोकयसि । हे मूक ! वागिन्द्रियविकल ! वर्णानुच्चारकइत्यर्थः त्वमपि श्लाघ्यः प्रशंस्यः, यस्त्वम् अर्थाशया धनलालसया कृपण व्ययकुण्ठं धनिनमित्यर्थः न स्तौषि न प्रशंससि । हे बधिर ! श्रवणेन्द्रियविकल । त्व स्तोतव्यः स्तोतुमर्हः यस्त्वं खलानां दुर्जनानां गिरं न शृणोषि नाकर्णयसि ॥१६२ ॥

काममिति । हरिणाः मृगाः वनेषु अयत्नसुलभानि अनायाससुप्रापाणि तृणानि कामं यथेष्टं खादन्ति भक्षयन्ति, धनिषु दैन्यं दीनभावं कातरतां न विदधति न प्रकटयन्तीत्यर्थः ते हरिणाः पशवः किल अज्ञा एवेति भावः वय धनिषु दैन्यप्रकटनपरा इति भावः सुधियः सुबुद्धयः ज्ञानिन इत्यर्थः ॥ १६३ ॥

न मुञ्चति दीर्घश्वासं न रुदन्ति न भवन्ति विरहक्लिष्टाः ।
धन्यास्ता यासां बहुवल्लभ ! वल्लभो न त्वम् ॥

नेति । हे बहुवल्लभ ! बहूनां नारीणां वल्लभः प्रियः तत्सम्बुद्धिः त्वं यासां

साक्षादस्तोतव्यस्तुतिः सेयं वाच्या नाम अप्रस्तुतप्रशंसा तस्या एव कामसिद्धिं बाधते ॥ १६४ ॥

कामबाधयैव प्रत्येतव्या यथा,—

सुहउच्छअञ्जणन्दुल्लहं प्पिदूराहि आणेन्ता ।
उअआरअजरजीअम्पणेत्त ण कआवराहोसि ॥

अत्र पूर्वोक्तास्मदभिप्रायसिद्ध्या एवं नाम त्वया अस्माकम् उपकृतं येन जीवितमपि हरन्नापराध्यसीति ज्वरम्प्रति यदतिरक्ततया वाक्यान्ते नेह अस्तोतव्यस्य ज्वरस्य स्तुतिः प्रतीयते । सेयं प्रत्येतव्या नाम अप्रस्तुतप्रशंसा तस्या एव शरीरबाधया सर्वान् अपि कामान् बाधते ॥ १६५ ॥

इत्यप्रस्तुतप्रशंसालङ्कारनिरूपणम् ।

विविक्षितगुणोत्कृष्टैः यत् समीकृत्य कस्यचित् ।
कीर्त्तनं स्तुतिनिन्दार्थं सा मता तुल्ययोगिता ॥ १६६ ॥

नारीणां वल्लभी न, ता धन्याः पुण्यवत्यः नार्य्यः दीर्घश्वासं न मुञ्चन्ति न त्यजन्ति न रुष्यन्ति न कुप्यन्ति न विरहेण क्लिष्टाय भवन्ति ॥ १६४ ॥

सुखपृच्छकं जनं दुर्लभमपि दूराद्धि आनयिता ।
उपकारकज्वर ! जीवं प्रणयन् न कृतापराधोऽसि ॥ सं

सुखेति । हि यतः सुखं पृच्छतीति सुखपृच्छकः सुखप्रश्नकारक इत्यर्थः तं जनं प्रियजनमित्यर्थः दुर्लभमपि दुष्प्रापमपि प्रोषितत्वादिति भावः दुरात् दूरदेशात् आनयिता प्रापक इत्यर्थः पीडाश्रवणेन सत्वरमुपस्थापक इति भावः अतएव हे उपकारक हितकर ! ज्वर ! त्वं जीवं प्राणान् प्रणयन् हरन्नपि न कृतापराधः असि नापराद्धोऽसि त्वदाक्रमणात् मे प्राणापगमेऽपि एतस्मिन् काले यत प्रियतमं सन्निधौ आनीतवानसि तेन त्वामुपकारकं मन्ये न तु प्राणहराणादपराधिनमिति निष्कर्षः । कस्याश्चिद्विरहिण्या उक्तिः ॥ १६५ ॥

तुल्ययोगितां लक्षयति विवक्षितेति । विवक्षितस्य वक्तुमिष्टस्य गुणस्य उत्कृष्टैः उत्कर्षाय समीकृत्य यत् कस्यचित् स्तुतिनिन्दार्थं स्तुत्यर्थं निन्दार्थं वा कीर्त्तनं कथनं सा तुल्ययोगिता मता ॥ १६६ ॥

साभिधीयमानतुल्यगुणत्वेन स्तुत्यर्था यथा,—

शेषो हिमगिरि स्त्वञ्च महान्तो गुरवः स्थिराः।
इमां लङ्घितमर्य्यादां चलन्तीं बिभृथ क्षितिम्॥

अत्र अभिधीयमानमहत्वादिगुणोत्कृष्टाभ्यां शेषाहितुषारशैलाभ्यां सह स्तुत्यर्थं तुल्ययोगेन क्षितिपतेरभिहितत्वात् इयं स्तुत्यर्था तुल्ययोगिता॥ १६७॥

अभिधीयमानतुल्यगुणत्व एव निन्दार्था यथा,—

सङ्गतानि मृगाक्षीणां तडिद्विलसितानि च।
क्षणद्वय न तिष्ठन्ति घनारब्धान्यपि स्वयम्॥

अत्र घनारब्धान्यपीत्यादिभिरभिधीयमानतुल्यगुणानां मृगाक्षीसङ्गतानां तड़िद्विलसितानाञ्च निन्दार्थं तुल्ययोगेन अभिधानात् इयं निन्दार्था तुल्ययोगिता॥ १६८॥

प्रतीयमानतुल्यगुणत्वे स्तुत्यर्था यथा,—

यमः कुवेरो वरुणः सहस्राक्षो भवानपि।
बिभ्रत्यनन्यविषयां लोकपाला इति श्रुतिम्॥

अत्र यमादयः पञ्च भवन्तो लोकपाला इत्यनुक्तमपि तुल्यवस्तुयोगितयैव स्तुत्यर्थमेषां मिथः सादृश्यं प्रतीयते। सेयं प्रतीयमानतुल्यगुणत्वे स्तुत्यर्था तुल्ययोगिता॥ १६९॥

शेष इति हे राजन्नित्यध्याहार्य्यम्। शेषः अनन्तदेवः हिमगिरिः हिमालयः त्वञ्च महान्तः गुरवः स्थिराः अचञ्चलाः सन्तः इमां लङ्घिता अतिक्रान्ता मर्य्यादा स्थितिः यया तादृशीं चलन्तीम् अस्थिरां क्षितिं पृथ्वीं बिभृथ पालयथ॥ १६७॥

सङ्गतानीति। घन निविड़ं दृढ़मित्यर्थं घने मेघे च आरब्धानि उत्पन्नानि मृगाक्षीणां नारीणां सङ्गतानि सङ्गाः तडितां विद्युतां विलसितानि स्फुरितानि च क्षणद्वय स्वयं न तिष्ठन्ति अतिचपलाः स्त्रियस्तडितश्चेति भावः॥ १६८॥

यम इति। यमः प्रेतराजः कुवेरः धनपतिः वरुणः जलाधिपतिः सहस्राक्षः सुरपतिः भवान् पृथिवीपतिरिति भावः अपि एते पञ्च लोकान् जगन्ति पालय

प्रतीयमानतुल्यगुणत्व एव निन्दार्था यथा,—

राजानमपि सेवन्ते विषमप्युपभुञ्जते ।
रमन्ते च परस्त्रीभिरहो साहसिका नराः ॥

अत्र योऽयं सेवादिर्मानवानां राजविषये स्त्रीषु च वैषम्यहेतुस्तुल्यत्वेन योगः राजादीनां वा कर्मत्वादिरूपतया तत् क्रियायां समावेशः सोऽमीषां मिथः सादृश्यं प्रत्याययन् राजसेवापरस्त्रीरत्योर्विषोपभोगतुल्यतां गमयतीति सेयं प्रतीयमानतुल्यगुणत्वे निन्दार्था तुल्ययोगिता ॥ १७० ॥

अन्ये सुखनिमित्ते च दुःखहेतौ च वस्तुनि ।
स्तुतिनिन्दार्थमेवाहुस्तुल्यत्वे तुल्ययोगिताम् ॥ १७१ ॥

सा स्तुत्यर्था यथा,—

आहूतस्याभिषेकाय विसृष्टस्य वनाय च ।
न मया लक्षितस्तस्य स्वल्पोऽप्याकारविभ्रमः ॥

अत्र रामस्य राज्याभिषेकवनगमनयोः पितुरादेशेन तुल्यरूपतया स्तुतिः प्रतीयते ॥ १७२ ॥

न्तीति लोकपाला इति नास्ति अन्यः विषयः प्रतिपाद्यः यस्याः तादृशीम् अनन्यगामिनीमिति यावत् श्रुतिं प्रसिद्धिं बिभ्रति दधति ॥ १६९ ॥

राजानमिति । अहो आश्चर्यं साहसिकाः सहसाकारिणः अविमृश्यकारिण इत्यर्थः नराः राजानं सेवन्ते अपि, विषम् उपभुञ्जते अपि परस्त्रीभिः परकीयाभिः नारीभिः रमन्ते च । राजसेवनं विषभक्षणं परस्त्रीरमणञ्च साहसिककार्यमिति सर्वथा परिहरणीयमिति भावः ॥ १७० ॥

अन्ये इति । अन्ये अपरे विद्वांसः सुखनिमित्ते सुखहेतौ च वस्तुनि विषये स्तुतिनिन्दार्थं सुखनिमित्ते स्तुत्यर्थं दुःखनिमित्ते निन्दार्थमित्यर्थः तुल्यत्वे तुल्यताया सत्यामित्यर्थः तुल्ययोगिताम् आहुः कथयन्ति ॥ १७१ ॥

आहूतस्येति । अभिषेकाय राज्ये इति शेषः आहूतस्य आमन्त्रितस्य इत्यर्थः वनाय वनं गन्तुमित्यर्थः विसृष्टस्य नियुक्तस्य च तस्य रामस्य स्वल्पोऽपि अणुरपि आकारविभ्रमः आकृतिविकृतिः मया न लक्षितः नानुभूतः ॥ १७२ ॥

निन्दार्था यथा,—

यश्च निम्बं परशुना यश्चैनं मधुसर्पिषा।
यश्चैनं गन्धमाल्याभ्यां सर्वस्य कटुरेव सः॥

अत्र यः परशुना छिनत्ति योऽमुं मधुसर्पिषा सिञ्चति यो वा गन्धमालाभ्याम् अर्चयति तं प्रति तुल्यमेव निम्बस्य कटुत्वमिति समासोक्त्या तदुपमेयस्य निन्दा प्रतीयते॥ १७३॥

इति तुल्ययोगितालङ्कारनिरूपणम्।

दोषस्य यो गुणीभावो दोषीभावो गुणस्य यः।
स लेशः स्यात्ततो नान्या व्याजस्तुतिरपीष्यते॥ १७४॥

तत्र दोषस्य गुणीभावे लेशो यथा,—

युवैष गुणवान् राजा योग्यस्ते पतिरूर्जितः।
रणोत्सवे मनः सक्तं यस्य कामोत्सवादपि॥

अत्र या इयम् उत्तरार्द्धे राज्ञो वीर्य्यप्रकर्षस्य स्तुतिः सा कन्यायाः निरन्तरान् भोगान् निर्विविक्षोर्दोषत्वेन प्रतिभासिष्यत इत्यभिप्रेत्य योऽयं विदग्धसख्या राजप्रकोपपरिजिहीर्षया दोषोऽपि गुणरूपेणोक्तः सोऽयं दोषस्य गुणीभावो नाम लेशतोऽल्पतया शनैः अनन्यविदित उच्यमानो लेश इति उच्यते॥ १७५॥

य इति। यश्च जनः परशुना कुठारेण निम्बं निम्बतरुं छिनत्तीति शेषः यश्च एनं निम्बं मधुसर्पिषा मधुना घृतेन च सिञ्चतीति शेषः यश्च एनं निम्बं गन्धमाल्याभ्याम् अर्चयतीति शेषः तस्य सर्वस्य जनस्य स निम्बः कटुरेव॥ १७३॥

लेशं लक्षयति दोषस्येति। दोषस्य यः गुणीभावः गुणत्वेन कीर्त्तनं गुणस्य च यः दोषीभावः दोषत्वेन कीर्त्तनं स लेशः स्यात् व्याजस्तुतिरपि ततः लेशात् अन्या न इष्यते व्याजस्तुतिर्लेशश्च एकपर्य्याय एवालङ्कार इति तात्पर्य्यम्॥ १७४॥

युवेति। एष राजा युवा गुणवान् ऊर्जितः बलवान् अतस्ते तव योग्यः पतिः यस्य राज्ञः मनः कामोत्सवादपि स्त्रीसङ्गादपीति भावः रणोत्सवे संग्रामव्यापारे इत्यर्थः सक्तं रतम्॥ १७५॥

गुणस्य दोषीभावो यथा,—

चपलो निर्दयश्चासौ जनः किं तेन मे सखि!।
आगःप्रमार्जनायैव चाटवो येन शिक्षिताः॥

अत्र पूर्वार्द्धेन मानपरिग्रहानुगुणं सखीनाम् अग्रतः प्रकाशं प्रतिज्ञाय तदनिर्वाहमाशङ्कमाना तदुपहासं परिजिहीर्षुः दोषाभासं तद्गुणग्राममाह। आगःप्रमार्जनायैव चाटवो येन शिक्षिताः इति। सोऽयं गुणस्य दोषीभावो नाम लेशो भवति। अन्ये पुनः समस्तमेव लेशलक्षणम् आचक्षते। यत्र दोषस्य गुणीभावो गुणस्य च दोषीभाव इति सोऽपि द्विधा समासोक्त्या असमासोक्त्या च॥ १७६॥

तयोः समासोक्त्या यथा,—

गुणानामेव दौरात्म्याद्धुरि धूर्य्यो नियुज्यते।
असञ्जातकिणस्कन्धः सुखं स्वपिति गौर्गलीः॥

अयमपि प्रकोपभयाल्लेशेनैव उच्यते इति लेशः॥ १७७॥

असमासोक्त्या यथा,—

सन्तः सच्चरितोदयव्यसनिनः प्रादुर्भवद्यन्त्रणाः
सर्वत्रैव जनापवादचकिता जीवन्ति दुःखं सदा।

चपल इति। हे सखि! अयं जनः चपलः अस्थिरः निर्दयः निष्ठुरश्च अतः तेन जनेन मे मम किम्? न किमपि प्रयोजनमित्यर्थः। येन आगसः अपराधस्य प्रमार्जनाय अपनयनाय एव चाटवः प्रियवचनानि शिक्षिताः॥ १७६॥

गुणानामिति। धुरं भारं वहतीति धुर्य्यः धुरन्धरः भारवहनक्षम इत्यर्थः गौः महापुरुषश्च गुणानां क्षमत्वादीनां दौरात्म्यात् प्रभावादित्यर्थः अतिरेकादिति भावः धुरि भारवहनकार्य्ये नियुज्यते नियुक्तः क्रियते अनुरुध्यते च। गलीः अक्षम इति भावः गौः न सञ्जातः किणः भारवहनजनितकलङ्करेखाविशेषः यत्र तादृशः स्कन्धो यस्य तथाभूतः सन् सुखम् अक्लेशं स्वपिति निद्राति॥ १७७॥

अव्युत्पन्नमतिः कृतेन न सता नैवासता व्याकुलो
युक्तायुक्तविवेकशून्यहृदयो धन्यो जनः प्राकृतः॥

अत्र अपि प्रकोपभयादि पूर्ववत्। अथैष व्यस्तलक्षणत्वेन कस्मान्न लेश इत्युच्यते। दोषगुणीभावस्य अप्रस्तुतस्तुत्या गुणीभावस्य तु व्याजस्तुत्यापहारात्। व्याजस्तुतिरपि द्विधा शुद्धा मिश्रा च॥ १७८॥

तयोः शुद्धा यथा,—

पुंसः पुराणादाच्छिद्य श्रीस्त्वया परिभुज्यते।
राजन्निक्ष्वाकुवंशस्य किमिदं तव युज्यते॥

अत्र शुद्धपरदारापहरणलक्षणनिन्दाव्याजेन स्तुतेर्विहितत्वात् इयं शुद्धा नाम व्याजस्तुतिर्गुण-दोषी-भाव-लक्षणात् लेशान्न पृथक्॥ १७९॥

मिश्रा यथा,—

प्रियोऽसि प्राज्ञोऽसि प्रभुरसि कुलीनोऽस्यऽसि युवा
युवत्यस्त्वामेवङ्गति न पतिमुर्वीश! वृणते।

सन्त इति। सन्तः साधवः सच्चरितानां सत्कर्मणाम् उदये अनुष्ठाने इत्यर्थः व्यसनिनः व्यापृता इत्यर्थः सर्वत्रैव कर्मणि जनानाम् अपवादात् निन्दनात् चकिताः शङ्किताः अतएव प्रादुर्भवन्ती यन्त्रणा उद्वेग इत्यर्थः येषां तथाभूताः सन्तः सदा दुःखं जीवन्ति। प्राकृतो जनः सामान्यो जनः अधम इत्यर्थः अव्युत्पन्ना अशिक्षिता मतिः यस्य तथोक्तः अतएव सता कृतेन सत्कार्य्येण न, असता कृतेन असत्कार्य्येण च नैव व्याकुलः तथा युक्तम् अयुक्तं तयोर्विवेकः ज्ञानं तेन शून्यं हृदयं यस्य तथाभूतः सुतरां धन्यः पुण्यवानित्यर्थः॥ १७८॥

पुंस इति। हे राजन्! त्वया पुराणात् पुंसः पुरातनपुरुषात् नारायणादित्यर्थः आच्छिद्य अपहृत्य श्रीर्लक्ष्मीः परिभुज्यते सम्भुज्यते। इक्ष्वाकुवंशस्य इक्ष्वाकुकुलभवस्य तव इदं कस्यचित् विशुद्धदारापहरणमिति भावः किं युज्यते? नैव युज्यते इत्यर्थः॥ १७९॥

प्रिय इति। हे उर्वीश! पृथिवीपते! त्वं प्रियोऽसि स्त्रीकानां प्रीतिकरोऽसि

अतश्चैनाङ्कीर्तिं रघुनहुषमान्धातृमहिषीम्
परामृष्टुं वृद्धामधिगतनयो नार्हति भवान् ॥

अत्र स्तुतिपदमिश्रयैव व्याजगर्हया स्तुतिरिति इयं मिश्रा नाम व्याजस्तुतिर्लेशभेदः ॥ १८० ॥

इति लेशालङ्कारनिरूपणम् ॥

कर्त्रादीनां समावेशः सहान्यैर्यः क्रियादिषु ।
विविक्तश्चाविविक्तश्च सहोक्तिः सा निगद्यते ॥ १८१ ॥
वैसादृश्यवती चेयमुच्यमाना मनीषिभिः ।
सहेवादिप्रयोगेषु ससादृश्या च दृश्यते ॥ १८२ ॥

सा कर्त्तृविविक्तक्रियासमावेशे यथा,—

कोकिलालापमधुराः सुगन्धिवनवायवः ।
यान्ति सार्द्धं जनानन्दैर्वृद्धिं सुरभिवासराः ॥

अत्र सुरभिवासरा इति कर्त्तृपदार्थः केवल एव जनानन्दैः सह वृद्धिप्राप्तिक्रियायां समाविष्ट इति सेयं विविक्तकर्त्रीक्रिया समावेशा नाम वैसादृश्यवती सहोक्तिः ॥ १८३ ॥

इत्यर्थः प्राज्ञः प्रकृष्टज्ञानी असि, प्रभुः निग्रहानुग्रहसमर्थः असि, कुलीनः सत्कुलजातः असि, युवा असि, कति युवत्यः तरुण्यः एवम् इत्यम्भूतगुणशालिनं त्वां पतिं न वृणते नाभिलषन्ति ? अपि तु सर्वा एव वृणते इत्यर्थः । भवान् अधिगतनयः नीतिपरायण इत्यर्थः अतश्च अस्मात् कारणाच्च एनां रघुनहुषमान्धातृणां महात्मनां पूर्वराजर्षीणामिति भावः महिषीं प्रेयसीमिति भावः वृद्धां स्थविरां महतीञ्च कीर्त्तिं परामृष्टुं परिस्पृष्टुं न अर्हति न युज्यते ? ॥ १८० ॥

सहोक्तिं लक्षयति कर्त्रादीनामिति । क्रियादिषु अन्यैः सह कर्त्रादीनां विविक्तः विवेकवतः अविविक्तः अविवेकवतश्च यः समावेशः सङ्गतिः सा सहोक्तिः निगद्यते कथ्यते ॥ १८१ ॥

वैसादृश्यवतीति । इयं सहोक्तिः सहेवादिप्रयोगेषु सत्सु वैसादृश्यवती ससादृश्या सादृश्यवती च मनीषिभिः विद्वद्भिः उच्यमाना कथ्यमाना दृश्यते ॥ १८२ ॥

कोकिलेति । कोकिलानाम् आलापेन रवेण मधुराः मनोहारिणः सुगन्धयः

कर्मणो विविक्तक्रियासमावेशे यथा,—

उअसि पिआइ सम न्तहवि धुरेण भणसि कीसकिसि अन्ति ।
उअरिभरेणअ असुअ मुञ्चइ वइल्लोवि अङ्गाइम् ॥

अत्र सम्बोध्यमानयुष्मदर्थः कर्मतामापन्न ऊह्यस इति क्रियायां केवल एव प्रियापदार्थेन सह समाविष्टः । सेयं विविक्त-क्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः ॥ १८४ ॥

यत्रानेकोऽपि कर्त्रादिःप्रविविक्तैः क्रियादिभिः ।
विविक्तभावं लभते विविक्ता सापि कथ्यते ॥ १८५ ॥

सा कर्त्तृद्वयस्य पृथक् क्रियासमावेशे यथा,—

वर्द्धते सह पन्थानां मूर्च्छया चूतमञ्जरी ।
वहन्ति च समं तेषामश्रुभिर्मलयानिलाः ॥

अत्र चूतमञ्जरीमूर्च्छया सह वर्द्धनक्रियायां मलयानिलाश्च अश्रुभिः सह वहनक्रियायां पृथक् पृथक् विवेकेनैव कर्त्तरि समाविष्टाः । सेयम् अपि विविक्तकर्त्तृक्रियासमावेशैव वैसा-दृश्यवती सहोक्तिरेव कर्मणोऽपि विवेके द्रष्टव्या ॥१८६॥

वनवायवः येषु तथाभूताः सुरभिवासराः वसन्तदिवसाः जनानाम् आनन्दैः सार्द्धं वृद्धिं यान्ति गच्छन्ति ॥ १८३ ॥

उह्यसे प्रियया समं तथापि धुरीभरस्तेन भणसि किं क्लेशित इति ।
उपरि भरेण चानतो मुञ्चति बलीवर्द्दोऽप्यङ्गानि ॥ सं

उह्यसे इति । प्रियया समम् उह्यसे धार्य्यसे धृत्वा नीयसे इत्यर्थः तथापि क्लेशितः क्लेशमनुभवन्नित्यर्थः धुरी भरः शकटक्लेश इति किं कथं भणसि कथयसि । उपरि भरेण भाववहस्तुस्थित्येत्यर्थः आनतः नम्रीकृतः बलीवर्द्दोऽपि वृषोऽपि अङ्गानि मुञ्चति त्यजति ॥ १८४ ॥

यत्रेति । यत्र अनेकोऽपि बहुसंख्यकोऽपि कर्त्रादिः प्रविविक्तैः प्रभिन्नैः क्रियादिभिः विविक्तभावं पार्थक्यं लभते सापि सहोक्तिरित्यर्थः विविक्ता कथ्यते ॥ १८५ ॥

वर्द्धते इति । चूतमञ्जरी आम्रवल्लरी पान्थानां पथिकानां विरहिणामिति

कर्त्तृणामविविक्तकर्त्तृक्रियासमावेशे यथा,—

धीरेण समं जामा हिअएण समं अणिट्ठिआ उवएसा।
उच्छाहेण सह भुजा वाप्पेण समं गलन्ति से उल्लावा॥

अत्र यामादीनां बहूनां धैर्य्यादिभिः सह गलनक्रियायाम् एकस्यामेव अविविक्तः समावेशो दृश्यते। सेयम् अविविक्तकर्त्तृक्रियासमावेशा नाम वैसादृश्यवती सहोक्तिः॥ १८७॥

कर्मणां विविक्तक्रियासमावेशे इवशब्देन सहशब्दस्य स्थाने ससादृश्या यथा,—

धीरं व्व जलसमूहं तिमिणिवहम्मि व सपक्खपव्वअलोअं।
णइसोत्ते व्व तरङ्गे रअणाइं व गरुअगुणसआइं वहन्तं॥

अत्र धैर्य्येण जलसमूहस्य तिमिनिवहेन सपक्षपर्वतलोकस्य नदीस्रोतोभिस्तरङ्गाणां रत्नैश्च गुरुकगुणशतानां मिथः प्रतीयमानं सादृश्यमिवेन द्योत्यते। सहार्थश्च वाक्यार्थसामर्थ्येन लभ्यते इति सेयं धैर्य्यादीनां बहूनां वहनक्रियायाम् एकस्यामेव विवेकतः कर्मभूतानाम् आवेशेन अविविक्तकर्मक्रियासमावेशा नाम ससादृश्या सहोक्तिः॥ १८८॥

भावः मूर्च्छया समं सह बहुते इति गच्छति, मलयानिलाः दक्षिणवायवः तेषां पान्थानाम् अश्रुभिः नयनसलिलैः समं वहन्ति च॥ १८६॥

धैर्य्येण समं यामा हृदयेन समनिश्चिता उपदेशाः।
उत्साहेन सह भुजा वाष्पेण समं गलन्ति अस्या उल्लापाः॥ सं

धैर्य्येणेति। अस्याः नायिकायाः यामाः प्रहराः धैर्य्येण समम् अनिश्चिता फलादर्शनात् निश्चयपदवीमप्राप्ता इत्यर्थः उपदेशाः गुरुजनादीनां सान्त्वनवचनानीति यावत् हृदयेन समं भुजा बाहवः कार्य्यवैमुख्यादिति भावः उत्साहेन सह तथा उल्लापाः आलापाः वाष्पेण अश्रुणा समं गलन्ति पतन्ति॥ १८७॥

धैर्य्यमिव जलसमूहं तिमिनिवहमिव सपक्षपर्वतलोकम्।
नदीस्रोतांसीव तरङ्गान् रत्नानीव गुरुकगुणशतानि वहन्तम्॥ सं

धैर्य्यमिति। जलसमूहं धैर्य्यमिव, तिमीनां मत्स्यविशेषाणाम् अस्ति मत्स्य-

ग्रहणाद् गुणसमावेशेऽपि गुणिनः ससादृश्या यथा,—

सह दीर्घा मम श्वासैः इमाः सम्प्रति राजयः ।
पाण्डराश्च ममैवाङ्गैः सह ताश्चन्द्रभूषणाः ॥

अत्र राजयो दीर्घाः पाण्डराश्च इति दैर्घ्येण पाण्डरत्वगुणयोः अविवेकेन रात्रिषु रात्रीणाञ्च तयोः श्वासैः अङ्गैश्च सह समावेशो दृश्यते, सेयम् अविविक्तगुणसमावेशा नाम इवाद्यप्रयोगेऽपि ससादृश्या सहोक्तिः ॥१८९॥

इति सहोक्त्यलङ्कारनिरूपणम् ।

द्रव्यक्रियागुणादीनां क्रियाद्रव्यगुणादिषु ।
निवेशनमनेकेषामेकतः स्यात् समुच्चयः ॥ १९० ॥
इतरेतरयोगो यः समाहारो य उच्यते ।
अन्वाचय इहान्यो यः सोऽपि नान्यः समुच्चयात् ॥१९१॥
द्विपदाश्रयश्च स स्यात् स स्यात् बहुपदाश्रयः ।
उभयाश्रयश्च स स्यात् स स्यादनुभयाश्रयः ॥१९२॥

स्तिमिर्नाम शतयोजनमायतः । तिमिङ्गिलगिलोऽप्यस्ति तद् गिलोऽप्यस्ति राघवः ॥ इत्युक्तेः । निवहः समूहः तमिव, सपक्षाः पक्षवन्तः ससहायाश्च पर्वतास्तेषां लोकः सङ्घातः तं नदीनां स्रोतांसि प्रवाहाः तानीव तरङ्गान् रत्नानीव मुक्ताफलादीनीव गुरूकाणि महान्ति गुणानां शतानि बहून्तं धारयन्तमित्यन्वयः ॥१८८॥

सहेति । सम्प्रति इमा राजयः मम श्वासैः निःश्वासैः सह दीर्घा आयताः । चन्द्रभूषणाः चन्द्रालङ्कृताः ता राजयः ममैव अङ्गैः सह पाण्डराश्च पाण्डुवर्णाश्च जाता इति शेषः । विरहिणः उक्तिरियम् ॥ १८९ ॥

समुच्चयं लक्षयति द्रव्येति । अनेकेषां बहूनां द्रव्यक्रियागुणादीनां क्रियाद्रव्यगुणादिषु एकतः एकस्मिन् निवेशनं समुच्चय स्यात् ॥ १९० ॥

इतरेति । यः इतरेतरयोगः अन्योन्ययोगः यः समाहारः समष्टिः, यः अन्यः अपरः अन्वाचयः इह उच्यते कथ्यते सोऽपि समुच्चयात् अन्यः भिन्नः अतिरिक्त इत्यर्थः न ॥ १९१ ॥

द्विपदेति । सः समुच्चयः द्विपदाश्रयः स्यात्, बहुपदाश्रयः स्यात् । सः उभयाश्रयः स्यात्, सः अनुभयाश्रयश्च स्यात् ॥ १९२ ॥

त्रयः प्रतिपदं वा स्युः द्योतकैरुत्तरत्र वा ।
पदैः शुद्धश्च मिश्राश्च तुरीयो द्योतकं विना ॥१९३॥

अत्र द्विपदाश्रयः प्रतिपदाश्रितद्योतकत्वेन द्रव्ययोः क्रियासमुच्चयो यथा,—

निर्यता परिजनेन बोधितः स्फूर्जमानरुचिरुल्लसद्दृशः ।
द्वारसंवलनमांसलोऽधिकं दीपकश्च मदनश्च दिद्युते ॥

अत्र दीपकश्च मदनश्च इति द्वे द्रव्ये प्रतिपदं चकारेण एकस्यां दिद्युते इति क्रियायां समुच्चयेन निवेशिते, इति न दिद्युताते इति द्विवचनं दीपकमदनौ इति चार्थे द्वन्द्वश्च न भवति ॥१९४॥

द्विपदाश्रय एव उत्तरपदाश्रितद्योतकेन क्रिययोर्द्रव्यसमुच्चयो यथा,—

निकामं क्षामाङ्गी सरसकदलीगर्भसुभगा
कलाशेषा मूर्त्तिः शशिन इव नेत्रोत्सवकरी ।
अवस्थामापन्ना मदनदहनोद्दाहविधुरां
इयं नः कल्याणी रमयति मनः कम्पयति च ॥

त्रय इति । त्रयः द्विपदाश्रयः बहुपदाश्रयः उभयाश्रयश्चेति त्रिविधा इत्यर्थः प्रतिपदं द्योतकैश्चकारादिभिः वा उत्तरत्र उत्तरस्मिन् पदे द्योतकैर्वा स्युः भवेयुः । तुरीयः चतुर्थः अनुभयाश्रय इत्यर्थः, द्योतकं विना पदैः शुद्धश्च केवलश्च मिश्रश्च भवतीति शेषः ॥ १९३ ॥

निर्यतेति । निर्यता निर्गच्छता गृहादिति शेषः परिजनेन सखीजनेनेत्यर्थः बोधितः प्रज्वालितः ज्ञापितश्च स्फूर्जमाना प्रसरन्ती रुचिः आलोकः रागश्च यस्य तथाभूतः द्वारस्य संवलनेन रोधनेन मांसलः प्रवृद्ध इति यावत् दीपकश्च उल्लसन्त्यौ दृशौ यस्याः तथाभूतायाः मदनश्च कामश्च अधिकं दिद्युते रराज ॥ १९४ ॥

निकामेति । निकामम् अत्यर्थं क्षामाङ्गी क्षीणाङ्गी सरसा या कदली तस्या गर्भवत् सुभगा सुकोमला कलाशेषा शशिनः चन्द्रस्य मूर्त्तिरिव नेत्रोत्सवकरी नयनानन्दकरी मदन एव दहनः अग्निः तस्य उद्दाहेन उत्कटदहनेन विधुरां

भयति कम्पयति च इति द्वे क्रिये उत्तरपदवर्त्तिना चकारेण एकस्मिन् मनो लक्षणे द्रव्ये कर्मणि समुच्चयेन एककालमेव-निवेशिते, तेनायं अन्वाचयो न भवति ॥१९५॥

बहुपदाश्रयः प्रतिपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो यथा,—

अप्राकृतस्तु कथमस्तु न विस्मयाय
यस्मिन्नुवास करुणा च कृतज्ञता च।
लक्ष्मीश्च सात्विकगुणज्वलितं च तेजः
धर्मश्च मानविजयौ च पराक्रमश्च ॥

अत्र करुणा च कृतज्ञता च इत्यादयो गुणाः प्रत्येकं बहुपदाश्रयत्वेन चकारेण एकस्याम् उवास इति क्रियायां समुच्चयेन निवेश्यन्ते। तेन गुणेषु बहुवचनं न भवति। करुणाकृतज्ञतादीनां द्वन्द्वसमासश्च न भवति। यस्मिन् इत्यपेक्षायाञ्च अयमेव गुणानां द्रव्यसमुच्चयो भवति ॥ १९६ ॥

बहुपदाश्रय एव उत्तरपदाश्रितद्योतकत्वेन गुणानां क्रियासमुच्चयो यथा,—

रूपमप्रतिविधानमनोज्ञं प्रेमकार्य्यमनपेक्षविकाशि।

दारुणा अवस्थां दशाम् आपन्ना प्राप्ता इयं कल्याणी नः अस्माकं मनः रमयति प्रीणयति कम्पयति च ॥ १९५ ॥

अप्राकृत इति। यस्मिन् करुणा दया च कृतज्ञता च प्रत्युपकारिता च लक्ष्मीश्च श्रीश्च सात्विकैः सत्त्वातिरेकजनितैः गुणैः "शोभा विलासो माधुर्य्यं माधौर्य्यं धैर्य्यतेजसी। ललितौदार्य्यमित्येते सात्विकाः पौरुषा गुणाः" इत्युक्तैः ज्वलितं दीपितं तेजश्च प्रतापश्च धर्मश्च मानश्च विजयश्च पराक्रमश्च उवास वसतिस्म सः अप्राकृतः असामान्यः जनस्तु कथं विस्मयाय चमत्काराय न अस्तु न भवतु ? अपितु चमत्कारायैव भवत्वित्यर्थः ॥ १९६ ॥

रूपमिति। आसां नारीणां नास्ति प्रतिविधानं प्रतिरूपसृष्टिः यस्य तादृशम्

चाटु चाकृतकसम्भ्रममासां कार्मणत्वमगमद् रमणेषु

अत्र रूपं प्रेम चाटु च इति बहवो गुणाः उत्तरपदाश्रयेण चकारेण अगमत् इति एकस्यां क्रियायां समुच्चयेन निवेश्यन्ते। तेन अगमन् इति बहुवचनं द्वन्द्वो वा न स्यात्। कार्मणत्वम् इत्यपेक्षायां च अयमेव गुणानां जातिसमुच्चयो भवति ॥१९७॥ उभयपदाश्रयः उत्तरपदाश्रितद्योतकत्वेन द्रव्यगुणानां क्रिया-समुच्चयो यथा,—

विचिन्त्यमानं मनसाऽपि देहिनां
इदं हि लोकेषु चकास्ति दुर्लभम्।
निशा सचन्द्रा मदिरा च सोत्पला
प्रियानुरागोऽभिनवश्च यौवनम् ॥

अत्र निशा मदिरा च द्रव्ये अनुरागो यौवनञ्च गुणौ बहुष्वपि पदेषु द्वन्द्वे सत्यपि उत्तरपदाश्रयनिवेशिना चकारेण चकास्ति इत्येकस्यां क्रियायां निवेश्यन्ते। तेन चकासति इति बहुवचनं समासश्च न स्यात्। अयमेव च दुर्लभम् इति अपेक्षायां द्रव्यगुणानां गुणसमुच्चयो भवति। तेऽमी त्रयोऽपि शुद्धाः। मिश्रः पुनरुभयपदाश्रयवद् बहुपदाश्रयश्च भवति ॥ १९८ ॥

अतएव मनोज्ञं मनोहरं रूपम् अङ्गं नास्ति अपेक्षा लज्जाद्यनुरोध इति यावत् यस्मिन् तद् यथा तथा विकाशत विस्फुरतीति तथोक्तं प्रेमकार्य्यं प्रणयपूर्णं चेष्टित-मित्यर्थः नास्ति कृतकः कृत्रिमः सम्भ्रमः भयं यस्मिन् तथाभूतं चाटु च प्रियवचनञ्च रमणेषु रतिलीलासु कान्तेषु विषयेषु वा कार्मणत्व कर्मणे हित कार्मणं तस्य भावः तत्त्व वशीकरणव्यापारहेतुमिति भावः अगमत् प्राप ॥ १९७ ॥

विचिन्त्यमानमिति। सचन्द्रा चन्द्रालङ्कृता निशा सोत्पला उत्पलशोभिता मदिरा आसवः प्रियाया प्रिये वा अनुरागः प्रणयः अभिनवं यौवनञ्च इदं हि लोकेषु जगत्सु संसारेष्विति यावत् मनसा विचिन्त्यमानमपि देहिनां दुर्लभं दुष्प्रापं चकास्ति प्रतिभाति ॥ १९८ ॥

यथा,—

आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च।
अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्॥

अत्र आदित्यचन्द्रादयो द्रव्यविशेषाः उत्तरपदनिवेशिना प्रतिपदनिवेशिना च चकारेण जानाति इति एकस्यां क्रियायां निवेश्यन्ते। तेन च बहुवचनाभावे समासाभावे च एष मिश्रः समुच्चयभेदो भवति, अनुभयाश्रयस्तु समुच्चयोऽन्वाचयश्च न भवति। द्वयोरपि दीपकेन विषयापहारात्। तेन इतरेतरयोगसमाहारयोः स उदाह्रियते॥ १९९॥

तत्र इतरेतरयोगो यथा,—

सावशेषपदमुक्तमुपेक्षा स्रस्तमाल्यवसनाभरणेषु।
गन्तुमुत्थितमकारणतः स्म द्योतयन्ति मदविभ्रममासाम्॥

अत्र उक्तमुपेक्षा उत्थितम् इति एते क्रिया द्रव्यविशेषा इतरेतरयोगेन मदविलासद्योतनक्रियायां निवेश्यन्ते। तेन द्योतयन्ति इति बहुवचनं द्वन्द्वसमासश्च तद्विवक्षायां स्यात्। न च इह द्योतकश्चकारः उत्तरपदे प्रतिपदं विद्यते इति सोऽयम् उभयाश्रयः समुच्चयभेदः॥ २००॥

आदित्येति। आदित्यः सूर्यः चन्द्रः अनिलः वायुः अनलः अग्निः द्यौः अन्तरीक्षं भूमिः पृथ्वी आपः जलानि हृदयं मनः यमश्च अहश्च दिनञ्च रात्रिश्च उभे सन्धे च प्रातःसन्ध्या सायंसन्ध्या चेत्यर्थः धर्मश्च नरस्य मानवस्य वृत्तं चरितं जानाति॥ १९९॥

सावशेषेति। सावशेषम् असम्पूर्णमित्यर्थः पदं सुप्तिङन्तं यस्मिन् तथाभूतम् उक्तम् वचनं स्रस्तानि विच्युतानि माल्यानि वसनानि वस्त्राणि आभरणानि च तेषु उपेक्षा अयत्नः, अकारणतः कारणं विनेत्यर्थः गन्तुम् उत्थितम् उत्थानम् आसां नारीणां मदविभ्रमं मद्यपानजनितं विकृतिविशेषं द्योतयन्ति प्रकटयन्ति॥ २००॥

समाहारो यथा,—

वपुर्विरूपाक्षमलक्ष्यजन्मता दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद् बालमृगाक्षि! मृग्यते तदस्ति किं व्यस्तमपि त्रिलोचने॥

अत्र यद् वरेषु मृग्यते तत् किं त्रिलोचने व्यस्तमप्यस्ति इति ब्रुवन् वपुर्वयोवसूनां समुदायं समस्तमेव अभिसन्धत्ते। तस्य च आविर्भूतावयवभेदत्वेन इतरेतरयोगः तिरोहितावयवभेदत्वेन समाहारः। स इह यद् इति एकवचनान्तेन नपुंसकेन च कथ्यते। न चेह क्वचिदपि चकारोऽस्ति। सोऽयं अपि अनुभयाश्रयः समुच्चयभेदः। चयोगेऽपि इतरेतरयोगः॥२०१॥

स उत्तरपदयोगेऽपि यथा,—

तत्क्षणं विपरिवर्त्तितक्रियोर्नेष्यतोः शयनमिङ्गरागयोः।
सा बभूव वशवर्त्तिनी द्वयोः शूलिनः सुवदना मदस्य च॥

अत्र शूलिनः मदस्य च इति उत्तरपदाश्रयेण चकारेण द्वौ द्रव्यविशेषौ वशवर्त्तिनौ इति एतस्मिन् गुणपदे यदि इतरेतरयोगेन सन्निवेश्येते तदा विपरिवर्त्तितक्रियोः इत्यादिषु द्वयोरिति पर्य्यन्तेषु द्विवचनम् एकशेषो वा न स्यात्। सोऽयमपि द्विपदाश्रय उत्तरपदाश्रितद्योतकश्च समुच्चयभेदः। एवम्

वपुरिति। वपुः अङ्गं विरूपाणि विषमाणि अक्षीणि यस्मिन् तथोक्तं चिनेत्रमित्यर्थः न कुत्रापि एतादृशं विकृतरूपं दृश्यते इति भावः न लक्ष्यं जन्म यस्य सः अलक्ष्यजन्मा तस्य भावः अलक्ष्यजन्मता निष्कुलतेति भावः दिगम्बरत्वेन दिग्वसनत्वेन नग्नत्वेनेत्यर्थः वसु धनं निवेदितम् उक्तं यदि धनमस्ति तदा कथं नग्नत्वमिति भावः। हे बालमृगाक्षि! मृगशावकनयने! वरेषु जामातृषु यत् मृग्यते अन्विष्यते रूपादिकमिति भावः तथा चोक्तं "कन्या वरयते रूपं माता वित्तं पिता श्रुतम्। बान्धवाः कुलमिच्छन्ति मिष्टान्नमितरे जना इति।" त्रिलोचने तत् व्यस्तमपि एकमपीत्यर्थः किम् अस्ति? नैवेत्यर्थः॥ २०१॥

तत्क्षणमिति। सा सुवदना सुमुखी पार्वती तत्क्षणं तस्मिन् क्षणे इत्यर्थः

अपरेऽपि इतरेतरयोगेऽपि च योगा उदाहार्याः, समाहारस्तु च योगविषयो विचिन्त्यमानम् इत्यादिना एव उक्तः। अन्वाचयस्तु क्रियाविषय एव उपपद्यते ॥ २०२ ॥

तत्र च उत्तरपदाश्रय एव चकारो भवति यथा,—

गच्छन्तीनां रमणवसतिं योषितां तत्र नक्तम्
रुद्धालोके नरपतिपथे सूचिभेद्यैस्तमोभिः।
सौदामिन्या कनकनिकषस्निग्धया दर्शयोर्वीम्
तोयोत्सर्गस्तनितमुखरो मास्म भूर्विक्लवास्ताः ॥

अत्र उर्वीं दर्शय इति उर्वीं कर्मविषयत्वेन क्रियामुपन्यस्य तोयोत्सर्गस्तनितमुखरो मास्म भूः इति तत्कर्त्तरि एव धर्मिणि अकर्मकं क्रियान्तरमन्वाचीयते। सोऽयं भिन्नकालत्वभिन्नविषयत्वाभ्याम् अन्वाचयः समुच्चयाद्भिन्नो भवति। नन्वेवं यदि समुच्चयेऽपि भिन्नविषये क्रिये तुल्यकालमेव प्रयुज्येते, को दोषः स्यात्? न कश्चित्। किन्तु तस्य समुच्चयमुद्रया विषयोऽपहृतः इति न उदाह्रियते ॥ २०३ ॥

समासेऽपि इतरेतरयोगादनुभयाश्रितः समुच्चयभेदो यथा,—

विपरिवर्त्तिता विशेषेण परिवृत्तिं नीता क्रीलज्जा याभ्यां तयोः इङ्गरागयोः प्रदीप्तप्रेम्णोः अतएव शयनं शय्यां नेष्यतोः प्रापयिष्यतोः द्वयोः शूलिनः हरस्य मदस्य च वशवर्त्तिनी वशंवदा बभूव ॥२०२ ॥

गच्छन्तीनामिति। तत्र उज्जयिन्यां नक्त रात्रौ सूचिभिर्भेद्यानि वेध्यानि गाढत्वादिति भावः तैः तमोभिः तिमिरैः रुद्धः तिरोहितः आलोको यस्य तथाभूते नरपतिपथे राजपथे रमणवसतिं कान्तनिकेतनं गच्छन्तीनाम् अभिसारिणीनामिति भावः योषितां नारीणां कनकनिकषस्निग्धया काञ्चनकषसुकोमलया सौदामिन्या विद्युता उर्वीं पृथिवीं पश्यानमिति भावः दर्शय प्रकटय, तोयानां जलानाम् उत्सर्गः वर्षणमित्यर्थः स्तनितं गर्जितं ताभ्यां मुखरः समुद्यत इति भावः मास्म भूः न भवेत्यर्थः यतः ता योषितः विक्लवा भीरवः ॥ २०३ ॥

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

अत्र वागर्थाविव इति परवल्लिङ्गता, सम्पृक्तौ पितरौ इति अत्र योऽयं "पुमान् स्त्रिया" "पिता मात्रा" इति च एकशेषः। तेनैष विशेषलक्षणयोगाद् वक्रोक्तित्वे सति अलङ्कारतां लभते इति न धवखदिरादिषु अतिप्रसङ्गः इति अयमपि समुच्चय भेदः॥ २०४॥

समाहारयोगादपि यथा,—

स्त्रीणां हावैः कृते यत्र निजकार्य्ये मनोभुवा।
अक्षिभ्रुवनिभं न्यस्तं तन्मुखे शरकार्मुकम्॥

अत्र अपि योऽयम् अक्षिभ्रुवं शरमार्मुकम् इति एतयोः "प्राणितूर्य्यसेनाङ्गानाम्" इति "वाङ्मनसाक्षिभ्रुव" इति च विशेषलक्षणयोगः तेन धवखदिरपलाशम् इत्येवमादिषु नातिप्रसङ्गो भवति॥२०५॥

इति समुच्चयालङ्कारनिरूपणम्।

विधिनाथ निषेधेन प्रतिषेधोक्तिरत्र या।
शुद्धा मिश्रा च साक्षेपो रोधो नाक्षेपतः पृथक्॥ २०६॥

तत्र विध्याक्षेपः शुद्धो यथा,—

वागर्थाविति। वाक् च अर्थश्च ताविव सम्पृक्तौ जगतः पितरौ मातापितरौ पार्वतीपरमेश्वरौ वागर्थप्रतिपत्तये वाक्यार्थज्ञानाय वन्दे प्रणमामि॥ २०४॥

स्त्रीणामिति। यत्र यस्यां नगर्य्यां स्त्रीणां हावैः विलासविशेषैः निजकार्य्ये जगद्वशीकरणरूपे इति भावः कृते सम्पादिते सति मनोभुवा कामेन तन्मुखे तासां स्त्रीणां मुखे अक्षिभ्रुवनिभं नेत्रभ्रुव्याजं शरकार्मुकं शरो धनुश्चेत्यर्थः न्यस्तं रचितं न्यासत्वेन स्थापितमित्यर्थः स्वकार्य्यसिद्धौ निष्प्रयोजनत्वादिति भावः॥ २०५॥

आक्षेपं लक्षयति विधिनेति। अत्र अस्मिन् अलङ्कारसन्दर्भे विधिना अथ पक्षान्तरे निषेधेन या प्रतिषेधोक्तिः निषेधवचनं सा शुद्धा मिश्रा चेति द्विविधा आक्षेपः। रोधः तदाख्योऽलङ्कारः आक्षेपतः पृथक् भिन्नः न। आक्षेपपर्य्याय इत्यर्थः॥ २०६॥

गच्छ गच्छसि चेत् कान्त ! पन्थानः सन्तु ते शिवाः।
ममापि जन्म तत्रैव भूयाद् यत्र गतो भवान् ॥

अत्र गच्छ इति अस्य विधिवाक्यस्य ममापि जन्म तत्रैव भूयात् इत्याशिषा अनुकूलतयैव मरणसूचनात् निषेधः क्रियते इति शुद्धोऽयं विध्याक्षेपः ॥ २०७ ॥

मिश्रो यथा,—

अलं विवादेन यथा श्रुतं त्वया तथाविधस्तावदशेषमस्तु सः।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते ॥

अत्र अलं विवादेन इति निषेधेन तथाविधः सोऽस्तु इति विधिना च तन्मतमवस्थाप्य ममात्र भावैकरसं मनः स्थितम् इति विधिना न कामवृत्तिर्वचनीयमीक्षते इति प्रतिषेधेन च यत् पुनराक्षिपति सोऽयं विधिनिषेधाभ्यां विधिमिश्र आक्षेपो भवति ॥ २०८ ॥

निषेधाक्षेपः शुद्धो यथा,—

कुतः कुवलयं कर्णे करोषि कलभाषिणि !।
किमपाङ्गमपर्य्याप्तमस्मिन् कर्मणि मन्यसे ॥

गच्छेति। प्रवसन्तं नायकं प्रति उक्तिः। हे कान्त ! गच्छसि प्रवससि चेत् यदि, गच्छ प्रवस। ते तव पन्थानः शिवाः शुभाः निर्विघ्ना इत्यर्थः सन्तु भवन्तु, अत्र यस्मिन् देशे भवान् गतः गमिष्यतीत्यर्थः भविष्यत्सामीप्य क्तः प्रत्ययः। तत्रैव ममापि जन्म उत्पत्तिः भूयात् ॥ २०७ ॥

अलमिति। विवादेन वाक्कलहेन अलं न किमपि प्रयोजनमित्यर्थः। त्वया यथा येन प्रकारेण श्रुतम् आकर्णितं लोकमुखादिति भावः स हरः तथाविधः तत्प्रकारः तावत् अशेषं सम्यगित्यर्थः अस्तु भवतु। मम मनः अत्र हरे भावो भक्तिरेव एकोऽद्वितीयो रसो रागो यस्य तथाविधं सत् स्थितं निश्चलतेनेति भावः। ननु अकार्य्यकरणात् साधुभिर्निन्द्यत एवेत्यत्राह नेति कामवृत्तिः स्वेच्छाचारी जनः वचनीयं निन्दां न ईक्षते न पश्यति विचारयति इत्यर्थः ॥ २०८ ॥

अत्र कुतः कुवलयं कर्णे करोषि इति अस्य निषेधवाक्यस्य किमपाङ्गम् इत्यादिना प्रश्नपरेण अपि निषेधपर्य्यवसायिना वाक्येन समर्थनं क्रियते इति अयं शुद्धो निषेधाक्षेपः ॥ २०९ ॥ मिश्रो यथा,—

सच्चं गरुआ गिरिणो को भणइ जलासआ ण गम्भीरा ।
धीरेहिं उवमाउं तहवि हु मह णत्थि उच्छाहो ॥

अत्र सत्यं गुरवोऽपि गिरयः इति विधिः, क आह जलाशया न गम्भीरा इति परमताक्षेपः, ताभ्यां गिरीणां गुरुत्वं सागराणाञ्च गाम्भीर्य्यम् । यत् अयम् उत्तरार्द्धेन धीरापेक्षया निषेधति अन्यापेक्षया तत् तदेव विधत्ते । स एष मिश्रो निषेधाक्षेपः । रोधो नाक्षेपतः पृथक् इति उक्तम् । तत्र एतावान् विशेषः ।

क्रियासूत्तिष्ठमानस्य वारणं कारणेन यत् ।
उक्त्या युक्त्या च रोधो य आक्षेपः सोऽयमुच्यते ॥ २१०
प्रतिकूलोऽनुकूलश्च विधौ रोधोऽभिधीयते ।

कुत इति । हे कलभाषिणि मधुरभाषिणि ! कर्णे कुवलयं नीलोत्पलं कुतः कस्मात् करोषि ? धारयसि ? अस्मिन् कर्मणि कर्णभूषणव्यापारे इत्यर्थः अपाङ्गं नयनप्रान्तम् अपर्य्याप्तम् अक्षमं किं मन्यसे ? । अपाङ्गेनैव कुवलयकार्य्यकरणात् निष्फलं पुनस्तद्धारणमिति भावः ॥ २०९ ॥

सत्यं गुरवो गिरयः को भणति जलाशया न गम्भीराः ।
धीरैरुपमातुं तथापि खलु मम नास्ति उत्साहः ॥

सत्यमिति । गिरयः पर्वताः गुरवः महान्तः सत्यम् । जलाशयाः समुद्रा इत्यर्थः गम्भीराः अतलस्पर्शा न इति को जनः भणति कथयति जलाशया गम्भीरा एवेति सत्यमित्यर्थः तथापि गिरीणां गुरुत्वेऽपि समुद्राणां गम्भीरत्वेऽपि चेत्यर्थः धीरैः मनीषिभिः महानुभावैरित्यर्थः सह उपमातुं तुलयितुं तानिति शेषः मम उत्साहः उद्यमः नास्ति खलु न विद्यत एवेत्यर्थः । धीरा गिरीन् समुद्रांश्च गौरवेण गाम्भीर्य्येण च अतिशेरते इति भावः ॥ २१० ॥

निषेधेऽप्युक्तियुक्तिभ्यां द्विप्रकारः स कथ्यते ॥ २११ ॥

तत्र उक्त्या विधौ प्रतिकूलो यथा,—

किं जम्पिएण दहमुह! जम्पिअसरिसं अणिव्वहन्तस्स भरं।

एत्तिअं जम्पिअ सारं णिहणं अण्णे वि वज्जधारासु गआ॥

अत्र किमः प्रतिकूलवाचित्वात् वचनवृत्त्या एव जल्पन् दशाननः चित्ररथेन रुद्धः। कारणञ्च वज्रप्रभावकीर्त्तनादिति प्रातिकूल्येन उपन्यस्तम्। सोऽयम् औक्तः प्रतिकूलश्च विध्याक्षेपो रोध इति उच्यते ॥ २१२ ॥

उक्त्यैव विधौ अनुकूलो यथा,—

हन्तुं वि मग्गमाणो हन्तुं तुरिअस्स अप्पणा दहवअणं।

किं इच्छसि काउं से पवअवइ पिअं त्ति विप्पिअं रहुवइणो॥

अत्र अपि किमः प्रतिषेधवाचित्वाद् वचनवृत्त्या एव दशाननबधाय उत्तिष्ठमानः सुग्रीवो जाम्बवता रुद्धः कारणञ्च पुनः आनुकूल्येनैव उक्तम्। किमेतत् त्वया रघुपतेः प्रियरूपं विप्रियम् उपक्रान्तमिति। सोऽयम् औक्तोऽनुकूलश्च विध्याक्षेपो रोध इति उच्यते ॥ २१३ ॥

रोधं विशिनष्टि क्रियाखिति। क्रियासु कार्य्येषु उत्तिष्ठमानस्य प्रवर्त्तमानस्य उक्त्या युक्त्या च कारणेन यत् वारणं निषेधः यः आक्षेपः सोऽयं रोध उच्यते कथ्यते।

प्रतिकूल इति। रोधः विधौ प्रतिकूलः अनुकूलश्च द्विप्रकारः अभिधीयते कथ्यते। निषेधेऽपि उक्तियुक्तिभ्याम् उक्त्या युक्त्या चेत्यर्थः स रोधः द्विप्रकारः कथ्यते ॥ २११ ॥

किं जल्पितेन दशमुख। जल्पितसदृशमनिर्वहतो भरम्।

एतावत् जल्पित्वा सारं निधनमन्येऽपि वज्रधारासु गताः॥ सं

किमिति। हे दशमुख! दशानन! रावण! जल्पितसदृशं वचनानुरूपं भरं कार्य्यभारमित्यर्थः अनिर्वहतः निर्वोढुमशक्नुवत इत्यर्थः जल्पितेन वचनेन

विधावेव युक्त्याऽनुकूलः प्रतिकूलश्च यथा,—

गच्छेति वक्तुमिच्छामि त्वत्प्रियं मत्प्रियैषिणी ।
निर्गच्छति मुखाद् वाणी मा गा इति करोमि किम् ॥

अत्र यथोक्तम् इति उक्त्वा किं करोमि इति आनुकूल्येनैव आह अत्र किमः प्रश्नार्थत्वेऽपि युक्त्या निषेधार्थत्वं गम्यते । सोऽयं यौक्तोऽनुकूलो यौक्तश्च विध्याक्षेपो रोध इति उच्यते । अयमेव च अस्य वैयात्योक्तिपक्षे यौक्त-प्रतिकूल-विध्याक्षेपो रोधो भवति ॥ २१४ ॥

युक्त्या निषेधे प्रतिकूलो यथा,—

पउरजुआणो गामो महुमासो जोव्वणं पई ठेरो ।
जस्स सुरा साहीणा असई मा होउ किं मरउ ॥

अत्र असती मा भवतु इति यः प्रतिषेधमाह स प्रचुरयुवा

निरर्थकेनेति भावः किम् ? न किमपि प्रयोजनमित्यर्थः । अन्येऽपि असुरा इति भावः एतावत् असारं निःसारं जल्पित्वा आक्रुश्येति यावत् वज्रधारासु देवराजस्येति शेषः निधनं पञ्चत्वं गताः प्राप्ताः ॥ २१२ ॥

हन्तुमपि मार्गमाणो हन्तुं त्वरितस्यात्मना दशवदनम् ।
किमिच्छसि कर्तुमस्य प्लवगपते ! प्रियमिति विप्रियं रघुपतेः ॥ सं

हन्तुमिति । हे प्लवगपते ! वानराधीश्वर ! सुग्रीव ! हन्तुं व्यापादयितुम् अपि मार्गमाणः अन्विष्यन् हन्तुं विमार्गमाण इति पाठान्तरम् । त्वम् आत्मना स्वयं दशवदनं रावणं हन्तुं त्वरितस्य त्वरमाणस्य अस्य रघुपतेः रामस्य प्रियं प्रीतिजननमिति हेतोः विप्रियम् अप्रियम् कर्तुं किं कथम् इच्छसि ? रघुपतेः स्वयं रावणो हन्तव्य इति कृतप्रतिज्ञस्य त्वया रावणवधः क्रियमाणः प्रीतिं नोत्पादयतीति त्वमस्माद्व्यापारात् निवर्त्तस्वेति भावः ॥२१३॥

गच्छेति । त्वं गच्छ इति तव प्रियं वक्तुं इच्छामि अभिलषामि किन्तु मम प्रियम् इच्छतीति मत्प्रियैषिणी सती मा गा न गच्छ इति मुखात् वाणी निःसरति निर्गच्छति किं करोमि ॥ ॥ २१४ ॥

ग्राम इत्यादि कारणम् उक्त्वा ततः किं म्रियताम् इति प्रातिकूल्येन रुध्यते । तत्र किमः काक्वा सासूयप्रश्नार्थस्य युक्त्या निषेधार्थत्वं गम्यते, सोऽयं योक्तः प्रतिकूल-निषेधाक्षेपो रोध इति उच्यते ॥ २१५ ॥

युक्त्यैव निषेधेऽनुकूलो यथा,—

कहं मा खिज्जउ मज्झो इमीअ कन्दोट्टदलसरिच्छेहिं ।
अच्छीहि जो ण दीसइ घणत्थणभररुद्धपसरेहिं ॥

अत्र स्तनादिवत् अस्या मध्योऽपि मा क्षीयताम् इति निषेधवादी केनचित् आनुकूल्येन रुद्ध्यते। कथम् अयं मा क्षीयतामिति योऽस्याः कुवलयदलसदृशाभ्यां लोचनाभ्यां घनस्तनरुद्धप्रसराभ्यां न दृश्यते। इयं हि एताभ्यामन्यमीक्षमाणा यथैव न पश्यति सोऽहमिव मध्योऽपि क्षीयमाणो लक्ष्यते। तत्र च किमः प्रश्नार्थत्वे निषेधार्थत्वं गम्यते। सोऽयं योक्तोऽनुकूलश्च निषेधाक्षेपो रोध इति उच्यते ॥ २१६ ॥

प्रचुरयुवा ग्रामो मधुमासो यौवनं पतिः स्थविरः ।
जन्धसुरा स्वाधीना असती सा भवतु किं म्रियताम् ॥ स

प्रचुरेति। प्रचुरा बहवः युवानः यत्र तथाविधः ग्रामः मधुमासः वसन्तमासः चैत्रमास इत्यर्थः यौवनं तारुण्यं पतिः स्थविरः वृद्धः । सा स्वाधीना स्ववशा जन्धसुरा पीतमद्या अतः असती दुश्चारिणी भवतु किं अथवा म्रियतां प्राणान् त्यजतु । एतस्यामवस्थायाम् असत्पथावलम्बनं मरणं वा सम्भवतीति भावः ॥ २१५ ॥

कथं मा क्षीयतां मध्योऽस्याः कन्दोट्टदलसदृशाभ्याम् ।
अक्षिभ्यां यत्र दृश्यते घनस्तनभररुद्धप्रसराभ्याम् ॥

कथमिति। अस्याः नायिकायाः मध्यः मध्यभागः कथं मा क्षीयतां? न क्षयं गच्छतु? क्षीणतां व्रजतु? अपि तु क्षीणतागमोऽस्य उचित एवेति भावः। यत् यतः कन्दोट्टदलसदृशाभ्यां नीलोत्पलदलसमाभ्यां घनयोः सान्द्रयोः स्तनयोः भरेण उच्छ्रायेण रुद्धः आवृतः प्रसरः व्यापारः ययोः तथाविधाभ्यां अक्षिभ्यां नयनाभ्यां

निषेधे एव उक्त्या प्रतिकूलोऽनुकूलश्च यथा,—

भ्रुकुटिरारचिता गतमग्रतो हृतमथाननमुक्तमसाधु वा।
इयमति प्रभूता क्रियते बलाद् अकुपितोऽपि हि यत् कुपितो जनः॥

अत्र अकुपितोऽपि कुपितः क्रियते इति योऽयं निषेधाक्षेप रूप उपालम्भः तत्र च भ्रुकुटिरारचिता इत्यादिवैयात्येन प्रतिकूलकारणम् उपन्यस्य सेयम् अतिप्रभूता सोऽयं बलात्कार इति काक्वा वाचनिकमेव उपालम्भम् अभिधत्ते। तेनायम् औक्तः प्रतिकूलश्च निषेधाक्षेपो रोध इत्युच्यते। अयमेव च अस्यापि क्रियासु अवैयात्योक्तिपक्षे स्वरूपाख्यानात् औक्तोऽनुकूलनिषेधाक्षेपो रोधो भवति। यदा तु कारणम् उपन्यस्यापि क्रियासु उत्तिष्ठमानो न रुध्यते तदा आक्षेप एव न रोधः॥ २१७॥

तद् यथा,—

गमिआ कदम्बवाआ दिट्ठं मेहंधआरिअं गअणअलं।
सहिओ गज्जिअसद्दो तह वि हु से णत्थि जीविए आसन्धो॥

न दृश्यते न अवलोक्यते। मानिनी महद्भिः सादरमनालोकिताः दुःखेन क्षीयन्ते इति गम्यते। एषा नयनाभ्या य नेक्षते तस्य क्षय एवोचित इति कामिनामाशयः॥ २१६॥

भ्रुकुटीरिति। भ्रुकुटिः भ्रूभङ्गिः आरचिता कृता गतं गमनं प्रवसनमिति यावत् अग्रतः प्राक् हृत निवारितमित्यर्थः भ्रुभङ्गैरेवेति भावः। अथ भ्रूभङ्गिरचनानन्तरम् असाधु वा निष्ठुरञ्च आननमुक्तं वदननिःसृतम्। अकुपितोऽपि प्रशान्तोऽपि सौम्योऽपीति यावत् जनः बलात् सहसेत्यर्थः यत् कुपितः क्रियते इयम् अतिप्रभुता अतिशयेन प्रभुत्वं स्वाधीनपतिकाया अपराधलेशेऽपि कान्तं प्रतिकोपो ज्ञायते किं पुनर्विदेशगमनप्रस्तावे इति भावः॥ २१७॥

गमिताः कदम्बवाताः दृष्टं मेघान्तरितं गगनतलम्।
सोढो गर्जितशब्दस्तथापि खलस्या नास्ति जीविते आसन्धा॥ सं

अत्र कदम्बवातातिवाहनादीनां जीविताध्यवसायहेतूनाम् उपन्यासेऽपि क्रियासु उत्तिष्ठमानो न रुध्यते। कथमयं न जीवति इति किं तर्हि कारणमेव आक्षिप्यते तथापि नास्ति अस्य जीवितेऽध्यवसायः इति। सोऽयम् आक्षेपो एव न रोधः॥ २१८॥

क्रियोद्यतस्यापि वारणे कारणानाम् अन्यपरत्वे रोधो न भवति यथा,—

धनञ्च बहुलभ्यं ते सुखं क्षेमञ्च वर्त्मनि।
न च मे प्राणसन्देहस्तथापि प्रिय! मास्म गाः॥

अत्र यद्यपि यात्रोद्यतः प्रियो रुध्यते प्रभूताथलाभादीनां कारणानां गमनपरत्वमेव न निवारणपरत्वम् अतोऽयं न रोधः। किं तर्हि, आक्षेप एव भवति।

इति आक्षेपालङ्कारनिरूपणम्।

ज्ञेयः सोऽर्थान्तरन्यासो वस्तु प्रस्तुत्य किञ्चन।
तत्साधनसमर्थस्य न्यासो योऽन्यस्य वस्तुनः॥ २१९॥
स उपन्यस्तवस्तूनां साधर्म्येण च कथ्यते।

गमिता इति। कदम्बानां नीपकुसुमानां वाताः वायवः गमिताः अतिवाहिताः सोढा इत्यर्थः गगनतलं मेघैः अन्तरितम् आच्छन्नं दृष्टम् अवलोकितम्। गर्ज्जितशब्दः गर्जनध्वनिः सोढः तथापि अस्याः नायिकायाः जीविते आसन्ना अध्यवसायः नास्ति खलु? नैव किमित्यर्थः अपितु अस्त्येवेत्यर्थः त्वत्प्रतीक्षयेति भावः। दूत्या उक्तिरियम्॥ २१८॥

धनमिति। हे प्रिय! ते तव बहु धनं लभ्यञ्च प्राप्यमेवेत्यर्थः प्रवासगमनादिति भावः वर्त्मनि पथि सुखं क्षेमं मङ्गलञ्च भवितेति शेषः मे मम प्राणानां सन्देहः संशयश्च न च, त्वद्विरहे इति शेषः तथापि मास्मगा न गच्छ॥ २२०॥

अर्थान्तरन्यासं लक्षयति ज्ञेय इति। किञ्चन किमपि वस्तु प्रस्तुत्य सङ्कीर्त्य तस्य वस्तुनः साधने दृढीकरणे समर्थस्य योग्यस्य अन्यस्य वस्तुनः यः न्यासः कीर्त्तनं सः अर्थान्तरन्यासः ज्ञेयः॥ २१९॥

स इति। सः अर्थान्तरन्यासः विद्वद्भिः उपन्यस्तवस्तूनां कीर्त्तितविषयाणां

वैधर्म्येण च विद्वद्भिर्वैपरीत्येन कुत्रचित् ॥ २२० ॥

तेषु साधर्म्येण यथा,—

पयोमुचः परीतापं हरन्त्येते शरीरिणाम् ।
न चात्मलाभो महतां परदुःखोपशान्तये ॥

अत्र परीतापापहरणक्षमस्य जलदाख्यस्य महावस्तुनो न्यसनं विधाय तत्साधनसाधर्म्येणैव तत्साधनक्षम महापुरुषलक्षणं वस्त्वन्तरम् उपन्यस्यति। सोऽयं साधर्म्येण अर्थान्तरन्यासः ॥ २२१ ॥

वैधर्म्येण यथा,—

प्रियेण सङ्गम्य विपक्षसन्निधावुपाहितां वक्षसि पीवरस्तने ।
स्रजं न काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि ॥

अत्र अपि प्रियतमेन स्वयं कान्ताहृदये समारोपितायाः स्रजः प्रेमकारणम् उपन्यस्य जलाविलत्वदोषवत्या अपि यत् अत्यागकारणं तदिह वैधर्म्यद्वारेण प्रतिपादितम् अतो वैधर्म्येण अयम् अर्थान्तरन्यासः ॥ २२२ ॥

क्वचित् साधर्म्येण समानधर्मवत्तया क्वचित् वैधर्म्येण विरुद्धधर्मवत्तया क्वचित् वैपरीत्येन विपर्ययेण च कथ्यते ॥ २२० ॥

पयोमुच इति। एते पयोमुचः मेघाः शरीरिणां देहिनां परीतापं सन्तापं हरन्ति अपनयन्ति। तथाहि महतां महनीयचरितानां जनानाम् आत्मलाभः जन्म इत्यर्थः परेषां दुःखस्य शान्तये अपनयाय न च नैव? काकुरत्रानुषञ्जनीयः अपि तु परदुःखशान्त्यर्थमेवेत्यर्थः ॥ २२१ ॥

प्रियेणेति। काचित् कान्ता विपक्षस्य सपत्न्या इति भावः सन्निधौ समक्षं प्रियेण कान्तेन सङ्गम्य विरचय्य पीवरस्तने घनस्तनशालिनि वक्षसि उपाहितां निहितां जलाविलां जलसिक्तां जलक्रीडावसरे इति भावः स्रजं मालां न जहौ न तत्याज। तथाहि गुणाः उत्कर्षा इति भावः प्रेम्णि हि प्रणये एव वसन्ति तिष्ठन्ति, वस्तुनि विषये न, वस्तुगतोत्कर्षौ न गण्येते प्रेमगतावेव गण्येते इति भावः ॥ २२२ ॥

विपर्य्ययेण यथा,—

जो जस्स हिअअदइओ दुक्खं देन्तो वि सो सुहं देइ।
दइअणहदूसिआणं वि वट्टइ थणआणं रोमञ्चो॥

अत्र साधनसमर्थं वस्तु प्रथमत एव उपन्यस्य पश्चात् तत्साध्यम् अभिहितम् इति विपर्य्यासादयं विपर्य्ययो नाम अर्थान्तरन्यासः॥ २२३॥

प्रोक्तो यस्तूभयन्यासोऽर्थान्तरन्यास एव सः।
स प्रत्यनीकन्यासश्च प्रतीकन्यास एव च॥ २२४॥

तेषु उभयन्यासो यथा,—

ते विरला सप्पुरिसा जे अभणन्ता घडन्ति कज्जलावे।
थोअच्चिअ ते वि दुमा जे अणुणिअकुसुमणिम्मला होन्ति फलं॥

अत्र विद्यमानमपि साध्यसाधनभावम् अप्रतिपाद्य यद् उभयोः वस्तुनोः न्यसनं सोऽयम् उभयन्यासः॥ २२५॥

यो यस्य हृदयदयितो दुःखं दददपि स सुखं दत्ते।
दयितनखदूषितयोः स्तनयोः रोमाञ्चः॥ सं

य इति। यो जनः यस्य जनस्य हृदयदयितः मनःप्रीतिकरः, सः जनः दुःखं दददपि दुःखमपि सुखं दत्ते जनयतीत्यर्थः। तथाहि दयितस्य कान्तस्य नखैः दूषितयोः दोषं नीतयोरपि स्तनयोरपीति भावः स्तनयोः रोमाञ्चः रोमहर्षः कान्तसङ्गजनितोल्लासादिति भावः वर्त्तते जायते॥ २२३॥

प्रोक्त इति। यस्तु उभयन्यासः प्रोक्तः, सः अर्थान्तरन्यासः प्रतीकन्यासः प्रतीकन्यासश्च कथ्यते इति शेषः॥ २२४॥

ते विरलाः सत्पुरुषा ये अभणन्तो घटन्ते कार्य्यलाभे।
स्तोका एव तेऽपि द्रुमा ये अज्ञातकुसुमनिर्मला ददति फलम्॥ स०

ते इति। ये अभणन्तः अकथयन्तः [illegible] कार्य्य [illegible] कार्य्यमित्यर्थः परेषामिति भावः घटन्ते प्रवर्त्तन्ते ते [illegible] विरलाः [illegible] ये [illegible] ये

प्रत्यनीकन्यासो यथा,—

विरला उवअरिइव्विअ णिरवेक्खा जलहरव्व वच्चन्ति।
खिज्जन्ति ताणं विरहे विरलाव्विअ सरिप्पवाहाव्व॥

अत्र यदिदम् उपकृत्यानपेक्षितप्रत्युपकाराणां गमनं यच्च अकृतप्रत्युपकाराणां तद्विरहेऽवसादनं तद् उभयमपि जलधर-सरित्प्रवाहयोः अन्योऽन्यातिशयितयोः उपन्यस्यमानं प्रत्यनीकन्यासो भवति॥ २२६॥

प्रतीकन्यासो यथा,—

का कथा बाणसन्धाने ज्याशब्देनैव दूरतः।
हुङ्कारेणैव धनुषः स हि विघ्नान् व्यपोहति॥

अत्र विघ्नप्रोत्सारणसमर्थाया बाणमोक्षणलक्षणायाः क्रियायाः प्रथमावयवभूतं ज्याशब्दं धनुषो हुङ्कारमिव इति तत्साधनम् उपन्यस्य प्रतीकन्यासनामानम् अर्थान्तरन्यासम् अभिधत्ते॥ २२७॥

इति अर्थान्तरन्यासालङ्कारनिरूपणम्।

तदाविधाः सन्तः फलं ददति उत्पादयन्तीत्यर्थः तेऽपि तादृशा अपीत्यर्थः द्रुमाः लतः स्तोका एव अल्पा एव॥ २२५॥

विरला उपकृत्यैव निरपेक्षा जलधरा इव वर्त्तन्ते।
क्षीयन्ते तेषां विरहे विरला एव सरित्प्रवाहा इव॥ सं

विरला इति। जलधरा इव मेघा इव विरला अल्पाः पुरुषा इति शेषः उपकृत्यैव उपकारं कृत्वैव जलवर्षणेन धनादिदानेन चेति भावः निरपेक्षाः उदासीना इत्यर्थः वर्त्तन्ते भवन्ति। सरितां नदीनां प्रवाहा इव स्रोतांसीव विरला अल्पा उपकृता इति भावः जनाः तेषाम् उपकारिणां विरहे अदर्शने प्रत्युपकाराकरणे इति भावः क्षीयन्ते कृशीभवन्ति दुःखमनुभवन्ति चेत्यर्थः॥ २२६॥

केति। बाणस्य शरस्य सन्धाने सयोजने कथा का? न किमपि वक्तव्यमिति भावः सः राजा धनुषः हुङ्कारेणैव ज्याशब्देनैव मौर्वीनिनादेनैव विघ्नान् यज्ञ-विघातकान् व्यपोहति हि निरस्यत्येव॥ २२७॥

गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम्।
विशेषदर्शनायैव सा विशेषोक्तिरिष्यते॥
प्रत्येतव्येऽभिधेये च सा विशेषस्य कारणे।
वैकल्यादर्शनेनापि क्वचिदप्युपपद्यते॥ २२८॥

सा गुणवैकल्येन यथा,—

न कठोरं न वा तीक्ष्णमायुधं पुष्पधन्वनः।
तथापि जितमेवाभूदमुना भुवनत्रयम्॥

अत्र अतीक्ष्णेन अकठोरेण च आयुधेन पुष्पधन्वा त्रीणि जगन्ति विजयते इति तस्य प्रभावातिशयः प्रतीयते। सेयं प्रतीयमानविशेषहेतुर्गुणवैकल्यवती विशेषोक्तिः॥ २२९॥

जातिवैकल्येन यथा,—

न देवकन्यका नापि गन्धर्वकुलसम्भवा।
तथाप्येषा तपोभङ्गं विधातुं वेधसोऽप्यलम्॥

अत्र देवकन्यकात्वाभावेऽपि एषा वेधसोऽपि तपोभङ्गं विधातुम् अलम् इति वर्णनीयायाः रूपातिशयः प्रतीयते। सेयं प्रतीयमानविशेषहेतुर्जातिवैकल्यवती विशेषोक्तिः॥ २३०॥

विशेषोक्तिं लक्षयति गुणेति। यत्र विशेषदर्शनाय वैशिष्ट्यप्रदर्शनाय एव गुणशक्त्यादयः जातिः गौत्वादिका क्रिया पाकादिः आदिग्रहणं वाच्यादिप्रत्ययेन तेषां गुणादीनां वैकल्यदर्शनं वैकल्यप्रतिपादनं सा विशेषस्य उक्तिरिति व्युत्पत्त्या विशेषोक्तिः इष्यते॥२२८॥

नेति। कुसुमं धनुर्यस्य स कुसुमधन्वा कामः तस्य आयुध्यते अनेनेत्यायुधम् न कठोरं न कठिनं न वा तीक्ष्णं नैव अरन्तुदमित्यर्थः तथापि अमुना कुसुमधन्वना भुवनानां त्रयं जितमेव पराभूतमेव॥ २२९॥

नेति। एषा नारीत्यर्थः देवकन्यका न, गन्धर्वकुलसम्भवा गन्धर्वी अपि न, तथापि वेधसोऽपि ब्रह्मणोऽपि तपोभङ्गं तपश्चरणव्याघातं विधातुं कर्तुम् अलं समर्थेत्यर्थः॥ २३०॥

क्रियावैकल्येन यथा,—

न बद्धा भ्रूकुटिर्नापि स्फुरितो रदनच्छदः ।
न च रक्ता भवद्दृष्टिर्जितश्च द्विषतां कुलम् ॥

अत्र भ्रूभङ्गादेरभावेऽपि योऽयं द्विषतां जयस्तेन वर्णनीयस्य प्रतापातिशयः प्रतीयते । सेयं प्रतीयमानविशेषहेतुः क्रियावैकल्यवती विशेषोक्तिः ॥ २३१ ॥

आदिग्रहणाद्वाच्यवैकल्यन यथा,—

न रथा न च मातङ्गा न हया न च पत्तयः ।
स्त्रीणामपाङ्गदृष्टैव जीयते जगतां त्रयम् ॥

अत्र रथादेरभावेऽपि जगत्त्रयविजयहेतुः स्त्रीणाम् अपाङ्गावलोकनम् अभिधीयते । सेयम् अभिधेयविशेषहेतुर्द्रव्यवैकल्यवती विशेषोक्तिः ॥ २३२ ॥

द्रव्यस्यापि वैकल्येन यथा,—

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आक्रामत्येव तेजस्वी तथाप्यर्को जगत्त्रयम् ॥

अत्र रथादीनां द्रव्याणाम् एकचक्रत्वादिभिर्वैकल्येऽपि यदेतद्भगवतो भास्करस्य भुवनत्रयाक्रमणं तस्य इह तेजस्विताहेतुः

नेति । भ्रुवोः कुटिः भ्रूभङ्गिः न बद्धा न रचिता, दैवेनेति शेषः, रदनच्छदः ओष्ठः नापि स्फुरितः नैव स्पन्दितः क्रोधावेशादिति भावः दैवस्येति शेषः, दृष्टिश्च रक्ता नाभवत् अत्रापि दैवस्येति शेषः तथापि द्विषता शत्रूणां कुलं जितञ्च परिभूतञ्च ॥ २३१ ॥

नेति । रथा न मातङ्गा हस्तिनश्च न हया अश्वाः न पत्तयः पदातयश्च न सन्तीति सर्वत्र योज्यम् । युद्धसाधनं किमपि नास्तीति भावः तथापि स्त्रीणां कामिनीनाम् अपाङ्गदृष्ट्यैव कटाक्षावलोकनेनैव जगतां त्रयं जीयते पराभूयते ॥ २३२ ॥

एकेति । रथः एकं चक्रं यस्य तथाभूतः, यन्ता सारथिः अरुण इत्यर्थः

अभिधीयते। सेयम् अभिधेयविशेषहेतुर्वैकल्यवद्द्रव्या नाम अपरा विशेषोक्तिः॥ २३३॥

द्रव्यस्य योगायोगाभ्याम् अवैकल्येन अपि क्वचिदेषा विशेषाय अविशेषाय च यथा,—

अयं तया रथक्षोभादंसेनांसो निपीडितः।
एकः क्षतौ शरीरेऽस्मिन् शेषमङ्गं भुवो भरः॥

अत्र अयं तया स्पृष्टोऽंसः पुण्यवान् तया च अस्पृष्टं शेषमङ्गं मे निरर्थकम् इति योऽयम् अवैकल्यदर्शनेऽपि विशेषः तेन एषा हेतुमत्यपि हेतुमता विशेष्यमाणा यथोक्ता विशेषोक्तिः भवति। या पुनरिह उर्वश्याम् इतो वाक्याद् गुणादिविशिष्टा अवस्थितिः सा पर्यायोक्तिर्न विशेषोक्तिः॥ २३४॥

इति विशेषालङ्कारनिरूपणम्।

क्रियाकारकसम्बन्धिसम्बन्धदृष्टान्तवस्तुषु।
क्रियापदाद्युपस्कारमाहुः परिकरं बुधाः॥ २३५

तेषु क्रियापरिकरो यथा,—

ववसिअणिवेइअत्थो सो मारुइ लद्धपच्चआगअहरिसं।

विकलः अपुष्टकलेवर इत्यर्थः विनतया अकालस्फोटनादिति भावः हया अश्वा विषमाः सप्तसङ्ख्या इति भावः तथापि एवं मानयोवैकल्येऽपीत्यर्थः तेजस्वी अर्कः सूर्यः जगतां त्रयं त्रिभुवनम् आक्रामत्येव वशीकरोत्येव॥ २३३॥

अयमिति। तया उर्वश्या अयम् अंसः स्कन्धः मदीय इति भावः रथस्य क्षोभात् गतिवैषम्यात् असेन तदीयेनेति भावः निपीडितः सन्ताडितः निर्भरं स्पृष्ट इति यावत् अतः अस्मिन् शरीरे एकः स्कन्धरूपोऽंश इति भावः क्षतौ कृतार्थः धन्य इति यावत् तदङ्गस्पर्शादिति भावः शेषं स्कन्धातिरिक्तमित्यर्थः अङ्गं हस्तपदाद्यवयव इत्यर्थः भुवः पृथिव्याः भरः अकिञ्चिदिति भावः। पुरुरवस उक्तिरियम्॥ २३४॥

परिकरं लक्षयति क्रियेति। क्रियादिषु क्रियापदादीनाम् उपस्कारम् उपयोगित्वमित्यर्थः परिकरं बुधाः कवयः आहुः कथयन्ति॥ २३५॥

सुग्गीवेण उरत्थलवणमालामलिअमहुअरं उवऊढो ॥

अत्र लब्धप्रत्ययागतहर्षम् इत्यनेन उरःस्थलवनमालामृदित-मधुकरम् इत्यनेन च मारुतेः उपगूहनक्रियायाः परिकरत्वात् अयं क्रियापरिकरः ॥ २३६ ॥

कारकपरिकरो यथा,—

पड़िआअ हत्थसिढिलिअणिरोहा पण्डुरसमूच्छसन्तकवोला।
पेल्लिअवामपओहरविसमुण्णअडाहिणत्थणी जणअसुआ ॥

अत्र हस्तशिथिलितनिरोधा पाण्डुरसमुच्छसत्कपोलेत्यनेन प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनीत्यनेन च जनकसुता इति च कारकपदस्य परिकरितत्वादयं कारकपरिकरः ॥२३७॥

व्यवसायनिवेदितार्थः स मारुतिर्लब्धप्रत्ययागतहर्षम्।
सुग्रीवेण उरःस्थलवनमालामृदितमधुकरमुपगूढः ॥

व्यवसितेति। व्यवसित व्यवसायः क्रियाविशेष इत्यर्थः आनन्देन मधुवनभञ्जनमिति भावः तेन निवेदितः ज्ञापितः अर्थः प्रयोजनं सीतान्वेषण मया कृतमित्येव रूपमिति भावः येन तथाभूतः स मारुतिः वायुतनयो हनुमान् सुग्रीवेण लब्धः प्रत्ययेन हनुमता निश्चितमेव सीता अन्विष्टेति विश्वासेन आगतः उपस्थितः हर्षो यत्र तद् यथा तथा किञ्च उरःस्थले स्वीये इति भावः या वनमाला वनकुसुमस्रक् तत्र मृदिता दलिता मधुकरा भ्रमराः यस्मिन् तद् यथा तथा उपगूढः आलिङ्गितः अत्रोपगूहनक्रियायां व्यवसितनिवेदनक्रियादीनामुपयोगित्वमिति क्रियापरिकरः ॥ २३६ ॥

पतिता च हस्तशिथिलितनिरोधा पाण्डुरसमुच्छसत्कपोला।
प्रेरितवामपयोधरविषमोन्नतदक्षिणस्तनी जनकसुता ॥

पतितेति। पतिता भूमौ स्खलगावेत्यर्थः अपि हस्तेन शिथिलितः निरोधः आवरणमित्यर्थः यया सा पाण्डुरं विशदं यथा तथा समुच्छसन्तौ विकसन्तौ कपोलौ यस्याः तथाभूता तथा प्रेरितेन सञ्चालितेन स्पन्दनं नीतेनेत्यर्थः शुभशंसिस्फुरणवतेति भावः वामेन दक्षिणेतरेण पयोधरेण स्तनेन विषमः विलक्षणः उन्नतः दक्षिणः स्तनो यस्याः तथाविधा जनकसुता सीता मारुतिना दृष्टेति क्रिया अध्याहार्या ॥ २३७ ॥

सम्बन्धिपरिकरो यथा,—

उम्मूलिआ ण खुलिआ उक्खिपंता ण उज्जुअं ओसरिआ।
णिज्जंता ण णिरापा गिरीणं मग्गेण पत्थिआ णइसोत्ता॥

अत्र उद्ध्रियमाणगिरिसम्बन्धिनोऽप्रयोजका अपि नदीप्रवाहा विशेषणैः उपस्कृता इति सम्बन्धिपरिकरोऽयम्॥ २३८॥

साध्यपरिकरो यथा,—

धीरं हरइ विसाओ विणअं जोव्वणमदो अणङ्गो लज्जं।
एक्कंतगहिअवक्खो किं संसउ जं ठेवेइ वअपरिणामो॥

अत्र गतवयसो न धैर्यं न विनयो न लज्जेति साध्यं विषाद-यौवनमदानङ्गक्रिया-दृष्टान्तैः उपस्कृत इति साध्यपरिकरोऽयम्॥ २३९॥

दृष्टान्तपरिकरो यथा,—

मज्झट्ठिअधरणिहरं खिज्जइअ समुद्दमण्डलं उव्वेलं।
रइरहवेअविअलिअं पडिअं विअ उक्कडक्खकोडिं चक्कं॥

उन्मूलिता न खण्डिता उत्क्षिप्ता न च ऋजुकं प्रसृताः।
निर्यान्तो न निरापा गिरीणां मार्गेण प्रस्थिता नदीप्रवाहाः॥

उन्मूलिता इति। गिरीणां पर्वतानां मार्गेण पद्धत्या प्रस्थिताः प्रचलिताः नदीनां प्रवाहाः स्रोतांसि उन्मूलिताः निःशेषिताः न खण्डिताः न खण्डनं प्राप्ताः ऋजुकम् अकुटिलं सारल्यमित्यर्थः यथा तथा न प्रसृताः न चलिताः निर्यान्तः निःसरन्तः न निरापाः नाद्रिः शून्या इत्यर्थः॥ २३८॥

धैर्यं हरति विषादो विनयं यौवनमदोऽनङ्गो लज्जाम्।
एकान्तगृहीतपक्षः किं शंसतु यत् स्थापयति वयः परिणामः॥

विषादः मानसक्षोभः धैर्यं धीरतां यौवनमदः तारुण्यविकारः विनयं नम्रताम् अनङ्गः कामः लज्जां हरति नाशयति। एकान्तगृहीतपक्षः अतीव पक्षपातीत्यर्थः जन इति शेषः शंसतु कथयतु वयः परिणामः गलितं वय इत्यर्थः यत् स्थापयति न नाशयतीति भावः तत् किम्? न किमपीत्यर्थः गलितवयसि धैर्यादिकं न तिष्ठतीति भावः॥ २३९॥

यत्र प्रक्षिप्तमन्दरसमुद्रोदाहरणभूतं रविरथचक्रमुत्कटाक्षकोटीति विशेषणेन साम्यसिद्धये परिकरितम् इति दृष्टान्तपरिकरोऽयम् ॥ २४० ॥

वस्तुपरिकरो यथा,—

देवी पुत्रमसूत नृत्यत गणाः ! किं तिष्ठतेत्युद्भुजे
हर्षाद्भृङ्गरिटावुदाहृतगिरा चामुण्डयालिङ्गिते ।
पायाद्वो जितदेवदुन्दुभिघनध्वानः प्रहृष्टस्तयोः
अन्योऽन्याङ्गनिपातजर्जरतरस्थूलास्थिजन्मा रवः ॥

अत्र चामुण्डाभृङ्गरिटिपरिष्वङ्गसंघट्टितपरस्परहृदयास्थिजन्मनः शब्दस्य वस्तुतया परिगृहीतस्य देवी पुत्रमसूत इत्यादिभिः परिकरितत्वात् अयं वस्तुपरिकरः ॥ २४१ ॥

क्रिया यथा समासेन तथा कृत्तद्धितादिभिः ।
विशेष्यते तदाहुस्तं क्रियापरिकरं परम् ॥ २४२ ॥

मध्यस्थितधरणिधरं खिद्यते च समुद्रमण्डलमुद्वेलम् ।
रविरथवेगविगलितं पतितमिवोत्कटाक्षकोटिं चक्रम् ॥

मध्यस्थितेति । मध्ये स्थितः मन्थनार्थं प्रक्षिप्त इति भावः धरणिधरः पर्वतः मन्दर इति यावत् यस्य तथाभूतम् उद्वेलम् उत्क्रान्ततटं समुद्रमण्डलं रवेः सूर्यस्य रथवेगात् विगलितं प्रभ्रष्टम् उत्कटा उत्तुङ्गा अक्षकोटिः मध्यस्थितावयवविशेषो यस्य तादृशं चक्रमिव पतितं खिद्यते आलोड्यते इत्यर्थः ॥ २४० ॥

देवीति । देवी गौरी पुत्रं स्कन्दमिति भावः असूत प्रसूतवती हे गणाः ! प्रमथवर्गाः नृत्यत नृत्यं कुरुत किं कथं तिष्ठत स्थितिं कुरुत ? निरुत्साहे वेति भावः । इति इत्थं हर्षात् आनन्दात् उदाहृता उक्ता गीः वाक् यया तथाभूतया चामुण्डया दिव्या उद्भुजे नर्त्तनाय उद्धृतबाहौ भृङ्गरिटौ भृङ्गिणि आलिङ्गिते आश्लिष्टे सति जिता देवदुन्दुभीनां घना ध्वाना रवा येन तथाभूतः तयोः चामुण्डाभृङ्गरिटयोः अन्योन्यस्य अङ्गयोः निपातेन आश्लेषजनितेनेति भावः जर्जरतरेभ्यः अतिजर्जरेभ्यः स्थूलेभ्यः अस्थिभ्यः कङ्कालेभ्यः जन्म यस्य तथाभूतो रवः शब्दः वः युष्मान् पायात् रक्षतु ॥ २४१ ॥

क्रियेति । क्रिया समासेन यथा विशेष्यते विशिष्टा क्रियते कृत्तद्धितादिभिः

तत्र कृता तादर्थ्येन यथा,—

गेहाद् याता सरितमुदकं हारिका नाजिहीर्षे
मज्जामीति श्रयसि यमुनातीरवीरुद्गृहाणि।
गोसन्दायो विशसि विपिनान्येव गोवर्द्धनाद्रेः
न त्वं राधे! दृशि निपतिता देवकीनन्दनस्य?॥

अत्र तुमन्खुलौ क्रियायां क्रियार्थायाम् इत्यादिभिः उपपदभूतापि क्रियैव विशिष्यते। तेन अयम् अपरः क्रियापरिकरो भवति। एवं लक्षणादिषु शत्रादिभिः अपि द्रष्टव्यम्॥ २४३॥

तद् यथा अव्ययेन,—

सलीलमासक्तलतान्तभूषणं समासजन्त्या कुसुमावतंसकम्।
स्तनोपपीडं नुनुदे नितम्बिना घनेन कश्चिज्जघनेन कान्तया॥

अत्र स्तनाभ्याम् उपपीडयन्त्या यं नुनुदे इत्यर्थात् क्रियाविशेषणमेव एतदिति श्रयमपि क्रियापरिकरो भवति। एवं यथाविधि अनुप्रयोगादिषु द्रष्टव्यम्॥ २४४॥

तथा विशिष्यते त कृत्तद्धितादिभिः कृतविशेषमित्यर्थः परम् अन्य क्रियापरिकरम् आहुः कथयन्ति बुधा इति शेषः॥ २४२॥

गेहादिति। हे राधे! त्व देवकीनन्दनस्य कृष्णस्य दृशि दृष्टिपथे न निपतिता अपि तु निपतितैव इत्यर्थः। यतः उदकं हारिका जलाहरणार्थिनी सती अनुक्तसमासः। गेहात् भवनात् सरितं यमुनाम् इत्यर्थः याता गता सती न आजिहीर्षे नागच्छसि, मज्जामि अवगाहिष्ये इति उक्तेति शेषः यमुनायाः तीरेषु वीरुद्गृहाणि लताग्रहाणि श्रयसि प्रविशसि, तथा गोसन्दायौ गोभ्य. तृणादिदानार्थिनीति यावत् तच्छलेनेति भावः गोवर्द्धनाद्रेः गोवर्द्धनगिरेः विपिनानि वनानि विशसि॥ २४३॥

सलीलमिति। सलीलम् आसक्तं लग्नं लतान्तेषु लताग्रेषु भूषणम् अलङ्कारविशेषः यस्मिन् तद् यथा तथा कुसुमावतंसकं पुष्पकर्णभूषण समासजन्त्या परिदधानया इत्यर्थः घनेन सान्द्रेण नितम्बिना प्रशस्तनितम्बशालिना जघनेन कटिपुरोभागेन उपलक्षणे तृतीया। तादृशनितम्बिजघनवत्येति भावः कान्तया कश्चित् प्रिय इत्यर्थः स्तनोपपीडं यथातथा नुनुदे सन्ताडित इत्यर्थः॥ २४४॥

तेन क्रियायाः क्वचित् आन्तरविशेषणयोगाद् व्यङ्ग्यत्वं भवतीत्यपि व्याख्यातम्। यथा,—

शय्यन्ते हतशायिकाः पथि तरुच्छायानिषण्णाध्वगैः
श्रीकण्ठायतनेषु धार्मिकजनैरास्यन्त उष्ट्रासिकाः।
शून्ये तत्र निकुञ्जशाखिनि सखि! ग्रीष्मस्य मध्यन्दिने
सज्जानां दयिताभिसारणविधौ रम्यः क्षणो वर्त्तते॥

अत्र उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इति अमूभ्यां सामान्यविशेषोपचरितरूपो भावात्मा खलुलैव प्रत्याय्यते स आख्याताभ्यां सामान्यरूपेण खलुलन्ताभ्यां विशेषरूपेण बहुवचनं च इह कुत्सातिशयार्थम्। या हि नाम उष्ट्रस्य कुत्सावत्यो बहुप्रकारवत्यो वक्षःसु आसिका याश्च हतानाम् अतिशयवत्यः ता तथाभूता एव भूयस्यः शायिकाः प्रतीतास्ताभिर्विशेषरूपाभिः इयम् आसिका शायिका च उपमानोपमेयं सम्बन्धजनितभेदाभेदपरिग्रहात् लकारेण अपि बहुत्वेनैव प्रत्याय्यते। तेन उष्ट्रासिका इव असनानि हतशायिका इव शयनानि क्रियन्ते भवन्तीति वाक्यार्थो भवति। सोऽयं यथोक्तक्रियापरिकरः॥ २४५॥

शय्यन्ते इति। हे सखि! ग्रीष्मस्य निदाघस्य मध्यन्दिने मध्याह्ने पथि मार्गे तरुच्छायासु वृक्षच्छायासु निषण्णाः स्थिताः अध्वगाः पथिकाः तैः हतशायिकाः हतानां व्यापादितानां शायिकाः शयनानीत्यर्थः शय्यन्ते आश्रयन्ते यथा व्यापादिता जनाः विपर्यस्तभावेन भूमौ लुठन्ति तथा पथिकाः तरुतलेषु लुठन्तीति भावः, धार्मिकजनैः धर्मार्जनार्थमागतैरिति भावः श्रीकण्ठस्य शिवस्य आयतनेषु मन्दिरेषु उष्ट्रासिका उष्ट्रस्येव कुक्षीपवेशनानि आस्यन्ते क्रियन्ते इत्यर्थः दयितस्य प्रियस्य अभिसारणविधौ अभिगमनव्यापारे सज्जानां शून्ये जनरहिते तत्र निकुञ्जशाखिनि लतादिवेष्टिते वृक्षतले इत्यर्थः निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे इत्यमरः रम्यः मनोहरः क्षणः समयः वर्त्तते उपतिष्ठते॥ २४५॥

क्वचित् पुनर्बाह्यमपि कृत् रूपं कृदर्थरूपं वा क्रियाविशेषणं भवति यथा,—

शतं वारानुक्तः प्रियसखि ! वचोभिः स परुषैः
सहस्रं निर्धूतः पदनिपतितः पार्ष्णिहतिभिः।
कियत् कृत्वा बद्धाः पुनरिह न वेद्मि भ्रुकुटयः
तथापि क्लिश्यन् मां क्षणमपि न धृष्टो विरमति॥

अत्र वारानिति वारशब्दः कृदन्तः वारसङ्ख्यायाः कृत्वसुजिति कृत्वसुच् कृदर्थः तौ इमौ द्वावपि आवृत्तिरूपेण क्रियाविशेषणं भवतः। नन्वेवम् उष्ट्रासिकादीनां वारादीनाञ्च क्रियाविशेषणत्वात् कर्मतेव नपुंसकलिङ्गतापि प्राप्नोति। यथा मृदु पचति प्रशस्तं पठतीति उच्यते। त्रिधा खलु क्रियाविशेषणं भवति बाह्यमाभ्यन्तरं बाह्याभ्यन्तरञ्च। तत्र बाह्यं कर्मरूपं वारादि, आभ्यन्तरं विशेषरूपम् उष्ट्रासिकादि, बाह्याभ्यन्तरं गुणरूपं मृदादि। तेषु बाह्यं सोऽयम् इत्यभिधायाः सम्बन्धादभेदोपचारेण अविचलितस्वरूपमेव प्रधानं विशिंषत् कथमिव स्वलिङ्गं जह्यात्। आभ्यन्तरन्तु विशेषापरिग्रहादाविष्टलिङ्गसङ्ग्रं कथमिव अन्यलिङ्गं गृह्णीयात्। बाह्याभ्यन्तरन्तु गुणत्वात् स्वलिङ्गविरहे गुणवचनानाम् आश्रयतो लिङ्गवचनानीति विशेष्यलिङ्गग्राह्यमेव भवति॥ २४६॥

शतमिति। हे प्रियसखि ! स धृष्टः निर्लज्ज इत्यर्थः परुषैः कटुभिः वचोभिः वाक्यैः शतं वारान् उक्तः कथितः निर्भर्त्सित इति यावत् पदनिपतितः चरणतलपतितोऽपि पार्ष्णिहतिभिः पार्ष्णिप्रहारैः सहस्रं वारानिति शेषः निर्धूतः निराकृतः। पुनः किञ्च इह अस्मिन् धृष्टे भ्रुकुटयः कियत् कृत्वः कतिवारानित्यर्थः बद्धाः इति न वेद्मि न जानामि, तथापि मां क्लिश्यन् अनुसरन्निति भावः क्षणमपि न विरमति न निवर्त्तते॥ २४६॥

तद्धितकृत्वसुच उक्तः। थालादिना उच्यते। यथा,—

अकृतकवलारम्भैर्भूयोभयस्थगितेक्षणाः
किमपि वलितग्रीवं स्थित्वा मुहुर्मृगपङ्क्तयः।
गगनमसकृत् पश्यन्त्येतास्तथाश्रुघनैर्मुखैः
निपतति यथा शृङ्गाग्रेभ्यो भ्रमन्नयनोदकम्॥

अत्र आद्यः प्रकारवचने थाल्। अनेकवारानित्यर्थे असकृदिति तद्धितेन, पश्यन्तीति क्रियया, वलितग्रीवमिति समासेन, किमपीति नाम्नाऽव्ययेन, स्थित्वेति कृता, मुहुरिति कृदर्थे वीप्सया च क्रियाविशेषणेन सह विशेषयति। द्वितीयश्च यथा, भ्रमन्नयनोदकं निपततीति शतृलक्षितया पतनक्रियया तमेव अर्थमनुसन्दधानः पूर्वक्रियाया एव विशेषणं भवति। सोऽयं कृत्तद्धितसमासाव्ययानां सन्निपातेऽपि क्रियापरिकरे यथा तथा इत्येतयोः प्राधान्यात् तद्धितेनैव उपदिश्यते। एतेन तद्-यदोर्विपर्ययस्तद्विशेषणयोगश्च व्याख्यातः॥ २४७॥

तद् यथा,—

जह जह णिसासमप्पइ तह तह वेपइदतरङ्गपड़िमापड़िअं।
किंकाअव्वविमूढं वेवइ हिअअं उअहिणो ससिबिम्बं व॥

अकृतेति। एता मृगपङ्क्तयः मृगकदम्बकानि भूयोभयेन अतिभयेन स्थगिते निश्चले इत्यर्थः ईक्षणे नेत्रे यासां तथाभूताः सत्यः किमपि कथमपि वलिता व्यापारिता ग्रीवा यस्मिन् तद् यथा तथा मुहुः पुनः पुनः स्थित्वा स्थितिं विधाय अकृतः कवलानामारम्भः यैः तथाभूतैः ग्रासव्यापारविरतैरिति यावत् अश्रुघनैः वाष्पपूर्णैरिति यावत् मुखैः वदनैः असकृत् पुनः पुनः तथा गगनम् अन्तरीक्षं पश्यन्ति निरीक्षन्ते यथा शृङ्गाग्रेभ्यः भ्रमत् निर्गलत् नयनोदकं नेत्रजलं निपतति। अत्र तथा यथेति च प्रकारवचने थाल्प्रत्ययः॥ २४७॥

यथा यथा निश्वासमर्पयति तथा तथा वेपिततरङ्गप्रतिमापतितम्।
किं कर्त्तव्यविमूढं वेपते हृदयमुदधेः शशिबिम्बमिव॥

अत्र यथा तथेति क्रियाविशेषणयोरपरमपि विशेषणं वीप्सा भवति। सोऽयम् एवं प्रकारः क्रियापरिकरो द्रष्टव्यः ॥२४८॥

क्रियाविशेषणं कैश्चित् सम्बोधनमपीष्यते।
सम्बन्धिभिः पदैरेव लक्ष्यन्ते लक्षणादयः ॥२४९॥

तेषु सम्बोधनपरिकरो यथा,—

धर्मस्योत्सववैजयन्ति! मुकुटस्रग्वेणि! गौरीपतेः
त्वां रत्नाकरपत्नि! जह्नुतनये! भागीरथि! प्रार्थये।
त्वत्तोयान्तशिलानिषण्णवपुषस्त्वद्वीचिभिः प्रेङ्खतः
त्वन्नाम स्मरतस्त्वदर्पितदृशः प्राणाः प्रयास्यन्ति मे ॥

अत्र भागीरथीति सम्बोधनपदं धर्मस्योत्सववैजयन्तीत्यादिभिः परिष्क्रियते। तत्र यथाकथञ्चिदपि उच्यमानोऽर्थः क्रियाविशेषणं नातिक्रामतीत्ययमपि क्रियापरिकरः ॥ २५० ॥

यथा यथा निश्वासम् अर्पयति निश्वसितीत्यर्थः तथा तथा उदधेः समुद्रस्य वेपितेषु तरङ्गेषु ऊर्म्मिषु प्रतिमया प्रतिबिम्बेन पतित शशिबिम्बमिव हृदयं किङ्कर्त्तव्यविमूढम् इतिकर्त्तव्यतापराङ्मुखं सत् वेपते कम्पते ॥ २४८ ॥

क्रियेति। कैश्चित् विद्वद्भिरिति शेषः सम्बोधनमपि क्रियाविशेषणम् इष्यते। तस्य लक्षणादयः सम्बन्धिभिः सम्बन्धयुक्तैः पदैः लक्ष्यन्ते अनुभूयन्ते ॥ २४९ ॥

धर्मस्येति। धर्मस्य उत्सवे उदधीषणव्यापारविशेषे वैजयन्ती पताका तत्सम्बुद्धिः। गौरीपतेः हरस्य मुकुटस्रक् किरीटपुष्पमाला तद्रूपेत्यर्थः वेणी प्रवाहः यस्याः तत्सम्बुद्धिः हरशिरश्चारिणीत्यर्थः रत्नाकरस्य समुद्रस्य पत्नी तत्सम्बुद्धिः। हे जह्नुतनये जह्नुनन्दिनि! पुरा जह्नुर्नाम कश्चित् राजर्षिस्तपस्यन् भगीरथेनानीयमानां गङ्गां स्व पूजोपकरणं स्रोतसा प्लावयन्तीमालोक्य गण्डूषेण पपौ। ततो भगीरथाराधनप्रीतः पुनस्तां पीतां गङ्गां जानुविदारणेन उदरात् निःसारयामासेति पुराणवार्त्ता अतएवास्या जाह्नवीत्वमिति भावः हे भागीरथि! गङ्गे! त्वां प्रार्थये याचे। किमित्याह तव तोयस्य अन्ते प्रान्तदेशे या शिला तस्यां निषण्णं वपुः शरीरं यस्य तथाभूतस्य तव वीचिभिः तरङ्गैः प्रेङ्खतः स्यन्दमानस्य तव नाम

लक्षणपरिकरो यथा,

महाप्रथिम्ना जघनस्थलेन सा महेभकुम्भोच्चकुचेन वक्षसा।
मुखेन दीर्घोज्ज्वललोलचक्षुषा वयस्य! कान्ता कथय क्व वर्त्तते?॥

अत्र जघनस्थलादीनि लक्षणानि महाप्रथिम्नेत्यादिभिः परिष्क्रियन्ते सोऽयं लक्षणपरिकरः॥ २५१॥

हेतुपरिकरो यथा,—

त्वया जगन्ति पुण्यानि त्वयाऽपुण्या जनोक्तयः।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपद्यसे॥

अत्र प्रथमतृतीयपादयोः त्वया त्वयेति हेतू द्वितीयचतुर्थपादाभ्यां परिष्क्रियेते सोऽयं हेतुपरिकरः॥ २५२॥

सहार्थपरिकरो यथा,—

अनेन यूना सह पार्थिवेन रम्भोरु! कच्चिन्मनसोपकण्ठे।
शिप्रातरङ्गानिलकम्पितासु विहर्त्तुमुद्यानपरम्

स्मरतः चिन्तयतः त्वयि अर्पिते दृष्टौ येन तथाभूतस्य मे मम प्राणाः प्रयास्यन्ति निर्गमिष्यन्ति॥ २५०॥

महेति। हे वयस्य! मित्र! सा कान्ता महान् प्रथिमा पृथुत्वं विस्तारो यस्य तादृशेन अतिविस्तारिणेत्यर्थः जघनस्थलेन कटिपुरोभागेन नितम्बभागेन वा महेभस्य महागजस्य कुम्भौ इव उच्चौ उन्नतौ कुचौ यत्र तथाभूतेन वक्षसा वक्षस्थलेन तथा दीर्घे आयते उज्ज्वले लोले चञ्चले चक्षुषी यत्र तथाविधेन मुखेन उपलक्षणे तृतीया क्व कुत्र वर्त्तते तिष्ठति॥ २५१॥

त्वयेति। त्वया जगन्ति पुण्यानि पवित्राणि, त्वयि जनानाम् उक्तयः प्रवादाः अपुण्याः अपवित्राः कुत्सापूर्णा इत्यर्थः। त्वया लोकाः प्रजाः नाथवन्तः आश्रयवन्तः-स्वामिपुत्रप्रभावादिति भावः त्वम् अनाथा अनाश्रया सती वननिर्वासनादिति भावः विपद्यसे म्रियसे। सीतामुद्दिश्य रामस्योक्तिरियम्॥ २५२॥

अनेनेति। हे रम्भोरु! अनेन पुरतः परिदृश्यमानेनेति भावः यूना तरुणेन पार्थिवेन राज्ञा सह शिप्रा नाम नदी तस्याः तरङ्गानिलैः ऊर्मिवातैः कम्पिता

अत्र अनेनेति सहार्थो यूना पार्थिवेनेति च पदाभ्यां परिष्क्रियते सोऽयं सहार्थपरिकरः॥ २५३॥

तादर्थ्यपरिकरो यथा,—

इन्दीवरश्यामतनुर्नृपोऽयं त्वं रोचनागौरशरीरयष्टिः।
अन्योऽन्यशोभापरिवृद्धये वां योगस्तडित्तोदयोरिवाम्बु॥

अत्र अन्योऽन्यशोभापरिवृद्धये इति तादर्थ्यार्थः शेषपदार्थैः परिष्क्रियते सोऽयं तादर्थ्यपरिकरः॥ २५४॥

उपपदपरिकरो यथा,—

प्रत्यक्षवस्तुविषयाय जगद्धिताय विश्वस्थितिप्रलयसम्भवकारणाय।
सर्वात्मने विजितकोपमनोभवाय तुभ्यं नमस्त्रिभुवनप्रभवेशिवाय॥

अत्र नमस्तुभ्यम् इत्युपपदार्थः समस्तपदैः परिष्क्रियते इति उपपदपरिकरः॥ २५५॥

अत्र रूपकादीनां शब्दार्थोभयभङ्गिभिः।
[illegible]त्पादनं यत् तमन्ये परिकरं विदुः॥ २५६॥

सञ्चालितासु न तु क्षिप्तोन्मूलितास्विति भावः एतेन शैत्यमान्द्ये उक्ते। उद्यानपरम्परासु उपवनश्रेणीषु विहर्तुं रन्तुं ते तव मनसः चित्तस्य रुचिः अनुरागः कश्चित्?॥ २५३॥

इन्दीवरेति। अयं नृपः राजा इन्दीवर नीलोत्पलं तद्वत् श्यामा तनुर्यस्य तथाभूतः। त्वं रोचनावत् गौरी शुभ्रा शरीरयष्टिः यस्याः तथाभूता। अतः वां युवयोः तडित्तोयदयोः विद्युन्मेघयोरिव योगः सम्मेलनम् अन्योऽन्यशोभापरिवृद्धये परस्परशोभावर्द्धनाय अम्बु भवतु॥ २५४॥

प्रत्यक्षेति। प्रत्यक्षाणि परिदृश्यमानानि वस्तूनि पृथिव्यादयः विषयाः मूर्त्तयः यस्य तथाभूताय पृथिवीजलवायुग्नियजमानसूर्य्ययजमानमूर्त्तये इत्यर्थः जगतां हिताय हितकारिणे विश्वेषां स्थितिः पालनं प्रलयः संहारः सम्भवः सृष्टिः तेषां कारणं हेतुः तस्मै वैगुण्यमयाय इत्यर्थः सर्वात्मने विश्वस्वरूपाय विजितः कोपेन मनोभवः येन तथाभूताय त्रिभुवनप्रभवे त्रिलोकस्वामिने शिवाय तुभ्यं नमः॥ २५५॥

रूपमेति। उपमारूपकादीनां शब्दार्थोभयभङ्गिभिः शब्दभङ्गिभिः अर्थभङ्गिभिः

तत्र स शब्दकृत उपमायां यथा,—

कहं कहं वि रएइ पअं मग्गं पुलएइ छेज्जमाविसइ।
चोरव्व कई अत्थं लद्धुं दुक्खेण ठाणेण णिव्वहइ॥

अत्र पदमार्गच्छेद्यैः शब्दैर्भिन्नार्थैः अभिन्नार्थविरचनादिक्रियानिवेशिभिः कविचोरयोः अप्रसिद्धम् औपम्यं साधितमिति शाब्दोऽयम् औपम्यपरिकरः॥ २५७॥

अर्थकृतो रूपके यथा,—

विदए गअणसमुद्दे दिअसे सूरेण मन्दरेण व्व महिए।
णीअइ मइरव्व संझा तिस्सा मग्गेण अमुअकलसो व्व ससी॥

अत्र गगने समुद्रत्वेन निरूपिते सूर्यसन्ध्याशशिभिर्मन्दरमदिराऽमृतकलशैश्च मथनादिक्रियानिवेशिभिः अर्थैः परस्परोपमानात् साधर्म्यम् उत्पादितमित्यर्थोऽयं करः॥ २५८॥

शब्दार्थभङ्गिभिः इत्यर्थः यत् साधर्म्योत्पादनं साहृज्जननम् अन्ये कवय इ.त. २ तं परिकरं विदुः जानन्ति॥ २५६॥

कथं कथमपि रचयति पदं मार्गं प्रलोकयति छेद्यमाविशति।
चौर इव कविरर्थं लब्धुं दुःखेन स्थानेन निर्वहति॥

कथमिति। कविः कवयिता चौर इव अर्थं प्रतिपाद्यवस्तु धनञ्च लब्धुं प्राप्तुं कथं कथमपि अर्थसङ्गतिपरत्वेन भयेन चेति भावः पदं सुप्तिङन्तं पादविच्छेदञ्च रचयति प्रयुङ्क्ते करोति च। मार्गं रीतिविशेषमित्यर्थः पन्थानञ्च प्रलोकयति अनुसरति पश्यति च। छेद्यं छिद्यते विशिष्यते अनेनेति छेद्यं छन्दोविशेषमिति यावत् सन्धिच्छेदनयोग्यं स्थानञ्च आविशति आश्रयति दुःखेन अर्थचिन्ताजनितेन राजदण्डजनितेन चेति भावः स्थानेन अवस्थानेन निर्वहति कालं नयति इत्यर्थः॥ २५७॥

वितते गगनसमुद्रे दिवसे सूर्येण मन्दरेणेव मथिते।
नीयते मदिरेव सन्ध्या तस्या मार्गेण अमृतकलस इव शशी॥

वितते इति। वितते विस्तृते गगनं समुद्र इव तस्मिन् दिवसे सूर्येण

उभयकृतः विरोधश्लेषो यथा,—

रइमुणालाहरणो णलिणिदलत्थइअपीवरत्थणअलसो ।
वहइ पिअसङ्गमम्मि मअणाअप्पपसाहणं जुवइजणो ॥

अत्र प्रियसङ्गमेऽपि मदनाकल्पप्रसाधनं भवतीति विरुद्धार्थयोः साधर्म्योत्पादनाय जले क्रीडतो युवतिजनस्य यथोक्तविशेषणाभ्यां शब्दतोऽर्थतश्च उपस्कारः कृत इति उभयकृतोऽयं विरोधश्लेषपरिकरः । एवमलङ्कारान्तरेष्वपि द्रष्टव्यम् ॥२५९॥

एकावलीति या सापि भिन्ना परिकरान्न हि ।
त्रिधा सापि समुद्दिष्टा शब्दार्थोभयभेदतः ॥ २६० ॥

तत्र शब्दैकावली यथा,—

पर्वतभेदि पवित्रं जैत्रं नरकस्य बहुमतं गहनम् ।
हरिमिव हरिमिव हरिमिव वहति पयः पश्यत पयोष्णी ॥

अत्र हरिमिव हरिमिव हरिमिवेति शब्दैकावल्या

विष्णोर्व मन्थनदण्डभूतेन तदाख्यपर्वतभेदेनैव मथिते विलोडिते सति मदिरेव वारुणीव सन्ध्या तथा तस्याः सन्ध्यायाः मार्गेण अमृतकलस इव सुधाकुम्भ इव शशी चन्द्रः नीयते जनैः अधिगम्यते इत्यर्थः ॥ २५८ ॥

रतिमृणालाभरणो नलिनीदलस्थगितपीवरस्तनकलसः ।
वहति प्रियसङ्गमेऽपि मदनाकल्पप्रसाधनयुवतिजनः ॥

युवतिजनः रत्यर्थं मृणालम् आभरणं यस्य तथाभूतः तथा नलिनीदलैः पद्मपत्राग्रैः स्थगितौ आच्छादितौ स्तनौ कलसाविव येन तथाविधः जलक्रीडायामिति भावः अतएव प्रियसङ्गमेऽपि कान्तसहवासेऽपि मदनस्य कामस्य आकल्पः भूषणं मृणालादिरिति भावः विरहसन्तापशान्त्यर्थमिति भावः तेन प्रसाधनं देहस्य अलङ्करणं वहति धत्ते ॥ २५९ ॥

एकावलीं लक्षयति एकावलीति । या एकावली नाम अलङ्कारः सापि परिकरात् भिन्ना पृथक् नहि नैव इत्यर्थः । सापि एकावली शब्दार्थोभयभेदतः शब्दभेदात् अर्थभेदात् शब्दार्थभेदाच्च त्रिधा त्रिप्रकारा शब्दैकावली अर्थैकावली शब्दार्थैकावलीत्यर्थः समुद्दिष्टा कथिता ॥ २६० ॥

विभिन्नार्थया पयः कर्मकारकम् उपस्क्रियते सा इयं शब्दैकावली परिकरस्येव भेदः ॥ २६१ ॥

अर्थैकावली यथा,—

किमिति कवरी यादृक् तादृग् दृशौ किमकज्जले
न खलु लिखिताः पत्रावल्यः किमद्य कपोलयोः।
अयमयमयं किञ्च क्लाम्यत्यसंस्मरणेन ते।
प्रियसखि! सखीहस्तन्यस्तो विलासपरिच्छदः ॥

अत्र अयमयमयमिति सर्वनामपरामृश्यमाणया प्रागुपन्यस्तकारणभूतया ततोऽन्यया वा तथाविधया अर्थैकावल्या परिच्छद इति कर्तृकारकम् अभिन्नार्थ इव परिष्क्रियते। सेयम् अर्थैकावली परिकरस्येव भेदः ॥ २६२ ॥

उभयैकावली यथा,—

अम्बा तुष्यति न मया न स्नुषया सापि नाम्बया न मया।

पर्वतेति। पयोष्णी गङ्गा पयः सलिलं पर्वतभेदि पर्वतं भित्त्वा निर्गच्छत् पवित्रं विशुद्धं पापध्वंसकरञ्च अन्यत्र पर्वतभेदी गिरिविदारी यः पविः वज्रं तेन त्रायते रचतीति पर्वतीपद्रवात् जगदिति भावः तम्। पुरा पक्षवलः पर्वता आसन् ते च समये समये उत्पत्य सर्वत्र दिक्षु पतन्ति स्म तं दिग्भ्यस्तादयामासुः। तदवलोक्य त्रिलोकीपतिः इन्द्रः वज्रेण तेषां पक्षान् चिच्छेद ततः प्रभृति ते स्थावरा जाता इति पुराणवार्त्ता। नरकस्य निरयस्य कुम्भीपाकादेः पापजनितस्येति भावः अन्यत्र तदाख्यासुरस्य जैत्रं ध्वंसकरम्। बङ्गमत बङ्गजनादृतं गहनं निविडं सान्द्रमित्यर्थः अन्यत्र बहवो मतङ्गा हस्तिनः तान् हन्तीति तथोक्तम् अतएव हरिमिव इन्द्रमिव हरिमिव विष्णुमिव हरिमिव सिंहमिव बहति दधाति पश्यत अवलोकयत ॥ २६१ ॥

किमिति। हे प्रियसखि! कवरी केशपाशः यादृक् पूर्वं यथा विरचितेत्यर्थः तादृक् तदवस्थेत्यर्थः किमिति अलङ्कृता कथमित्यर्थः। दृशौ नयने अकज्जले कज्जलरहिते किम् किमर्थमित्यर्थः अद्य कपोलयोः गण्डयोः पत्रावल्यः पत्रलताः न खलु नैव लिखिताः रचिताः किम् कथम्? सखीनां हस्तैः न्यस्तः [illegible]

अहमपि न तया न तया वद राजन् ! कस्य दोषोऽयम् ॥

अत्र अम्बाऽऽसुषा स्वदर्थलक्षणैः अर्थैः तद्वाचिभिः सर्वनामभिः शब्दैः एकावलीक्रमेण मिथोऽनुस्यूतैः मिथोऽनुस्यूत एव तुष्यतीति क्रियाहेतुर्मया इत्यादिभिः परिष्क्रियते । सेयम उभयग्रन्थित्वादुभयैकावलीपरिकरस्यैव भेदः ॥ २६३ ॥

इति परिकरालङ्कार निरूपणम् ।

क्रियाजातिगुणद्रव्यवाचिनैकत्रवर्त्तिना ।
सर्ववाक्योपकारयेद्दीपकं तन्निगद्यते ॥
अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरावली ।
सम्पुटं रसना माला चक्रवालञ्च तद्भिदाः ॥ २६४ ॥

तेषु क्रियावाचिना आदिदीपकं यथा,—

चरन्ति चतुरम्भोधिवेलोद्यानेषु दन्तिनः ।
चक्रवालाद्रिकुञ्जेषु कुन्दभासो गुणाश्च ते ॥
अत्र चरन्तीति क्रियया द्वयोः अपि वाक्ययोरादिपदस्थया

चितः अर्पितो वा अयम् अयम् अय परिदृश्यमान इत्यर्थः ते तव विलासपरिच्छदः विभमालङ्करणम् असंस्करणेन संस्काररहितेन क्लाम्यति मलिनीभवति किञ्च किमर्थञ्च ? ॥ २६२ ॥

अम्बेति । अम्बा माता मया करणेन न, सुषया पुत्रवध्वा भाव्यमेवेत्यर्थः न तुष्यति । सापि भाव्यमेवेत्यर्थः अम्बया माता न मया न तुष्यतीति सम्बन्धः । अहमपि तया माता न तया सुषया भाव्यमेवेत्यर्थः तुष्यामीति विभक्तिव्यत्ययेन अन्वयः । हे राजन् । अयम् अस्माकं परस्परासन्तोष इत्यर्थः कस्य दोषः ? वद । दूरदृष्टपरिपाकोऽयमिति भावः ॥ २६३ ॥

दीपकं लक्षयति क्रियेति । एकत्र वर्त्तिना एकस्थानस्थितेन क्रियागुणजातिद्रव्यवाचिना क्रियावाचिना गुणवाचिना जातिवाचिना द्रव्यवाचिना चेत्यर्थः चेत यदि सर्वेषां वाक्यानाम् उपकारम् उपयोगः भवतीति शेषः तत् दीपकं निगद्यते कथ्यते । अर्थावृत्त्यादयः अष्टौ तस्य दीपकस्य भिदाः भेदाः ॥ २६४ ॥

चरन्तीति । ते तव दन्तिनः गजाः चत्वारः अम्भोधयः तेषां वेलाः तटानि उद्यानानि उपवनानि तेषु कुन्दभासः कुन्दकुसुमकान्तयः गुणाः औदार्यदयादयश्च

एव उपकारः क्रियते इति आदिदीपकम् इदं क्रियाविषयम् उच्यते। एवं मध्यान्तयोरपि द्रष्टव्यम् ॥ २६५ ॥

जातिवाचिना आदिदीपकं यथा,—

पवनो दक्षिणः पर्णं जीर्णं हरति वीरुधाम्।
स एव च नताङ्गीनां मानभङ्गाय कल्पते ॥

अत्र पवन इत्यादिपादे जातिपदं तेन आदिदीपकम् इदं जातिविषयम् उच्यते। एवं मध्यान्तयोरपि द्रष्टव्यम् ॥२६६॥

गुणवाचिना आदिदीपकं यथा,—

श्यामलाः प्रावृषेण्याभिर्दिशो जीमूतपङ्क्तिभिः।
भुवश्च सुकुमाराभिर्नवशाद्वलराजिभिः ॥

अत्र श्यामला इत्यादिपादे गुणपदं तेन आदिदीपकम् इदं गुणविषयम् उच्यते। एवं मध्यान्तयोरपि द्रष्टव्यम् ॥२६७॥

द्रव्यवाचिना आदिदीपकं यथा,—

विष्णुना विक्रमस्थेन दानवानां विभूतयः।
क्वापि नीताः कुतोऽप्यासन्नानीता देवतर्द्धयः।

चक्रवालाद्रिकुञ्जेषु लोकालोकपर्वतकुञ्जदेशेषु चरन्ति राजन्ते इत्यर्थः। आसमुद्रक्षितिविजयित्वादिति भावः लोकालोकश्चक्रवाल इत्यमरः। राजविषया रतिर्भावोऽयम्। अचादिपदीभूतया चरन्तीति क्रियया वाक्ययोरन्वय इति क्रियाविषयं दीपकम् ॥ २६५ ॥

पवन इति। दक्षिणः दक्षिणदेशादागतः पवनः मलयवायुरित्यर्थः वीरुधां लतानां जीर्णं शुष्कं पर्णं हरति पातयतीत्यर्थः। स एव पवन एव नताङ्गीनां यौवनभरेणेति भावः नारीणां मानभङ्गाय प्रणयकोपशान्तये इत्यर्थः कल्पते प्रभवति ॥ २६६ ॥

श्यामला इति। दिशः प्रावृषेण्याभिः वार्षिकीभिः जीमूतपङ्क्तिभिः मेघवृन्दैः, भुवश्च भूतलानि च सुकुमाराभिः मृदुलाभिः नवशाद्वलराजिभिः नवतृणश्रेणिभिः श्यामलाः श्यामवर्णाः भवन्तीति शेषः ॥ २६७ ॥

विष्णुनेति। विक्रमे पराक्रमे त्रिपादक्रमणे च तिष्ठतीति तथोक्तेन विष्णुना

अत्र विष्णुना इत्यादिपादे द्रव्यपदं तेन आदिदीपकम् इदं द्रव्यविषयम् उच्यते। एवं मध्यान्तयोरपि द्रष्टव्यम् ॥ २६८ ॥
अर्थावृत्तिर्यथा,—

हृष्यति चूतेषु चिरं तुष्यति वकुलेषु मोदते मरुति।
इह हि मधौ कलकूजिषु पिकेषु च प्रीयते कामी ॥

अत्र हृष्यति तुष्यति मोदते प्रीयते इत्येतैः पदैः स एवार्थ आवर्त्तमानः सर्ववाक्यानि दीपयति सेयम् अर्थावृत्तिर्दीपकस्य भेदः ॥ २६९ ॥
पदावृत्तिर्यथा,—

उत्कण्ठयति मेघानां माला वृन्दं कलापिनाम्।
यूनामुत्कण्ठयत्यद्य मानसं मकरध्वजः ॥

अत्र उद्ग्रीवं करोति उत्कण्ठावन्तं करोतीति अर्थयोः उत्कण्ठयतीति पदम् आवर्त्तमानं वाक्यद्वयमपि दीपयति सेयं पदावृत्तिर्दीपकस्य भेदः ॥ २७० ॥
उभयावृत्तिर्यथा। जय देव! भुवनभावन! जय भगवन्!
निखिलवरद! निगमनिधे!।

वामनरूपिणेति यावत् दानवानां बलिप्रभृतीनां विभूतयः सम्पदः त्रिलोकाधिपत्यानीत्यर्थः क्वापि नीताः चयं गमिता इत्यर्थः देवतानां इन्द्रादीनां ऋद्धयः सम्पदः कुतोऽपि आनीता आसन् अभवन् ॥ २६८ ॥

हृष्यतीति। कामी जनः इह अस्मिन् मधौ वसन्ते चूतेषु आम्रेषु विकसितेष्विति भावः हृष्यति हर्षं प्राप्नोति वकुलेषु विकसितेष्विति भावः चिरं सतत तुष्यति मरुति वायौ वहतीति भावः मोदते उल्लसति पिकेषु कोकिलेषु कलकूजिषु मधुर रुवत्सु प्रीयते प्रीतिमनुभवति च ॥ २६९ ॥

उत्कण्ठयतीति। मेघानां माला श्रेणिः कलापिनां मयूराणां वृन्द समूहम् उत्कण्ठयति उद्ग्रीव करोति। मकरध्वजः कामः अद्य मेघोदये इति भावः यूनां तरुणानां प्रोषितानामिति शेषः मानसम् उत्कण्ठयति प्रियार्थमिति भावः ॥ २७० ॥

जय रुचिरचन्द्रशेखर !

जय मदनान्तक ! जयादिगुरो ! ॥

अत्र जयेत्यर्थः शब्दश्च आवर्त्तमानः सर्ववाक्यानि दीपयति सेयम् उभयावृत्तिर्दीपकस्य भेदः ॥ २७१ ॥

आवली यथा,—

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवहः

त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ।

परिच्छिन्नामेवं त्वयि परिणता बिभ्रति गिरम् ।

न विद्मस्तत्तत्त्वं वयमिह तु यत्त्वं न भवसि ॥

अत्र पूर्वार्द्धे त्वमिति शब्दार्थयोः प्रथमावृत्तिः प्रथमपादस्थया असीति क्रियया दीप्यते । ततः तृतीयपादे त्वयीति रूपान्तरेण युष्मदर्थ आवर्त्तमानः क्रियान्तरेण सम्बध्यते । चतुर्थपादे तु पुनरपि तेनैव रूपेण अस्त्यर्थेन भवतिना सम्बध्यत इति । सेयं वृत्तीनाम् आवृत्तिरावलीति दीपकस्यैव भेदो भवति ॥ २७२ ॥

जयेति । हे भुवनभावन ! जगत्कारण ! देव ! जय सर्वोत्कर्षेण वर्त्तस्व, हे भगवन् ! निखिलवरद ! सर्वाभीष्टप्रद ! निगमनिधे ! श्रुतिप्रतिपाद्यरत्न ! जय । हे रुचिरचन्द्रशेखर ! उज्ज्वलचन्द्रचूड़ ! जय हे मदनान्तक ! कामशत्रो ! जय हे आदिगुरो ! जय ॥ २७१ ॥

त्वमिति । त्वम् अर्कः सूर्यः त्वं सोमः चन्द्रः, त्व पवनः वायुः, त्व हुतवहः अग्निः, त्वम् आपः जलं त्व व्योम आकाशम् उ भोः त्वं धरणिः पृथ्वी त्वम् आत्मा यजमानश्च असि सूर्याद्यष्टमूर्त्तिस्त्व भवसीत्यर्थः परिणताः स्थविराः पुरातनाः परिमितामिति यावत् विद्वांस इत्यर्थः त्वयि एवम् इत्थ परिच्छिन्नां परिच्छेदविषयिणीं गिरं वाचं बिभ्रति दधति प्रयुञ्जते इत्यर्थः वयम् इह संसारे त्वं यत् न भवसि तत् तत्त्वं न विद्मः न जानीमः सर्वजगन्मयस्त्वं न केवलम् अर्काद्यष्टमय इति भावः ॥ २७२ ॥

सम्पुटं यथा,—

णवपल्लवेसु लोलइ घोलइ विड़वेसु चलइ सिहरेसु।
थवइ थवएसु चलणे वसन्तलच्छी असोअस्स॥

अत्र नवपल्लवे इत्यादीनि अशोकस्येति लोलतीत्यादीनि वसन्तलक्ष्मीरिति पदे द्रव्यवाचिनी सम्पुटक्रमेण मिथः सम्बध्यमाने मिथः सम्बध्यान्येव दीपयतः। तदेतत् सम्पुटं नाम दीपकस्य भेदः॥ २७३॥

रसना यथा,—

सलिलं विकाशिकमलं कमलानि सुगन्धिसमृद्धानि।
मधुलीनालिकुलाकुलमलिकुलमपि मधुररणितमिह॥

अत्र रसनाक्रमेण मिथः संग्रथितानि सलिलं विकाशिकमलमित्यादीनि वाक्यानि इहेति अन्तस्थितेन अधिकरणवाचिना द्रव्यदीपकेन दीप्यन्ते तदेतद् रसनादीपकं नाम आदिदीपकभेदः॥ २७४॥

माला यथा,—

इमिणा सरएण ससी ससिणा वि णिसा णिसाइ कुमुअवणम्।
कुमुअवणेण अ पुलिणं पुलिणेण अ सोहइ हंसउलम्॥

नवपल्लवेषु लोलति घूर्णते विटपेषु चलति शिखरेषु।
तिष्ठति स्तवकेषु चलने वसन्तलक्ष्मीरशोकस्य॥

अशोकस्य तरोः वसन्तलक्ष्मीः वासन्ती शोभा चलने सञ्चरणे नवेषु पल्लवेषु लोलति विकसति विटपेषु शाखासु घूर्णते, शिखरेषु अग्रभागेषु चलति स्फुरति स्तवकेषु कुसुमगुच्छेषु तिष्ठति॥ २७३॥

सलिलमिति। इहास्मिन् सरसि इति भावः सलिलं जलं विकाशीनि कमलानि यस्मिन् तथोक्तं कमलानि पद्मानि सुगन्धीनि मधुभिर्मकरन्दैः समृद्धानि सम्पूर्णानि। मधु लीनैः सङ्गतैः अलिकुलैः भ्रमरवृन्दैः आकुलं व्याप्तम्। अलिकुलमपि मधुरं मनोहरं रणितं गुञ्जन यस्य तथाभूतम्॥ २७४॥

अत्र मालाक्रमेण परस्परग्रथिताः कर्त्तारो हेतवश्च शशिप्रभृतयः शोभन्ते इति क्रियया दीप्यन्ते तदेतत् मालादीपकं नाम दीपकस्य भेदः ॥

कः पुनरस्य पूर्वस्माद् विशेषः पूर्वत्र वृत्तिच्छिन्नं रसनायां सर्वत्र इह तु स्वतन्त्रं मालापुष्पवत् पदं पदेन युज्यमानं क्रियादिभिः सम्बध्यत इति ततोऽयं भिद्यते ॥ २७५ ॥

चक्रवालं यथा,—

संग्रामाङ्गणमागतेन भवता चापे समारोपिते
देवाकर्णय येन येन सहसा यद् यत् समासादितम् ।
कोदण्डेन शराः शरैररिशिरस्तेनापि भूमण्डलम्
तेन त्वं भवता च कीर्त्तिरतुला कीर्त्या च लोकत्रयम् ॥

अत्र संग्रामाङ्गणमागतेन भवता चापे समारोपित इति भावलक्षणाक्षिप्तस्य भावविशेषस्य द्वितीयपादे कारकवीप्सया यत् संक्षेपेण अभिधानं तदेतत् चक्रवालाद्रिणा इव मालादीपकेन विस्तरवता वेष्टितम् इदं चक्रवालं नाम दीपकस्य भेदः ॥ २७६ ॥

इति दीपकालङ्कारनिरूपणम् ।

अनया शरदा शशी शशिनापि निशा निशया कुमुदवनम् ।
कुमुदवनेन च पुलिनं पुलिनेन च शोभते हंसकुलम् ॥

अनया उपस्थितयेत्यर्थः शरदा शशी चन्द्रः, शशिनापि निशा रात्रिः निशया कुमुदवनम् उत्पलवनं कुमुदवनेन च पुलिनं सैकतदेशः पुलिनेन च हंसकुलं शोभते । रसनायां सविशेषणं मालायान्तु निर्विशेषणमित्युभयोर्भेदः ॥ २७५ ॥

संग्रामेति । हे देव ! भवता संग्रामाङ्गणं रणभूमिम् आगतेन प्राप्तेन चापे धनुषि समारोपिते ज्यामधिरोपिते सति येन येन सहसा यत् यत् समासादितं प्राप्तं तत् आकर्णय शृणु कोदण्डेन धनुषा शराः बाणाः समासादिता इति लिङ्गवचनव्यत्ययेनान्वयः । शरैः अरीणां शत्रूणां शिरः समासादितम् । तेन अरिशिरसापि भूमण्डलं समासादितम् । तेन भूमण्डलेन त्वं समासादित इति

शब्दस्य यदि वार्थस्य द्वयोरप्यनयोरथ।
भणनं परिपाट्या यत् क्रमः स परिकीर्त्तितः॥ २७७॥
तत्र शब्दपरिपाटिर्द्विधा पदतो वाक्यतश्च।

तयोः आद्या यथा,—

तस्याः प्रवृद्धलीलाभिरालापस्मितदृष्टिभिः।
जीयन्ते वल्लकीकुन्दस्रगिन्दीवरसम्पदः॥

अत्र आलापस्मितदृष्टिभिः पदार्थैः वल्लकीकुन्दस्रगिन्दीवरसम्पदः पदार्था जीयन्ते इति शब्दपरिपाट्या भणनं सोऽयं पदतः शब्दपरिपाटि क्रमः॥ २७८॥

वाक्यतो यथा,—

इन्दुर्मूर्द्ध्नि शिवस्य शैलदुहितुर्वक्त्रो नखाङ्कः स्तने
देयाद्वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः।
संवादः प्रणवेन यस्य लसता कार्य्यैकतायां तयोः
ऊर्द्ध्वद्वारविचिन्तितेन च हृदि ध्यातस्वरूपेण च॥

अत्र इन्दुर्मूर्द्ध्नि शिवस्य शैलदुहितुर्वक्त्रो नखाङ्कः स्तने

लिङ्गव्यत्ययेनान्वयः त्वया पृथिवीराज्यं प्राप्तमिति भावः भवता च अतुला निरुपमा कीर्त्तिः यशः समासादितेति लिङ्गव्यत्ययेनान्वयः। कीर्त्त्या च लोकत्रयं त्रिजगत् समासादितमित्यन्वयः॥ २७६॥

क्रमं लक्षयति शब्दस्येति। शब्दस्य यदि वा अथवा अर्थस्य अथापि अनयोः द्वयोः शब्दार्थयोः परिपाट्या क्रमेण यत् भणनं कथनं सः क्रमः परिकीर्त्तितः॥ २७७॥

तस्या इति। तस्याः कान्तायाः प्रवृद्धा प्रकर्षं वृद्धिं गता लीला विलासः यासु तथाभूताभिः आलापस्मितदृष्टिभिः आलापैः वचनैः स्मितैः मृदुहसितैः दृष्टिभिः अवलोकनविशेषैः वल्लकी वीणा कुन्दस्रक् माल्यकुसुममाला इन्दीवराणि नीलोत्पलानि तेषां सम्पदः सौभाग्यानि जीयन्ते पराभूयन्ते॥ २७८॥

इन्दुरिति। शिवस्य मूर्द्ध्नि शिरसि इन्दुः चन्द्रः शैलदुहितुः पार्वत्याः स्तने वक्त्रः अर्द्धचन्द्राकार इति भावः नखाङ्कः नखक्षतचिह्नं तत् द्वयम् इन्दुनखाङ्कद्वयं

इति च अन्यार्थवाचिनौ शब्दसमुदायौ क्रमेण अर्द्धद्वारविचिन्तितेन च हृदि ध्यातस्वरूपेण चेति वाक्यार्थद्वयवाचिभ्यां शब्दसमुदायाभ्यां संबध्येते सोऽयं वाक्यतः शब्दपरिपाटि क्रमः। अर्थपरिपाटिर्द्विधा कालतो देशतश्च ॥ २७९ ॥

तयोराद्या यथा,—

हस्ते लीलाकमलमलकं बालकुन्दानुविद्धम्
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः।
चूडापाशे नवकुरवकं चारु कर्णे शिरीषम्
सीमन्ते च त्वदुपगमजं यत्र नीपं बधूनाम् ॥

अत्र हस्ते लीलाकमलमलकं बालकुन्दानुविद्धम् इत्याद्यर्थानां शरदादिकालक्रमेण भणनं सोऽयं कालतोऽर्थपरिपाटि क्रमः ॥ २८० ॥

मिथः परस्परम् उपमां सादृश्यम् आलम्बमानं दधान सत् वः युष्मभ्यम् अभ्युदयम् अभ्युन्नतिं देयात् ददातु। यस्य द्वयस्य तयोः शैलदुहितृशिवयोः कायैकतायां शरीरैकतायाम् अर्द्धनारीश्वरत्वे इत्यर्थः लसता राजता अर्द्धद्वारविचिन्तितेन ब्रह्मरन्ध्रविभावितेन हृदि चित्ते ध्यातस्वरूपेण चिन्तितरूपेण प्रणवेन ओङ्कारेण सवादः सादृश्यं भवतीति शेषः ॥ २७९ ॥

हस्ते इति। यत्र अलकाया वधूनां नारीणां हस्ते लीलाकमलं क्रीडापद्मं शरल्लक्षणमेतत् अलके चूर्णकुन्तले बालकुन्दैः अभिनवकुन्दकुसुमैरित्यर्थः अनुविद्धम् अनुवेधः भावे अप्रत्ययः। बालकुन्दैरलका अलङ्क्रियन्ते इति भावः हेमन्तलक्षणमेतत्। आनने वदने लोध्रप्रसवरजसा लोध्रपुष्पपरागेण श्रीः कान्तिः पाण्डुतां शुभ्रतां नीता प्रापिता शिशिरलक्षणमेतत्। चूडापाशे शिखाबन्धने नवं कुरवकं तदाख्यकुसुमं वसन्तलक्षणमेतत्। कर्णे चारु मनोज्ञं शिरीषं तदाख्यकुसुमं ग्रीष्मलक्षणमेतत् सीमन्ते तव उपगमेन आविर्भावेन जायते इति तयोक्तं वार्षिक-

द्वितीया यथा,—

पायाद्वो रचितत्रिविक्रमतनुर्देवः स दैत्यान्तको
यस्याकस्मिकवर्द्धमानवपुषस्तिग्मद्युतेर्मण्डलम्।
मौलौ रत्नरुचि श्रुतौ परिलसत् ताड़ङ्ककान्ति क्रमात्
जातं वक्षसि कौस्तुभाभमुदरे नाभीसरोजोपमम्॥

अत्र त्रिविक्रमतनोर्वैकुण्ठस्य प्रवृद्धिसमये क्रमेणैव मौलिश्रुतिवक्षःउदरलक्षणेषु शरीरदेशेषु भासन्मण्डलस्य चूड़ारत्नताड़ङ्ककौस्तुभनाभ्यम्बुजैः योऽयम् औपम्यलाभः सोऽयं देशतोऽर्थपरिपाटिक्रमः। उभयपरिपाटिर्द्विधा शब्दप्रधाना अर्थप्रधाना च॥ २८१॥

तयोराद्या यथा,—

पङ्कअं पङ्किहिं वहेलिअं कुवलअं खित्तं हदहिं
वालिहिं विम्बं विविल्लिओ पत्तिओ चन्दु णहहिम्।
करणअणाहरवअणेहिं तहिं लीलावइहिं
णिअसिप्पिहिं विहसिअ ट्ठिआइं पआवइं॥

मित्यर्थः नौपं कदम्बकुसुममित्यर्थः एतेन युगपत् सर्वर्तुसद्भावोऽभिहितः॥ २८०॥

पायादिति। रचिता कृता त्रिविक्रमतनुः त्रिलोकव्यापि शरीरं येन तथाभूतः बलिच्छलनायामिति भावः स दैत्यान्तकः हरिः वः युष्मान् पायात् रक्षेत्। तिग्मा तीक्ष्णा द्युतिर्यस्य तस्य सूर्यस्येत्यर्थः मण्डलं बिम्बं क्रमात् आकस्मिकं सहसा वर्द्धमानं वृद्धिं गच्छत् वपुः शरीरं यस्य तथाभूतस्य यस्य दैत्यान्तकस्य मौलौ शिरसि रत्नस्येव रुचिः कान्तिर्यस्य तथाभूतं रत्नवदाभासमानमित्यर्थः श्रुतौ कर्णे परिलसन्ती राजमाना ताड़ङ्कस्य अलङ्कारविशेषस्य कान्तिर्यत्र तथाविधं ताड़ङ्कवत् शोभमानमित्यर्थः वक्षसि कौस्तुभाभं कौस्तुभमणिवत् विराजमानमित्यर्थः उदरे नाभीसरोजोपमं नाभिपद्मसदृशं भवतीति शेषः॥ २८१॥

पङ्कज इति।

पङ्कजं पङ्के अवहेलिला कुवलयं क्षिप्तं ह्रदे।
बल्लां बिम्बं विकीर्य्य पर्य्यस्तश्चन्द्रो नभसि।

अत्र पङ्कजकुवलयबिम्बीफलचन्द्रमसां करनयनाधरवदनैः यथासंख्यं पराजय इति शब्दपरिपाट्यैव पङ्कजानि पङ्के न्यस्तानि, कुवलयानि ह्रदे क्षिप्तानि, बिम्बं वृन्ते प्रकीर्णम्, चन्द्रो नभसि निरस्त इति आधाराणामुपर्युपरिभावः क्रियाणां च त्यागतारतम्यमित्यर्थपरिपाटिः न्यग्भवति सोऽयं शब्दप्रधानोभयपरिपाटिकमः ॥ २८२ ॥

अर्थप्रधाना यथा—

गङ्गे ! देवि ! दृशा पुनीहि यमुने ! मातः ! पुनर्दर्शनम्
सम्प्रश्नोऽस्तु पितः ! प्रयाग ! भगवन् न्यग्रोध ! मां ध्यास्यसि ।
त्वं हारासिलतावतंसविपुलस्थूलांसवक्षोभुजम्
पुंभावं भवतामवन्तिनगरीनाथं दिदृक्षामहे ॥

अत्र गङ्गायमुनाप्रयागन्यग्रोधतत्पुंभावावन्तिनगरीनाथलक्षणानामर्थानां मुख्यक्रमेण देवि दृशा पुनीहि मातः पुनर्दर्शनं पितः संप्रश्नो भगवन् मां ध्यास्यसीति मुख्यक्रमेणैव

करनयनाधरवदनैः तैरिह लीलावतीभिः
निजशिल्पे विहस्य स्थिताभिः प्रजापतिम् ॥

इह जगति निजशिल्पे स्वसृष्टौ प्रजापतिं स्रष्टारं विहस्य असम्यक्कारित्वेनेति भावः स्थिताभिः लीलावतीभिः विलासिनीभिः तैः प्रसिद्धैरित्यर्थः करनयनाधरवदनैः करेण नयनेन अधरेण वदनेन चेत्यर्थः पङ्कजं पद्मं पङ्के अवहेलिला हेलया निक्षिप्येत्यर्थः ह्रदे सरसि कुवलयं नीलोत्पलं क्षिप्तं पातितम्। तथा वल्ल्यां लतायां बिम्बं तदाख्यं फलं विकीर्य विक्षिप्य नभसि आकाशे चन्द्रः पर्यस्तः प्रक्षिप्तः ॥ २८२ ॥

गङ्गे इति । हे गङ्गे ! देवि ! दृशा नेत्रेण पुनीहि पवित्रं कुरु, हे मातः ! यमुने पुनर्दर्शनम् अस्त्विति शेषः ! हे पितः ! प्रयाग ! सम्प्रश्नः सम्भाषणमित्यर्थः त्वयेति शेषः अस्तु भवतु। हे भगवन् ! न्यग्रोध ! अक्षयवट इत्यर्थः मां ध्यास्यसि चिन्तयिष्यसि स्मरिष्यसीत्यर्थः ! हारश्च असिलता च अवतंसः अलङ्कारः ययोः तथाभूतौ विपुलौ विशालौ स्थूलांसौ स्थूलस्कन्धौ वक्षोभुजौ यस्य तथाभूतम् अतएव भवतां

संभ्रमङ्गिर्वचोविशेषैरभ्यर्च्य भवतामेव पुंभावमवन्तिनगरीनाथं दिदृक्षामह इति येयमभ्यर्थनाभङ्गिस्वार्थपरिपाटिः कृता तस्याश्च गङ्गे यमुने प्रयाग न्यग्रोधेति हारासिलतावतंसविपुलवक्षःस्थूलांसेति च शब्दपरिपाटी परस्परमुपमानोपमेयभूते न्यग्भवतः। सोऽयम् अर्थप्रधानोभयपरिपाटिक्रमः॥ २८३॥

इति क्रमालङ्कारनिरूपणम्।

मिषं यदुक्तिभङ्गिर्यावसरो यः स सूरिभिः।
निराकाङ्क्षोऽथ साकाङ्क्षः पर्य्याय इति गीयते॥२८४॥

तेषु निराकाङ्क्षं मिषं यथा,—

मया विमुक्ता वहिरेव वल्लकी व्रजेदवश्यायकणैश्च सार्द्रताम्।
द्रुतं तदेनां करवै निचोलके कयाचिदेवं मिषतो विनिर्ययौ॥

अत्र कयाचिदेवं मिषतो विनिर्ययौ इति उदकाभिधानेन आकाङ्क्षा निराकृतेति निराकाङ्क्षमेतत् मिषं नाम पर्य्यायभेदः॥ २८५॥

पुम्भावं पुरुषभावं तं प्रसिद्धम् अवन्तिनगरीनाथं महाकालाख्यं हरमित्यर्थः दिदृक्षामहे द्रष्टुमिच्छामः। गङ्गादेवी यत्र हाररूपेण स्थिता यमुनायाः कृष्णवर्णत्वात् असिरूपेण स्थितिः। प्रयागस्य विपुलवक्षस्स्थलत्वेन न्यग्रोधस्य तादृशभुजत्वेन स्थितिरिति चतुर्णामेव महापुरुषसंश्लेषेण पुम्भाव इति सर्वेषामेव युष्माकमेकत्र दर्शनाभिलाष इति भावः॥ २८३॥

पर्य्यायं लक्षयति। मिषमिति यत् मिषं व्याजः, या उक्तिभङ्गिः वचनभङ्गिः यश्च अवसरः सः सूरिभिः विद्वद्भिः [illegible] साकाङ्क्षश्च द्विविधः पर्य्यायः तदाख्योऽलङ्कारभेद इति गीयते कीर्त्यते॥ २८४॥

मयेति। मया वल्लकी वीणा वहिरेव विमुक्ता परित्यक्ता, अतः सा वल्लकी अवश्यायकणैः शिशिरबिन्दुभिः आर्द्रतां व्रजेत् गच्छेत् तत् तस्मात् एनां वल्लकीं

तदेव साकाङ्क्षं यथा,—

दशत्यसौ परभृतः सहकारस्य मञ्जरीम्।
तमहं वारयिष्यामि युवाभ्यां स्वैरमास्यताम्॥

अत्र कयाचिदेवं मिषतो विनिर्ययेइति वदुदर्कानभिधानात् साकाङ्क्षमेतत् मिषं नाम पर्य्यायस्य भेदः॥२८६॥

निराकाङ्क्षोक्तिभङ्गिः यथा,—

राजन्! राजसुता न पाठयति मां देव्योऽपि तूष्णीं स्थिताः
कुञ्जे! भोजय मां कुमार! कुशलं, नाद्यापि किं भुज्यते?।
इत्थं नाथ! शुकस्तवारिभवने मुक्तोऽध्वगैः पञ्जरात्
चित्रस्थानवलोक्य वेश्मवलभीष्वेकैकमाभाषते॥

अत्र अनया उक्तिभङ्ग्या शून्यीकृतारिनगरस्य नरपतेः कश्चित् प्रतापं वर्णयति। तत्र वाक्यस्य अपरिपूर्णत्वेन निराकाङ्क्षत्वात् निराकाङ्क्षेयमुक्तिभङ्गिः॥ २८७॥

साकाङ्क्षा यथा,—

द्रुत शीघ्रं निचोलके प्रावरणवसने करवै स्थापयामीत्यर्थः कयाचित् नार्या एवं मिषतः व्याजात् विनिर्ययेगृहात् निर्गतं सङ्केतस्थानप्राप्त्यर्थमिति भावः॥ २८५॥

दशतीति। असौ परभृतः कोकिलः सहकारस्य आम्रस्य मञ्जरीं दशति खण्डयति अहं तं वारयिष्यामि ताडयिष्यामि युवाभ्यां स्वैर स्वच्छन्दम् आस्यतां स्थीयताम्॥ २८६॥

राजन्निति। हे राजन्! राजसुता राजकन्या मा न पाठयति, देव्यः राजमहिष्यः अपि तूष्णीं स्थिताः न किञ्चित् ब्रुवते इति भावः हे कुञ्जे! मां भोजय, हे कुमार! राजपुत्र! कुशलं मङ्गलं? तवेति शेषः अद्यापि किं कथं न भुज्यते त्वयेति शेषः। हे नाथ! हे देव! तव अरिभवने शत्रुनृपतिगृहे अध्वगैः पथिकैः पञ्जरात् मुक्तः शुकः वेश्मवलभीषु गृहगोपानसीषु चित्रस्थान् आलेख्यनिहितान् राजप्रभृतीन् अवलोक्य इत्यमनेन प्रकारेण एकैकं प्रत्येकम् आभाषते आलपति॥ २८७॥

शान्त्यै वोऽस्तु कपालदाम जगतां पत्युर्यदीयां लिपिम्
क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षराम् ।
विश्वं स्रक्ष्यति वक्ष्यति क्षितिमपामीशिष्यतेऽशिष्यते
नागैः रागिषु रंस्यतेऽत्स्यति जगन्निर्वेक्ष्यति द्यामिति ॥

अत्र अनया उक्तिभङ्ग्या ब्रह्माद्यस्तसमयेऽपि अनस्तमितस्य भगवतो महेश्वरस्य प्रभावो वर्ण्यते । तत्र च यदीयां लिपिं क्वापि क्वापि गणाः पठन्ति पदशो नातिप्रसिद्धाक्षरामित्यनेनैव वाक्येन अस्मिन् आकाङ्क्षा उत्थाप्यते । सा च विश्वं स्रक्ष्यतीत्यस्मिन् ईदृशी ब्रह्मणाञ्च चतुर्युगसहस्रान्ते दिनमेकम् इति मानेन एष वर्षशतजीवी विश्वं स्रक्ष्यति ब्रह्मेति ज्ञाप्यते । कपालञ्च अस्य भगवतो भूषणं भविष्यति । वक्ष्यति क्षितिम् इति अस्मिन् ईदृशी ब्रह्मणामयं वर्षशतेन एकं दिनमिति मानेन एष पुरुषायुषजीवी क्षितिं वक्ष्यति विष्णुरिति ज्ञाप्यते कपालञ्च अस्य भगवतो भूषा भविष्यतीति । एवमपामीशिष्यत इत्यादिषु वरुणवायुकामयमेन्द्रविषयत्वेन योजनीयम् । सेयम् अनेकप्रकारेण ब्रह्मादीनां साक्षानदभिधानेन साकाङ्क्षोक्तिभङ्गिः ॥ २८८ ॥

अवसरो निराकाङ्क्षो यथा,—

शान्त्यै इति । जगतां पत्युः शिवस्य कपालदाम शवशिरोमाला वः युष्माकं शान्त्यै मङ्गलाय अस्तु भवतु गणाः प्रमथाः नातिप्रसिद्धानि नातिविशदानि अक्षराणि यस्यां तथाविधां विश्वं जगत् स्रक्ष्यति ब्रह्मा भूत्वेति भावः क्षितिं पृथ्वीं वक्ष्यति विष्णुर्भूत्वेति भावः अपां जलानां ईशिष्यते प्रभविष्यति वरुणो भूत्वेति भावः नागैः भुजङ्गैः अशिष्यते भोक्ष्यते वायुर्भूत्वेति भावः रागिषु विषयवासनावत्सु रंस्यते विहरिष्यति, कामो भूत्वेति भावः जगत् अत्स्यति भक्षयिष्यति, यमो भूत्वेति भावः द्यां स्वर्गं निर्वेक्ष्यति इन्द्रो भूत्वेति भावः इति एवं रूपां यदीयां यत्सम्बन्धिनीं लिपिं वर्णावलिं क्वापि क्वापि पदशः विभक्त्यन्तरूपेण पठन्ति उच्चारयन्ति ॥ २८८ ॥

अथ तैः परिदेविताक्षरैर्हृदये दिग्धशरैरिवार्दितः ।
रतिमभ्युपेतुमातुरां मधुरात्मानमदर्शयत् पुरः ॥
क्व नु ते हृदययङ्गमः सखा कुसुमायोजितकार्मुको मधुः ।
न खलूग्ररुषा पिनाकिना गमितः सोऽपि सुहृद्गतां गतिम् ॥

अत्र इति यानि रतेः परिदेविताक्षराणि तैराकृष्टहृदयस्य मधोः योऽयम् आत्मदर्शनाय प्रस्तावः सोऽयं न किञ्चन काङ्क्षतीति निराकाङ्क्षोऽयमवसरः पर्यायस्य भेदः ॥ २८९ ॥

साकाङ्क्षो यथा,—

अज्ज वि बालो दामोअरो त्ति इअ जम्पिए जसोआए ।
कण्हमुहपेसिअच्छं णिहुअं हसिअं वअवहूए ॥

अद्याप्यपि बालो दामोदर इति कृतप्रस्तावनस्य कृष्णस्य वक्त्रे विन्यस्तलोचनया तद्रहस्यवेदिन्या व्रजबधूमतल्लिकया यदेतन्निभृतं हसितं तत् तवाम्बा बालं त्वां ब्रूते त्वं तु माद्दशीभि र्निधुवनविदग्धाभिः दिवानिशं यमुनाकुञ्जोदरेषु विह-

---

अथेति । अथ परिदेवनानन्तर मधुः वसन्तः दिग्धशरैरिव विषाक्तबाणैरिव विषाक्ते दिग्धलिप्तकावित्यमरः तै. परिदेविताक्षरैः विलापवचनैः हृदये अर्दितः विद्धः सन् आतुरां व्याकुलां वियोगविधुरामित्यर्थः रतिं कामपत्नीम् अभ्युपपत्तुम् अनुग्रहीतुं पुरः अग्रतः आत्मानं स्वस्वरूपम् अदर्शयत् दर्शयामास प्रकाशयामासेत्यर्थः ।

क्वेति । हे नाथ ! कुसुमैः आयोजितं विरचितं कार्मुकं धनुर्येन तथाविधः ते तव हृदयङ्गमः मनोरञ्जन इत्यर्थः सखा बन्धुः मधुर्वसन्तः क्व नु ? कुत्र खलु वर्त्तते इति शेषः, सोऽपि वसन्तोऽपि उग्ररुषा तीक्ष्णकोपेन पिनाकिना हरेण सुहृद्गतां सुहृदा त्वया गता प्राप्ता तां गतिं हरकोपानलभस्मरूपामित्यर्थः न खलु गमितः ? किं प्रापितः ? । न खलु प्रश्नार्थमव्ययम् ॥ २८९ ॥

अद्यापि बालो दामोदरोऽस्तीति च जल्पिते यशोदया ।
कृष्णमुखप्रेषिताक्षं निभृतं हसितं व्रजवध्वा ॥

रसीत्यादिना अर्थजातेन साकाङ्क्षमिति साकाङ्क्षोऽयमवसरः पर्य्यायस्य भेदः ॥२९०॥

इति पर्य्यायालङ्कारनिरूपणम् ।

विवक्षा या विशेषस्य लोकसीमातिवर्तिनी ।
असावतिशयोक्तिः स्यादलङ्कारोत्तमा च सा ॥२९१॥
सा च प्रायो गुणानाञ्च क्रियाणाञ्चोपकल्पते ।
न हि द्रव्यस्य जातेर्वा भवत्यतिशयः क्वचित् ॥२९२॥
प्रभावातिशयो यश्च यश्चानुभवनात्मकः ।
अन्योन्यातिशयो यश्च तेऽपि नातिशयात् पृथक् ॥२९३॥
अलङ्कारान्तराणामप्येकमाहुः परायणम् ।
वागीशमहितामुक्तिमिमामतिशयाह्वयाम् ॥२९४॥

तत्र गुणातिशयेन महत्त्वातिशयो यथा,—

दामोदरः कृष्णः अद्यापि बालः शिशुः इति यशोदया जल्पिते कथिते सति व्रजवध्वा व्रजाङ्गनया कयाचिदिति शेषः कृष्णस्य मुखे प्रेषिते निहिते अक्षिणी यत्र तद् यथा तथा निभृतं गूढं हसितम् ।

व्रजवधूमतल्लिकया व्रजाङ्गनासु मध्ये प्रशस्तया प्रधानव्रजाङ्गनयेत्यर्थः । मतल्लिका मतर्चिका प्रकान्तसुहृतल्लजौ । प्रशस्तवाचकान्यमूनीत्यमरः ॥ २९० ॥

अतिशयोक्तिं लक्षयति विवक्षेति । लोकसीमाम् अतिवर्त्तते इति तथोक्ता अलौकिकीत्यर्थः या विशेषस्य उत्कर्षस्य विवक्षा वक्तुमिच्छा, असौ अतिशयोक्तिः स्यात् सा च अलङ्कारेषु मध्ये उत्तमा उत्कृष्टा सर्वश्रेष्ठा इत्यर्थः ॥ २९१ ॥

साचेति । साच अतिशयोक्तिः प्रायः बाहुल्येन गुणानाञ्च क्रियाणाञ्च उपकल्पते सम्भवतीत्यर्थः द्रव्यस्य जातेर्वा अतिशयः क्वचित् नहि नैव भवति ॥ २९२ ॥

प्रभावातिशय इति । यश्च प्रभावस्य अतिशयः यश्च अनुभवनात्मकः अनुभवस्वरूपः यश्च अन्योन्यातिशयः परस्परोत्कर्षः तेऽपि अतिशयात् अतिशयोक्त्यलङ्कारात् न पृथक् नातिरिक्ता इत्यर्थः ॥ २९३ ॥

अलङ्कारेति । वागीशैः वाक्पतिभिः कविभिरित्यर्थः महितां पूजितां आदृतामित्यर्थः ईमाम् अतिशयाह्वयाम् उक्तिम् अतिशयोक्तिमित्यर्थः अलङ्कारान्तराणाम् अन्येषामलङ्काराणाम् एकम् अद्वितीयम् परायणं परम् आश्रयम् आहुः कथयन्ति बुधा इति शेषः ॥ २९४ ॥

अहो विशालं भूपाल ! भुवनत्रितयोदरम् ।
माति मातुमशक्योऽपि यशोराशिर्यदत्र ते ॥

अत्रैवं यशोराशेरशक्यमानस्याप्यतिशयोक्त्या विशेषविवक्षा । येन त्रिभुवनोदरमपि सङ्कीर्णमाशङ्क्यते । सोऽयं महत्त्वातिशयो नाम अतिशयभेदः ॥ २९५ ॥

तनुत्वातिशयो यथा,—

स्तनयो र्जघनस्यापि मध्ये मध्यं प्रिये ! तव ।
अस्ति नास्तीति सन्देहो न मेऽद्यापि निवर्त्तते ॥

अत्रैवं मध्यस्य लोकसीमातिक्रमेण तानवातिशयविवक्षा येन तदस्ति नास्तीति वा संदिह्यते । सोऽयं तनुत्वातिशयो नाम अतिशयभेदः ॥२९६॥

कान्त्यतिशयो यथा,

मल्लिकामालभारिण्यः सर्वाङ्गीणार्द्रचन्दनाः ।
क्षौमवत्यो न लक्ष्यन्ते ज्योत्स्नायामभिसारिकाः ॥

अत्रैवं चन्द्रालोकस्य लोकसीमातिक्रमेण बाहुल्योत्कर्षविवक्षा येन तस्मिन् समानाभिहारेणाभिसारिका अपि न लक्ष्यन्ते । सोऽयं कान्त्यतिशयो नाम अतिशयभेदः । अथास्य पिहितात् को विशेषः ? उच्यते, पिहिते चन्द्रातपस्य उत्कर्षेणाभिसारिका-

---

अहो इति । हे भूपाल ! राजन् ! अहो आश्चर्यं भुवनत्रितयोदरं त्रिभुवनाभ्यन्तरं विशालम् अतिमहदित्यर्थः यत् यस्मात् ते तव यशोराशिः मातुं परिच्छेत्तुम् अशक्योऽपि अत्र भुवनत्रितयोदरे माति पर्य्याप्नोति ॥ २९५ ॥

स्तनयोरिति । हे प्रिये ! तव स्तनयोः जघनस्य कटिपुरोभागस्यापि मध्ये मध्यं कटिभाग इत्यर्थः अस्ति नास्तीति मे मम सन्देहः संशयः अद्यापि न निवर्त्तते नापगच्छतीत्यर्थः ॥ २९६ ॥

मल्लिकेति । मल्लिकानां माला मल्लिकामालं तद्धारिण्यः तत्स्रग्धारिण्य इत्यर्थः सर्वाङ्गीणानि सर्वाङ्गव्याप्तानि आर्द्राणि चन्दनानि यासां तथाभूताः तथा क्षौमवत्यः

तिरस्कारो विवक्ष्यते इह तु अभिसारिकातिरस्कारेण चन्द्रातपोत्कर्ष इति ॥ २९७ ॥

प्रभावातिशयो यथा,

तं दइआहिसाणं जस्सिं वि अंगंवि राहवेण ण णिहिदं ।
सीआपरिमरिसेण व उठेति णवो णिरन्तरं रोमञ्चो ॥

अत्र दयिताभिज्ञानस्य योऽयं रोमाञ्चक्रियाविशेषः स क्रियातिशयस्यैव भेदः प्रभावातिशय उच्यते ॥२९८॥

अनुभावातिशयो यथा,

विमलिअरसाअलेण वि विसहरवइणा अदिट्ठमूलच्छेदं ।
अप्पत्ततुङ्गसिहरं तिहुअणहरणपवड्ढिएण वि हरिणा ॥

अत्र रसातलमपि मृद्नता शेषेणापि च यस्य मूलं न दृष्टं त्रिभुवनमप्युल्लङ्घयता हरिणापि न तुङ्गशिखराणि प्राप्ता-

---

श्वेतपट्टवसना इत्यर्थः अभिसारिका कान्तार्थं सङ्केतं गच्छन्त्यो नायिकाः कान्तार्थिनी तु या याति सङ्केतं साभिसारिकेत्यमरः ज्योत्स्नायां चन्द्रिकायां न लक्ष्यन्ते न विभाव्यन्ते ॥ २९७ ॥

तद् दयिताभिज्ञानं यस्मिन्नप्यङ्गे राघवेण न निहितम् ।
सीतापरिमर्षेणेव उदेति नवो निरन्तरं रोमाञ्चः ॥

तत् दयितायाः कान्तायाः सीतायाः अभिज्ञायते अनेनेति अभिज्ञानं शिरोरत्नादिरूपमिति भावः यस्मिन् अपि अङ्गे राघवेण रामेण न निहितं धृतम् किन्तु सीतापरिमर्षेणेव सीताङ्गस्पर्शेनेव यत्स्पर्शेनेति भावः निरन्तरं नवः नूतनः रोमाञ्चः उदेति आविर्भवतीत्यर्थः ॥ २९८ ॥

विमृदितरसातलेनापि विषधरपतिना अदृष्टमूलच्छेदम् ।
अप्राप्ततुङ्गशिखरं त्रिभुवनहरणप्रवर्द्धितेनापि हरिणा ॥

विमृदितं विशेषेण दलितं परिदर्शितमिति भावः रसातलं पातालं येन तथाभूतेनापि विषधरपतिना शेषनागेन न दृष्टः मूलस्य तलस्य छेदः अवसानं यस्य तं तथा त्रिभुवनहरणाय त्रैलोक्यहरणाय बलि छलयित्वेति भावः

नीति यदेतल्लोकसीमातिक्रमेण विशेषव्यवस्थया पर्वतानुभावभणनं सोऽयमनुभूयमानमाहात्म्यातिशयस्यैव भेदोऽनुभावातिशय उच्यते ॥ २९९ ॥

अन्योन्यातिशयो यथा,

रणदुज्जओ दहमुहो सुरा अवज्झा अ तिहुअणस्स इमे ।
पड़इ अणत्थोतिफुड़ं विहीसणेण फुड़िआहरं णीससिअं ॥

अत्र दशास्यः समरे न जीयते सुराश्चामरत्वान् न बध्यन्ते । तयोश्च परस्परं संघट्टक्रियातिशयात् त्रिभुवनमपि क्षयं यास्यतीति येयमन्योन्यातिक्रियातिशयभणनाल्लोकसीमातिक्रमेण विशेषविवक्षा । सोऽयं क्रियातिशयो नामातिशय एवान्योन्यातिशय उच्यते ॥ ३०० ॥

इति अतिशयोक्त्यलङ्कारनिरूपणम् ।

श्लेषोऽनेकार्थकथनं पदेनैकेन कथ्यते ।
पदक्रियाकारकैः स्याद्भिन्नाभिन्नैः स षड्विधः ॥३०१॥

तेषु भिन्नपदो यथा,

प्रवर्द्धितः तेन धृतविराटमूर्त्तिनेत्यर्थः हरिणापि विष्णुनापि न प्राप्तानि तुङ्गानि उन्नतानि शिखराणि शृङ्गाणि यस्य तथाविधम् ॥ २९९ ॥

रणदुर्जयो दशमुखः सुरा अवध्याश्च त्रिभुवनस्येमे ।
पतति अनर्थोऽतिस्फुटं विभीषणेन स्फुरिताधरं निश्वसितम् ॥

रणदुर्जय इति । दशमुखः रावणः रणेषु सग्रामेषु दुर्जयः जेतुमशक्यः इमे सुरा देवाश्च त्रिभुवनस्य अवध्याः वधुमशक्याः । सुतरां अतिस्फुटं प्रकाशमित्यर्थः अनर्थः अमङ्गलं पतति वर्त्तते देवराक्षसविद्वेषस्य चिरेणापि अनुपशाम्यत्वादिति भावः अतः विभीषणेन जगदुपशमकामेनेति भावः स्फुरितः स्पन्दितः अधरः यस्मिन्तद् यथा तथा निश्वसितम् दुःखेन दीर्घनिश्वासस्यक्त इत्यर्थः ॥ ३०० ॥

श्लेषं लक्षयति । श्लेष इति एकेन पदेन सुप्तिङन्तेन यत् अनेकार्थानां कथनं स श्लेषः कथ्यते । सः श्लेषः भिन्नैः अभिन्नैश्च पदक्रियाकारकैः पदैः क्रियाभिः कारकैश्च षड्विधः स्यात् तथा च भिन्नपदश्लेषः भिन्नक्रियाश्लेषः भिन्न

दोषाकरेण संबध्नन् नक्षत्रपथवर्त्तिना।
राज्ञा प्रदोषो मामित्थमप्रियं किं न बाधते॥

अत्र प्रदोषो रात्रेः प्रथमः यामः किमिति प्रियारहितं मां न बाधते इति उक्तेर्युक्तिमाह इत्थमनुभूयमानेन प्रकारेण राज्ञा संबध्नन् कीदृशेन दोषाकरेण नक्षत्रपथवर्त्तिनेति; यो हि दोषाणामाकरेण राजमार्गातिगामिना च राज्ञा प्रक्लृष्टदोषः संबध्यते सोऽप्रियमवश्यं बाधते एव। तदत्र पूर्वस्मिन् प्राकरणिकेऽर्थे द्वितीयोऽर्थोऽप्राकरणिकः पदभेदेन उपस्थियमाणो भिन्नपदश्लेषापदेशमासादयति॥३०२॥ अभिन्नपदो यथा,—

असावुदयमारूढः कान्तिमान् रक्तमण्डलः।
राजा हरति लोकस्य हृदयं मृदुभिः करैः॥

अत्र अयमुदीयमानश्चन्द्रमा लोकस्य हृदयं हरतीत्युक्तेर्युक्तिमाह राजानुरक्तमण्डल उदयी मृदुकरः कान्तिमानिति। यो ह्येवं भूतो राजा सोऽवश्यं लोकस्य हृदयहारी

कारकश्लेषः पदश्लेषः अभिन्नपदश्लेषः अभिन्नक्रियाश्लेषः अभिन्नकारकश्लेषश्चेति षट्प्रकार इत्यर्थः॥ ३०१॥

दोषाकरेणेति। दोषाणां हिंसादीनाम् आकरः उत्पत्तिस्थानं तेन अन्यत्र दोषा रात्रिः तस्याः करः यद्वा तस्यां कराः किरणा यस्य तेन चन्द्रेणेत्यर्थः। क्षत्राणां क्षत्रियाणां पथि राजधर्मे इत्यर्थः न वर्त्तते इति तथोक्तेन राजनीतिलङ्घनपरेणेति यावत् अन्यत्र नक्षत्रपथे आकाशमार्गे वर्त्तते चरतीति तथोक्तेन राज्ञा नृपतिना अन्यत्र चन्द्रेणेत्यर्थः संबध्नन् सम्बन्धं गच्छन् प्रदोषः प्रक्लृष्टदोषः पुरुषः अन्यत्र रजनीमुखं प्रदोषो रजनीमुखमित्यमरः। रात्रिर्वा अप्रिय इष्टं प्रियारहितञ्च मां किं कथम् इत्थम् अनेन प्रकारेण न बाधते न पीड़यति? अपितु पीड़यत्येवेत्यर्थः॥ ३०२॥

असाविति। उदयम् उदयाचलम् अभ्युन्नतिञ्च आरूढः प्राप्तः कान्तिमान्

भवति। अत्रापि च प्रकारणिकेऽर्थेऽप्राकरणिक उपश्लिष्यमाणः पदानामभेदेनाभिन्नपदश्लेषो भवति ॥ २०३ ॥

भिन्नक्रियो तथा,—

मधुरा रागवर्धिन्यः कोमलाः कोकिलागिरः।
आकर्ण्यन्ते मदकलाः श्लिष्यन्ते चासितेक्षणाः ॥

अत्राकर्ण्यन्ते श्लिष्यन्ते चेति क्रियापदद्वितयस्य प्राधान्यतः समुच्चयेन उपात्तस्य मधुरा इत्यादिभिः श्लिष्टपदैः कोकिलागिर इत्यसितेक्षणा इति वाविशेष्यैकपदवर्जं पर्यायतः सम्बन्धो भवति। तद्यथा आकर्ण्यन्ते काः कोकिलागिरः कीदृश्यः मधुराः रागवर्धिन्यः कोमलाः। पुनरपि किम्भूताः आसितेक्षणाः आसिते उपवेशिते निश्चलीकृते अन्तःप्रमोदानुभावादीक्षणे याभिस्तास्तथा सर्वोऽपि हि मधुरं शब्दमाकर्णयन् निश्चलाक्षो भवति। श्लिष्यन्ते च काः असितेक्षणाः हरिणचक्षुषः किम्भूताः मदकलाः कोकिलागिरः कोमलाः रागवर्धिन्यो मधुरा इति। सोऽयं द्वयो र्विभिन्नक्रिययो र्भिन्नार्थैकरूपाणां पदार्थानामुपश्लेषो भिन्नक्रियः श्लेष उच्यते ॥ २०४ ॥

अभिन्नक्रियो यथा,—

स्वभावमधुराः स्निग्धाः शंसन्त्यो रागमुल्बणम्।
दृशो दूत्यश्च कर्षन्ति कान्ताभिः प्रेषिताः प्रियान् ॥

अत्र कर्षन्तीत्येतस्यां क्रियायां दृशां दूतीनाञ्च श्लिष्टपदत्वेन

प्रभावान् सुन्दराकृतिश्च रक्त रक्तवर्ण नवोदये इति भावः मण्डल बिम्ब यस्य तथाभूतः अनुरक्तप्रजश्च राजा चन्द्रः नृपतिश्च मृदुभिः कोमलैः अन्यत सुखप्रदैर्रत्नैर्वा करैः किरणैः राजयाह्यभागैश्च लोकस्य जगतः प्रजावर्गस्य च हृदयं चित्तं हरति रञ्जयति ॥ २०३ ॥

मधुरा इति। मधुरा मनोहारिण्यः रागवर्द्धिन्यः अनुरागवर्द्धनपराः कोमलाः मृदुलाः कोकिलानां परभृतानां गिरः रवाः आकर्ण्यन्ते श्रूयन्ते मदकलाः मदेन उल्लासेन मृदुमन्दभाषिण्यः असितेक्षणाः नीलोत्पलाक्ष्यः कामिन्यः इति शेषः। श्लिष्यन्ते आलिङ्ग्यन्ते च। कामिभिरिति शेषः ॥ २०४

आवेशादयमभिन्नक्रियो नाम श्लेषविशेषः। प्रथमयोरस्य वा को विशेष इति चेत् तत्रैकस्यैव प्राकरणिकत्वमत्र तु द्वयोरपीति। अयञ्च भिन्नकारकयोरपि भवति ॥ ३०५ ॥

भिन्नकारको यथा,—

गति र्वेणी च नागेन वपुरूरू च रम्भया।
ओष्ठौ पाणी प्रवालैश्च तस्यास्तुल्यत्वमाययुः ॥

अत्रैकस्मिन् पक्षे धर्मधर्मिणोरभेदोपचारान्नागगति र्गृह्यते। तत्र गतेर्वेण्याश्च नागेन हस्तिना अहिना च तुल्यत्वं वपुरूर्वोश्च रम्भया कदल्या अप्सरोभिश्च तुल्यत्वमोष्ठयोः पाण्योश्च प्रवालैः विद्रुमैः नवपल्लवैश्च वर्णनीययोः श्लेषप्रभावात् लभ्यते। सोऽयमनेककर्त्तृकत्वाद्भिन्नकारक इति श्लेषो भवति ॥ ३०६ ॥

अभिन्नकारको यथा,—

कृष्णार्ज्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि! ॥

अत्र हे कलभाषिणि कस्य ते दृष्टि र्विश्वास्या भवति इत्युक्ते युक्तिमाह कृष्णार्ज्जुनानुरक्तापि कर्णावलम्बिनीति

स्वभावेति। कान्ताभिः प्रेषिताः प्रहिताः स्वभावेन मधुराः मनोहारिण्यः स्निग्धाः स्नेहवर्षिण्यः उल्बणम् उत्कटं रागम् अनुरागं शंसन्त्यः प्रकटयन्त्यः दृशः दृष्टयः दूत्यश्च प्रियान् कर्षन्ति आकृष्य नयन्तीत्यर्थः।

स्वभावेति। स्वभावेन प्रकृत्या मधुराः मनोहारिण्यः स्निग्धाः स्नेहवर्षिण्यः उल्बणम् उत्कटं रागं प्रणयं शंसन्त्यः प्रकटयन्त्यः कान्ताभिः रमणीभिः प्रियान् कान्तान् प्रति प्रेषिताः प्रहिताः दृशः दृष्टयः दूत्यश्च कर्षन्ति आकृष्य नयन्ति कान्तानिति शेषः ॥ ३०५ ॥

गतिरिति। तस्याः कान्तायाः गतिः पदविक्षेपः वेणी केशपाशश्च नागेन हस्तिना भुजङ्गेन च, वपुः शरीरम् ऊरू च रम्भया तदाख्यया सुरसुन्दर्य्या कदलिस्तम्भेन च ओष्ठौ पाणी च प्रवालैः विद्रुमैः पल्लवैश्च तुल्यत्वं साम्यम् आययुः प्रापुः ॥ ३०६ ॥

कृष्णेति। हे कलभाषिणि मधुरवादिनि! ते तव दृष्टिः कृष्णार्ज्जुनानुरक्तापि

याहि कृष्णार्जुनेन अनुरज्यते कथं सा कर्णपक्षपातिनी भवति याचैवम् उभयगता तस्यां को विश्वसिति स चायमेककर्तृकत्वादभिन्नकारक इति श्लेषो भवति ॥ ३०७ ॥

इति श्लेषालङ्कारनिरूपणम् ।

स्वाभिप्रायस्य कथनं यदि वाप्यन्यभावना ।
अन्यापदेशो वा यस्तु त्रिविधं भाविकं विदुः ॥ ३०८ ॥
मते चास्माकमुद्भेदो विद्यते नैव भाविकात् ।
व्यक्ताव्यक्तोभयाख्याभिस्त्रिविधः सोऽपि कथ्यते ॥ ३०९ ॥

तत्र भाविकभेदेषु स्वाभिप्रायकथनं यथा,—

ण विज्जइ दुग्गेज्झिआ दिट्ठम्मि जस्सिं भिउडिआ
जत्थ ण अ व्वाहारओ विप्पइ आहसन्तए विच्छुहइ ।
अहिणन्दइ जत्थ ण सोवदंसिआ
तं मे कहहु माण जइ मे इच्छहु जीअणम् ॥

कृष्णे कृष्णवर्णे अर्जुने पार्थे अनुरक्तापि अनुरागिण्यपि कर्णावलम्बिनी राधेयानुधाविनी अतः कस्य जनस्य विश्वसनीयत्वं सतीत्वेन प्रत्ययोग्यत्वं याति प्राप्नोति ? नैवेत्यर्थः । इत्यमापाततो विरोधः । ते दृष्टिः कृष्णा असिता अर्जुना धवला अनुरक्ता अनुरागवर्षिणी कर्णावलम्बिनी आकर्णकृष्टेति तत्परिहारः ॥३०७॥

भाविकं लक्षयति स्वाभिप्रायस्येति । स्वस्य अभिप्रायस्य आशयस्य कथनम् प्रकटनं यदि वा अथवा अन्यस्य अप्रकृतस्य भावना उत्थापना वा यः अन्यस्य अप्रकृतस्य अपदेशः छल तत् त्रिविध त्रिप्रकारं भाविकं तदाख्यमलङ्कारं विदुः जानन्ति ॥ ३०८ ॥

मतेति । अस्माकं मते च भाविकात् उद्भेदः प्रकटनम् अभिप्रायादेरिति भावः नैव भिद्यते नैव पृथग्भवतीत्यर्थः उद्भेदः भाविकस्यैकार्थे इति भावः स उद्भेदः अपि व्यक्ताख्यया अव्यक्ताख्यया व्यक्ताव्यक्ताख्यया च त्रिविधः कथ्यते ॥ ३०९ ॥

न विद्यते दुर्ग्राह्यादृष्टे यस्मिन् भ्रूकुटिका
यत्र न च व्याहारो गृह्यते आहसति विक्षुभ्यते ।
अभिनन्दते यत्र न सोपदर्शिता
तं मे कथय मानं यदि मे इच्छसि जीवनम् ॥

नेति । दुर्ग्राह्ये ग्रहीतुमशक्ये वाह्यव्यापारविशेषेण दुर्ज्ञेये इत्यर्थः अतएव

अत्र भूङ्गेदासभाषणप्रियतमावक्षेपणरूपान् प्रत्यनभिमतप्रतिपादनरूपस्याभिप्रायस्य कथितत्वादिदं स्वाभिप्रायकथनं नाम भाविकम् ॥ ३१० ॥

अन्यभावना यथा,—

दंसणवलिअं दढकं पि अघणं दीहरं सुपरिणाहम्।
होइ ह घरे साहीणं मुसलं धण्णाणं महिलाणम् ॥

अत्र मेढ्र भावनया मुसलरूपस्योक्तत्वादिदमन्यभावनाभिधानं भाविकम् ॥ ३११ ॥

अन्यापदेशो यथा,—

आसाइओ णाएण जत्तिओ विअ विहीणओ।
घम्मरवसहो एण्हिं रक्खिज्जइ गहवइ च्छेत्तइम् ॥

अत्र परक्षेत्रस्य घम्मरवृषनिवारणापदेशेन चिरात् परिज्ञात उपपतिर्वार्य्यते। तदिदमन्यापदेशाख्यं भाविकम् ॥ ३१२ ॥

उद्देशेषु व्यक्तो यथा,—

अदृष्टे दर्शनायोग्ये अननुसंधे इति भावः यस्मिन् माने भ्रूकुटिका भ्रूभङ्गः न विद्यते यत्र च माने व्याहारः उक्तिः वचनमित्यर्थः न च गृह्यते नावबुध्यते इत्यर्थः आहसति सम्यक् हसति अथच विक्षुभ्यते विशेषेण क्षोभं प्राप्नोति सलभ्यते इत्यर्थः यत्र माने उपदर्शिता सखीभिः सनिर्बन्धं प्रबोधितेत्यर्थः न अभिनन्दते न मन्यति तम् अस्याः मानं कथय ब्रूहि यदि मे मम जीवितम् इच्छसि। सखीं प्रति कस्यचित् मानवत्याः प्रियस्य प्रोष्यागतस्योक्तिरियम् ॥ ३१० ॥

दर्शनवलितं दृढमपि घनं दीर्घं सुपरिणाहम्।
भवति गृहे स्वाधीनं मुसलं धन्यानां महिलानाम् ॥

दंसणेति। दृढं कठिनमपि दर्शनवलितं दृष्टिप्रियमित्यर्थः घनं सान्द्रं दीर्घम् आयतं सुपरिणाहं सुविशालं मुषलं धन्याना पुण्यवतीनां महिलानां गृहे स्वायत्तम्। अत्र मुषलमित्यनेन मेढ्रभावना उत्थाप्यते। स्वाधीनमित्यनेन महिलाना स्वाधीनपतिकात्वं प्रतीयते ॥ ३११ ॥

आसादितो नागेन याचिक इव विहीनको घम्मरवृषभ इह रक्ष्यते गृहपतिक्षेत्रे।

मन्तेसि मइ मह पणअं सन्दाणेसि तिदसेस ! पाअवरअणम् ।
पअटेसि सुद्धसहावं सम्भावेसि सुरणाह ! जाव अलीअम् ॥

अत्र मायाविनो महेन्द्रस्याभिप्रायः सत्यं केन व्यक्तमेव उद्भिन्न इति व्यक्तोऽयम् उद्भेदः ॥ ३१३ ॥

अव्यक्तो यथा,—

निःशेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरो
नेत्रे दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मिथ्यावादिनि ! दूति ! बान्धवजनस्याज्ञातपीड़ागमे !
वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकम् ॥

अत्र वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यान्तिकमित्याक्षेपवता प्राकरणिकोदाहरणेन यद्यपि दूत्या दुश्चेष्टितं निर्भिन्नं तथापि न पूर्ववद्व्यक्तमित्यव्यक्तोऽयम् उद्भेदः ॥ ३१४ ॥

उभयरूपो यथा,—

अम्लानोत्पलकोमले सखि ! दृशौ नीलाञ्जनेनाञ्चिते
कर्पूरच्छुरणाच्च गण्डफलके सम्वेल्लितः पाण्डिमा ।
श्वासाः सन्तु च कन्दुकभ्रमिभुवः किन्तु प्रभावाहिना-
मङ्गानां क्रशिमानमुत्कटममुं को नाम नोत्प्रेक्षते ॥

मन्त्रयसि मम मम प्रणय सदानयसि त्रिदशेश पादपरत्नम् ।
प्रकटयसि शुद्धस्वभावं सम्भावयसि सुरनाथ । यावदलीकम् ॥

निःशेषेति । हे मिथ्यावादिनि अलीकभाषिणि । हे बान्धवजनस्य अज्ञातपीडागमे ! बान्धवजनपीड़ानभिज्ञे ! दूति ! तव स्तनतटं स्तनोपरिभागः निःशेषं सम्यक् च्युतं भ्रष्टं चन्दनं यस्मात् तथोक्तम् । अधरः निर्मृष्टः निःशेषं यथा तथा विलुप्तः रागः ताम्बूलचर्वणजनितं लौहित्यं यस्य तथाभूतम् । नेत्रे दूरम् अत्यन्तम् अनञ्जने अञ्जनरहिते विलुप्तकज्जले इत्यर्थः इयं तन्वी कोमला तनुः अङ्गं पुलकिता रोमाञ्चिता । अतः त्वम् इतः अस्मात् मत्सकाशादित्यर्थः वापीं सरोवरं स्नातुं गतासि तस्य अधमस्य मत्प्रियस्येति भावः आक्षेपोक्तिरियम् अन्तिकं समीपं न पुनः नैव गतासीत्यनुषङ्गः ॥ ३१२ ३१४॥

अम्लानेति । हे सखि ! अम्लाने म्लानिमप्राप्ते उत्पले इव कोमले मृदुले दृशौ नेत्रे नीलाञ्जनेन नीलकज्जलेन अञ्चिते अलङ्कृते । गण्डफलके कपोलदेशे

अत्र दृशो म्लानता गण्डयोः पाण्डुरत्वं श्वासानां दैर्घ्यमित्युत्कण्ठाचिह्ननिह्नवाय योऽयमविनयवत्या नीलाञ्चनादिप्रयोगस्तस्य तत्त्वाभ्युपगमेऽपि अङ्गानां क्लिशिमानम् उत्कटमसुं को नाम नोत्प्रेक्षत इति योऽयं सखीव्याहारः तेन तदभिप्राय उद्विग्नोऽनुद्विग्नश्च भवति इति उभयरूपोऽयमुद्भेदः ॥ ३१५ ॥

तेऽमी त्रयोऽप्युद्भेदा भाविकात् न भिद्यन्ते।

इति भाविकालङ्कारनिरूपणम्।

संसृष्टिरिति विज्ञेया सर्वालङ्कारसङ्करः।
सा तु व्यक्ता तथाऽव्यक्ता व्यक्ताव्यक्तेति च त्रिधा ॥ ३१६ ॥
तिलतण्डुलवद्व्यक्ता च्छायादर्शवदेव च।
अव्यक्ता क्षीरजलवत् पांशुपानीयवच्च सा ॥ ३१७ ॥
व्यक्ताव्यक्ता च संसृष्टिर्नरसिंहवदिष्यते।
चित्रवर्णवदन्यस्मिन्नानालङ्कारसङ्करे ॥ ३१८ ॥

व्यक्ता तिलतण्डुलवद् यथा,—

पिनष्टीव तरङ्गाग्रैरुदधिः फेनचन्दनम्।
तदादाय करैरिन्दुं लिम्पतीव दिगङ्गनाः ॥

कर्पूरच्छूरणात् कर्पूरलेपनात् पाण्डिमा पाण्डुत्वं सर्वेन्द्रियः सङ्क्रामितश्च। श्वासा निःश्वासमरुतः कन्दुकभ्रमिभुवः कन्दुकं क्रीडनकं गोलवस्तु तस्य भ्रमिः घूर्णनं तस्मात् भवतीति तथोक्ताः सन्तु भवन्तु च। किन्तु को जनः प्रभावाहिना लावण्यशालिनाम् अङ्गानाम् उत्कटम् अत्यन्तम् असुं क्लिशिमानं क्लेशत्वं न उत्प्रेक्षते न सम्भावयति नाम प्राकाश्ये। अङ्गकार्श्यं स्फुटमेव प्रतीयते इति निष्कर्षः ॥ ३१५ ॥

संसृष्टिं लक्षयति। सर्वेषाम् अलङ्काराणां सङ्करः सम्मेलनं संसृष्टिः इति विज्ञेया वेद्या। सा तु संसृष्टिः व्यक्ता स्फुटा तथा अव्यक्ता अस्फुटा, व्यक्ताव्यक्ता स्फुटास्फुटा चेति त्रिधा त्रिप्रकारा भवति ॥ ३१६ ॥

तिलेति। व्यक्ता तिलतण्डुलवत् तिलयुक्ततण्डुलमिव छायादर्शवच्च प्रतिबिम्बदर्पणवच्च भवतीति शेषः। अव्यक्ता सा संसृष्टिः क्षीरजलवत् दुग्धमिश्रितसलिलमिव, पांशुपानीयवच्च कर्दमाक्तजलवदित्यर्थः भवतीति शेषः ॥ ३१७ ॥

व्यक्ताव्यक्ता च संसृष्टिः नरसिंहवत् नृसिंहाकृतिरिव तथा अन्यस्मिन् नानालङ्काराणां बहूनाम् अलङ्काराणां सङ्करे सम्मेलने चित्रवर्णवत् इष्यते ॥ ३१८ ॥

अत्र उत्प्रेक्षाद्वयं रूपकद्वयञ्च तिलतण्डुलवत् सङ्कीर्यते ॥ २१९ ॥

व्यक्तैव च्छायादर्शवद्यथा,—

निर्मलेन्दु नभो रेजे विकचाब्जं बभौ सरः ।
परं पर्य्यश्रुवदनौ मम्लतु भ्रातरावुभौ ॥

अत्र आदर्शच्छायेव हेत्वलङ्कारे रामलक्ष्मणमुखयोरिन्दुपद्मौपम्येन सदृशाऽसदृशव्यतिरेको दृश्यते ॥ ३२० ॥

अव्यक्ता क्षीरजलवद् यथा,—

क्षीरक्षालितचन्द्रेव नीलीधौताम्बरेव च ।
टङ्कोल्लिखितसूर्य्येव वसन्तश्रीरदृश्यत ॥

अत्रोपमोत्प्रेक्षे क्षीरनीरवन्मिश्रे संसृष्टे न व्यज्येते ॥ ३२१ ॥

अव्यक्तैव पांशूदकवद् यथा,—

कृष्णार्ज्जुनानुरक्तापि दृष्टिः कर्णावलम्बिनी ।
याति विश्वसनीयत्वं कस्य ते कलभाषिणि ! ॥

पिनष्टीति । उदधिः समुद्रः तरङ्गाणाम् ऊर्म्मीणाम् अग्रैः अग्रभागैः फेनमेव चन्दनं पिनष्टीव पिष्टं करोतीव । इन्दुश्चन्द्रः करैः हस्तैः किरणैश्च तत् फेनचन्दनम् आदाय आकृष्य दिश एव अङ्गनाः स्त्रियः लिम्पतीव लिप्ताः करोतीव ॥ ३१९ ॥

निर्मलेति । निर्मलः स्वच्छः इन्दुः चन्द्रः यस्मिन् तथाभूतं नभः आकाशं रेजे शुशुभे । विकचानि प्रस्फुटानि कमलानि यस्मिन् तथाविधं सरः सरोवरं बभौ रराज । परं किन्तु उभौ भ्रातरौ रामलक्ष्मणौ पर्य्यश्रु अश्रुपरीतं वदनं ययोः तथाभूतौ रुदन्तावित्यर्थः सीतावियोगादिति भावः मम्लतुः म्लानतां प्रापतुः ॥ ३२० ॥

क्षीरेति । वसन्तस्य श्रीः शोभा क्षीरेण क्षालितः धौतः चन्द्रः यस्यां तथाभूतेव नील्या नीलीरागेण धौतं क्षालितम् अम्बरम् आकाशं वसनञ्च यस्या तथाविधेव तथा टङ्केन शाणयन्त्रविशेषेण उल्लिखितः उद्घृष्टः सूर्य्यः यस्यां तथाविधेव अदृश्यत आलोकि ॥ ३२१ ॥

कृष्णेति व्याख्यातं प्राक् ॥ ३२२ ॥

अत्र पांशूदकयोरिव मृत्पिण्डे श्लेषविरोधयोः अव्यक्तयोरिव व्याजस्तुतावङ्गभावोऽवगम्यते ॥ ३२२ ॥

व्यक्ताव्यक्ता नरसिंहवद् यथा,—

रजोभिस्तुरगोत्कीर्णैर्गजैश्च घनसन्निभैः।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ॥

अत्र नरसिंहजाताविव सिंहनरशरीरभागयोः परिवृत्त्य-लङ्कारहेतूपमयोः अङ्गभावो व्यक्ताव्यक्तरूपः परस्फुरन् उपलभ्यते ॥ ३२३ ॥

व्यक्ताव्यक्तैव चित्रवर्णवद् यथा,—

मयूरारावमुखरां प्रावृषं सतडिल्लताम्।
महाटवीमिवोल्लङ्घ्य तोयानि मुमुचुर्घनाः ॥

अत्र पटावयवस्थानां नीलादीनामिव पटावयव्याश्रिते चित्रवर्णे श्लेषरूपकोपमार्थश्लेषाणां पदपदार्थाश्रयाणां शरद्वर्णनवाक्याश्रयिणि समाध्यलङ्कारे व्यक्ताव्यक्तरूपोऽङ्गाङ्गिभावः प्रतीयते ॥ ३२४ ॥

चतुर्विंशतिरित्येताः क्रमेणोभयसंश्रयाः।
काव्यालङ्कृतयः प्रोक्ता यथावदुपमादयः ॥ ३२५ ॥

इति श्रीमहाराजाधिराजश्रीभोजदेवविरचिते
सरस्वतीकण्ठाभरणे उभयालङ्कारविवेचनो
नाम चतुर्थः परिच्छेदः।

रजोभिरिति। तुरगा अश्वाः तैः उत्कीर्णानि उत्क्षिप्तानि तैः रजोभिः रेणुभिः घनसन्निभैः मेघतुल्यैः गजैः हस्तिभिश्च व्योम आकाशं भुवस्तलमिव भूमिमिव तथा भूतलं व्योमेव आकाशमिव कुर्वन् ययावित्यनेनानुषङ्गः ॥ ३२३ ॥

मयूरेति। घनाः मेघाः मयूराणाम् आरावेण नादेन मुखरां वाचालां तां सतडिल्लतां विद्युल्लतासमेतां प्रावृषं वर्षर्तुं महाटवीमिव महारण्यमिव उल्लङ्घ्य अतिक्रम्य तोयानि जलानि मुमुचुः तत्यजुः ॥ ३२४ ॥

चतुरिति। इत्येवम् एताः उभयसंश्रयाः शब्दार्थगताः चतुर्विंशतिः उपमादयः काव्यालङ्कृतयः काव्यालङ्कारा यथावत् प्रोक्ताः कथिताः ॥ ३२५ ॥

इति पण्डितकुलपतिना श्रीजीवानन्द विद्यासागर भट्टाचार्येण विरचिता
सरस्वतीकण्ठाभरणस्य चतुर्थ परिच्छेदव्याख्या।

पञ्चमः परिच्छेदः ।

रसोऽभिमानोऽहङ्कारः शृङ्गार इति गीयते ।
योऽर्थस्तस्यान्वयात् काव्यं कमनीयत्वमश्नुते ॥ १ ॥
विशिष्टादृष्टजन्मायं जन्मिनामन्तरात्मसु ।
आत्मसम्यग् गुणोद्भूतेरेको हेतुः प्रकाशते ॥ २ ॥
शृङ्गारी चेत् कविः काव्ये जातं रसमयं जगत् ।
स एव चेदशृङ्गारी नीरसं सर्वमेव तत् ॥ ३ ॥
पश्यति स्त्रीति वाक्ये हि न रसः प्रतिभासते ।
विलोकयति कान्तेति व्यक्तमेव प्रतीयते ॥ ४ ॥
कन्ये ! कामययानं मां त्वं न कामयसे कथम् ।

छात्राणां सुखबोधाय श्रीजीवानन्दशर्मणा ।
पञ्चमाख्ये परिच्छेदे व्याख्येय क्रियते मया ॥

रस इति । रसः अभिमानः अहङ्कारः शृङ्गार इति एवं पर्य्यायः यः अर्थः वस्तुविशेषः, तस्य अन्वयात् सङ्गात् काव्यं कमनीयत्वं रम्यताम् अश्नुते प्राप्नोति ॥ १ ॥

विशिष्टेति । जन्मिनां शरीरिणां सामाजिकानामिति यावत् अन्तरात्मसु अन्तःकरणेषु विशिष्टात् विलक्षणात् अदृष्टात् शुभकर्मजनितभाग्यादित्यर्थः जन्म उत्पत्तिर्यस्य तथाविधः अयं रस इत्यर्थः आत्मनः स्वस्य सम्यग् गुणानां दया-दाक्षिण्यादिसदाचाराणाम् उद्भूतेः उत्पत्तेः एकः अद्वितीयः हेतुः कारण प्रकाशते प्रतिभाति । रसिका हि शिष्टा सुविनयसम्पन्ना भवन्तीति दृश्यते ॥ २ ॥

शृङ्गारीति । चेद् यदि कविः काव्ये काव्यरचनायां शृङ्गारी रसवान् भवतीति शेषः तदा जगत् रसमयम् आनन्दमयमिति भावः जातम् । स एव कविः अशृङ्गारी अरसिकः चेत् यदि भवति सर्वमेव जगत् नीरसं निरानन्दमिति भावः भवतीति शेषः ॥ ३ ॥

पश्यतीति । स्त्री पश्यतीतिवाक्ये रसः नहि नैव प्रतिभासते प्रतिभाति कान्ता विलोकयतीति वाक्ये तु व्यक्तमेव स्पष्टमेव प्रतीयते रसः इति शेषः ॥ ४ ॥

इति ग्राम्योऽयमर्थात्मा वैरस्यायैव कल्पते ॥ ५ ॥
कामं कन्दर्पचाण्डालो मयि वामाक्षि ! निर्दयः।
त्वयि निर्मत्सरो दिष्ट्येत्यग्राम्योऽर्थो रसावहः ॥ ६ ॥
नवोऽर्थः सूक्तिरग्राम्या अव्यो बन्धः स्फुटा श्रुतिः।
अलौकिकार्थयुक्तिश्च रसमाहर्त्तुमीशते ॥ ७ ॥
वक्रोक्तिश्च रसोक्तिश्च स्वभावोक्तिश्च वाङ्मयम्।
सर्वानुग्राहिणीं तासु रसोक्तिं प्रतिजानते ॥ ८ ॥
भावो जन्मानुबन्धोऽथ निष्पत्तिः पुष्टिसङ्करौ।
क्रासाभासौ शमः शैषो विशेषः परिपोषवान् ॥ ९ ॥
विप्रलम्भोऽथ सम्भोगस्तच्चेष्टास्तत्परौष्टयः।

कन्दर्प इति। हे कन्दर्प ! त्वं कामयमान त्वा प्रति कामुकमित्यर्थः मां कथं न कामयसे नाभिलषसि इत्येव ग्राम्यः अविदग्धप्रयोज्य इति भावः अयम् अर्थात्मा अर्थस्वरूपः वैरस्याय रसप्रातिकूल्यायेत्यर्थः एव कल्पते प्रभवति। तस्मादेवं विधोऽर्थो न प्रयोज्य इति भावः ॥ ५ ॥

काममिति। हे वामाक्षि ! कुटिलनयने ! चारुनयने ! वा। कन्दर्प एव चाण्डालः मयि विषये कामं निर्दयः निष्ठुरः। दिष्ट्या भाग्येन त्वयि निर्मत्सरः विद्वेषरहितः। त्वा न क्लिश्नातीति भावः। इत्येवम् अग्राम्यः विदग्धप्रयोज्यः अर्थ रसावहः रसोत्पादहेतुरित्यर्थः ॥ ६ ॥

नव इति। नवः नूतनः केनचिदरचितपूर्व इति यावत् अर्थः प्रतिपाद्यवस्तु अग्राम्या विदग्धोचिता सूक्तिः शोभना वाक्, श्रवणयोग्यः बन्धः रचना, स्फुटा सुव्यक्ता श्रुतिः श्रवणयोग्याऽर्थः, अलौकिकस्य लोकातीतस्य अर्थस्य वस्तुनः युक्तिः योगश्च एते रसम् आहर्त्तुम् उद्भावयितुम् ईशते प्रभवन्ति ॥ ७ ॥

वक्रोक्तिरिति। वक्रा कुटिला भावान्तरसवलितेत्यर्थः उक्तिः वचन रसस्य शृङ्गारादेरुक्तिः प्रकटन स्वभावस्य उक्तिश्च एतत् त्रिविध वाङ्मयं शास्त्रं काव्यमिति यावत्। तासु त्रिविधासु मध्ये सर्वानुग्राहिणी सर्वेषा प्रीणनीं रसोक्तिं प्रतिजानते प्रतिज्ञया निबध्नन्ति विद्वास इति शेषः ॥ ८ ॥

भाव: इति। भावः २ जन्मानुबन्ध ३ निष्पत्तिः ४ पुष्टिः ५ सङ्करः ६ क्रासः ७ आभासः ८ शमः ९ शैषः १० विशेषः ११ परिपोषः १२ विप्रलम्भः १३ सम्भोगः

निरुक्तयः प्रकीर्णानि प्रेमाणः प्रेमपुष्टयः ॥ १० ॥
नायिका नायकगुणाः पाकाद्याः प्रेमभक्तयः ।
नानालङ्कारसंसृष्टेः प्रकाराश्च रसोक्तयः ॥ ११ ॥
चतुर्विंशतिरित्युक्ता रसान्वयविभूतयः ।
स्वरूपमासां यो वेद स काव्यं कर्त्तुमर्हति ॥ १२ ॥
आलम्बनविभावेभ्यः स्वेभ्यः स्वेभ्यः समुन्मिषन् ।
रसो रत्यादिरूपेण भाव इत्यभिधीयते ॥ १३ ॥
रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा विस्मयश्चाष्टौ स्थायिभावाः प्रकीर्त्तिताः १४ ॥
स्तम्भस्तनूरुहोद्भेदो गद्गदः स्वेदवेपथू ।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्विका मताः ॥ १५ ॥
स्मृतिर्वितर्कश्चोत्कण्ठा चिन्ता चपलता मतिः ।

---

१४ तयोः विप्रलम्भसम्भोगयोः चेष्टा, १५ तयोः परौष्टयः १६ निरुक्तयः, १७ प्रकीर्णानि, १८ प्रेमाणः १९ प्रेमपुष्टयः २० नायिकानायकगुणाः २१ पाकाद्याः २२ प्रेमभक्तयः २३ नानालङ्कारसंसृष्टेः प्रकाराः २४ रसोक्तयः । इति चतुर्विंशतिः रसान्वया विभूतयः रससम्पदः उक्ताः यः आसां विभूतीनां स्वरूपं वेद जानाति स काव्यं कर्त्तुम् अर्हति शक्नोति ॥ ९—१२ ॥

आलम्बनेति । स्वेभ्यः स्वेभ्यः निजेभ्यो निजेभ्यः आलम्बनविभावेभ्यः रसोद्गमहेतुभ्यः नायिकादिभ्यः रत्यादिरूपेण समुन्मिषन् समुद्रेकं गच्छन् रसः शृङ्गारादिः भाव इति अभिधीयते उच्यते ॥ १३ ॥

रत्यादीनाह । रतिरिति । रत्यादयः अष्टौ स्थायिभावाः, काव्यस्य आरम्भात् समाप्तिपर्यन्तं स्थिरशीला इत्यर्थः प्रकीर्त्तिताः कथिताः ॥ १४ ॥

सात्विकानाह स्तम्भ इति । स्तम्भः निश्चलत्वं तनूरुहोद्भेदः रोमाञ्चः गद्गदः अस्पष्टा वाक्, स्वेदः घर्मः, वेपथुः कम्पः, वैवर्ण्यं वर्णान्यथाभावः अश्रु नेत्रजलं प्रलयः मोहः प्रलयो नष्टचेष्टतेत्यमरः । इति अष्टौ सात्विका भावाः मताः कथिताः ॥ १५ ॥

गर्वः स्नेहो धृतिर्व्रीडाऽवहित्थं मूढ़ता मदः ॥ १६ ॥
हर्षामर्षावसूयेर्ष्या विषादो दैन्यमुग्रता।
त्रासः शङ्का गदो ग्लानिरुन्मादः सम्भ्रमः श्रमः ॥ १७ ॥
निर्वेदो जाड्यमालस्यं निद्रा सुप्तं प्रबुद्धता।
इति भावास्त्रयस्त्रिंशद्विज्ञेया व्यभिचारिणः ॥ १८ ॥
चिरं चित्तेऽवतिष्ठन्ते सम्बध्यन्तेऽनुबन्धिभिः।
रसत्वं प्रतिपद्यन्ते प्रबुद्धाः स्थायिनोऽत्र ते ॥ १९ ॥
रजस्तमोभ्यामस्पृष्टः मनः सत्वमिहोच्यते।
निर्वृतयेऽस्य तद्योगात् प्रभवन्तीति सात्विकाः ॥ २० ॥
विशेषेणाभितः काये स्थायिनं चारयन्ति ये।
अनुभावादिहेतूंस्तान् वदन्ति व्यभिचारिणः ॥ २१ ॥
जनित्वा ये न जायन्ते तेऽथ वा व्यभिचारिणः।

व्यभिचारिण आह स्मृतिरित्यादि। स्मृत्यादयः त्रयस्त्रिंशद्भावाः व्यभिचारिणः विज्ञेयाः ॥ १६—१८ ॥

चिरमिति। अत्र काव्ये ते स्थायिनः रत्यादयः प्रबुद्धाः परिपुष्टाः सन्तः चित्ते मनसि चिरम् आसमाप्तेरिति यावत् अवतिष्ठन्ते स्थितिं कुर्वन्ति अनुबन्धिभिः पोषकैः अनुबध्यन्ते पुष्टिं नीयन्ते तथा रसत्वं प्रतिपद्यन्ते प्राप्नुवन्ति ॥ १९ ॥

रज इति। इह अस्मिन् प्रकरणे रजस्तमोभ्यां रजोगुणतमोगुणाभ्याम् अस्पृष्टम् असम्बद्धं मनः सत्त्वम् उच्यते कथ्यते। अस्य मनसः निर्वृतये सुखाय प्रीतिलाभायेत्यर्थः तेषां सत्त्वादीनां योगात् समुद्भावादित्यर्थः प्रभवन्ति जायन्ते इति हेतोः सात्त्विकाः सत्त्वोद्रेकसमुद्भवा इत्यर्थः भवन्तीति शेषः ॥ २० ॥

विशेषेणेति। काये काव्यशरीरे ये भावाः स्थायिनं रत्यादिं विशेषेण अतिशयेनेत्यर्थः अभितः समन्तात् सर्वतो[illegible]त्यर्थः सञ्चारयन्ति प्रसारयन्ति, अनुभावादीनां हावभावादीनाम्। उद्भ[illegible]र्वैः स्वैर्वहिर्भावं प्रकाशयन्। लोके यः कार्यरूपः सोऽनुभावः काव्य[illegible]नः पुनरसावित्याह। उक्ताः स्त्रीणामलङ्कारा अङ्गजाश्च स्वभावजाः। [illegible]त्त्विका भावास्तथा चेष्टाः परा अपीति दर्पणकारोक्तानां भावानां हेतू[illegible] तान् व्यभिचारिणः वदन्ति ॥ २१ ॥

स्मृत्यादयो हि प्रेमादौ भवन्ति न भवन्ति च ॥ २२ ॥
रतौ सञ्चारिणः सर्वान् गर्वस्नेहौ धृतिं मतिम् ।
स्थास्नूनेवोद्धतप्रेयःशान्तोदात्तेषु जानते ॥ २३ ॥
संस्कारपाटवादिभ्योऽनुभावं वा निजाश्रये ।
सञ्चारिणं वा जनयन् सात्विकं वा स जायते ॥ २४ ॥
उद्दीपनविभावेभ्यः स्मृतिहेतौ पटीयसि ।
अनुबन्धोऽनुभावादेरनुबन्धः स कथ्यते ॥ २५ ॥
विभावस्यानुभावस्य सात्विकव्यभिचारिणोः ।
संयोगे तस्य निष्पत्तिमात्रं निष्पत्तिरिष्यते ॥ २६ ॥

जनित्वेति । अथवा ये जनित्वा उत्पद्य न जायन्ते न चिरं तिष्ठन्तीति भावः ते व्यतिचारिणः । हि यतः स्मृत्यादयः व्यभिचारिणः प्रेमादौ भवन्ति उत्पद्यन्ते तथा न भवन्ति न उत्पद्यन्ते च कदाचित् भवन्ति कदाचित् न भवन्तीत्यर्थः ॥ २२ ॥

रताविति । रतौ सर्वान् स्मृत्यादीन् सञ्चारिणः व्यभिचारिणः किन्तु उद्धताः उत्कटा प्रेयांसः प्रियतमाः ये शान्तोदात्ताः धीरोदत्ताः नायकभेदाः तल्लक्षणमुक्तं दर्पणे । अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः । स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः । इति । तेषु गर्वस्नेहौ धृतिं मतिम् एतान् सञ्चारिणः स्थास्नून् स्थितिशीलान् जानते विदन्ति बुधा इति शेषः ॥ २३ ॥

संस्कारेति । स रसः निजाश्रये स्वाश्रयकाव्ये इत्यर्थः संस्कारो वासना तस्य पाटवादिभ्यः प्रभावादिभ्यो हेतुभ्यः अनुभावं पूर्वोक्तं हावभावादिं वा सञ्चारिणं स्मृत्यादिं वा सात्त्विकं स्तम्भस्वेदादिं वा जनयन् उद्भावयन् जायते उदेति । स इत्यत्र नेति पाठः प्रामादिकः ॥ २४ ॥

उद्दीपनेति । उद्दीपनविभावेभ्यः उद्दीपनविभावास्ते रसमुद्दीपयन्ति ये इत्युक्तलक्षणेभ्यः चन्द्रचन्दनादिभ्यः स्मृतिहेतौ स्मरणकारणे पटीयसि अतिप्रवृद्धे सतीत्यर्थः अनुभावादेः अनुबन्धः अनुगमः जायते इति शेषः । सः अनुबन्धः कथ्यते केन प्रकारेणानुगमो भवतीत्यर्थः तदुच्यते ॥ २५ ॥

विभावस्येति । विभावस्य आलम्बनोद्दीपनरूपस्य अनुभावस्य हावभावादेः सात्त्विकव्यभिचारिणोः प्रागुक्तयोः संयोगे सम्मेलने तस्य रसस्य निष्पत्तिमात्रम् उद्भवमात्रं भवतीति शेषः निष्पत्तिः समुद्रेक इत्यर्थः इष्यते काम्यते ॥ २६ ॥

विषयाश्रयसंस्कारगुणप्रकृतिपाटवैः।
दीपनातिशयैश्चास्य प्रकर्षः पुष्टिरुच्यते ॥ २७ ॥
तुल्यकालबलोत्पत्तिहेतौ भावान्तरोदये।
संसर्गस्तस्य यस्तेन सङ्करः स निगद्यते ॥ २८ ॥
रसान्तरतिरस्कारादन्यद्रागाच्च तस्य यः।
भवत्यपचयो वृद्धे स्तद्ध्रासं तं प्रचक्षते ॥ २९ ॥
हीनपात्रेषु तिर्य्यक्षु नायकप्रतियोगिषु।
गौणेष्वेव पदार्थेषु तमाभासं विजानते ॥ ३० ॥
बलवत्सूपजातेषु प्रतिकूलेषु हेतुषु।
सर्वात्मना समुच्छेदः प्रशमस्तस्य वर्ण्यते ॥ ३१ ॥

विषयेति। विषयाणां प्रतिपाद्यवस्तूनां ये आश्रयाः नायकादयः तेषां संस्कारा वासनाविशेषाः गुणाः धैर्य्यगाम्भीर्य्यादयः प्रकृतयः स्वभावाः तासां पाटवानि प्रभावाः तैः दीपनानाम् उद्दीपनभावानाम् अतिशयैः समुद्रेकैश्च अस्य निष्पन्नमात्रस्य रसस्य प्रकर्षः उत्कर्षः पुष्टिः उच्यते कथ्यते ॥ २७ ॥

तुल्येति। तुल्ये कालबले उत्पत्तिहेतू यस्य तथाभूते भावान्तरस्य अन्यस्य भावस्य उदये उद्रेके तस्य रसस्य यः संसर्गः, तेन संसर्गेण स रसः सङ्करः निगद्यते कथ्यते ॥ २८ ॥

रसान्तरेति। रसान्तरेण अपरेण रसेन तिरस्कारात् व्यवधानात् अन्यरागात् अन्यस्य भावविशेषस्य उद्रेकाच्च तस्य मूलस्य रसस्य यः वृद्धेः उत्कर्षस्य अपचयः हानिः भवति तं तस्य ह्रासं प्रचक्षते प्रवदन्ति ॥ २९ ॥

हीनेति। हीनपात्रेषु नीचनायकादिषु तिर्य्यक्षु पक्षिसर्पादिषु नायकप्रतियोगिषु प्रतिनायकेष्वित्यर्थः तथा गौणेषु अप्रधानेषु पदार्थेषु पात्रेष्वित्यर्थः तं रसम् आभासं निकृष्टमिति भावः विजानते विदन्ति ॥ ३० ॥

बलवदिति। बलवत्सु प्रबलेषु प्रतिकूलेषु विरोधिषु हेतुषु कारणेषु उपजातेषु सम्भवत्सु तस्य रसस्य सर्वात्मना सर्वप्रकारेण समुच्छेदः विरतिः प्रशमः वर्ण्यते कथ्यते ॥ ३१ ॥

आश्रयात् प्रकृते वापि संस्कारस्थैर्य्यतोऽपि वा ।
योऽस्यात्यन्तमविच्छेदः स शेष इति शब्द्यते ॥ ३२ ॥
शृङ्गाराद्या रसा ये च ये च शान्तोद्धतादयः ।
ये च रत्यादिभेदास्तान् विशेषानस्य मन्वते ॥ ३३ ॥
विभावश्चानुभावश्च सञ्चारी चाश्रयश्च यः ।
ये च लीलादयो यूनां परिपोषः स कीर्त्यते ॥ ३४ ॥
आश्रयो यस्य रत्यादिः प्रेमादेरुपजायते ।
विषयो यत्र योषादौ सोऽस्य जन्माधिगच्छति ॥ ३५ ॥
आलम्बनविभावः स ज्ञानकारणमुच्यते ।
तेनादरादिरूपेण संस्कारस्तेन जायते ॥ ३६ ॥

आश्रयादिति । आश्रयात् आलम्बनात् नायिकादेः वापि अथवा प्रकृतेः प्रकरणात् अपि वा किंवा संस्कारस्य प्रागुक्तस्य स्थैर्य्यत स्थायित्वादित्यर्थः अस्य रसस्य यः अत्यन्तं सम्यक् अविच्छेदः अविरतिः स शेष इति शब्द्यते कथ्यते ॥ ३२॥

शृङ्गाराद्या इति । ये च शृङ्गाराद्या रसाः ये च शान्तोद्धतादयः धीरोद्धतादयः, ये च रत्यादीनां भेदाः विशेषाः तान् सर्वान् अस्य शेषस्य प्रागुक्तस्य विशेषान् मन्वते जानन्ति कवय इति शेषः ॥ ३३ ॥

विभाव इति । यः विभावः आलम्बनोद्दीपनरूपश्च अनुभावश्च हावभावादिरूपः सञ्चारी स्मृत्यादिरूपश्च आश्रयः, ये च, यूनां नायिका नायकानां लीलादयः, स परिपोषः कीर्त्यते ॥ ३४ ॥

आश्रय इति । यस्य जनस्य यत्र योषादौ नायिकादौ प्रेमादेः आश्रयः रत्यादिः विषयः प्रतिपाद्यवस्तु उपजायते भवति सः जनः अस्य परिपोषस्य जन्म उत्पत्तिम् अधिगच्छति जानाति ॥ ३५ ॥

आलम्बनेति । सः आलम्बनविभावः ज्ञानस्य बोधस्य रसविषयस्येति भावः कारणं हेतुः उच्यते । तेन तेन आदरादिरूपेण अन्यतः सः संस्कारः समावेशः आश्रयादेः आलम्बनादेः गुणेन प्रभावेण अन्यतः अन्येन प्रकारेण च पटुः उज्ज्वलः अभ्यस्तः पुनः पुनरावृत्तः जायते भवति । तत्प्रबोधाय तस्य संस्कारस्य प्रबोधाय उद्रेकाय माल्यम् ऋतुः वसन्तादिः इन्दूदयः चन्द्रोदयः इत्यादयः ते प्रसिद्धाः

अन्यतः पटुरभ्यस्त आश्रयादे र्गुणेन सः।
तत्प्रबोधाय माल्यर्तुचन्दनेन्दूदयादयः॥ ३७॥
उद्दीपनविभावास्ते स तैः स्मरति वाञ्छति।
हेष्टि प्रयततेऽवैति मन्यते वक्ति चेष्टते॥ ३८॥
तेऽनुभावास्तदा ये स्युः स्वेदरोमोद्गमादयः।
हर्षामर्षादयो ये च ज्ञेयाः सञ्चारिणोऽत्र ते॥ ३९॥
स्मृतीच्छायत्नजन्मानो मनोवाक्कायसंश्रयाः।
विलासा ये वरस्त्रीणां ज्ञेया लीलादयस्तु ते॥ ४०॥
लीला विलासो विच्छित्ति र्विभ्रमः किलकिञ्चितम्।
मोट्टायितं कुट्टमितं विव्वोको ललितं तथा॥ ४१॥
विहृतं क्रीडितं केलिरिति स्त्रीणां स्वभावजाः।
हेलाहावादयश्चान्ये ज्ञेया स्त्रीपुंसयोरपि॥ ४२॥
उपसङ्ग्रानमेतेषामनुभावेषु मन्वते।

उद्दीपनविभावाः प्रभवन्तीति शेषः। सः संस्कारः तदाश्रयो नायकादिर्वा तैः उद्दीपनविभावैः स्मरति स्मृतिमनुभवति वाञ्छति अभिलषति, हेष्टि, प्रयतते, अवैति अवबुध्यते मन्यते वक्ति चेष्टते॥ ३६—३८॥

ते इति। ये स्वेदरोमोद्गमादयः घर्मरोमाञ्चादयः, ते तदा तस्मिन् काले संस्कार-समये अनुभावाः स्युः भवेयुः। ये च हर्षामर्षादयः, ते अत्र रसे सञ्चारिणः व्यभि-चारिणः ज्ञेयाः॥ ३९॥

स्मृतीति। स्मृतिः स्मरणम् इच्छा अभिलाषः यत्नः प्रवृत्तिविशेषः तेभ्यः जन्म उत्पत्तिः येषां तथोक्ताः वरस्त्रीणां नायिकानां मनोवाक्कायसंश्रयाः मानसाः वाचिकाः कायिकाश्च ये विलासा भावविशेषाः ते तु लीलादयः ज्ञेयाः वेदि-तव्याः॥ ४०॥

तानाह लीलेति। लीलादयः द्वादश स्त्रीणां स्वभावजाः नैसर्गिका भवन्तीति शेषः। अन्ये हेलाभावादयः स्त्रीपुंसयोरपि उभयोरेव दम्पत्योः ज्ञेयाः॥४१—४२॥

उपसङ्ग्रानमिति। एतेषां हेलादीनाम् अनुभावेषु प्रसङ्गावानुभूतिभ्रा

पश्चाद्भावानुभूतिभ्यां स्मरणाद्यनुभाववत् ॥ ४३ ॥
स्मृत्यादयोऽनुभावाश्च भावाः सञ्चारिणश्च ये ।
नाट्येऽनुक्रियमाणास्ते नटैरभिनयाः स्मृताः ॥ ४४ ॥
भावो यदा रतिं नाम प्रकर्षमधिगच्छति ।
नाधिगच्छति चाभीष्टं विप्रलम्भस्तदोच्यते ॥ ४५ ॥
पूर्वानुरागो मानश्च प्रवासः करुणश्च सः ।
पुरुषस्त्रीप्रकाण्डेषु चतुःकाण्डः प्रकाश्यते ॥ ४६ ॥
प्रागसंकेतयोर्यूनोरभिलाषः प्रवर्त्तते ।
सङ्कल्परमणीयोऽनुरागः स प्राच्य उच्यते ॥ ४७ ॥
अहेरिव गतिः प्रेम्णः स्वभावकुटिलेति सः ।
अहेतो र्नेति नेत्युक्ते हेतो र्वा मान उच्यते ॥ ४८ ॥

स्मरणाद्यनुभाववत् स्मृत्यादीननुभावानिव उपसङ्ग्रानमुपलक्षणं मन्वते जानन्ति बुधा इति शेषः । यथा स्मृत्यादयः अनुभावाः सञ्चारिणश्च तथा हावादयोऽपि सञ्चारिणः अनुभावाश्च भवन्तीति भावः ॥ ४३ ॥

स्मृत्यादय इति । ये स्मृत्यादयः अनुभावाः सञ्चारिणश्च भावाः ते नाट्ये नटैः कुशीलवैः अनुक्रियमाणाः अभिनयाः स्मृताः उक्ताः ॥ ४४ ॥

भाव इति । यदा रतिर्नाम भावः प्रकर्षम् औत्कट्यम् अधिगच्छति प्राप्नोति अभीष्टम् प्रियम् नाधिगच्छति न प्राप्नोति च तदा स विप्रलम्भः उच्यते कथ्यते ॥ ४५ ॥

पूर्वेति । स विप्रलम्भः पुरुषस्त्रीप्रकाण्डेषु उत्तमनायिकानायकेषु पूर्वानुरागः मानः प्रवासः करुणश्चेति चतुःकाण्डः चतुर्विध इत्यर्थः सन् प्रकाश्यते ॥ ४६ ॥

प्रागिति । प्राक् पूर्वम् असङ्केतयोः सङ्केतरहितयोः यूनोः स्त्रीपुंसयोः सहसा यः अभिलाषः अन्योन्यानुरागः प्रवर्त्तते प्रभवति सङ्कल्पेन वासनाविशेषेण रमणीयः सः अनुरागः प्राच्यः पूर्व इत्यर्थः पूर्वराग इति यावत् उच्यते कथ्यते ॥ ४७ ॥

अहेरिति । प्रेम्णः प्रणयस्य गतिः प्रसरः अहेरिव सर्पस्येव स्वभावेन कुटिला वक्रा इति हेतोः स विप्रलम्भः अहेतोः हेतुं विना न इति न इति एवं न एवं न इति परस्परस्य विसंवादेन उक्तेर्वा हेतोः मानः उच्यते ॥ ४८ ॥

देशान्तरादिभि र्यूनो र्व्यवधानं चिराय यत्।
नवेऽनुरागे प्रौढे वा प्रवासः सोऽभिधीयते ॥ ४९ ॥
लोकान्तरगते यूनि वल्लभे वल्लभा यदा।
भृशं दुःखायते दीना करुणः स तदोच्यते ॥ ५० ॥
रतिरेवेष्टसंप्राप्तौ पुष्टः सम्भोग उच्यते।
सोऽपि पूर्वानुरागादेरानन्त्र्याच्चतुर्विधः ॥ ५१ ॥
न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते।
कषायिते हि वस्त्रादौ भूयान् रागोऽनुषज्यते ॥ ५२ ॥
स्त्रीपुंसयो र्विप्रलम्भे वैचित्र्याकल्पनादयः।
चेष्टाविशेषाः सम्भोगे चुम्बनालिङ्गनादयः ॥५३॥

देशेति। नवे नूतने प्रौढे प्रवृद्धिं गते वा अनुरागे सति देशान्तरादिभिः यूनोर्दम्पत्योः चिराय दीर्घकालमित्यर्थः यद्व्यवधानं विच्छेदः, स. प्रवासः अभिधीयते कथ्यते ॥ ४९ ॥

लोकेति। यूनि तरुणे वल्लभे प्रिये लोकान्तरगते मृते सति वल्लभा कान्ता यदा दीना दुःखिनी सती भृशमतिशयेन दुःखायते दुःखमनुभवति तदा सः करुणः उच्यते। अत्र लोकान्तरगते इत्यत्र पुनः प्राप्य इति वक्तव्यम् अप्राप्ये तु करुण एव रस इति बोध्यम् ॥ ५० ॥

रतिरिति। रतिरनुराग एव इष्टस्य प्रियजनस्य सम्प्राप्तौ सत्यां पुष्टः प्रवृद्धः सम्भोगः उच्यते। सः सम्भोगोऽपि पूर्वानुरागादेः पूर्वरागमानप्रवासकरुणानामित्यर्थः आनन्त्र्यात् अनन्तरभवत्वात् चतुर्विधः पूर्वरागानन्तरसम्भोगः मानानन्तरसम्भोगः प्रवासानन्तरसम्भोगः करुणानन्तरसम्भोगश्चेत्यर्थः ॥ ५१ ॥

नेति। सम्भोगः विप्रलम्भेन विना पुष्टिम् उत्कर्षं न अश्नुते न प्राप्नोति हि यतः वस्त्रादौ कषायिते कषायेण रक्ते सति भूयान् समुज्ज्वल इत्यर्थः रागः वर्णविशेषः अनुषज्यते वर्द्धते इत्यर्थः ॥ ५२ ॥

स्त्रीति। विप्रलम्भे सति स्त्रीपुंसयोः दम्पत्योः वैचित्र्येण विकृतचित्तत्वेन आकल्पनादयः विविधाः सङ्कल्पविशेषा जायन्ते इति शेषः। सम्भोगे सति चुम्बनालिङ्गनादयः चेष्टाविशेषा भवन्ति ॥ ५३ ॥

विप्रलम्भेऽभियोगाद्यैः सम्भोगे साध्वसादिभिः ।
मिथः परीक्षा याः प्रेम्णो निर्दिष्टास्ताः परीष्टयः ॥५४॥
विप्रलम्भादिशब्दानां लोकसिद्धेषु वस्तुषु ।
प्रकृत्यादिविभागेन विनिवेशात् निरुक्तयः ॥ ५५ ॥
संश्रुत्य विप्रलम्भार्थान् गृधिवञ्चोः प्रलम्भने ।
इत्यादिज्ञापकात् ज्ञेयः प्रपूर्वो वञ्चने लभिः ॥ ५६ ॥
अदानञ्च प्रतिश्रुत्य विसंवादनमेव च ।
कालस्य हरणं चाहुः प्रत्यादानञ्च वञ्चनम् ॥ ५७ ॥
पूर्वानुरागपूर्वेषु विप्रलम्भेषु तत्क्रमात् ।
विशेषद्योतकेनेह व्युपसर्गेण सूच्यते ॥ ५८ ॥

विप्रलम्भे इति। विप्रलम्भे अभियोगः दूतीप्रेषणादिव्यापारः आद्यः मुख्यः येषां तथाविधैः चेष्टाविशेषैः तथा सम्भोगे साध्वसादिभिः त्रासादिभिः प्रेम्णः प्रणयस्य याः मिथः परस्परं परीक्षाः परिदर्शनानि ताः परीष्टयः निर्दिष्टाः कथिताः ॥ ५४ ॥

विप्रलम्भेति। विप्रलम्भादिशब्दानां प्रागुक्तानां लोकसिद्धेषु लौकिकेषु वस्तुषु विषयेषु प्रकृत्यादिविभागेन प्रकृत्यादीनां धातूपसर्गादीनां विभागेन विवेकेन विनिवेशात् प्रयोगात् निरुक्तयः अर्था उक्ता इति शेषः ॥ ५५ ॥

संश्रुत्येति। गृधिवञ्चोः गृधिधातोः वञ्चिधातोश्च प्रलम्भने अर्थे इत्यादिज्ञापकात् ज्ञानकारणात् लिङ्गात् विप्रलम्भार्थान् संश्रुत्य श्रवणविषयीकृत्य प्रपूर्वो लभिः लभधातुः वञ्चने अर्थे ज्ञेयः वेदितव्यः ॥ ५६ ॥

अदानञ्चेति। प्रतिश्रुत्य कटाक्षावलोकनादिभिः सम्भोगमङ्गीकृत्येत्यर्थः अदानं तदकरणमित्यर्थः विसंवादनं विरुद्धाचरणं कालस्य हरणं क्षेपणं तथा प्रत्यादानं पुनर्ग्रहणम् एतच्चतुर्विधं भावं विप्रलम्भेषु चतुर्षु क्रमेण आहुरिति निष्कर्षः ॥५७॥

पूर्वेति। पूर्वानुरागपूर्वेषु पूर्वरागप्रभृतिषु विप्रलम्भेषु विशेषद्योतकेन विशिष्टार्थज्ञापकेन व्युपसर्गेण विनामक्रोपसर्गेण इह अस्मिन् प्रकरणे क्रमात् तत् पूर्वोक्तम् अदानादिकं सूच्यते बोध्यते ॥ ५८ ॥

प्रतिश्रवो हि पूर्वानुरागे वक्रेक्षितादिभिः।
लिङ्गनादीनामदानं क्रौभयादिभिः॥ ५९॥
माने निवारणं तेषां विसंवादनमुच्यते।
अयथावत् प्रदानं वा व्यलीकस्मरणादिभिः॥ ६०॥
प्रवासे कालहरणं व्यक्तमेषां प्रतीयते।
प्रोष्यागतेष्विहैतानि कान्ताः कान्तेषु युञ्जते॥ ६१॥
प्रत्यादानं पुनस्तेषां करुणे को न मन्यते।
स्वयं दत्तानि हि विधिस्तानि तत्रापकर्षति॥ ६२॥
प्रलम्भेत्यत्र यदि वा वञ्चनामात्रवाचिनि।
विना समासे चतुराश्चतुरोऽर्थान् प्रयुञ्जते॥ ६३॥

प्रतिश्रव इति। हि यतः पूर्वानुरागे वक्रेक्षितादिभिः कुटिलदर्शनादिभिः अभीष्टालिङ्गनादीनां प्रतिश्रवः अङ्गीकरणं तथा क्रौभयादिभिः लज्जासाध्वसादिभिः अदानं तदकरणम्॥५९॥

माने इति। तेषाम् अभीष्टालिङ्गनादीनां निवारणम् अनाचरणमित्यर्थः व्यलीकस्मरणादिभिः अप्रियकार्यस्मरणादिभिः अयथावत् अनौचित्येनेत्यर्थः प्रदानं वा अभीष्टालिङ्गनादीनामिति भावः विसंवादनम् उच्यते कथ्यते॥ ६०॥

प्रवासे इति। एषां चतुर्णां विप्रलम्भानां मध्ये प्रवासे प्रवासाख्ये विप्रलम्भे कालहरणं व्यक्तं स्पष्टं प्रतीयते बुध्यते। प्रोष्य आगतेषु प्रवासात् प्रतिनिवृत्तेषु कान्तेषु कान्ताः कामिन्यः इह प्रकरणे एतानि आलिङ्गनादीनि वा युञ्जते कुर्वन्ति॥ ६१॥

प्रत्यादानमिति। को जनः करुणे करुणाख्ये विप्रलम्भे तेषाम् अभीष्टालिङ्गनादीनां प्रत्यादानं पुनर्ग्रहणं न मन्यते न जानाति? अपि तु सर्व एव मन्यते इत्यर्थः। हि यतः विधिर्दैवं स्वयम् आत्मना दत्तानि तानि अभीष्टालिङ्गनादीनि तत्र करुणे अपकर्षति हरतीत्यर्थः॥ ६२॥

प्रलम्भेति। यदि वा वञ्चनामात्रवाचिनि केवलवञ्चनार्थप्रतिपादके प्रलम्भ इत्यत्र प्रपूर्वकलम्भधातौ चतुराः कवयः विना व्युपसर्गेण समासे कृते चतुरः अर्थान् पूर्वरागमानप्रवासकरुणानित्यर्थः प्रयुञ्जते व्यवहरन्ति॥ ६३॥

विविधश्च विरुद्धश्च व्याविद्धश्च क्रमेण सः ।
विनिषिद्धश्च पूर्वानुरागादिषु विषज्यते ॥ ६४ ॥
पूर्वानुरागे विविधं वञ्चनं व्रीडितादिभिः ।
माने विरुद्धं तत् प्राहुः पुनरौर्ष्यायितादिभिः ॥ ६५ ॥
व्याविद्धं दीर्घकालत्वात् प्रवासे तत् प्रतीयते ।
विनिषिद्धन्तु करुणे करुणत्वेन गीयते ॥ ६६ ॥
रागोऽनु सह पश्चाद्वानुरूपोऽनुगतोऽपि वा ।
यूनोरपूर्वः पूर्वानुरागशब्देन शब्द्यते ॥ ६७ ॥
राजते रञ्जतेर्वापि रागः करणभावयोः ।
घञान्यकारके भावे नलोपेन नियम्यते ॥ ६८ ॥
मान्यते प्रेयसा येन यं प्रियत्वेन मन्यते ।
मनुते वा मिमीते वा प्रेममानः स कथ्यते ॥ ६९ ॥

विविधश्चेति । स विप्रलम्भः पूर्वानुरागादिषु क्रमेण विविधश्च विरुद्धश्च व्याविद्धश्च विनिषिद्धश्च विषज्यते प्रयुज्यते ॥ ६४ ॥

पूर्वेति । पूर्वानुरागे वञ्चनं विप्रलम्भः व्रीडितादिभिः लज्जाभयादिभिः विविधं बहु प्रकारम् । माने तत् वञ्चनं पुनरौर्ष्यायितादिभिः विरुद्धं प्रतीपतया परिणतं प्राहुः बुधा इति शेषः । प्रवासे तत् वञ्चनं दीर्घकालत्वात् बहुकालवर्त्तित्वात् व्याविद्धं विशेषेण व्याहतत्वेन परिणतं प्रतीयते । करुणे तत् करुणत्वेन नितरां शोकजनकत्वेन विशेषेण निषिद्धं निषिद्धतया परिणतम् ॥ ६५-६६ ॥

राग इति । पूर्वानुरागशब्देन यूनोः दम्पत्योः रागः अनुशब्दयोगेन सह पश्चाद्वा अनुरूपी वा अनुगती वा अतएव अपूर्वः अतीव चमत्कारी सन् शब्द्यते कथ्यते ॥ ६७ ॥

राग इति । राजतेः रञ्जधातोः करणभावयोः करणे वाच्ये भावे वाच्ये चेत्यर्थः रागः रागशब्द इत्यर्थः घञ् घञ्प्रत्ययेन, वापि अथवा रञ्जधातोः अन्यकारके कर्त्तृभिन्ने कारके भावे च घञा नलोपेन नियम्यते साध्यते इत्यर्थः ॥६८॥

मान्यते इति । येन प्रेममानेन हेतुना प्रेयसा प्रियतमेन मान्यते माननीया

महाभाष्यकृतः कोऽसावनुमान इति स्मृतेः।
ल्युडन्तोऽपि न पुंलिङ्गो मानशब्दः प्रदुष्यति ॥ ७० ॥
यत्राङ्गना युवानश्च वसन्ति न वसन्ति च।
स प्रवासः प्रशब्देन प्रतीपार्थेन कथ्यते ॥ ७१ ॥
चिन्तोत्कण्ठादिभिश्चेतो भृशं वासयतीह यः।
प्रवासयति वा यूनः स प्रवासो निरुच्यते ॥ ७२ ॥
प्रपूर्वको वसिर्ज्ञेयः कारितान्तःप्रमापणे।
तूष्णीं प्रवासयेदेनमिति वृद्धानुशासनात् ॥ ७३ ॥
अभूतोत्पादनायां कृञ् दृष्टः कुरु घटं यथा।
दृष्टश्चोच्चारणे चोरङ्कारमाक्रोशतीतिवत् ॥ ७४ ॥

क्रियते इत्यर्थः प्रेयसीति शेषः। यं प्रेममानं प्रियत्वेन प्रीतिविषयत्वेन मन्यते मनुते मिमीते वा जानातीत्यर्थः सः प्रेममानः कथ्यते ॥ ६९ ॥

ननु कथं मिमीते इति। माधातो ल्युटि मानशब्दः पुंलिङ्ग इत्याशङ्क्याह महेति कोऽसावनुमान इति महाभाष्यकृतः स्मृतेः स्मरणात् महाभाष्ये प्रयोगादित्यर्थः ल्युडन्तोऽपि पुलिङ्गो मानशब्दः न प्रदुष्यति। न दोषमावहतीत्यर्थः ॥ ७० ॥

यत्रेति। यत्र राङ्गना कान्ता वसन्ति तिष्ठन्ति, युवानश्च न वसन्ति न तिष्ठन्ति स प्रवासः प्रतीपार्थेन प्रतिकूलार्थेन प्रशब्देन कथ्यते ॥ ७१ ॥

चिन्तेति। इहास्मिन् संसारे यः चिन्तोत्कण्ठादिभिः चेतः चित्तं भृशमतिशयेन वासयति आच्छादयति आकुलयतीत्यर्थः वा यूनः तरुणान् प्रवासयति देशान्तरं नयतीत्यर्थः सः प्रवासः निरुच्यते कथ्यते ॥ ७२ ॥

प्रपूर्वक इति। प्रपूर्वकः वसिः वसधातुः एनं जनं तूष्णीं मौनभावेन स्थितमिति यावत् दुःखेनेति भावः प्रवासयेत् देशान्तरं नयेत् इति वृद्धानां पण्डितानाम् अनुशासनात् कारितं जनितम् अन्तः प्रमापणम् आन्तरो वधः तस्मिन् अर्थे इति शेषः ज्ञेयः बोध्यः ॥ ७३ ॥

अभूतेति। कृञ् धातुरिति शेषः अभूतस्य अजातस्य उत्पादनायां जनने अर्थे दृष्टः यथा घटं कुरु। तथा उच्चारणे अर्थे च दृष्टः चोरङ्कारमाक्रोशतीतिवत् अयं चोर इति शब्दमुच्चार्य रौतीत्यर्थः इति वत् दृष्टः निरूपित इत्यर्थः ॥ ७४ ॥

दृष्टोऽवस्थापनेऽश्मानमितः कुरु यथोच्यते ।
अभ्यञ्जनेऽपि च यथा पादौ मे सर्पिषा कुरु ॥ ७५ ॥
मूर्च्छाविलापौ कुरुते कुरुते साहसे मनः ।
करोति दुःखं चित्तेन योऽसौ करुण उच्यते ॥ ७६ ॥
भुजिः पालनकौटिल्याभ्यवहारानुभूतिषु ।
भुनक्ति भुग्नो भुङ्क्तेऽन्नं भुङ्क्ते सुखमितीष्यते ॥ ७७ ॥
समीचीनार्थः संपूर्वात्ततो घञ्प्रत्यये सति ।
भावे वा कारके वापि रूपं सम्भोग इष्यते ॥ ७८ ॥
स पालनार्थः पूर्वानुरागानन्तर उच्यते ।
उत्पन्ना हि रतिस्तस्मिन्नानुकूल्येन पाल्यते ॥ ७९ ॥
स मानानन्तरं प्राप्तः कौटिल्यार्थं विगाहते ।
स्वतोऽपि कुटिलं प्रेम किमु मानान्वये सति ॥ ८० ॥

दृष्ट इति । अवस्थापने अर्थे दृष्टः क्तच् इति पूर्वेणान्वयः यथा अश्मान शिलाम् इतः अस्मिन् कुरु अवस्थापयेत्यर्थः यथा इति उच्यते कथ्यते । अभ्यञ्जनेऽपि विलेपने अर्थे दृष्ट इति शेषः यथा मे मम पादौ चरणौ सर्पिषा घृतेन कुरु विलेपयेत्यर्थः ॥ ७५ ॥

मूर्च्छेति । यः मूर्च्छाविलापौ कुरुते जनयतीत्यर्थः साहसे सहसा क्रियमाणे विषभक्षणोद्बन्धनादाविति भावः मनः कुरुते, चित्तेन मनसा दुःखं करोति असौ करुणः उच्यते ॥ ७६ ॥

भुजिरिति । भुजिर्भुजधातुः पालनकौटिल्याभ्यवहारानुभूतिषु इष्यते । पालने यथा भुनक्ति पृथिवीं राजेति शेषः । कौटिल्ये यथा भुग्नः कुटिल इत्यर्थः । अभ्यवहारे वा अन्नं भुङ्क्ते । अनुभूतौ यथा सुखं भुङ्क्ते इति ॥ ७७ ॥

समीचीनार्थ इति । समीचीनार्थः संपूर्वात् ततः तस्मात् भुजिधातोः भावे वाच्ये वा कारके वापि वाच्ये घञ्प्रत्यये सति रूपं सम्भोग इष्यते ॥ ७८ ॥

स इति । पूर्वानुरागानन्तरः पूर्वरागात् अनन्तरभावीत्यर्थः स सम्भोगः पालनार्थ उच्यते । हि यतः तस्मिन् सम्भोगे उत्पन्ना रतिः आनुकूल्येन अनुगतत्वेन पाल्यते ॥ ७९ ॥

स इति । स सम्भोगः मानात् अनन्तरं प्राप्त [illegible] टिल्यार्थं वक्रभावं विगाहते

प्रवासानन्तरे तस्याभ्यवहारार्थतेष्यते।
तत्र ह्युपोषितैरन्नमिव निर्विश्यते रतिः॥ ८१॥
करुणानन्तरगतोऽनुभावार्थः स कथ्यते।
विश्रम्भवद्भिरस्मिन् हि सुखमेवानुभूयते॥ ८२॥
यदि वा भोग इत्यस्य संप्रयोगार्थवाचिनः।
समा समासे चतुरश्चतुरोऽर्थान् प्रचक्षते॥ ८३॥
स संक्षिप्तोऽथ सङ्कीर्णः सम्पूर्णः सम्यगृद्धिमान्।
अनन्तरोपदिष्टेषु सम्भोगेषूपपद्यते॥ ८४॥
नवे हि सङ्गमे प्रायो युवानः साध्वसादिभिः।
संक्षिप्तानेव रत्यर्थमुपचारान् प्रयुञ्जते॥ ८५॥

वलम्बते। यतः प्रेम स्वतोऽपि स्वभावादेव कुटिलं वक्रगामि मानान्वयं मानसं
ति किम्? किं वक्तव्यमित्यर्थः॥ ८०॥

प्रवासेति। प्रवासात् अनन्तरं तस्य सम्भोगस्य अभ्यवहारार्थता भोजनार्थता इष्यते। हि यतः तत्र प्रवासादनन्तरदशायाम् उपोषितैः कृतोपवासैः अन्नमिव रतिः निर्विश्यते भुज्यते निर्वेशो भृतिभोगयोरित्यमरः॥ ८१॥

करुणेति। करुणात् अनन्तरः परभावी स सम्भोगः अनुभावार्थः कथ्यते। हि यतः अस्मिन् करुणे विश्रम्भवद्भिः भाविसङ्गमे विश्वसद्भिरित्यर्थः सुखमेव नतु दुःखमित्येवकारार्थः। अनुभूयते अनुभवविषयीक्रियते॥ ८२॥

यदि वेति। सम्प्रयोगार्थवाचिनः सव्यवहारार्थबोधकस्य भोग इत्यस्य समासे प्रक्षेपे चतुरः पूर्वरागादयः समान्तुल्याः, तथापि चतुरः अर्थान् अभिधेयवस्तूनि प्रचक्षते प्रकटयन्तीत्यर्थः॥ ८३॥

स इति। सः संक्षिप्तः संक्षेपेणोक्तः, संकीर्णः अपुष्ट इत्यर्थः, सम्पूर्णः सम्यगुक्तः अथवा सम्यग् ऋद्धिमान् सविस्तर इति यावत् अनन्तरोपदिष्टेषु प्रागुक्तेषु सम्भोगेषु पूर्वरागमानप्रवासकरुणानन्तरभाविष्वित्यर्थः अर्थेषु उपपद्यते युज्यते॥ ८४॥

नवे इति। हि यतः नवे सङ्गमे युवानः कामिनः साध्वसादिभिः भयलज्जादिभिः

मानस्यानन्तरे तेषां व्यलीकस्मरणादिभिः ।
रोषशेषानुसन्धानात् सङ्करः केन वार्य्यते ॥ ८६ ॥
सम्पूर्णः पूर्णकामानां कामिनां प्रोष्य सङ्गमे ।
उत्कण्ठितानां भूयिष्ठमुपभोगः प्रवर्त्तते ॥ ८७ ॥
प्रत्यागतेऽपि यत्रैषा रतिपुष्टिः प्रिये जने ।
सा किमावर्ण्यते यूनां तत्रैव मृतजीविते ॥ ८८ ॥
पूर्वानुरागपूर्वाणां व्युत्पत्तिभिरुदाहृतम् ।
अनन्तराणां सर्वेषां तत्समासे निरुक्तयः ॥ ८९ ॥

हेतुभिः रत्यर्थम् उपचारान् व्यवहारान् सङ्क्षिप्तानेव प्रयुञ्जते कुर्वन्ति अतः तादृशः सम्भोगः संक्षिप्त इति भावः ॥ ८५ ॥

मानस्येति । मानस्य अनन्तरे परभाविनि सम्भोगे तेषां यूनां व्यलीकस्मरणादिभिः अन्योन्याप्रीतिकरानुष्ठानस्मृत्यादिभिर्हेतुभिः रोषशेषस्य कोपावशेषस्य अनुसन्धानात् बोधनात् सङ्करः अपरिपोष इत्यर्थः रतेरिति भावः केन वार्य्यते ? न केनापीत्यर्थः तस्मात्तादृशः सम्भोगः सङ्कीर्ण इति भावः ॥ ८६ ॥

सम्पूर्ण इति । प्रोष्य प्रवासानन्तरमित्यर्थः सङ्गमे उत्कण्ठितानां प्रागिति शेषः कामिना पूर्णकामानां सफलमनोरथानां सतां भूयिष्ठं प्राचुर्य्येणेत्यर्थः उपभोगः सम्पूर्णः प्रवर्त्तते ॥ ८७ ॥

प्रत्यागते इति । यत्र प्रिये जने प्रत्यागते प्रवासानन्तरं प्रतिनिवृत्ते सति एषा सम्पूर्णेति भावः रतिपुष्टिर्दृश्यते इति शेषः । तत्रैव प्रिये जने मृतजीविते सति यूना सा रतिपुष्टिः किम् आवर्ण्यते विस्तरेण कथ्यते ? तस्मात् तादृशः सम्भोगः सम्यक् सङ्क्षिप्तमिति भावः ॥ ८८ ॥

पूर्वेति । पूर्वानुरागपूर्वाणां पूर्वरागमानप्रवासकरुणानां विप्रलम्भभेदानां व्युत्पत्तिभिः प्रकृतिप्रत्ययसाधनाभिः उदाहृतं कथितं भावे क्तप्रत्ययः । अनन्तराणां तत्परवर्त्तिनां सर्वेषां सम्भोगानामिति भावः तत्समासे तेषां समासे पञ्चमीतत्पुरुषे इति भावः निरुक्तयः व्युत्पत्तयः उक्ता इति शेषः ॥ ८९ ॥

वृत्तिरत्राजहत्स्वार्था जहत्स्वार्थापि वर्त्तताम्।
प्रधानमनुपस्कृत्य न तदर्थो निवर्त्तते ॥ ९० ॥
प्रथमानन्तरे वृत्तेरजहत्स्वार्थतेष्यते।
नात्यन्तमजहत्स्वार्थां तां मानानन्तरे विदुः ॥ ९१ ॥
प्रवासानन्तरे त्वीषदजहत्स्वार्थतेष्यते।
करुणार्थस्य गन्धोऽपि नास्त्येव तदनन्तरे ॥ ९२ ॥
अष्टमीचन्द्रकः कुन्दश्चतुर्थी सुवसन्तकः।
आन्दोलनचतुर्थ्येकशाल्मली मदनोत्सवः ॥ ९३ ॥
उदकक्ष्वेड़िकाऽशोकोत्तंसिका चूतभञ्जिका।
पुष्पावचायिका चूतलतिका भूतमातृका ॥ ९४ ॥
कादम्बयुद्धानि नवपत्रिका विसखादिका।
शक्रार्चा कौमुदी यक्षरात्रिरभ्युषखादिका ॥ ९५ ॥
नवेक्षुभक्षिका तोयक्रीड़ाप्रेक्षादिदर्शनम्।
द्यूतानि मधुपानञ्च प्रकीर्णानीति जानते ॥ ९६ ॥

वृत्तिरिति। अत्र एषु अनन्तरेषु सम्भोगेषु अजहत्स्वार्था जहत्स्वार्थापि वृत्तिः लक्षणारूपेत्यर्थः वर्त्ततां तिष्ठतु किन्तु प्रधानं मुख्यार्थमित्यर्थः अनुपस्कृत्य अनुपयुज्य तदर्थः लक्षणार्थः न निवर्त्तते नापगच्छति ॥ ९० ॥

प्रथमेति। प्रथमानन्तरे पूर्वरागात् परवर्त्तिनि सम्भोगे इत्यर्थः वृत्तेर्लक्षणायाः न जहत् स्वार्थः यया तस्याः भावः अजहत्स्वार्थता मुख्यार्थात्यागरूपतेत्यर्थः इष्यते। मानानन्तरे मानात् परभाविनि सम्भोगे तां वृत्तिम् अत्यन्तम् अजहत्-स्वार्थां न विदुः न जानन्ति ॥ ९१ ॥

प्रवासेति। प्रवासानन्तरे प्रवासात् परभाविनि सम्भोगे तु ईषत् अत्यन्तम् अजहत्स्वार्थता ईष्यते। करुणार्थस्य तदनन्तरे तत्परभाविनि सम्भोगे गन्धोऽपि लेशोऽपीत्यर्थः नास्ति एव। अतस्तत्र जहत्-[illegible] भावः ॥ ९२ ॥

नित्यो नैमित्तिकश्चान्यः सामान्योऽन्यो विशेषवान् ।
प्रच्छन्नोऽन्यः प्रकाशोऽन्यः कृत्रिमाकृत्रिमावुभौ ॥९७॥
सहजाहार्य्यनामानौ परौ यौवनजोऽपरः ।
विश्रम्भजश्च प्रेमाणो द्वादशैते महर्द्धयः ॥ ९८ ॥
चक्षुःप्रीति र्मनःसङ्गः सङ्कल्पोत्पत्तिसन्ततिः ।
प्रलापो जागरः कार्श्यमरति र्विषयान्तरे ॥ ९९ ॥
लज्जाविसर्जनं व्याधिरुन्मादो मूर्च्छनं मुहुः ।
मरणञ्चेति विज्ञेयाः क्रमेण प्रेमपुष्टयः ॥ १०० ॥
नायकः प्रतिपूर्वोऽयमुपपूर्वोऽनुनायकः ।
नायिका प्रतिपूर्वाऽसावुपपूर्वानुनायिका ॥ १०१ ॥
नायिकानायकाभासावुभयाभास इत्यपि ।
तिर्य्यक्षु च तदाभासा इति द्वादश नायकाः ॥ १०२ ॥

अष्टमीति । अष्टमीचन्द्रकादीनि मधुपानान्तानि चतुर्विंशतिः प्रकीर्णानि प्रागुक्तेषु शृङ्गारेषु यथायथं योज्यानीति भावः ॥ ९३—९६ ॥

नित्य इति । नित्यादयः विप्रलम्भजान्ता एते द्वादश प्रेमाणः प्रणयाः महर्द्धयः अतिसमृद्धाः ॥ ९७ ॥ ९८ ॥

चक्षुः प्रीतिरिति । चक्षुःप्रीतिः नेत्ररागः इत्यादयः मरणान्ता व्यापाराः क्रमेण प्रेमपुष्टयः प्रणयपरिपोषाः विज्ञेयाः ॥ ९९ ॥ १०० ॥

नायक इति । नायकः प्रतिपूर्वः अयं प्रतिनायक इत्यर्थः उपपूर्वः उपनायक इत्यर्थः अनुनायक इति चत्वारः । नायिका, प्रतिपूर्वा प्रतिनायिका, असौ नायिका उपपूर्वा उपनायिकेत्यर्थः अनुनायिका एताश्चतस्रः ॥ १०१ ॥

नायिकेति । नायिकानायकाभासौ नायिकाभासः नायकाभास उभयाभासः नायिकानायकभास इत्यर्थः तिर्य्यक्षु पक्षिसर्पादिषु च तदाभासा नायिकानायकाभासाः । इत्येव द्वादश नायकाः उक्ता इति शेषः ॥ १०२ ॥

तेषु सर्वगुणोपेतः कथाव्यापी च नायकः।
अन्यायवांस्तदुच्छेद्य उद्धतः प्रतिनायकः॥ १०३॥
ततः कैश्चिद्गुणैर्हीनः पूज्यश्चैवोपनायकः।
समो न्यूनोऽपि वा तस्य कनीयाननुनायकः॥१०४॥
स्यात् कथाव्यापिनी सर्वगुणयुक्ता च नायिका।
हेतुरीर्ष्यायितादीनां सपत्नी प्रतिनायिका॥ १०५॥
ततः कैश्चिद्गुणैर्हीना पूज्या चैवोपनायिका।
समा न्यूनापि वा किञ्चित् कनीयस्यनुनायिका॥१०६॥
तदाभासास्तथैव स्युर्भेदास्तेषां गुणादिभिः।
नायकस्तत्र गुणत उत्तमो मध्यमोऽधमः॥ १०७॥

तेष्विति। तेषु द्वादशसु मध्ये सर्वगुणोपेतः त्यागी कृती कुलीन इत्यादि सर्वगुणवान् कथाव्यापी कथाया आख्यानस्य आद्योपान्तस्थायीत्यर्थः नायकः श्रेष्ठो नेता इत्यर्थः यथा रामः। अन्यायवान् नीतिविमुखः उद्धतः उग्रस्वभावः तदुच्छेद्यः तेन नायकेन उच्छेद्यः विनाश्यः प्रतिनायकः। यथा रावणः॥ १०३॥

तत इति। कैश्चित् गुणैः ततः नायकात् हीनः रहितः पूज्यश्च माननीयश्च उपनायकः यथा सुग्रीवः। समः गुणैरिति भावः न्यूनः किञ्चित् हीनो वा तस्य नायकस्य कनीयान् कनिष्ठः अनुनायकः। यथा लक्ष्मणः॥ १०४॥

स्यादिति। कथाव्यापिनी कथाया आद्योपान्तवर्त्तिनी सर्वगुणयुक्ता नायिका स्यात्। ईर्ष्यायितादीना हेतुः विद्वेषिणीत्यर्थः सपत्नी प्रतिनायिका॥ १०५॥

तत इति। ततः नायिकायाः कैश्चिद् गुणैः हीना रहिता पूज्या च उपनायिका। समा तुल्या किञ्चित् न्यूनापि कनीयसी कनिष्ठा नायिकायाः इति शेषः अनुनायिका॥ १०६॥

तदाभासा इति। तथैव नायकवदेवेत्यर्थः तासां नायिकानां आभासाः स्युः भवेयुः। तेषां आभासानां गुणादिभिः भेदाः विशेषाः ज्ञेया इति शेषः। तत्र नायकभेदेषु नायकः गुणतः गुणैरित्यर्थः उत्तमः मध्यमः अधमः॥ १०७॥

प्राकृतः सात्विकः स स्याद्राजसस्तामसस्तथा ।
साधारणोऽनन्यजानिः स विज्ञेयः परिग्रहात् ॥१०८॥
उद्धतो ललितः शान्तः उदात्तो धैर्य्यवृत्तितः ।
शठो धृष्टोऽनुकूलश्च दक्षिणश्च प्रवृत्तितः ॥ १०९ ॥
गुणतो नायिकापि स्यादुत्तमा मध्यमाधमा ।
मुग्धा मध्या प्रगल्भा च वयसा कौशलेन च ॥ ११० ॥
धीराधीरा च धैर्य्येण स्वान्यदीया परिग्रहात् ।
ऊढानूढोपयमनात् क्रमाज्ज्येष्ठा कनीयसी ॥१११॥
मानर्द्धेरुद्धतोदात्ता शान्ता च ललिता च सा ।
सामान्या च पुनर्भूश्च स्वैरिणी चेति वृत्तितः ॥ ११२ ॥

प्राकृत इति । स नायकः प्राकृतः सात्विकः राजसः तथा तामसः स्यात् । स नायकः परिग्रहात् भार्य्याग्रहणात् साधारणः बहुभार्य्य इति यावत् तथा अनन्यजानिः एकपत्नीक इत्यर्थः विज्ञेयः ॥ १०८ ॥

उद्धत इति । स नायकः धैर्य्यवृत्तितः धीरतायाः व्यवहारभेदेनेत्यर्थः । उद्धतः दुर्द्धर्ष इति यावत् ललितः सौम्यः शान्तः शान्तिमार्गे स्थित इत्यर्थः उदात्तः उदारगुणवानित्यर्थः । प्रवृत्तितः प्रवृत्तेर्भेदेनेत्यर्थः शठः धृष्टः अनुकूलः दक्षिणश्च भवतीत्यर्थः ॥ १०९ ॥

गुणत इति । नायिकापि गुणतः गुणानुसारेण उत्तमा मध्यमा अधमा अपि स्यात् । तथा वयसा कौशलेन नैपुण्येन च मुग्धा मध्या प्रगल्भा च स्यात् ॥११०॥

धीरेति । धैर्य्येण धैर्य्यानुसारेण धीरा अधीरा च । तथा परिग्रहात् परिग्रहभेदेन स्वा स्वीया अन्यदीया परकीया च । उपयमनात् स्वीकरणभेदात् ऊढा कृतोद्वाहा तथा अनूढा अकृतोद्वाहा । तथा क्रमात् ज्येष्ठा कनीयसी कनिष्ठा च ॥ १११ ॥

मानर्द्धेरिति । मानर्द्धेः मानसवृद्धिभेदादित्यर्थः । सा नायिका उद्धता उदात्ता

आजीवतस्तु गणिका रूपाजीवा विलासिनी।
अवस्थातोऽपराश्चाष्टौ विज्ञेयाः खण्डितादयः ॥११३॥
निद्राकूणिततास्राक्षो नारीनखविभूषितः।
प्रातरेति प्रियो यस्याः कुतश्चित् खण्डिता तु सा ॥११४
चाटुकारमपि प्राणनाथं कोपादपास्य या।
पश्चात् तापमवाप्नोति कलहान्तरिता तु सा ॥११५॥
दूतीमहरहः प्रेष्य कृत्वा सङ्केतकं क्वचित्।
यस्य न मिलितः प्रेयान् विप्रलब्धेति तां विदुः ॥११६
सा तु वासकसज्जा स्यात् सज्जिते वासवेश्मनि।
प्रियमास्तीर्णपर्यङ्के भूषिता या प्रतीक्षते ॥ ११७ ॥

ग्लाना ललिता च भवतीति शेषः। इत्थं व्यवहारभेदात् सामान्या साधारणी पुनर्भूः स्वैरिणी च भवतीति शेषः॥ ११२ ॥

आजीवत इति। तु किन्तु सा आजीवतः जीविकाभेदेन रूपाजीवा सौन्दर्य्य-जीविका विलासिनी विलासरता गणिका वेश्या भवति। अवस्थातः अवस्था-भेदेन अपरा अष्टौ खण्डितादयः विज्ञेयाः॥ ११३ ॥

निद्रेति। यस्याः प्रियः कान्तः निद्रया कूणिते सङ्कुचिते ताम्रे रक्ते अक्षिणी नेत्रे यस्य तथाभूतः नार्य्याः अपरायाः कान्तायाः नखेन नखक्षतेन विभूषितः अलङ्कृतः सन् कुतश्चित् कस्मादपि स्थानात् प्रातः एति आगच्छति पार्श्वमिति शेषः सा तु खण्डिता॥ ११४ ॥

चाटुकारमिति। या चाटुकारं प्रियकारिणमपि प्राणनाथं कान्तं कोपात् मानात् अपास्य विहाय पश्चात्तापम् अवाप्नोति लभते सा तु कलहान्तरिता॥११५॥

दूतीमिति। अहरहः प्रतिदिनं पुनः पुनरिति भावः दूतीं प्रेष्य समीपं प्रापय्य क्वचित् प्रदेशे सङ्केतं कृत्वा स्थितायाः यस्याः नायिकायाः प्रेयान् कान्तः न मिलितः न सङ्गतः तां विप्रलब्धेति विदुः जानन्ति॥ ११६ ॥

सेति। या भूषिता अलङ्कृता सती सज्जिते कृतसज्जे आस्तीर्णपर्य्यङ्के वास-

स्वाधीनपतिका सा तु यस्याः पार्श्वं न मुञ्चति ।
प्रियांश्चत्वरतक्रीड़ासुखास्वादनलोलुपः ॥ ११८ ॥
पुष्पेषुपीड़िता कान्तं याति या साभिसारिका ।
प्रियो देशान्तरे यस्याः सा तु प्रोषितभर्त्तृका ॥ ११९ ॥
यस्याः समुचितेऽप्यह्नि प्रवासी नैति वल्लभः ।
विरहोत्कण्ठिता सा तु द्वात्रिंशदिति नायिकाः ॥१२०
हीनपात्राणि शेषाणि पीठमर्दो विदूषकः ।
विटचेटौ पताकाश्च सख्यश्चैषां परिग्रहः ॥ १२१ ॥

वेश्मनि वासभवने प्रियं तदागमनमिति भावः प्रतीक्षते, सा तु वासकसज्जा स्यात् ॥ ११७ ॥

स्वाधीनेति । यस्याः प्रियः चित्रा विविधा मनोज्ञा वा या रतक्रीडा सुरतविहारः तस्याः तस्यां वा यत् सुखं तस्य आस्वादने लोलुपः लुब्धः सन् पार्श्वं न मुञ्चति न त्यजति सा तु स्वाधीनभर्त्तृका स्वाधीनपतिका ॥ ११८ ॥

पुष्पेति । या पुष्पेषुणा कामेन पीडिता सती कान्तं याति सा अभिसारिका। यस्याः प्रियः कान्तः देशान्तरे स्थित इति शेषः सा तु प्रोषितभर्त्तृका ॥११९॥

यस्या इति । यस्याः प्रवासी वल्लभः समुचितेऽपि निर्द्धारितेऽपि अह्नि दिवसे न एति नागच्छति पार्श्वमिति शेषः सा तु विरहोत्कण्ठिता । इति एवं प्रकारेण नायिका १ उत्तमा २ मध्यमा ३ अधमा ४ मुग्धा ५ मध्या ६ प्रगल्भा ७ धीरा ८ अधीरा ९ स्वा १० अन्यदीया ११ ऊढ़ा १२ अनूढा १३ ज्येष्ठा १४ कनीयसी १५ उद्धता १६ उदात्ता १७ शान्ता १८ ललिता १९ सामान्या २० पुनर्भूः २१ स्वैरिणी २२ गणिका २३ रूपाजीवा २४ विलासिनी २५ खण्डिता २६ कलहान्तरिता २७ विप्रलब्धा २८ वासकसज्जा २९ स्वाधीनपतिका ३० अभिसारिका ३१ प्रोषितभर्त्तृका ३२ विरहोत्कण्ठिता इति द्वात्रिंशत् संख्यका ॥ १२० ॥

हीनेति । पीठमर्दः नायकस्य प्रधानसहायविशेषः उक्तञ्च दर्पणे । दूरानुवर्त्तिनि स्यात् तस्य प्रासङ्गिकेतिवृत्ते तु । किञ्चित्तद्गुणहीनः सहाय एवास्य

महाकुलीनतौदार्य्यं महाभाग्यं कृतज्ञता।
रूपयौवनवैदग्ध्यशीलसौभाग्यसम्पदः॥ १२२॥
मानितोदारवाक्यत्वमदरिद्रानुरागिता।
द्वादशेति गुणानाहु र्नायकेष्वाभिगामिकान्॥ १२३॥
मृद्वीकानारिकेलाम्रपाकाद्याः पाकभक्तयः।
नीलीकुसुम्भमञ्जिष्ठारागाद्या रागभक्तयः॥ १२४॥
अन्तर्व्याजबहिर्व्याजनिर्व्याजा व्याजभक्तयः।
धर्मार्थकामोदर्काश्च प्रेमसम्पर्कभक्तयः॥ १२५॥

पीठमर्द्दाख्य इति। विदूषकः नायकनर्ममचिवः उक्तञ्च दर्पणे। कुसुमवसन्ताद्यभिधः कर्मवपुर्वेशभाषाद्यैः। हास्यकरः कलहरतिर्विदूषकः स्यात् स्वकर्मज्ञ इति। विटः नायकस्य शृङ्गारसहायविशेषः उक्तञ्च दर्पणे। सम्भोगहीनसम्पद् विटस्तु धूर्त्तः कलैकदेशज्ञः। वेशोपचारकुशलो वाग्मी मधुरोऽथ बहुमतो गोष्ठ्यामिति। चेटः अधमसहायविशेषः। एतानि शेषाणि हीनपात्राणि निकृष्टाः नटा। पताकाः तत्स्थानानीति भावः उक्तञ्च दर्पणे। पताकास्थानकं योज्यं सुविचार्य्येह वस्तुनि। यत्रार्थे चिन्तितेऽन्यस्मिन् तल्लिङ्गोऽन्यः प्रयुज्यते। आगन्तुकेन भावेन पताकास्थानकन्तु तत् इति। सख्यश्च एषां उक्तानां प्रधानाप्रधानानां नटानां परिग्रहः ग्रहणमित्यर्थः कीर्त्तनमिति यावत्॥ १२१॥

महेति। महाकुलीनता महाकुले प्रसूतिः औदार्य्यं सदा विनयित्वं औदार्य्यं विनयः सदेति वचनात्। महाभाग्यं भाग्यवत्तातिशयः कृतज्ञता कृतोपकारवेदिता, रूप सुन्दराकृतिः यौवनं वैदग्ध्यम् अभिज्ञता शीलं सच्चरित्रं सौभाग्यं लोकप्रियता सम्पदः धनानि मानिता उदारं महत् उच्चाशयमिति यावत् वाक्य यस्य तस्य भावः तथा अदरिद्रानुरागिता अदरिद्रा अक्षुण्णा अनुरागिता लोकरञ्जनत्वम् इत्यर्थः इति द्वादशगुणान् नायकेषु आभिगामिकान् लोकाना अभिगम्यताप्रयोजकानित्यर्थः आहुः कथयन्ति॥ १२२॥ १२३॥

मृद्वीकेति। मृद्वीकाद्याः पाकभक्तयः। नीलीद्यः रागभक्तयः। अन्तर्व्याजादयः व्याजभक्तयः। धर्मादयः प्रेमसम्पर्कभक्तयः॥१२४॥१२५॥

वाक्यवच्च प्रबन्धेषु रसालङ्कारसङ्करान् ।
निवेशयन्त्यनौचित्यपरिहारेण सूरयः ॥ १२६ ॥
चतुर्वृत्त्यङ्गसम्पन्नं चतुरोदात्तनायकम् ।
चतुर्वर्गफलं को न प्रबन्धं बान्धवीयति ॥ १२७ ॥
मुखं प्रतिमुखं गर्भोऽवमर्शश्च मनीषिभिः ।
स्मृता निर्वहणञ्चेति प्रबन्धे पञ्च सन्धयः ॥ १२८ ॥
अविस्तृतमसङ्क्लिष्टं अव्यवृत्तं सुगन्धि च ।
भिन्नसर्गान्तवृत्तञ्च काव्यं लोकोऽभिनन्दति ॥ १२९ ॥

वाक्यवदिति । सूरय विद्वांस कवय इति यावत् प्रबन्धेषु ग्रन्थेषु अनौचित्य परिहारेण यथा अनुचित प्रयोगो न भवति तथेत्यर्थ रसान् अलङ्कारान् तेषां सङ्करान् समावेशांश्च वाक्यवत वाक्यमिव निवेशयन्ति प्रयुञ्जते ॥ १२६ ॥

चतुर्वर्गेति । चतस्र वृत्तय कौशिक्यादयो रचनाविशेषा यत्र तादृशो योऽङ्ग परिच्छेदविशेष तेन सम्पन्न युक्त अलङ्कृत इति भाव तथोक्त चतुर कार्य्यदक्ष उदात्त महान् नायको यस्य तादृश चतुर्वर्ग धर्मार्थकाममोक्षरूप इत्यर्थ फल यस्य तथाविधम् उक्तञ्च दर्पणे । धर्मार्थकाममोक्षेषु वैचक्षण्य कलासु च । करोति कीर्त्तिं प्रीतिञ्च साधुकाव्यनिषेवणमिति प्रबन्ध काव्यग्रन्थ को जन न बान्धवीयति बान्धव मिवाचरति ? अपि तु सर्व एव कविर्बान्धवीयतीत्यर्थ ॥ १२७॥

मुखमिति । मनीषिभि विद्वद्भि प्रबन्धे काव्यसन्दर्भे मुख प्रतिमुखं गर्भ अवमर्श निर्वहणञ्च इति पञ्च सन्धय समावेशविशेषा स्मृता उक्ता । मुखादीनां लक्षणान्यक्तानि दर्पणे । यत्र बीजसमुत्पत्तिनानारससम्भवा । प्रारम्भेण समायुक्ता तन्मुख परिकीर्त्तितम् । फलप्रधानोपायस्य मुखसन्धिनि वेशिन । लक्ष्यालक्ष्य इवोद्भेदो यत्र प्रतिमुखन्तु तत् । फलप्रधानोपायस्य प्रागुद्भिन्नस्य किञ्चन । गर्भो यत्र समुद्भेदो ह्रासान्वेषणवान् मुहु । यत्र मुख्य फलोपाय उद्भिन्नो गर्भतोऽधिक । आपाद्यै सान्तरायश्च स विमर्श इति स्मृत बीजवन्तो मुखाद्यर्था विप्रकीर्णा यथायथम् । एकार्थमुपनीयन्ते यत्र निर्वहण हि तदिति ॥ १२८ ॥

अविस्तृतेति । लोक अविस्तृत तथा विस्ताररहितमित्यर्थ असङ्क्लिष्ट सङ्क्ले

पुरोपवनराष्ट्रादिसमुद्राश्रमवर्णनैः ।
देशसम्पत्प्रबन्धस्य रसोत्कर्षाय कल्पते ॥ १३० ॥
ऋतुरात्रिन्दिवार्केन्दूदयास्तमयवर्णनैः ।
कालः काव्येषु सम्पन्नो रसपुष्टिं नियच्छति ॥ १३१ ॥
राजकन्याकुमारस्त्रीसेनासेनाङ्गभङ्गिभिः ।
पात्राणां वर्णनात् काव्ये रसस्रोतोऽधितिष्ठति ॥१३२॥
उद्यानसलिलक्रीड़ामधुपानरतोत्सवाः ।
विप्रलम्भा विवाहाश्च चेष्टाः काव्ये रसावहाः ॥ १३३ ॥

देश अनुक्तं अव्याणि श्रुतिसुखानि वृत्तानि पद्यानि चरितानि वा यत्र तादृश सुगन्धि रसौरभं सुविख्यातमिति यावत् भिन्न पार्थक्येन निबद्धं सर्गान्तस्य सर्गसमाप्तेः वृत्त पद्य यस्मिन् तथाभूत काव्यम् अभिनन्दति आद्रियते। एतादृशमेव काव्य कर्त्तव्यमिति भावः एवमुत्तरत्र बोध्यम् ॥ २२९ ॥

पुरेति। प्रबन्धस्य काव्यस्य देशसम्पद् प्रदेशसमृद्धिः पुरस्य नगरस्य उपवनस्य राष्ट्रादीनां समुद्रस्य आश्रमस्य च वर्णनैः कीर्त्तनैः रसोत्कर्षाय रसोद्दीपनाय कल्पते प्रभवति ॥ १३० ॥

ऋत्विति। काव्येषु ऋतवो वसन्तादयः रात्रिन्दिवं रात्रिर्दिनञ्च अर्केन्दू सूर्याचन्द्रमसौ: उदयास्तमयौ तेषां वर्णनैः सम्पन्नः समृद्धः कालः समयः रसपुष्टिं रसोत्कर्षं नियच्छति प्राप्नोति ॥ १३१ ॥

राजेति। काव्ये राजा कन्या कुमारः स्त्री सेना सेनाङ्ग हस्त्यश्वरथपदातिरूप हस्त्यश्वरथपादात सेनाङ्ग स्याच्चतुष्टयमित्यमरः। तेषां भङ्गिभिः रचनाभिः अवस्थाभिर्वा पात्राणां नटानां वर्णनात् रसस्रोतः रसप्रवाहः अधितिष्ठति स्थितिं लभते ॥ १३२ ॥

उद्यानेति। काव्ये उद्यानादयः विप्रलम्भाः विच्छेदरूपाः प्रागुक्ताः विवाहाश्च चेष्टाः व्यापाराः रसम् आवहन्तीति रसावहाः रसोत्पादनहेतव इत्यर्थः ॥ १३३ ॥

मन्त्रदूतप्रयाणाजिनायकाभ्युदयादिभिः।
पुष्टिः पुरुषकारस्य रसं काव्येषु वर्षति॥ १३४॥
नावर्णनं नगर्यादेर्दोषाय विदुषां मतम्।
यदि शैलर्तुरात्र्यादेर्वर्णनेनैव पुष्यति॥ १३५॥
गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्।
निराकरणमित्येष मार्गः प्रकृतिसुन्दरः॥ १३६॥
वंशवृत्तश्रुतादीनि वर्णयित्वा रिपोरपि।
तज्जयान्नायकोत्कर्षकथनञ्च धिनोति नः॥ १३७॥
अथैषां लक्षणोदाहरणानि।
मनोऽनुकूलेष्वर्थेषु सुखसंवेदनं रतिः।
असंप्रयोगविषया सैव प्रीतिर्निगद्यते॥ १३८॥

मन्त्रेति। मन्त्रः सन्धिविग्रहादीनां मन्त्रणं दूतस्य सन्देशहरस्य प्रयाणं जेतव्यादीनां सन्निधौ प्रस्थानम् आजिः संग्रामः नायकस्य अभ्युदयः अभ्युन्नतिः एवमादिभिः पुरुषकारस्य पुरुषव्यापारस्य पुष्टिः उत्कर्षः काव्येषु रसं वर्षति विकिरति॥ १३४॥

नावर्णनमिति। यदि शैलानां पर्वतानामृतूनां वसन्तादीनां रात्र्यादेः रात्रिदिनप्रभृतेश्च वर्णनेन कीर्त्तनेनैव पुष्यति पीषं गच्छति तदा नगर्यादेः अवर्णनं दोषाय न भवति इति विदुषां कवीनां मतम् परामर्शः॥ १३५॥

गुणत इति। प्राक् पूर्वं नायकं गुणतः विनयदाक्षिण्यादिभिः गुणैः उपन्यस्य वर्णयित्वा तेन नायकेन विद्विषां शत्रूणां निराकरणं निर्जयः इत्येषः मार्गः पन्थाः प्रकृत्या स्वभावेन सुन्दरः मनोरमः॥ १३६॥

वंशेति। रिपोरपि शत्रोरपि वंशः कुलं वृत्तं चरितं श्रुतादीनि विद्यादीनि इत्यर्थः तानि वर्णयित्वा तस्य रिपोः जयात् पराभवनात् नायकस्य उत्कर्षकथनं नः अस्मान् धिनोति प्रीणयति॥ १३७॥

अथैषामिति। अथ इदानीं एषां प्रागुक्तानां रत्यादीनां लक्षणानि उदाहरणानि च आह कविरिति शेषः एवमुत्तरत्र बोध्यम्।

तद्रूपेण रसस्य भावो यथा,—

हरस्तु किञ्चित्परिलुप्तधैर्य्यश्चन्द्रोदयारम्भ इवाम्बुराशिः।
उमामुखे बिम्बफलाधरोष्ठे व्यापारयामास विलोचनानि॥

अत्र बिम्बोष्ठत्वादिभिर्मनोऽनुकूले पार्वतीमुखे विलोचन-व्यापारानुमितो महेश्वरस्याभिलाषविशेषः सात्विको रत्युत्पादात् सुखानुभवस्योत्पत्तिमात्रमनुमापयति॥ १३९॥

तद्रूपेणैव सात्विकोत्पत्तौ जन्म यथा,—

अभूद्वरः कण्टकितप्रकोष्ठः स्विन्नाङ्गुलिः संवृत्ते कुमारी।
तस्मिन् द्वये तत् क्षणमात्मवृत्तिः समं विभक्तेव मनोभवेन॥

अत्र स्वेदरोमाञ्चमयोः सात्विकयोरुत्पादाद्रसस्य रतिरूपेण आविर्भावोऽवगम्यते॥ १४०॥

रतिं लक्षयति मन इति। मनसः चित्तस्य अनुकूलेषु अभिमतेषु अर्थेषु विषयेषु सुखस्य संवेदनम् अनुभवविशेषः रतिः। सैव रतिः असम्प्रयोगः कार्य्येषु अयोगः विषयः यस्याः तथाभूता प्रीतिः निगद्यते कथ्यते। तथा च रामादीनां सीताविषयिणी रतिः समाजिकानां प्रीतिरिति भावः॥ १३८॥

हर इति। हरस्तु चन्द्रोदयस्य आरम्भे अम्बुराशिरिव समुद्र इव किञ्चित् ईषत् परिलुप्तं विनष्टं धैर्य्यं यस्य तथाभूतः सन् बिम्बफलमिव अधरोष्ठः यस्य तादृशे रक्ताधरोष्ठे इत्यर्थः उमामुखे पार्वतीवदने विलोचनानि नेत्राणि व्यापारयामास निचिक्षेप उमामुखं साभिलाषं सदाचौदिति भावः॥ १३९॥

अभूदिति। वरः जामाता कण्टकितः रोमाञ्चितः प्रकोष्ठः कूर्परादधोवर्त्ती मणिबन्धपर्य्यन्तो हस्तावयवः यस्य तथाभूतः अभूत्। कुमारी कन्या स्विन्नाः स्वेदजलाप्लुता इत्यर्थः अङ्गुलयः यस्याः तादृशी संवृत्ते जाता। तत्क्षणं पाणिग्रहणसमये इत्यर्थः मनोभवेन कामेन आत्मनो वृत्तिः व्यापारः समावेश इति यावत् तस्मिन् द्वये वधूवरयोरित्यर्थः समं तुल्यं यथा तथा विभक्तेव विभज्य दत्तेव। उभयोरपि तुल्यरूपो मदनावेश आसीदिति भावः। रोमाञ्चितस्तु पुरुषः कन्या स्विन्नाङ्गुलिर्भवेदिति कविसमयप्रसिद्धिरत्र ज्ञेया॥१४०॥

जन्मैव सत्वाद्युत्पत्तौ यथा,—

तयोरपाङ्गप्रविचारितानि किञ्चिद्व्यवस्थापितसंहृतानि।
क्रीयन्त्वणामानशिरे मनोज्ञामन्योन्यलीलानि विलोचनानि॥

अत्र क्रीः सञ्चारिभावो जायमानो रसस्य जन्म ज्ञापयति॥ १४१॥

तदेवानुभयोत्पत्तौ जन्म यथा,—

ततः सुनन्दावचनावसाने लज्जां तनूकृत्य नरेन्द्रकन्या।
दृष्ट्या प्रसादामलया कुमारं प्रत्यग्रहीत् संवरणस्रजेव॥

अत्र दृष्टिलक्षणः शरीरारम्भोऽनुभावो भवन् रसाविर्भावं लक्षयति। अनुभावादेरनेकस्यैकस्य वा पुनरुत्पत्तिरनुबन्धः॥ १४२॥

सोऽनेकस्य यथा,—

विहसन्ती शैलसुतापि भावमङ्गैः स्फुरद्बालकदम्बकल्पैः।
साचीकृता चारुतरेण तस्थौ मुखेन पर्य्यस्तविलोचनेन॥

अत्र देव्याः स्मरारौ पूर्वम् उत्पन्ना रतिः साभिलाषतद-

तयोरिति। तयोः वधूवरयोः, अपाङ्गेषु नेत्रप्रान्तदेशेषु प्रविचारितानि प्रकर्षेण प्रसारितानि किञ्चित् अन्योन्यावलोकनचर्यां इति भावः व्यवस्थितानि व्यापारितानि ततः सङ्हृतानि सङ्कोचितानि अन्योन्यलीलानि परस्परावलोकने सतृष्णानीत्यर्थः विलोचनानि नयनानि मनोज्ञां मनोहारिणीं सुखसन्निभामिति भावः क्रीयन्त्वणां लज्जाजनित दुःखमित्यर्थः आनशिरे प्रापुः॥ १४१॥

तत इति। ततः अनन्तरं नरेन्द्रकन्या राजनन्दिनी इन्दुमती सुनन्दायाः वचनानाम् अवसाने समाप्तौ लज्जां तनूकृत्य ह्रासयित्वा संवरणस्रजेव स्वयं वरणमालिकयेव प्रसादेन प्रसन्नतया अमला विशदा तया दृष्ट्या कुमारम् अजं प्रत्यग्रहीत् स्वीचकार॥ १४२॥

विहसन्तीति। शैलसुतापि पार्वती अपि स्फुरन्ति विकसन्ति यानि बालकदम्बानि अभिनवकदम्बपुष्पाणि तेभ्यः ईषदूनानि तैः तत् सदृशैरिति यावत् लीला-

वलोकनेन विविक्तवसन्तादिभिरुद्दीप्यमाना रोमाञ्चावहित्थ-लक्षणाभ्यां सात्विकव्यभिचारिभ्यामनुबध्यते ॥ १४३ ॥

एकस्यैव पुनः पुनरुत्पत्ति र्यथा,—

यान्त्या मुहु र्वलितकन्धरमाननं त-
दावृत्तवृन्तशतपत्रनिभं वहन्त्या।
दिग्धोऽमृतेन च विषेण च पक्ष्मलाक्ष्या
गाढं निखात इव मे हृदये कटाक्षः ॥

अत्र मालत्या माधवविषये पूर्वम् उत्पन्ना रति र्वसन्तावतारतत्सन्निधिविशेषप्रदर्शनादिभिरुद्दीप्यमाना पुनः पुनरुत्पन्नेन वलितग्रीवकटाक्षविक्षेपलक्षणेन शरीरारम्भानुभावेनानुबध्यते। अत्रैव माधवस्य मालतीविषये तदहरेव उत्पन्ना रतिस्तैरेव उद्दीपनैः उद्दीप्यमाना हर्षधृतिस्मृतिमतिव्याध्यादिभिः सञ्चारिभावैः वागारम्भेण चानुभावेनानुबध्यते ॥ १४४ ॥

रतिरूपेणैव रसनिष्पत्ति र्यथा,—

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमर्पयन्ती।

क्षितैरिति भावः अङ्गैः भावं रत्याख्यमिति भावः विवृण्वती प्रकटयन्ती सती चारुतरेण अतिमनोहरेण पर्य्यस्ते तिर्य्यक् प्रसारिते विलोचने नयने यस्य तादृशेन मुखेन असाचि साचि सम्पाद्यमाना कृता साचीकृता वक्रीकृतेत्यर्थः पराहृत-मुखीति भावः तस्थौ स्थिता ॥ १४३ ॥

यान्त्येति। यान्त्या गच्छन्त्या मुहुः पुनः पुनः वलिता चालिता साचीकृतेति भावः कन्धरा ग्रीवा यस्य तथाभूतम् अतएव आवृत्तं परावृत्तं साचीकृतमिति भावः वृन्तं प्रसवबन्धनं नालमिति भावः यस्य तादृशं यत् शतपत्रं पद्मं तन्निभं ततसदृशं मुखं वहन्त्या दधत्या पक्ष्मणि घनलोमपूर्णे अक्षिणी नेत्रे यस्याः तथाभूतया मालत्या अमृतेन च विषेण च दिग्धः खिन्नः कटाक्षः मे मम हृदये गाढं यथा तथा निखात इव निहित इव ॥ १४४ ॥

मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥

अत जन्मान्तरानुभवसंस्कारात् प्रतिकूलेऽपि शूलिनि शैलात्मजायाः सर्वकालमेवाविच्छिन्ना रतिश्चिरं वियुक्तस्य दुश्चरेण अपि तपसा प्रार्थनीयसङ्गमस्य तस्याकस्मिकदर्शनेन उद्दीप्यमाना सद्यः समुपजायमानसात्विकस्वेदस्तम्भवेपथूपलक्षितैः हर्षधृतिस्मृत्यावेगसाध्वसादिभिः व्यभिचारिभिः भावैः पदविक्षेपलक्षणेन च शरीरानुभावेन संसृज्यते। सोऽयं विभावानुभावव्यभिचारिसंयोगैः रतिरूपेण रसो निष्पद्यते ॥ १४५ ॥

रतिरूपेणैव रसपुष्टिः यथा,—

पीनश्रोणि गभीरनाभि निभृतं मध्ये भृशोच्चस्तनम्
पायाद्वः परिरब्धमश्विदुहितुः कान्तेन कान्तं वपुः।
स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्दृशे
यस्मै सोऽच्युतनाभिपद्मवसतिं वेधाः शिवं ध्यायति ॥

अत्र सर्वदैव श्रीवत्सलक्षणो लक्ष्मीविषये महाकुलीनतौदार्यस्थिरानुरागिताऽरूपयौवनवैदग्ध्यशीलसौभाग्यमहाभाग्यादिभिः समुत्पन्ना रतिः तदवयवविशेषकामनीयकविभावनेन उद्दीपनविभावातिशयेन उद्दीप्यमाना ब्रह्मणः समक्षमपि

तमिति। शैलाधिराजतनया पार्वती तं प्रतिकूलवादिनं ब्रह्मचारिणं हररूपमित्यर्थः वीक्ष्य अवलोक्य वेपथुमती कम्पमाना तथा सरसा रसवती अङ्गयष्टिः तनुलता यस्याः तथाभूता सती निक्षेपणाय उद्धृतं पदं चरणं उद्वहन्ती दधाना अतएव मार्गे पथि योऽचलः पर्वतः तस्य व्यतिकरेण सङ्गेन बाधयेति भावः आकुलिता विपर्य्यस्तेत्यर्थः सिन्धुरिव नदीव देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियामित्यमरः। न ययौ न तस्थौ गतिं स्थितिञ्च कामपि कर्त्तुमशक्ता अभूदित्यर्थः ॥१४५

पीनेति। पीनश्रोणि विस्तृतजघन गभीरनाभि निम्ननाभिस्थलं मध्ये मध्यदेशे

आलिङ्गनलक्षणेन शरीरारम्भानुभावेनानुमीयमानां लज्जा-प्रणयलक्षणां प्रेमपुष्टेः अष्टमीमवस्थामध्यास्ते। अत्र चानुक्ता अपि सात्विका व्यभिचारिणोऽन्येऽपि चानुभावविशेषाः प्रतीयन्ते। स्त्रियोऽपि च समग्रात्मगुणसम्पदाश्रये श्रीवत्सलक्ष्मणि तथाभूता तदभ्यधिका वा रतिः प्रवृद्धप्रेमप्रियतमालिङ्गनलक्षणेन उद्दीपनविभावेन उद्दीप्यमाना नयननिमीलनानुमेयां समस्त-सात्विकानुभावव्यभिचारिहेतुं प्रेमपुष्टेरुत्तरामवस्थामाश्रयति। सोऽयं विषयसौन्दर्याद्दाश्रयप्रकृतेः संस्कारपाटवाद्दीपनाति-शयाच्च परां कोटिमावहन् रसः पुष्ट इत्युच्यते। अत्रैव ब्रह्मणः स्त्रियं प्रति मनोहरा समेयं सृष्टिरिति रत्नाकरस्येयमात्मजेति चन्द्रामृतादीनामियं सोदर्येति विष्णोरियं प्रियतमेति कामस्येयं जननी इत्यादिभ्यः आलम्बनेभ्यः समुत्पन्ना प्रीतिः स्वावासानुप-घातिना शरीरसन्निवेशेन दृङ्निमीलनजनितया च तदुपघा-तशङ्कया उद्दीप्यमाना तत्क्षणोपजायमानतया वेगस्मृतिवित-र्कोन्मादमोहचिन्तादिभिः व्यभिचारिभावैः तदनुमेयैश्च स्तम्भ-वेपथुप्रभृतिसात्विकैः शिवानुध्यानलक्षणेन बृहदारम्भानुभावेन संसृज्यमाना परं प्रकर्षमारोहतीति प्रतीयते॥ १४६॥

कटिदेशे इत्यर्थः निभृतं क्षीणमित्यर्थः कृशीकृतमनमित्यर्थः कान्तेन नाथेन विष्णुनेत्यर्थः परिरब्धम् आलिङ्गितं कान्तं रम्यम् अभिदुहितुः समुद-कन्यायाः लक्ष्म्या इत्यर्थः वपुः शरीरं व. युष्मान् पायात् रक्षेत्। कथम्भूतमित्याह स्वावासेति। सः प्रसिद्ध इत्यर्थः अच्युतस्य विष्णोः नाभिरेव पद्मं नाभौ पद्मं वा वसतिः वासभूमिर्यस्य तथाभूतः वेधाः ब्रह्मा स्वस्य आवासः आश्रयः तस्य अनुप-घातेन आलिङ्गनजनितेन व्याघातेनेति भावः निर्हतं स्वस्य मनो यस्य तथाविधः सन् तस्मिन्काले आलिङ्गनसमये इत्यर्थः मीलयौ मुकुलिते इत्यर्थः लज्जयेति भावः दृशौ नयने यस्य तथाभूताय यस्मै वपुषे शिवं मङ्गलं ध्यायति चिन्तयति॥ १४६॥

रतौ भयादिसङ्करो यथा,—

राहोश्चन्द्रकलामिवाननचरीं दैवात् समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।
आतङ्काद्विकलं द्रुतं करुणया विक्षोभितं विस्मयात्
क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्त्तताम् ॥

अत्र माधवस्य मालत्यां पूर्वमुत्पन्ना रतिस्तदवस्थालोकनादिभिः उद्दीपनविभावैः उद्दीप्यमाना भयशोकविस्मयक्रोधहर्षैरपि रसान्तरैः पृथक् पृथग्विभावानुभावव्यभिचारिसंयोगात् निष्पद्यमानैः सङ्कीर्य्यमाणा मनोवाग्बुद्धिशरीरारम्भानुभावैः भयाद्यनुरूपैश्च सात्विकव्यभिचारिभिः सम्पर्के परं प्रकर्षमारोहन्ती प्रतीयते । तत्र चेतसो वैकल्यादिपरिभावनं मन आरम्भो वाक्योच्चारणं वागारम्भः राहोरिव दस्योश्चन्द्राकलामिव प्रेयसीमित्यादिबुद्ध्यारम्भः आच्छिन्दत इत्यादि शरीरारम्भः भयादीनाञ्च पञ्चानामपि यथाक्रमं राहोरिति चन्द्रकलामिवाननचरीमिति दैवात् समासाद्य स इति दस्योः अस्य कृपाणपातविषयादिति आच्छिन्दतः प्रेयसीमित्यालम्बनविभावाः तत्स्वरूपपरिभावनान्युद्दीपनविभावाः, विकलं द्रुतं विक्षोभितं ज्वलितं विकसितं चेत इत्यनुभावाः, आतङ्ककरुणाविस्मयक्रोधमुदनुरूपाश्च कम्पाश्रुस्तम्भवैवर्ण्यरोमाञ्चादयः सात्विकाः,

---

राहोरिति । राहोः स्वर्भानोः आननचरीं मुखाग्रवर्त्तिनीमित्यर्थः चन्द्रकलामिव दैवात् शुभादृष्टात् समासाद्य सम्प्राप्य शशिरेखामिव अस्य दस्योः तस्करस्य कापालिकस्येति शेषः कृपाणपातः असिप्रहार एव विषयः व्यापारः तस्मात् प्रेयसीं प्रियतमां मालतीमिति शेषः आच्छिन्दतः आच्छिद्य प्रत्याहरत इत्यर्थः मे मम चेतः हृदयम् आतङ्कात् त्रासात् विकलं व्याकुलता गतमित्यर्थः प्रत्याहरणात् प्रागिति भावः करुणया अनुकम्पया द्रुतं द्रवीभूतं हा कथ मेतादृशी कमनीय-

मोहविषादामर्षौग्रताधृत्यादयो व्यभिचारिणश्च अनुमीयमाना निष्पत्तिहेतवो भवन्ति। सोऽयं तुल्यकालबलोत्पत्तिकारणानां भयादिनिष्पत्तीनां रतौ संसर्गः सङ्कर इत्युच्यते ॥१४७॥

रतिरूपेण रसप्रकर्षस्य ह्रासो यथा,—

कोपो यत्र भ्रूकुटिरचना निग्रहो यत्र मौनम्
यत्रान्योन्यस्मितमनुनयो दृष्टिपातः प्रसादः।
तस्य प्रेम्णस्तादिदमधुना वैशसं पश्य जातम्
त्वं पादान्ते लुठसि न च मे मन्युमोक्षः खलायाः॥

अत्र योषिति रोषाख्यरसान्तररतिरस्कारात् पुरुषे चानुरागात् रतिप्रकर्षस्य ह्रासोऽवगम्यते ॥१४८॥

रतिरूपेण हीनपात्रेषु रसाभासो यथा,—

विक्किणइ माहमासम्मि पामरो पावरणं वइल्लेण।

कान्तिः कामिनी दुरात्मना ईदृशीं दशां नीयते इति बुद्ध्येति भावः। विस्मयात् विक्षोभितम् आलीडितं दुरात्मना अनेन कथमेषा तादृशादन्तःपुरादस्या रात्रौ समाहृता मया चासादितेति बुद्ध्येति भावः। क्रोधेन ज्वलित उद्दीपित दुरात्मनोऽस्य दुर्व्यवहारादिति भावः मुदा आनन्देन विकसितं विकास गतं प्रत्याहरणादिति भावः कथं कीदृशमित्यर्थः वर्त्तता कीदृशीमवस्थां लभते इति न जाने इति भावः॥ १४७॥

कोप इति। यत्र प्रेम्णि भ्रुकुटिरचना भ्रूभङ्गिकरणं कोपः क्रोधः। यत्र प्रेम्णि मौनं वाक्संयम इत्यर्थः निग्रहः प्रहार इत्यर्थः। यत्र प्रेम्णि अनुनयः सान्त्वनम् अन्योन्यस्मितं परस्परसदुहसितमित्यर्थः दृष्टिपातः अवलोकनं प्रसादः प्रसन्नता। तस्य तथाविधस्येति यावत् प्रेम्णः प्रणयस्य अधुना इदानीं तत् इदं वैशसं वधं विपर्य्यासमिति भावः जातं पश्य अवलोकय त्वं पादान्ते चरणतले इत्यर्थः लुठसि पतित्वा तिष्ठसीति यावत् तथापि खलायाः निष्ठुरायाः तवेदृशीं दशां दृष्ट्वापि निगृह्णत्या इति भावः मम मन्युमोक्षः कोपशान्तिः नच नैवेत्यर्थः। अतिमानिन्या उक्तिरियम्॥ १४८॥

दिट्ठिं स सुम्मुरे सामलीए थणए णिअच्छन्तो ॥ १४९ ॥

तिर्य्यक्तु यथा,—

पाअडिअं सोहग्गं तंवाएउ विसहगोट्ठमज्झम्मि ।

दुट्ठविसहस्स सिङ्गे अच्छिउडं कण्डुअन्तीए ॥ १५० ॥

नायकप्रतियोगिषु यथा,—

पुलअं जणअंति दहकन्धरस्स राहवसरा सरीरम्मि ।

जणअसुआफंसपइग्घा विअ करअला अड्ढिविमुक्का ॥१५१

विक्कीणीते माघमासे पामरः प्रावरणं बलीवर्दैः ।

दृष्टिं स सुर्मुरे श्यामलायाः स्तने नियच्छन् ॥

विक्किणइ इति । सः पामरः मूर्खः कृषीवल इति शेषः बलीवर्देन निमित्तभूतेनेति शेषः माघमासे श्यामलायाः श्यामाख्याः । शीते सुखोष्णसर्वाङ्गी ग्रीष्मे च सुखशीतला नवयौवनसम्पन्ना सा श्यामा परिगीयते इत्युक्तलक्षणाया इति भावः सुर्मुरे तुषाग्निभूते स्तने दृष्टिं नियच्छन् अर्पयन् प्रावरणं गात्रवस्त्रं विक्कीणीते । श्यामायाः कान्तायाः स्तन एष मे शीतनिवारणोपाय इति विचिन्त्य प्रावरणविनिमयेन बलीवर्दं क्रीतवानित्यर्थः ॥ १४९ ॥

प्रकटितं सौभाग्यं ताम्रया वृषभगोष्ठमध्ये ।

दुष्टवृषभस्य शृङ्गे अक्षिपुटं कण्डयन्त्या ॥

पायपडिअ इति । ताम्रया ताम्रवर्णया गवेति शेषः वृषभगोष्ठमध्ये वृषसमूहमध्ये दुष्टवृषभस्य दुष्टस्य दुर्दान्तस्य स्वमनोरथपूरणक्षमस्येति भावः शृङ्गे अक्षिपुटं नेत्रपुटं कण्डयन्त्या कण्डूयितं कुर्वत्या सौभाग्यं प्रियवाल्लभ्यं प्रकटितम् आविष्कृतम् ॥ १५०॥

पुलकं जनयन्ति दशकन्धरस्य राघवशराः शरीरे ।

जनकसुतास्पर्शप्रदग्धा इव करतला अर्द्धविमुक्ताः ॥

पुलअमिति । राघवस्य रामस्य शराः जनकसुतायाः स्पर्शेन स्वकर्तृकेनेति भावः प्रदग्धाः प्रज्वलिताः अर्द्धविमुक्ता अर्द्धावच्छेदेन परित्यक्ताः परपुरुषस्पृष्टा एते परित्याज्या इति बुद्ध्येति भावः करतला इव दशकन्धरस्य रावणस्य शरीरे पुलकं रोमाञ्चं जनयन्ति उत्पादयन्ति ॥ १५१ ॥

गौणेषु यथा,—

उव्वहइ णवतिणंकुररोमञ्चपसाहिआइं अङ्गाइं।
पाउसलच्छीए पओहरेहिं पडिवेल्लिओ विंझो॥
त एते चत्वारोऽपि रसाभासा उच्यन्ते॥ १५२॥

रतावेव लज्जारोषरूपरसान्तरयोः प्रशमो यथा,—

दृष्टे लोचनवन्मनाङ्मुकुलितं पार्श्वस्थिते वक्त्रवन्-
न्यग्भूतं वहिरासितं पुलकवत् स्पर्शं समातन्वति।
नीवीबन्धवदागतं शिथिलतामाभाषमाणे ततो
मानेनापगतं क्रियेव सुदृशः पादस्पृशि प्रेयसि॥

अत्र बलवद्भ्यां प्रियप्रेमानुनयाभ्यां क्रीरोषयोः उपशमः क्रियते॥ १५३॥

रतावेव रोषरूपरसस्य शेषो यथा,—

एष्यत्युत्सुकमागते विवलितं सम्भाषिणि स्फारितम्
संश्लिष्यत्यरुणं गृहीतवमने कोपाञ्चितभ्रूलतम।

उद्वहति नवतृणाङ्कुररोमाञ्चप्रसाधितान्यङ्गानि।
प्रावृड्लक्ष्म्याः पयोधरैः परिवेल्लितो विन्ध्यः॥

उव्वहइ इति। प्रावृट्लक्ष्म्या वर्षाश्रिया पयोधरैः मेघैः स्तनैरितिध्वनिः परिवेल्लितः समालिङ्गितः विन्ध्यः तदाख्यः पर्वतः नवाः अभिनवोद्भिन्नाः। तृणाङ्कुरा एव रोमाञ्चाः तैः प्रसाधितानि अलङ्कृतानि अङ्गानि उद्वहति धत्ते॥ १५२॥

दृष्टे इति। प्रेयसि प्रियतमे दृष्टे सति सुदृशः सुलोचनायाः कान्तायाः मानेन लोचनवत् नयनेनेव मनाक् ईषत् मुकुलितं सङ्कुचितमिति यावत् पार्श्वस्थिते पार्श्ववर्त्तिनि सति वक्त्रवत् वदनेनेव न्यग्भूतं पराङ्मुखमित्यर्थः। स्पर्शं समातन्वति कुर्वति सति पुलकवत् पुलकेनेव वहिरासितं वहिः स्थितम् नतु मनसीति भावः। आभाषमाणे आलपति सति नीवीबन्धवत् वसनग्रन्थिनेव शिथिलतां शैथिल्यम् आगतं प्राप्तम्। पाठोऽयं प्रामादिकः शिथिलता आगतेति विशुद्धः पाठः सतु छन्दोभङ्गदोषान्नाव स्थानमाप्नोतीति चिन्त्यम्। पादस्पृशि चरणनिपतिते सति क्रियेव लज्जयेव मानेन अपगतं निवृत्तम्॥ १५३॥

मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं
चक्षु र्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि ॥

अत्र कस्याश्चिद्बलवता प्रेम्णा उन्मूलितस्यापि मानस्य शेषोऽनुवर्त्तते। त एते भावादयो दशापि रसप्रकारा हासादिष्वपि प्रायशो दृश्यन्ते। ग्रन्थगौरवभयान्न क्वचिदुदाह्रियन्ते ॥ १५४

तत्र, व्यङ्गक्रीडादिभिश्चेतोविकासो हास उच्यते ॥ १५५ ॥

तद्रूपेण रसस्य भावो यथा,—

कनककलससच्छे राधापयोधरमण्डले
नवजलधरश्यामामात्मद्युतिं प्रतिबिम्बिताम्।
असितसिचयप्रान्तभ्रान्त्या मुहुर्मुहुरुत्क्षिपन्
जयति जनितव्रीडाहासः प्रियाहसितो हरिः ॥

एष्यतीति। अहो आश्चर्यं मानिन्याः मानवत्याः कान्तायाः चक्षुः जातागसि कृतापराधे इत्यर्थः प्रेयसि प्रियतमे एष्यति आगमिष्यति सति उत्सुकं तदागमनार्थमुत्कण्ठितमित्यर्थः। आगते उपस्थिते सति विचलित मनाक् मुकुलितमिति यावत् सम्भाषिणि आलपति सति स्फारितं विस्तारितम्। सञ्श्लिष्यति समालिङ्गति सति अरुणं रक्तम्। गृहीतवसने वसनाकर्षिणि इत्यर्थः सति कोपेन अञ्चिते वक्रीकृते इति भावः भ्रुवौ लते इव यस्य तथाभूतम्। चरणयोरानतौ प्रणिपाते व्यतिकरः प्रयासः यस्य तथाविधे सति वाष्पाम्बुना अश्रुवारिणा पूर्णे ईक्षणे दर्शनव्यापारौ यस्य तथाभूतम् अतएव प्रपञ्चे विविधविलासे इति भावः चतुरं सुदक्षं जातम् ॥ १५४ ॥

इदानीं हास लक्षयति तत्रेति। तत्र तेषु स्थायिभावेषु मध्ये व्यङ्गं विकृताङ्गं व्रीडा लज्जा आदिपदेन परिहासादीनां ग्रहणम्। तत्तद्भावविशेषैः चेतसः मनसः विकासः हास उच्यते कथ्यते ॥ १५५ ॥

कनकेति। कनककलस इव स्वर्णकुम्भ इव सच्छं निर्मलं तस्मिन् राधायाः पयोधरमण्डले स्तनमण्डले नवजलधरश्यामां नवमेघश्यामवर्णां प्रतिबिम्बितां प्रतिफलिताम् आत्मनः स्वस्य द्युतिं प्रभाम् असितः कृष्णवर्णः सिचयस्य उत्तरासङ्गस्य प्रान्तः पर्यन्तभागः तस्य भ्रान्त्या भ्रमेण मुहुः मुहुः पुनः पुनः उत्क्षिपन्

अत्र राधया व्यङ्गितस्य हरेस्तु व्रीड़ातो हासस्य सत्तामात्रं प्रतीयते ॥ १५६ ॥

शोकश्चित्तस्य वैधुर्य्यमभीष्टविरहादिभिः ॥ १५७ ॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

हृदयान्नापयातोऽसि दिक्षु सर्वासु दृश्यसे।
वत्स ! राम ! गतोऽसीति सन्तापादनुमीयसे ॥

अत्र दशरथस्य रामवियोगादुत्पन्नस्तद्गुणस्मरणादिभिरुद्दीपितश्चिन्तासन्तापादिर्वागारम्भेण चानुषज्यमानः शोकरूपेण रसो निष्पद्यते ॥ १५८ ॥

प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते ॥ १५९ ॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

मय्येव मत्स्मरणदारुणचित्तवृत्तौ
वृत्तं रहः प्रणयमप्रतिपद्यमाने।
भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या
भग्नं शरासनमिवातिरुषा स्मरस्य ॥

प्रसारयन् अपसारिता कुर्वन्निति यावत् प्रियया राधया हसितः भालोऽयं कं करोतीतिबुद्ध्येति भावः अतएव जनितः उत्पादितः प्रियाहासेनेति भावः व्रीडया हासः यस्य तथाभूतः हरिः कृष्णः जयति सर्वोत्कर्षेण वर्त्तते इत्यर्थः ॥१५६॥

शोकं लक्षयति शोक इति। अभीष्टस्य प्रियजनस्य विरहादिभिः चित्तस्य मनसः वैधुर्य्यं कातर्य्यं शोकः ॥ १५७ ॥

हृदयादिति। हे वत्स राम ! हृदयात् न अपयातः बहिर्गतः न असि न भवसि सर्वासु दिक्षु दृश्यसे अवलोक्यसे। किन्तु सन्तापात् मनसो वैधुर्य्यात् गतः असि इति अनुमीयसे अनुमानविषयीभवसि ॥ १५८ ॥

क्रोधं लक्षयति प्रतिकूलेष्विति। प्रतिकूलेषु विरोधिषु तैक्ष्ण्यस्य तीक्ष्णभावस्य उग्रतायाः प्रबोधः ज्ञानं क्रोधः उच्यते ॥ १५९ ॥

मय्येति। अतिलोहिताक्ष्या कोपात् अतिरक्तचक्षुषा प्रिययेति शेषः अस्य-

अत्र यद्यपि विभावानुभावसञ्चारिसंयोगलक्षणया रस-निष्पत्तेरधिकमतिरुषातिलोहिताक्ष्येति प्रकर्षनिमित्तमति-शब्दोपादानं विद्यते तथाप्युत्तमनायिकाश्रयः प्रियविषये न रोषः प्रकर्षमासादयति ॥ १६० ॥

कार्य्यारम्भेषु संरम्भः स्थेयानुत्साह इष्यते ॥ १६१ ॥

तद्रूपेण रसस्य जन्म यथा,—

मूर्ध्ना जाम्बवतोऽभिवाद्य चरणावापृच्छ्य सेनापती-
नाश्वास्याश्रुमुखान् मुहुः प्रियसखीन् प्रेष्यान् समादिश्य च ।
आरब्धं जगृहे महेन्द्रशिखरादब्धेर्निधेर्लङ्घने
रंहस्वी रघुनाथपादरजसामुच्चैः स्मरन् मारुतिः ॥

अत्र अभिवादनप्रश्नाश्वासनसमादेशनाद्रिशिखरारोहणेष्ट-देवतास्मरणानां पूर्वरङ्गपर्य्यवसायित्वेनानुद्दीपनविभावत्वादनु-त्साहानुभावत्वाच्च नायमनुबन्धो निष्पत्तिः प्रकर्षो वा भवति ॥ १६२ ॥

रणेन स्मरणाभावेन दारुणा निष्ठुरा चित्तवृत्तिः मनोवृत्तिर्यस्य तथाभूते अतएव एवंप्रकारेण मयि वृत्तं जातं रहः प्रणयं विजनप्रेम अप्रतिपद्यमाने अस्वीकुर्वति सति कुटिलयोः भ्रुवोर्भेदात् अतिरुषा अतिकोपेन स्मरस्य कामस्य शरासन कार्मुकं भग्नमिव खण्डितमिव ॥ १६० ॥

उत्साहं लक्षयति कार्य्येति । कार्य्याणाम् आरम्भाः तेषु स्थेयान् स्थिरतरः संरम्भः समुद्योगः उत्साह इष्यते ॥ १६१ ॥

मूर्ध्नेति । रंहस्वी अतिवेगवान् मारुतिः पवनतनयः मूर्ध्ना शिरसा जाम्बवतः चरणौ अभिवाद्य प्रणम्य सेनापतीन् अङ्गदादीन् आपृच्छ्य साधु याम इति सम्भाष्य अश्रुमुखान् बाष्पाविलवदनान् प्रियसखीन् प्रियबन्धून् मुहुः पुनः पुनः आश्वास्य प्रेष्यान् भृत्यान् समादिश्य एवमेवं कुरुतेति आज्ञाप्य रघुनाथस्य रामस्य पादरजसां चरणरेणूनाम् उच्चैः भक्त्यतिशयेनेति भावः स्मरन् महेन्द्रस्य तदाख्यपर्वतस्य शिखरात् अब्धेर्निधेः समुद्रस्य लङ्घने आरब्धं जगृहे समुद्रं लङ्घितुमुपचक्रमे इत्यर्थः ॥ १६२ ॥

भयं चित्तस्य वैक्लव्यं रौद्रादिजनितं विदुः ॥ १६३ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

मन्त्रान् मृत्युजितो जपद्भिरसकृद्ध्यायद्भिरिष्टान् सुरान्
शुष्यत्तालुभिराकुलाकुलपदैर्निर्वाग्भिरुत्कम्पिभिः।
अध्वन्यैरिह जीवितेशमहिषव्याधूम्रधूमाविला
लङ्घ्यन्ते करिमांसघस्मररणत्कौलेयकाः पल्लयः ॥

अत्र यद्यपि पल्लीनामालम्बनत्वं तद्विशेषणयोः उद्दीपनत्वं मन्त्रजपादेरनुभावत्वं तालुशोषादीनां व्यभिचारित्वमिति विभावानुभावव्यभिचारिसंयोगोऽस्ति तथापि मन्त्रजपेष्टदेवतानुध्यानयोर्लङ्घनोपायपरत्वान्न भयरूपेण रसस्य निष्पत्तिः। अध्वन्यानां हि तन्निष्पत्तौ अल्पसत्वतया स्तम्भमोहमूर्च्छामरणादिभिः उपायप्रयोगो न घटते ॥ १६४ ॥

जुगुप्सा गर्हणार्थानां दोषसन्दर्शनादिभिः ॥ १६५ ॥

भयं लक्षयति भयमिति। रौद्रादिजनितं तीक्ष्णतादिभिर्हेतुभिः जनितम् उत्पादितं वैक्लव्यं व्याकुलत्वं चित्तस्येति शेषः भयम् ॥ १६३ ॥

मन्त्रानिति। अध्वनि अध्वना वा गच्छन्तीति अध्वन्याः पथिकाः तैः मृत्युं जयन्तीति मृत्युजितः तान् मृत्युनिवारणसमर्थानित्यर्थः मन्त्रान् संहिताविशेषान् जपद्भिः उच्चारयद्भिः असकृत् पुनः पुनः इष्टान् सुरान् देवान् ध्यायद्भिः स्मरद्भिः शुष्यन्ति तालूनि येषां तथाभूतैः आकुलानि आकुलानि अस्पष्टोच्चरितानीति भावः पदानि सुप्तिङन्तपदानि वाक्यानीत्यर्थः येषां तैः निर्वाग्भिः वाक्यरहितैः उत्कम्पिभिः उच्चैः कम्पमानैः सद्भिः इह अस्मिन् प्रदेशे करिणां हस्तिनां शवरगणहतानामिति भावः मांसानि येषां घस्मराः भक्षणपरा इत्यर्थः कौलेयकाः कुक्कुराः यासु ताः जीवितेशस्य यमस्य महिषः वाहनभूतः तद्वत् व्याधूम्राः मलिना इत्यर्थः ये धूमाः तैः आविलाः कलुषाः पल्लयः लङ्घ्यन्ते अतिक्रम्यन्ते ॥ १६४ ॥

जुगुप्सां लक्षयति। अर्थानां विषयाणां दोषसन्दर्शनादिभिः गर्हणा कुत्सन जुगुप्सा ॥ १६५ ॥

तद्रूपेण रसस्यानुगमो यथा,—

रे हस्त ! दक्षिण ! मृतस्य शिशो र्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य गात्रमसि निर्भरगर्भखिन्न-
सीताप्रवासनपटोः करुणा कुतस्ते ? ॥

अत्र यद्यपि द्विजशिशो र्जीवनाय मुनिरपि शूद्रो वध्य इति न रामस्यात्मकर्मनिन्दा तथापि अन्ययकारिणं जिघांसतो घृणा प्रवर्त्तत इति सीतापरित्यागविषयत्वेनैवात्र जुगुप्सानुगमो ग्रहीतव्यः । शम्बूकविषये पुनरस्याजन्ममात्रमेवेति ॥ १६६ ॥

विस्मयश्चित्तविस्तारः पदार्थातिशयादिभिः ॥ १६७ ॥

तद्रूपेण रसस्य जन्म यथा,—

कृष्णेनाद्य गतेन रन्तुमधुना मृद्भक्षिता स्वेच्छया
सत्यं कृष्ण ! क एवमाह मुसली मिथ्यास्य ! पश्याननम् ।

रे इति । रे दक्षिण ! हस्त ! मृतस्य द्विजस्य ब्राह्मणस्य शिशोः जीवातवे जीवनायेत्यर्थः जीवनौषधाय वा जीवातुर्जीवनौषधमित्यमरः । शूद्रमुनौ शूद्रतापसे कृपाणं खड्गं विसृज प्रहरेत्यर्थः ननु अकस्मात् कथमीदृशं गर्हितं कार्यं कृपावान् अहं करोमीत्याशङ्क्याह । रामस्येति । त्वं दुर्वहेण वोढुमशक्येन गर्भेण खिन्ना आर्त्ता या सीता तस्याः प्रवासने निर्वासने पटुः दक्षः तस्य नितरां गर्हितमाचरत इति भावः रामस्य गात्रम् असि भवसि, ते तव करुणा दया कुतः ? नैव करुणेत्यर्थः ॥१६६॥

विस्मयं लक्षयति । विस्मय इति । पदार्थस्य वस्तुनः अतिशयादिभिः अलौकिकत्वादिभिर्हेतुभिः चित्तस्य विस्तारः विकासविशेष इत्यर्थः विस्मयः ॥ १६७ ॥

कृष्णेनेति । अद्य कृष्णेन रन्तुं क्रीडितुं गतेन अधुना स्वेच्छया निजेच्छया मृत् मृत्तिका भक्षिता इति बलदेवेनोक्ते यशोदा प्राह सत्यमिति रे कृष्ण !

व्यादेहीति विदारिते तु वदने दृष्ट्वा समस्तं जगत्
माता यस्य जगाम विस्मयवशं पायात् स वः केशवः ॥

अत्र शिशो मुखे जगद्दर्शनमालम्बनविभावः। तत्सामग्र्यशैशवाद्यालोकनमुद्दीपनविभावः। विस्मयवशं जगामेत्यनेनानुपात्ता अपि सञ्चारिणोऽनुभावाश्च गृह्यन्ते ॥१६८॥

स्तम्भश्चेष्टाप्रतीघातो भयरागामयादिभिः ॥ १६९ ॥

तद्रूपेण रसस्य पुष्टिर्यथा,—

तो ताणं हदछाअं णिच्चललोअणसिहं पउत्थपदावम्।
आलेक्खपदीवाणं व्व णिअं पअदि चटुलत्तणं पि विअलिअम् ॥

अयञ्च पुष्टोऽपि सात्विकत्वात् सदैवान्यानुयायीति नानुभावादिभिरनुबध्यते ॥ १७० ॥

हर्षाद्भुतभयादिभ्यो रोमाञ्चो रोमविक्रिया ॥ १७१ ॥

तद्रूपेण रसस्य जन्म यथा,—

करिमरिअजालगज्जिदजलदासणिपड़िरवो एसो।

सत्यं ? त्वया सूचितेति शेषः इति यशोदया उक्ते कृष्ण आह क इति कः एवम् आह ब्रवीति मया सूचितेति। तथोक्ते यशोदा आह सुषलीति सुषली बलरामः एव माहेति शेषः। तथोक्ते कृष्ण आह मिथ्येति हे अम्ब ! मातः ! मिथ्या अलीकमेतत् सुषलिवचनमिति शेषः। आनन मुखं मे इति शेषः पश्य अवलोकय। तथोक्ते यशोदा आह व्यादेहीति व्यादेहि विस्तारय मुखमिति शेषः इति उक्ते विदारिते विस्तारिते कृष्णेनेति शेषः वदने यस्य माता यशोदा समस्त जगत् दृष्ट्वा विस्मयवशं जगाम प्राप, स केशवः कृष्णः वः युष्मान् पायात् रक्षतु ॥ १६८ ॥

स्तम्भं लक्षयति। भयं त्रासः रागो हर्षविशेषः आमयो रोगः आदिः येषां तैः हेतुभिः चेष्टायाः शरीरव्यापारस्य प्रतीघातः राहित्यमिति यावत् स्तम्भः ॥१७९॥

तो ताणमिति। चतुर्थपरिच्छेदे ४३२ पत्रे प्राग् व्याख्यातः ॥ १७० ॥

रोमाञ्चं लक्षयति। हर्षेति। हर्षः आनन्दः अद्भुतं चमत्कारः भयं त्रासः तदेवमादिभ्यः हेतुभ्यः रोम्णां विक्रिया विकारविशेषः रोमाञ्चः ॥ १७१ ॥

पइणो धणुरवकङ्खिणि ! रोमञ्चं किं मुहा वहसि ॥

अस्यापि सात्विकत्वादन्यानुबन्धादयो न जायन्ते ॥१७२

मदप्रमदपीड़ादे र्वैस्वर्य्यं गद्गदं विदुः ॥ १७३ ॥

तद्रूपेण रसस्य निष्पत्ति र्यथा,—

पि पि प्रिय ! स स स्वयं मु मु मुखासवं देहि मे

त त त्यज दु दु द्रुतं भ भ भ भाजनं काञ्चनम् ।

इति स्खलितजल्पितं मदवशात् कुरङ्गीदृशः

प्रगे हसितहेतवे सहचरीभिरध्यैयत ॥

किर्मीरितजालगर्जितजलदाशनिप्रतिरव एषः ।

पत्युर्धनूरवकाङ्क्षिणि ! रोमाञ्चं किं मुधा वहसि ॥

करिमेति । किर्मीरित चित्रितं शक्रधनुषेति भावः जालं संहतिर्यस्य तथाभूतः गर्जितः गर्जन्नित्यर्थः वर्त्तमाने क्तप्रत्ययः यो जलदः मेघः तस्य अशनिः तडुल्लितं वज्रमित्यर्थः तस्य प्रतिरवः प्रतिध्वनिः एषः । पत्युः स्वामिनः रामस्येति भावः धनुषः कार्मुकस्य रवं नादं टङ्कारमिति यावत् काङ्क्षति मन्यते इति यावत् तथोक्ता तत्सम्बुद्धौ हे सीते ! इति शेषः मुधा निरर्थकं रोमाञ्चं किं कथं वहसि धारयसि ? नाय तव पत्युर्धनुर्निनादः अपि तु वज्रनिर्घोष एषः तत् पत्युः स्मरणेन सात्त्विकरोमाञ्चधारण तव इत्येति निष्कर्षः । अशोकवनवर्त्तिनीं सीतां प्रति कस्याश्चित् परिचारिण्या निशाचर्य्या उक्तिरियम् ॥ १७२ ॥

गद्गद लक्षयति । मदेति । मदः मद्यपानं प्रमदः हर्षः पीडा व्याधिः आदिर्यस्य तस्मात् कारणात् वैस्वर्य्यं स्वरस्य अन्यथात्वं स्खलनमित्यर्थः गद्गदं विदुः जानन्ति १७३ ॥

पिपीति । हे प्रिय ! नाथ ! स त्वं स्वयं मे मह्य मुखासवं गण्डूषमद्यं देहि, द्रुतं शीघ्रं काञ्चनं भाजनं सौवर्णं पात्रं त्यज इतीत्थं मदवशात् मद्यपानजनितात् विकारादित्यर्थः कुरङ्गीदृशः मृगाक्ष्याः स्खलितजल्पितं स्खलनवत् वचन प्रगे प्रातःकाले सहचरीभिः सङ्गिनीभिः हसितहेतवे हास्याय अध्यैयत अस्मर्यत । अधीक् न स्मरणे इत्यस्य लङि रूपम् । अत्र प्रिय इति वक्तव्ये पिपि प्रियेति स

अयमपि सात्विकत्वात् निष्पन्नो नान्यैरनुबध्यते ॥१७४॥

वपुर्जलोद्गमः स्वेदो रतिघर्मश्रमादिभिः ॥ १७५ ॥

तद्रूपेण रसस्य जन्म यथा,—

हिमव्यपायादिशदाधराणामापाण्डरीभूतमुखच्छवीनाम्।
स्वेदोद्गमः किम्पुरुषाङ्गनानां चक्रे पदं पत्रविशेषकेषु ॥

अत्रापि पूर्ववदन्यानुषङ्गो न भवति ॥ १७६ ॥

रागरोषभयादिभ्यः कम्पो गात्रस्य वेपथुः ॥ १७७ ॥

तद्रूपेण रसस्य जन्म यथा,—

मा गर्वं मुहह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति।

इति वक्तव्ये सस इति सुखासवमिति वक्तव्ये सुसु सुखासवमिति त्यजेति वक्तव्ये त त त्यजेति द्रुतमिति वक्तव्ये दुदु द्रुतमिति भाजनमिति वक्तव्ये भभभ भाजनमिति च स्खलनम् ॥ १७४ ॥

स्वेद लक्षयति। वपुरिति। रतिः सुरत घर्मः निदाघः श्रमः शारीरव्यापारः एवमादिभिः हेतुभिः वपुषः शरीरात् जलोद्गमः क्लेदभिहितो भावो द्रव्यवत् प्रकाशते इति न्यायात् उद्गत जलमित्यर्थः स्वेदः ॥ १७५ ॥

हिमेति। हिमस्य शिशिरस्य व्यपायात् विगमात् विशदः स्वच्छः विकसन्त इत्यर्थः अधरो यासां तथोक्तानाम् आपाण्डरीभूता हिमजनितकालुष्यापगमेन विकासिनीत्यर्थः सुखच्छविर्वदनद्युतिः यासां तथाभूतानां किम्पुरुषाङ्गनानां किन्नरीणां पत्रविशेषकेषु पत्ररचनाविशेषेषु स्वेदोद्गमः घर्मसलिलोदयः पदं स्थानं चक्रे कृतवान् ॥ १७६ ॥

कम्पं लक्षयति रागेति। रागः अनुरागातिशयः रोषः कोपः भयं त्रासः एवमादिभ्यः हेतुभ्यः गात्रस्य शरीरस्य वेपथुः स्पन्दनातिशयः कम्पः ॥ १७७ ॥

मेति। हे सखि! मम कपोलतले गण्डदेशे कान्तस्य प्रियस्य स्वहस्तेन लिखिता मञ्जरी रचनाविशेषः चकास्ति राजते इति हेतोः गर्वम् अहङ्कारं मा उद्वह न कुरु। अन्या अपरा नारीति शेषः अपि ईदृशीनां सौभाग्यव्यञ्जनीनां

अन्यापि किं न सखि ! भाजनमीदृशीनाम् ?
वैरी न चेद्भवति वेपथुरन्तरायः ॥
अयमपि प्राग्वदेव नान्यैरनुगम्यते ॥ १७८ ॥
विषादमदरोषादे र्वर्णान्यत्वं विवर्णता ॥ १७९ ॥

तद्रूपेण रसस्य निष्पत्तिं यथा,—

सहि ! साहस्सं तेण समं अहंपि किं णिग्गआ पहाअम्मि ।
अण्णव्विअ दीसइ जेण दप्पणे कावि सा सुमुही ॥
अयमपि नान्यैरनुबध्यते ॥ १८० ॥
अश्रुनेत्रोद्गतं वारि दुःखशोकप्रहर्षजम् ॥ १८१ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

उत्पक्ष्मणो नयनयोरुपरुद्धवृत्ति
बाष्पं कुरु स्थिरतया शिथिलानुबन्धम् ।

मञ्जरीणामिति भावः किं भाजनं ? पात्रं न ? अपि तु भाजनमेव भवतीति शेषः. चेद् यदि वैरी शत्रुभूतो वेपथुः कम्पः प्रियकरस्पर्शजसत्त्वोदयात् जनित इति भावः अन्तरायः विघ्नः न भवति प्रियकरस्पर्शेन सत्त्वोदयात् मादृशामङ्गकम्पात् ईदृशीनां मञ्जरीणां रचनाव्याघातः तव तु सत्त्वोदविरह इति भावः ॥ १७८ ॥

विवर्णतां लक्षयति । विषादेति । विषादो दुःखं मदः मद्यपान रोषः कोपः. एव मादेर्हेतोः वर्णस्य अन्यत्वम् अन्यथाभावः विवर्णता ॥ १७९ ॥

सखि ! साहस्रं तेन समं मयापि किं निर्गता प्रभाते ? ।
अन्यैव दृश्यते येन दर्पणे कापि सा सुमुखी ॥

सहीति । हे सखि ! साहस्रम् अविमृष्यकारित्वमित्यर्थः अस्माकमिति भावः यतः अहमपि विवेकमती अपीति भावः तेन शठेन कान्तेनेति भावः समं सह किं कथं निर्गता गृहादिति शेषः गृहात् निर्गमनमनुचितमासीदिति भावः । येन हेतुना प्रभाते प्रातःकाले दर्पणे आदर्शे सा सुमुखी अन्यैव कापि दृश्यते । अत्र सुमुख्याः पत्युरपरनारीसङ्गदर्शनात् विषादेन वर्णान्यत्वम् ॥ १८० ॥

अश्रु लक्षयति । अश्रु इति । दुःखशोकप्रहर्षजं शोकजं प्रहर्षजं नेत्रोद्गतं नयनीत्यं वारि जलम् अश्रु ॥१८१ ॥

अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥

अत्र वाष्पशब्देन लोचनाश्रयमश्रु उच्यते, न कण्ठाद्याश्रयो दुःखावेगो यथा। विललाप स वाष्पगद्गदम् इत्यादि ॥१८२॥

मुहुर्लग्नः कण्ठे तरलयति वाष्पः स्तनतटीमित्यादि च।

प्रलयस्तीव्रदुःखादेरिन्द्रियास्तमयो मतः ॥ १८३ ॥

तद्रूपेण रसस्य निष्पत्तिं यथा,

तीव्राभिषङ्गप्रभवेण वृत्तिं मोहेन संस्तम्भयतेन्द्रियाणाम्।
अज्ञातभर्तृव्यसना मुहूर्तं कृतोपकारेव रतिर्बभूव ॥

उत्पक्ष्मणीरिति। उत्पक्ष्मणीः ऊर्ध्वलोमीः नयनश्रीः नेत्रश्रीः उपरुद्धा व्याहता वृत्तिव्यापारः येन तथाभूतं दर्शनव्यापारव्याघातकमित्यर्थः वाष्पम् अश्रुवारि भाविस्वजनवियोगजनितमिति भावः स्थिरतया धैर्येण शिथिलः स्थगित इत्यर्थः अनुबन्धः प्रसरः यस्य तथाभूतं कुरु मा रुदिहीति भावः। खलु यतः ते तव पदानि अलक्षितः वाष्पविरोधात् अदृष्ट इत्यर्थः नतोन्नतः भूमिभागः यस्मिन् तथाभूते अस्मिन् मार्गे पथि विषमीभवन्ति स्खलितानि भवन्तीत्यर्थः ॥ १८२ ॥

विललापेति। सः अजः वाष्पेण कण्ठाश्रयदुःखावेगेन गद्गदम् अस्पष्टोच्चरितम् अर्द्धस्फुटं वा यथा तथा विललाप परिदेवितवान्। विलापः परिदेवनमित्यर्थः ॥

मुहुरिति। मुहुः पुनः पुनः कण्ठे लग्नः कण्ठावरोधीत्यर्थः वाष्पः स्तनतटीं स्तनदेशं तरलयति कम्पयति।

प्रलयं लक्षयति। तीव्रम् अत्यन्तं यत् दुःखं तदादिः हेतुः इन्द्रियाणां हस्तपादादीनामङ्गानाम् अस्तमयः व्यापारशून्यत्वं प्रलयः मोह इति यावत् मतः प्रलयो नष्टचेष्टतेत्यमरः ॥ १८३ ॥

तीव्रेति। रतिः कामपत्नी तीव्रः दारुणः अभिषङ्गः पराभवः भर्तृविनाशरूपः प्रभवत्यस्मादिति प्रभवो हेतुर्यस्य तथाभूतेन अभिषङ्गः पराभव इत्यमरः। इन्द्रियाणां हस्तपादादीनाम् अङ्गानां वृत्तिं व्यापारं क्रियामिति यावत् संस्तम्भयता

अत्र मोहशब्देन मूर्च्छा उच्यते न वक्ष्यमाणलक्षणो मोहः ॥ १८४ ॥

स्मृतिः पूर्वानुभूतार्थविषयं ज्ञानमुच्यते ॥ १८५ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता
स्थिता तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे ।
पुनर्दृष्टिं बाष्पप्रकरकलुषामर्पितवती
मयि क्रूरे यत् तत् सविषमिव शल्यं दहति माम् ॥

अत्र सविशेषा स्मृतिरिच्छया वागारम्भेण चानुबध्यते तिष्ठेत्यादयः पुनरस्या रत्यादिनिष्पत्तिष्वेव द्रष्टव्याः । रत्यादयो हि स्मृतिमूलत्वात् तत्प्रकर्षापकर्षावनुवर्त्तन्ते ॥१८६॥

ऊहो वितर्क इत्युक्तः पदार्थेषु यथामति ॥ १८७ ॥

स्वगयता मोहेन चैतन्यविगमेन मुहूर्त्तम् अल्पकालं न ज्ञातं भर्तुः व्यसनं विपद् विनाश इत्यर्थः यया तथाभूता अतएव कृतः उपकारो यस्याः तादृशीव उपकृतेत्यर्थः बभूव आसीत् ॥ १८४ ॥

स्मृतिं लक्षयति । पूर्वम् अनुभूतः विदितः अर्थः वस्तु विषयो यस्य तथाभूतं ज्ञानं स्मृतिः स्मरणमुच्यते ॥ १८५ ॥

इत इति । प्रत्यादेशात् निराकरणात् प्रत्यादेशो निराकृतिरित्यमरः । इतः मत्सकाशादित्यर्थः स्वजनं बन्धुजनं गुरुशिष्यमिति यावत् अनुगन्तुम् अनुयातुं व्यवसिता उद्यता गुरुसमे पितृतुल्ये गुरुशिष्ये तिष्ठ इति उच्चैः वदति सति स्थिता दण्डायमानेति यावत् सती क्रूरे निष्ठुरे मयि पुनः बाष्पप्रकरेण अश्रुनिचयेन कलुषाम् आविलां दृष्टिं यत् अर्पितवती निहितवती तत् सविषं विषाक्तं शल्यमिव मां दहति ज्वालयति ॥ १८६ ॥

ऊहं लक्षयति । ऊह इति । पदार्थेषु वस्तुषु यथामति यथाज्ञानं वितर्कः आन्दोलनम् ऊह इति उक्तः कथितः ॥ १८७ ॥

तद्रूपेण रसस्य निष्पत्तिं यथा,—

चित्ते निवेश्य परिकल्पितसत्त्वयोगान्
रूपोच्चयेन घटिता मनसा कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

सोऽयमसत्यः सत्यो वा स्मृतिज्ञानचिन्तनादिद्वारेण निश्चयान्तो निष्पन्न इत्युच्यते॥ १८८॥

उत्कण्ठेष्टानवाप्तौ योऽभिलाषः स्यात्तदाप्तये॥ १८९॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
वाष्पस्तम्भितकण्ठवृत्ति वचनं चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः?॥

चित्ते इति। धातुः ब्रह्मणः विभुत्वं सृष्टिसामर्थ्यं तस्याः शकुन्तलायाः वपुः अङ्गञ्च अनुचिन्त्य समालोच्य सा शकुन्तला चित्ते हृदये परिकल्पिताः कल्पनया रचितानि यानि सत्त्वानि सामग्र्याः उपादानवस्तूनीत्यर्थः तेषां योगान् समवायान् निवेश्य निधाय रूपोच्चयेन रूपराशिना घटिता अथवा मनसा केवलेनेति शेषः कृता नु निर्मिता किम्? अतएव मे मम सकाशे इत्यर्थः अपरा विलक्षणेत्यर्थः स्त्रीरत्नसृष्टिः प्रतिभाति॥ १८८॥

उत्कण्ठां लक्षयति। उत्कण्ठेति। इष्टस्य प्रियवस्तुनः अनवाप्तौ अप्राप्तौ तस्य इष्टस्य आप्तये लाभाय यः अभिलाषः सा उत्कण्ठा स्यात्॥ १८९॥

यास्यतीति। अद्य शकुन्तला यास्यति गमिष्यति पतिगृहमिति शेषः इति हेतोः हृदयं चित्तम् उत्कण्ठया उद्वेगेन संस्पृष्टम् आकुलितमित्यर्थः वचनं वाक्यं वाष्पेण दुःखावेगविशेषेण स्तम्भिता निरुद्धा कण्ठस्य वृत्तिर्व्यापारः वर्णोच्चारण-

अत्र विभावानुभावव्यभिचारिसंयोगात् प्रीतिरिवोत्कण्ठापि तदनुषङ्गिणी निष्पन्ना उत्तरार्द्धप्रतिपाद्येन तथाविधेनैव विस्मयादिना अभिभूयमाना ह्रास इति उच्यते। प्रकर्षश्चास्य ममारण्यौकस इत्यनेन निवार्य्यते ॥ १९० ॥

प्रयत्नपूर्विकार्थेषु स्मृतिश्चिन्तेति कथ्यते ॥ १९१ ॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

चिन्तानीअदइअसमागमम्मि किदमसु आइ भरिअण।
सुण्णं कलहाअन्ती सहीहि रुआ ण ओहसिआ ॥

अत्र सखीरोदनेन शून्यकलहः शून्यकलहेन साक्षात्कारः साक्षात्कारेण चिन्ता चिन्तया तु मूलभूता रतिः प्रकृष्यते ॥ १९२ ॥

आत्मप्रकाशनपरा चेष्टा चपलतोच्यते ॥ १९३ ॥

क्रियेति यावत् यस्य तथाभूतं दर्शनं दृष्टिव्यापारः चिन्तया शुभाशुभयोर्भावनयेत्यर्थः जड़ं मन्थरं वाक्यावबोधशून्यमित्यर्थः अरण्यौकसः वनवासिनः तापसस्येति भावः मम स्नेहात् वात्सल्यात् ईदृशम् एवम्प्रकारम् इदं वैक्लव्यं व्याकुलत्वं तावत्। गृहिणः गृहस्थाः नवैः अपूर्वैः तनयाविश्लेषदुःखैः दुहितृवियोगक्लेशैः कथं नु कथमिव पीड्यन्ते अभिभूयन्ते ? अतीव पीड्यन्ते इति भावः ॥ १९० ॥

चिन्तां लक्षयति। प्रयत्नेति। अर्थेषु वस्तुषु प्रयत्नपूर्विका प्रयत्नवतीत्यर्थः स्मृतिः भावनेति यावत् चिन्ता इति कथ्यते ॥ १९१ ॥

चिन्तानीतदयितसमागमे कृतमन्युना भरिता।
शून्यं कलहायन्ती सखीभिः रुदिता न आहसिता ॥

चिन्तेति। चिन्तया आनीतः नीतः दयितेन प्रियेण समागमः यस्याः तथाभूता कृतेन मन्युना कोपेन मानेनेति यावत् भरिता आपूरिता अतएव शून्यं कलहायन्ती कलह कुर्वाणा प्रियेणेति भावः सखीभिः रुदिता हा किमेतदुक्तं प्रियवियोगेन अस्या इति रुदिता क्रन्दिता न आहसिता उन्मत्तेयमिति न उपहसितेत्यर्थः ॥ १९२ ॥

तद्रूपेण रसस्य जन्म यथा,—

कश्चित् कराभ्यामुपगूढनालमालोलपत्राभिहतद्विरेफम्।
रजोभिरन्तःपरिवेषबन्धि लीलारविन्दं भ्रमयाञ्चकार॥
अत्र लीलारविन्दभ्रमणचेष्टया कश्चिदिन्दुमत्यै तिष्ठते॥१९४॥

शास्त्रोक्तार्थानुसन्धानादर्थनिर्धारणं मतिः॥ १९५॥

तद्रूपेण रसस्यानुबन्धो यथा,—

असंशयं क्षत्रपरिग्रहक्षमा यदार्य्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः॥

अत्र पूर्वार्द्धोक्तार्थनिर्धारणरूपा मतिः उत्तरार्द्धेन अनुबध्यते॥ १९६॥

चपलतां लक्षयति। आत्मेति। आत्मनः स्वचित्तस्येति भावः प्रकाशनं तस्मिन् परा चेष्टा व्यापारः क्रियाविशेष इत्यर्थः चपलता उच्यते॥ १९३॥

कश्चिदिति। कश्चित् राजा राजपुत्रो वा कराभ्यां हस्ताभ्यां उपगूढं गृहीतं नालं यस्य तथोक्तम् आलोलैः चपलैः कम्पमानैरित्यर्थः आमज्जवेगादिति भावः पत्रैः दलैः अभिहताः ताडिता द्विरेफा यस्य तथाविधं रजोभिः परागैः अन्तरभ्यन्तरे परिवेषं परिधिं बध्नातीति तथाभूतं लीलारविन्दं विलासपद्मं भ्रमयाञ्चकार घूर्णयामास। यथा इदं पद्मं मया लीलया कराभ्यां भ्राम्यते तथा त्वया अहं लीलया विहरिष्यामीति स्वाभिप्रायप्रकाशनात् चापल्यमिति॥ १९४॥

मतिं लक्षयति। शास्त्रेति। शास्त्रेषु उक्तानां कथितानां अर्थानाम् अनुसन्धानात् अवबोधनात् अर्थस्य वस्तुनः निर्द्धारणं निर्णयः मतिः॥ १९५॥

असंशयमिति। यत् यतः मे मम आर्य्यं साधु पापाशयरहितमिति भावः मनः अस्या शकुन्तलायाम् अभिलाषि समुत्सुकमित्यर्थः तस्मात् इयम् असंशयं निश्चितमित्यर्थः क्षत्रस्य क्षत्रियजातेरित्यर्थः परिग्रहे स्वीकारे क्षमा योग्या अर्थान्तरेण तमेवार्थं द्रढयति सतामिति। सतां साधूनां अन्तःकरणप्रवृत्तयः मनसोऽभिलाषाः सन्देहपदेषु संशयस्थानेषु वस्तुषु विषयेषु प्रमाणं हि निर्णयहेतुरित्यर्थः॥१९६॥

गर्वोऽन्येषामवज्ञानमात्मसम्भावनादिभिः॥ १९७॥

तद्रूपेण रसस्य पुष्टिर्यथा,—

धृतायुधो यावदहं तावदन्यैः किमायुधैः?।
यद्वा न सिद्धमस्त्रेण मम तत् केन सेत्स्यति?॥

अत्र कर्णस्यात्मसम्भावनया अश्वत्थामनि अवज्ञानं प्रकृष्यते॥१९८॥

अहेतुरनिवर्त्या च स्नेहश्चित्तार्द्रता मता॥ १९९॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

अनेन कस्यापि कुलाङ्कुरेण स्पृष्टेषु गात्रेषु सुखं ममैतत्।
कां निर्वृतिं चेतसि तस्य कुर्याद् यस्यायमङ्गात् कृतिनः प्ररूढः॥

अत्र दुष्यन्तस्य सत्त्वदमनदर्शनादुत्पन्नस्तदङ्गस्पर्शसुखादिभिरुद्दीपितः स्पृहामतिवितर्कवागारम्भैः संसृज्यमानः स्नेहो निष्पद्यते॥२००॥

गर्वं लक्षयति। आत्मनः स्वस्य सम्भावनादिभिः गौरवादिभिः अन्येषां जनानाम् अवज्ञानम् अवमाननं गर्वः॥ १९६॥

धृतायुध इति। अहं यावत् धृतं गृहीतं आयुधम् अस्त्रं येन तथाभूतः अस्त्रधारीत्यर्थः तावत् अन्यैः अपरैः आयुधैः लक्षणया आयुधधारिभिरित्यर्थः किम्? न किमपि प्रयोजनमित्यर्थः। मम अस्त्रेण यत् न सिद्धं न निष्पन्नं केन कस्यास्त्रेणेति यावत् तत्कार्यमिति यावत् सेत्स्यति निष्पत्स्यते? न कस्याप्यस्त्रेणेत्यर्थः॥ १९८॥

स्नेह लक्षयति। अहेतुरिति। अहेतुः अज्ञातबाह्यकारणेत्यर्थः अनिवर्त्या अनिवारणीया सतः प्रवर्त्तिनीति भावः चित्तस्य मनसः आर्द्रता द्रवीभावः स्नेहः मता उद्देश्य प्राधान्यात् स्त्रीत्वम्॥ १९९॥

अनेनेति। कस्यापि कुलाङ्कुरेण वंशप्ररोहेण अनेन शिशुनेति शेषः गात्रेषु अङ्गेषु स्पृष्टस्य मम एतत् सुखं भवतीति शेषः यस्य कृतिनः पुण्यवत इत्यर्थः अङ्गात् अयं शिशुः प्ररूढ [illegible] न्नः तस्य चेतसि कां निर्वृतिम् आनन्दं कुर्यात् अङ्गेषु स्पृष्टीऽयमिति शेषः॥ [illegible]॥

अभीष्टार्थस्य सम्प्राप्तौ स्पृहापर्य्याप्तता धृतिः ॥२०१॥

तद्रूपेण रसप्रकर्षो यथा,—

नीतो विक्रमबाहुराक्षसमतां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमहीप्राप्तेरेकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनी लाभाज्जिताः कोशला:
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मिन् करोमि स्पृहाम् ॥

अत्र वत्सराजस्य सर्वात्मना मनोरथसिद्धयो धृतेः प्रकर्षमावहन्ति ॥ २०२ ॥

चेतोनिमीलनं व्रीड़ा न्यङ्गरागस्तवादिभिः ॥ २०३ ॥

तद्रूपेण रसप्रकर्षात्कोपशोकाभ्यां सङ्करो यथा,—

धृतिं लक्षयति । अभीष्टस्य वाञ्छितस्य अर्थस्य विषयस्य सम्प्राप्तौ अधिगमे स्पृहायाः आकाङ्क्षायाः पर्य्याप्तता पूर्णता धृतिः ॥ २०१ ॥

नीत इति । विक्रमबाहुः तदाख्यो नृपतिः आत्मनः स्वस्य समतां तुल्यतां नीतः प्रापितः प्रतिपक्षोऽपि मित्रीकृत इति भावः । उर्वीतले भूतले सारं रत्नभूतेति भावः ससागराया: सन्ध्या: पृथिव्याः प्राप्तेः लाभस्य एकहेतुः अद्वितीयकारणं प्रिया इयं सागरिका सागरमहीभूतत्वात् तदाख्या रत्नावलीत्यर्थः प्राप्ता अधिगता । देवी प्र[illegible] [illegible]सदत्ता भगिन्या: रत्नावल्या लाभात् प्रीतिम् उपागता प्राप्ता च [illegible] कोशलाख्यराज्यानि जिताः वशीकृताः अतः अमात्यवृषभे म[illegible] [illegible] सति विद्यमाने यस्मिन् वस्तुनीति शेषः स्पृहाम् आकाङ्क्षां करोमि [illegible] [illegible]स्ति ? न सिध्यति ? अपि तु सर्वमेव सिध्यतीत्यर्थः ॥ २०२ ॥

व्रीड़ां लक्ष[illegible] [illegible]त । न्यङ्गः क्लीबः रागः प्रेम स्तवः स्तोत्रं गुणकीर्त्तनमित्यर्थः एवमादि[illegible] [illegible]भः चेतसः मनसः निमीलनम् अस्फुरणम् अप्रतिभवमिति यावत् व्री[illegible] [illegible]र्थः ॥ २०३ ॥

अक्षुद्रारिकृताभिमन्युनिधनात् संक्रान्ततीव्रक्रुधः
पार्थस्याकृतशात्रवप्रतिकृते रन्तः शुचा मुह्यतः ।
कीर्णा वाष्पकणैः पतन्ति धनुषि व्रीड़ाजड़ा दृष्टयो
हा वत्स इति गिरः स्फुरन्ति न पुन र्निर्यान्ति कण्ठाद्बहिः ॥

अत्र अर्जुनस्य अन्यायेन अभिमन्युवधादुद्भूतौ दीप्तावेव क्रोधशोकौ उद्भूतविप्रतीकारोत्थया तथाविधयैव व्रीड़या सङ्गीर्य्येते। तथाहि क्रोधशोकयोरनुभावभूता दृष्टयो वाचश्च व्रीड़ाजड़ा इति विशेषणानि सम्बध्यन्ते ॥ २०४ ॥

अवहित्थं तु लज्जादे र्हर्षाद्याकारगोपनम् ॥ २०५ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
लीलाकमलपत्राणि गणयामास पार्वती ॥

अक्षुद्रेति । अक्षुद्रैः महद्भिः अरिभिः शत्रुभिः कर्णादिभिः कृतम् अभिमन्योः अतनयस्य निधनं वधः तस्मात् संक्रान्ता सञ्जाता तीव्रा घोरा क्रुधः यस्य तथोक्तस्य न कृता शात्रवाणां शत्रुसमूहानां प्रतिकृतिः प्रतीकारः निर्यातनमित्यर्थः येन तथाविधस्य अतएव अन्तः मनसि शुचा शोकेन मुह्यतः इतिकर्त्तव्यतामनधिगतस्येत्यर्थः पार्थस्य अर्जुनस्य वाष्पकणैः अश्रुबिन्दुभिः कीर्णाः आपूरिताः व्रीडया लज्जया जडा मन्थराः दृष्टयः धनुषि पतन्ति । हा वत्स ! इति गिरः वाचः स्फुरन्ति कण्ठात् निर्गन्तुं प्रवर्त्तन्ते पुनः किन्तु कण्ठात् बहिः न निर्यान्ति न निर्गच्छन्ति ॥ २०४ ॥

अवहित्थं लक्षयति । अवहित्थमिति । लज्जादेः हेतोः हर्षादीनाम् आकारस्य गोपनम् अवहित्थम् ॥ २०५ ॥

एवमिति । देवर्षौ अङ्गिरसि एवम् इत्थं वादिनि वदति सतीत्यर्थः पितुर्जनकस्य हिमाद्रेः पार्श्वे स्थितेति शेषः पार्वती गौरी अधोमुखी लज्जावशात् अवनत-

अत्र । प्रणम्य शितकण्ठाय विबुधास्तदनन्तरम् ।
चरणौ रञ्जयन्त्वस्याश्चूडामणिमरीचिभिः ॥

इत्यादे र्मुनिवाक्यादुद्भूतप्रहर्षाकारो गुरुसन्निधौ लज्जितया लीलाकमलपत्रगणनेन गौर्य्या गोप्यते ॥ २०६ ॥

सुखदुःखादिजनितो मोहश्चित्तस्य मूढ़ता ॥ २०७ ॥

तद्रूपेण रसस्य निष्पत्ति र्यथा,—

कान्ते तल्पमुपागते विगलिता नीवी स्वयं बन्धनाद्
वासश्च श्लथमेखलागुणधृतं किञ्चिन्नितम्बे स्थितम् ।
एतावत् सखि ! वेद्मि साम्प्रतमहं तस्याङ्गसङ्गे पुनः
कोऽसौ कास्मि ? रतञ्च किं ? कथमिति स्वल्पापि मे न स्मृतिः॥

अत्र स्थायिनी रति र्मोहनिष्पत्त्या प्रकृष्यते ॥ २०८ ॥

सम्मोहानन्दसम्भेदो मदिरादिकृतो मदः ॥ २०९ ॥

वदना सती लीलाकमलपत्राणि क्रीड़ापद्मदलानि गणयामास पद्मपत्रगणनाव्याजेन देवर्षिवाक्यमश्रृणोतीव तस्याविति भावः ॥ २०६ ॥

मूढतां लक्षयति । सुखेति । सुखदुःखादिना जनितः समुद्भूतः चित्तस्य मोहः अप्रतिभत्वमित्यर्थः मूढता ॥ २०७ ॥

कान्ते इति । कान्ते प्रिये तल्पं शय्यां तल्प शय्याट्टदारेष्वित्यमरः । उपागते प्राप्ते सति नीवी परिहितवसनग्रन्थिः बन्धनात् स्वयं विगलिता विश्लथीभावं गतेत्यर्थः । वासः वसन श्लथेन मेखलागुणेन काञ्चीदाम्ना धृतम् अवलम्बितम् सत् नितम्बे किञ्चित् अल्पं यथा तथा स्थितम् । हे सखि ! साम्प्रतम् अधुना अहम् एतावत् एतन्मात्रं वेद्मि जानामि, पुनः किन्तु तस्य कान्तस्य अङ्गसङ्गे आलिङ्गनादाविति भावः असौ कान्तः कः ? अस्मि अहं का ? रतं रसणञ्च किं कथं ? किम्प्रकारञ्चेति स्वल्पापि स्तोकापि स्मृतिः स्मरणं मे मम न अस्तीति शेषः ॥ २०८ ॥

तद्रूपेण रसस्य निष्पत्तिं यथा,—

घूर्णमाननयनं स्खलत्कथं स्वेदविन्दुमदकारणस्मितम् ।
आननेन ननु तावदीश्वरश्चक्षुषा चिरमुमामुखं पपौ ॥

अत्र नयनघूर्णनाकारेण स्मिताद्यः सम्मोहानन्दसम्भेदा उद्भवन्तो मदं निष्पादयन्ति ॥ २१० ॥

मनः प्रसादो हर्षः स्यादिष्टावाप्तिस्तवादिभिः ॥२११॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स ! कति नाम दिनान्यमूनि ? ।
तस्याप्यपत्यमधितिष्ठति वीरधर्मं
दिष्ट्या गतं दशरथस्य कुलं प्रतिष्ठाम् ॥

अत्र दशरथसुहृदः सुमन्त्रसारथेः प्रभुकुलप्रतिष्ठामाशं-

मदं लक्षयति । सम्मोहेति । मदिरादिकृतः मद्यपानादिजनितः सम्मोहानन्दयोः सम्भेदः सम्मेलनं समावेश इत्यर्थः मदः ॥ २०९ ॥

घूर्णमानेति । ईश्वरो हरः घूर्णमाने नयने यस्य यत्र वा तत् स्खलन्ती अस्पष्टं निःसरन्ती कथा वाक्यं यस्मात् तथोक्तं स्वेदविन्दुमत् घर्मसलिलाक्तमित्यर्थः तथा अकारणस्मितम् अहेतुकहासं मद्यपानादिति भावः उमायाः पार्वत्याः मुखम् आननेन मुखेन ननु तावत् चक्षुषा चिरं पपौ तृष्णातिशयेनातिमात्रं ददर्शेत्यर्थः ॥ २१० ॥

हर्षं लक्षयति । मन इति । इष्टस्य प्रियस्य वस्तुनः अवाप्तौ प्राप्तौ स्तवादिना तद्गुणकीर्तनादिनेत्यर्थः मनसः चित्तस्य प्रसादः प्रसन्नता हर्षः ॥ २११ ॥

जातस्येति । हे वत्स ! चन्द्रकेतो ! वत्सस्य इन्द्रजितोऽपि निहन्तुः संहारिणः अपि शब्देन वा कथा अन्येषां वीराणामिति व्यज्यते । ते तव पितुः लक्ष्मणस्य जातस्य उत्पन्नस्य अमूनि दिनानि कति नाम ? तव पिता लक्ष्मणोऽपि प्रियरेवेति

सतस्तत्सुमिन्द्रजितो हन्तारं पश्यतो मनोरथावाप्त्या हर्षो निष्पन्नस्तदपत्येऽपि वीरधर्ममाचरिष्णौ प्रकृष्टो दिष्ट्येत्यव्ययेन सूच्यते ॥ २१२ ॥

क्रोधः कृतापराधेषु स्थिरोऽमर्षत्वमश्नुते ॥ २१३ ॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

लाक्षागृहानलविषान्नसभाप्रवेशैः
प्राणेषु वित्तनिचयेषु च नः प्रहृत्य।
आकृष्टपाण्डववधूपरिधानकेशाः
स्वस्था भवन्ति मयि जीवति धार्त्तराष्ट्राः ? ॥

अत्र भीमसेनस्य धार्त्तराष्ट्रेषु स्वस्था इति नाम्नोऽप्यसहनाल्लाक्षागृहाद्यपकारजन्यामर्षः प्रतीयते ॥ २१४ ॥

भावः तस्यापि शिशोरपि लक्ष्मणस्य अपत्यं पुत्रः भवानिति भावः वीरधर्मं वीराचारम् अधितिष्ठति आश्रयति वीरवद् व्यवहरतीत्यर्थः। दिष्ट्या भाग्येन दशरथस्य कुलं यशः प्रतिष्ठा सुख्यातिं गतं प्राप्तं महावीरप्रसूतिर्दशरथकुलमिति भावः ॥ २१२ ॥

अमर्षं लक्षयति। क्रोध इति। कृतापराधेषु अपराधिषु स्थिरः क्रोधः अमर्षत्वम् अश्नुते प्राप्नोति ॥ २१३ ॥

लाक्षेति। धृतराष्ट्रस्य अपत्यानि धार्त्तराष्ट्राः दुर्योधनादयः लाक्षागृहं अनलः अग्निः अग्निदाहप्रयास इति भावः विषान्नं विषाक्तान्नप्रयोग इत्यर्थः सभाया द्यूतपरिषदीत्यर्थः प्रवेशः प्रवर्त्तनम् अस्माकमिति भावः तैः कारणैः प्राणेषु वित्तनिचयेषु धनसञ्चयेषु च विषयेषु नः अस्मान् प्रहृत्य विलुप्येत्यर्थः ततः आकृष्टाः पाण्डववध्वाः द्रौपद्याः परिधानं वसनं केशाश्च यैः तथाभूताः सन्तः मयि द्रौपदीति इति भावः जीवति सति स्वस्थाः सुखिनः भवन्ति ? नैव भवन्तीत्यर्थः। स्वस्थाः स्वर्गस्था मृता इत्यर्थः भवन्तीति च व्यज्यते ॥ २१४ ॥

असूयाऽन्यगुणर्द्धीनामौद्धत्यादसहिष्णुता ॥ २१५ ॥

तद्रूपेण रसस्य जन्म यथा,—

वन्द्यास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्त्तते
सुन्दस्त्रीनिधनेऽप्यखण्डयशसो लोके महान्तो हि ते ।
यानि त्रीणि कुतोमुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुदमने तत्राऽप्यभिज्ञो जनः ॥

अत्र यद्यपि सोल्लुण्ठदोषकीर्त्तनादिभि र्जुगुप्सा निष्पद्यते तथापि न तया स्वनिष्पत्तिहेतुरसूया सङ्कीर्त्यते ॥२१६॥

ईर्ष्यामाहुः समानेषु मानदानाद्यमर्षणम् ॥ २१७ ॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

असूयां लक्षयति । असूयेति । औद्धत्यात् उत्कटस्वभावत्वात् अन्येषां गुणानां विद्याविनयादीनाम् ऋद्धीनां सम्पत्तीनाम् असहिष्णुता असहनम् असूया ॥२१५॥

वन्द्या इति । ते रामपादा इति भावः । वन्द्याः पूज्याः मान्या इति पाठान्तरम् अतएव न विचारणीयं न आलोचनीयं चरितं येषां तथोक्ताः तिष्ठन्तु वर्त्तन्ताम् । हुम् वर्त्तते तेषां चरितं विचारणीयमिति भावः । हि यतः ते सुन्दस्य स्त्री ताडका तस्या निधनेऽपि स्त्रीवधेऽपीति भावः अखण्डं यशः येषां तथाभूताः सन्तः लोके जगति महान्तः महाप्रभावा इत्यर्थः खरस्य जनस्थानवासिनः राक्षसाधिपस्यति भावः आयोधने युद्धे यानि त्रीणि पदानि कुतः कस्या दिशीति यावत् मुखं येषां तानि पराङ्मुखान्यपीति भावः । आसन् अभूवन् । खरेण सह संग्रामे पदत्रयेण पराङ्मुखतां गतास्ते इति भावः । तथा इन्द्रसूनोः वानराधिपतेः वालिन इत्यर्थः निधने वधे यद्वा कौशलं पाटवम् अलक्षितावस्थानेन शरप्रहार इति भावः तत्रापि जनः लोकः अभिज्ञः विशेषज्ञ इत्यर्थः सोल्लुण्ठनं वचनमिदम् । अत्र लवस्य रामगुणासहनात् असूया ॥ २१६ ॥

ईर्ष्यां लक्षयति । ईर्ष्यामिति । समानेषु अनेषु मानदानादीनाम् अमर्षणम् असहनम् ईर्ष्याम् आहुः कथयन्ति ॥ २१७ ॥

हुं णिल्लज्ज ! समोसरतं विअ अणुणेसु जाइ दे एअम् ।
पाअङ्गुट्ठालत्तएण तिलअं विणिम्मिअम् ॥

अत्र कस्याचित् प्रेयसि सपत्नीं प्रसादयितुं गते तन्मानमरुचमाणायाः समुत्पन्नेर्ष्या प्रियानुनयादिभि र्भूशायमानतया निष्पन्नालक्तकतिलकानुमेयैः तत्पादपतनादिभिः उद्दीप्ताहङ्काराक्षेपभर्त्सनप्रतिभेदाविनाभूतैर्भ्रूभङ्गताडनाङ्गक्षेपवेपथुस्वेदगद्गदादिभिः संसृज्यमाना प्रकाश्यते ॥ २१८ ॥

विषादश्चेतसो ग्लानिरुपायाभावनाशयोः ॥ २१९ ॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

व्यर्थं यत्र कपीन्द्रसख्यमपि मे वीर्यं हरीणां वृथा
प्रज्ञा जाम्बवतोऽपि यत्र न गतिः पुत्रस्य वायोरपि ।
मार्गं यत्र न विश्वकर्मतनयः कर्त्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषयस्तत्र प्रिया क्वासि मे ? ॥

हुं निर्लज्ज ! समपसर तामेवानुनयस्व यया ते इदम् ।
पादाङ्गुष्ठालक्तकेन तिलकं विनिर्मितम् ॥

हुमिति आक्षेपसूचकमव्ययम् । निर्लज्ज ! गतत्रप ! समपसर मत्सकाशात् गच्छ । तामेव कान्तां अनुनयस्व । कामित्याह ययेति । यया कान्तया पादाङ्गुष्ठालक्तकेन चरणाङ्गुष्ठलाक्षारागेण ते तव इदं तिलकं विनिर्मितं रचितं यस्याः चरणे पतित्वा अनुनीतवानसीति भावः । खण्डिताया नायिकायाः उक्तिः ॥२१८ ॥

विषादं लक्षयति । विषाद इति । उपायस्य अभावनाशयोः सतोः चेतसः चित्तस्य ग्लानिः अप्रसाद इत्यर्थः विषादः ॥ २१९ ॥

व्यर्थमिति । हे मे मम प्रिये जानकि ! यत्र मे मम कपीन्द्रेण वानरराजेन सुग्रीवेणेत्यर्थः सख्यं मित्रत्वम् अपि व्यर्थं निष्फलं सख्या वानरराजेनापि यत्र न अधिगम्यते इति भावः । यत्र हरीणां वानराणां वीर्यं बलं वृथा निष्फलम् अकिञ्चित्

अत्र सीतासमागमविषये रामस्य दृष्टावदानसुग्रीवसख्यादेः उपायस्य अभावात् विषादः प्रकृष्यते ॥ २२० ॥

सत्वत्यागादनुत्कर्षो वाक्यादे र्दैन्यमुच्यते ॥ २२१ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्म
स्वव्यस्याः कथमप्यबान्धवकृतां भावप्रवृत्तिञ्च त
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतःपरं न खलु तद्वाच्यं बधूबन्धुभिः ॥

करत्वादिति भावः। यत्र जाम्बवतोऽपि ऋक्षराजस्यापि प्रज्ञा बुद्धिः मन्त्रणाविषयिणीति भावः न प्रसरतीति शेषः यत्र वायोः पुत्रस्यापि पवनतनयस्यापि हनुमत इत्यर्थः गतिर्गमनं न सम्भवतीति शेषः यत्र विश्वकर्मणः तनयः पुत्रः नलोऽपि मार्गं पन्थानं कर्तुं न क्षमः न शक्तः सौमित्रेर्लक्ष्मणस्यापि पत्रिणां शराणाम् अविषये अगोचरे तत्र क्व कुत्र स्थाने असि? वर्त्तसे? कृतसीतापरित्यागस्य रामस्य उक्तिः ॥ २२० ॥

दैन्यं लक्षयति। सत्त्वेति। सत्त्वस्य प्रभावस्य त्यागात् वाक्यादेः अनुत्कर्षः उत्कर्षाभावः लाघवप्रयोजक इति भावः दैन्यम् उच्यते कथ्यते ॥ २२१ ॥

अस्मानिति। अस्मान् वनस्थानिति भावः संयमः बाह्याभ्यन्तरनियमनरूपः प्रशान्तिरेव धनं येषां तान् नास्ति अन्यत् किञ्चन धनं येन यौतकितेन त्व पुरस्क्रियसे इति यद्वा एनां मत्सुतां प्रति त्वया अयुक्तं न व्यवहर्त्तव्यं तथाहि अस्मत्कोपेन तव हानिर्भाविनीति च भावः। आत्मनः स्वस्य कुलं वंशः उच्चैः उन्नतं महदिति यावत्। एनां प्रति विरूपव्यवहारे कुलं कलङ्कितं स्यादिति भावः। त्वयि अस्याः मत्सुतायाः अबान्धवकृतां बन्धुजनैः अघटितामित्यर्थः स्वतः कृतामिति भावः कथमपि केनापि अचिन्त्यनीयेन प्रकारेण हेतुना वा जातां तां भावप्रवृत्तिं प्रणयप्रसरञ्च स्नेहप्रवृत्तिमिति पाठान्तरं साधु सम्यक् यथा तथा विचिन्त्य विभाव्य दारेषु स्त्रीषु मध्ये इयं मत्सुता सामान्यप्रतिपत्तिपूर्वकं साधारणज्ञानेनेत्यर्थः दृश्या अवेक्षणीया। अतः परम् अस्मादन्या विशेषप्रतिपत्तिरिति भावः भाग्याधीनं दैवायत्तं भाग्य-

अत्र स्नेहप्रभवं पादत्रयोक्तमर्थिता दैन्यं तुरीयपादोपक्षिप्तया वाचा दैन्यान्तरेणानुबध्यते ॥ २२२ ॥

विदुर्वाग्दण्डपारुष्यमुग्रतामपकारिषु ॥ २२३ ॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

प्रणयिसखीसलीलपरिहासरसाधिगतै-
र्ललितशिरीषपुष्पहननैरपि ताम्यति यत् ।
वपुषि वधाय तत्र तव शस्त्रमुपक्षिपतः
पततु शिरस्यकाण्डयमदण्ड इवैष भुजः ॥

अत्र माधवस्य प्रकृष्टापकारिणि अघोरघण्टे विषये प्रकृष्टमेव वाक्पारुष्यं दण्डपारुष्यञ्च जायते ॥ २२४ ॥

वतीनां हि विशेषप्रतिपत्तिर्भवतीति भावः । वधूबन्धुभिः वध्वाः पित्रादिभिः तत् विशेषप्रतिपत्तिरूपं वस्तु इति भावः न खलु वाच्यं नैव प्रार्थयितव्यमित्यर्थः । दैवाधीनमतः परं न खलु तत् स्त्रीबन्धुभिर्याच्यते इति पाठान्तरम् । सा इयं दारेषु विषये अन्यप्रतिपत्तिपूर्वकम् अन्या अपरा प्रतिपत्तिः ज्ञानं तत्पूर्वकं सा दृश्या न द्रष्टव्या इयं स्वीया कान्ता नान्येति अवेक्षणीयेति भावः । इति केचिद् व्याचक्षते ॥ २२२ ॥

उग्रता लक्षयति । विदुरिति । अपकारिषु शत्रुषु वाचा दण्डेन वा पारुष्यं कार्कश्यम् उग्रता विदुः जानन्ति ॥ २२३ ॥

प्रणयीति । यत् वपुः प्रणयिनीनां प्रणयवतीनां सखीनां सहचरीणां सलीलः सविलासः यः परिहासरसः परिहासरागः तेन अधिगतानि प्राप्तानि तैः ललितानि सुन्दराणि सुकोमलानीति यावत् शिरीषपुष्पाणि तैः हननानि प्रहाराः तैरपि ताम्यति क्लान्तिं गच्छति, वधाय तव वपुषि अङ्गे शस्त्रम् उपक्षिपतः प्रयुञ्जानस्य तव शिरसि एषः अकाण्डयमदण्ड इव सहसा पतितो मृत्युदण्ड इव भुजः बाहुः दृढमुष्टिरिति भावः पततु ॥ २२४ ॥

त्रासश्चित्तचमत्कार आकस्मिकभयादिभिः ॥ २२५ ॥

तद्रूपेण रसस्य जन्म यथा,

परिस्फुरन्मौनविघट्टितोरवः सुराङ्गनास्त्रासविलोलदृष्टयः ।
उपाययुः कम्पितपाणिपल्लवाः सखीजनस्यापि विलोकनीयताम्॥

अत्र लोलदृष्टिता करावधूननञ्च स्त्रीणां स्वभावभीरुत्वविलासित्वाभ्यामपि भवतीति त्रासाविर्भावेऽप्यसमर्थमिति नानुबन्धो भवतीति ॥ २२६ ॥

अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः ॥२२७॥

तद्रूपेण रसस्य प्रकर्षो यथा,—

सहसा मा साहिज्जउ पिआगमो तीअ विरहकिसिआए ।
अच्चन्तपहरिसेण वि जा अमुआ सा मुआज्जेव ॥

अत्र विरहिण्याः कार्श्यातिशयमुद्दीप्यमानायाः कस्याश्चिद्दयस्यायाः स्नेहातिशय्यात् प्रेम पश्यति भयान्यपदेऽपीति

त्रास लक्षयति । त्रास इति । आकस्मिकभयादिभिः सहसोत्पन्नभयादिभिः हेतुभिः चित्तस्य चमत्कारः विस्मयः त्रासः ॥ २२५ ॥

परिस्फुरदिति । सुराङ्गनाः अप्सरसः जलविहारिण्य इति भावः परिस्फुरद्भिः सञ्चरद्भिः मौनैः मत्स्यैः विघट्टिता दृष्टाः आहता वा ऊरवः यासां ताः अतएव त्रासेन किमेतदिति भयेन विलोला चञ्चला दृष्टिर्यासां तथोक्ताः तथा कम्पिताः चालिताः पाणयः पल्लवा इव याभिः तथाविधाः सत्यः सखीजनस्यापि किमुत कामिजनस्येति अपिकारार्थः । विलोकनीयतां दर्शनीयता मनोहारित्वमिति भावः उपाययुः प्रापुः ॥ २२६ ॥

शङ्का लक्षयति । अनिष्टेति । बुधाः कवयः अनिष्टस्य अभ्यागमे उपस्थितौ उत्प्रेक्षां सम्भावना शङ्काम् आचक्षते कथयन्ति ॥ २२७ ॥

सहसा मा श्रावय प्रियागमं तस्यै विरहक्लेशितायैः ।
अत्यन्तप्रहर्षेणापि याऽमृता सा मृतैव स्यात् ॥

सहसेति । अस्यै विरहक्लेशितायै सहसा प्रियागमं कान्तागमनं मा श्रावय

प्रियागमहर्षातिशयभावेऽप्यसहिष्णुतया तन्मरणशङ्का प्रक्रम्यते ॥ २२८ ॥

विरहादेर्मनस्तापः शरीरान्तकरो गदः ।

तद्रूपेण रसस्य जन्म यथा,—

स्थितमुरसि विशालं पद्मिनीपत्रमेतत्
कथयति न तथान्तर्मन्मथोत्थामवस्थाम् ।
अतिशयपरितापग्लापिताभ्यां यथा ऽस्याः
स्तनयुगपरिणाहं मण्डलाभ्यां ब्रवीति ॥

अत्र सागरिकायाः स्तननिहितसरोजिनीदलम्लापनेन वपुःसन्तापो निष्पद्यते ॥ २२९ ॥

बलस्यापचयो ग्लानिराधिव्याधिप्रकर्षभूः ॥ २३० ॥

तद्रूपेण रसस्यानुबन्धो यथा,

किसलयमिव मुग्धं बन्धनाद्विप्रलूनम्
हृदयकुसुमशोषी दारुणो दीर्घशोकः ।

न आवय । या अस्तता विरहक्लेशातिशयेनेति भावः सापि अत्यन्तप्रहर्षेणापि सता एव स्यादिति शेषः ॥ २२८ ॥

तापं लक्षयति । विरहादेरिति । विरहादेः हेतोः शरीरान्तकरः शरीरध्वंसकरः गदः रोगः मनसः तापः ।

स्थितमिति । एतत् उरसि वक्षसि स्थितं विशालं बृहत् पद्मिनीपत्रम् अस्याः नायिकायाः अन्तर्मन्मथोत्थाम् अन्तःकामजनिताम् अवस्थां तथा न कथयति यथा अतिशयेन परितापेन ग्लापिताभ्यां ग्लानिं नीताभ्यां मण्डलाभ्यां गोलाकारस्वायतनाभ्यां स्तनयुगस्य स्तनद्वयस्य परिणाहः विशालता तां ब्रवीति सूचयतीति यावत् ॥ २२९ ॥

ग्लानिं लक्षयति । बलस्येति । आधिः मानसी व्यथा पुंस्याधिर्मानसी व्यथेत्य

ग्लपयति परिपाण्डु चाममस्याः शरीरम्
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥

अत्र प्रकृष्टशोकानुबन्धिनी ग्लानिः वैवर्ण्यचामताभ्यामनुबध्यते ॥ २३१ ॥

उत्कण्ठाहर्षशोकादेरुन्मादश्चित्तविप्लवः ॥ २३२ ॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

क्वाकार्य्यं ? क्व कलाकरस्य च कुलं ? भूयोऽपि दृश्येत सा ?
दोषाणामुपशान्तये श्रुतमहो कोपेऽपि कान्तं मुखम् ।
किं वक्त्यन्यपकल्मषाः कृतधियो ? रेखैव साऽन्यादृशी
चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं धास्यति ? ॥

अत्र विरहिणः पुरुरवसः उत्कण्ठादिभिः प्रेमप्रकर्षादसत्प्रलापरूप उन्मादो निष्पद्यते ॥२३३॥

मरः। व्याधि. रोगः तयोः प्रकर्षात् अतिरेकाद्भवतीति तथोक्तः बलस्य सामर्थ्यस्य अपचयः चयः ग्लानिः ॥ २३० ॥

किसलयमिति। हृदयमेव कुसुमं शोषयतीति तथोक्तः दारुण. तीव्रः दीर्घशोकः महत् दुःखं प्रियविच्छेदजमिति भावः बन्धनात् बन्धात् विप्रलूनं विच्छिन्नं सुग्ध सुन्दर सुकोमलमिति भावः किसलयमिव नवपल्लवमिव अस्याः नायिकायाः परिपाण्डु पाण्डुतां गतं शरीर शरदि जायते इति शरदिजः शरत्कालभव इत्यर्थः घर्मः सौरतापः केतक्याः गर्भपत्रमिव अभ्यन्तरदलमिव ग्लपयति ग्लानिं नयति शोषयतीत्यर्थः ॥ २३१ ॥

उन्माद लक्षयति। उत्कण्ठेति। उत्कण्ठा औत्सुक्यं हर्षः आनन्दः शोकः एवमादिः हेतोः चित्तस्य मनसः विप्लवः विकृतिः उन्मादः ॥ २३२ ॥

क्वाकार्य्यमिति। अकार्य्यम् उर्वशीप्रेमनिबन्धन चित्तवैकल्यरूपमिति भावः क्व ? कलाकरस्य चन्द्रमसः कुलञ्च क्व ? अहं चन्द्रवंशीयो नृपतिः मम तावदुर्वश्या मनुरागेण तद्विरहे ईदृशं चित्तवैकल्यं न युज्यते इति भावः। विवेकबुद्धिरियम्। सा उर्वशी भूयोऽपि पुनरपि दृश्येत ? दर्शनविषयीक्रियेत। विवेक-

आदरातिशयाच्चेतस्यावेगः सम्भ्रमो मतः ॥ २३४ ॥

तद्रूपेण रसस्य सङ्करो यथा,—

अलमलमतिमात्रं साहसेनामुना ते
त्वरितमयि ! विमुञ्च त्वं लतापाशमेनम् ।
चलितमिव निरोद्धुं जीवितं जीवितेशे !
क्षणमिह मम कण्ठे बाहुपाशं निधेहि ॥

अत्र रतिजन्मा सम्भ्रमातिशयो रतिजन्मनैव रतिप्रकर्षेण सङ्कीर्य्यते ॥ २३५ ॥

ध्वसात् पुनरुत्कण्ठेयम्। दोषाणाम् इन्द्रियचापल्यरूपाणाम् उपशान्तये दमनाय युतं शास्त्रज्ञानं मया दोषशान्त्यर्थं शास्त्राणि अधीतानि तत् कथमयमावेग इति पुनर्विवेकबुद्धिः। अहो आश्चर्य्यं कोपेऽपि मुखं वदनम् उर्वश्या इति शेषः कान्तं रम्यं शान्तमित्यपपाठः। पुनर्विवेकनाशादुत्कण्ठा। अपकल्मषाः अपापाः कृतधियः शिक्षितमतयः साधव इति भावः किं वक्ष्यन्ति कथयिष्यन्ति ममैतादृशं वैक्लव्यं दृष्ट्वेति भावः। पुनर्विवेकबुद्धिः सा उर्वशी स्वप्नेऽपि दुर्लभा दुष्प्रापा स्वप्नेऽपि ता न पश्यामीति भावः रेखेव सान्यादृशीति पाठे सा उर्वशी अन्यादृशी अन्यप्रकारा लोकविलक्षणेति यावत् रेखेव सृष्टिरेवेत्यर्थः। पुनरुत्कण्ठा। हे चेतः ! हृदय ! स्वास्थ्यं प्राकृतं भावं सुस्थतामित्यर्थः उपैहि प्राप्नुहि। पुनर्विवेकबुद्धिः। को धन्यो भाग्यवान् सुकृतीति यावत् युवा खलु निश्चितम् अधरम् उर्वश्या इति शेषः धास्यति पास्यति घेट्पाने इत्यस्य रूपम्। पुनरुत्कण्ठा। क्व कलाकरस्य च कुलमित्यत्र शशलक्ष्मणः क्व च कुल मिति पाठान्तरम्। पुरूरवस उक्तिरियं ययातेरिति मूलपाठः प्रमादिकः इति चिन्त्यम् ॥ २३३ ॥

सम्भ्रमं लक्षयति। आदरेति आदरातिशयात् चेतसि मनसि आवेगः उत्कण्ठाविशेष इत्यर्थः सम्भ्रमः मतः कथितः ॥ २३४ ॥

अलमिति। अमुना ते तव साहसेन अविमृश्यकारिताजनितेन उद्बन्धनप्रयातेनेति भावः अतिमात्रम् अतिशयेन अलम् अलम् व्यर्थं व्यर्थं विफलमेतत् साहस

मनःशरीरयोः खेदः क्रियातिशयतः श्रमः ॥ २३६ ॥

तद्रूपेण रससङ्करो यथा,—

स्खलयति वचनं ते संश्रयत्यङ्गमङ्गम्
जनयति मुखचन्द्रोद्भासिनः खेदबिन्दून् ।
मुकुलयति च नेत्रे सर्वथा सुभ्रु ! खेद-
स्त्वयि विलसति तुल्यं वल्लभालोकनेन ॥

अत्र मालत्या पुष्पावचयजन्मा श्रमो माधवावलोकनजा च रतिः खेदगद्गदाङ्गसादनयनमुकुलनैस्तुल्यधर्मिणी मिथः सङ्कीर्य्येते ॥ २३७ ॥

चित्तस्य खेदो निर्वेदस्तत्त्वज्ञानोदयादिभिः २३८ ॥

मा कुर्वित्यर्थः अयीति कोमलामन्त्रणे अयि प्रिये इति भावः त्वम् एनं लतापाशं वल्लीरज्जुं त्वरितं सत्वरं विमुञ्च परित्यज । हे जीवितेशे प्राणेश्वरि । चलितमिव निर्गन्तुं प्रवृत्तमिवेत्यर्थः जीवितं मदीयमिति शेषः । तदप्राप्ताविति भावः निरोद्धुम् अवरुद्धं कर्तुम् इह अस्मिन् मम कण्ठे चण्डं बाहुपाशं भुजरज्जुं निधेहि अर्पय ॥ २३५ ॥

श्रमं लक्षयति । मन इति क्रियातिशयतः चेष्टातिरेकात् मनःशरीरयोः चित्तदेहयोः खेदः क्लान्तिः श्रमः ॥ २३६ ॥

स्खलयतीति । हे सुभ्रु ! सुन्दरि ! खेदः श्रमः पुष्पावचयनजन्मेति भावः तवेति शेषः वल्लभस्य प्रियस्य माधवस्येत्यर्थः अवलोकनेन दर्शनेन तुल्यं सम यथा तथा त्वयि विलसति विस्फुरति खेदवल्लभालोकनयोः एककार्य्यकारित्वादिति भावः तथाहि खेदः प्रियावलोकनञ्च ते तव वचनं स्खलयति स्खलितं करोति वैरूप्यमापादयतीति भावः अङ्गम् अङ्गं प्रत्यङ्गं संश्रयति, मुखचन्द्रम् उद्भासयन्तीति तथाविधान् खेदबिन्दून् घर्मजलकणान् जनयति, नेत्रे नयने सर्वथा सर्वैः प्रकारैः मुकुलयति च निमीलयति च ॥ २३७ ॥

निर्वेदं लक्षयति । चित्तस्येति । तत्त्वज्ञानस्य उदयादिभिः जननादिभिः हेतुभिः चित्तस्य मनसः खेदः वीतरागत्वमित्यर्थः निर्वेदः ॥ २३८ ॥

तद्रूपेण रसस्य शेषो यथा,—

जरामरणदौर्गत्यव्याधयस्तावदासताम् ।
मन्ये जन्मैव धीराणां भूयो भूयस्त्रपाकरम् ॥

अत्र मोक्षायोत्सहमानस्य कस्यचिन्निर्वेदागमो गम्यते ॥२३९॥

क्रियास्वपाटवं जाड्यं चिन्तोत्कण्ठाभयादिभिः ॥ २४०॥

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

शिथिलशिथिलं न्यस्य स्वैरं धनुःशिखरे शिरो
नयनसलिलैः कुर्वन् मौर्वीं लतामपरामिव ।
अहह ! विकलः श्रुत्वा श्रुत्वा घनस्तनितध्वनिम्
किमपि ध्यायन्नार्यो न याति न तिष्ठति ॥

अत्र विरहिणो रामस्य क्रियास्वपाटवं निष्पद्यते ॥२४१॥

क्रियाविद्वेष आलस्यं सुखसंविन्मदादिभिः ॥ २४२ ॥

जरेति । जरा वार्द्धक्यं मरणं मृत्युः दौर्गत्यं दारिद्र्यं व्याधिः रोगः एते तावत् आसतां तिष्ठन्तु एतेषां धीरजनत्रपाकरत्वं किं वक्तव्यमिति भावः धीराणां मनस्विनां भूयो भूयः पुनः पुनः जन्मैव उत्पत्तिरेव त्रपाकरं लज्जाकरं मन्ये ॥२३९॥

जाड्यं लक्षयति क्रियास्विति । चिन्ता उत्कण्ठा भयम् एवमादिभिः हेतुभिः क्रियासु चेष्टासु अपाटवम् असामर्थ्यमित्यर्थः जाड्यम् ॥ २४०

शिथिलेति । आर्यः रामः शिथिलशिथिलम् अतिश्लथं स्वैरं सावहेलञ्च यथा तथा धनुषः कार्मुकस्य शिखरे कोटौ अग्रभागे इत्यर्थः शिरः मस्तकं न्यस्य निधाय नयनसलिलैः अश्रुभिः अपराम् अन्यविधां लतामिव मौर्वीं ज्यां कुर्वन् रचयन् अहहेति खेदे घनानां मेघानां स्तनितं गर्जितमेव ध्वनिं श्रुत्वा श्रुत्वा आकर्ण्याकर्ण्य विकलः नितरां व्याकुलः सन् अतीवोद्दीपकत्वाद् घनगर्जितस्येति भावः किमपि किमपि अनिर्वचनीयरूपमिति भावः ध्यायन् चिन्तयन् न याति न गच्छति न गन्तुं पारयति न तिष्ठति न स्थातुं शक्नोतीत्यर्थः ॥ २४१ ॥

आलस्यं लक्षयति । क्रियेति । सुखस्य संवित् संवेदनम् अनुभव इत्यर्थः मदः

तद्रूपेण रसस्य निष्पत्तिर्यथा,—

घरिणिघणत्थणपेक्खणसुहे णिपड़िअस्स होन्ति पहिअस्स ।
अवसउणङ्गारअवारविट्ठिदिअसा सुहवेन्ति ॥

अत्र रतिसुखानुभवाज्जिगमिषोरपि अगच्छतः आलस्यं निष्पद्यते ॥ २४३ ॥

निद्रा व्यापारवैमुख्यमिन्द्रियाणां श्रमादिभिः २४४ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

णिद्दालसघुसिअं संवलिताङ्गतारआलोआ ।

मद्यपानजनितविकारविशेषः एवमादिभिः हेतुभिः क्रियासु कार्य्येषु विद्वेषः विरागः आलस्यम् ॥ २४२ ॥

घरिणीति । गृहिणीघनस्तनप्रेक्षणसुखे निपतितस्य भविष्यत्पथिकस्य ।

अपशकुनाङ्गारकवारविष्टिदिवसाः सुखयन्ति ॥

गृहिणीति । गृहिण्याः घनयोः निविडयोः कठिनयोरित्यर्थः स्तनयोः प्रेक्षणसुखे दर्शनानन्दे निपतितस्य निमग्नस्य भविष्यन् भावी पथिकः तस्य प्रवासोद्यतस्येति भावः अपशकुनाः अशुभशसिन इत्यर्थः अङ्गारकवाराः कुजवाराः अङ्गारकः कुजो भौम इत्यमरः । उपलक्षणमेतत् । याचायाम् अनिषिद्धदिवसविषये उक्तञ्च ज्योतिषे । शुक्रेन्दुबुधजीवानां वाराः सर्वत्र शोभनाः । भानुभूसुतमन्दानां शुभकर्मसु केष्वपीति । विष्टिदिवसा विष्टिभद्रादिमानि उक्तञ्च ज्योतिषे । शुक्ले पूर्वार्द्धेऽष्टमी पञ्चदशी भद्रैकादश्या चतुर्थ्या परार्द्धे । कृष्णेऽन्त्यार्द्धे स्यात् तृतीयादशम्यौ पूर्वे भागे सप्तमी शम्भुतिथ्यौ स्वर्गे भद्रा शुभं कार्य्यं पाताले धनागमः । मर्त्यलोके यदा भद्रा सर्वकार्य्यविनाशिनीति । सुखयन्ति सुखं जनयन्ति । अयातिके दिने प्रवासगमनस्य निषिद्धत्वात् प्रवासे अगमनमेवास्य सुखकरमिति भावः ॥ २४३ ॥

निद्रां लक्षयति । निद्रेति । श्रमादिभिः हेतुभिः इन्द्रियाणां चक्षुरादीनां पञ्चानां हस्तपादादीनाञ्च ज्ञानकर्मेन्द्रियाणां व्यापारवैमुख्यं चेष्टाराहित्यं निद्रा स्वापः मेध्यामनसंयोगविशेष इति यावत् ॥ २४४ ॥

कामस्सवि दुव्विसहा दिट्ठिणिवादा ससिमुहीए ॥

अत्र रतिश्रमजागरादिजनितनिद्रालसदृष्टिनिपातास्तारकाघूर्णनास्रचलनादिभिरनुबध्यन्ते ॥ २४५ ॥

निद्रादिजनितं सुप्तं वाह्येन्द्रियनिमीलनम् ॥ २४६ ॥

तद्रूपेण रसप्रकर्षो यथा,—

आसुअइ दिस्सपड़िवक्खुवेअणं पसिढ़िलेहिं अङ्गेहिम् ।
णिव्वत्तिअसुरदरसाणुबन्धसुहणिब्भरं सोण्हा ॥

अत्र निर्भरपदेनैव प्रकर्षः प्रतिपाद्यते ॥ २४७ ॥

निद्रालसघूर्णित सवलिताङ्गतारकालीकाः ।
कामस्यापि दुर्विषहा दृष्टिनिपाताः शशिमुख्याः ॥

निद्रेति । शशिमुख्याः चन्द्रवदनायाः कान्ताया इति शेषः निद्रया उक्तरूपया अलसा व्यापारविमुखा घूर्णिता स्वतःभ्रान्ता संवलिताङ्गा सङ्कुचिताङ्गा या तारका कनीनिका तस्या आलीकः प्रभा प्रसर इति भावः येषु तथाविधाः दृष्टिनिपाताः दर्शनव्यापाराः अवलोकनविशेषा इति यावत् कामस्यापि मदनस्यापि किमुतापरेषां कामिनामित्यपि शब्दार्थः दुर्विषहाः सोढुमशक्या इत्यर्थः अतीव कामोद्दीपका इति ॥ २४५ ॥

सुप्तं लक्षयति । निद्रादीति । निद्रादिभिः जनितं उत्पादितं वाह्यानां वहिःस्थितानां न तु अन्तरिन्द्रियाणां तदानीं तद्व्यापारस्थितेरिति भावः इन्द्रियाणां चक्षुरादीनां निमीलनं व्यापारविगम इत्यर्थः सुप्तम् । निद्रासुप्तयोः कारणकार्यरूपत्वात् परस्परभेदः ॥ २४६ ॥

आस्वपिति दत्तप्रतिपक्षवेदनं प्रशिथिलैरङ्गैः ।
निर्वर्त्तित सुरतरसानुबन्ध-सुखनिर्भरं स्नुषा ॥

आसुअइ इति । स्नुषा पुत्रवधूः प्रशिथिलैः प्रकर्षेण शैथिल्यं गतैः अलसवलितैरिति यावत् अङ्गैः अवयवैः दत्ता जनिता प्रतिपक्षस्य शत्रोः सपत्न्या इति भावः वेदना कान्तेन अहं रमितेति ज्ञापना व्यथा वा यस्मिन् तत् तथा निर्वर्त्तितेन नितरां सम्पादितेन सुरतरसानुबन्धेन निधुवनविलासपरम्परया यत् सुखं निरतिशयानन्दः तेन निर्भरम् अत्यन्तं यथा तथा आस्वपिति सम्यक् निद्राति ॥ २४७ ॥

निद्रापगमहेतुभ्यः प्रबोधश्चेतनागमः ॥ २४८ ॥

तद्रूपेण रसस्यानुबन्धो यथा,—

प्रत्यग्रोन्मेषजिह्मा क्षणमनभिमुखी रत्नदीपप्रभाणाम्
आत्मव्यापारगुर्वी जनितजललवा जृम्भणैः साङ्गभङ्गैः ।
नागाङ्गं मोक्तुमिच्छोः शयनमुरुफणाचक्रवालोपधानम्
निद्राच्छेदाभिताम्रा चिरमवतु हरेर्दृष्टिराकेकरा वः ॥

अत्र दृष्टेः प्रत्यग्रोन्मेषजिह्मतादिभिः प्रबोधो न अद्यापि निष्पद्यत इति प्रतीयते ॥ २४९ ॥

उक्ता भावादिभेदेन तेऽमी रत्यादयो रसाः ।

प्रबोधं लक्षयति निद्रेति । निद्रायाः स्वापस्य अवगमः विरामः तस्य हेतवः कारणानि कालातिक्रमादय इति भावः तेभ्यः हेतुभ्यः चेतनायाः चैतन्यस्य आगमः उपस्थितिः प्रबोधः जागरणमित्यर्थः ॥ २४८ ॥

प्रत्यग्रेति । प्रत्यग्रेण अभिनवेन उन्मेषेण उन्मीलनेन जिह्मा सम्यक् सङ्कोचाविगमात् वक्रा क्षणं प्रत्यग्रोन्मेषक्षणे इत्यर्थः रत्नानि नागशिरोमणय एव दीपाः तेषां प्रभा आलोकाः तासाम् अनभिमुखी आभिमुख्ये स्थातुमक्षमेत्यर्थः आत्मनः व्यापारेण दीर्घकालिकनिद्रारूपेणेति भावः गुर्वी भारवती अङ्गानां हस्तपदादीनां भङ्गः प्रसारणादिव्यापारः तेन सह वर्त्तमानानि तैः जृम्भणैः मुखव्यादानादिविकृतिविशेषैः जनितः उत्पादितः जललवः अश्रुबिन्दुः यस्याः तथोक्ता निद्राच्छेदेन निद्राविरामेण अभिताम्रा अभितो रक्ता आकेकरा ईषत् कुटिला उरु महत् फणानां चक्रवालं मण्डलं तदेव उपधानं शिरोरक्षणसाधनं शय्याङ्गविशेष इति भावः यस्मिन् तथोक्तं नागाङ्गम् अनन्तनागोत्सङ्गं नागाङ्गमिति पाठे अनन्तनागकलेवरं शयनं शय्यां मोक्तुं विहातुम् इच्छोः अभिलषतः हरेः नारायणस्य प्रलयानन्तरं प्रबुद्धस्येति भावः दृष्टिः अवलोकनं वः युष्मान् चिरं सततम् अवतु रक्षतु ॥ २४९ ॥

उक्ता इति । ते प्रसिद्धाः अमी उल्लिखिताः रत्यादयः आस्वादविशेषाः

अथैतेष्वेव केषाञ्चिद्विशेषानभिदध्महे ॥ २५० ॥

तत्र, शृङ्गारवीरकरुणा रौद्राद्भुतभयानकाः ॥
बीभत्सहास्यप्रेयांसः शान्तोदात्तोद्धता रसाः ॥
रतिर्निसर्गसंसर्गौपम्याध्यात्माभियोगजा ।
सम्प्रयोगाभिमानोत्था विषयोत्था च कथ्यते ॥ ३५१ ॥
प्रीतिरप्येवमेव स्यान्नत्वस्यां साम्प्रयोगिकी ।
अभ्यासिकी तु तत्स्थाने तदुदाहृतयो यथा ॥ २५२ ॥
मृतेति प्रेत्य सङ्गन्तुं यया मे मरणं मतम् ।
सैवावन्ती मया लब्धा कथमत्रैव जन्मनि ॥

अत्र स्थायिनो विभावानुभावव्यभिचारिसंयोगात् रसनिष्पत्तिरिति रतिरेव शृङ्गाररूपेण निष्पद्यते । अत्रावन्त्या वासवदत्ताया आलम्बनविभावभूतायाः सकाशात् उत्पन्नो वत्सेश्वरस्य रतिस्थायिभावस्तस्याः पुनर्जीवनादिभिः उद्दीपनविभावैः उद्दीप्यमानो मृतेत्यादिना वागारम्भानुभावेन

भावादिभेदेन उक्ताः कथिताः । अथ इदानीम् एतेषु रत्यादिभावेषु एव मध्ये केषाञ्चित् भावानामिति शेषः विशेषान् विलक्षणप्रकारान् अभिदध्महे कथयामः ॥ २५० ॥

रतिरिति । रतिः निसर्गसंसर्गौपम्याध्यात्माभियोगजा तथा सम्प्रयोगाभिमानोत्था विषयोत्थाच नैसर्गिकी, संसर्गिकी औपम्यवती अध्यात्मशालिनी आभियोगिकी साम्प्रयोगिकी आभिमानिकी वैषयिकी चेति अष्टधा कथ्यते इत्यर्थः । प्रीतिरपि एवमेव रतिवदेव स्यात् भवेत् अस्यां प्रीत्यान्तु साम्प्रयोगिकी प्रीतिरिति यावत् न भवतीति शेषः तत्स्थाने तस्याः साम्प्रयोगिक्याः स्थाने तु अभ्यासिकी प्रीतिरिति शेषः भवति । तदुदाहृतयः तेषां शृङ्गारादीनाम् उदाहृतयः उदाहरणानि यथा यादृशानि तथा उच्यन्ते इति शेषः ॥ २५१ ॥२५२ ॥

मृतेति । मृता पञ्चत्वं गता इति हेतोः प्रेत्य मृत्वा यया कान्तया सङ्गन्तुं

अनुमीयमानैर्हर्षधृतिप्रभृतिभिः सुखात्मभिः व्यभिचारिभिः संसृज्यमानः करुणानन्तरसम्भोगशृङ्गाराख्यां लभते ॥२५३॥

अजित्वा सार्णवामुर्वीमनिष्ट्वा विविधै र्मखैः ।
अदत्त्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥

अत्र वसुधाविजयादेरालम्बनविभावादुत्पन्नः स्थाय्युत्साहभावः स्थैर्यधैर्य्यादिभिः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमीयमानेषु स्मृतिमतितर्कादिषु निष्पन्नो वीररससंज्ञया व्यवह्रियते ॥ २५४ ॥

यस्याः कुसुमशय्यापि कोमलाङ्ग्या रुजाकरी ।
साऽधिशेते कथं देवी हुताशनवतीं चिताम् ॥

अत्र चालम्बनविभावभूतदेवीमरणादुत्पन्नः शोकस्थायिभावश्चितानिवेशनहुताशनाङ्गज्वालादिभिः उद्दीपनविभावैः उद्दीप्यमानो वागारम्भानुमेयैः निर्वेदग्लानिवैवर्ण्यादिभिः व्यभिचारिभिः संसृज्यमानः करुण इति ज्ञायते ॥२५५

मे मम मरणं मतम् इष्टं कथमत्रैव जन्मनि सैव आवन्ती अवन्तिदेशसमुद्भवा कान्ता वासवदत्तेति भावः मया लब्धा प्राप्ता ॥

अत्र स्थायिन इत्यादि । स्थायिनः चिर स्थितस्य न तु विच्छिन्नस्येति भावः रतिभावादेरिति भावः । आलम्बनविभावभूतायाः आलम्बन नायिकादिसदालम्ब्य रसोद्गमादित्युक्तलक्षणायाः ॥ २५३ ॥

अजित्वेति । सार्णवां ससागराम् उर्वीं पृथ्वीम् अजित्वा अवशीकृत्येत्यर्थः विविधैः बहुप्रकारैः मखैः यज्ञैः अश्वमेधादिभिः अनिष्ट्वा देवान् अनभ्यर्च्येत्यर्थः तथा अर्थिभ्यः याचकेभ्यः अर्थं धन तेषामभिलषितमिति भावः अदत्वा अवितीर्य्य कथं केन रूपेण पार्थिवः राजा भवेयम् ? राजकर्त्तव्यानाम् उक्तानामकरणे राजत्वं विफलमिति भावः ॥ २५४ ॥

यस्या इति यस्याः कोमलाङ्ग्याः सुकुमारावयवायाः कामिन्या इति शेषः

निगृह्य केशेष्वाकृष्टा कृष्णा येन ममाग्रतः ।
सोऽयं दुःशासनः पापो लब्धः किं जीवति क्षणम् ? ॥

अत्र दुःशासनालम्बनविभावाय क्रुध्यतो भीमसेनस्य पूर्वमुत्पन्नः क्रोधस्थायिभावः तदवाप्तेः स्मर्यमाणसमक्षकृतद्रौपदीनिग्रहकेशाकर्षणादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुभावेषु अनुमीयमानेषु असूयावेपथुश्रमादिषु दुःखात्मकेषु व्यभिचारिषु निष्पद्यमानो रौद्र इति निष्पद्यते ॥ २५६ ॥

अंशुकानि प्रवालानि पुष्पं हारादिभूषणम् ।
फलं मधूनि हर्म्याणि शाखा नन्दनशाखिनाम् ॥

अत्र शाखिनां प्रवालपुष्पफलशाखासम्पन्नं निजं रूपम् । नन्दनशाखिनां पुनः प्रवालादिस्थाने अंशुकहारमधुमन्दिराणि तदेतदाश्चर्यमतश्चैतेभ्य आलम्बनविभावेभ्यः कस्यचिद् देवभूयंगतस्य * समुत्पन्नो विस्मयस्थायिभावः तदीयावयवदर्शनादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु हर्षरोमोद्गमसम्भेदगद्गदादिषु व्यभिचारिषु निष्पद्यमानोऽद्भुत इत्युच्यते ॥ २५७ ॥

कुसुमशय्यापि पुष्पशयनमपि रुजाकरी सन्तापविधायिनी, सा देवी कथं केन प्रकारेण ज्वताशनवतीं ज्वलन्तीमित्यर्थः चिताम् अधिशेते ॥ २५५ ॥

निगृह्येति । येन मम अग्रतः समक्षं कृष्णा द्रौपदी निगृह्य निग्रहं कृत्वा बलमाश्रित्येति भावः केशेषु आकृष्टा आकृष्य सभां नीतेत्यर्थः सोऽयं पापः दुराचारः दुःशासनः लब्धः प्राप्तः मयेति शेषः किं क्षणं जीवति ? नैव क्षणमपि जीवतीत्यर्थः ॥ २५६ ॥

अंशुकानीति । नन्दनशाखिनां नन्दनं देवोद्यानं तत्र ये शाखिनः वृक्षा

इदं मघोनः कुलिशं धारासन्निहितानलम् ।
स्मरणं यस्य दैत्यस्त्रीगर्भपाताय कल्पते ॥

अत्र महेन्द्रकुलिशात् धारासन्निहितानलादालम्बन-विभावात् स्मर्यमाणादपि दैत्यस्त्रीणामुत्पन्नो भयस्थायिभावः तद्विदीर्णदानवमरणस्मरणादिभिः उद्दीपनविभावैः उद्दीप्यमानः स्वगर्भपातादिभिः अनुभावैः तदनुमितैश्च स्वेदस्तम्भवेपथुप्रभृतिभिः व्यभिचारिभिः संसृज्यमानो भयानकरसरूपेण निष्पन्नः केनचिदाख्यायमानोऽपि भयानक इति आख्यायते ॥ २५८ ॥

पायं पायं तवारीणां शोणितं करसम्पुटैः ।
कौणपाः सह नृत्यन्ति कबन्धैरन्त्रभूषणाः ॥

अत्र आलम्बनविभावभूतेभ्यः कौणपेभ्यः कस्यचिद् रिपुविजयाशंसिनः पुंसः उत्पन्नो जुगुप्सास्थायिभावः शिरश्छेदविगलद्रुधिरधारापरिप्लुतप्रनर्त्तितकबन्धकौणपान्त्रभूषणशोणितपानादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमेयेषु भयावेशशङ्काऽवहित्यादिषु व्यभिचारिषु निष्पन्नो बीभत्स इति निगद्यते ॥ २५९ ॥

तेषां प्रवालानि पल्लवाः अंशुकानि वसनानि पुष्पं हारादि भूषणम् अलङ्कारः फलं मधूनि मधुमयानीत्यर्थः शाखाः विटपाः हर्म्याणि धनिजननिवासाः ॥

* देवभूयङ्गतस्य देवत्व प्राप्तस्य ॥ २५७ ॥

इदमिति । मघोनः इन्द्रस्य इद परिदृश्यमानं कुलिशं वज्र धारासु सर्वतः प्रान्तभागेषु सन्निहितः सस्थितः अनलः अग्निः यस्य तथाभूतम् यस्य कुलिशस्य स्मरणं दैत्यस्त्रीणां दितिजरमणीनां गर्भपाताय गर्भस्रावाय कल्पते प्रभवति ॥२५८॥

पायमिति । कौणपाः राक्षसाः राक्षसः कौणपः क्रव्यादित्यमरः तव अरीणां

इदमम्लायमानाया लग्नं स्तनतटे तव ।
छाद्यतामुत्तरीयेण नवं नखपदं सखि ! ॥

अत्र काञ्चित् सखीं पूर्वं भर्त्तरि प्रगृहीतमानां तेनैव नवनखपदाङ्कितस्तनीम् आलम्बनविभावभूताम् उपलभमानायाः कस्याश्चित् सख्या उत्पन्नो हासस्थायिभावः तदीयमानपरिग्रहस्मरणादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुत्पन्नेषु वागारम्भानुमितेषु शङ्कावहित्थगङ्गदादिव्यभिचारिषु निष्पाद्यमानो हास्यशब्देन अभिधीयते ॥ २६० ॥

यदेव रोचते मह्यं तदेव कुरुते प्रिया ।
इति वेति न जानाति यत् प्रियं तत् करोति सा ॥

अत्र वत्सलप्रकृतेर्धीरतया ललितनायकस्य प्रियानुभावादुत्पन्नः स्नेहस्थायिभावो विषयसौकुमार्य्यात्मप्रकृत्यादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुपजायमानैः मोहमतिधृतिस्मृत्यादिभिः व्यभिचारिभावैः अनुभावैश्च प्रशंसादिभिः समुज्ज्व-

---

शत्रूणां शोणितं रक्तं करसम्पुटैः अञ्जलिभिरित्यर्थः पायं पायं पुनः पुनः पीत्वा अन्त्राणि उदरवर्त्तिन्यः नाड्यः भूषणानि हारादयः येषां तैः कबन्धैः अशिरः कलेवरैः कबन्धोऽस्त्री क्रियायुक्तमपसूर्द्धकलेवरमित्यमरः । सह नृत्यन्ति नृत्यं कुर्वन्ति ॥ २५९ ॥

इदमिति । हे सखि ! अम्लायमानायाः गुरुजनादिदर्शनेनापि अलज्जमानाया इति भावः तव स्तनतटे लग्नं स्थितं इदं नवं सद्यः सम्भोगजातमिति भावः नखपदं प्रियतमनखाघातचिह्नम् उत्तरीयेन उत्तरासङ्गेन वसनेन छाद्यतां गोप्यताम् ॥ २६० ॥

यदेवेति । मह्यं यदेव रोचते रुचते प्रिया तदेव कुरुते । इति वा इति

मानो निष्पन्नः प्रेयानिति प्रतीयते। रतिप्रीत्योरपि चायमेव मूलप्रकृतिः इष्यते ॥ २६१ ॥

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया।
स हि स्नेहात्मकस्तन्तुरन्तर्मर्माणि सीव्यति ॥ २६२ ॥
सर्वाः सम्पत्तयस्तस्य सन्तुष्टं यस्य मानसम्।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥

अत्र कस्यचिदुपशान्तप्रकृतेः धीरप्रशान्तनायकस्य यथोपनतमनोऽनुकूलदारादिसम्पत्तेः आलम्बनविभावभूतायाः समुत्पन्नो धृतिस्थायिभावो वस्तुतत्त्वालोचनादिभिः उद्दीपनविभावैः उद्दीप्यमानः समुपजायमानस्मृतिमत्यादिभिः व्यभिचारिभावैः वागारम्भादिभिः अनुषज्यमानो निष्पन्नः शान्त इति गीयते ॥ अन्ये पुनः अस्य शमं प्रकृतिम् आमनन्ति। स तु धृतेरेव विशेषो भवति ॥ २६३ ॥

प्रियमिति शेषः न जानाति नावबुध्यते किन्तु यत्प्रिय ममेति शेषः सा प्रिया तत् करोति। वेत्तीति पाठः प्रामादिक इति बोध्यम् ॥ २६१ ॥

रतिप्रीत्योरिति। अयमेव प्रेयानेव मूलप्रकृतिः आदिकारणम् इष्यते। यत् यतः इत्थं एवम्प्रकारम् आहुः कथयन्ति बुधा इति शेषः। अहेतुरिति यः अहेतुः हेतुं विनोत्पन्न इत्यर्थः पक्षपातः स्नेहः, तस्य प्रतिक्रिया प्रतीकारः परिहारकारणमित्यर्थः नास्ति नासौ परिहर्तुं शक्यते इत्यर्थः। हि यतः सः स्नेहात्मकः स्नेहमयः तन्तुः सूत्रम् अन्तर्मर्माणि उभयोः अन्तरिन्द्रियाणि इत्यर्थः सीव्यति बध्नाति दृढं संयोजयतीत्यर्थः ॥ २६२ ॥

सर्वा इति। यस्य मानसं सन्तुष्टं सुखितं तस्य सर्वाः सम्पत्तयः सम्पदः सुखोपाया इत्यर्थः इसगता इति भावः भवन्तीति शेषः ननु तथाहि उपानद्भ्यां चर्मपादुकाभ्यां गूढौ आवृतौ पादौ यस्य तथाविधस्य जनस्य सम्बन्धिनी भू पृथिवी चर्मावृतेव चर्माच्छादितेव। तस्य भूस्पर्शाभावादित्यर्थः ॥ २६३ ॥

साधारण्यान्निरातङ्कः कन्यामन्योऽपि याचते।
किम्पुनर्जगतां जेता प्रपौत्रः परमेष्ठिनः॥

अत्र रामस्य उदात्तप्रकृतेर्निसर्गत एव तत्वाभिनिवेशिनी-मतिर्नाकृत्यविषये प्रवर्त्तते। न च प्रवृत्ता उपरमति। सा च सीतेयं मम स्वीकारयोग्येत्येवं रूपेण प्रवृत्ता रावणप्रार्थना लक्ष्मणप्रोत्साहनाभ्यामुद्दीप्यमाना समुपजायमानचिन्तावितर्कव्रीडाऽवहित्थस्मृत्यादिभिः कालोचितोत्तरानुमीयमानैश्च विवेकचातुर्य्यौदार्य्यधैर्य्यादिभिः संसृज्यमाना उदात्तरसरूपेण निष्पद्यते॥ २६४॥

अपकर्त्ताऽहमस्मीति मा ते मनसि भूद्भयम्।
विमुखेषु न मे खड्गः प्रहर्त्तुं जातु वाञ्छति॥

अत्र मयाऽस्यापकारः कृत इति यत्ते चेतसि भयं तन्मा भूत्। न मम खड्गः पराङ्मुखेषु कदाचिदपि प्रहर्त्तुमुत्सहत

साधारण्यादिति। अन्योऽपि सामान्यजनोऽपि साधारण्यात् साधारणजनाना लब्धुं योग्यत्वात् निरातङ्कः निर्भयः कन्यां कुमारीम् अनूढामित्यर्थः याचते प्रार्थयते, जगतां भुवनाना जेता विजयी परमेष्ठिनः ब्रह्मणः प्रपौत्रः रावणः किं पुनः? किं वक्तव्य इत्यर्थः विश्वविजेतृत्वेन महावीरो ब्रह्मकुलोत्पन्नत्वेन महाकुलीनश्चेति असाधारण्येऽयमवश्यमेवास्याः कन्यायाः परिणयनयोग्य इत्यत्र किं वक्तव्यमस्मीति भावः। ब्रह्मणः पुत्रः पुलस्त्यः तस्य पुत्रः विश्रवाः तस्य पुत्रो रावण इति परमेष्ठिप्रपौत्रत्वमस्येत्यनुसन्धेयम्॥ २६४॥

अपकर्त्तेति। अहम् अपकर्त्ता अहितकारी अस्मि इति बुद्ध्येति शेषः ते तव मनसि भयं मत्त इति शेषः माभूत् न भवतु। मे मम खड्गः असिः विमुखेषु पराङ्मुखेषु भीतेष्विति भावः प्रहर्त्तुं प्रहारं कर्त्तुं जातु कदाचित् न वाञ्छति नेच्छति॥

इति सर्वदैव रूढ़ाहङ्कारः प्रतीयते । सोऽयङ्गर्वप्रकृतिरुद्धतो नाम रसः । केचित् पुनः ।

आस्थामालम्ब्य नीतेषु वशं क्षुद्रेष्वरातिषु ।
व्यक्तिमायाति महतां माहात्म्यमनुकम्पया ॥

इत्येवमूर्जस्वीत्युदात्तपक्षे निक्षिपन्तः पूर्वोक्तमेव गर्वप्रकर्षोदाहरणम् । धृतायुधो यावदहमित्यादि उद्धतनिष्पत्तौ वर्णयन्ति ॥ २६५ ॥

रतिविशेषेषु नैसर्गिकी यथा—

इयं महेन्द्रप्रभृतीनधिश्रियश्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्य्यं मदनस्य निग्रहात् पिनाकपाणिं पतिमाप्तुमिच्छति

अत्र जन्मान्तर वासनया निसर्गत इयं भवति ॥२६६॥

सांसर्गिकी यथा—

भित्वा सद्यः किसलयपुटान् देवदारुद्रुमाणां
ये तत्क्षीरस्रुतिसुरभयो दक्षिणेन प्रवृत्ताः ।

अत्रेति । रूढ़ाहङ्कारः प्रकटाहङ्कारः ।

आस्थामिति । आस्थां यत्नं प्रयासमित्यर्थः आलम्ब्य आश्रित्य वशम् अधीनतां नीतेषु क्षुद्रेषु हीनेषु अरातिषु शत्रुषु अनुकम्पया कृपया महतां माहात्म्य व्यक्तिं प्रकटताम् आयाति प्राप्नोति ॥ २६५ ॥

रतिविशेषेषु इति । नैसर्गिकी स्वाभाविकीत्यर्थः ।

इयमिति । इयं मानिनी मनस्विनी अधिश्रियः अधिकसमृद्धान् चतसृणां दिशाम् अधीशान् इन्द्रयमवरुणकुबेरानित्यर्थः अवमत्य अवज्ञाय मदनस्य कामस्य निग्रहात् दहनादित्यर्थः अरूपहार्य्यं रूपेण सौन्दर्य्येण हर्त्तुमशक्यं पिनाकम् अजगव धनुः पाणौ यस्य तथाविधं हरमित्यर्थः पतिं भर्त्तारम् आप्तुं लब्धुम् इच्छति । अत्रेति जन्मान्तरवासनया पूर्वजननसंस्कारेण निसर्गतः स्वभावतः इय रतिरिति शेषः ॥ २६६ ॥

सांसर्गिकी संसर्गजाता ।

आलिङ्गन्ते गुणवति! मया ते तुषाराद्रिवाताः
पूर्वं स्पृष्टं यदि किल भवेदङ्गमेभिस्तवेति ॥

अत्र शैत्यसौरभ्यादिभिर्वरहिणां उद्वेजनीया अपि वायवः प्रियतमाङ्गसंसर्गसम्भावनया समालिङ्गन्त इति संसर्गादियं रतिर्भवति ॥ २६७ ॥

औपमानिकी यथा—

अपि जनकसुतायास्तच्च तच्चानुरूपं
स्फुटमिह शिशुयुग्मे नैपुणोन्नेयमस्ति।
ननु पुनरिव तन्मे गोचरीभूतमक्ष्णोः
अभिनवशतपत्रश्रीमदास्यं प्रियायाः ? ॥

सेयं सीताविषयिणी रतिः तदुपमानदर्शनेन रामं रमयते ॥ २६८ ॥

आध्यात्मिकी यथा—

भिलेति। हे गुणवति! सौन्दर्य्यादिगुणशालिनि! ये तुषाराद्रिवाताः हिमाद्रिवायवः सद्यः तत्क्षणं देवदारुद्रुमाणां देवदारुतरूणां किसलयपुटान् पल्लवसंश्लेषान् भित्त्वा विश्लिष्य पृथक्कृत्येत्यर्थः तेषां क्षीराणि निर्यासाः तेषां सुरभिभिः स्रावैः सुरभयः सुगन्धाः सन्तः दक्षिणेन दक्षिणदिग्भागेनेत्यर्थः प्रवृत्ताः प्रसृताः ते तुषाराद्रिवाताः मया यदि किल सम्भावनायाम् एभिः वातैः तव अङ्गं पूर्वं प्राक् स्पृष्टं भवेत् इति बुद्ध्येति भावः आलिङ्गन्ते आश्लिष्यन्ते ॥ २६७ ॥

अपीति। इहास्मिन् शिशुयुग्मे बालकयुगले जनकसुतायाः सीतायाः तच्च तच्च अनुरूपं सौसादृश्यमिति यावत् अपि नैपुणेन विशेषपर्य्यवेक्षणेन उन्नेयं लक्षणीयं स्फुटं स्पष्टम् अस्ति। प्रियायाः जानक्याः अभिनवं यत् शतपत्रं कमलं तस्येव श्रीर्विद्यतेऽस्येति तथाभूतं सद्यः प्रफुल्लपद्मनिभमित्यर्थः तत् आस्यं वदनं पुनरिव मे मम अक्ष्णोः चक्षुषोः गोचरं विषयं ननु किम् ? ॥ २६८ ॥

कामं प्रत्यादिष्टं स्मरामि न परिग्रहं मुनेस्तनयाम् ।
बलवत्तु दूयमानंप्रत्याययतीव मे चेतः ।

अत्र सेयं दुर्वाससः शापाद्विस्मृतविवाहादिवृत्तान्तस्य दुष्मन्तस्य शकुन्तलायां रतिरध्यात्मं भवति ॥ २६९ ॥

आभियोगिकी यथा,—

अलसवलितमुग्धस्निग्धनिष्यन्दमन्दैः
अधिकविकसदन्तर्विस्मयस्मेरतारैः ।
हृदयमशरणं मे पक्ष्मलाक्ष्याः कटाक्षैः
अपहृतमपविद्धं पीतमुन्मूलितञ्च ॥

सेयमनुरागातिशयसूचकमालतीकटाक्षाभियोगे माधवस्य रतिरेवोत्पद्यते ॥ २७० ॥

काममिति । मुनेः कण्वस्य तनयां दुहितरं शकुन्तलां परिग्रहं स्वेन परिणीतामिति यावत् न स्मरामि न जानामीत्यर्थः अतः कामं यथेच्छतः प्रत्यादिष्टा निराकृता न गृहीतेत्यर्थः प्रत्यादेशो निराकृतिरित्यमरः । प्रत्यादिष्टामिति पाठे प्रत्यादिष्टां मुनेस्तनयां परिग्रहं न स्मरामीत्यन्वयः । प्रत्यादिष्टमिति पाठे भावप्रयोगः । तु किन्तु बलवत् अतीव दूयमानं तप्यमानं निराकरणादिति भावः मे मम चेतः चित्तं प्रत्याययतीव परिग्रहत्वेन विश्वासयतीवेत्यर्थः । अत्र रतिरध्यात्मं भवति अध्यात्मम् आत्मानमधिकृत्येत्यध्यात्मम् अव्ययीभावसमासः ॥ २६९ ॥

अलसेति । पक्ष्मणि शोभनघनरोमराजिशोभिते इत्यर्थः अक्षिणी नयने यस्याः तथाभूतायाः मालत्या इति शेषः अलसं मन्थरं यथा तथा वलिताः चलिताः मुग्धाः सुन्दराः मनोज्ञा इत्यर्थः स्निग्धाः स्नेहमया इत्यर्थः निष्यन्दाः अचञ्चलाः मन्दाः अल्पाः तैः अधिकं यथा तथा विकसन् प्रसरन् महर्शनेनेति भावः अन्तर्विस्मयः अपूर्वोऽयं युवेति आभ्यन्तरिकचमत्कारबुद्धिरिति यावत् तेन स्मेरा विकसन्ती तारा कनीनिका येषु तैः कटाक्षैः अपाङ्गावलोकनैः मे मम अशरणम्

साम्प्रयोगिकी यथा,—

उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या।
हुं हुं मुञ्च मम मेति च मन्दं जल्पितं जयति मानधनायाः॥

अत्र तर्जनार्थमोक्षार्थवारणार्थानां मन्दं मन्दं प्रयोगान्मानवत्या संप्रयोगे रत्युत्पत्तिः प्रतीयते॥ २७१॥

आभिमानिकी यथा,—

इयं गेहे लक्ष्मीरियममृतवर्त्तिर्नयनयोः
असावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो? यदि परमसह्यस्तु विरहः॥

अत्र रुचिविशेषोऽभिमानस्तत एवंप्राया रतयो भवन्ति॥२७२

निरुपायं हृदयं चित्तम् अपहृतं चोरितम् अपविद्धं पातितं पीतं पानीयवत् भक्षितम् उन्मूलितम् उत्पाटितञ्च॥ २७०॥

उन्नमय्येति। प्रियतमे प्रेयसि हठवृत्त्या सहसेत्यर्थः सकचग्रहं केशग्रहणपूर्वमित्यर्थः आस्यं वदनम् उन्नमय्य उत्तोल्य चुम्बति सति मानधनायाः मानिन्याः कान्तायाः हुम् हुम् मुञ्च त्यज्य मम मा वदनं चुम्बेति भावः इति मन्दं मृदु जल्पितं भाषितं जयति सर्वोत्कर्षेण शोभते इत्यर्थः॥

अत्र तर्जनार्थेति। तर्जनार्थो हुम् हुम् शब्दः, मोक्षार्थो मुञ्चेतिशब्दः वारणार्थो माशब्दः॥ २७१॥

इयमिति। इयं जानकी गेहे भवने लक्ष्मीः मूर्त्तिमती श्रीरित्यर्थः। इयं नयनयोः चक्षुषोः अमृतवर्त्तिः सुधातूलिका नितरां नेत्रानन्दकरीत्यर्थः। अस्याः जानक्याः असौ अनुभूयमान इति भावः स्पर्शः वपुषि शरीरे बहुलः प्रभूतः चन्दनरसः चन्दनद्रवः। अयं कण्ठे बाहुः भुजः शिशिरः शीतलः मसृणः अपरुषः मौक्तिकसरः मुक्तादाम। अस्याः जानक्याः किं प्रेयः प्रीत्यतिशयकरं न? अपि तु

वैषयिकीषु शब्दे यथा,—

विलासमसृणोल्लसन्मुसललोलदोःकन्दली
परस्परपरिस्खलद्वलयनिःस्वनोद्धन्तुराः ।
हरन्ति कलहुङ्कृतिप्रसभकम्पितोरःस्थली-
लुठद्गमकसङ्कुलाः कलमकण्डिनीगीतयः ॥ २७३ ॥

स्पर्शे यथा,—

बध्नन्नङ्गेषु रोमाञ्चं कुर्वन् मनसि निर्वृतिम् ।
नेत्रे निमीलयन्नेष प्रियास्पर्शः प्रवर्त्तते ॥ २७४ ॥

रूपे यथा,—

ता राघवं दृष्टिभिरापिबन्त्यः नार्य्यो न जग्मुर्विषयान्तराणि ।

सर्वमेव प्रेय इत्यर्थः तु किन्तु यदि विरहः विच्छेदः भवेदिति शेषः स परं केवलम् अत्यन्तं वा असह्यः सोढुमशक्य इत्यर्थः अतीव अप्रीतिकर इति भावः ॥ २७२ ॥

वैषयिकीति । विषयाः शब्दस्पर्शरूपरसगन्धाः तत्सम्बन्धात् वैषयिकी रतिर्भवति । तत्र शब्दादिक्रमेणोदाहरणानि यथा ॥

विलासेति । विलासेन विभ्रमविशेषेण मसृणं मृदु यथा तथा उल्लसता पतनोत्पतनवतेत्यर्थः मुषलेन कण्डनसाधनाङ्गविशेषेण तच्चालनेनेति भावः लोले चञ्चले ये दोः कन्दल्यौ भुजलते तयोः परस्परम् अन्योन्यं परिस्खलतां स्रथीभवता वलयानां निस्वनेन झणत्कारेण उद्धन्तुराः उत्तुङ्गाः उत्तराला इत्यर्थः कला मधुरास्फुटा या हुङ्कृतिः हुम्हुम् इत्याकारः शब्द इत्यर्थः तया प्रसभं बलवत् यथा तथा कम्पिता या उरःस्थली वक्षस्थलमित्यर्थः तत्र लुठता गमकेन हारविशेषेण तदीयरणनेनेति भावः सङ्कुला व्याप्ताः वर्द्धिता इति भावः कलमकण्डिनीनां धान्यकण्डनकारिणीनां गीतयः गानानि हरन्ति प्रीणयन्ति इत्यर्थः ॥ २७३ ॥

बध्नन्निति । अनुभवगोचर इति भावः प्रियायाः स्पर्शः अङ्गेषु शरीरेषु रोमाञ्चं बध्नन् जनयन् मनसि निर्वृतिं सुखातिशयं कुर्वन् अर्पयन्नित्यर्थः नेत्रे नयने निमीलयन् आनन्दातिशयात् सङ्कोचयन् प्रवर्त्तते प्रकर्षेण विलसतीत्यर्थः ॥ २७४ ॥

तथा हि शेषेन्द्रियवृत्तिरासां सर्वात्मना चक्षुरिव प्रविष्टा ? ॥२७॥

रसे यथा,—

कस्य नो कुरुते तन्वि ! पिपासाकुलितं मनः।
अयं ते विद्रुमच्छायो मरुमार्ग इवाधरः ? ॥ २७६ ॥

गन्धे यथा,—

रन्धणकम्मणिउणिए मालुरसुरत्तपाडलसुअन्धं।
मुहमारुअं पिअन्तो धूमाइ सिही ण पज्जलइ ॥२७७॥

ता इति। ताः नार्य्यः पुरसुन्दर्य्यः दृष्टिभिः नयनैः रघोरपत्यं राघवः तं रघुनन्दनमित्यर्थः आपिबन्त्यः सातिशयं पश्यन्त्य इत्यर्थः विषयान्तराणि वाञ्छानि वस्तूनीत्यर्थः न जग्मुः नावबुध्यन्त। तथाहि तमेवार्थं जानीहि आसां नारीणां शेषेन्द्रियवृत्तिः शेषाणां चक्षुर्व्यतिरिक्तानाम् इन्द्रियाणां श्रोत्रादीनामित्यर्थः वृत्तिर्व्यापारः चक्षुरिव नयनमिव प्रविष्टा अधिष्ठिता नीचेत् कथं तेषां व्यापाराभाव इति भावः ॥ २७५ ॥

कस्येति। हे तन्वि ! कृशाङ्गि ! ते तव अयं विद्रुमच्छाया प्रवालकान्तिः अधरः मरुमार्गः मरुदेशीयः पन्था इव कस्य जनस्य मनः पिपासया आकुलितं नो कुरुते ? अपि तु सर्वस्यैव कुरुते इत्यर्थः तवाधररसपानं सर्वेषामेव कामिनां वाञ्छनीयमिति भावः ॥ २७६ ॥

रन्धनकर्मनिपुणाया मालूरसुरक्तपाटलसुगन्धम्।
मुखमारुतं पिबन् धूमायते शिखी न प्रज्वलति ॥

रन्धनेति। रन्धनकर्मणि पाकव्यापारे निपुणा दक्षा विचक्षणेति यावत् काचित् महिलेति शेषः तस्याः मालूरं श्रीफलं तथा सुरक्तं सुविकसितं यत् पाटलं पाटलापुष्पमित्यर्थः गोलापपुष्पमिति प्रसिद्धं तद्वत् सुगन्धं मुखमारुतं वदनसौरभमित्यर्थः पिबन् आस्वादयन्निति भावः शिखी अग्निः धूमायते धूममुद्गिरति न प्रज्वलति। धूमोद्गारे पुनः पुनः फूत्कारदानात् मुखसौरभप्राप्तिरिति भावः धूमायसे शिखी न प्रज्वलसीति पाठान्तरम् ॥ २७७ ॥

प्रीतिविशेषेषु नैसर्गिकी यथा,—

आलक्ष्यदन्तमुकुलाननिमित्तहासैः
अव्यक्तवर्णरमणीयवचःप्रवृत्तीन् ।
अङ्कागतान् प्रणयिनस्तनयान् वहन्तो
धन्यास्तदङ्गरजसा मलिनीभवन्ति ॥

अत्र यदा रति र्जायते तदा पुत्रेषु स्निह्यति पुत्ररूपेण वा जायत इति जन्मान्तरवासनारूपो निसर्गः सङ्गच्छते ॥२७८

सांसर्गिकी यथा,—

विश्वम्भरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते ।
तेषां वधू स्तमसि नन्दिनि ! पार्थिवानां
येषां कुलेषु सविता च गुरु र्वयञ्च ॥

अत्र विश्वम्भरादिसंसर्गात् सीतायां वशिष्ठमिश्राः स्निह्यन्ति ॥ २७९ ॥

आलक्ष्येति । अनिमित्तहासैः निमित्तं विना हसितैः आलक्ष्याणि स्पष्टदृश्यानि दन्तमुकुलानि दशनकोरकाः येषां तान् अव्यक्तैः अस्पष्टैः वर्णैः रमणीया मनोहारिण्यः वचसां वाक्यानां प्रवृत्तयः प्रसराः येषां तान् अङ्कागतान् क्रीडवर्त्तिनः प्रणयिनः प्रेमपूर्णान् तनयान् पुत्रान् वहन्तः धारयन्तः धन्याः पुण्यवन्तः जनाः तेषां तनयानाम् अङ्गरजसा गात्ररेणुना अमलिना मलिना भवन्तीति मलिनीभवन्ति अङ्कागतप्रणयिन इति पाठस्तु समीचीनः अङ्के क्रीडे आगतम् आगमनं प्रणयन्ति प्रार्थयन्ते इति तथोक्तानित्यर्थः ॥ २७८ ॥

विश्वम्भरेति । भगवती देवी विश्वं बिभर्त्तीति विश्वम्भरा पृथ्वी भवतीं त्वाम् असूत प्रसूतवती, प्रजापतेः परमेष्ठिनः समः सदृशः राजाः जनकः ते तव पिता । हे नन्दिनि ! पुत्रि ! आनन्दयित्रि ! वा येषां कुलेषु वंशेषु सविता च सूर्यश्च गुरुः

औपमानिकी यथा,—

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
वटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्।
पुनरपि शिशुर्भूत्वा वत्सः स मे रघुनन्दनो।
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम्॥
अत्र रामोपम्याल्लवे जनकः प्रीयते॥ २८०॥

आध्यात्मिकी यथा,—

परितस्तं पृथासूनुः स्नेहेन परितस्तरे।
अविज्ञातेऽपि बन्धौ हि बलात् प्रह्लादते मनः॥
अत्र अविज्ञातोऽपि वासवः स्वसूनुम् अर्जुनं दृष्टः प्रीणयति॥ २८१॥

आदिपुरुषः, वयञ्च गुरव इति शेषः तेषां पार्थिवानां राज्ञां त्व वधूः असि भवसि॥ २७९॥

कुवलयेति। कुवलयदलवत् नीलोत्पलपत्रवत् स्निग्धः श्यामः स्नेहवर्णी श्यामलः शिखण्डकः काकपक्षः बालास्तु शिखा प्रोक्ता काकपक्षः शिखण्डक इत्यमरः मण्डनं भूषणं यस्य तथोक्तः शिखण्डकेनातितरां शोभमान इत्यर्थः पुण्या पावनी श्रीः शोभा कान्तिर्वा यस्य तथाभूतः श्रियैव देहप्रभयैव वटूनां मानवकानां परिषदं समूहं दलमित्यर्थः सभाजयन् अलङ्कुर्वन् कोऽयं पुनरपि स मे मम वत्सः रघुनन्दनः रामः शिशुर्भूत्वा दृष्टइव इवशब्दोऽत्राध्याय्यः झटिति सहसा दर्शनमात्रेणैवेति भावः दृशोः नयनयोः अमृताञ्जनं सुधाकज्जलं कुरुते नितरां नयनानन्दं जनयतीत्यर्थः॥ २८०॥

परित इति। पृथायाः कुन्त्याः सूनुरर्जुनः तमिन्द्रं परितः इन्द्रसमक्षमित्यर्थः स्नेहेन प्रेम्णा परितस्तरे परिव्याप्तः स्नेहाकुलोऽभूदित्यर्थः। हि यतः बन्धौ रक्तसम्बन्धादिना मित्रभूते जने अविज्ञातेऽपि सोऽयं सम्बन्धीत्येवमविदितेऽपि मनश्चित्तं बलात् वेगेन सहसेत्यर्थः प्रह्लादते आनन्दमनुभवतीत्यर्थः॥ २८१॥

आभियोगिकी यथा,—

दुःखैकबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्त्ता ।
इत्याहृतेन कथितौ रघुनन्दनेन
व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥

अत्र सीतान्वेषणादेरभियोगाद् रामस्य सुग्रीवविभीषणयोः प्रीतिरुत्पद्यते ॥ २८२ ॥

साम्प्रयोगिकी स्थाने आभ्यासिकी यथा,—

इति विस्मृतान्यकरणीयमात्मनः सचिवावलम्बितधुरं नराधिपम्
परिवृद्धरागमनुबद्धसेवया मृगया जहार चतुरेव कामिनी २८३

अत्र,

शब्दादिभ्यो बहिर्भूता या कर्माभ्यासलक्षणा ।

दुःखेति । अयं पुरोवर्त्तीति हस्तनिर्देशः । ऋक्षाणां भल्लूकानां हरीणां वानराणाञ्च ईश्वरः अधिपतिः सुग्रीव इत्यर्थः मे मम दुःखेषु विपत्सु एकः अद्वितीयः बन्धुः सखा एषः सम्मुखवर्त्ती पुलस्त्यस्य अपत्यं पुमान् पौलस्त्यः विभीषण इत्यर्थः समरेषु सग्रामेषु पुरः अग्रतः प्रहर्त्ता सेनापतिरिति भावः । इत्येवं आहृतेन आदरवता रघुनन्दनेन रामेण कथितौ निर्दिष्टौ उभौ सुग्रीवविभीषणौ भरतः लक्ष्मणं व्युत्क्रम्य परित्यज्य प्रागनभिवन्द्येति भावः ववन्दे प्रणनाम ॥ २८२ ॥

इतीति । मृगया चतुरा निपुणा वशीकरणपटुरित्यर्थः कामिनीव कान्तेव इत्येवम् आत्मनः स्वस्य विस्मृतानि अन्यानि करणीयानि कार्याणि येन तथोक्तं सचिवैः अमात्यैः अवलम्बिता गृहीता धूः राज्यचिन्ताः राज्यभारो वा यस्य तथाविधं धूः स्त्री स्याद्भारचिन्तयोरित्यमरः । अनुबद्धा क्रमिकीत्यर्थः निरन्तरेति यावत् या सेवा परिचर्या तया परिवृद्धः वृद्धिं गतः रागः आसक्तिविशेषः यस्य तथाभूतं नराधिपं राजानं जहार आचकर्ष वशीचकारेत्यर्थः ॥ २८३ ॥

शब्दादिभ्य इति । शब्दादिभ्यः शब्दस्पर्शरूपरसगन्धेभ्य इत्यर्थः बहिर्भूता

प्रीतिः साऽभ्यासिकी ज्ञेया मृगयादिषु कर्मसु ॥
इति लक्षणं घटते ॥ २८४ ॥

आभिमानिकी यथा,—

दत्तेन्द्राभयदक्षिणैर्भगवतो वैवस्वतादामनोः
दृप्तानां दहनाय दीपितनिजक्षात्रप्रतापाग्निभिः ।
आदित्यैर्यदि विग्रहो नृपतिभि र्धन्यं ममैतत् ततो
दीप्तास्त्रस्फुरदुग्रदीधितिभरै र्नीराजितज्यं धनुः ॥

अत्राभिमतप्रतिद्वन्द्विलाभात् लवानुपदी कुशस्तुष्यति ॥२८५

वेषयिकी यथा,—

लावण्यैः क्षणदाविराममधुराः किञ्चिद्विनिद्रालसं
श्रोत्रैः सव्रणमुग्धचारणवधूदन्तच्छदावासिनः ।

विश्लिष्टा कर्मणः अभ्यासः आश्लेषेन लक्षणं यस्याः तथाभूता या प्रीतिः सा मृगयादिषु कर्मसु व्यापारेषु आभ्यासिकी ज्ञेया वेदितव्या ॥ २८४ ॥

दत्तेति । भगवतः अशेषशक्तिसम्पन्नात् देवरूपादिति भावः विवस्वतः सूर्यस्यापत्यं पुमान् वैवस्वतः तस्मात् मनोः आ तमारभ्येत्यर्थः अभिविधावाङ् योगे पञ्चमी । दत्ता इन्द्राय अभयदक्षिणा यैः तथोक्तैः इन्द्रसहकारिभिरिति भावः दृप्तानां दर्पशालिनाम् असुराणां राज्ञां वा दहनाय भस्मीकरणाय विनाशायेति यावत् दीपिता निजाः स्वकीयाः क्षत्रप्रतापाः क्षात्रतेजांस्येव अग्नयः यैः तथाभूतैः आदित्यैः आदित्यः सूर्यः तस्यापत्यानि पुमांसः तैः सूर्यवंशीयैरित्यर्थः नृपतिभिः राजभिः यदि विग्रहः संग्रामः भवेत् ममेति शेषः ततः तदा मम एतत् दीप्तानां ज्वलताम् अस्त्राणां स्फुरन्त्यः उल्लसन्त्यः उग्राः तीक्ष्णाः या दीधितयः किरणाः तासां भरैः अतिशयैः नीराजिता उद्भासिता ज्या मौर्वी यस्य तथाभूतं धनुः कार्मुकं धन्यं सफलमिति यावत् भवेदिति शेषः ॥ २८५ ॥

लावण्यैरिति । लावण्यैः सिन्धुदेशीयैः क्षणम् उत्सवं ददातीति क्षणदा रात्रिः तस्या विरामे अवसाने मधुराः मनोहराः सव्रणाः कान्तदन्तक्षतजनितव्रण-

पीयन्ते मृदुवक्त्रपीतमरुतः पौराणगीतिक्रम-
व्यालोलाङ्गुलिरुद्धमुक्तसुषिरश्रेणीधरा वेणवः ॥ २८६ ॥

स्पर्शे तथा,—

प्रशान्तघर्माभिभवः शनैः विवान्
विलासिनीभ्यः परिमृष्टपङ्कजः ।
ददौ भुजालम्बमिवात्तशीकरः
तरङ्गमालान्तरगोचरोऽनिलः ॥ २८७ ॥

चिङ्गिता इत्यर्थः सुग्धाना सुन्दरीणा सुग्धःसुन्दरमूढयोरिति शेषः चारणवधूनां नटीनामित्यर्थः ये दन्तच्छदाः अधराः तेषु आवसन्तीति तथोक्ताः मृदुना कोमलेन अल्पमेति भावः वक्त्रेण वदनेन मुखच्छिद्रेणेति यावत् पीताः कवलिताः मरुतः वाताः यैः तथाविधाः पौराणी पुरातनी एकरूपत्वेन नित्यगीयमानेति भावः या गीतिः प्राभातिकीति भावः तस्याः क्रमेण नियमेन व्यालोलाभिः पेलाभिः अङ्गुलिभिः रुद्धाः बद्धाः तथा मुक्ताः त्यक्तरोधा इत्यर्थः याः सुषिरश्रेणयः रन्ध्र-निचयाः तासां धरन्तीति धराः पचाद्यच्प्रत्ययः। तद्वन्त इत्यर्थः वेणवः वाद्य-भेदाः लक्षणया तन्निस्वना इति भावः किञ्चित् ईषत् असम्यगित्यर्थः विगता या निद्रा तया अलस मन्द यथा तथा श्रावैः श्रवणेन्द्रियैः पीयन्ते सादरम् आकर्ण्यन्ते इति यावत् ॥ २८६ ॥

प्रशान्तेति। प्रशान्तः प्रकर्षेण शान्तिं नीतः घर्माभिभवः ग्रीष्मजनितक्लेश इत्यर्थः येन तथोक्तः, परिमृष्टानि स्पृष्टानि पङ्कजानि पद्मानि येन तथाविधः एतेन सौगन्ध्यसम्पत्तिः सूचिता। शनैः मन्दं यथा तथा विवान् प्रवहन् एतेन मान्द्योक्तिः। तरङ्गाणाम् ऊर्मीणां मालाः श्रेणयः तासाम् अन्तरम् अभ्यन्तरं गोचरः विषयः यस्य तथाभूतः अतएव आत्ताः गृहीताः शीकराः अम्बुकणाः येन तथाविधः शीकरोऽम्बुकणः स्यात् इत्यमरः एतेन शैत्यं सूच्यते। अनिलः वायुः विलासिनीभ्यः कामिनीभ्यः निदाघक्लान्ताभ्य इति भावः। भुजालम्बमिव हस्ता-वलम्बनमिव ददौ दत्तवान् यथा कश्चित् कूपरूपविपत्पतितान् हस्तेन उद्धरति तथा निदाघरूपविपत्पतिताः विलासिनीः शान्तिं निनायेति भावः ॥ २८७ ॥

रूपे यथा,—

अयमभिनवमेघश्यामलोत्तुङ्गसानुः
मदमुदितमयूरीबद्धविश्रब्धनृत्यः ।
शकुनिशबलनीलानोकहस्निग्धवर्ष्मा
वितरति बृहदश्मा पर्वतः प्रीतिमक्ष्णोः ॥ २८८ ॥

रसे यथा,—

इक्षुदण्डस्य मण्डस्य दध्नः पिष्टघृतस्य च ।
वाराहस्य च मांसस्य सोऽयं गच्छति फाल्गुनः ॥२८९॥

गन्धे यथा,—

कपोलकण्डूः करिभिर्विनेतुं विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः सानूनि गन्धः सुरभीकरोति ॥२९०

अयमिति । अभिनवैः नवोदितैः मेघैः जलधरैः श्यामलाः श्यामवर्णाः उत्तुङ्गाः उन्नताः सानवः प्रस्थदेशाः यस्य तथोक्तः सुः प्रस्थः सानुरस्त्रियामित्यमरः । मदेन उल्लासेन मेघदर्शनादिति भावः मुदिताः प्रहृष्टाः या मयूर्य्यः, ताभिः बद्धम् आरब्धं विश्रब्धं निःशङ्कं यथा तथा नृत्यं यत्र तथाविधः, शकुनिभिः पक्षिभिः शबलाः चित्रा विविधवर्णा इत्यर्थः । नीलाः श्यामलाः ये अनोकहाः वृक्षाः तैः स्निग्धं शीतलं वर्ष्म शरीरं यस्य तथाभूतः । तथा बृहन्तः विपुलाः अश्मानः प्रस्तराः यत्र तथाभूतः अयं पर्वतः अक्ष्णोः चक्षुषोः प्रीतिं वितरति ददाति ॥२८८॥

इक्षुदण्डस्येति । इक्षुदण्डस्य इक्षुकाण्डस्य मण्डस्य ओदनात् विक्लिन्नात् प्राक् निर्गाल्यमानरसविशेषस्य दध्नः प्रसिद्धस्य पिष्टघृतस्य घृतभृष्टपिष्टकस्येत्यर्थः तथा वराहस्य इदं वाराहं शौकरं तस्य मांसस्य उपयोगीति शेषः सोऽयं फाल्गुनः फल्गुनीनक्षत्रयुक्ता पौर्णमासी यत्र मासे स मासः फाल्गुनः गच्छति अतिक्रामति । फाल्गुने इक्षुदण्डादयोऽतीव व्यवक्रियन्ते इति भावः ॥ २८९ ॥

कपोलेति । यत्र हिमाद्रौ करिभिः हस्तिभिः कपोलकण्डूः गण्डकण्डूतीः विनेतुं निरसितुं विघट्टितानां विशेषेण घर्षितानां सरलद्रुमाणां देवदारुवृक्षाणां स्रुतानि निःसृतानि क्षीराणि निर्य्यासा येभ्यः येषां वा तेषां भावः तत्ता तया

उपलक्षणञ्चैतत् * । तेन उत्साहस्य युद्धदानदयावीरादयः क्रोधस्य भीममन्युत्रासादयः हासस्य स्मितहसितविहसितादयः प्रसुप्तप्रलयमत्वादीनां स्वप्नमरणशमादयो भेदा जायन्ते। तत्र यद्यपि अजित्वा सार्णवामुर्वीम् इत्यनेन युद्धवीरः, अनिष्ट्वा विविधैर्मखैः इत्यनेन दानवीरः, अदत्त्वा चार्थमर्थिभ्यः इत्यनेन दयावीरश्च उत्साहरूपेण रसनिष्पत्तौ वर्त्तते तथापि एकशोऽप्येतद् रसनिष्पत्तिरस्तीति प्रदर्श्यन्ते ॥ *

तेषु युद्धवीरो यथा,—

एतां पश्य पुरस्तटीमिह किल क्रीड़ाकिरातो हरः
कोदण्डेन किरीटिना सरभसं चूडान्तरे ताडितः।
इत्याकर्ण्य कथाऽद्भुतं हिमनिधावद्रौ सुभद्रापतेः
मन्दं मन्दमकारि येन निजयो र्दोर्दण्डयोर्मण्डनम् ॥२९१॥

प्रसूतः उद्गतः गन्धः सौरभं सानूनि प्रस्थदेशान् तटानित्यर्थः सुरभीकरोति सुगन्धीकरोति ॥ २९० ॥

उपलक्षणञ्चैतत्। स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वमुपलक्षणम्। तथाहि यथा शृङ्गारस्थायिनी रतिभावस्य बहवः प्रकारा उक्तास्तथा वीरादिस्थायिनाम् उत्साहादीनामपि बहवो भेदा इति भावः। तथापि एकश इति। एकशः पृथग्रूपेणेति भावः ॥ *

एतामिति। पुरः अग्रतः एतां तटीं पर्वतैकदेशं पश्य अवलोकय, इह अस्यां किरीटिना अर्जुनेन क्रीड़ाकिरातः क्रीडार्थम् अर्जुनविप्रलम्भार्थमिति भावः किरातवेशधर इत्यर्थः हरः शम्भुः कोदण्डेन धनुषा चूडान्तरे शिरोभागे सरभसं सवेगं यथा तथा ताड़ितः प्रहतः किल प्रसिद्धौ। पुरा पाण्डवः किरीटी हरं घोरेण तपसा प्रीणयामास स तु हरः प्रथमं तदीयोत्कटवीर्यप्रदर्शनार्थं स्वयं किरातराजरूपी कुत्रेन तं प्रकोपयामास। स तु किरीटी तपसा तथा शौर्य-

दानवीरो यथा,—

दधिक्षीरघृताम्भोधिव्यञ्जनस्पृहणीयया ।
महादानोत्सवे यस्य हन्त कारायितं भुवा ॥ २९२ ॥

दयावीरो यथा,—

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं यतस्व ।
दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः ॥

क्रोधस्य यद्यपि भीमादयो विशेषाश्चतुर्विंशतिः सम्भवन्ति तथापि ललिताललितोभयभेदेन रूपेण क्रमेण सर्वसंग्रहात् तत्र त्रयः एव प्रकाराः प्रदर्श्यन्ते ॥ २९३ ॥

कायोऽपि स्व तेजः प्रकटयन् तेन किरातराजेन समं युयुधे । ततश्चातीव सन्तुष्टस्तेन तस्य धैर्येण तस्मै स्वाभिमतं वरं दत्तवानिति पौराणिकी वार्त्ता । हिमनिधौ अद्रौ हिमाद्रावित्यर्थः इत्येव सुभद्रापतेः अर्जुनस्य कथाद्भुतम् अद्भुतां विक्रमकथामित्यर्थः आकर्ण्य श्रुत्वा येन निजयोः दोर्दण्डयोः बाहुदण्डयोः मण्डनम् अलङ्करणं मन्द मन्दम् अकारि कृत नाहं तथा वीर इति दुःखादिति भावः ॥२९१

दधीति । दधिक्षीरघृतानाम् अम्बुधयः समुद्राः दधिसमुद्रः क्षीरसमुद्रः घृतसमुद्रश्चेत्यर्थः तेषां व्यञ्जनेन प्रकटनेन स्पृहणीया प्रार्थनीया आदरणीयेति भावः यत्र तादृशाः सागराः सन्ति सा सर्वैरेव आदरणीया भवतीति भावः । किन्तु तथाभूतया भुवा पृथिव्या यस्य महादानोत्सवे महादानरूपानन्दव्यापारे कारायितं कारा बन्धनागारः तद्वत् आचरितं हन्तेति खेदे हर्षे च । अयं भावः । यथा कारायाः न कोऽपि स्थातुमिच्छति नैव तामाद्रियते तथा अयं दानवीरः अवलीलया तादृशीं स्पृहणीयां निर्जितां महीं कारावत् अर्थिभ्यः त्यजतीति ॥२९२

स इति । सः अङ्गागतसत्त्ववृत्तिः त्वं मम अयं मदीयः तेन देहेन कायेन शरीरवृत्तिं शरीररक्षणसाधनीं जीविकां निर्वर्त्तयितुं सम्पादयितुं यतस्व चेष्टस्व । दिनस्य अवसानेन अत्ययेन उत्सुकः उत्कण्ठितः बालः शिशुः वत्सः यस्याः तथाभूता महर्षेः वशिष्ठस्य इयं धेनुः विमुच्यतां त्यज्यताम् ॥ २९३ ॥

तेषु स्त्रीणां ललितः कोपभावो यथा,—

भ्रूभेदिभिः प्रकम्पोष्ठैः ललिताङ्गुलितर्जनैः ।

यत्र कोपैः कृताः स्त्रीणां सम्प्रसादार्थिनः प्रियाः ॥ २९४ ॥

प्रियापराधजन्मा दुःखोत्पीडो मन्युर्यथा,—

धणुसो गुणवल्लरिविरइअकण्णावअंसदुप्पेच्छे ।

वाहगरुइ णिसम्मइ वाहीए बहुमुहे दिट्ठी ॥

ननु इयमीर्ष्याकस्मात् न भवति ?। नात्र मानदानामर्षणमात्रविवक्षा अपि तु तज्जनितो दुःखातिशय इति ॥२९५ ॥

प्रियादिषु व्याजनिन्दोल्लासो यथा,—

पहवन्ति व्विअ पुरिसा महिलाणं किं खु सुहअ ! विदिओसि ।

अणुराअलुलिआए को दोसो अहिजाईए ॥

भ्रूभेदिभिरिति । यत्र नगर्यां भ्रूभेदिभिः भ्रूभङ्गवद्भिः प्रकम्पः प्रकर्षेण कम्पमानः स्फुरन्नित्यः ओष्ठः येषु तथोक्तैः सकम्पोष्ठैरिति पाठान्तरं ललितानि मनोज्ञानि ललितं त्रिषु सुन्दरमिति विकाण्डशेषः । अङ्गुलिभिः तर्जनानि येषुक्तैः स्त्रीणां कोपैः प्रणयजनितैरिति भावः प्रियाः कान्ताः सम्प्रसाद सम्यगनुग्रहम् अर्थयन्ते इति तथाभूताः कृताः ॥ २९४ ॥

धनुषो गुणवल्लरिविरचितकर्णावतंसदुःप्रेक्ष्ये ।

वाष्पगुर्वी निशम्यते वाहीकवधूमुखे दृष्टिः ॥

धनुष इति । धनुषोऽर्पणेति संस्कृतपाठः प्रामादिकः धनुषो गुणेति पाठो युज्यते । अयमर्थः । धनुषः कार्मुकस्य भूरूपस्येति ध्वन्यते गुणः मौर्वी स इव या वल्लरी मञ्जरी तया विरचितेन कर्णावतंसेन कर्णभूषणेन दुष्प्रेक्ष्यं दुर्दर्शं तस्मिन् धनुर्गुणदर्शनं भयहेतुरिति भावः वाहीकस्य कस्यचित् वहनकारिणः कृषीवलस्येति भावः या वधूः कान्ता तस्या मुखं तस्मिन् वाष्पगुर्वी अश्रुपूर्णेत्यर्थः दृष्टिः निशम्यते दृश्यते ॥ २९५ ॥

प्रभवन्त्येव पुरुषा महिलानां किं खलु सुभग ! विदितोऽसि ।

अनुराग लुलितायाः को दोषोऽभिजातः ॥

प्रभवन्तीति । हे सुभग ! प्रिय ! पुरुषाः पुमांसः महिलानां कामिनीनां

हासस्य यद्यपि उपहासादयो भेदाः सम्भवन्ति तथापि विहसितेन तेषां संग्रहादिति न्यूनाधिकमिति त्रयस्तद्भेदा उदाह्रियन्ते ॥ २९६ ॥

तत्रेषद्धसितं स्मितं यथा,—

पुष्पं प्रवालोपहितं यदि स्यात् मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्य्याद्विशदस्य तस्यास्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य ॥२९७

दृष्टदशनकान्ति हसितं यथा,—

तिमिरनिरुद्धभीमरजनीमुखचन्द्रिकया
गणपतिताण्डवाभिनयदर्शनदीपिकया ।
अभिभवसि त्वमद्य शशिनः श्रियमुत्कटया
दशनमयूखमञ्जरितया हसितप्रभया ॥ ॥ २९८ ॥

प्रभवन्त्येव प्रभवः भवन्त्येव इति किं विदितोऽसि ज्ञातोऽसि ? अनुरागेण प्रेम्णा लुलितायाः वशं गतायाः इत्यर्थः नार्या इति शेषः कः दोषः अभिजातः उत्पन्नः ? न कोऽपि दोष इत्यर्थः केवलं प्रेमैव महिलायाः कान्तप्रभुत्वे हेतुर्नोचेत् कुतः प्रभुत्वमिति व्याजेन निन्दोत्प्रासः ॥ २९६ ॥

पुष्पमिति । यदि पुष्पं कुसुमं प्रवालेन नवकिसलयेन उपहितं युक्तं प्रवालोपश्लिष्टमिति यावत् स्यात् वा अथवा मुक्ताफलं मौक्तिकं स्फुटे विकासं गते विद्रुमे प्रवालाख्यरत्नभेदे तिष्ठतीति तथोक्तं स्यादिति पूर्वेणान्वयः । ततस्तदा तस्याः पार्वत्याः ताम्रे रक्ते ओष्ठे पर्य्यस्ता पतिता रुक् कान्तिर्यस्य तथाभूतस्य स्मितस्य मन्दहसितस्य अनुकुर्य्यात् समीकुर्य्यादित्यर्थः कर्मणि षष्ठी । तादृशं पुष्पं मुक्ताफलं वेति कर्तृपदम् ॥ २९७ ॥

तिमिरेति । हे कान्ते ! इत्यध्याहार्य्यं त्वं तिमिरेण अन्धकारेण निरुद्धा अतएव भीमा भयङ्करी या रजनी रात्रिः तस्या मुखे चन्द्रिका ज्योत्स्ना तया तत्स्वरूपयेत्यर्थः, गणः पुरुषाणां समूह एव पतिः कान्तः गणेशश्च तस्य ताण्डवाभिनयः नृत्याभिनयः तस्य दर्शने दीपिका तया तत्स्वरूपयेत्यर्थः उत्कटया महत्या दशनानां दन्तानां मयूखैः किरणैः मञ्जरिता सञ्जातमञ्जरीका मञ्जरीव आभासमानेत्यर्थः

तदेव सविशेषं विहसितं यथा,—

च्युतामिन्दो र्लेखां रतिकलहभग्नञ्च वलयं
द्वयं चक्रीकृत्य प्रहसितमुखी शैलतनया।
अवोचद् यं पश्येत्यवतु स शिवः सा च गिरिजा
स च क्रीड़ाचन्द्रो दशनकिरणापूरिततनुः॥ २९९॥

सुप्तविशेषः स्वप्नो यथा,—

जाने कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया
सा मा संस्पृश पाणिनेति रुदती गन्तुं प्रवृत्ता पुरः।
नो यावत्परिरभ्य चाटुकशतैराश्वासयामि क्षणं
भ्रातस्तावदहं शठेन विधिना निद्रादरिद्रीकृतः॥ ३००॥

तथाभूतया हसितप्रभया हासश्रिया अद्य शशिनः चन्द्रस्य श्रियं कान्तिम् अभिभवसि तिरस्करोषि। कामपि गणिका प्रति तदुपनायकस्योक्तिरियम्॥ २९८॥

च्युतामिति। शैलतनया पार्वती च्युतां शिरसः भष्टा रतिकलहेनेति भावः इन्दोश्चन्द्रस्य लेखां हरशिरश्चन्द्रकलामित्यर्थः, रतिकलहेन भग्नं दलितं वलयञ्च स्वकरस्थितमिति भावः स्वयं चक्रीकृत्य अर्द्धचन्द्रार्द्धवलययोजनात् वर्त्तुलीकृत्य पश्य अवलोकय पूर्णचन्द्रमिति शेषः इति यम् अवोचत् उक्तवती, स शिवः, सा गिरिजा पार्वती च तथा दशनकिरणैः उभयोः पार्वतीपरमेश्वरयोरिति भावः आपूरिता परिपुष्टा तनुरवयवः यस्य तथाभूतः स क्रीड़ाचन्द्रश्च क्रीडनार्थं पूर्वोक्तोभययोजनात् कृत्रिमचन्द्रश्चेत्यर्थः अवतु रक्षतु अस्मान् युष्मान् वेति शेषः॥ २९९॥

जाने इति। हे भातः! जाने अनुभवामीत्यर्थः। अद्य स्वप्ने निद्रावस्थायां मया कोपेन पराङ्मुखी विमुखी प्रियतमा कान्ता दृष्टा अवलोकिता। सा पाणिना करेण मा न संस्पृश इति उक्तेति शेषः रुदती क्रन्दन्ती पुरः अग्रतः गन्तुं प्रचलितुं प्रवृत्ता उद्यता। अहं यावत् परिरभ्य आलिङ्ग्य क्षणं चाटुकशतैः प्रियवचनसमूहैरित्यर्थः आश्वासयामि प्रसादयामि, तावत् शठेन धूर्त्तेन वञ्चकेनेत्यर्थः विधिना दैवेन निद्रादरिद्रीकृतः विनिद्रः कृत इत्यर्थः। सखायं प्रति प्रोषितस्योक्तिः॥ ३००॥

मूर्च्छाविशेषो मरणं यथा,—

क्षणमात्रसखीं सुजातयोः स्तनयोस्तामवलोक्य विह्वला ।
निमिमील नरेन्द्रसुन्दरी हृतचन्द्रा तमसेव शर्वरी ॥ ३०१॥

मतिविशेषः शमो यथा,—

यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदपि ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ३०२ ॥

एवमन्येऽपि विज्ञेयाः रसा भावादिसंश्रयाः ।
विशेषः प्राप्तकालोऽथ परिपोषो निगद्यते ।
तत्राश्रयस्त्रिधा पुमान् स्त्री तिर्य्यगादयः ॥ ३०३ ॥

क्षणेति । नरेन्द्रस्य नरपतेः सुन्दरी इन्दुमती सुजातयोः सुन्दरयोः स्तनयोः क्षणमात्रसखीं पतनमात्रसङ्गिनीं तां मालाम् अवलोक्य दृष्ट्वा विह्वला विवशा सती तमसा राहुणा तमस्तु राहुः स्वर्भानुरित्यमरः । हृतः तिरोहित इत्यर्थः चन्द्रो यस्याः तथाभूता शर्वरीव रात्रिरिव निमिमील निमिलन चकार ममारेत्यर्थः ॥ ३०१ ॥

यदेति । यदा स्मरः काम एव तिमिरं तमः तस्य संस्कारेण आवेशेन जनितम् उत्पादितम् अज्ञानं मोह इति यावत् आसीत् अस्माकमिति शेषः तदा इदम् अशेषं समस्तं जगत् नारीमयं कान्तामयं दृष्टम् अवलोकितम् । इदानीम् अधुना पटुतरः समुज्ज्वलतरः यो विवेकः सदसद्ज्ञानमित्यर्थः स एव अञ्जनं कज्जलं तज्जुषां तत्सेविनां तादृशविवेकवतामित्यर्थः अस्माकं दृष्टिः समीभूता समतां प्राप्ता असारताज्ञानेन सर्वं लोष्टकाञ्चनादिकं समभित्येवं दर्शनमिति भावः त्रिभुवनमपि त्रिलोकीतलगतं सर्वमेव वस्तु इत्यर्थः ब्रह्म मनुते अवधारयति सर्वं ब्रह्ममयं जगदिति श्रुतेरिति भावः ॥ ३०२ ॥

एवमिति । अन्येऽपि शृङ्गारवीरादिव्यतिरिक्ता अपि भावादिसंश्रयाः भावाद्यवलम्बना रसा विज्ञेयाः वेदितव्याः । अथेदानीं प्राप्तकालः समयोचित इति यावत् विशेषः विलक्षण इत्यर्थः परिपोषः पुष्टिः स्फुरणमिति

तेषु पुमान् यथा,—

आश्चर्य्यमुत्पलदृशो वदनामलेन्दु-
सान्निध्यतो मम मुहु र्जडिमानमेत्य ।
जाड्येन चन्द्रमणिनेव महीधरस्य
सम्भार्य्यते द्रवमयो मनसा विकारः ॥ ३०४ ॥

स्त्री यथा,—

तेनाथ नाथदुरुदाहरणातपेन
सौम्यापि नाम परुषत्वमभिप्रपन्ना ।
जज्वाल तीक्ष्णविशदाः सहसोद्गिरन्ती
वागर्च्चिषस्तपनकान्तशिलेव सीता ॥ ३०५ ॥

तिर्य्यगादिषु यथा,—

उत्कूजति श्वसिति मुह्यति याति तीरं
तीरात् तरुं तरुतलात् पुनरेव वापीम् ।

यावत् रसानामिति शेषः निगद्यते कथ्यते। परिपीष इत्यत्र परिशेष इति पाठान्तरम्

तत्रेति। तत्र परिपीषे परिपीषस्थेत्यर्थः आश्रयः अवलम्बनम् ॥ ३० ३ ॥

आश्चर्य्यमिति। मम मनसा चित्तेन उत्पले नीलपद्मे इव दृशौ यस्याः तथाभूतायाः कान्तायाः इतिशेषः वदनम् अमलः निर्मल इन्दुश्चन्द्र इव वदनामलेन्दुः तस्य सान्निध्यतः सन्निधावस्थानादित्यर्थः मुहुः पौनःपुन्येन जडिमानं जाड्यं शैत्यातिशयमित्यर्थः पुनः पुनर्वदनचन्द्रदर्शनजनितेनानन्देनेति भावः एत्य प्राप्य जाड्येन चन्द्रमयूखस्पर्शजनितेन शैत्येनेति यावत् हेतुना महीधरस्य पर्वतस्य चन्द्रमणिनेव चन्द्रकान्तोपलेनेवेत्यर्थः द्रवमयः रसमय इत्यर्थः विकारः विकृतिभावः सम्भार्य्यते गृह्यते। सखायं प्रति कस्यचित् कामिनः उक्तिः ॥ ३०४॥

तेनेति। अथानन्तरं सीता जानकी सौम्यापि शान्तप्रकृतिरपि तेन पूर्वोक्तेन नाथस्य पत्युः रामस्य दुरुदाहरणेन दुर्वचसेत्यर्थः परुषत्वं तीक्ष्णत्वं अभिप्रपन्ना प्राप्ता कुपितेति यावत् तपनकान्तशिलेव सूर्य्यकान्तदृषदिव सहसा तत्क्षणमित्यर्थः

वाप्यां न रज्यति न चात्ति मृणालखण्डं
चक्रः क्षपासु विरहे खलु चक्रवाक्याः ॥ ३०६ ॥

विषयस्त्रिधा चेतनस्तिर्य्यगचेतनश्च ।

तेषु चेतनो यथा,—

इयं सा लोलाक्षी त्रिभुवनललामैकवसतिः
स चायं दुष्टात्मा स्वसुरपकृतं येन मम तत् ।
इतस्तीव्रः कामो गुरुरयमितः क्रोधदहनः
कुतो वैषम्यायं कथमिदमिति भ्राम्यति मनः ॥ ३०७ ॥

तिर्य्यग् यथा,—

आयाते दयिते मरुस्थलभुवां सञ्चिन्त्य दुर्लङ्घ्यतां
गेहिन्याः परितोषवाष्पतरलामासज्य दृष्टिं मयि ।

तीक्ष्णाः कठिनाः विशदाः स्पष्टाश्च ताः वाचः अर्चिष इव ज्वाला इव वागर्चिषः उद्गिरन्ती उद्वमन्ती प्रकटयन्तीति यावत् सती जज्वाल भृशं सन्तापमवापेत्यर्थः ॥ ३०५ ॥

उत्कूजतीति । चक्रः चक्रवाकः पक्षिविशेषः क्षपासु रजनीषु चक्रवाक्याः स्वभार्यायाः विरहे उत्कूजति उच्चैः रौति, श्वसिति दीर्घनिश्वासं त्यजति, मुह्यति मोहं प्राप्नोति, तीरं तटं जलाशयस्येति भावः याति तव प्रिया गतेति भ्रान्त्येति भावः एवम् उत्तरत्र । तीरात् तरुं याति, तरुतलात् पुनरेव वापीं सरसीं यातीति पूर्वेणान्वयः । वाप्यां सरसि न रज्यति न तुष्यति, मृणालखण्डं नच अत्ति नच खादति । खल्विति कविसमयप्रसिद्धिसूचकम् ॥ ३०६ ॥

इयमिति । सा यदर्थं मया सततं चिन्त्यते यदर्थञ्च मम सर्वनाशो जात इति भावः इयं पुरो वर्त्तमानेति हस्तनिर्देशः लोलाक्षी चपलनयना जानकीति शेषः । अयञ्च द्वारस्थितश्चेति भावः सः मम सर्वनाशक इति भावः दुष्टात्मा दुराचारः राम इति शेषः येन रामेण मम स्वसुः भगिन्याः सूर्पणखाया इत्यर्थः तत् नासाकर्णच्छेदनरूपमिति भावः अपकृतं अनिष्टमाचरितम् । इतः अस्यां जानक्यां तीव्रः दुष्परिहर इति भावः कामः भोगासक्तिरिति यावत् । इतः अस्मिन् रामे

दत्त्वा पीलुशमीकरीरकवलान् स्वेनाञ्चलेनादरात्
उन्मृष्टं करभस्य केसरसटाभाराग्रलग्नं रजः ॥ ३०८ ॥

अचेतनो यथा,—

क्षिप्तं पुरो न जगृहे मुहुरिक्षुकाण्डं
नापेक्षते स्म निकटोपगतां करेणुम् ।
सस्मार वारणपतिः परिमीलिताक्ष
इच्छाविहारवनवासमहोत्सवान्तम् ॥
ज्ञानं त्रिधा दृष्टं श्रुतम् अनुमानञ्च ॥ ३०९ ॥

अयं गुरुः महान् क्रोधदहनः कोपाग्निः । अयञ्च वेषः जानकीप्राणनाशार्थमुत्कटः परिच्छद इति यावत् कृतः धृतः । इदं जानकीहननं कथं केन प्रकारेण क्रियते इति शेषः इति हेतोः मनः भाम्यति दोलायमानं तिष्ठतीत्यर्थः रावणस्योक्तिरियम् ॥ ३०७ ॥

आयाते इति । दयिते कान्ते मयि आयाते आगते सति मरुदेशप्रवासादिति भावः गेहिन्या मम प्रिययेत्यर्थः मरुस्थलभुवां मरुभूमिप्रदेशानां दुर्लङ्घ्यतां लङ्घितुमशक्यतां सञ्चिन्त्य भावयित्वा परितोषेण सन्तोषेण बाष्पाणि अश्रूणि तैः तरलां चञ्चलां दृष्टिम् आसज्य आसक्तीकृत्येत्यर्थः मयीति शेषः पीलुशमीकरीरकवलान् तत्तदुष्ट्रभक्ष्याणि द्रव्याणीत्यर्थः दत्त्वा महाहकाय उष्ट्रायेति भावः आदरात् अतीव मे उपकृतमनेन दुर्लङ्घ्यमरुदेशात् प्रियतमानयनेनेति यत्नातिशयात् स्वेन निजेन अञ्चलेन वसनप्रान्तेन करभस्य उष्ट्रस्य केसराणां गावलोमां सटानां जटानाञ्च अग्रेषु लग्नं ससक्तं रजः धूलिः उन्मृष्टम् अपनीतम् ॥ ३०८ ॥

क्षिप्तमिति । वारणपतिः गजराजः नवधृत इति भावः मुहुः पुनः पुनः पुरः अग्रतः क्षिप्तं दत्तम् इक्षुकाण्डम् इक्षुदण्डं न जगृहे न गृह्णातिस्म । निकटे उपगताम् उपस्थितां करेणुं हस्तिनीं न अपेक्षते स्म नावलोकयति स्म । केवलं परिमीलिते मुद्रिते अक्षिणी यत्र तद् यथा तथा इच्छया विहारो यत्र तथाभूतः यो वनवासः स एव महोत्सवः तस्य अन्तः रम्यता तं सस्मार स्मरति स्म । स्वाधीनतैव सर्वेषां प्रीतये इति भावः ॥ ३०९ ॥

तेषु दृष्टं यथा,—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनम्॥ ३१०॥

श्रुतं यथा,—

किं रूपं स्फुटमेव सा शशिमुखी धत्ते तदत्यद्भुतं
मामुत्साहयितुं परापकरणे चित्तं किमस्मत्स्वसुः।
इत्यन्तर्विकसद्वितर्कविधुरं चेतस्तथा वर्त्तते
स्वल्पोऽप्येष मम प्रयाति पुरतः पन्था यथा दीर्घताम्॥३११

सरसिजमिति। शैवलेन जलनीलया जलनीलीतु शैवालं शैवलमित्यमरः अनुविद्धम् उपहितमपि सरसिजं पद्मं रम्यं मनोहरम्। हिमांशोः चन्द्रस्य लक्ष्म कलङ्करेखा मलिनमपि श्यामलमपि लक्ष्मीं श्रियं तनोति विस्तारयति। तथा इयं पुरोदृश्यमाना तन्वी कृशाङ्गी शकुन्तलेति शेषः वल्कलेनापि चीरपरिधानेनापि अधिकं यथा तथा मनोज्ञा मनोहारिणी। हि तथाहि मधुराणां रम्याणाम् आकृतीनाम् अवयवानां किमिव वस्त्विति शेषः मण्डनं न? भूषणं न? अपितु सर्वमेव वस्तु रम्यमङ्गं भूषयतीति भावः॥ ३१०॥

किमिति। सा शशिमुखी चन्द्रवदना सीता तत् यथा सूर्पणखया अभिहितं यदिति भावः अत्यद्भुतम् अत्याश्चर्यं रूपं सौन्दर्यं स्फुटमेव सत्यमेव धत्ते धारयति किम्? परस्य अपकरणे अनिष्टविधाने माम् उत्साहयितुम् उत्तेजयितुम् अस्मत्स्वसुः अस्मद्भगिन्याः शूर्पणखायाः चित्तं मनः किम्? इत्येवम् अन्तर्विकसता मनसि स्फुरता वितर्केण सन्देहेन विधुरं व्याकुलम् आन्दोलितमिति यावत् चेतः चित्तं मदीयमिति शेषः तथा वर्त्तते तद्रूपेण तिष्ठति यथा स्वल्पोऽपि अत्यल्पोऽपि एषः पन्थाः पञ्चवटीप्रमाणमार्ग इति यावत् मम पुरतः अग्रतः दीर्घतां विपुलतां प्रयाति गच्छति। रावणस्य शूर्पणखावाक्यात् सीतां हर्तुं प्रस्थितस्य अध्वनि वितर्कोक्तिरियम्॥ ३११॥

अनुमानं यथा,—

शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहाऽस्य?।
अथ वा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥

संस्कारस्त्रिधा आहृतः पटुरभ्यस्तश्चेति ॥ ३१२ ॥

तत्र आश्रयगुणेनादरादुत्पन्न आहृतो यथा,—

कन्यारत्नमयोनिजन्म भवतामास्ते वयञ्चार्थिनो
रत्नं यत् क्वचिदस्ति तत्परिणमत्यस्मासु शक्रादपि।
कन्यायाश्च परार्थतैव हि मता तस्याः प्रदानादहं
बन्धुर्वो भविता पुलस्त्यपुलहप्रष्ठाश्च सम्बन्धिनः ॥३१३ ॥

शान्तमिति। इदम् आश्रमपदं तपोवनविभागः शान्तं शान्तिरसपूर्णं नाच कामादीनामवकाशोऽस्तीति भावः। बाहुश्च दक्षिणः मे इति शेषः स्फुरति स्पन्दते। पुंसां दक्षिणबाहुस्फुरणस्य स्त्रीलाभसूचकत्वमुक्तं निमित्तज्ञैरिति। अस्य बाहुस्फुरणस्य फलं स्त्रीलाभरूपमिति भावः इह अस्मिन् शान्ते आश्रमपदे कुतः? कथम्?। अथवा पक्षान्तरे सर्वत्र सर्वस्मिन्नेव स्थाने भवितव्यानाम् अवश्यम्भाविनां विषयाणां द्वाराणि पन्थानः भवन्ति। अविलम्बभाविनां विषयाणां यस्मिन् कस्मिन्नपि स्थाने सूचनं सम्भवतीति भावः ॥ ३१२ ॥

कन्येति। नास्ति यानितः जन्म यस्य तत् अयोनिजन्म कन्यारत्नं रत्नभूता कन्येत्यर्थः भवतां युष्माकम् आस्ते तिष्ठति। वयञ्च अर्थिनः तत् कन्यारत्नाकाङ्क्षिण इत्यर्थः। क्वचित् कुत्रापि स्थाने यत् रत्नम् अस्ति विद्यते, तत् रत्नं शक्रादपि इन्द्रमपेक्ष्यापि अस्मासु परिणमति अस्मद्भाग्याय भवति इन्द्रोऽपि न तस्याधिकारी अपिकारात् अन्येषां कथा दूरे तिष्ठतीति गम्यते। कन्या गृहे एव रक्ष्यते न कस्मैचिदपि दीयते तत्कथं तवेदृशी प्रार्थनेत्यत्राह कन्याया इति। हि यतः कन्यायाः परार्थता परप्रतिपादनीयतेत्यर्थः एव मता निरूपिता धीरैरिति शेषः नतु स्वगृहरक्षणीयतेति एवकारार्थः। तस्याः कन्यायाः प्रदानात् अहं विश्वविजेता रावण इत्यात्मनिर्देशः वः युष्माकं बन्धुः सखा भविता भावी तृच्प्रत्ययः। पुलस्त्यपुलहप्रष्ठाः पुलस्त्यपुलहौ प्रष्ठौ अग्रगौ येषां ते ब्रह्मपुत्रा इत्यर्थः सम्बन्धिनः पौत्रस्य मम विवाहसम्बन्धात् बन्धवः भविष्यन्तीति निष्कर्षः। जनकं प्रति रावणस्योक्तिः ॥३१३॥

विषयगुणेन पटुप्रत्ययादुत्पन्नः पटु र्यथा,—

उत्पत्ति र्दैवयजनात् ब्रह्मवादी नृपः पिता।
सुप्रसन्नोज्ज्वला मूर्त्तिरस्याः स्नेहं करोति मे॥ ३१४॥

ज्ञानपौनःपुन्येनाभ्यासप्रत्ययादुत्पन्नोऽभ्यस्तः।

स यथा,—

भूयो भूयः सविधनगरीरथ्यया पर्य्यटन्तं
दृष्ट्वा दृष्ट्वा भवनवलभीतुङ्गवातायनस्था।
साक्षात् कामं नवमिव रतिर्मालती माधवं यत्
गाढ़ोत्कण्ठालुलितलुलितैरङ्गकैस्ताम्यतीति॥

अत्र यद्यपि विषयगुणात् पटुः आश्रयगुणाच्च आहृतोऽपि प्रत्ययः पटुमाहृतं संस्कारं प्रसूयते तथापि अभ्यासात् पटीयानाहृततमश्च जायमानोऽभ्यस्त इत्युच्यते॥ ३१५॥

विषयगुणेनेति। विषयाणां कारणभूतानां वस्तूनां गुणेन प्रभावेण पटुप्रत्ययात् उत्कृष्टविश्वासात् पटुः उज्ज्वलः शृङ्गाररस इति शेषः।

उत्पत्तिरिति। अस्याः कन्यायाः दैवयजनात् देवानां यज्ञक्रियात् उत्पत्तिः उद्भवः एतेन अतिविशुद्धता गम्यते। ब्रह्मवादी ब्रह्मतत्त्वज्ञः नृपः जनकः पिता पालक इति यावत् एतेन विद्यादिगुणवत्तातिशयो गम्यते। तथा सुप्रसन्ना सम्यक् प्रसादगुणसम्पन्ना उज्ज्वला रुचिराच मूर्त्तिः अवयवः मे मम स्नेहं प्रणयं करोति जनयति॥ ३१४॥

भूय इति। भवनस्य गृहस्य या वलभी शिरोगृहविशेषः तस्याः तुङ्गम् उन्नतं यद् वातायनं गवाक्षः तत्र तिष्ठतीति तथोक्ता मालती रतिः कामपत्नी साक्षात् मूर्त्तिमन्तं नवं नूतनं हरकोपानलदहनात् परम् उत्पन्नमिति भावः सविधे समीपे गृहस्येति भावः या नगरीरथ्या नगरीमार्गः तया पर्य्यटन्तं गमनागमनं कुर्वन्तं माधवं भूयोभूयः पुनः पुनः दृष्ट्वा दृष्ट्वा सतृष्णं दृष्ट्वेत्यर्थः गाढ़ोत्कण्ठया अतीव औत्सुक्येन लुलितलुलितैः अतितरां चलितैरित्यर्थः अङ्गकैः कोमलैः अङ्गैः यत् ताम्यति सन्तापमनुभवतीति॥ ३१५॥

उद्दीपनविभावेषु माल्यवस्त्रविभूषणादयो माल्यादयः ।
तेषु माल्यं यथा,—

अशोकनिर्भर्त्सितपद्मरागं आकृष्टहेमद्युति कर्णिकारम् ।
मुक्ताकलापीकृतसिन्धुवारं वसन्तपुष्पाभरणं वहन्ती ॥३१६॥

वस्त्रं यथा,—

आवर्जिता किञ्चिदिव स्तनाभ्यां वासो वसाना तरुणार्करागम् ।
सुजातपुष्पस्तवकावनम्रा सञ्चारिणी पल्लविनी लतेव ॥३१७॥

विभूषणं यथा,—

कण्ठस्य तस्याः स्तनबन्धुरस्य मुक्ताकलापस्य च निस्तलस्य ।
अन्योन्यशोभाजननात् बभूव साधारणो भूषणभूष्यभावः ॥

ऋतुवयोमदादयो ऋत्वादयः ॥ ३१८ ॥

अशोकेति । अशोकेन तत्कुसुमेनेत्यर्थः निर्भर्त्सितः तिरस्कृतः पद्मरागो यत्र तथोक्तम् आकृष्टा आहृता हेम्नः काञ्चनस्य द्युतिः येन तादृशं कर्णिकारं तदाख्यकुसुमं यस्मिन् तथाभूतं तथा मुक्ताकलापः मौक्तिकस्रक् अमुक्ताकलापः मुक्ताकलापः कृतः सिन्धुवारेण तदाख्यकुसुमेन यस्मिन् तथाविधं वसन्तपुष्पमेव आभरणम् अलङ्कारं वहन्ती धारयन्ती ॥ ३१६ ॥

आवर्जितेति । स्तनाभ्यां पयोधराभ्यां किञ्चिदिव ईषदिव आवर्जिता आनमिता तरुणः नवोदित इत्यर्थः अथवा माध्याह्निकः अर्कः सूर्यः तस्य राग इव रागो लौहित्यं यस्य तादृशं वासः वसनं दधाना धारयन्ती अतएव सुजातैः सुष्ठु विकसितैरित्यर्थः सञ्जातेति पाठे सञ्जातैः समुत्पन्नैः पुष्पाणां स्तवकैः गुच्छैः अवनम्रा अवनता पल्लविनी नवकिसलयवती सञ्चारिणी चलन्ती लतेव वल्लीव ॥ ३१७ ॥

कण्ठस्येति । तस्याः पार्वत्याः स्तनाभ्यां बन्धुरस्य नताननस्य बन्धुरन्तूनतानतमित्यमरः । कण्ठस्य गलदेशस्य, निस्तलस्य वर्तुलस्येत्यर्थः मुक्ताकलापस्य मौक्तिकदाम्नश्च अन्योन्यशोभाजननात् परस्परालङ्करणादित्यर्थः भूष्यते अनेनेति भूषणम्

तेषु ऋतुर्यथा,—

इदमसुलभवस्तुप्रार्थनादुर्निवारं
प्रथममपि मनो मे पञ्चबाणः क्षिणोति ।
किमुत मलयवातोन्मूलितापाण्डुपत्रैः
उपवनसहकारैर्दर्शितेष्वङ्कुरेषु ॥ ३१९ ॥

वयो यथा,—

मा मूमुहत् खलु भवन्तमनन्यजन्मा
मा ते मलीमसविकारघना मतिर्भूत् ।
इत्यादि नन्विह निरर्थकमेव यस्मात्
कामस्य जृम्भितगुणो नवयौवनञ्च ॥ ३२० ॥

अलङ्कारः भूष्यते अलङ्क्रियते इति भूष्यः अलङ्कार्यः तयोर्भावः साधारणः समान इत्यर्थः बभूव । तादृशः कण्ठः मुक्तादाम अलङ्कृतवान् तादृशं मुक्तादाम च कण्ठमलङ्कृतवानित्यनयोर्भूष्यभूषणत्वं सामान्यमासीदित्यर्थः ॥ ३१८ ॥

इदमिति । पञ्चबाणः कामः असुलभं दुर्लभं वस्तु तादृशं कन्यारत्नमिति भावः तस्य प्रार्थनायाः अभिलाषात् दुर्निवारं वारयितुमशक्यमित्यर्थः मे मम मनः प्रथममपि प्रागेवेत्यर्थः वसन्तोदयादिति भावः क्षिणोति पीडयति । मलयवातेन दक्षिणपवनेनेत्यर्थः उन्मूलितानि पातितानीत्यर्थः आपाण्डूनि पक्वानीत्यर्थः पत्राणि येषां तैः उपवनसहकारैः उद्यानाम्रतरुभिः दर्शितेषु प्रकटितेष्विति यावत् अङ्कुरेषु प्ररोहेषु किमुत ? वसन्तोदयात् सहकारमञ्जरीषु विकसितासु कामस्य नितरामुद्दीपकत्वात् चित्तं मे भृशमुत्कलितमिति किं वक्तव्यमिति निष्कर्षः ॥ ३१९ ॥

मेति । अनन्यजन्मा आत्मभूः काम इत्यर्थः भवन्तं त्वां मा मूमुहत् खलु नैव मोहमापादयित्वत्यर्थः, ते तव मतिः बुद्धिः मलीमसेन मलदूषितेन मलीमसन्तु मलिनं कज्जरं मलदूषितमित्यमरः । विकारेण प्रकृत्यन्यथाभावेनेत्यर्थः घना पूर्णेत्यर्थः मा भूत् न भवतु । ननु भीः इत्यादि उपदेशवचनमिति भावः इह अस्मिन् माधवे समये वा निरर्थकं निष्फलमेव यस्मात् यतः कामः मदनः जृम्भितः सहितः

मदो यथा,—

तत्क्षणं विपरिवर्त्तितह्रियोः नेष्यतोः शयनमिङ्गरागयोः ।
सा बभूव वशवर्त्तिनी तयोः शूलिनः सुवदना मदस्य च ॥

चन्दनस्नानधूपादयश्चन्दनादयः ॥ ३२१ ॥

तेषु चन्दनं यथा,—

चन्दनं विषधराश्रयः शशी वारुणी च विषमोदरावुभौ ।
तापयन्ति विरहे किमुच्यते मारयन्ति न यदेतदद्भुतम् ॥३२२

स्नानं यथा,—

कामअम्बलोअणाणं उदंसुअपअडोरुजहणाणम् ।
अवरुण्हमञ्जरीणं किदे कामो वहइ चावम् ॥३२३॥

गुणः मौर्वी स्वधनुषीति भावः येन तथाभूतश्च नवं नूतनं यौवनं तारुण्यञ्च माधवस्येति भावः। नवे यौवने हि कामस्य प्रथमवेगस्य असवरणीयत्वात् नायमुपदेशावसर इति भावः ॥ ३२० ॥

तत्क्षणमिति। सा सुवदना सुमुखी गौरी तत्क्षणं सङ्गमसमये इत्यर्थः विशेषेण परिवर्त्तिता क्षयं नीतेत्यर्थः ह्रीलज्जा याभ्यां तथाभूतयोः शयनं शय्यातलं नेष्यतोः प्रापयिष्यतोः इङ्गः प्रदीप्तः रागः कामावेश इत्यर्थः याभ्यां तथाविधयोः तयोः शूलिनः हरस्य मदस्य मद्यरसस्य चेत्यर्थः उभयोः वशवर्त्तिनी वशगता बभूव। सुरापानेन विलासिनी हरस्य तात्कालिकविलासवचनेन च गौरी लज्जात्यागेन कामवशवर्त्तिनी अभूदिति निष्कर्षः ॥ ३२१ ॥

चन्दनमिति। विरहे चन्दनं मलयजरसः विषधराश्रयः मलयपवन इत्यर्थः शशी चन्द्रः वारुणी मदिरा च तथा विषमं दारुणम् उदरं ययोः तौ उभौ शशिः वारुणी च एतानि द्रव्याणि तापयन्ति व्यथयन्ति इति किमुच्यते ? किं कथ्यते ? मारयन्तीति न यत्, एतदद्भुतमाश्चर्य्यम् ॥ ३२२ ॥

कादम्बलोचनानामुदंशुकप्रकटजघनानाम् ।
अवरुण्हमञ्जरीणां कृते कामो वहति चापम् ॥

कादम्बेति। कामः मदनः कादम्बः खञ्जनाख्यः पक्षिविशेषः तद्वत्

धूपो यथा,—

स्नानार्द्रमुक्तेष्वनुधूपवासं विन्यस्तसायन्तनमल्लिकेषु ।
कामो वसन्तात्ययमन्दवीर्य्यः केशेषु लेभे बलमङ्गनानाम् ॥

चन्द्रोदयो घनध्वनिरुपकारस्मरणमित्याद्याश्चन्द्रोदयादयः ॥ ३२४ ॥

तेषु चन्द्रोदयो यथा,—

विलिम्पत्येतस्मिन्मलयरजसार्द्रेण महसा
दिशां चक्रञ्चन्द्रे सुकृतमथ तस्या मृगदृशः ।
दृशोर्बाष्पः पाणौ वदनमसवः कण्ठकुहरे
हृदि त्वं ह्रीः पृष्ठे वचसि च गुणा एव भवतः ॥३२५॥

लोचने नेत्रे यासां तथोक्तानाम् उदंशुकेन उड्डीनवसनेन हेतुना प्रकटं दृश्यमित्यर्थः जघनं कटिपुरोभागः यासां तथाभूतानाम् अवरुग्णः स्वविलासार्थम् उचिताः सज्जयः पुष्पाणामिति भावः याभिः तथाभूताना विलासवतीनामिति भावः क्लृते निमित्तं चाप धनुः वहति धत्ते तादृशीर्विलासिनीर्दृष्ट्वा तरुणाः कामवशं वदा भवन्तीति भावः ॥ ३२३ ॥

स्नानेति । वसन्तस्य ऋतोः अत्ययेन अवसानेन मन्द क्षीणं वीर्य्यं तेजः यस्य तथाविधः कामः स्नानेन आर्द्राः अतएव मुक्ताः बन्धनात् स्खलिताः तेषु अनुधूपवासं धूपस्य वासः सौरभं धूपवासः धूपवासादनु अनुधूपवासं धूपवासनानन्तरमित्यर्थः विन्यस्ताः सायन्तन्यः सन्ध्याकालीना: मल्लिका येषु तादृशेषु अङ्गनाना नारीणां केशेषु बलं सामर्थ्यं लेभे प्राप । ग्रीष्मे नारीणा तथाविधः केशपाशः कामोद्दीपक इति भावः ॥ ३॥ २४

चन्द्र इति । एतस्मिन् चन्द्रे मलयजरजसार्द्रेण चन्दनद्रवशीतलेन महसा तेजसा मयूखेनेत्यर्थः दिशां चक्रं दिङ्मण्डलं वक्रमिति पाठे दिङ्मुखं विलिम्पति व्याप्नुवति सति अथेदानीं तस्या मृगदृशः दृशोर्नेत्रयोः बाष्पः, सुकृतः सुष्ठु कृतः लिङ्गव्यत्ययेन अन्वयः । पाणौ करे वदन मुखं सुष्ठु कृतम् । कण्ठकुहरे गलरन्ध्रे

घनध्वनिर्यथा,—

अज्ज मए तेण विणा अणुभूदसुहाइं अणिसं सरन्तीए।
अहिणवमेहाणं रवो णिसामिओ वज्झपडहो व्व ॥३२६॥

उपकारस्मरणं यथा,—

तन्मे मग्नः क्षिपति यत् सरसप्रहारम्
आलोक्य मामगणितस्खलदुत्तरीया।
त्रस्तैकहायनकुरङ्गविलोलदृष्टि-
राश्लिष्टवत्यमृतसंवलितैरिवाङ्गैः ॥ ३२७ ॥

असवः प्राणाः सुकृता इति लिङ्गवचनव्यत्ययेन अन्वयः। हृदि मनसि त्वं सुकृतः लिङ्गव्यत्ययेन अन्वयः। ह्रीः लज्जा पृष्ठे सुकृता पश्चात् कृता इत्यर्थः लिङ्गव्यत्ययेन-अन्वयः। निर्लज्जा जातेति भावः। वचसि वाक्ये भवतः तव गुणा एव सुकृताः सुष्ठु कृताश्च। प्रोषितं प्रति दूत्या उक्तिः ॥ ३२५ ॥

अद्य मया तेन विनाऽनुभूतसुखानि अनिशं स्मरन्त्या।
अभिनवमेघानां रवो निशामितो वध्यपटह इव ॥

अद्येति। अद्य अस्मिन् दिने वर्षादिने इत्यर्थः तेन कान्तेनेति भावः विना तद्विरहेणेत्यर्थः अनिशं सततम् अनुभूतानि आस्वादितानि सुखानि स्मरन्त्या स्मृतिपथं नयन्त्येत्यर्थः अभिनवमेघानां नूतनजलधराणां रवः ध्वनिः अभिनव-मोहनरव इति पाठान्तरं वध्यस्य पटह इव वाद्यविशेषरव इवेत्यर्थः निशामितः आकर्णितः ॥ ३२६ ॥

तदिति। मां प्रवासादागतमिति भावः आलोक्य दृष्ट्वा अगणितम् अलक्षित स्खलत् उत्तरीयम् उत्तरासङ्गः यया तथाविधा त्रस्तः भयचकितः एकहायनः एकवर्षीयः यः कुरङ्गः हरिणः तस्येव विलोला चपला दृष्टिः यस्याः तथोक्ता सा मत्कान्तेति भावः सरसः सानन्द इति यावत् प्रहारस्ताडनं यत्र तद् यथा तथा अमृतसंवलितैरिव सुधासिक्तैरिव अङ्गैः अवयवैः यत् आश्लिष्टवती आलिङ्गितवती, तत् मे मम मनः क्षिपति व्यथयति। सखायं प्रति प्रोषितस्य उक्तिः ॥ ३२७ ॥

अनुभावे स्मरतिर्यथा,—

खणमेत्तं पि ण फिट्टइ अणुदिअहं दिण्णगरुअसन्तावा।
पच्छण्णपावसङ्के व्व सामला मज्झहिअआ हि ॥ ३२८ ॥

वाञ्छतिर्यथा,—

एअमेअ अकिदपुण्णा अप्पत्तमणोरहा विपज्जिस्सम्।
जणवादो वि हि जादो तेण समं हलिअउत्तेण ॥३२९॥

स्मरतिः स्मृतिरित्यर्थः निपातनात् साधुः।

क्षणमात्रमपि न स्फुटति अनुदिवसं दत्तगुरुसन्तापा।
प्रच्छन्नपापशङ्केव श्यामला अस्मद्धृदया हि ॥

खणेति। अस्मासु हृदयं यस्याः सा मदेकचित्तेति यावत् प्रच्छन्ना गूढा पापात् स्वकृतादिति भावः शङ्का यस्याः तादृशीव तथाभूता नारी वेत्यर्थः श्यामला मलिनीभूतेत्यर्थः तथा अनुदिवसं प्रत्यहं दत्तः कामेनेति भावः गुरुर्महान् सन्तापो यस्यै तथाभूता मदिरहेण भृशं कामसन्तप्तेत्यर्थः तथापि क्षणमात्रमपि न स्फुटति न प्रकाशयति स्वसन्तापानिति भावः। सखायं प्रति कस्यचित् विरहिण उक्तिः ॥ ३२८ ॥

वाञ्छति वाञ्छेत्यर्थः पूर्ववत् निपातनात् साधुः एवमुत्तरत्र द्रष्टव्यम्।

एवमेवाकृतपुण्या अप्राप्तमनोरथा विपत्स्ये।
जनवादोऽपि हि जातस्तेन समं हलिकपुत्रेण ॥

एवमिति। तेन हली लाङ्गलमस्यास्तीति हली ततः स्वार्थे कन्प्रत्ययः हलिकः कृषीवल इत्यर्थः तस्य पुत्रः तेन समं सह जनवादः लोकप्रवादः हि यतः जातः भूतः। एवमेव एवमवस्थायामेवेत्यर्थः तेन मत्प्रणयस्य अस्पष्टतायामेवेति भावः न कृतं पुण्यं सुकृतं यया तथाभूता अतएव न प्राप्तः मनोरथः अभिलाषः तत्सङ्गमेन इति भावः यया तादृशी अहं विपत्स्ये प्राणान् त्यक्ष्यामि इत्यर्थः। कस्याश्चित् कृषकपुत्रं प्रति जातानुरागायाः निकृष्टरतिप्रकटनभिया अग्रत एव मरणाभिलाषोक्तिः ॥ ३२९ ॥

द्विष्टिर्यथा,—

गोत्तक्खलणं सुणिअ पिअदमे अज्ज यादि छणदिअहे ।
वज्झमहिसस्स मालेव्व मण्डणं से पडिहाइ ॥३३०॥

प्रयतते यथा,—

अनुगच्छन् * मुनितनयां सहसा विनयेन वारितप्रसरः ।
स्वस्थानादचलन्नपि गत्वेव पुनः प्रतिनिवृत्तः ॥३३१॥

अवैतिर्यथा,—

चन्दसरिसं मुहं से सरिसो अमिअस्स मुहरसो तिस्सा ।
सकचग्गहरहसुज्जलचुम्बणं कस्स सरिसं से ॥३३२॥

गोत्रस्खलनं श्रुत्वा प्रियतमे अद्य याति उत्सवदिवसे ।
वध्यमहिषस्य मालेव मण्डनमस्य प्रतिभाति ॥

गोत्रेति । गोत्रस्य नाम्नः स्खलनं व्यत्ययमित्यर्थः गोत्रं नाम्नाचले कुले इत्यमरः पतिमागतं दृष्ट्वा उपपतेर्नाम्ना सम्बोधिते इति भावः प्रियतमे पत्यौ अद्य अस्मिन् उत्सवदिवसे वसन्तदिने इति भावः याति गच्छति कोपादिति भावः सति अस्याः जारगामिन्याः कामिन्या इति भावः भूषणम् अङ्गरागादिरलङ्कारश्च वध्यमहिषस्य मालेव प्रतिभाति प्रतिभासते । स्वस्य जारसङ्गतिप्रकटनात् क्रुद्धेन पत्या अस्या अत्याहितं करणीयमिति भावः ॥ ३३० ॥

अनुगच्छन्निति । मुनितनयां शकुन्तलाम् अनुगच्छन् अनुयातुमुद्यन्नित्यर्थः सहसा उपस्थितेनेति भावः । विनयेन शिष्टाचारेण वारितः निवर्त्तितः प्रसरः अनुगमनरूप इति यावत् यस्य तथाभूतः अतएव स्वस्थानात् निजासनस्थानात् अचलन्नपि अगच्छन्नपि गत्वेव पुनः प्रतिनिवृत्तः प्रत्यागतः अस्मीति शेषः ॥ ३३१ ॥

* अनुयास्यन्नित्यपिपाठो दृश्यते ॥

चन्द्रसदृशं मुखमस्याः सदृशोऽमृतस्य मुखरसस्यास्याः ।
सकचग्रहरभसोज्ज्वलचुम्बनं कस्याः सदृशं स्यादिति ।

मन्यते यथा,—

परिवट्टं दिआणिसं सहे ! मण्डलिअकुसुमाउहं व्व अणङ्गम्।
विरहम्मि मण्इ हरीणहे अणत्थे पड़िउत्थिअं मिअङ्कम् २३३

वक्तियथा,—

आलाओ मा दिज्जउ लोअविरुद्धो त्ति णाम काऊण।
सम्मुहापड़िए कोवेरिएवि दिट्ठिं ण पाडेइ ॥ २३४ ॥

चन्द्रेति। अस्याः कान्तायाः मुखं चन्द्रस्य सदृशं तुल्यम्। तस्याः अस्या इत्यर्थः मुखस्य रसः अमृतस्य सदृशः तुल्यः। सकचग्रहं केशग्रहणपुरःसरं रभसेन वेगेन उज्ज्वलम् उत्कटमिति भावः चुम्बन कस्याः नायिकायाः सदृशं तुल्यं स्यात् ? न कस्या अपीत्यर्थः। अनन्यसदृशस्तस्याः प्रणय इति भावः ॥ २३२ ॥

परिवृत्तं दिवानिशं सखे ! मण्डलितकुसुमायुधमिवानङ्गम्।
विरहे मन्यते हरिनखे अनर्थे पतितोत्थितं मृगाङ्कम् ॥

परिवृत्तमिति। हे सखे। विरहे तवेति शेषः अनङ्गं कामं दिवानिशम् अहोरात्रं मण्डलितं चक्रीकृतं कुसुमायुधं कुसुमकार्मुकं येन तथाभूतमिव परिवृत्तं सञ्जातं तथा हरिनखे सिंहनखरे अनर्थे आपदि मृगस्वीकारार्थं मुद्यतस्य सिंहस्य दारुणे नखरे इत्यर्थः पतितः पश्चादुत्थितः कलङ्करूपमृगे सिंहेन कवलिते इति भावः तं अकलङ्कम् उदितं चन्द्रमिति यावत् मन्यते अवधारयति। कामस्य रात्रावेव मण्डलितकार्मुकत्वं तां प्रति तु अहोरात्रं चन्द्रस्तु मृगाङ्कत्वेन सकलङ्कः उदेति तां प्रति तु निष्कलङ्कतया अतीवोद्दीपक इति त्वद्विरहे सा मृगमुत्तास्यतीति निष्कर्षः। प्रोषितं प्रति दूत्या उक्तिरियम् ॥ २३३ ॥

आलापो मा दीयतां लोकविरुद्ध इति नाम कृत्वा।
सम्मुखापतिते कोपार्हेऽपि दृष्टिं न पातयति ॥

आलापो इति। लोकविरुद्धः सदाचारगर्हित इत्यर्थः आलापः स्वामिना सह प्रकाशसलाप इति यावत् इति नाम कृत्वा इति प्रसिद्धिमवलम्ब्येत्यर्थः। कोपार्हेऽपि दण्डार्हेऽपीति यावत् सम्मुखापतिते सम्मुखमागते स्वामिनीति भावः दृष्टिं न पातयति न ददाति ॥ २३४ ॥

चेष्टते यथा,—

अज्ज मए गन्तव्वं घणान्धआरम्मि तस्स सुहअस्स ।
अज्जा णिमीलिअच्छी पदपडिवाडिं घरे कुणइ ॥३३५॥

सञ्चारिषु स्वेदरोमाञ्चवेपथवो यथा,

दिट्ठे जं पुलइज्जसि रहघर पिअम्मि समासण्णे ।
तुह सम्भासणफ्फसणादिकारिणि किंत्ति णिज्जिहसि ॥३३६॥

अश्रुयथा,

णअणब्भन्तरघोलन्तवाहभरमन्थराए दिट्ठीए ।
पुणरुत्तपेच्छणीए बालअ! किं जं ण भणिओसि ॥३३७॥

अद्य मया गन्तव्यं घनान्धकारेऽपि तस्य सुभगस्य ।
आर्या निमीलिताक्षी पदपरिपाटीं गृहे करोतु ॥

अद्येति। अद्य घनान्धकारे निबिडान्धकारेऽपि तस्य सुभगस्य सौभाग्यवतः कान्तस्य स मदर्थं न प्रयास्यति अहन्तु तस्य कृते एतादृशं प्रयासं करोमीति तस्य सुभगत्वमिति भावः। तत्समीपे इत्यर्थः मया गन्तव्यम् यातव्यम्। आर्या श्वश्रूरित्यर्थः निमीलिताक्षी निद्रया मुद्रितनयना सती गृहे पदानां पदविक्षेपाणां मदीयानामिति भावः परिपाटीम् आनुपूर्विकगणनामिति यावत् करोतु। गृहस्थिता निद्रावशवर्त्तिनी दृष्ट्वा श्वश्रूः मम वल्लभार्थं गमनागमनेषु पदविक्षेपान् गणयतु इति निष्कर्षः ॥ ३३५ ॥

दृष्टे यत्पुलकयसि रहोगृहं प्रिये समासन्ने ।
तव सम्भाषणस्पर्शनादिकारिणि किमिति निर्जिहेषि ॥

दृष्टे इति। यत् यतः दृष्टे अवलोकिते प्रिये पुलकयसि रोमाञ्चिता भवसीत्यर्थः ततः रहोगृहे विजनगृहे समासन्ने समापतिते प्रिये तव सम्भाषणस्पर्शनादिकारिणि सति किमिति कथं निर्जिहेषि लज्जसे ? इत्यर्थः ॥ ३३६ ॥

नयनाभ्यन्तरघूर्णद्बाष्पभरमन्थरया दृष्ट्या ।
पुनरुक्तप्रेक्षणीयया बालक ! किं यन्न भणितोऽसि ॥

हर्षोयथा,

सव्वम्मिंवि णट्ठे तहवि हु हिअअस्स णिव्वुदिज्जेव।
जं तेण णअरडाहे हत्थाहत्थि कुण्डो गहीओ ॥३३८॥

अमर्षो यथा,

कुदो सम्पडइ मं पिअसहि! पिअसङ्गमो पदोसेवि।
जं जअइ गहीदकरणिअरशिरी चन्दचण्डालो ॥३३९॥

नयनेति। हे बालक! निर्बोध इति भावः नयनयोः अभ्यन्तरे घूर्णता सञ्चरता बाष्पभरेण अश्रुचयेन मन्थरा जड़ा आकुलेत्यर्थः तया पुनरुक्तप्रचणीयया अतिशयेन दर्शनीययेत्यर्थः मनोहारिण्येति भावः दृष्ट्या अवलोकनेन यत् न भणितः न स्वाभिप्रायमावेदितः असि तत् किम्? तादृशनयनावलोकनेनापि तदभिप्रायस्त्वया न विदितः? ततः बालकत्व न गत तवेति भावः ॥ ३३७॥

सर्वस्मिन्नपि नष्टे तथापि खलु हृदयस्य निर्वृतिरेव।
यत्तेन नगरदाहे हस्ताहस्ति कुण्डो गृहीतः ॥

सर्वस्मिन्निति। तथा सर्वस्मिन् अपि नष्टे नाश गतेऽपि हृदयस्य चित्तस्य तवेति शेषः निर्वृतिरेव शान्तिरेव। यत् यतः तेन जनेनेति शेषः नगरदाहे नगरभस्मीकरणे कुण्डः होमीयाग्निस्थालीविशेषः हस्ताहस्ति गृहीतः। अथवा कुण्डः मानविशेष इत्यर्थः। अग्निहोत्रिणः अग्निकुण्ड एव सारवस्तु, सर्वनाशेऽपि तद्रक्षणे तस्य निर्वृतिः ॥ ३३८॥

कुतः सम्पतति मा प्रियसखि! प्रियसङ्गमः प्रदोषेऽपि।
यज्जयति गृहीतकरनिकरश्रीश्चन्द्रचण्डालः ॥

कुत इति। हे प्रियसखि! प्रदोषेऽपि रजनीमुखेऽपि रजन्यामपि वा प्रियसङ्गमः कुतः कस्मात् मां सम्पतति? सम्प्राप्नोति? न कथमपि मे प्रियसङ्गमः स्यादित्यर्थः। यत् यतः गृहीता करनिकराणां किरणनिचयानां श्रीः शोभा येन तादृशः सम्पूर्णमण्डल इति भावः चन्द्र एव चण्डालः पापपुरुष

लीलादिषु प्रियजचेष्टानुकृतिर्यथा,

जं जंकरेसि जं जं जप्पसि जं जं णिअच्छेसि ।

तं तमणु सिक्खिदाए दीहो दिहओ ण सम्पडइ ॥३४०॥

नेत्रभ्रूवक्त्रकर्मणां विशेषेण लसनं विलासो यथा,

सभ्रूविलासमथ सोऽयमितीरयित्वा

सप्रत्यभिज्ञमिव मामवलोक्य तस्याः ।

अन्योन्यभावचतुरेण सखीजनेन

मुक्तास्तदा स्मितसुधामधुराः कटाक्षाः ॥३४१॥

इति यावत् जयति प्रखरतां गच्छतीति भावः मत्प्रियसङ्गमे समापतिते अयं शीतकिरणः सन् माम् न आह्लादयतीति तस्मात् नाद्य मे प्रियसङ्गम इति भावः ॥ ३३९ ॥

यद्यत्करोषि यद्यज्जल्पसि यद्यन्नियच्छसि ।

तत्तदनुशिक्षिताया दीर्घो दिवसो न सम्पतति ॥

यद्यदिति । यत् यत् करोषि यत् यत् जल्पसि आलपसि यत् यत् नियच्छसि नियमं करोषि, उपदिशसीत्यर्थः तत् अनुशिक्षिताया उपदिष्टायाः ममेति दीर्घः दिवसः न सम्पतति नातिक्रामतीत्यर्थः, दिवसापगमे कान्तं प्रति तत्तद् व्यवहरिष्यामि, किन्तु दिवसो नापगच्छतीति भृशमाकुलितायाः नायिकायाः सखी प्रत्युक्तिरियम् ॥ ३४० ॥

नेत्रेति । लसनं क्रियाविशेषः ।

सभ्रूविलासमिति । अथानन्तरं तस्याः मालत्याः अन्योऽन्यभावे परस्परविलासे चतुरः विचक्षणः तेन सखीजनेन सङ्गिनीवर्गेण सभ्रूविलासं भ्रूविलाससहितं यथा तथा सोऽयं युवेति शेषः इति इरयित्वा कथयित्वा प्रत्यभिज्ञा परिचयविशेषः तया सह वर्त्तमानं तदिव सप्रत्यभिज्ञमिव माम् अवलोक्य दृष्ट्वा तदा तस्मिन् काले स्मित मृदु हसितमेव सुधा अमृतं तया मधुराः मनोहराः कटाक्षाः अपाङ्गदर्शनविशेषाः मुक्ताः मयि निक्षिप्ताः इत्यर्थः ॥ ३४१ ॥

विभूषणादीनामनादरविन्यासो विच्छित्तिः, यथा,

अङ्गानि चन्दनरजःपरिधूसराणि
ताम्बूलरागसुभगोऽधरपल्लवश्च ।
अच्छाञ्जने च नयने वसनं तनीयः
कान्तासु भूषणमिदं विभवस्य शेषः ॥ ३४२ ॥

विभूषणादीनामस्थानविन्यासो विभ्रमः, यथा,

चकार काचित् सितचन्दनाङ्के
काञ्चीकलापं स्तनभारपृष्ठे ।
प्रियं प्रति प्रेषितचित्तवृत्तिः
नितम्बबिम्बे च बभार हारम् ॥ ३४३ ॥

स्मितरुदितहसितादीनां हर्षात् एकीकरणं किलकिञ्चितं, यथा

पाणिपल्लवविधूननमन्तःसीत्कृतानि घनरोमविभेदाः ।
योषितां रहसि गद्गदवाचामस्खलतामुपययुर्मदनस्य ॥ ३४४ ॥

अङ्गानीति । अङ्गानि अवयवाः चन्दनरजसा परिधूसराणि सर्वतो धूसरवर्णानि । अधरः पल्लव इव अधरपल्लवः ताम्बूलस्य रागेण लौहित्येन सुभगः रम्य इत्यर्थः । नयने नेत्रे अच्छ निर्मलम् अञ्जनं ययोः तादृशे । वसनं परिधानवस्त्रं तनीयः अतीव सूक्ष्मम् । कान्तासु नारीषु इदम् भूषणम् उक्तप्रकारोऽलङ्कारः विभवस्य विभुतायाः शेषः चरमोत्कर्षः इतिभावः ॥ ३४२ ॥

चकारेति । प्रियं कान्तं प्रति प्रेषिता नियोजिता चित्तवृत्तिर्मनोवृत्तिर्यया तथाभूता प्रिय मनसा स्मरन्तीति यावत् काचित् कामिनी सितचन्दनाङ्के श्वेतचन्दनलेपिते इति यावत् स्तनभारपृष्ठे स्तनयोरुपरीत्यर्थः काञ्चीकलापं मेखलादाम इत्यर्थः चकार । नितम्बबिम्बे नितम्बमण्डले हारं बभार च धारयामास च । प्रियचिन्तायासुन्मनस्कतया अलङ्काराणां यथास्थानभ्रम इति भावः ॥ ३४३ ॥

पाणीति । योषितां नारीणां रहसि विजने गद्गदा असम्यगुच्चारिता वाक् यासां तथाभूतानां सतीनां पाणिः भुजः पल्लव इव तस्य विधूनन कम्पनम्, अन्तः-

इष्टजनकथायां तद्भावभावनोत्थितविकारो मोट्टायितं, यथा,

तव सा कथासु परिघट्टयति श्रवणं यदङ्गुलिमुखेन मुहुः ।
घनतां ध्रुवं नयति तेन भवद्गुणपूगपूरितमलप्तमतया ॥ ३४५

केशस्तनाधरादिग्रहणात् दुःखेऽपि सुखबुद्धिचेष्टा कुट्टमितं, यथा,—

क्रीभरादवनतं परिरम्भे रागवानवटुजेष्ववकृष्य ।
अर्पितोष्ठदलमाननपद्मं योषितो मुकुलिताक्षमधासीत् ॥३४६

अभीष्टप्राप्तौ अभिमानगर्वसम्भावनाऽनादरकृतो विकारो विव्वोको यथा,—

निर्विभुज्य दशनच्छदं ततो वाचि भर्त्तुरवधीरणापरा ।

सीत्कृतानि सीत्कारान् घनानां रोम्णां विभेदाः लोमाञ्चा इत्यर्थः मदनस्य कामस्य अस्त्रताम् उपययुः प्रापुः कामोद्दीपका जाता इति भावः ॥ ३४४ ॥

तवेति । सा तव कान्तेत्यर्थः तव कथासु वार्त्तासु अङ्गुलिमुखेन अङ्गुल्यग्रेण यत् श्रवणं कर्णकुहरं परिघट्टयति कण्डूयते इत्यर्थः, ध्रुवमुत्प्रेक्षे तेन परिघट्टनेन भवतां गुणानां पूगैः समूहैः पूरितं श्रवणम् अलप्तमतया पुनः पुनराकर्णनोत्सुकतया घनतां सान्द्रतां नयति प्रापयति । यथा कश्चित् कस्यचित् द्रव्यपात्रस्य अधिकपूरणार्थं लगुडादिभिः सुदृढं पूरयति तद्वत् कण्डूयनच्छलेन अङ्गुलिमुखेन तव गुणहर्षं वस्तु श्रवणेन्द्रिये अधिकं यथा तथा पूरयतीति भावः ॥ ३४५ ॥

क्रीति । नायकः रागवान् प्रेमातिशयवान् सन् परिरम्भे आलिङ्गने क्रीभरात् लज्जातिशयात् अवनतं मुखं दृष्टं इति शेषः । योषितः कान्तायाः अवटुजेषु ग्रीवापश्चाद्भागवर्त्तिषु केशेष्विति भावः अवकृष्य आकृष्य अर्पितः दत्तः ओष्ठदलः अधरपत्रं यस्मिन् तत् तथा मुकुलिते निमीलिते अक्षिणी नेत्रे यस्मिन् तथाभूतम् आननपद्मं मुखपङ्कजम् अधासीत् पापौ चुचुम्बेत्यर्थः घेटपाने इत्यस्य लुङि रूपम् ॥ ३४६ ॥

निर्विभुज्येति । ततः तदनन्तरं शैलराजतनया गौरी दशनच्छदम् अधरं

शैलराजतनया समीपगाम् आललाप विजयामहेतुकम् ॥३४७

सुकुमारतया करचरणाङ्गन्यासो ललितं यथा,—

गुरुतरकलनूपुरानुरावं सुललितनर्त्तितवामपादपद्मा ।
इतरदनतिलोलमादधाना पदमथ मन्मथमन्थरं जगाम ॥३४८

वक्तव्यसमयेऽपि वचसा अनभिभाष्य क्रियानुष्ठानं विहृतं यथा,—

पत्युः शिरश्चन्द्रकलामनेन स्पृशेति सख्या परिहासपूर्वम् ।
सा रञ्जयित्वा चरणौ कृताशीर्माल्येन तां निर्वचनं जघान ३४९

बाल्यकौमारयौवनसाधारणो विहारविशेषः क्रीडितं यथा,

मन्दाकिनीसैकतवेदिकाभिः सा कन्दुकैः कृत्रिमपुत्रकैश्च ।

निविभुज्य निर्भुग्नं कृत्वा कुटिलीकृत्येति यावत् भर्त्तुः हरस्य वचसि वाक्ये अवधीरणापरा अवज्ञां कुर्वती भर्त्तृवचनमश्रृणोतीति यावत् सती समीपगाम् अन्तिकवर्त्तिनीं विजयां तदाख्या सखीम् अहेतुकं हेतुव्यतिरिक्तं यथा तथा हेतुं विनेत्यर्थः आललाप आलपितवतीत्यर्थः ॥ ३४७ ॥

गुर्विति । अथानन्तरं काचित् गुरुतरः विपुलतरः इत्यर्थः कलः मधुरास्फुटः नूपुरस्य चरणालङ्कारभेदस्य अनुरावः पश्चाद्रवः यत्र तद् यथा तथा सुललितम् अतिसुन्दरं यथा तथा नर्त्तितं वामं सव्यं पादपद्मं चरणकमलं यया तथोक्ता तथा इतरत् अन्यत् दक्षिणमित्यर्थः पदं चरणम् अनतिलोलं नातिचपलं यथा तथा दधाना धारयन्ती सती मन्मथेन कामेन मन्थरं मन्दं यथा तथा जगाम ययौ ॥ ३४८ ॥

पत्युरिति । सा पार्वती अनेन चरणेन पत्युः हरस्य शिरश्चन्द्रकलां मस्तकस्थिता चन्द्ररेखां स्पृश प्रहरेति यावत् इत्येवं सख्या प्रसाधिकयेति शेषः चरणौ रञ्जयित्वा अलक्तकादिना अलङ्कृत्य कृतः आशीर्वादः यस्याः तथाभूता सती माल्येन पुष्पदाम्ना तां सखीं निर्वचनम् अवचनं यथा तथा किमपि न कथयित्वेति भावः जघान प्रजहार ॥ ३४९ ॥

रेमे मुहुर्मध्यगता सखीनां क्रीडारसं निर्विशतीव बाल्ये ३५०

क्रीडितमेव प्रियतमविषये केलियथा,—

व्यपोहितुं लोचनतो मुखानिलैरपारयन्तं किल पुष्पजं रजः ।
पयोधरेणोरसि काचिदुन्मना: प्रियं जघानोन्नतपीवरस्तनी ॥

हेलादिषु रागत: सहसा प्रवृत्तिहेतु: चित्तोल्लासो हेला ३५१

सा स्त्रियां यथा,—

राजइ पिअपरिरम्भणपसारिअं सुरअमन्दिरदुआरम् ।
हेलाहलहलिअं थोरत्थणहरे भुजलआजुअलम् ॥३५२॥

सैव पुरुषे यथा,

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विलुलितकवरीभारमंसे वहन्त्या: ।

मन्दाकिनीति। सा पार्वती सखीनां सङ्गिनीनां मध्यगता मध्यवर्त्तिनी, सती बाल्ये शैशवक्रीडारसं खेलनास्वादं निर्विशतीव उपभुञ्जानेव मुहु: पुन: पुन: मन्दाकिन्या: स्वर्गङ्गाया: सैकतवेदिका: ताभि: कन्दुकै: क्रीडनकै: गोलवस्तुविशेषै: सपुत्रकै: क्रीडनपुत्तलिकाभिरित्यर्थ: मुहु: पुन: पुन: रेमे चिक्रीड ॥ ३५० ॥

व्यपोहितुमिति। उन्नतौ उत्तुङ्गौ पीवरौ स्थूलौ स्तनौ यस्या: तथोक्ता काचित् रमणी उन्मना: विरक्तमना: सती मुखानिलै: वदनवायुभि: लोचनत: स्वात् लोचनात् पुष्पजं रज: परागं व्यपोहितुं निरसितुम् अपारयन्तम् अशक्नुवानं प्रियं कान्तं पयोधरेण स्तनेन उरसि वक्षसि जघान किल आहतवती खलु ॥ ३५१ ॥

राजते प्रियपरिरम्भणप्रसारितं सुरतमन्दिरद्वारम् ।
हेलाहलहलायमान स्थूलस्तनभरे भुजलतायुगलम् ॥

राजते इति। प्रियस्य परिरम्भणाय आलिङ्गनाय प्रसारितं विस्तारितम् अतएव सुरतमन्दिरस्य द्वारं द्वारभूतमित्यर्थ. भुजलतायुगल बाहुवल्लीद्वयं भुजलताकमलमिति पाठान्तरम्। हेलया विलासविशेषेण हलहलायमानं कम्पमानम् सत् स्थूले स्तनभरे राजते शोभते ॥ ३५२ ॥

उत्तिष्ठन्त्या इति। एकेन पाणिना भुजेन उरगपतौ शेषनागे भरम् अव-

भूयस्तत्कालकान्तिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥
हेलैव सवचनविन्यासो हावः ॥ ३५३ ॥

स स्त्रियां यथा,—

जइ ण छिवसि पुप्फवइं पुरदो ता कीस वारिओ ठासि ।
छित्तोसि चुलुचुल ! धाविऊण एदेहिं मए हत्थेहिम् ॥३५४॥

स एव पुरुषे यथा,—

लोओ झूरइ झूरउ अवअणिज्जं होइ होउ तं णाम ।
एहि णिमज्जसु पास्से पुप्फवइ ! ण एइ मे णिद्दा ॥

आदिग्रहणाद्भावादयो गृह्यन्ते ॥ ३५५ ॥

लम्बनं कृत्वा रतान्ते सम्भोगावसाने उत्तिष्ठन्त्या उत्पतन्त्याः अन्येन पाणिना वासः वसनं धृत्वा विलुलितः विस्रस्तः कवरीभारः केशपाशनिचयः यस्मिन् तद् यथा तथा असे स्कन्धे वहन्त्याः धारयन्त्याः लक्ष्म्याः पुनः तत्काले तस्मिन् समये या कान्तिः श्रीः तया द्विगुणिता द्विरावृत्ता वर्द्धितेत्यर्थः सुरते प्रीतिः आसक्तिर्यस्य तथाभूतेन शौरिणा नारायणेन आलिङ्ग्य आश्लिष्य शय्यां नीतं पातितम् अतएव अलसं मन्दं यथा तथा लसन्तौ स्फुरन्तौ बाहू यस्य तथाभूतं वपुः शरीरं वः युष्मान् पातु रक्षतु ॥ ३५३ ॥

यदि न स्पृशसि पुष्पवतीं पुरतस्तत्किमिति वारितस्तिष्ठसि ।
स्पृष्टोऽसि चञ्चल ! धावित्वा एतैः मया हस्तैः ॥

यत्र इ इति । यदीति । यदि पुष्पवतीम् ऋतुमतीमित्यर्थः न स्पृशसि न गच्छसीत्यर्थः तदा वारितः मा मां स्पृश पुष्पवतीमिति निषिद्धः सन् पुरतः समक्षं किमिति कथं तिष्ठसि ? अत्र स्थातुमनुचितमिति भावः । किन्तु हे चञ्चल ! मया एतैः हस्तैः धावित्वा स्पृष्टोऽसि । तस्मात् स्पर्शदोषः तव जात एव तत् किं मां त्यक्त्वा गच्छसीति भङ्ग्यन्तरेणोक्तम् ॥ ३५४ ॥

लोको निन्दति निन्दतु अवचनीयं भवति भवतु तत् नाम ।
एहि निमज्ज पार्श्वे पुष्पवति ! न एति मे निद्रा ॥

तेषु भावः स्त्रियां यथा,—

तावच्चिअ रइसमए महिलाणं विब्भमा विराअन्ति ।
जाव ण कुवलअदलसच्छाआइं मउलन्ति णअणाइम् ॥ ३५६

व्याजः पुंसो यथा,—

अलिअपसुत्त ! विणिमीलिअच्छ ! देसु सुहअ ! मज्झं ओआसम्
गण्डपरिचुम्बणपुलइआङ्ग ! ण उण चिराइस्सम् ॥ ३५७ ॥

विश्रम्भभाषणं स्त्रियां यथा,—

जाओ सो वि विलच्छो मए वि हसिऊण गाढमुवऊढो ।

लोक इति । लोकः जनः निन्दति गर्हयते पुष्पवतीस्पर्शादिति भावः निन्दतु निन्दां करोतु अवचनीयम् अपवादः अकीर्तिरित्यर्थः भवति, तत् अवचनीयं भवतु नाम सम्भावनायाम् । एहि आगच्छ पार्श्वे निमज्ज शेष्व, हे पुष्पवति ! मे मम निद्रा न एति नागच्छति त्वत्सङ्गोत्सुकत्वादिति भावः ॥ ३५५ ॥

तावदेव रतिसमये महिलानां विभ्रमा विराजन्ते ।
यावन्न कुवलयदलसच्छायानि मुकुलयन्ति नयनानि ॥

तावदिति । रतिसमये सम्भोगकाले महिलानां कामिनीनां विभ्रमाः विलासभावाः तावत् एव विराजन्ते शोभन्ते । यावत् तासां कुवलयदलसच्छायानि नीलोत्पलदलसदृशानि नयनानि न मुकुलयन्ति न निद्रावशं गच्छन्तीत्यर्थः निद्रामुकुलतायां न कोऽपि विभ्रमाः सन्तीति भावः ॥ ३५६ ॥

अलीकप्रसुप्त ! विनिमीलिताक्ष ! देहि । सुभग ! मे अवकाशम् ।
गण्डपरिचुम्बनपुलकिताङ्ग । न पुनरपि चिरयिष्ये ॥

अलीकेति । हे अलीकप्रसुप्त ! विनिमीलिताक्ष ! अथवा अलीकेन कपटेन प्रसुप्तेन निद्रया विनिमीलिते अक्षिणी नेत्रे यस्य तत्सम्बुद्धौ । हे सुभग ! मे मह्यम् अवकाशं स्थानं देहि । गण्डस्य कपोलस्य परिचुम्बनेन पुलकितं लोमाञ्चितम् अङ्गं यस्य तत्सम्बुद्धौ हे नाथ ! पुनः नाहं चिरयिष्ये नैव विलम्बं करिष्यामीत्यर्थः ॥ ३५७ ॥

पढमोपसरिअस्स णिअसणस्स गण्ठिं विमग्गन्तो ॥३५८॥

चाटु स्त्रीपुंसयोर्यथा,—

एक्कं पहरुच्चाटं हत्थं मुहमारुएण वीअन्तो ।

सोवि हसन्तीए मए गहीदो दुवीएण कण्ठम्मि ॥३५९॥

प्रेमाभिसन्धानम् पुंसो यथा,—

केलीगोत्तक्खलणे वरस्स पप्फुल्लाइं हिणत्ति ।

बहुवासअवासघरे बहुए वाप्फाहिदा दिट्ठी ॥ ३६० ॥

जातः सोऽपि विलक्षो मयापि हसिता गाढमुपगूढः ।

प्रथममपसरितस्य निवसनस्य ग्रन्थिं विमार्गयन् ॥

जात इति । मया हसिता गाढमुपगूढः आलिङ्गितः सोऽपि मत्कान्तोऽपीत्यर्थः प्रथम प्राक् आलिङ्गनात् प्राक् अपसरितस्य स्वतः स्खलितस्य कामावेशातिरेकादिति भावः निवसनस्य परिधानवसनस्य ग्रन्थिं विमार्गयन् अन्विच्छन् विलक्षः लज्जितः जातः अभूत् । सखीं प्रति स्वैरविहारिण्या उक्तिः ॥ ३५८ ॥

एक प्रहारोच्चाटं हस्तं मुखमारुतेन वीजयन् ।

सोऽपि हसन्त्या मया गृहीतो द्वितीयेन कण्ठे ॥

एकमिति । प्रहारेण ताडनेन उच्चाट व्यथितमिति यावत् हस्तं मदीयमिति शेषः मुखमारुतेन वदनवायुना वीजयन् व्यथाशान्त्यर्थमिति भावः सोऽपि मत्कान्तोऽपि हसन्त्या हासं कुर्वत्या मत्कृतप्रहारमपि अगणयिला प्रहारजनितव्यथ मदीयमेव हस्त वीजनेन अनुरागातिशयदर्शनात् मानत्यागादिति भावः मया द्वितीयेन अन्येन हस्तेन कण्ठे गृहीतः आलिङ्गितः ॥ ३५९ ॥

केलीति । केलिगोत्रस्खलने वरस्य प्रफुल्लतां हिनस्ति ।

बहुवासकवासगृहे वध्वा वाष्पार्द्रिता दृष्टिः ॥

बहूनां नारीणामिति भावः वास एव वासकम् अवस्थानं यत्र तादृशे वासगृहे वासकमन्दिरे वरस्य केलिः क्रीडा नर्मोक्तिरिति यावत् तत्र यत् गोत्रस्खलनं नामव्यत्ययः परनारीनामोच्चारणमिति यावत् तत्र सति वध्वाः नवोढाया इति यावत्

परिहासः स्त्रियां यथा,—

अइ दिअर ! किं ण पेच्छसि आआसे ? किं मुहा पलोएसि ।
जाआए बाहुमूलम्मि अइचन्दाणं पड़िवाड़िम् ? ॥३६१॥

कुतूहलं पुंसो यथा,—

असमत्तमण्डणा वज घरं भत्तुणो सकोदुहलस्स ।
वदिक्कन्तहलहलस्स पुत्ति ! चित्ते ण लगिस्ससि ॥३६२॥

चकितं स्त्रिया यथा,—

णवलइआ पाकारे तुट्ठाए किदं किम्पि हलिअसोण्हाए ।

बाष्पार्द्रिता पत्युर्गौवस्खलनादिति भावः अश्रुसिक्ता दृष्टिः वरस्य जामातुः प्रफुल्लतां हर्षविकसितत्वं हिनस्ति नाशयतीत्यर्थः ॥ ३६० ॥

अयि देवर ! किं न प्रेक्षसे आकाशे ? किं मुधा विलोकयसि ।
जायाया बाहुमूले अर्द्धचन्द्राणां परिपाटीम् ? ॥

अइ इति । अयीति कोमलामन्त्रणे । हे देवर ! आकाशे किं न प्रेक्षसे न पश्यसि ? अर्द्धचन्द्राणां परिपाटीमिति भावः अपि तु पश्यस्येवेत्यर्थः तर्हि जायायाः कान्तायाः बाहुमूले अर्द्धचन्द्राणाम् अर्द्धचन्द्राकारान् अलङ्कारविशेषानित्यर्थः मुधा वृथा किं कथं विलोकयसि ? पश्यसि ? अर्द्धचन्द्रविलोकने समयातिपातमकृत्वा सुरतव्यापारमाचरेति भङ्ग्या उक्तम् ॥ ३६१ ॥

असमाप्तमण्डना व्रज गृहं भर्तुः सकौतूहलस्य ।
व्यतिक्रान्तहलहलस्य पुत्रि ! चित्ते न लगिष्यसि ॥

असमाप्तेति । हे पुत्रि ! असमाप्तं समाप्तिं न प्राप्तं मण्डनम् अलङ्करणं यस्याः तथाभूता सती सकौतूहलस्य सोत्सुकस्य भर्तुः गृहं व्रज शीघ्रं गच्छ इति यावत् कान्तमनोरथपूरणस्य चिरायितत्वे विरक्त्या चरमामोदस्य नावसर इति भावः । अतः व्यतिक्रान्तं विगतं हलहलम् औत्सुक्यं यस्य तथाभूतस्य विगतकामावेशस्य कान्तस्येति शेषः चित्ते मनसि न लगिष्यसि न लग्ना भविष्यसि न प्रवणिनी भविष्यसीति भावः तस्मात् त्वया कान्तसङ्गमे असमाप्तमण्डनत्वादिना न चिरायितव्यमिति भावः । उपमातुरुक्तिः ॥ ३६२ ॥

जं अज्जवि जुवइजणो घरे घरे सिक्खिदुं भमइ ॥ ३६३ ॥

हेलाहावश्च भावश्च व्याजो विस्रम्भभाषणम् ।

चाटुप्रेमाभिसन्धानं परिहासः कुतूहलम् ॥ ३६४ ॥

चकितं चेति निर्दिष्टाश्चेष्टाः काश्चिद्विलासिनाम् ।

शेषाणां विप्रलम्भादौ रूपमाविर्भविष्यति ॥

तत्र नायकयोः प्रागसङ्गतयोः सङ्गतयोश्च सङ्गतवियुक्तयोर्वा मिथोदर्शनश्रवणाभ्याम् उपस्थिताभिमानजन्मा परस्परानुरागो वा अभिलषिणीयालिङ्गनादीनाम् अनवाप्तौ सत्यां समुपजायमानैः तैः तैः उत्कण्ठादिभिः व्यभिचारिभावैः मनोवाग्बुद्धिशरीरारम्भजन्मभिश्च अनुभावैः अनुबद्धः प्राप्तप्राप्यप्रकर्षावस्थो विप्रलम्भशृङ्गाराख्यां लभते ॥ स चतुर्द्धा पूर्वानुरागी मानः प्रवासः करुणश्च ॥३६५॥

नवलतिका प्राकारे तुष्टया कृतं किमपि हलिकवधुषया ।

यदद्यापि युवतिजनो गृहे गृहे शिक्षितुं भ्रमति ॥

नवेति । हलिकस्य हलवाहिनः कृषीवलस्येति यावत् वधूः तया तुष्टया सहर्षया नवलतिका नवा वल्ली प्राकारे गृहभित्तावित्यर्थः किमपि कृता विरचिता । यद् लताविरचनमित्यर्थः शिक्षितुं गृहे गृहे प्रतिगृहं युवतिजनः तरुणीजनः भ्रमति विचरति ॥ ३६३ ॥

हेलेति । हेलादयः दश काश्चित् विलासिनां चेष्टाः विलसनव्यापाराः निर्दिष्टाः कथिताः । शेषाणां भावानां विप्रलम्भादौ वक्ष्यमाणरूपे रूपं लक्षणमित्यर्थः आविर्भविष्यति प्रकटीभविष्यतीत्यर्थः ॥ ३६४ ॥

तत्रेति । असङ्गतयोः अमिलितयोः सङ्गतयोः मिलितयोः । सङ्गतवियुक्तयोः आदौ सङ्गतौ पश्चात् वियुक्तौ तयोः । मिथोदर्शनश्रवणाभ्यां परस्परावलोकनगुणाकर्णनाभ्याम् उपस्थिताभिमानजन्मा उपस्थितं यत् अभिमानं ममायं ममेयं वेति अहङ्कारः तस्मात् जन्म उत्पत्तिर्यस्य तथाभूतः परस्परानुरागो वा अन्योन्यप्रणय एव । अभिलषणीयानाम् आकाङ्क्षणीयानाम् आलिङ्गनादीनाम्

तेषु प्रागसङ्गतयोः पूर्वानुरागः पुरुषप्रकाण्डे यथा,—

दूरं मुक्तालतया विससितया विप्रलभ्यमानो मे ।
हंसइव दर्शिताशो मानसजन्मा त्वया नीतः ॥

अत्र पुण्डरीकस्य महाश्वेतायां प्रागसङ्गतायां समुत्पन्नः संकल्परमणीयोऽभिलाषः तदनाप्तौ उक्तप्रकारेण प्रकृष्यमाणः त्वया मे मानसजन्मा दूरं नीत इति उत्तरकामावस्थया प्रकाश्यते ॥३६६॥

स एव स्त्रीप्रकाण्डे यथा,—

दुल्लहजणाणुराओ लज्जा गरुई परवसो अप्पा ।
पिअसहि ! विसमं पेम्मं मरणं सरणं णव रि एक्कम् ॥

अत्रापि प्राग्वदेव सागरिकाया वत्सराजे अनुरागः प्रकृष्यमाणो मरणं शरणम् इति उत्तरया एव कामावस्थया कथ्यते ॥ ३६७॥

अनवाप्तौ अप्राप्तौ । समुपजायमानैः समुत्पाद्यमानैः । अनुबद्धः संवलितः । प्राप्तेति । प्राप्ता प्राप्या प्रकर्षावस्था येन तथाभूतः ॥ ३६५ ॥

तेषु पूर्वानुरागादिषु । पुरुषप्रकाण्डे पुरुषविषये इत्यर्थः ।

दूरमिति । विससितया मृणालशुभया मुक्तालतया मौक्तिकहारेण मुक्ताहार-विनिमयेनेति भावः विप्रलभ्यमानः प्रलोभ्यमानः मे मम मानसजन्मा काम इत्यर्थः दर्शिताशः मृणालप्रदर्शनात् दत्ताश इत्यर्थः हंस इव त्वया दूरं हि दूरदेशञ्च नीतः प्रापितः ॥ ३६६ ॥

दुर्लभजनानुरागो लज्जा गुर्वी परवशः आत्मा ।
प्रियसखि ! विषमं प्रेम शरणं मरणं केवलमेकम् ॥

दुर्लभेति । दुर्लभे दुष्प्रापे जने अनुरागः प्रणयः ननु चेष्टया स लक्ष्यं शक्यते इत्यत्राह लज्जेति । लज्जा गुर्वी महती लज्जया स न प्रकाश्यते इति भावः आत्मा परवशः पराधीनः स्वाधीनतया लज्जात्यागेनापि तत्प्राप्तये यत्नः क्रियते किन्तु पराधीनत्वात् तन्न शक्यते इति भावः । हे प्रियसखि ! प्रेम अनुरागः विषमं दारुणं दुर्वारमिति भावः । अतः केवलम् एकम् एकमात्रं मरणं मृत्युः शरणमाश्रयः प्रतीकार इति यावत् ॥ ३६७ ॥

सङ्गतयोः मानः स निर्हेतुर्यथा,—

अत्थ क्क रुसणं अलिअवअणणिब्बन्धे पसीद खणेण।

उम्मच्छरसन्तावो पुत्तअ! पअवी सिणेहस्स॥

अत्र प्रेमगतेः स्वभावकौटिल्यात् हेतुमन्तरेण उपजायमानो निर्हेतुरुच्यते॥ ३६८॥

स एव सहेतुः यथा,—

पडिउत्थिआ ण जप्पइ गहीआ विप्फुरइ चुम्बिआ रुसइ।

तुण्हिं भुआ णववहुआ किदा वराकेण दइएण॥

यद्यपि आलिङ्गनादेर्मेति न इत्यादिभिः प्रतिषेधो न विद्यते तथापि तदर्थोऽस्ति एवेति मानलक्षणं घटते॥ ३६९॥

अत्र क्व रोषोऽलीकवचननिर्बन्धे प्रसीद क्षणेन।

उन्मत्सरसन्तापः पुत्रक! पदवी स्नेहस्य॥

अत्रेति। हे पुत्रक! अत्र अस्मिन् अलीकवचननिर्बन्धे त्वया मदन्यः कास्यते इत्येवं मृषावादस्य निर्बन्धे साग्रहवचने इत्यर्थः रोषः कोपः क्व? न कोपो कार्य्य इति भावः। क्षणेन अल्पेनैव कालेन प्रसीद प्रसन्नतां भज उद्गतः उत्थित इत्यर्थः मत्सरः द्वेषः तेन सन्तापः कियन्तं काल दुःखभोग इत्यर्थः स्नेहस्य प्रेम्णः पदवी पन्थाः। न विना विप्रलम्भेण सम्भोगः पुष्टिमश्नुते इति वत् मानेनापि विना सम्भोगस्य पुष्टेरभावात् स्वतएव निर्हेतुर्मानः प्रसरतीति नात्र त्वया वैमनस्यमवलम्बितव्यमिति भावः। उपमातुरुक्तिः॥ ३६८॥

प्रत्युत्थिता न जल्पति गृहीता विस्फुरति चुम्बिता रुष्यति।

तूष्णीभूता नववधूः कृता वराकेण दयितेन॥

प्रत्युत्थितेति। वराकेण निर्दोषेण सरलभावापन्नेनेति यावत् दयितेन प्रियेण नववधूः नवोढा कान्ता प्रत्युत्थिता उपस्थितिमात्रेण उत्थाय सम्वर्द्धिता सती न जल्पति न भाषते। धृता सती विस्फुरति पलायनार्थं चेष्टते, चुम्बिता सती रुष्यति कुप्यति अतएव रोषात् तूष्णीम्भूता मौनावलम्बिनी कृता॥ ३६९॥

सङ्गतवियुक्तयोः प्रवासः स नवानुरागो यथा,

प्रियमाधवे ! किमसि मय्यवत्सला ननु सोऽहमेव यमनन्दयत्पुरा ।
अयमाग्रहीतकमनीयकङ्कणस्तवमूर्त्तिमानिव महोत्सवः करः ॥

अत्र विवाहानन्तरमेव मालत्याः कपालकुण्डलया अपहारात् माधवमालत्योः अयं नवानुरागः प्रवास उच्यते ॥३७० ॥

स एव प्रौढानुरागो यथा,

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलायां
आत्मानं ते चरणपतितं यावदिच्छामि कर्त्तुम् ।
अस्रैस्तावत् मुहुरुपचितैः दृष्टिरालिप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः ॥

अत्र प्राचीनप्रणयकोपप्रसादनादिभिः अनुरागस्य प्रौढिः अवगम्यते ॥ ३७१ ॥

सङ्गतयोरेव अन्यतरव्यपाये करुणः ॥

प्रियेति । प्रियः माधवो यस्याः सा प्रियमाधवा तत्सम्बुद्धौ हे प्रियमाधवे ! माधवानुरागिणि ! मयि माधवे इति भावः अवत्सला अस्नेहा किं कथम् असि ? भवसि ? ननु भोः ! अयम् आग्रहीतं धृतं कमनीयं मनोज्ञं कङ्कणं वैवाहिकहस्तभूषणं येन तथाभूतः अतएव मूर्त्तिमान् शरीरवद्धः महोत्सव इव तव करः पाणिः पुरा प्राक् यं समनन्दयत् आनन्दयामास अहं स माधव एवेत्यर्थः ॥ ३७० ॥

त्वामिति । हे प्रिये इति अध्याहार्य्यम् । प्रणयेन प्रेम्णा कुपितां मानवतीमिति भावः त्वां धातुरागैः गैरिकादिद्रवैः शिलायाम् आलिख्य चित्रीकृत्येत्यर्थः यावत् आत्मानं स्वस्वरूपं ते तव आलिख्यगतायाः इति भावः चरणपतितं मानभञ्जनार्थं पदानतं कर्त्तुम् इच्छामि अभिलषामि, तावत् मुहुः पुनः पुनः उपचितैः उद्गतैः दुःखादिति भावः अस्रैः नेत्रवारिभिः मे मम दृष्टिः आलुप्यते आव्रियते, कथमित्याह क्रूर इति । क्रूरः दारुणः कृतान्तः दैवं कृतान्तो यमदैवयोरित्यमरः । तस्मिन्नपि आलिख्येऽपि नौ आवयोः सङ्गमं मेलनं न सहते न क्षमते ॥ ३७१ ॥

अन्यतरव्यपाये उभयोः नायकनायिकयोः एकस्य नाशे इत्यर्थः ।

स स्त्रीव्यपाये पुरुषस्य यथा—,

ध्रुवमस्मि धठः शुचिस्मिते ! कलितः कैतववत्सलस्त्वया।
परलोकमसन्निवृत्तये यदनामन्त्र्य गताऽसि मामितः॥

अत्र इन्दुमतीव्यपायात् अजस्य दुःखातिशयः करुण उच्यते॥ ३७२

स एव पुरुषव्यपाये स्त्रिया यथा,—

हृदये वससीति मत्प्रियं यदवोचस्तदवैमि कैतवम्।
उपचारपदं न चेदिदं त्वमनङ्गः कथमक्षता रतिः ?॥

अत्र अनङ्गविषये रतेः शोकप्रकर्षात् करुण इति आख्यायते। हीनपात्रादिषु च एतदाभासा भवन्ति॥ ३७३॥

तत्र हीनपात्रेषु पुंसि प्रेमानुरागो यथा,—

कअलीगब्भसरिच्छे ऊरू दट्ठूण हलिअसोण्हाए।
उल्लसइ णहरच्छणचटुलस्स चित्तं सेउल्लिअकरस्स॥ ३७४॥

ध्रुवमिति। हे शुचिस्मिते ! विशुद्धमन्दहासिनि ! त्वया अस्मि अहं कैतववत्सलः कपटप्रेमिकः अतएव धठः धूर्त्तः ध्रुवं निश्चितं विदितः ज्ञातः। यत् यतः मम धठतानिश्चयादित्यर्थः माम् अनामन्त्र्य अनापृच्छ्य असन्निवृत्तये अपुनरागमनाय इतः अस्मात् लोकात् परलोकं स्वर्गं गतासि प्रस्थितासि॥ ३७२॥

हृदय इति। हे प्रिये ! इति अध्याहार्य्यम्। त्वं मे मम हृदये अन्तरिन्द्रिये वससि तिष्ठसि इति यत् मम प्रियं प्रीतिकरं वचः अवोचः कथितवानसि, तत् कैतवं कपटम् अलीकमित्यर्थः अवैमि अवगच्छामि, चेत् यदि इदम् उपचारपदम् आरोपितवाक्यं न स्यादिति शेषः तदा त्वम् अनङ्गः अशरीरः दग्धावयव इत्यर्थः, रतिः अहमित्यर्थः तव हृद्गतेति भावः कथं अक्षता अविनष्टा अदग्धेति यावत् आश्रयदहने आश्रितस्य दाहोऽवश्यम्भावीति भावः॥ ३७३॥

कदलीगर्भसदृशे ऊरू दृष्ट्वा हलिकसुषायाः।
उल्लसति नखरक्षनकाङ्क्षिणश्चित्तं खेदार्द्रितकरस्य॥

कदलीति। हलिकस्य कर्षकस्य सुषायाः पुत्रवध्वाः कदलीगर्भसदृशे

अत्रैव स्त्रियां मानो यथा,—

पढ़मघरिणीए समए तुह पिण्डेहिम् आदरं कुणन्तम्मि ।
णववहुआए इसरोसं संव्वच्छिअ वच्छआ मुक्का ॥ ३७५ ॥

तिर्य्यक्षु पक्षिणि प्रवासो यथा,—

आपृच्छामि व्यथयति मनो दुर्वला वासरश्रीः
एह्यालिङ्ग क्षपय रजनीमेकिका चक्रवाकि ! ।
नान्यासक्तो न खलु कुपितो नानुरागच्युतो वा
दैवाधीनः सपदि भवतीमस्वतन्त्रस्त्यजामि ॥३७६॥

रम्भास्तम्बसदृशे ऊरू दृष्ट्वा नखरञ्जनकारिणः नखाग्रकर्त्तनपुरःसरं तद्रञ्जनकारिणः नापितस्येति शेषः खेदेन सत्त्वोदयजनितेन घर्मेण आर्द्रितः सिक्तः करः पाणिः यस्य तथाभूतस्य सतः चित्तम् उल्लसति कामावेशेन विस्फुरति इति शेष. ॥ ३७४ ॥

प्रथमगृहिण्यां समये तव पिण्डैरादरं कुर्वन्त्याम् ।
नववध्वा ईषद्रोषं सहत्य वत्साः मुक्ताः ॥

प्रथमेति । प्रथमगृहिण्यां समये मध्याह्नकाले पिण्डैः अन्नैः तव आदर कुर्वन्त्यां सादर त्वाम् अन्नं भोजयन्त्यामित्यर्थः नववध्वा नूतनमूढया भार्य्ययेत्यर्थः ईषद्रोष सहत्य अप्रकटयेत्यर्थः वत्साः शिशवः मुक्ताः त्यक्ताः भर्त्तारं विरक्तीकर्त्तुमिति भावः ॥ ३७५ ॥

आपृच्छामीति । हे चक्रवाकि । आपृच्छामि तां सम्बोधयामि, वासरस्य दिवसस्य श्रीः कान्तिः दुर्वला क्षीणा अवसितप्रायेत्यर्थः अतः मे मम मनः व्यथयति व्याकुलयति तव भाविनो विच्छेदस्य स्मरणादिति भावः । एहि आगच्छ, आलिङ्ग, एकिका एकाकिनी सती रजनीं रात्रिं क्षपय यापय । अहं न अन्यस्याम् नार्य्याम् आसक्तः अनुरक्तः, न खलु नैव कुपितः त्वां प्रति नैव क्रुद्धः, वा पक्षान्तरे न अनुरागात् त्वत्प्रणयात् च्युतः भ्रष्टः, किन्तु दैवस्य अधीनः वशगः अतएव अस्वतन्त्रः अक्षम इत्यर्थः सपदि सहसा भवतीं त्वां त्यजामि ॥ ३७६ ॥

अत्रैव करिणीकरुणो यथा,—

नान्तर्वर्त्तयति ध्वनत्सु जलदेष्वामन्द्रमुद्गर्जितं
नासन्नात् सरसः करोति कवलानावर्जितैः शैवलैः।
दानज्यानिविषण्णमूकमधुपव्यासङ्गदीनाननो
नूनं प्राणसमावियोगविधुरः स्तम्बेरमस्ताम्यति॥

अथ सम्भोगः। तत्र नायकयोः प्रागसङ्गतयोः सङ्गतिवियुक्तयोर्वा मिथः समागमे प्रागुत्पन्नः तदानीन्तनो वा रत्याख्यः स्थायिभावः अभिलषणीयालिङ्गनादीनाम् अवाप्तौ सत्यां समुपजायमानैः हर्षधृतिस्मृतिमतिप्रभृतिभिः व्यभिचारिभावैः संसृज्यमानः ऋतूद्यानोपगमनजलक्रीडापर्वतोपदेशप्रसाधनगृहमधुपानेन्दूदयादिभिः उद्दीप्यमानः सविभ्रमभ्रूकटाक्षविक्षेपालापसम्भ्रमस्मितादिभिः अनुभावैः अभिव्यज्यमान ईप्सितमासादयन् जिहासितं वा आजिहानः प्राप्तप्राप्यप्रकर्षारम्भः सम्भोगशृङ्गाराख्यां लभते। स चतुर्धा। प्रथमानुरागानन्तरः, मानानन्तरः, प्रवासानन्तरः, करुणानन्तर इति॥ ३७७॥

नान्तरिति। स्तम्बेरमः हस्ती जलदेषु मेघेषु ध्वनत्सु गर्जत्सु आमन्द्रम् ईषद्गम्भीरम् उद्गर्जितम् उच्चैर्गर्जनं न अन्तर्वर्त्तयति न अन्तरावर्त्तयति। तथा आसन्नात् सन्निहितात् सरसः सरोवरात् आवर्जितैः आहृतैः शैवलैः जलनीलीभिः कवलान् ग्रासान् न करोति। नून मुत्प्रेक्षते मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादयः। उत्प्रेक्षावाचकाः शब्दा इव शब्दोऽपि तादृश इत्युक्तेः। प्राणसमायाः कान्तायाः वियोगेन विच्छेदेन विधुरः कातरः अतएव दानस्य मदवारिणः ज्यानिः अपगमः उल्लासाभावादिति भावः तया हेतुना विषण्णाः विषादं गता अतएव मूका निःशब्दा ये मधुपाः भ्रमराः तेषां व्यासङ्गेन सङ्गत्या दीनं दुःखितं विषण्णमित्यर्थः मधुपानां दुःखदर्शनादिति भावः आननं यस्य तथाभूतः सन् ताम्यति कष्टं प्राप्नोति॥

तेषु प्रथमानुरागानन्तरो यथा,—

पाणिग्गहणे एअ पव्वतिए ण्हादं सहीहिं सोहग्गम्।
पशुपइणा वासुइकंकणम्मि ओसारिए दूरम् ॥ ३७८ ॥

मानानन्तरो यथा,—

उव्वहइ दइअगहिआहरोट्ठखिज्जन्तरोसपड़िराअम्।
पाणीअरन्तमइरं चसअं विअ णिअं मुहं बाला ॥३७९ ॥

प्रवासानन्तरो यथा,—

मङ्गलवलअं जीअणं विअ रक्खिअं जं पोसिदवहुआए।
पत्तपिअदंसणससिणहबाहुलदिआए तं भिसम् ॥ ३८० ॥

अथ सम्भोग इत्यादि। संसृज्यमानः सङ्गच्छमानः। अभिव्यज्यमानः व्यक्तीक्रियमाणः। आसादयन् प्रापयन्। जिहासितं हातुमिष्टं त्यक्तुमिष्टमित्यर्थः आजिहानः आत्यजन् ॥ ३७७ ॥

पाणिग्रहण एव पार्वत्या ज्ञातं सखीभिः सौभाग्यम्।
पशुपतितना वासुकिकङ्कणे अपसारिते दूरम् ॥

पाणीति। पार्वत्या गौर्याः पाणिग्रहणे पाणिग्रहणसमये एव पशुपतिना वासुकिः नागराज एव कङ्कणः वलयाकारालङ्कारविशेषः तस्मिन् दूरम् अपसारिते अपनीते सति मुग्धायाः पार्वत्या भीतिशङ्केति भावः सखीभिः सौभाग्यं पार्वत्याः प्रियवाल्लभ्यं ज्ञातं विदितम् ॥ ३७८ ॥

उद्वहति दयितगृहीताधरोष्ठचीयमाणरोषप्रतिरागम्।
पाण्यवसरन्मदिरं चषकमिव निजमुखं बाला ॥

उद्वहतीति। बाला मुग्धा कान्ता दयितेन प्रियेण गृहीतः पाणिना धृतः अधरोष्ठः तेन चीयमाणः अपगच्छन् रोषस्य प्रणयकोपस्य प्रतिरागः स्फुरणादिरूपो विलासो यत्र तादृशं पाणौ भुजे अवसरन्ती पतन्ती मदिरा यस्य तथाभूतं चषकमिव पानपात्रमिव निजं मुखम् उद्वहति धत्ते ॥ ३८९ ॥

मङ्गलवलयं जीवनमिव रचितं यत् प्रोषितवध्वा।
प्राप्तप्रियदर्शनसस्मेहबाहुलतिकया तद्विद्धम् ॥

करुणानन्तरो यथा,—

ण मुद्धम्मि मए विपिणे दिट्ठो पिअदमो जिअन्तीए।
इह लज्जा अ परिहासो तिस्से हिअए ण संमाइ॥

तेऽमी चत्वारोऽपि सम्भोगाः चतुर्भिरेव विप्रलम्भैः प्रकर्षमापद्यन्ते ॥३८१॥

तेषु प्रथमानुरागेण यथा,—

इन्दुर्यत्र न निन्द्यते न मधुरं दूतीवचः श्रूयते
नालापा निपतन्ति वाष्पकलुषा नोपैति कार्श्यं वपुः।
स्वाधीनामनुकूलिनीं निजबधूमालिङ्ग्य यत्सुप्यते
तत्किं प्रेम गृहाश्रमव्रतमिदं कष्टं समाचर्य्यते ॥३८२॥

प्रोषितस्य वध्वा नार्या यत् मङ्गलवलयं जीवनमिव प्रियस्येति भावः रचितं तत् प्राप्तेन प्रियस्य प्रवासादागतस्येति भावः दर्शनेन ससेहा स्नेहवती या बाहुलतिका भुजलता तया भिन्नं सादरं गृहीतमित्यर्थः॥ ३८०॥

न मुग्धास्मि मया विपिने दृष्टः प्रियतमो जीवन्।
इह लज्जा च परिहासस्तस्या हृदये न सम्माति॥

अहं न मुग्धास्मि बालिका नाहमित्यर्थः मद्वचनमसत्यं भान्तं वा न मन्यतामिति भावः। मया विपने अरण्ये जीवन् प्रियतमः तस्या इति शेषः दृष्टः अवलोकितः। इह अस्मिन् वचने कथिते इति शेषः तस्याः हृदये लज्जा च परिहासश्च न सम्माति न पर्य्याप्नोतीत्यर्थः सा हि एतद्वचनेन प्रियतमजीवनस्य सत्यताप्रतीतेः लज्जावती मृतस्य जीवनमसम्भवमिति बुद्ध्या च परिहासः सख्या कृत इति अवबुद्धवती चासौदिति भावः। कस्याश्चित् प्रतिवासिनीं काञ्चित् प्रत्युक्तिरियम्॥ ३८१॥

इन्दुरिति। यत्र प्रेम्णि इन्दुश्चन्द्रः न निन्द्यते न तिरस्क्रियते विरहे असह्यतयेति भावः, मधुरं नानाभङ्गियुतमिति भावः दूत्याः प्रियाप्रेषितायाः इति भावः वचः वचनं न श्रूयते नाकर्ण्यते प्रवासाभावादिति भावः। वाष्पकलुषाः अश्रुभिराविलाः आलापाः वचनानि न निपतन्ति न प्रसरन्ति, तथा वपुः शरीरं कार्श्यं

मानेन यथा,—

रइविग्गहम्मि कुण्ठीकिदाओ धाराओ पेम्मखग्गस्स ।
अणसाइं एअ सिज्झन्ति माणसाइं णात्थ मिहुणाणम् ॥३८३॥

प्रवासेन यथा,—

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान् गमय चतुरो लोचने मीलयित्वा ।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥३८४॥

तनुतां न उपैति न प्राप्नोति विरहादिति भावः। यत् यच्चेत्यर्थः अव्ययमेतत् स्वाधीनां स्ववशाम् अनुकूलिनीम् अनुरक्तां निजवधूम् आलिङ्ग्य उत्सङ्गे कृत्वा सुप्यते निद्रायते तत् किम् ? अनिर्वचनीयमित्यर्थः इदम् इत्थं गृहाश्रमव्रत गार्हस्थधर्मनियमः कष्टं समाचर्य्यते अनुष्ठीयते लभ्यते इत्यर्थः ईदृक् गार्हस्थधर्म-पालनमतिदुर्लभमिति भावः ॥ ३८२ ॥

रतिविग्रहे कुण्ठीकृता धाराः प्रेमखड्गस्य ।
अनसाख्येव सिध्यन्ति मानसानि नात्र मिथुनानाम् ॥

रतिविग्रहे। प्रणयकलहे प्रेमखड्गस्य प्रणयरूपस्य असेः धाराः कुण्ठीकृताः क्षीणतां गता इत्यर्थः यतः मिथुनानां स्त्रीपुरुषाणां मानसानि अनसाणि अनतानि एव अत्र रतिविग्रहे न सिध्यन्ति स्वतएव परस्परं नतानि एव सिध्यन्तीत्यर्थः ॥ ३८३ ॥

शापान्त इति। शार्ङ्गपाणौ नारायणे भुजगशयनात् अनन्तशय्यायाः उत्थिते कार्त्तिकपौर्णमास्यामिति भावः मे मम शापस्य अन्तः अवसानं भवितेति शेषः। अतः एतान् चतुरः मासान् आषाढादीन् इत्यर्थः लोचने नयने मीलयित्वा निमील्य गमय अतिवाहय। पश्चात् शापावसानात् परम् आवां त्वम् अहञ्चेत्यर्थः परिणताः पूर्णतां गताः शरच्चन्द्रिकाः शारदीयाः चन्द्ररश्मयः यासु तथाभूतासु क्षपासु रात्रिषु विरहे गुणितं संख्यातम् एवमेव करिष्यामीत्येवं रूप-मित्यर्थः तं तं आत्मनः अभिलाषं मनोरथं निर्वेक्ष्यावः भोक्ष्यावहे निर्वेशो भुक्ति भोगयोरित्यमरः ॥ ३८४ ॥

करुणेन यथा,—

न मर्त्यलोकस्त्रिदिवात् प्रहीयते म्रियेत नाग्रे यदि वल्लभो जनः।
निवृत्तमेव त्रिदिवप्रयोजनं मृतः स चेज्जीवत एव जीवति॥

तिर्य्यगादिषु च एतदाभासा भवन्ति॥३८५॥

तेषु सरीसृपमृगयोः यथा,

मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्त्तमानः।
शृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः॥३८६

पशुपक्षिणोः यथा,—

ददौ सरःपङ्कजरेणुगन्धि गजाय गण्डूषजलं करेणुः।
अर्द्धोपभुक्तेन बिसेन जायां सम्भावयामास रथाङ्गनामा॥३८७

नेति। यदि वल्लभो जनः प्रियजनः अग्रे न म्रियेत न पञ्चतां प्राप्नुयात् तदा मर्त्यलोकः पृथिवीत्यर्थः त्रिदिवात् स्वर्गात् न प्रहीयते न प्रहीनो भवति पृथिवी स्वर्गतुल्यतया प्रतिभासते इति भावः। चेत् यदि मृतः पञ्चता गतः स प्रियजनः जीवत एव जीवितस्य जनस्य एव जीवति तदा त्रिदिवस्य स्वर्गस्य प्रयोजनम् उपयोगः आकाङ्क्षेति यावत् निवृत्तं गतमेव। मरणानन्तरजीवनं प्रियजनस्य स्वर्गादपि सुखकरमिति भावः॥ ३८५॥

मध्विति। द्विरेफो भ्रमरः स्वा निजा प्रियां भ्रमरीमित्यर्थः अनुवर्त्तमानः अनुसरन् कुसुममेव एकं पात्रं तस्मिन् पुष्परसं पपौ पीतवान्। कृष्णसारः मृगविशेषः स्पर्शेन प्रियाङ्गस्येति भावः निमीलिते आनन्दातिशयात् मुकुलिते अक्षिणी यस्याः तथाभूता मृगीं हरिणीम् अकण्डूयत कण्डूयितवान्॥ ३८६॥

ददाविति। करेणुः हस्तिनी गजाय प्रियतमायेति भावः सरसः सरोवरस्य पङ्कजरेणुगन्धि पद्मरजःसुरभि गण्डूषजलं स्वपीतावशिष्टं जलमित्यर्थः ददौ दत्तवती। सर इत्यत्र रसादिति पाठे रसात् रागादित्यर्थः। रथाङ्गनामा चक्रवाकः अर्द्धोपभुक्तेन अर्द्धजग्धेन बिसेन मृणालेन जायां चक्रवाकीं सम्भावयामास प्रीणयामास॥ ३८७॥

किन्नरेषु यथा,—

गीतान्तरेषु श्रमवारिलेशै रीषत्समुच्छ्वासितपत्रलेखम् ।
पुष्पासवाघूर्णितनेत्रशोभि प्रियामुखं किम्पुरुषश्चुचुम्बे ॥३८८

तरुषु यथा,—

पर्य्याप्तपुष्पस्तवकस्तनीभ्यः स्फुरत्प्रवालोष्ठमनोहराभ्यः ।
लताबधूभ्यस्तरवोऽप्यवापुः विनम्रशाखाभुजबन्धनानि ॥३८९

विप्रलम्भचेष्टासु प्रथमानुरागे स्त्रिया यथा,—

पेच्छइ अलद्धलच्छं दीहं णीससइ सुण्णअं हसइ ।
जह जम्पइ अप्फुडन्तं तह से हिअए ठिअं किम्पि ॥३९०

गीतान्तरेषु इति । किम्पुरुषः किन्नराख्यो देवयोनिविशेषः गीतान्तरेषु सङ्गीताभ्यन्तरेषु श्रमेण सङ्गीतकरणजनितेनेति भावः ये वारिलेशाः स्वेदबिन्दवः तैः ईषत् किञ्चित् समुच्छ्वासिता विलुप्ता पत्रलेखा पत्ररचना यस्मिन् तथोक्तं पुष्पासवेन कुसुममधुना तत्पानेनेति भावः आघूर्णिताभ्यां नेत्राभ्यां शोभते इति तथाभूतं प्रियायाः किन्नर्याः मुखं चुचुम्बे चुम्बितवान् ॥ ३८८ ॥

पर्य्याप्तेति । तरवोऽपि अचेतना वृक्षा अपि का कथा सचेतनानामित्यपिकारेण द्योत्यते । पर्य्याप्ताः सम्यक् प्रस्फुटाः ये पुष्पाणां स्तवकाः ते एव स्तना यासां ताभ्यः स्फुरद्भिः राजद्भिः प्रवालैः नवपल्लवैरेव ओष्ठैः मनोहराभ्यः मनोहारिणीभ्यः लता एव वध्वः ताभ्यः वल्लीनारीभ्यः विनम्राः शाखा एव भुजाः बाहवः तैः बन्धनानि आलिङ्गनानीति भावः अवापुः लेभिरे ॥ ३८९ ॥

पश्यति अलब्धलक्ष्यं दीर्घं निःश्वसिति शून्यकं हसति ।
यथा जल्पति अस्फुटं तथास्या हृदये स्थितं किमपि ॥

पश्यतीति । इयम् अलब्धं लक्ष्यं यस्मिन् तत् यथा तथा लक्ष्यं विनेत्यर्थः यथा पश्यति अवलोकयति । दीर्घम् आयतं यथा तथा निःश्वसिति निश्वासं त्यजति । शून्यकम् अहेतुकमिति भावः यथा हसति, तथा अस्फुटम् अस्पष्टं यथा तथा जल्पति आलपति तथा अस्या हृदये स्थितं किमपि वस्तु इति तर्कयामीति शेषः ॥ ३९० ॥

पुंसो यथा,—

सो तुह किदे सुन्दरि! तह च्छीणो सुमहिमओ हलिअउत्तो।
जह से मछरिणी अवि दिव्वजाआ पडिवण्णा ॥३९१॥

माने स्त्रिया यथा,—

कणुज्जुआ वराई सा अज्ज तए किदावराहेण।
जम्भाइआ रुक्खपलोअइआइं दिअहेण सिक्खविआ ॥३९२

पुंसो यथा,—

अविभाविअ रअणिमुहं तस्स असच्चरिअविमलचन्दुज्जोअम्।
जाअं पिआविरहे वड्ढन्ताणुसआ मूढ़लक्खहिअअम् ॥३९३

प्रवासे स्त्रिया यथा,—

पिअसम्भरणपओट्टन्तवाहधाराणिवादभीआए।
दिज्जवङ्गीवाइ दीवहो पहिअजाआए ॥३९४॥

पुंसो यथा,—

मज्झण्हपत्थिदस्स वि गीम्हे पहिअस्स हरइ सन्तावम्।
हिअअट्ठिअजाआमुहमिअङ्कजोण्हजलप्पवाहो ॥३९५॥

स तव कृते सुन्दरि! तथा क्षीणो सुमहिमा हलिकपुत्रः।
यथास्य मत्सरिणी अपि दिव्यजाया प्रतिपन्ना ॥

हे सुन्दरि! सः सुष्ठु महिमा यस्य तथाभूतः महानुभाव इत्यर्थः हलिकस्य पुत्रः तव कृते त्वन्निमित्तं तथा क्षीणः कार्श्यं गत इत्यर्थः यथा दिव्यजाया अपि सुरसुन्दरी अपि अस्य मत्सरिणी विद्वेषिणी विरागार्हेति भावः प्रतिपन्ना प्रतिबभौ इत्यर्थः ॥ ३९१ ॥

कणुज्जुआ इति ॥ ३९२ ॥

अविभाविअ इति ॥ ३९३ ॥

पिअ इति ॥ ३९४ ॥

करुणे स्त्रिया यथा,—

णवरिअपसारिअगीरअभरि ऊप्पहपइसवेणीबन्धा ।
पड़िआ उरसन्दाणिअमहिअलचक्कलइ अत्थणीजणअमुआ ॥

३९६ ॥

पुंसो यथा,—

अहोमुहो चिट्ठइ जाआसुण्णे घरे हलिअउत्तो ।
उक्खित्तणिहाणाइं व रमणट्ठाणाणि पेक्खन्तो ॥

एवमन्यत्रापि ॥३९७॥

करुणवर्जं स्त्रिया यथा,—

सौधादुद्विजते त्यजत्युपवनं द्वेष्टि प्रभामैन्दवीं
द्वारात् त्रस्यति चित्रकेलिसदसो वेशं विषं मन्यते ।

मध्याह्नप्रस्थितस्यापि ग्रीष्मे पथिकस्य हरति सन्तापम् ।
हृदयस्थितजायामुखमृगाङ्कज्योत्स्नाजलप्रवाहः ॥

मध्याह्नेति। ग्रीष्मे निदाघे मध्याह्ने मध्यन्दिने प्रस्थितस्यापि चलितस्यापि पथिकस्य हृदये स्थितायाः जायायाः कान्तायाः मुखमेव मृगाङ्कः चन्द्रः तस्य ज्योत्स्ना कान्तिरेव जलप्रवाहः जलधारा सन्तापं हरति प्रियामुखानुध्यानेन अन्यमनस्कतया ग्रीष्मसन्तापो नानुभूयते इति भावः ॥ ३९५ ॥

णवरिअ इति ॥ ३९६ ॥

अधोमुखं तिष्ठति जायाशून्ये गृहे हलिकपुत्रः ।
उत्खातनिधानानीव रमणस्थानानि पश्यन् ॥

अध इति। हलिकस्य पुत्रः जायाशून्ये कान्ताविरहिते गृहे उत्खातनिधानानीव उद्धृतनिधीनीव रमणस्थानानि सुरतचेष्टानि पश्यन् अवलोकयन् अधोमुखः तिष्ठति। अधोमुखः तिष्ठतीत्यत्र अन्तर्मूर्त्तिं दह्यते इति पाठे अन्तर्मूर्त्तिं शरीरान्तरित्यर्थः दह्यते अन्तस्तापेनेति शेषः ॥ ३९७ ॥

सौधादिति। सा कान्ता सौधात् हर्म्यात् उद्विजते विरक्ता भवतीत्यर्थः उप-

आस्ते केवलमञ्जिनीकिसलयप्रस्तारशय्यातले
सङ्कल्पोपनतत्वदाकृतिरसायत्तेन चित्तेन सा ॥३९८॥

स्त्रिया एव प्रथमानुरागवर्जं यथा,—

तिष्ठ द्वारि भवाङ्गणे व्रज वहिः स प्रैति वर्त्मेक्षते
शालामञ्च तमङ्गमञ्च वलभीमञ्चेति वेश्माञ्चति।
दूतीं सन्दिश सन्दिशेति बहुशः सन्दिश्य सास्ते तथा
तल्पे कल्पमयीव निर्घृण! यथा नान्तं निशा गच्छति३९९

प्रथमानुरागवर्जं पुंसो यथा,

रम्यं द्वेष्टि यथा पुरा प्रकृतिभिर्न प्रत्यहं सेव्यते
शय्योपान्तविवर्त्तनैर्विगमयत्युन्निद्र एव क्षपाः।

वनम् उद्यानं त्यजति, इन्दीरियम् औन्दवी तां चान्द्रमसीमित्यर्थः प्रभां द्वेष्टि निन्दति। चित्रकेलिसदसः आलेख्यगृहस्य क्रीडागृहस्य च द्वारात् त्रस्यति बिभेति। वेश्म विषं मन्यते केवलं परम् अञ्जिन्याः पद्मिन्याः किसलयप्रस्तारः पत्ररचना एव शय्यातल तस्मिन् सङ्कल्पेन वासनया उपनता उपनीता या त्वदाकृतिः त्वद् मूर्त्तिः तत्र यो रसः रागः तस्य आयत्तम् अधीनं तेन चित्तेन मनसा आस्ते तिष्ठति ॥३९८॥

तिष्ठेति। हे निर्घृण। निर्दय। द्वारि द्वारदेशे तिष्ठ स्थितिं कुरु, अङ्गणे अजिरे भव अवतिष्ठस्व वहिः वाह्यं देशं व्रज गच्छ, यतः स मत्कान्त इति भावः प्रैति प्रकर्षेण आगच्छति पन्थानम् ईक्षते अवलोकयति त्वं द्वारि स्थित्वा अङ्गणे अवस्थाय वहिर्गत्वा च तं प्रतीक्षस्वेति भावः। स मत्कान्त इति भावः वेश्म शालाम् अञ्चति अलङ्करोति अलङ्करिष्यतीत्यर्थः इति हेतोः त्वं शालां गृहम् अञ्च पूजय सञ्जीकुर्वित्यर्थः तम् अङ्गं शालास्थितमुपकरणं परिच्छदादिकमित्यर्थः अञ्च परिष्कुर्वित्यर्थः वलभीं गृहोपरिस्थितं गृहविशेषम् अञ्च सज्जय। दूतीं मामिति शेषः सन्दिश सन्दिश दूतीमुखेन एवमेवं वाचिकं तत्समीपे प्रेषयेति भावः इति बहुशः पुनः पुनः सन्दिश्य सखीमिति शेषः सा तव कान्ता कल्प-

दाक्षिण्येन ददाति वाचमुचितामन्तःपुरेभ्यो यदा
गोत्रेषु स्खलितस्तदा भवति च व्रीड़ाविलक्षश्चिरम्॥४००

पुंस एव प्रवासकरुणे यथा,

सीता वेश्म यतो निरीक्ष्य हरते दृष्टिं झटित्याकुलाम्
अन्योन्यार्पितचञ्चुदत्तकवलैः पारावतैर्भूयते।
इन्दो दूरत एव नश्यति विशत्यन्तर्गृहं दुःखितः
प्रच्छाद्याननमञ्चलेन रजनीष्वस्तत्रपं रोदिति ॥ ४०१॥

मयीव इत्य कल्पनामयीव तल्पे शय्यायां तथा आस्ते तिष्ठति यथा निशा रजनी अन्तम् अवसानं न गच्छति न प्रभाता भवतीति भावः ॥ ३९९ ॥

रम्यमिति। स राजा रम्यं रमणीयं वस्तु द्वेष्टि निन्दति पुरा यथा पूर्ववदित्यर्थः प्रकृतिभिः अमात्यादिभिः न सेव्यते न कार्य्यार्थमनुगम्यते इति यावत् शय्यायाः शयनतलस्य उपान्तेषु विवर्त्तनैः लुण्ठनैः उन्निद्र एव निद्ररहित एव चपाः रात्रीः विगमयति अतिवाहयति। यदा यस्मिन् समये दाक्षिण्येन दक्षिणः सर्वासु समरागो नायकः तस्य भावः तेन सर्वासु समदृष्ट्येति भावः अन्तःपुरेभ्यः अन्तःपुरवर्त्तिनीभ्यो नारीभ्यः उचिताम् अवश्यं प्रतिवचनीयामित्यर्थः वाचं वाक्यं ददाति ताः प्रतिवक्तीत्यर्थः तदा गोत्रेषु नामसु स्खलितः व्यत्ययित इत्यर्थः एकस्या नाम्नि उच्चारितव्ये हृदयस्थितायाः नाम प्रयोक्तेति यावत् सन् चिरं बहुक्षणमित्यर्थः व्रीडया लज्जया अवनमः अवनतः भवति ॥ ४००॥

सीतेति। यतः यत्र सीतावेश्मनीत्यर्थः पारावतैः कपोतैः अन्योऽन्यस्मै परस्परस्मै चञ्चुभिः मुखाग्रैः दत्तः कवलः ग्रासः यैः तथाभूतैः भूयते विचर्य्यते इति यावत् तत् सीताया वेश्म वासगृहं निरीक्ष्य अवलोक्य झटिति सहसा आकुलाम् अश्रुकलुषामिति भावः दृष्टिं हरते वहति राम इति कर्त्तृपदमूह्यम् एवमुत्तरत्रापि। इन्दोः चन्द्रात् दूरतएव नश्यति अदर्शनं गच्छतीत्यर्थः उद्दीपकत्वात् चन्द्रं नालोकयतीति भावः दुःखितः अतीव कातरः सन् अन्तर्गृहं गृहाभ्यन्तरं विशति गच्छतीत्यर्थः। तथा रजनीषु रात्रिषु अञ्चलेन वसनप्रान्तेन आननं प्रच्छाद्य आवृत्य अस्ता गता त्रपा लज्जा यत्र तत् अस्तत्रपं निर्लज्जमित्यर्थः यथा तथा रोदिति क्रन्दति ॥ ४०१ ॥

सम्भोगचेष्टासु पूर्वानुरागानन्तरे चुम्बनं यथा,—

आदरपणामिओट्ठं अघडिअणासं संवलिअणिचोलं ।
वणभअलुप्पमुहीए तीए परिउम्बणं सुमरिमो ॥ ४०२ ॥

अत्रैव आलिङ्गनं यथा,—

तावमवणेइ ण तहा चन्दनपङ्को वि कामिमिहुणाणम् ।
जह दूसहे गिम्हे अण्णोण्णालिङ्गणसुहम् ॥ ४०३ ॥

मानानन्तरे चुम्बनं यथा,—

जह जह से उम्बइ मण्णुभरिआइं णिहुवणे दइओ ।
अच्छीइं उवरि उवरि तह तह भिण्णाइं विगलन्ति ॥४०४॥

आदरप्रणामितोष्ठमघटितन्यासं संवलितनिचोलम् ।
व्रणभयलुप्तमुख्यास्तस्याः परिचुम्बनं स्मरामः ॥

आदरेति । आदरेण यत्नातिशयेन प्रणामितः अवनतिं नीतः ओष्ठः अधर इत्यर्थः यस्मिन् तथोक्तम् अघटितः अकृतः न्यासः अर्पणं दानमित्यर्थः यस्य तादृशं प्रागदत्तमिति भावः संवलितनिचोलम् आवृतमुखावरणवस्त्रं व्रणात् क्षतात् चुम्बनजनितादिति भावः भयं तेन लुप्तं परवर्त्तितमित्यर्थः मुखं यया तथाभूतायास्तस्याः मत्कान्ताया इत्यर्थः परिचुम्बनं स्मरामः स्मरणपथं नयामः । प्रोषितस्त्रीक्तिः ॥४०२

तापमपनयति न तथा चन्दनपङ्कोऽपि कामिमिथुनानाम् ।
यथा दुस्सहे ग्रीष्मे अन्योन्यालिङ्गनसुखम् ।

तापमिति । दुःसहे सोढुमशक्ये ग्रीष्मे निदाघे यथा अन्योन्यस्य परस्परस्य आलिङ्गनेन सुखं कामिमिथुनानां कामिदम्पतीनां तापम् अपनयति निराकरोति, चन्दनपङ्कः चन्दनद्रवः अपि तथा न तापमपनयतीति शेषः ॥ ४०३ ॥

यथा यथाऽस्याश्चुम्बति मन्युभरिते निधुवने दयितः ।
अक्षिणी उपरि उपरि तथा तथा भिन्ने विगलतः ॥

यथेति । दयितः प्रियः निधुवने सुरतप्रसङ्गे अस्याः कान्तायाः मन्युभरिते कोपकलुषिते अक्षिणी नयने यथा तथा चुम्बति तथा तथा उपरि उपरि भिन्ने

अत्रैव आलिङ्गनं यथा,—

माणदुमपरुसपवणस्स मामेत्ति सव्वङ्गणिव्वुदिकरस्स।
उवऊहणस्स भद्दं रइणाडअपुव्वरङ्गस्स ॥ ४०५ ॥

प्रवासानन्तरं चुम्बनं यथा,—

केन चिन्मधुरमुल्वणरागं वाष्पतप्तमधिकं विरहेषु।
ओष्ठपल्लवमपास्य मुहूर्त्तं सुभ्रुवः सरसमक्षि चुचुम्बे ॥ ४०६ ॥

करुणानन्तरमालिङ्गनं यथा,—

चन्द्रापीडं सा च जग्राह कण्ठे कण्ठस्थानं जीवितञ्च प्रपेदे।
तेनापूर्वां सा समुल्लासलक्ष्मीमिन्दुं स्पृष्ट्वा सिन्धुवेलेव भेजे॥४०७॥

विदलिते विकसिते इत्यर्थः अक्षिणी इति शेषः विगलतः अश्रूणि वर्षत इत्यर्थः ॥ ४०४ ॥

मानद्रुमपरुषपवनस्य मा मामिति सर्वाङ्गनिर्वृतिकरस्य।
उपगूहनस्य भद्रं रतिनाटकपूर्वरङ्गस्य ॥

मानेति। मानः प्रणयकोपः एव द्रुमः वृक्षः तस्य परुषः निष्ठुरः उन्मूलनकर इति भावः पवनः वायुः तस्य माननिरासकस्येति भावः मा माम् इति उच्चार्यते अस्मिन्निति मा मामिति मा मां स्पृश मा मां स्पृशेति सकोपवचनम् तेन सर्वाङ्गेषु सर्वावयवेषु निर्वृतिं सुखम् करोतीति तस्य रतिः सुरतमेव नाटकम् अभिनयग्रन्थः तस्य पूर्वरङ्गः प्रथममनुष्ठीयमानव्यापारविशेषः प्रस्तावनापरपर्य्याय इत्यर्थः तस्य उपगूहनस्य समालिङ्गनस्य भद्रं कुशलं भवतु इति शेषः। तादृशमुपगूहनमतीव मनोरममिति भावः ॥ ४०५ ॥

केनचिदिति। केनचित् कामिनेत्यर्थः सुभ्रुवः सुन्दर्य्याः कान्तायाः विरहेषु अधिकं यथा तथा वाष्पतप्तम् अश्रुभिः तत्पातैरित्यर्थः तप्तम् उष्णं दुःखाश्रूणामुष्णताप्रसिद्धिः। मधुरं मनोज्ञम् उल्वणरागम् उज्ज्वललौहित्यम् ओष्ठपल्लवम् अधरकिसलयम् अपास्य विहाय मुहूर्त्तं कियन्तं क्षणमित्यर्थः सरसं सबाष्पमित्यर्थः स्वजनस्य हि दुःखमयतो विवृतद्वारमिवोपजायते इति भावः अक्षि नयनं चुचुम्बे चुम्बितवती ॥ ४०६ ॥

चन्द्रापीडमिति। सा कादम्बरी चन्द्रापीडं कण्ठे जग्राह च आलिलिङ्ग च

प्रथमानुरागानन्तरं दशनक्षतं यथा,—

णासं विअ सा कवोले अज्ज वि तुह दन्तमण्डलं बाला।
उब्भिण्णपुलअपरिवेढपरिगअं रक्खइ वराई ॥ ४०८ ॥

तदेव मानानन्तरे यथा,—

पवणु वेल्लिअ साहुलिएए वसट्ठिअ दन्तमण्डले।
ऊरू चटु आरअं माइ पुत्ति! जणहासणं कुणसु ॥ ४०९ ॥

प्रवासानन्तरे दन्तक्षतादयो यथा—

दन्तक्खअं कवोले कअग्गहो वेल्लिओ धम्मिलो।
पड़िघुण्णिआत्थ दिट्ठी पिआगमं साहइ बहूए ॥ ४१० ॥

प्रथमानुरागानन्तरे नखक्षतं यथा,—

अज्जाइ णवणहक्खदणिहिरक्खणे गरूअजोव्वणु तुङ्गम्।

कपोलस्थानं चन्द्रापीड़स्येति शेषः जीवितं प्रपेदे प्राप च चकारद्वयं समकाललसूचकम्। सा कादम्बरी इन्दुं चन्द्रं दृष्ट्वा सिन्धुवेलेव सागरजलमिव तेन चन्द्रापीड़जीवनदर्शनजेनेत्यर्थः अपूर्वां समुल्लासलक्ष्मीं समुल्लासशोभां भेजे प्राप ॥४०७॥

न्यासमिव सा कपोले अद्यापि तव दन्तमण्डनं बाला।
उद्भिन्नपुलकपरिवेषपरिगतं रक्षति वराकी ॥

न्यासमिति। सा वराकी तपस्विनी अनुकम्पार्हेति भावः बाला मुग्धा कान्ता कपोले गण्डदेशे तव दन्तमण्डनं दशनक्षतरूपमलङ्करणम् उद्भिन्नानां स्मरणादुद्गतानां पुलकानां रोमहर्षाणां परिवेषेण परिधिना परिगतं परिवेष्टितं न्यासमिव निक्षेपधनमिव रक्षति पालयति। दूत्या नायकं प्रत्युक्तिः ॥ ४०८ ॥

पवनेति ॥ ४०९ ॥

दन्तक्षतं कपोले कचग्रहोद्वेल्लितो धम्मिलः।
परिघूर्णिताच दृष्टिः प्रियागमं साधयति वध्वाः ॥

दन्तक्षतमिति। कपोले गण्डे दन्तक्षतं दशनाघातः कचानां केशानां ग्रहेण ग्रहणेन उद्वेल्लितः स्खलित इत्यर्थः धम्मिलः केशपाशः परितो घूर्णिता भ्रान्ता दृष्टिः वध्वाः महिलायाः प्रियस्य आगमम् उपस्थितिं साधयति सूचयति ॥ ४१० ॥

पडिमागअणिअणअणुप्पलं चिदं होइ त्थणवट्टम् ॥४११॥

अत्रैव पुरुषायितं यथा,—

दरवेवि ऊरुजुअलासु मउलिअच्छीसु ललिअचिउरासु।
पुरुषाइदासु कामो पिआसु सज्जाउहो वसइ ॥ ४१२ ॥

सर्वं सर्वत्र यथा,—

पोढ़महिलाणं जं जं सुट्ठु सिक्खिअं तं रइए सुहावेदि।
जं जं असिक्खिअं णववहुणं तं तं वि रइं देइ ॥४१३॥

आर्य्याया नवनखचतनिधिरचणे गुरुयौवनोत्तुङ्गम्।
प्रतिमागतनिजनयनोत्पलं चितं भवति स्तनपट्टम् ॥

आर्य्याया इति। आर्य्याया: मान्याया: कस्याश्चित् नार्य्या इति भाव: गुरुणा पूर्णेनेति भाव: यौवनेन उत्तुङ्गम् उन्नतं प्रतिमया प्रतिबिम्बेन गते सङ्क्रान्ते नयने उत्पले इव यस्मिन् तादृशं स्तनपट्टं कुचतटं नवं नखपदं नखरचत तस्य रचणे रचणायेत्यर्थ: चितं वसनादिना छन्नम् आवृतं भवति॥ ४११ ॥

दरवेपमानोरुयुगलासु मुकुलिताक्षीषु ललितचिकुरासु।
पुरुषायितासु काम: प्रियासु सज्जायुधो वसति ॥

दरेति। दरम् ईषत् यथा तथा वेपमानं कम्पमानम् ऊरुयुगलं यासां तासु मुकुलिते निमीलिते अचिणी यासां तथोक्तासु ललित: सुन्दर: सुष्ठु विस्रस्त इत्यर्थ: चिकुर: कुन्तल: यासां तथाविधासु पुरुषायितासु पुरुषा इव आचरन्तीति पुरुषायिता: तासु पुरुषमधःकृत्य तदुपरि स्थित्वा रममाणास्विति भाव: प्रियासु कान्तासु काम: सज्जम् आयुधं यस्य तथाभूत:-सज्जितास्त्र इत्यर्थ: सन् वसति तिष्ठति ता अतीव कामासक्ता भवन्तीति भाव: ॥ ४१२ ॥

प्रौढमहिलानां यत् यत् सुष्ठु शिक्षितं रतये सुखयति।
यत् यत् अशिक्षितं नववधूनां तत्तदपि रतिं ददाति ॥

प्रौढ़ेति। प्रौढ़ा गाढतारुण्या: या महिला: नार्य्य: तासां रतये रत्यर्थं सुष्ठु शिक्षितं सखीजनोपदेशादिभिरिति भाव: सुखयति सुखं जनयति यत् यत्

विप्रलम्भपरीष्टिषु अभियोगतः प्रेमपरीक्षा यथा,—

हंहीकसुक्खीणा भणामि रे सुहअ! किम्पि माझूर।
णिज्जणपारद्धीसु कहं पि पुणेहिं लद्धोसि॥ ४१४॥

प्रत्यभियोगतो यथा,—

गोलाविसमोआरच्छलेण अप्पा उरम्मि से मुक्को।
अणुअम्पाणिद्दोसं तेण वि सा गाढ़मुवऊढ़ा॥ ४१५॥

विषहणेन यथा,—

अज्ज वि सेअजलोल्लं पच्चाइ ण तीअ हलिअसोल्लाए।
फग्गुच्छणचिक्खिल्लं जं तुइ दिण्णं त्थणुच्छङ्गे॥ ४१६॥

विमर्शेन यथा,—

तत्तोच्चिअ णेत्ति कहा किआ सन्ति तहिं तहिं समत्थन्ति।
किं मण्णे माउच्छाए क्क जुआणो इमो गामो॥ ४१७॥

बहुमानेन यथा,—

तेण हिरण्णवलआए दिण्णो पहरो इमाए त्थणवट्टे।

अशिक्षितम् अनुपदिष्टं सखीभिरिति शेषः तत् तत् नववधूनां नवोढ़ानां सम्बन्धे अपि रतिं सुखं ददाति॥ ४१३॥

हं ही इति॥ ४१४॥

गोलेति॥ ४१५॥

अद्यापि स्वेदजलार्द्रं प्रत्येति न तस्या हलिकसुषायाः।
फल्गूत्सवकर्दमो यस्त्वया दत्तस्तनीत्सङ्गे॥

अद्यापीति। त्वया स्तनीत्सङ्गे स्तनान्तराले यः फल्गूत्सवकर्दमः फल्गुद्रव इत्यर्थः दत्तः निहितः अलक्षितरूपेणेति भावः अद्यापि स्वेदजलेन आर्द्रं तस्या हलिकसुषायाः अङ्गमिति शेषः न प्रत्येति त्वद्दत्तफल्गुकर्दमयोगेन सत्तोदयात् अङ्गस्य स्वेदार्द्रतेति न विश्वसितीत्यर्थः॥ ४१६॥

तत्तो इति॥ ४१७॥

तेन हिरण्यवलयाया दत्तः प्रहारोऽस्याः स्तनपट्टे।
ग्रामतरुणीभिरद्यापि दिवसं परिपालिता भ्रमति॥

गामतरुणीहिं अज्ज वि दिअहं परिवालिआ भमइ ॥४१८॥

श्लाघया यथा,—

सा तइ सहत्थदिण्णं फग्गुच्छणकद्दमं त्थणुच्छङ्गे ।
परिकुविआ विअ साहइ सलाहिणी गामतरुणीणम् ॥४१९॥

इङ्गितेन यथा,—

जइ सो ण वल्लहो च्चिअ णामग्गहणेण तस्स सहि ! कीस ।
होइ मुहं ते रविअरफंसविसट्टं व्व तामरसम् ॥ ४२० ॥

तेनेति । तेन यूनेति शेषः हिरण्यं स्वर्णमयं वलयं यस्याः तथाभूतायाः अस्याः नार्याः स्तनपट्टे स्तनतटे इत्यर्थः प्रहारः मोटनमिति भावः दत्तः अर्पितः कृतः इत्यर्थः अद्यापि ग्रामतरुणीभिः ग्राम्ययुवतीभिः परिपालिता परिरक्षिता सती इयं दिवसम् अत्यन्तसंयोगे द्वितीया । भ्रमति तस्य यूनोऽनुसन्धानार्थं पर्य्येटति कथं तेन प्रहारो दत्त इति निर्णयार्थमिति भावः ॥ ४१८ ॥

सा त्वया स्वहस्तदत्तं फल्गुत्सवकर्दमं स्तनोत्सङ्गे ।
परिकुपिता इव साधयति श्लाघिनी ग्रामतरुणीनाम् ॥

सेति । सा त्वद्वल्लभेति भावः स्तनोत्सङ्गे स्तनाभ्यन्तरे त्वया स्वहस्तेन दत्तं फल्गूत्सवकर्दमं फल्गुद्रवं परिकुपितेव परिक्रुद्धेव ग्रामतरुणीनां ग्राम्याणां युवतीनां मध्ये श्लाघिनी सती अहमिति आत्मश्लाघावती साधयति धारयति । ग्रामतरुणीनामित्यनेन ऋजुमतित्वं सूचितं तेन समक्षम् अस्याः कीपनचातुरी न प्रकटितेति भावः ॥ ४१९ ॥

यदि स न वल्लभ एव नामग्रहणेन तस्य सखि ! कथम् ।
भवति मुखं ते रविकरस्पर्शविसंस्थमिव तामरसम् ॥

यदीति । हे सखि ! यदि सः न वल्लभ एव प्रिय एव तवेति शेषः तदा तस्य नामग्रहणेन नामोच्चारणेन ते तव मुखं रवेः सूर्य्यस्य करस्पर्शेन किरणसङ्गेन विसंस्थं चञ्चलम् उत्सुकमिति यावत् तामरसमिव रक्तकमलमिव कथं भवति ॥ ४२० ॥

दूतसम्प्रेषणेन यथा,—

समुल्लसिअसव्वङ्गी णामग्गहणेण तस्स सुहअस्स ।
दूइं अ प्पाहेन्ती तस्से अ घरंगणं पत्ता ॥ ४२१ ॥

दूतप्रश्नेन यथा,—

कहं णु गओ कहं दिट्ठो किं भणिओ किं च तेण पडिवण्णम् ।
एअं च्चिअ ण समप्पइ पुणरुत्तं जप्पमाणाए ॥ १२२ ॥

लेखविधानेन यथा,—

वेवमाणखिण्ण करङ्गुलि परिग्गहक्खलिअलेहणीमग्गे ।
सोत्थि च्चिअ ण समप्पइ पिअसहि! लेहम्मि किं लिहिमो॥४२३

समुल्लसितसर्वाङ्गी नामग्रहणेन तस्य सुभगस्य ।
दूतीञ्च प्रहिण्वती तस्यैव घराङ्गणं प्राप्ता ॥

समुल्लसितेति । तस्य सुभगस्य नामग्रहणेन नामकीर्त्तनेन समुल्लसितानि सर्वाणि अङ्गानि यस्याः तथाभूता खेदार्द्रितसर्वाङ्गीति पाठान्तरम्। सती दूतीं प्रहिण्वती प्रेषयन्ती सती तस्यैव कान्तस्य घराङ्गणं वासभूमेश्चत्वरं प्राप्ता च दूती-प्रेरणेनापि औत्सुक्यानपगमात् स्वयं तदभिसरणमिति भावः ॥ ४२१ ॥

कथं नु गतः कथं दृष्टः किं भणितः किञ्च तेन प्रतिपन्नम् ।
एवमेव न समाप्यते पुनरुक्तं जल्पमानायाः ॥

कथं केन प्रकारेण नु प्रश्ने गतः प्राप्तः स मत्कान्त इति भावः एवमुत्तरत्र कथं किम्प्रकार इत्यर्थः दृष्टः अवलोकितः । किञ्च त्वया भणितः उक्तः, तेन च मत्कान्तेन किं प्रतिपन्नं किमवधारितम् ? एवमेव जल्पमानायाः भाषमाणायाः पुनरुक्तं पुनः पुनरुक्तिरित्यर्थः न समाप्यतीत्यर्थः ॥ ४२२ ॥

वेपमानखिन्नकराङ्गुलिपरिग्रहस्खलितलेखनीमार्गे ।
स्वस्तिरेव न समाप्यते प्रियसखि ! लेखे किं लिखामः ॥

वेपमानेति । हे प्रियसखि ! वेपमानाः कम्पमानाः खिन्नाः घर्माक्ताः ये कराङ्गुलयः तासां परिग्रहेण ग्रहणेन स्खलितः लेखन्या मार्गः पन्था यत्र तथाभूते लेखे लेखनसाधने पत्रादावित्यर्थः स्वस्तिरेव प्रथमं लेखनीयं स्वस्तीति माङ्गल्यं पदं न समाप्यते न निर्गच्छति, किं कथं लिखामः । सखीनामुपदेशात् कान्तं

लेखवाचनेन यथा,—

प्रीत्या स्वस्ति पदं विलोकितवती स्थानं श्रुतं तुष्टया
पश्चात् ज्ञातमनुक्रमेण पुरतस्तत् तावकं नामकम्।
तन्वा संमदनिर्भरेण मनसा तद्वाचयन्त्या मुहुः
न प्राप्तो घनवाष्पपूरितदृशा लेखेऽपि कण्ठग्रहः ॥ ४२४ ॥

सम्भोगपरौष्ठिषु प्रथमानुरागानन्तरे साध्वसेन पुंसो यथा,—

लीलाइओ णिअसणे रक्खउ तं राहिआइ त्थणवट्टे।
हरिणीपढ़मसमागमसझसवरेहिं वेविदो हत्थो ॥४२५॥

अत्रैव दोहदनेन मुग्धा यथा,—

किं किं दे पडिहासइ सहीहिं इअ पुच्छिआए मुद्धाए।
पढ़मुल्लुअ दोहलिणीए णवरि दइअं गआ दिट्ठी ॥ ४२६ ॥

अत्रैव प्रगल्भायाः प्रियवाक्यवर्णनं यथा,—

हुं हुं दे भणसु पुणो ण सुअन्ति करेइ कालविक्खेवम्।
घरिणीहिअअसुहाइं पइसो कस्स भणन्तस्स ॥ ४२७ ॥

प्रति लेखं प्रेरयिष्यन्त्याः सत्त्वोदयेन खेदार्द्रकरत्वात् कस्याश्चित् नायिकाया उक्तिरियमिति बोध्यम् ॥४२३॥

प्रीत्येति। प्रीत्या आनन्देन स्वस्ति पदं लेखोपरिलिखितमिति भावः विलोकितवती दृष्टवती प्रथममिति शेषः। ततः तुष्टया प्रीतया स्वस्तीत्यनेन माङ्गलिकेन पदेन प्रियतमस्य कुशलमवश्यं भवेदिति सूचनादिति भावः स्थानम् अवस्थानचेत्यर्थः श्रुतं सम्मुखादिति भावः। पश्चात् स्थानश्रवणानन्तरं पुरतः प्राक् अनुक्रमेण तत् तव इदं तावकं त्वदीयमित्यर्थः नामकं ज्ञातं विदितम्। तन्वा कृशाङ्ग्या सम्मदनिर्भरेण आनन्दभरितेन मनसा मुहुः पुनः पुनः तत् त्वदीयं नामकं वाचयन्त्या पठन्त्या तदानीं घनेन सान्द्रेण वाष्पेण अश्रुणा पूरिते दृशौ नयने यस्याः तथाभूतया सत्या लेखे लिखिते नामनि आपीत्यर्थः कण्ठग्रहः कण्ठाश्लेषः न प्राप्तः ॥ ४२४ ॥

लीलेति ॥ ४२५ ॥

किं किमिति ॥ ४२६ ॥

हुं हुं इति ॥ ४२७ ॥

मानानन्तरे स्त्रियाः कैतवस्वप्ने यथा,—

सुमरिमो से सअणपरम्मुहीए विअलन्तमम्माणपसराए ।
कइअवसुत्तुव्वत्तणत्थाणहरप्पेल्लणसुहेल्लिम् ॥ ४२८ ॥

स्त्रिया एव सखीवाक्यस्य आक्षेपेण यथा,—

भिउडीहिं पलोइस्सं णिव्भच्छिस्सं परम्मुही होस्सम् ।
जं भणइ तं करिस्सं सहिओ जइ तं णु पेच्छिस्सम् ॥४२९॥

तस्या एव तदनुष्ठानविघ्नेन यथा,—

ग्रन्थिमुद्ग्रथयितुं हृदयेशे वाससः स्पृशति मानधनायाः ।
भ्रूयुगेन सपदि प्रतिपेदे रोमभिश्च समसेव विभेदः ॥४३०॥

प्रवासानन्तरे स्त्रिया यथा,—

अत्थक्का गअ हिअए बहुआ दइअउम्मिजणपुरओ ।
झुरइ विअं लताणं हरिस विसट्टाणवलआणम् ॥ ४३१ ॥

अत्रैव स्त्रीपुंसयोः यथा,—

रमिऊण पइम्मि गए जाहे अवगूहिअं पडिणिउत्तो ।
अहअं पउत्थ पइअ व्व तक्खणं सोपवासिव्व ॥ ४३२ ॥

सामान्यत एव प्रवाससाध्वसेन स्त्रिया यथा,—

होन्त पहिअस्स जाआ आमोच्छणजीवणधारणरहस्सम् ।

सुमरिम इति ॥ ४२८ ॥

भिउडीति ॥ ४२९ ॥

ग्रन्थिमिति । हृदयेशे कान्ते वाससः वसनस्य ग्रन्थिम् उद्ग्रथयितुं स्खलयितुमित्यर्थः स्पृशति गृह्णति सति मानधनायाः मानिन्याः भ्रूयुगेन भ्रुवोर्द्वयेन रोमभिश्च सपदि तत्क्षणं समसेव युगपदेव विभेदः भङ्गः हर्षश्च प्रतिपेदे प्राप्तः । भ्रूभङ्गो रोमहर्षश्च समसेव जात इत्यर्थः ॥ ४३० ॥

अत्थक्का इति ॥ ४३१ ॥

रमिऊण इति ॥ ४३२ ॥

पुच्छन्तीं भमइ घरं घरेण पिअविरहसिहिरीआ ॥४३३॥

प्रवासविलम्बेनैव पुंसो यथा,—

एक्को वि कालसारो ण देइ गन्तुं पआहि ण वसन्तो ।

किं उण बाहाउलिअं लोअणजुअलं मिअच्छीए ॥४३४॥

परिहारे खेदादिभिः स्त्रियाः यथा,—

उल्लाअइ से अङ्गं ऊरू वेवन्ति कूप्पलो गलइ ।

कुच्छुरा ले हिअअं पिआगमे पुप्फुइआइए ॥ ४३५ ॥

करुणानन्तरं पुंसो यथा,—

करस्पर्शारम्भोत्पुलकितपृथूरोजकलसे
श्रमाम्भो वामार्द्धे वहति मदनाकूतसुभगम् ।
विभोर्वारं वारं कृतसमयिकोद्धूननविधे-
स्तनौ भस्मस्नानं कथमपि समाप्तं विजयते ॥ ४३६ ॥

भवत्पथिकस्य जाया आमोचणजीवनधारणरहस्यम् ।

पृच्छन्ती भमति घरं घरात् प्रियविरहसाध्वसा ॥

होन्त इति । भवतः भाविन इत्यर्थः भविष्यत् सामीप्ये लटः शत्रादेशः । पथिकस्य प्रवासिनः कस्यचित् जाया कान्ता प्रियस्य विरहात् भाविनी विच्छेदात् साध्वसं भयं यस्याः तथाभूता सती घरात् घरं गृहाद् गृहम् आमोचणात् प्रत्यावर्त्तनात् कान्तस्येति भावः जीवनधारणस्य रहस्यं कथमेतावन्तं कालं जीविष्यामीति जीवनोपायप्रकारमित्यर्थः पृच्छन्ती जिज्ञासमाना सती भमति विचूरति ॥ ४३३ ॥

एक्क इति ॥ ४३४ ॥

उल्लाअइ इति ॥ ४३५ ॥

करस्पर्शादिति । करस्पर्शस्य हस्तामर्शनस्य आरम्भे हस्तेन स्पर्शे क्रियमाणे इत्यर्थः उत्पुलकित: उद्गतपुलक इत्यर्थः सञ्जातरोमाञ्च इत्यर्थः पृथुः विपुलः उरोजकलसः स्तनकुम्भः यस्य तथाभूते वामार्द्धे हरगौरीरूपस्य वामभागे गौर्य्या अंशे इत्यर्थः मदनस्य कामस्य आकूतः आवेशः तेन सुभगं मनोरमं श्रमाम्भः खेद-

विप्रलम्भनिरुक्तिषु प्रथमानुरागे प्रतिश्रुत्यादानं यथा,—

किं ण भणिओसि बालअ ! गामणिधूआए गुरुअणसमक्खम्।
अणिमिसवक्कवलन्तवअणणअणइदिट्ठेहिम् ॥

अत्र वक्रेक्षितादिभिः प्रतिश्रुत्य आलिङ्गनादयः क्षोभयादिभिर्न दीयन्ते ॥ ४३७ ॥

माने विसंवादनं यथा,—

अणुअ ! णाहं कुविआ उवगूहसि किं मुहा पसाएसि।
तुह मण्णुसमुप्पण्णे ण मज्झ माणेण वि ण कज्जम् ॥

अत्र मानिनी पूर्वमालिङ्गनादीन् निषिध्य पश्चाद् यथावत् प्रयच्छति यथा कश्चित् अष्टशतं दास्यामि इति प्रतिश्रुत्य अष्टाभिरधिकं शतं प्रयच्छति न तु अष्टौ शतानि इति।

सलिलं सत्त्वोदयजनितमिति भावः वहति धारयति सति वारं वारं पुनः पुनः कृतः सामयिकः कालिकः उडूननविधिः उत्क्षेपणानुष्ठानं गात्रे भस्मक्षेपणमिति भावः येन तथाभूतस्य विभोः हरस्य दक्षिणाङ्गभूतस्येति भावः तनौ शरीरे दक्षिणाङ्गरूपे इत्यर्थः भस्मना स्नानं कथमपि समाप्तम् अवसितं विजयते सर्वोत्कर्षेण वर्त्तते। देव्या वामाङ्गभूतायाः सत्त्वोदयजनितश्रमजलेन दक्षिणाङ्गस्यापि सङ्गात् तेनैव स्नानक्रियायाः समाधानेन भस्मस्नानं निवृत्तमिति भावः ॥ ४३६ ॥

किं न भणितोऽसि बालक ! ग्रामणीः धूता गुरुजनसमक्षम्।
अनिमिषवक्रवलदनयनाङ्गदृष्टिभिः ॥

किं नेति। हे बालक ! ग्रामणीः ग्रामाधिपः तस्य धूता कन्या तया गुरुजनानां समक्षम् अनिमिषं निमेषरहितं तथा वक्रं यथा तथा वलतः चलतः नयनस्य अङ्गदृष्टिभिः अङ्गावलोकनैः अपाङ्गवीक्षणैरित्यर्थः किं न भणितः ? कथितः असि ? अपि तु सर्वमेव मनोगतं कथितोऽसीत्यर्थः। एतावतापि त्वदभिप्रायो न बुद्ध इति तव बालकत्वमिति सम्बोधनेनोक्तम् ॥ ४३७ ॥

अनुक ! नाहं कुपिता उपगूहसि किं मुधा प्रसादयसि।
तव मन्युसमुत्पन्नेन मम मानेनापि न कार्य्यम् ॥

तदेतद् व्यलीकविप्रयोगादिभिः आलिङ्गनादीनां निराकरण-मयथावत् प्रदानत्वाद् विसंवादनमेव उच्यते ॥ ४३८ ॥

प्रवासे कालहरणं यथा,—

एहि इसो पउत्थो अहअं कुप्पे ज्जस्सो अणुणेज्ज ।

इह फलइ कस्स वि मणोरहाणं माला पिअअमम्मि ॥

अत्र आलिङ्गनादीनां व्यक्तैव कालहरणप्रतीतिः ॥ ४३९ ॥

करुणे प्रत्यादानं यथा,—

समसोक्खदुक्खसंवड्ढिआणं कालेण रूढपेम्माणम् ।

मिहुणाणं मरइ जं तं खु जिअइ इअरं मुतं होइ ॥ ४४० ॥

अत्र । सुहृदिव प्रकटय्य सुखप्रदः प्रथममेकरसामनुकूलताम् ।

पुनरकाण्डविवर्त्तनदारुणः प्रविशिनष्टि विधिर्मनसो रुजम् ॥

इति अयमर्थः सम्बध्यते । तस्य च प्रत्यादानमेवार्थो भवति ॥ ४४१ ॥

अनुक इति । हे अनुक ! कामुक ! अहं न कुपिता न क्रुद्धा, किम् उप-गूहसि आलिङ्गसि ? सुधा वृथा किं प्रसादयसि उपगूहनेनेति भावः तव मन्युः शोकः दुःखमिति यावत् समुत्पन्नः जातः यस्मात् तथाभूतेन मम मानेन कोपेन न कार्यं न प्रयोजनमित्यर्थः ॥ ४३८ ॥

एहि इति ॥ ४३९ ॥

समसौख्यदुःख संवर्त्तितानां कालेन रूढप्रेम्णाम् ।

मिथुनानां म्रियते यत् तत् खलु जीवति इतरत् मृतं भवति ॥

समेति । सम तुल्यं सुखमेव सौख्यं दुःखञ्च तेन संवर्त्तितानां तिष्ठता-मित्यर्थः कालेन क्रमिकेण समयेन रूढः वद्ध इत्यर्थः प्रेमा प्रणयः येषां तथाभूतानां मिथुनानां स्त्रीपुरुषाणां मध्ये यत् यो जन इत्यर्थः मिथुनशब्दस्य क्लीवत्वात् तेनैव व्यपदेशः । म्रियते पञ्चतां गच्छति तत् मृतमित्यर्थः जीवति खलु जीवत्येवेत्यर्थः वियोगदुःखासहनादिति भावः । इतरत् अन्यत् जीवितो जन इति भावः मृतं भवति मरणसमविच्छेदयातनावाप्तेरिति भावः ॥ ४४० ॥

सुहृदिवेति । विधिः दैवं विधिर्विधाने दैवे चेत्यमरः सुहृदिव सखेव सुखप्रदः प्रीतिप्रदः सन् प्रथमं प्राक् एकरसाम् एकरूपामित्यर्थः अनुकूलतां हितैषितामित्यर्थः

प्रथमानुरागे वञ्चनं विविधं तथा,—

दिट्ठाए जं ण दिट्ठो आलविआए वि जं ण आलत्तो।
उवआरो जं ण किदो तं चिअ कलिदं छइल्लेहिम् ॥

अत्र व्रीड़ादिभिः दर्शनादिभिः वैविध्यं प्रतीयते ॥४४२॥

माने विरुद्धं यथा,—

ण मुअन्ति दीहसासेण रुअन्ति ण होन्ति विरहकिसिआओ।
धण्णाओ ताओ जाणं बहुवल्लह वल्लहो ण तुमम् ॥

अत्र ईर्ष्यायितादिभिः वल्लभालिङ्गनादिविरुद्धैः मानवती वञ्च्यते ॥ ४४३ ॥

प्रवासे व्याविद्धं यथा,—

कइ आगओ पिओ अज्जपुत्ति! अज्जेण कइ दिणाइं होन्ति।
एक्को एइहमेत्तो भणिअं मोहं गदा बाला ॥

अत्र एकस्यापि दिवसस्य वर्षायमानतया प्रियालिङ्गनादिवञ्चनया विशेषतो दैर्घ्यं प्रतीयते ॥ ४४४ ॥

प्रकटय्य प्रकाश्य पुनः अकाण्डे सहसा यद् विवर्त्तनं वैपरीत्याचरणं तेन दारुणः निष्ठुरः सन् मनसः चित्तस्य रुजं व्यथां विश्लिनष्टि विशेषेण जनयतीत्यर्थः ॥४४१ ॥

दिट्ठाए इति ॥ ४४२ ॥

ण मुअन्ति इति ॥ ४४३ ॥

कुत्र आगतः प्रिय आर्य्यपुत्रि! आर्य्येण कति दिनानि भवन्ति।
एका एतावद् भणित्वा मोहं गता बाला ॥

कुत्रेति। हे आर्य्यपुत्रि! ननान्दरित्यर्थः प्रियः मत्कान्त इत्यर्थः आर्य्येण श्वशुरेण ठक्कुरेणेत्यर्थः सह कुत्र कस्मिन् स्थाने आगतः प्रस्थित इत्यर्थः गमनस्य अमङ्गलसूचकत्वात् आङ् पूर्वकत्वेन प्रयोगः। एका कापि बाला सुग्धा कान्ता एतावत् भणित्वा कथयित्वा मोहं गता मूर्च्छितेत्यर्थः ॥ ४४४ ॥

करुणे निषिद्धं यथा,—

आवाअभअअरं विअ ण होइ दुक्खस्स दारुणम् अवसाणम् ।
णाह जिअन्तीए मए दिट्ठं सहिअं अ तुह इअं अवसाणम् ॥

तदेतत् रामविषयं सीतायाश्चिराशंसितसमागमसुखावाप्ति-व्यपायरूपं वचनं करुणमिति निषिध्यते ॥ ४४५ ॥

प्रथमानुरागेण सह रागो यथा,—

सा महइ तस्स ण्हाउं अणुसोत्ते सा वि से समुव्वहइ ।
थणवट्टभिउणविलुलिअकल्लोलमहग्घिए सलिले ॥

अत्र शुद्धयोः द्वयोः अपि एककालम् अन्योन्यानुरागः प्रतीयते । तत्र एका लावण्यादिना रज्यते द्वितीयस्तु स्नेहादिना रज्यत इति ॥ ४४६ ॥

तत्रैव पश्चात् यथा,—

मम हिअअं विअ पीदं तेण जुणा मज्जमाणाए ।
ण्हाणहलिद्दाकडुअं अणुसोत्तजलं पिअन्तेण ॥

अत्रैकस्य अनुरागं दृष्ट्वा पश्चाद् द्वितीयो रज्यते ॥४४७॥

तत्रैवानुरूपो यथा,—

सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ ।

आवाअ इति ॥ ४४५ ॥

सा महइ इति ॥ ४४६ ॥

मम हृदयमिव पीतं तेन यूना मज्जमानायाः ।
स्नानहरिद्राकटुकमनुस्रोतो जलं पिबता ॥

ममेति । तेन यूना युवकेन मज्जमानायाः अवगाहमानायाः मे मम अनुस्रोतसि विभक्त्यर्थेऽव्ययीभावः स्नानस्य हरिद्रया विलेपनभूतया इति भावः कटुकं हरिद्राद्रवमिश्रणेन कटुत्वं प्राप्तं जलं पिबता सता मम मदीयं हृदयमिव पीतम् कवलितम् ।तथाभूतः स युवा मन्मनोहरो जात इति भावः ॥ ४४७ ॥

मरउ ण तुमं भणिस्सं मरणं पि सलाहणिज्जं से ॥

अत्र न केवलं लावण्यादिनैव रज्यते किं तर्हि अनुरूपविषयिणा अभिलाषेणापीति प्रतीयते ॥४४८॥

तत्रैवानुगतो यथा,—

गहवइसुएण समअं सव्वं अलिअं विअ किं विआरेइ।

धण्णाइआए हलिअकुमारिआइ ठाणम्मि जणवाओ ॥

अत्र यद्यपि सौभाग्यादि प्रसिद्धिकृतमानुरूप्यं न विद्यते तथापि स्त्रिया उत्तमप्रार्थनमगर्हितत्वादनुगतमेव भवति। सोऽयं करुणसाधारणसाधनोत्पत्तिपक्षे उक्तः॥

भावसाधनपक्षे तु सर्वत्र सहार्थादिविशिष्टे रक्तिर्दीप्तिः वा अनुरागशब्देन उच्यते। प्रथमश्च उपजायमानत्वात् अयं प्रथमानुराग इति। प्रथमतो मानः ॥४४९॥

सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः।

म्रियतां न त्वां भणिष्ये मरणमपि श्लाघनीयमस्याः॥

सत्यमिति। सत्यं यथार्थं द्रष्टुं विवेक्तुमिति भावः जानाति, सदसद् विवेक्तुं शक्नोतीत्यर्थः इयमिति शेषः सदृशे अनुरूपे जने रागः प्रणयः युज्यते अनुरूपो भवति अतः म्रियतां पञ्चतां गच्छतु इयमिति शेषः त्वां न भणिष्ये न किञ्चिद् वक्ष्यामीत्यर्थः अस्याः त्वत्कान्ताया इत्यर्थः मरणमपि श्लाघनीयं प्रशंसनीयम्। पतिविरहे दुष्कार्यकरणात् मरणमेव श्लाघ्यं सत्या इति भावः। दूत्याः प्रोषितं प्रत्युक्तिः॥ ४४८॥

गृहपतिसुतेन समयं सर्वमलीकमिव किं विचारयसि।

धन्याया हलिककुमार्याः स्थाने जनवादः॥

गृहपतीति। धन्यायाः सुकृतवत्याः हलिकस्य कुमार्याः जनवादः अपवादः गृहपतिसुतेन सह सङ्घटनरूप इति भावः स्थाने युक्तः अनुरूपः युक्ते हे साम्प्रतं

मान्यते येनेति यथा,—

पाअपडणाणं मुद्धे रहसबलामोडिअव्वाणम् ।
दंसणमेत्तपसिज्जरिचुक्का बहुआ ण सोक्खाणम् ॥

अत्र मानपूजायामिति धातोः स्वार्थे णिजन्तात् णिचि घञि च मान इति रूपम्। स हि प्रेयांसम् अस्याः पादपतनादि पूजायां प्रयोजयति ॥ ४५० ॥

यं प्रियत्वेन मन्यते यथा,—

कारणगहिओ वि मए माणो एमेअ जं समो सरिओ ।
अत्थ क्क पुल्लिअं कोल्ल तुज्झ तं मत्थए पडउ ॥

अत्र मनज्ञाने इति धातुः । तथा हि । मानं प्रियत्वेन मन्यमाना तदपहारिणे अङ्कोल्लाय कापि मानिनी कुप्यति ॥ ४५१ ॥

यः प्रेम मनुते यथा,—

जत्थ ण उज्जागरओ जत्थ ण ईसाविरूरणं माणम् ।
सब्भावबाहुअं जत्थ णत्थि णेहो तहिं णत्थि ॥

अत्र मनु अवबोधने इति धातुः । मानेन हि प्रेमास्ति नास्ति वेति जनो बुध्यते । तस्य च करणभूतस्यापि प्राधान्यादत्र

स्थाने इत्यमरः । असत्यमेतत् इत्याशङ्क्याह गृहेति । गृहपतेः गृहस्थस्य सुतेन पुत्रेण सर्वं समयं हलिककुमारीसङ्घटने अन्योन्यप्रतिज्ञायामिति यावत् अलीकमिव असत्यमिव किं कथं विचारयसि अवबुध्यसे ? ॥ ४४९ ॥

पाअ इति ॥ ४५० ॥

कारणेति ॥ ४५१ ॥

कर्त्तृत्वोपचारः। तत् यथा "प्रज्ञा पश्यति नो चक्षुर्दृष्टिः सारस्वती हि सा" इति ॥ ४५२ ॥

प्रेम मिमीते यथा,—

कुविआ अ सच्चहामा समेवि बहुआणं णवरमाणक्खलणे।
पाअडिअहिअअसारो पेमसङ्घरिसो पअट्टई मणू ॥

अत्र माङ्माने इति धातोः कृत्यल्युटो बहुलमिति कर्त्तरि ल्युट्। कोऽसावनुमान इति भाष्यप्रयोगात्। तेन च यद्यपि करणभूतेनैव आत्मनि रुक्मिण्यां च प्रियप्रेम्णः परिमाणं सत्यभामा प्रत्याययति तथापि पूर्ववदिह अयं कर्त्तृत्वेन उपयुज्यते ॥ ४५३ ॥

प्रवासे वसत इत्युपलक्षणेन न आत्मानमङ्गना भूषयन्ति यथा,—

साहीणेवि पिअअमे पत्ते विच्छण्णे ण मण्डिओ अप्पा।
दुक्खिअपउत्थवइअं सअं ज्जिअं सण्ठवन्तीए ॥

अत्र वस आच्छादन इत्यस्य प्रस्मरति इत्यादिवन्निषेधार्थे प्रपूर्वस्य घञि च प्रवास इति रूपं निरूप्यते ॥४५४॥

जन्मेति ॥४५२॥

कुपिता च सत्यभामा समेऽपि बधूनां केवलमानचरणे।
प्रकटितहृदयसारः प्रेमसङ्घर्षः प्रवर्त्तते मन्युः ॥

कुपितेति। बधूनां नारीणां केवले मानचरणे मानहानौ समे तुल्येऽपि सत्यभामा तदाख्या महिषी कुपिता च कोपवती एवेत्यर्थः। प्रकटितः प्रकाशितः हृदयस्य सारो बलं श्रेष्ठांशश्च यत्र तथाभूतः प्रेम्णः प्रणयस्य सङ्घर्षः अन्येन संविभाग इत्यर्थः मन्युः दुःखं कोपकारणमिति भावः सन् प्रवर्त्तते प्रजायते ॥४५३॥

साहीणे इति ॥४५४॥

युवानः प्रियासन्निधौ न वसन्ति यथा,—

विरहाणलो सहिज्जइ आसावन्धेण दुल्लहजणस्स।

एक्कग्गामपवासो माए मरणं विसेसेइ ॥

अत्र दूरस्थयोरिव अन्तिकस्थयोरपि सन्निकर्षाभावात् प्रवासो भवति ॥ ४५५ ॥

उत्कण्ठादिभिश्चेतो वासयति यथा,—

आलोअन्ति दिसाओ ससन्त जम्भन्त गन्त रोअन्त।

मुज्झन्त पड़न्त हसन्त पहिअ! किं तेण पउत्थेण ॥

अत्र उत्कण्ठादिभिः वासिते चेतसि शून्यावलोकनादयः अनुभावा जायन्ते ॥ ४५६ ॥

प्रमापयति यथा,—

सञ्जीवणोसहिम्मि व पिअस्स रक्खेइ अणसवावाराम्।

सा सूसवाप्फदंसण कण्ठागदजीविआं सोण्हाम् ॥

अत्र प्रसादं करोतीत्यादिवत् प्रमापणोपक्रमोऽपि प्रमापणम् उच्यते ॥ ४५७ ॥

करणे करोतेः अनुभूतोपादानार्थत्वे कुरुते मूर्च्छां यथा,—

विअलिअविओअवेअणं तक्खणपब्भट्ठराममरणाआसम्।

जणअतणआए णवरं लब्धं मुच्छाणिमीलिअच्छीए सुहम् ॥

विरहेति ॥ ४५५ ॥

आलोअन्ति इति ॥ ४५६ ॥

सञ्जीवनेति ॥ ४५७ ॥

विगलितवियोगवेदन तत्क्षणप्रभ्रष्टराममरणायासम्।

जनकतनयया केवलं लब्धं मूर्च्छा निमीलिताक्ष्या सुखम् ॥

विगलितेति। मूर्च्छया मोहेन प्रियमरणश्रवणजनितेनेति भावः निमीलिते

अत्र सीतायाः पतिशोकप्रकर्षेण अभूता मूर्च्छा उत्पद्यते ॥ ४५८ ॥

उच्चारणार्थत्वे कुरुते विलापं यथा,—

पुहवीअ होइ हि पई बहुपुरिसविसेसचञ्चला राअसिरी।
कह ता महच्चिअइम णिसामासं उवट्ठिअं वेहव्वम् ॥

अत्र प्रवासदुःखेन सीता विलपन्ती इदमुच्चरति ॥४५९॥

अवस्थापनार्थत्वे कुरुते साहसे मनो यथा,—

इयमेत्य पतङ्गवर्त्मना पुनरङ्काश्रयिणी भवामि ते।
चतुरैः सुरकामिनीजनैः प्रिय! यावत् न विलोभ्यसे दिवि ॥

अत्र रतेः कामशोकेन मरणसाहसे मनोऽवस्थाप्यते ॥४६०॥

अभ्यञ्जनार्थत्वे करोति चित्तं दुःखेन यथा,—

दलति हृदयं गाढोद्वेगं द्विधा न तु भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम्।

मुकुलिते अक्षिणी नयने यस्याः तथाभूतया जनकतनयया सीतया तस्मिन् क्षणे प्रभ्रष्टः विगतः राममरणायासः रामस्य मरणश्रवणजनितः क्लेश इत्यर्थः यस्मिन् तथाविधम् अतएव विगलिता विनष्टा वियोगस्य विच्छेदस्य वेदना यस्मिन् तथाभूतं केवलं निरवच्छिन्नं सुखं लब्धं प्राप्तम् ॥ ४५८ ॥

पुहवीअ इति ॥ ४५९ ॥

इयमिति। हे प्रिय! दिवि स्वर्गे चतुरैः निपुणैः वशीकरणदक्षैरिति यावत् सुरकामिनीजनैः अप्सरोभिरित्यर्थः यावत् न विलोभ्यसे प्रलोभ्य नीयसे इत्यर्थः तावत् इयमहं पतङ्गवर्त्मना पतङ्गमार्गेण अग्निपतनेनेति यावत् ते तव पुनः अङ्काश्रयिणी उत्सङ्गवर्त्तिनी भवामि ॥ ४६० ॥

दलतीति। गाढः दृढः उद्वेगः उत्कण्ठा यत्र तादृशं हृदयं दलति विदीर्य्यते इत्यर्थः तु किन्तु द्विधा न भिद्यते द्विखण्डं न भवतीत्यर्थः। कायो देहः विकलः

ज्वलति च तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्म्मच्छेदी न कृन्तति जीवितम् ॥
अत्र रामादेः दुःखेन चित्तमभ्यज्यते ॥ ४६१ ॥

सम्भोगनिरुक्तिषु प्रथमानुरागानन्तरे पालनार्थो यथा,—

दृष्टा दृष्टिमधो ददाति कुरुते नालापमाभाषिता
शय्यायां परिवृत्य तिष्ठति बलादालिङ्गिता वेपते ।
निर्यान्तीषु सखीषु वासभवनान्निर्गन्तुमेवेहते
जाता वामतयैव सम्प्रति मम प्रीत्यै नवोढा प्रिया ॥

अत्र प्रागल्भ्यवामताभ्यामननुकूलायामपि नवोढाया-मिच्छानुवृत्त्या रतिः पाल्यते ॥ ४६२ ॥

मानानन्तरे कौटिल्यार्थो यथा,—

पादे मूर्द्धनि ताम्रतामुपगते कर्णोत्पले चूर्णिते
छिन्ने हारलतागुणे करतले सम्पातजातव्रणे ।

विवशः सन् मोहं वहति धत्ते, किन्तु चेतनां न मुञ्चति न त्यजति अन्तर्दाहः अन्तःसन्तापः तनूमङ्गं ज्वलयति, किन्तु भस्मसात् न करोति न दहतीत्यर्थः। विधिर्दैवं मर्मच्छेदी अरुन्तुदः सन् प्रसरति प्रवर्त्तते, किन्तु जीवितं न निकृन्तति न नाशयतीत्यर्थः ॥ ४६१ ॥

दृष्टेति। नवोढा नवविवाहिता प्रिया कान्ता सम्प्रति वामतयैव प्रतिकूलतयैव मम प्रीत्यै आनन्दाय जाता तथाहि दृष्टा अवलोकिता सती अधः दृष्टिं ददाति दधातीति वा पाठः। आभाषिता किमपि कथिता सती आलापं न कुरुते न प्रतिवक्तीत्यर्थः। परिवृत्य पराङ्मुखीभूय शय्यायां तिष्ठति, बलात् बलमाश्रितेत्यर्थः ल्यब्लोपे पञ्चमी। आलिङ्गिता सती वेपते कम्पते। सखीषु सङ्गिनीषु वासभवनात् निर्यान्तीषु निर्गच्छन्तीषु निर्गन्तुं बहिर्गन्तुमेव ईहते चेष्टते ॥ ४६२ ॥

पादे इति। पादे चरणे मूर्द्धनि मस्तके मानभङ्गनार्थमुद्यतस्य प्रियस्येति

अप्राप्तप्रियताड़नव्यतिकरा हन्तुं पुनश्चेतसा
वाञ्छन्ती मुहुरेणशावनयना पर्य्याकुलं रोदिति ॥

अत्र प्रेम्णः स्वभावकुटिलत्वात् मानवत्याः कचग्रहणेन यत् पादताड़नादिरूपाः कुटिला एवं सम्भोगा जायन्ते ॥४६३

प्रवासानन्तरे अभ्यवहारार्थो यथा,—

वसिष्ठधेनोरनुयायिनं तमावर्त्तमानं वनिता वनान्तात्।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥

अत्रोत्तरार्द्धे उपोषितस्य अन्नोपयोग इव प्रियालोकजन्मा पिवतेरभ्यवहारः कथ्यते ॥४६४॥

करुणानन्तरे अनुभवार्थो यथा,—

अणुमरणपत्थिआए पच्चागअजीविएम्मि पिअअम्मि।
वेहव्वमंडणं कुलबहुए सोहणअं जाअम् ॥

भावः ताम्रताम् अलक्तकरसरक्ततामिति भावः उपगते प्राप्ते, कर्णोत्पले चूर्णिते दूरनिक्षेपेणेति भावः खण्डिते इत्यर्थः हारलतागुणे मौक्तिकहारसूत्रे छिन्ने छेदं गते, करतले सम्पातेन सम्मर्दनेन जातं व्रणं क्षतं यत्र तादृशे सति एणशावनयना हरिणशावकाक्षी कान्ता न प्राप्तः प्रियस्य ताड़ने प्रहारे व्यतिकरः उपायः यया तथाभूता पुनः चेतसा मनसा हन्तुं वाञ्छन्ती अभिलषन्ती सती मुहुः पुनः पुनः पर्य्याकुला अतीव व्याकुला सती रोदिति क्रन्दति ॥ ४६३ ॥

वशिष्ठेति। वनिता पत्नी सुदक्षिणा वशिष्ठधेनोः नन्दिन्याः अनुयायिनम् अनुगामिनं वनान्तात् काननसीम्नः आवर्त्तमानम् आगच्छन्तं तं दिलीपं निमेषे अलसा मन्थरा पक्ष्मणां नेत्रलोम्नां पङ्क्तिः राजिर्यस्याः तथाभूता सती उपोषिताभ्यामिव कृतोपवासाभ्यामिव लोचनाभ्यां पपौ सातिशयं दृष्टवतीत्यर्थः ॥४६४॥

अनुमरणप्रस्थितया प्रत्यागतजीविते प्रियतमे।
वैधव्यमण्डनं कुलवध्वाः शोभनकं जातम् ॥

अत्र यद्येयं मत्प्राणभूता एवमस्या अहमपि जीवितमेवेति पत्या विस्रम्भजो रागः पत्न्याः पुनः प्रेत्यापि यत्सङ्गमो मया अभिलषितः सोऽयं जीवन्त्येव जीवितेश्वरः समासादित इति विस्रम्भात् अतिसुखमेव अनुभूयते ॥४६५॥

अत्र प्रथमानुरागानन्तरे सम्भोगः संक्षिप्तो यथा,—

अपेतव्याहारं च्युतविविधशिल्पव्यतिकरं
करस्पर्शारम्भे प्रगलितदुकूलान्तशयनम् ।
मुहुर्बद्धोत्कम्पं दिशि दिशि मुहुः प्रेरितदृशो-
रहल्यासूत्राम्णोः क्षणिकमिह तत्सङ्गतमभूत् ॥

अत्र संक्षेपो निगदेनैव व्याख्यायते ॥४६६॥

स एव मानान्तरे सङ्कीर्णो यथा,—

अणुणीअ खणलद्धसुहे पुणोवि सम्भरिअमसुदूणविहले ।

अनुमरणेति । अनुमरणाय सहमरणायेत्यर्थः प्रस्थितायाः गतायाः कुलवध्वाः कुलाङ्गनायाः वैधव्यमण्डन सहमरणार्थं परिहितमलङ्करणं प्रियतमे कान्ते प्रत्यागतं पुनरागतं जीवितं यस्य तथाभूते सति शोभनकम् अतीव शोभाजनकमित्यर्थः जातम् ॥ ४६५ ॥

अपेतेति । अहल्या च सूत्रामा च तयोः अहल्यादेवेन्द्रयोः दिशि दिशि प्रतिदिशं मुहुः पुनः पुनः प्रेरिते चालिते दृशौ याभ्यां तयोः कञ्चित् पश्यतीति भियेति भावः सतोः इह अस्मिन् समये स्थाने वा तत् सङ्गतं रतम् अपेतः अपगतः व्याहारः अन्योन्यमधुरालाप इति यावत् यस्मिन् तत् च्युतः विगतः विविधः बहुप्रकारः शिल्पस्य रतिप्रकारस्येति भावः व्यतिकरः सम्बन्धः यस्मिन् तथोक्तं करस्य स्पर्शः ग्रहणं तस्य आरम्भे उद्यमे एवेत्यर्थः प्रगलितं प्रभ्रष्टं दुकूलं वसनम् अन्ते प्रान्तदेशे यस्य तादृशं शयनं शय्यातलं यस्मिन् तथाभूतं मुहुः पुनः पुनः बद्धा जाता उत्कम्पा यातङ्केत्यर्थः गीतमभयजनितेति भावः यस्मिन् तत् अतएव क्षणिकम् अल्पक्षणमित्यर्थः अभूत् आसीत् । क्षणिकमिवेति पाठः समीचीनः ॥ ४६६ ॥

हिअए माणवईणं चिरेण पणअगरुओ पसप्पइ रोसो ॥

अत्रावस्थिता प्रकृष्टा च रतिर्व्यलीकस्मरणादिभिः सङ्गीर्यते ॥ ४६७ ॥

प्रवासानन्तरे सम्पूर्णो यथा,—

शापान्तो मे भुजगशयनादुत्थिते शार्ङ्गपाणौ
मासानेतान् गमय चतुरो लोचने मीलयित्वा।
पश्चादावां विरहगुणितं तं तमात्माभिलाषं
निर्वेक्ष्यावः परिणतशरच्चन्द्रिकासु क्षपासु ॥

अत्र अमुना विरहिवाक्येनापि निर्वेक्ष्याव इति भविष्यत्कालोपाधेः प्रवासानन्तरेऽप्यविरुध्यमानेन तं तम् आत्माभिलाषमित्यादिना तदानीन्तनभोगस्य सम्पूर्णत्वं वर्ण्यते ॥४६८॥

करुणानन्तरे समृद्धो यथा,—

तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वो-
र्देहत्यागादमरगणनालेख्यमासाद्य सद्यः।

अनुनीय चणलब्धसुखे पुनरपि सम्भरितमन्युदूनविह्वले।
हृदये मानवतीनां चिरेण प्रणयगुरुः प्रसर्पति रोषः ॥

अनुनीयेति। अनुनीय प्रसाद्य चणेन लब्धं जनितमित्यर्थः सुखं यस्य तथोक्ते कान्तप्रसादनानन्तरं चणिकसन्तोषवतीत्यर्थः पुनरपि सम्भरितेन सम्यक् प्रपूरितेन मन्युना दुःखेन दूनं सन्तप्तम् अतएव विह्वलं विवशं तस्मिन् मानवतीनां मानिनीनां हृदये चिरेण दीर्घकालेन प्रणयेन गुरुः महान् रोषः कोपः प्रसरति प्रवर्त्तते ॥ ४६७ ॥

शापान्त इति। प्राग् व्याख्यातम् ॥ ४६८ ॥

तीर्थे इति। असौ अजः जह्नुकन्या गङ्गा सरयूसदाख्या नदी तयोः तोयस्य

पूर्वाकाराधिकतररुचा सङ्गतः कान्तयाऽसौ
लीलागारेष्वरमत पुन नन्दनाभ्यन्तरेषु ॥

अत्र उत्तरार्द्धेन इन्दुमत्यजयोः लोकान्तरप्रत्युज्जीवनेन सम्भोगसमृद्धिः प्रतिपाद्यते ॥ ४६९ ॥

प्रथमानुरागानन्तरे सहार्थान्वयो यथा,—

सुहपेच्छओ पई से सा वि हु पिअरूअदंसणुम्मत्ता ।
दो वि किअत्था पुहविअं पुरिसमहिलाणं त्ति मण्णन्ति ॥

अत्र पूर्वार्द्धे रञ्जयत्यर्थः । उत्तरार्द्धे राजत्यर्थः । प्रथमानुरागे सह सिद्धभावेन सिद्धः तदनन्तरेऽपि तथैव अनुवर्त्तते ॥४७०

तत्रैव पश्चादर्थान्वयो यथा,—

अद्यप्रभृत्यवनताङ्गि ! तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।

जलस्य व्यतिकरः सङ्गम इत्यर्थः तेन भवः उत्पत्तिर्यस्य तथोक्ते गङ्गासरयूसङ्गमे इत्यर्थः तीर्थे पुण्यक्षेत्रे इत्यर्थः देहस्य त्यागः विसर्जनं तस्मात् प्राणत्यागादित्यर्थः सद्यः तत्क्षणम् अमरेषु देवेषु मध्ये गणना संख्यान तस्या लेखा पत्र देवत्वमिति भावः आसाद्य प्राप्य पूर्वाकारात् इन्दुमतिरूपादिति यावत् अधिकतरा अधिकोज्ज्वला रुक् कान्तिः यस्याः तथाभूतया कान्तया प्रेयस्या सङ्गतः सम्मिलितः सन् नन्दनस्य देवोद्यानस्य अभ्यन्तरेषु मध्यवर्त्तिषु इत्यर्थः लीलागारेषु क्रीडामन्दिरेषु अरमत विजहार ॥ ४६९ ॥

सुखप्रेक्षकः पतिरस्याः सापि खलु प्रियरूपदर्शनोन्मत्ता ।
द्वावपि कृतार्थौ पृथिव्या पुरुषमहिलानामिति मन्येते ॥

सुखेति । पतिः प्रियः अस्याः रमण्या सुखं प्रेक्षते इति सुखप्रेक्षकः सततं सुखप्रेक्षणसमुत्सुक इति भावः । सापि रमणी प्रियस्य कान्तस्य रूपदर्शने सौन्दर्यावलोकने उन्मत्ता अतीव व्यग्रेति भावः । अतः द्वावपि तौ दम्पती इत्यर्थः पृथिव्यां पुरुषमहिलानां स्त्रीपुरुषाणां मध्ये कृतार्थौ धन्याविति मन्येते स्वस्वमात्मानमिति शेषः ॥ ४७० ॥

अङ्गाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥

अत्र रञ्जयत्यर्थः प्रथमानुरागे पुंसि पश्चाद्भावेन सिद्धस्तदनन्तरेऽपि तथैवानुवर्त्तते ॥ ४७१ ॥

अत्रैव अनुरूपार्थान्वयो यथा,—

शशिनमुपगतेयं कौमुदी मेघमुक्तं
जलनिधिमनुरूपं जह्नुकन्यावतीर्णा ।
इति समगुणयोगप्रीतयस्तत्र पौराः
श्रवणकटु नृपाणामेकवाक्यं विवव्रुः ॥

अत्र राजत्यर्थः प्रथमानुरागे स्त्रीपुंसयोरपि आनुरूप्येण सिद्धस्तदनन्तरेऽपि तथैव अनुवर्त्तते ॥ ४७२ ॥

तत्रैव अनुगतार्थान्वयो यथा,—

स्थाने तपो दुश्चरमेतदर्थमपर्णया पेलवयाभितप्तम् ।
या दास्यमप्यस्य लभेत नारी सा स्यात् कृतार्था किमुताङ्कशय्या ॥

अथेति । हे अवनतानि यौवनभरादिति भावः अङ्गानि यस्याः तत्सम्बुद्धिः हे अवनताङ्गि ! अद्यप्रभृति अद्यारभ्य तव तपोभिः क्रीतः दासः किङ्करः अस्मि भवामि इति एवं चन्द्रमौलौ शशिशेखरे हरे वादिनि ब्रुवति सति सा पार्वती अङ्गाय झटिति तत्क्षणमित्यर्थः नियमजं तपस्याव्रतजात क्लेशम् उत्ससर्ज तत्याज । तथाहि क्लेशः फलेन फलसिद्ध्या इत्यर्थः पुनर्नवतां पूर्ववदक्लेशरूपत्वमिति यावत् विधत्ते जनयतीत्यर्थः । सफलक्लेशः क्लेश एव न गण्यते इति भावः ॥ ४७१ ॥

शशिनमिति । इयम् इन्दुमती मेघमुक्तं मेघावरणशून्यमित्यर्थः शशिनं चन्द्रम् उपगता अधिगता कौमुदी चन्द्रिका । तथा अनुरूपं स्वयोग्यं जलनिधिं सागरमवतीर्णा प्रविष्टा जह्नुकन्या गङ्गा । समौ गुणौ ययोः तयोः समगुणयोर्दम्पत्योरिति भावः योगात् सम्मेलनात् प्रीतिरानन्दः येषां तथाभूताः पौराः पुरवासिनः इति इत्थं नृपाणां विपश्चाणां राज्ञां श्रवणकटु श्रुतिकष्टम् एकं वाक्यं विवव्रुः विशेषेण ऊचुरित्यर्थः ॥ ४७२ ॥

अत्र पूर्वार्द्धे रञ्जयत्यर्थः प्रथमानुगतार्थत्वेन सिद्धस्तथैवानुवर्त्तते। सोऽयं करणसाधनः प्रत्ययोत्पत्तिपक्ष उक्तः। भावसाधनपक्षे तु सर्वत्र सहार्थादिविशिष्टा रति र्दीप्ति र्वा अनुरागशब्देन उच्यमाना तदनन्तरेऽपि समाससामर्थ्यात् अनुवर्त्तते। कः पुनरत्र समासः, षष्ठीलक्षणस्तत्पुरुषः। प्रथमानुरागस्य अनन्तर इति प्रथमानुरागानन्तर इति। कात्र वृत्तिः, अजहत्स्वार्था। नहि अत्र नायकौ मिथः समागतावपि प्रथमानुरागमुत्सृजतः। युक्तम्। पुनः यदजहत्स्वार्था परार्थाभिधानरूपा वृत्तिः स्यात्, अवश्यं हि अनेन परस्यार्थम् अभिदधता स्वार्थ उत्सृष्टव्यः। बाढं युक्तम्। एवं हि दृश्यते लोके भिक्षुको यद् द्वितीयां भिक्षामासाद्य पूर्वां न जहाति सञ्चयायैव यतते। एवं तर्हि द्वयो र्द्विवचनमिति द्विवचनं प्राप्नोति। कस्या विभक्तेः, षष्ठ्याः। न षष्ठीसमर्थोऽनन्तरः। तर्हि प्रथमायाः न प्रथमासमर्थः प्रथमानुरागः सम्बन्धाधिक्यात्। अभिहितः सोऽर्थोऽत्रान्तर्भूतः प्रातिपदिकार्थः सम्पन्न इति सामर्थ्यं भविष्यति। नैवम्। इह प्रथमानुरागानन्तरे इत्यस्मात् समुदायात् विभक्त्या उत्पत्तव्यम्। तेन चैकोऽर्थपिण्डो मृत्पिण्ड इवाविभागोत्पन्नपांसूदकविभागः अवयवार्थशक्त्या अनुगृहीतः पृथगव्यपदेश्यावयवशक्तिः अभिधीयते। तस्मिंश्च समुदायार्थे एकत्वं समवेतमतो विद्यमानायामप्यवयवसंख्यायां तदाश्रया सुबुत्पत्तिर्न भविष्यति॥ ४७३॥

स्यानि इति। पेलवयापि अतिकोमलयापि पार्वत्येति शेषः अपर्णया तपसि पर्णभक्षणमपि वर्जयन्त्येत्यर्थः तेन च तदाख्यया सत्या एतदर्थम् एतादृशमृत्युञ्जयरूपवरप्राप्त्यर्थमित्यर्थः दुश्चरम् अन्यैर्दुष्करमित्यर्थः तपः चान्द्रायणादिकं व्रतम् अभितप्तम् अनुष्ठितमित्यर्थः पेलवयापि तप्तमिति पाठान्तरम्। या नारी अस्य

मानानन्तरे पूजार्थान्वयो यथा,—

न स्पृष्टोऽपि त्रिदशसरिता दूरमीर्ष्यानुबन्धात्
नाप्युत्सृष्टो भुजगपतिना तर्जनाभिः जयायाः
मानस्यान्ते नयनसलिलैः क्षालितः शैलपुत्र्याः
पत्युर्मौलौ नतियुजि जयत्यात्मनः पादपांसुः॥

अत्र पादपतनादिपूजा मानसिद्धा तदनन्तरेऽप्यनुवर्त्तते॥ ४७४॥

अत्रैव मानं प्रति प्रियत्वाभिमानान्वयो यथा,—

विहायैतन्मानव्यसनमनयो रुद्धकुचयो-
र्विधेयः प्रेयांस्ते यदि वयमनुल्लङ्घ्यवचसः।
सखीभ्यः स्निग्धाभ्यः शिवमिति निशम्यैणनयना
निवापाम्भो दत्ते नयनसलिलै र्मानसुहृदे॥

अत्र मानं प्रति प्रियत्वाभिमानो मानानन्तरेऽप्यनुवर्त्तते॥ ४७५॥

हरस्य दास्यमपि कैङ्कर्य्यमपि लभेत प्राप्नुयात् सा कृतार्था धन्या स्यात् अङ्गशय्यां किमुत? उत्सङ्गशय्यालाभे किं वक्तव्यमिति निष्कर्षः॥ ४७३॥

नेति। त्रिदशसरिता देवनद्या गङ्गयेत्यर्थः शिरस्थितयेति भावः ईर्ष्यानुबन्धात् सापत्नद्वेषसातत्यादित्यर्थः नापि नैव स्पृष्टः, भुजगपतिना शिरोवेष्टनभूतेनेति भावः जयायाः गौरीसहचर्य्या इत्यर्थः तर्जनाभिः अङ्गुलिसङ्केतेन भर्त्सनाविशेषैः नापि उत्सृष्टः नैव गृहीत इत्यर्थः मानस्य अन्ते अवसाने शैलपुत्र्याः पार्वत्याः नयनसलिलैः नेत्राम्बुभिः क्षालितः धौतः नतियुजि पादप्रणते पत्युः हरस्य मौलौ शिरसि आत्मनः स्वस्य पादपांसुः चरणधूलिः जयति सर्वोत्कर्षेण वर्त्तते॥ ४७४॥

विहायेति। हे सखि! यदि वयम् अनुल्लङ्घ्यवचसः अस्माकं वचनानि यदि न लङ्घनीयानि भवत्या इति भावः तदा एतत् मानव्यसनं मानासक्तिं विहाय

अत्रैव प्रेमावरोधार्थान्वयो यथा,—

दूसन्ति जे मुहुत्तं कुविआ दासव्विअ ते पसाअन्ति।
ते च्चिअ महिलाणं पिआ सेसा सामिच्चिअ वराआ॥

अत्र अस्यामपि प्रेमास्ति न वेति जिज्ञासुः प्रियः प्रियां कैलिगोत्रस्खलनादिना दुनोति। सा च प्रेमवती अवश्यमस्मै कुप्यति स चोपलब्धप्रेमा तद्दासवदेनां प्रसादयति। अथैषात्मनि प्रेम्णोऽस्तित्वमनुबुध्यते। सोऽयं मानसिद्धोऽर्थस्तदनन्तरेऽपि अनुवर्त्तते॥ ४७६॥

तत्रैव प्रेमप्रमाणार्थान्वयो यथा,—

सुरकुसुमेहिं जइ कलुसिअं जइ तेहिं चिअ पुणो पसाएमि तुमं।
तो पेम्मस्स किसोअरि! अवराहस्स अ ण मे किअं अनुरूअं॥

परित्यज्य प्रेयान् प्रियतमः हर इत्यर्थः अनयोः उच्चकुचयोः उन्नतस्तनयोः विधेयः वशवर्त्ती विधेयः करणीय इत्यध्याहार्य्यम्। स्निग्धाभ्यः प्रणयवतीभ्यः सखीभ्यः तन्मुखेभ्य इति भावः इति शिवं शुभं वचनमिति शेषः निशम्य आकर्ण्य एणनयना हरिणाक्षी गौरीति शेषः मानसुहृदे मित्रभूताय मानायेत्यर्थः नयनसलिलैः नेत्राम्बुभिः निवापाम्भः तर्पणजलं दत्ते ददावित्यर्थः भूतसामीप्ये लट्प्रयोगः। मानमलं त्यजेति भावः॥ ४७५॥

दुन्वन्ति ये मुहूर्त्तं कुपिता दासवत् ते प्रसादयन्ति।
ते एव महिलानां प्रियाः शेषाः स्वामिन एव वराकाः॥

दुन्वन्तीति। ये मुहूर्त्तम् अल्पकालं कुपिताः प्रियां प्रतीति शेषः सन्तः दुन्वन्ति तप्यन्ते ये च ते दासवत् किङ्करवत् प्रसादयन्ति प्रियामिति शेषः ते महिलानां रमणीनां प्रियाः प्रणयिनः भवन्तीति शेषः शेषाः वराकाः निर्बोधा इति भावः स्वामिन एव पतय एव न तु प्रणयिन इति भावः॥ ४७६॥

सुरकुसुमै यदि कलुषितं यदि तैरेव पुनः प्रसादयामि त्वाम्।
ततः प्रेम्णः कृशोदरि! अपराधस्य च न मे कृतमनुरूपम्॥

सुरेति। हे कृशोदरि! तनुमध्ये! सत्यभामे इति शेषः यदि सुरकुसुमैः

अत्र रुक्मिण्याः सुरकुसुममञ्जरी दत्ता मम तु सुरतरुरेव प्रेयसा प्रतिपन्नस्तदहमस्याः सहस्रगुणेन प्रियतमेति सत्यभामा स्वप्रेमाणं प्रमिमीते। स चायमर्थो मानेन सिद्धस्तदनन्तरेऽपि समाससामर्थ्यादनुवर्त्तते। कः पुनरत्र समासः, षष्ठीतत्पुरुष एव। का वृत्तिः, प्रथमानुरागानन्तरमजहत्स्वार्थैव। युक्तं, तत्र विश्रम्भणादावपि प्रथमानुरागस्य विद्यमानत्वात्। इह तु माननिवृत्तौ मानापगमादयो जायन्ते। अन्वयाद्विशेषणं भविष्यति। तद्यथा, घृतघटस्तैलघट इति निषक्तेऽपि घृते तैले वा अयं घृतघटः अयं तैलघटः इत्यन्वयात् पूर्वपदार्थो विशेषणं भवति। तत्र या च यावती वा अर्थमात्रा इहापि तत्तुल्यमेव ॥ ४७७ ॥

तथा हि,—

सकअग्गाहं तं सुणा मिआणणा पिअइ पिअअमे विइस्सं।
त्थोअं त्थोअं रोसो मइं व माणं सिणोमररं ॥

सकषायैरेव वाक्यैर्नायकं निस्तुदती शयनीयं गच्छेदिति मानशेषान्वयो दृश्यते ॥ ४७८ ॥

रुक्मिण्यै दत्तैरिति भावः कलुषितं कालुष्यं गतं त्वयेति शेषः अभिमानिनी जातासीति भावः। किन्तु तैरेव सुरकुसुमतरुभिरेवेति भावः यदि त्वां प्रसादयामि ततस्तदा मे मम प्रेम्णः त्वदुपरि प्रणयस्येति यावत् अपराधस्य तुभ्यमप्रदानेन रुक्मिण्यै प्रदानजनितस्य दोषस्येत्यर्थः अनुरूपं सदृशं न कृतं नानुष्ठितं भवेदिति शेषः। रुक्मिणीमपेक्ष्य त्वां प्रति मम प्रणयोऽधिकः तत् कतिपयकुसुमदानापेक्षया तत्तरुदानेन अपराधो मया चालितोऽपि न मां तथाप्यपराधित्वेन शङ्कमान प्रीणातीति भावः ॥ ४७७ ॥

सकअ इति ॥ ४७८ ॥

प्रवासानन्तरे प्रिया न वसते इत्यर्थस्यान्वयो यथा,—

वसने परिधूसरे वसाना नियमक्षामतनुः धृतैकवेणिः।
अतिनिष्करुणस्य शुद्धशीला मम दीर्घं विरहज्वरं बिभर्त्ति॥

अत्र दुष्मन्तेन शकुन्तलायाः प्रवासे विभूषणाद्यग्रहणं यदवगतं तदनन्तरेऽप्यनुवर्त्तमानं प्रेम प्रकर्षाय भवति॥४७९॥

अत्रैव युवानः प्रियासन्निधौ न वसन्तीत्यर्थस्यान्वयो यथा,—

समर्थये यत् प्रथमं प्रियां प्रति क्षणेन तन्मे परिवर्त्ततेऽन्यथा।
अतो विनिद्रे सहसा विलोचने करोमि न स्पर्शविभावितप्रियः॥

अत्र पुरुरवाः प्रवासान्मत्त उर्वशीबुद्ध्या लतादिकं यद्यदासासाद तत्तदनेकशोऽन्यथा बभूव। तत्तत् संस्काराच्चायं यस्या लतारूपपरिवर्त्तनं प्रत्येति सोऽयं प्रियासन्निधौ यूनामवासः प्रवासः संसिद्धस्तदनन्तरेऽपि अनुवर्त्तते॥४८०॥

वसने इति। परिधूसरे सर्वतो मलिने वसने परिधानमुत्तरीयञ्चेति भावः वसाना परिदधाना नियमेन व्रतेन भाविभर्त्तृसौभाग्यप्रापकेणेति भावः क्षामा कृशा तनुः शरीरं यस्याः तथोक्ता धृता एका वेणिर्यया तथाविधा प्रोषितपतिकाया एकवेणीधरं शिर इत्युक्तनियमादिति भावः कृतैकवेणिरिति पाठेऽपि स एवार्थः। अतएव शुद्ध पवित्रं निर्दोषमित्यर्थः शीलं चरित्रं यस्याः तथाभूता इयं शकुन्तला अतिनिष्करुणस्य अतिनिर्दयस्य मम दीर्घं महान्तं विरह एव ज्वरः तं बिभर्त्ति धारयति भुनक्तीत्यर्थः॥ ४७९॥

समर्थये इति। प्रियाम् उर्वशीं प्रति प्रथमं यत् समर्थये इयमेव उर्वशीति यत् सम्भावयामीत्यर्थः तत् क्षणेन चक्षुरुन्मीलनमात्रेणेत्यर्थः मे मम अन्यथा अन्यप्रकारं परिवर्त्तते अन्यरूपं भवतीति भावः। अतः कारणात् इदानीमित्यध्याहार्य्यं स्पर्शेन विभाविता अवबुद्धा प्रिया उर्वशी येन तथाभूतः सन् सहसा विलोचने नयने विनिद्रे निर्निद्रे उन्मीलिते इति यावत् न करोमि। एवं कृते प्रियास्पर्शसुखं मे न विहन्येतेति भावः॥ ४८०॥

अत्रैवोत्कण्ठादिभिश्चेतो वासयतीत्यर्थस्यान्वयो यथा,—

अव्वो दुक्करआरअ पुणो वि तत्तिं करेसि गमणस्स ।

अज्ज वि ण होति सरला वेणी अ तरङ्गिणी विहुरा ॥

अत्र प्रवासोद्भूतशोत्कण्ठादिभिः चित्तवासना प्रवासानन्तरेऽपि तस्या नोपशाम्यतीति वेणिकावर्णनादिना सूच्यते ॥४८१॥

अत्र एव प्रमापयतीत्यर्थस्यान्वयो यथा,—

त्वद्वियोगोद्भवे चण्डि ! मया तमसि मज्जता ।

दिष्ट्या प्रत्युपलब्धासि चेतनेव गतासुना ॥

अत्र उर्वशीविरहे पुरूरवा उत्तरां कामावस्थामापन्नः प्रियाप्राप्तौ प्रेत्येव प्रत्युज्जीवितस्तदेवानुसन्धत्ते । सोऽयं प्रमापणार्थः प्रवासः सिद्धस्तदनन्तरेऽपि समाससामर्थ्यादनुवर्त्तते । कः पुनरत्र समासः, षष्ठीतत् पुरुष एव । कात्र वृत्तिः, न तावदनुत्सृष्टस्वार्था न हि प्रेष्यसमागतयोः प्रवाससम्बन्धोऽपि विद्यते । उत्सृष्टस्वार्था तदिह भवतु युक्तं पुनर्यदुत्सृष्टस्वार्था नाम वृत्तिः स्यात् । बाढं युक्तं, एवं हि दृश्यते लोके पुरुषोऽयं परकर्मणि प्रवर्त्तमानः स्वकर्म उत्सृजति । तद्यथा, तक्षा राजकर्मणि प्रवर्त्तमानः तक्षकर्म उत्सृजति । नन्वेवं सति राजपुरुषमानयेत्युक्ते पुरुषमात्रस्यानयनं प्राप्नोति । नैषः दोषः, उत्सृजन्नयासौ स्वार्थं नात्यन्तमुत्सृजति । यः परार्थविरोधी स्वार्थस्तमेवोत्सृजति । तद्यथा तक्षा राजकर्मणि प्रवर्त्तमानः तक्षकर्म उत्सृजति, न तु चुम्बितस्मितविहसितकम्पनादीनि । न चायमर्थः परार्थविरोधी विशेषणं नाम । तस्मात् न उत्सृज्यति ॥ ४८२ ॥

अव्वो इति ॥ ४८१ ॥

त्वदिति । हे चण्डि ! कोपने ! मानिनीत्यर्थः मया तव वियोगः विरहः तस्मात् भवः जन्म यस्य तस्मिन् तमसि अन्धकारे दुःखरूपे इति भावः मज्जता

करुणानन्तरेऽनुभूतप्रादुर्भावार्थान्वयार्थो यथा,—

जयन्ति जायाश्लिष्टस्य शम्भोरम्भोधिमन्थने ।
मग्नामृतविषास्वादमदमूर्च्छामनोमुदः ॥

दाक्षायण्या हैमवतीत्वेन करुणानन्तरत्वम् । तत्र करुणदुःखेन मूर्च्छादयः प्रादुरासन्, इह तु आनन्देन ते प्रादुर्भवन्ति ॥ ४८३ ॥

तत्रैव उच्चारणान्वयार्थो यथा,—

क्लाम्यन्ती यदुपेक्षितासि पुरतः कामो यदग्रे हतः
क्लिष्टं यत्तपसा वपुर्यदपि च प्रोक्ता वटुच्छद्मना ।
तत्सर्वं प्रणतस्य मेऽद्य दयिते दाक्षायणि ! क्षम्यता-
मित्युक्त्वा चरणाब्जयोर्विजयते तुष्यंश्छिवायाः शिवः ॥

अत्र करुणावस्थायां प्रियापादाब्जयोर्लुण्ठता शोकेन यो विलापः कृतः स इह प्रकर्षालापत्वेन परिणमति ॥ ४८४ ॥

निपतता मया गतासुना विगतजीवितेनेत्यर्थः जनेन चेतनेन चैतन्यमिव दिष्ट्या भाग्येन प्रत्युपलब्धासि पुनः प्राप्तासि ॥ ४८२ ॥

जयन्तीति । जायया कान्तया गौर्येति भावः आश्लिष्टस्य आलिङ्गितस्य शम्भोः हरस्य अम्भोधिमन्थने समुद्रविलोड़नकाले मनोमुदः चित्तानन्दकराः मग्नम् अमृतं यच्च तादृशम् अमृतेनापि अप्रतिकार्यमिति भावः यत् विषं कालकूटं तस्य आस्वादेन पानेन यो मदः विकारविशेषः तेन मूर्च्छाः मोहा जयन्ति सर्वोत्कर्षेण वर्त्तन्ते ॥ ४८३ ॥

क्लाम्यन्तीति । हे दयिते ! प्रिये ! दाक्षायणि ! प्राग् दाक्षायणीरूपाया देव्याँ गाढ़ानुरागेण इह पार्वतीरूपायामपि तस्यां तथात्वेन सम्बुद्धिरिति बोध्यम् ; पुरतः प्राक् क्लाम्यन्ती मत्प्राप्तौ यतमानेत्यर्थः उपेक्षिता अवमता असीति यत्, अग्रे समक्षं कामः मदनः हतः भस्मीकृत इति यत् तपसा दुश्चरेण व्रतेनेत्यर्थः वपुः शरीरं क्लिष्टम् इति यत्, वटुच्छद्मना ब्रह्मचारिच्छलेन यद्यपि प्रोक्ता कथितासि च,

अत्रैव मनोऽवस्थापनान्वयार्थो यथा,—

अखण्डितं प्रेम लभस्व पत्युरित्युच्यते ताभिरुमा स्म नम्रा।
तया तु तस्यार्द्धशरीरलाभादधःकृताः स्निग्धजनाशिषोऽपि॥

अत्रैव, यदैव पूर्वं ज्वलने शरीरं सा दक्षरोषात् सुदती ससर्ज।
ततः प्रभृत्येव विमुक्तसङ्गः पतिः पशूनामपरिग्रहोऽभूत्॥

इति करुणावस्थायामतिस्नेहेन अपरिग्रहत्वसाहसे यन्मनोऽवस्थापितं तदिहार्द्धशरीरप्रदानमहासाहसमेवावतिष्ठते॥४८५॥

तत्रैवाभ्यञ्जनान्वयार्थो यथा,—

भिन्ने सद्यः समाधावुपरमति परज्योतिषि स्कन्दसंज्ञे
संज्ञामापद्यमाने मृदुमनसि मनागुन्मिषत्स्विन्द्रियेषु।

अद्य इदानीमित्यर्थः प्रणतस्य चरणानतस्य मे मम तत्सर्वं दुष्कृतमिति भावः क्षम्यतां क्षमागुणेन सह्यतामित्यर्थः इति उक्त्वा शिवायाः गौर्याः चरणाब्जयोः पादपद्मयोः निपतित इति शेषः तुष्यन् प्रसाद गच्छन् शिवः विजयते सर्वोत्कर्षेण वर्त्तते॥ ४८४॥

अखण्डितमिति। ताभिः पुरस्त्रीभिः नम्रा प्रणता उमा पत्युः स्वामिनः अखण्डितम् अविच्छिन्नमित्यर्थः प्रेम लभस्व प्राप्नुहि इति उच्यते स्म इत्यनाशिषा संवर्द्धितेति भावः। तया उमया तु तस्य पत्युः अर्द्धशरीरलाभात् अर्द्धाङ्गप्राप्तेः स्निग्धानां स्नेहवतां जनानाम् आशिषोऽपि अखण्डितं प्रेम लभस्वेत्युक्तरूपा इति भावः अधःकृताः लघूकृता इति यावत् ततोऽप्यधिकलाभादिति भावः। अर्द्धशरीरलाभादधःकृता इत्यत्र अर्द्धशरीरभाजा पश्चात् कृता इति पाठान्तरम्॥४८५॥

यदैवेति। पूर्वं प्राक् यदैव यस्मिन्नेव काले सुदती चारुदशना सा देवी दक्षरोषात् दक्षं पितरं प्रति कोपात् पतिनिन्दाजनितादिति भावः ज्वलने अग्नौ योगरूपे इति शेषः शरीरं ससर्ज तत्याजेत्यर्थः। ततः प्रभृत्येव तत आरभ्यैव पशूनां पतिः शम्भुः परिग्रहः पत्नी तद्रहितः अपरिग्रहः विमुक्तः त्यक्तः सङ्गः विषयेषु आसक्तिः येन तथाभूतः अभूत्। पूर्वं ज्वलने इत्यत्र पूर्वजनने इति पाठान्तरम्॥ १८५॥

भिन्ने इति। सद्यः तत्क्षण वामार्द्धभूतायाः देव्याः स्पर्शमात्रमिति भावः

व्यापारे पारवश्यं विसृजति मरुति ब्रह्मसब्रह्मचारी
वामाङ्गस्पर्शजन्मा जयति पुररिपोरन्तरानन्दपूरः ॥

अत्र यत्करुणावस्थायां मनः शोकप्रकर्षेणाभ्यक्तमासीत्तदिह प्रियाश्लेषजन्मना परमानन्देनाभ्यज्यते। सोऽयं करुणधर्मसमन्वयः तदनन्तरेऽपि समाससामर्थ्याद्भवति। कः पुनरत्र समासः, षष्ठीतत्पुरुष एव। का वृत्तिः, जहत्स्वार्था। न ह्यत्र करुणार्थस्य गन्धोऽपि कथं तर्हि अन्वयः। यथा, मल्लिकापुटश्चम्पकपुट इत्यत्र निगीर्णास्वपि सुमनःसु मल्लिकादि वासनावशाद्विशेषणं भवति—अयं मल्लिकापुटोऽयं चम्पकपुट इति। एवं निवृत्तेऽपि स्वार्थे वासनावशात्करुणोऽनन्तरस्य विशेषणं भवति। अस्तु वा प्रथमानुरागादिष्वपि जहत्स्वार्थैव वृत्तिः, नन्वेवं राजपुरुषमानयेत्युक्ते पुरुषमात्रस्य आनयनं प्राप्नोति। नैष दोषः, वृत्तौ समर्थाधिकारः क्रियते सामर्थ्ये च भेदः संसर्ग उत्सर्गः उभयं वा। तत्र राज्ञ इत्युक्ते सर्वं स्वं प्रसक्तं पुरुष इत्युक्ते सर्वः स्वामी प्रसक्तः। इहेदानीं राजपुरुषमानयेत्युक्ते राजा पुरुषं निवर्त्तयति अन्येभ्यः स्वामिभ्यः, पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यः। एवमस्मिन्नुभयतो व्यवच्छिन्ने यदि राजार्थो निवर्त्तते कामं निवर्त्तताम्, न जातु क्वचित् पुरुषमात्रस्यानयनं भविष्यति। प्राक्प्रवृत्तेरक्तार्थस्य निवृत्तौ सामर्थ्याभावात् वृत्तिरेव न स्यात्, वृत्तिनिमित्ता च निवृत्तिस्तस्माददोष इति। तत्र राज्ञः पुरुष इत्यत्र यदा तावदवधृतपरायत्तवृत्तिरयं पुरुषो न

समाधौ एकाग्रतया परमात्मचिन्तनरूपे योगे भिन्ने भेदं गते कर्मकर्त्तरि क्तप्रत्ययः। स्यन्दते स्फुरति सर्वोपरीति भावः इति स्यन्दः चैतन्यरूप इति भावः सः संज्ञा आख्या यस्य तस्मिन् स्यन्दसंज्ञे परज्योतिषि परमतेजसि उपरमति उपरति

स्वतन्त्रस्तदा स्वामिसंसर्गस्यावगतत्वात् स्वामिविशेषज्ञानाय उपादीयमानो राजशब्दः स्वाम्यन्तरेभ्यः पुरुषं व्यावर्त्तयति। सोऽयं स्वाम्यन्तरव्यवच्छेदो भेद उच्यते। यदा पुनरवगत-परायत्तभावस्य पुरुषस्य स्वामिसम्बन्धद्योतनाय राजशब्दः प्रयुज्यते, तदा विशेषसंसर्गञ्च अभिसन्धाय उपसर्जनस्य शब्दो-पादानत्वात् अनवकाशो विशेषान्तरसंपात इत्यशब्दा स्वाम्य-न्तरनिवृत्तिरवसीयते। यदा तु अर्थान्तरनिवृत्तिं स्वार्थसंसर्गञ्च अभिसन्धाय उपसर्जनपदानि प्रयुज्यन्ते,तदा शब्दार्थसामर्थ्ययोः प्रतिपत्तिनिबन्धनयोः अभेदापेक्षायां भेदसंसर्गसमुदायः सामर्थ्यं भवति। यथा, नीलञ्च तदुत्पलञ्चेति नीलोत्पलं, प्रथमश्चासौ अनुरागश्चेति प्रथमानुराग इति। प्रथमानुरागानन्तर इत्या-दिषु च भेदसामर्थ्यं यथा राज्ञो भृत्य इति। यतोऽनन्तर इत्युक्तेऽवधृतमिदं कस्याप्यवधेः अनन्तरोऽयं न स्वतन्त्र इति सर्वोऽवधिः प्रसक्तः। प्रथमानुरागस्येत्युक्ते सर्वः सम्बन्धी प्रसक्तः। इहेदानीं प्रथमानुरागानन्तर इत्युक्ते प्रथमानुरागो-ऽनन्तरं निवर्त्तयति अन्येभ्योऽवधिभ्यः। अनन्तरः प्रथमानुरागं निवर्त्तयति अन्येभ्यः सम्बन्धिभ्यः। तत्र योऽसौ भेदस्तत्सामर्थ्यं तन्निमित्ता च वृत्तिः। भेदनिमित्तायाञ्च वृत्तौ सत्यां वृत्त्य-भिमुखस्य भेदमुपजनयोपसर्जनस्य प्रथमानुरागस्यार्थो निव-र्त्तते। यस्यापि प्रधानस्यानन्तरस्यावधिमतो निवर्त्तते सोऽप्य-वधिमवच्छिनत्ति। एवमुभयतो व्यवच्छेदे निर्ज्ञातेऽनन्तर-विशेषे समुदायार्थे चान्यस्मिन् प्रादुर्भवति। यदि प्रथमानु-

---

गच्छति अन्तःकरणात् अपगच्छतीति शेषः मृदु मन्द मन्दं यथा तथा मनसि अन्त-रिन्द्रिये सञ्ज्ञा चेतना स्वव्यापाराभिमुखत्वमिति भावः आपद्यमाने प्राप्नुवतीत्यर्थः इन्द्रियेषु चक्षुरादिषु मनाक् ईषत् उन्मिषत्सु उन्मीलन गच्छत्सु मरुति वायौ

रागाद्यर्थो निवर्तते कामं निवर्त्तताम्। न जातु क्वचिदवधिमन्मात्रस्य संप्रत्ययो भविष्यति। ननु चान्वयव्यतिरेकाभ्यां जहत्स्वार्थत्वं नोपपद्यते। तथा हि। प्रथमानुरागानन्तरे इत्युक्ते कश्चिच्छब्दः श्रूयते प्रथमानुरागेत्यनन्तरेति च प्रतीयमानविभागोऽर्थोऽपि कश्चिदवगम्यते। कन्याविश्रम्भणादिरवधिमत्त्वञ्च। मानानन्तरे इति उक्ते कश्चिच्छब्दभागो हीयते कश्चिदुपजायते कश्चिदन्वयी प्रथमानुरागेति हीयते मान्येत्युपजायते। अनन्तर इत्यन्वयी। अर्थोऽपि कश्चिद्धीयते कश्चित् उपजायते कश्चिदन्वयी कन्याविश्रम्भणादिर्हीयते। मानशैथिल्यादिरुपजायते। अवधिमत्त्वमन्वयित्वेन मन्यामहे। यःशब्दभागो हीयते तस्यासावर्थः योऽर्थो हीयते, य उपजायते तस्यायमर्थः योऽर्थ उपजायते, योऽन्वयी तस्यासावर्थः योऽर्थोऽन्वयीति। मैवम्। यतोऽनन्यथासिद्धाभ्यामेव अन्वयव्यतिरेकाभ्यां शब्दार्थयोः सम्बन्धावधारणमन्यथा सिद्धौ चेमौ। तथा हि यत्र हुंहितं हीयते, क्रेषितमुपजायते, रेणुचक्रम् अन्वयि, तत्र हस्तिनो हीयन्ते, अश्वा उपजायन्ते, पिपीलिका अन्वयिन्यः। न चैतावता रेणुचक्रादिपिपीलिकाः कारणं भवन्ति। यत्र वा चौरं हीयते, दध्युपजायते, पात्रमन्वयि, तत्र माधुर्य्यं हीयते, अम्लतोपजायते, तृप्तिरन्वयिनी न चैतावता पात्रस्य तृप्तिः कार्य्यं भवति। अवधृतं हि समथ्यमन्वयव्यतिरेकाभ्यां प्रभिज्यते। यथा, लोके बधिरोऽपि चक्षुष्मानालोकयति, सत्यपि श्रोत्रे उपहतचक्षु नालोकयति रूपमित्यन्वयव्यतिरेकाभ्यां चक्षुःश्रोत्रसन्निधाने रूपालोकनं चक्षुष एव

शरीरसञ्चारिणि प्राणादावित्यर्थः व्यापारे स्वकार्य्ये पारवश्यं परवशतां विहजति त्यजति सति समाधौ कुम्भकादिना वायुनिरोधात् तत् पारवश्यमिति भावः पुर-

व्यवस्थाप्यते न श्रोत्रस्य। यस्य केवलस्य योऽर्थोऽवधृतः पदार्थान्तरसन्निधानेऽपि तस्य स एव। न हि रसनमसन्निधौ दर्शनस्य मधुरादिव्यञ्जकं दर्शनसन्निधौ नीलादिव्यक्तिं प्रति सामर्थ्यं लभते। प्रथमानुरागशब्दस्य केवलस्य उत्कण्ठादिषु मानशब्दस्येर्ष्यायितादिष्वनन्तरशब्दस्य पुनरवधिमत्स्वेव सामर्थ्यमवधृतमतस्तेषां तावानेवार्थो भवति। यः पुनः पदयोरन्योन्योपश्लेषाद्विश्रम्भणादिभिः मानशैथिल्यादिभिः वा अवधिमद्विशेषोऽन्यावधिकः प्रतीयते वाक्यार्थः स भवतीति। यदि च यथा अनपेक्षितावयवार्था वृक्षश्रोत्रियशक्रगोपादयः स्वसामर्थ्यनियतमर्थमाचक्षते तथा संघाता एवैते प्रथमानुरागानन्तरादयो राजपुरुषादयश्च अनपेक्षितावयवार्था यथासामर्थ्यम् अर्थेषु निविशन्ते। ननु च अव्यपदेश्यपूर्वापरविभागाभिन्नार्थाभिधायिनो वृक्षादयः, प्रतीयमानभागभेदानुयाताः सम्बन्धिपदार्थोपहितभेदवृत्त्यभिधायिनः पुनरिमे, तत् कथं प्रथमानुरागानन्तरादयो वृक्षादिवद्रूढिशब्दा भवितुमर्हन्ति। तदसत्। रूढिशब्दा यौगिका इति हि विभागोऽभेददर्शनादर्शनाभ्यामभिनिविशतेऽभिनिविष्टबुद्धेः प्रतिपादनोपाय एव। अयथाभिनिविष्टो ह्ययं क्रमेण तस्मादपदार्थान्निवर्त्तयितव्यः। ततोऽस्याप्रत्यभिज्ञायमानप्रकृतयः श्रोत्रियक्षत्रियादयो दर्श्यन्ते। न ह्यत्र प्रकृतिरूपमवसीयते। यतः प्रकृत्यर्थावच्छिन्नः प्रत्ययार्थोऽभिधीयते ततोऽनवसीयमानावयवविभागा रूढयः काश्चिदुपन्यस्यन्ते यत्र अत्यन्तमसम्भवोऽवयवार्थस्य यथा शक्रगोपाः, तैलपायिकाः, मण्डप इति। पुनः कदाचित् सन्निहितावयवार्था जातिविशेषा-

---

रिपोः त्रिपुरारेर्हरस्य ब्रह्मसत्रब्रह्मचारी ब्रह्मानन्दसदृश इति यावत् वामाङ्गस्य

भिधायिनः सप्तपर्णकृतमालादय उदाक्रियन्ते। यतः प्रपला-शोऽप्यनुद्भिन्नपलाशोऽपि च वनस्पतिः, सप्त पर्णान्यस्य पर्व-णीति सप्तपर्ण इत्याख्यायते। तथा निष्कीर्णकुसुमस्तरुः अनारब्धकलिकाजालोऽपि कृता माला अनेनेति कृतमाल इत्य-भिधीयते। अथ पञ्चाङ्गुलमिवाश्वकर्ण इव पर्णमस्येत्युपचरि-तार्थावयवा जातिवाचिन एव पञ्चाङ्गुलाश्वकर्णादयो वर्ण्यन्ते। तेषु हि पञ्चाङ्गुलादिव्यपदेशः प्रोद्भिद्यमानप्रवालमालमपि यावदनुवर्त्तते। ततः सन्निधीयमानेऽप्यनाश्रीयमाणवृत्ति-पदार्थाः लोहितशालिः गौरस्वरः इत्यादयो निगद्यन्ते तत्र हि सन्नपि वर्णविशेषः समुदायस्य जातिवचनत्वाच्छब्दार्थत्वेन नावसीयते। तदेवमयं शकलीकृतवृत्तिपदार्थाभिनिवेशः प्रथ-मानुरागानन्तरादाविव राजपुरुषादौ अपि अवयवाभिनिवेशं शक्यते त्याजयितुम्। अतएव प्रथमानुरागादीनां विप्रलम्भ-सम्भोगादीनाञ्च पारिभाषिको अपि संसर्गः सन्निधीयत इति ॥ ४८६ ॥

प्रकीर्णकेषु स्पृहयन्तौ व्रतमष्टमीचन्द्रकः स हि चैत्रचतुर्थीतो-ऽष्टमचतुर्थ्यामुपादीयमानः कामिनीभिरर्च्यते यथा,—

अवसहिअजणो पइणा सलाहमाणेण एच्चिरं हसिओ।
चन्दो त्ति तुज्झ मुहदिणकुसुमं जातविलक्खो ॥४८७॥

यस्यां यवस्तम्बरेषु अबला लोलन्ति सा कुन्दचतुर्थी यथा,—

लुलिआ गहवइधुआदिण्णं व फलं जवेहिं सविसेसं।
गिहं अणिवारिअसेवग्गेहणं चरउ च्छेत्तम्मि ॥४८८॥

अर्द्धाश्लेषपगीरीदेहस्य स्पर्शजन्मा आश्लेषजनित इति भावः अन्तरानन्दपूरः अन्तरा-नन्दप्रवाहः जयति सर्वोत्कर्षेण वर्त्तते ॥ ४८६ ॥

अवसहिअ इति ॥ ४८७ ॥

लुलिआ इति ॥ ४८८ ॥

वसन्तावतारदिवसः सुवसन्तको यथा,—

छणपिट्ठधूसरत्थणि महुमअंतवच्छि कुवलआहरणे।
कस्स कअ चूअमञ्जरि पुत्ति तुए मण्डिओ गामो ॥४८९॥

यत्र स्त्रियो दोलामारोहन्ति सा आन्दोलनचतुर्थी यथा,—

आन्दोलणक्खणोट्ठिआए दिट्ठे तुमम्मि सुद्धाए।
आसङ्किज्जइ काओ करपेल्लणणिच्चला दोला ॥ ४९० ॥

एकमेव सुकुसुमनिर्भरं शाल्मलिवृक्षमाश्रित्य सुनिमीलितकादिभिः खेलतां क्रीड़ा एकशाल्मली यथा,—

को एसो त्ति पलइं संबलिवलिअंपिअ परिक्खसइ।
हलिअसुअ सुद्धवहसेअजलोल्लेण हत्थेण ॥ ४९१ ॥

त्रयोदश्यां कामदेवपूजा मदनोत्सवो यथा,—

गामतरुणीओ हिअअं हरन्ति पोढ़ाण त्थणहरिल्लीओ।
मअणसवम्मि कोसुम्भकञ्चुआहरणमेत्ताओ ॥४९२॥

गन्धोदकपूर्णवंशनाड़ीशृङ्गकादिभिः यूनां प्रियजनाभिषेककर्दमेन क्रीड़ा उदकक्ष्वेड़िका यथा,—

अहं धाविऊण सङ्गमएण सव्वङ्गिअं पड़िच्छन्ति।
फग्गुमहे तरुणीओ गहवइसुअहत्थ चिक्खल्लिं ॥४९३॥

यत्रोत्तमस्त्रियः पदाभिघातेनाशोकं विकाश्य तत् कुसुममवतंसयन्ति सा अशोकोत्तंसिका यथा,—

उत्तंसिऊण दोहलविअसिआसोअमिन्दुवअणाए।

छणेति ॥ ४८९ ॥

आन्दोलेति ॥ ४९० ॥

को एसो इति ॥ ४९१ ॥

गामतरुणीति ॥ ४९२ ॥

अहं धावीति ॥ ४९३ ॥

विरहिणो णिप्फलकंकेल्लिकरणसहो समुग्घुसिओ ॥४९४॥

यत्र अङ्गनाभिश्चूतमञ्जर्योऽवरुज्य अनङ्गाय बालरागत्वेनैव दायं दायमवतंस्यन्ते सा चूतभञ्जिका यथा,—

रइअं पि ताण सोहइ रइजोग्गं कामिणीणेवच्छम्।
कस्से जाव ण रज्जइ कवोलघोणन्तपल्लवसहआरम् ॥४९५॥

यत्र युवतयो मदिरागण्डूषदोहदेन वकुलं विकाश्य तत्पुष्पाणि अवचिन्वन्ति सा पुष्पावचायिका यथा,—

पीणत्थणए सुकेसरदोहलंदाणुम्मुहीअ णिवलन्तो।
तुङ्गसिहरग्गापडणस्स जं फलं तं तए पत्तम् ॥ ४९६ ॥

यत्र कस्ते प्रियतम इति पृच्छद्भिः पलाशादिनवलताभिः प्रियो जनो हन्यते सा चूतलतिका यथा,—

णवलअपहरम् अङ्गे जहिं जहिं महइ देअरो दाउम्।
रोमञ्चदण्डराइ तहिं तहिं दीसइ वहुए ॥ ४९७ ॥

पञ्चात्मानुनयन्ती भूतमातृका यथा,—

विहलइ से णेवच्छं पम्माअइ मण्डणं गई खलइ।
भूअच्छणणच्चणम्मि सुहअ माणं पुलोएसु ॥ ४९८ ॥

वर्षासु कदम्बनीपहारिद्रकादिकुसुमैः प्रहरणभूतैः द्विधा बलं विभज्य कामिनीनां क्रीड़ा कदम्बयुद्धानि यथा,—

सहिआहिं पिअविसज्जिअकलम्बरअभरिअणिब्भरुच्छूओ।
दीसइ कलम्बत्थवओ व्व त्थणहरो हलिअसोण्हाए ॥

उत्तंसि उअ इति ॥ ४९४ ॥

रइअ इति ॥ ४९५ ॥

पीणत्थणए इति ॥ ४९६ ॥

णवलअ इति ॥ ४९७ ॥

विहलइ इति ॥ ४९८ ॥

प्रथमवर्षणप्ररूढ़नवतृणाङ्कुरासु स्थलीषु शाद्वलमभ्यर्च्य भुक्तपीतानां कृत्रिमविवाहादिक्रीड़ा नवपत्रिका ॥ ४९९ ॥ तत्र च वरणविधानादौ तेषामेवंविधाः परिहासा भवन्ति यथा,—

ता कुणह कालहरणं तुवरं तम्मि विवरे विवाहस्स।
जावपरुड्णहवलाइं होन्ति कुमारीअ अङ्गाइम् ॥ ५०० ॥

अभिनवविसाङ्कुरोद्भेदाभिरामं सरः समाश्रित्य कामिमिथुनानां क्रीड़ा विसखादिका यथा,

गेण्हन्ति पिअअमा पिअमाणवअणाहि विसलअद्धाहिम्।
हिअआइं वि कुसुमाउहवाणकआणेअरन्धाइम् ॥ ५०१ ॥

शक्रोत्सवदिवसः शक्रार्चा यथा,—

सच्चं चिअ कट्ठमओ सुरणाहो जेण हलिअधीआए।
हत्थेहिं कमलदलकोमलेहिं छित्तो ण पल्लविओ ॥ ५०२ ॥

आश्विने पौर्णमासी कौमुदी यथा,—

अह तइ महत्थदिसे कह कह वि खलन्तमत्तजणमज्झे।
तिस्सा त्थणेसु जाओ विलेवणं कोमुईवासो ॥ ५०३ ॥

दीपोत्सवो यक्षरात्रिर्यथा,—

अण्णे वि हि होन्ति कणाणं उणो दीआलिआ सरिक्खोदे।
जत्थ जहिच्छं गमइ पिअवसदी दीअवमिसेण ॥ ५०४ ॥

सहिआहि इति ॥ ४९९ ॥

ता कुणह इति ॥ ५०० ॥

गेण्हन्तीति ॥ ५०१ ॥

सच्चमिति ॥ ५०२ ॥

अह इति ॥ ५०३ ॥

अण्णे इति ॥ ५०४ ॥

शमीधान्यशूकधान्यानामार्द्राणामेवाग्निपक्वानामभ्यवहारोऽभ्युषखादिका यथा,—

अणग्गिणा करो मे दड्ढो त्ति पुणो पुणो च्चिअ कहेइ।
हालिकसुआमलिअच्छु सदोहला पामरजुवाणो ॥ ५०५ ॥

प्रथमत एवेक्षुभक्षणं नवेक्षुभक्षिका यथा,—

दिअरस्स सरअमउअं सुमइलेण देइ इत्थेण।
पढमं हिअअं वहुआ पवट्टा गण्डं सदन्तवणम् ॥ ५०६ ॥

ग्रीष्मादौ जलाशयावगाहनं तोयक्रीडा यथा,—

पिसुणेन्ति कामिणीणं जललुक्काइआवऊहहासुहेल्लिम्।
कण्टइअकवोला पप्फुल्लणिच्चलच्छीइ वअणाइम् ॥ ५०७ ॥

नाथादिदर्शनं प्रेक्षा यथा,—

णच्चिहिइ णडो पेच्छिहिइ जेण पओहोइओ नायकस्स।
विदूसिहिइ जररङ्गविहउणअरीगहवधुआणं पवच्चिहिइ ॥ ५०८

आलिङ्गनादिग्रहा दुरोदरादिक्रीडा द्यूतानि यथा,—

आश्लेषे प्रथमं क्रमेण विजिते दष्टाधरस्यार्पणे
केलीद्यूतविधौ पणं प्रियतमे कान्तां पुनः पृच्छति।

हालिकेति ॥ ५०५ ॥

दिअरस्सेति ॥ ५०६ ॥

पिसुणेन्तीति ॥ ५०७ ॥

णच्चिहिइ इति ॥ ५०८ ॥

आश्लेषे इति। केलिद्यूतं क्रीडादेवनं तदेव विधिर्व्यापारः तस्मिन् प्रथमम् आश्लेषे आलिङ्गने पणत्वेन स्थापिते इति भावः विजिते विजयेन लब्धे इत्यर्थः क्रमेण दृष्टस्य प्रसुरत इत्यर्थः अधरस्य बद्धव विजीयेय तदा ते अधरं पणत्वेन स्थापितं दास्यामीति प्रतिश्रुतस्येति भावः अर्पणे दाने विजिते विजयेन लब्धे सति तद्विजयानन्तरमित्यर्थः प्रियतमे कान्ते कान्तां पुनः पणं पृच्छति जिज्ञासमाने सति

सान्तर्हासनिरुद्धसम्भृतरसोद्भेदस्फुरद्गण्डया
तूष्णीं सारिविसारणाय निहितः स्वेदाम्बुगर्भः करः ५०९

रागोद्दीपनाय माध्वीकादिसेवा मधुपानं यथा,—

थोआरूढमहुमआ खणपल्हदा वराअदिस्सुल्लावा।
हसिअण संठविज्जइ पिएण संभरिअलज्जिआ कावि पिआ ५१०

प्रेमप्रकारेषु विप्रियादिभिरप्यविनाशनीयो नित्यो यथा,—

दिट्ठा कुविआणुणआ पिआ सहस्सजणपेल्लणम्मि विसहिआ।
जस्स णिसण्णाइ उरे सिरीए पेम्मेण लहुअइओ अप्पाणो ५११

तपश्चरणादिजन्मा नैमित्तिको यथा,—

इत्येष सा कर्त्तुमबन्ध्यरूपतां समाधिमास्थाय तपोभिरात्मनः।

सान्तर्हासम् अन्तर्हासयुतं यथा तथा निरुद्धः संगोपितः सम्भृतः समुत्पन्नः यः रसः मदनावेशजनित इति भावः तस्य उद्भेदेन विकासेन स्फुरन्तौ गण्डौ कपोलौ यस्याः तथाभूतया कान्तयेति शेषः सारिविसारणाय पाशकप्रक्षेपणाय स्वेदाम्बुगर्भः सत्स्वेदयात् स्वेदसलिलप्लुत इति यावत् करः पाणिः तूष्णीं निर्वचनं यथा तथा निहितः प्रहितः। अतःपरं सुरतमेव पणः स्पष्टमप्रकटितोऽपि प्रकटित इति भावः॥ ५०९॥

थोआरूढमधुमदा खणप्रह्लादा वराकदत्तोल्लापा।
हसिता संस्थाप्यते प्रियेण संभरितलज्जिता कापि प्रिया॥

थोआरूढेति। थोकमल्पम् आरूढः सञ्जातः मधुना मदिरापानेनेति यावत् मदः विकासी विकारी वा यस्याः तथोक्ता क्षणेन प्रह्लादः प्रहर्षः मधुपानजनित इति भावः यस्याः तादृशी वराकम् असङ्गतमिति भावः दत्तः कृतः उल्लापः उच्चैरालापः यया तथाभूता निर्लज्जतया आलपन्तीति भावः अतएव सम्भरितं सञ्जनितं लज्जितं लज्जा यस्याः तथाविधा कापि प्रिया कान्ता प्रियेण कान्तेन हसिता संस्थाप्यते शय्यातलं नीयते इति शेषः॥ ५१०॥

दिट्ठा इति॥ ५११॥

इत्येषेति। सा पार्वती समाधिं चित्तैकाग्र्यम् आस्थाय अवलम्ब्य प्रतिज्ञां

अवाप्यते वा कथमन्यथा इयं तथाविधं प्रेम पतिश्च तादृशः ५१२

अनिर्द्धारितविशेषः सामान्यो यथा,—

कुविआ अ पसण्णाओ ओणामुहीओ विसमाणीओ ।
जह गहिआ तह हिअअं धारेति अणिव्वुअं बाला ॥ ५१३

निर्द्धारितविशेषप्रकारो विशेषवान् यथा,—

ण वि तह अणालवन्ती हिअअं दूमेइ माणिणी अहिअं ।
जह दूरे वि अभिअगरूअरोसमज्जत्थभणिएइ ॥ ५१४ ॥

इङ्गितादिभिरप्यनवगम्यः प्रच्छन्नो यथा,—

दिअहे दिअहे रूसइ सङ्केअअभङ्गवड्ढिआसङ्का ।
आवण्डुरोवणमुही कलमेण समं कलमगोवी ॥ ५१५ ॥

संख्यादिभिरवगतः प्रकाशो यथा,—

जइ होसि ण तस्स पिआ ता दिअहं णीसहेहि अङ्केहिम् ।
ण वसूअ पीअपेज्जसमओ पाड़िव्व किं सुअसि ॥ ५१६ ॥

कारणोपाधिकः कृत्रिमो यथा,—

अदंसणेण पुत्तअ सुट्ठु वि णेहाणुवन्धगहिआइं ।

कृत्वेति भावः तपोभिः कठोरैः व्रतैरित्यर्थः आत्मनः स्वस्य अवन्ध्यरूपतां सफलरूपतां कर्त्तुम् इयेष अभिलषितवतीत्यर्थः । अन्यथा तादृशतपश्चरणाभावे इत्यर्थः तथाविधं तादृशं येन अर्द्धाङ्गहरत्वमस्याः जातमिति भावः । प्रेम प्रणयः तादृशः शत्युञ्जय इति भावः पतिश्च एतत् इयं कथं वा केन प्रकारेण वा अवाप्यते लभ्यते ? न केनापि प्रकारेणेत्यर्थः ॥ ५१२ ॥

कुविआ इति ॥ ५१३ ॥

ण हि इति ॥ ५१४ ॥

दिअहे इति ॥ ५१५ ॥

जइ इति ॥ ५१६ ॥

हत्थउड़पाणिआइ वि कालेण गलन्ति पेम्माइं ॥५१७॥

कारणनिरपेक्षोऽकृत्रिमो यथा,—

जह जह जरापरिणअं होइ पईदु गाओ विरुवं वि।
कुलपालिआए तह तह अहिअअरं वल्लहो होइ ॥ ५१८ ॥

जन्मान्तरसंस्कारजनितः सहजो यथा,—

आणिअपुलओव्भेओ सवत्तिपणअपरिधूसरम्मि वि गरूए।
पिअदंसणे पवड्ढइ मसुट्ठाणे वि रुप्पिणीअ पहरिसो ॥५१९॥

उपचारापेक्षप्रकर्षं आहार्यो यथा,—

घरिणीअ कइअव्वं वहुलं पिअअमे कुणन्तम्मि।
अकिअत्थाइं वि जाआइं भत्ति सिढ़िलिआइं अङ्गाइं ॥५२०

अदंसणेण इति ॥ ५१७ ॥

यथा यथा जरापरिणतं भवति पत्युर्गात्रं विरूपमपि।
कुलपालितायाः तथा तथा अधिकतरं वल्लभो भवति ॥

यथेति। पत्युः स्वामिनः गात्रम् अङ्गं जरया वार्द्धक्येन परिणतं परिणतमित्यर्थः अतएव विरूपमपि गतश्रीकमपि यथा यथा भवति, कुलपालितायाः सदंशरचितायाः नार्या इति शेषः स जरापरिणतः पतिः तथा तथा अधिकतरं वल्लभः प्रियः भवति। कुलाङ्गनानां विशिष्टपरिचर्यां विना तादृशस्य पत्युर्विनाशाशङ्कया समधिकसेवापरत्वमवैधव्यफलकत्वञ्च भवतीति भावः ॥ ५१८ ॥

आणिअ इति ॥ ५१९ ॥

घरिण्याः कर्त्तव्यं वहुलं प्रियतमे कुर्वति।
अकृतार्थान्यपि जातानि झटिति शिथिलितान्यङ्गानि ॥

घरिण्या इति। घरिण्याः गृहिण्याः कर्त्तव्यं करणीयं गृहकार्य्यं रन्धनादिकमिति भावः वहुलम् अधिकं प्रियतमे पत्यौ कुर्वति सम्पादयति सति अकृतार्थानि अकृतकार्य्याणि अपि अङ्गानि घरिण्या इति भावः झटिति शीघ्रं शिथिलितानि

यौवनजो यथा,—

तंबमुहकक्कुआहोआ जह जह थणआ किलेन्ति कुमारीणं।
तह तह लद्धावासो व्व मम्महो हिअअमाविसइ ॥ ५२१ ॥

उपचारानपेक्षो विश्रम्भजो यथा,—

ण वि तह च्छेअरआइं हरन्ति पुणरुत्तराअरमिआइं ।
जह जत्थ व तत्थ व जह व तह व सब्भावरमिआइं ॥५२२॥

प्रेमपुष्टिषु चक्षुःप्रीतिर्यथा,—

उत्पत्तिर्देवयजनाद् ब्रह्मवादी नृपः पिता ।
सुप्रसन्नोज्ज्वला मूर्त्तिरस्याः स्नेहं करोति मे ॥ ५२३ ॥

मनःसङ्गो यथा,—

एषा मनो प्रसभं शरीरात् पितुः पदं मध्यममुत्पतन्ती ।
सुराङ्गना कर्षति खण्डिताग्रात् सूत्रं मृणालादिव राजहंसी५२४

शैथिल्यं गतानि जातानि हृत्तानि स्वकर्त्तव्यस्य पत्या सम्पादनात् स्वय केवलं शरीरव्यापारवैमुख्येन जडत्वावाप्तेरिति भावः ॥ ५२० ॥

ताम्रमुखकुचाभोगा यथा यथा स्तना क्रीडन्ते कुमारीणाम् ।
तथा तथा लब्धावास इव मन्मथो हृदयमाविशति ॥

ताम्रमुखेति । कुमारीणां बालानां ताम्रमुखाः रक्तान्ता इत्यर्थः कुचाभोगाः स्तनविस्ताराः स्तनाः यथा क्रीड़न्ते समुन्मीषन्तीत्यर्थः मन्मथः काम तथा तथा लब्धावकाश इव प्राप्तावसर इव हृदय चित्तम् आसामिति शेषः आविशति अधितिष्ठतीत्यर्थः ॥ ५२१ ॥

ण वि इति ॥ ५२२ ॥

उत्पत्तिरिति । अस्याः कुमार्याः देवयजनात् यज्ञवेदात् उत्पत्तिर्जन्म, जन्मविशुद्धिरिति भावः ब्रह्मवादी ब्रह्मतत्त्वविद् नृपः राजा जनकः पिता तथा सुप्रसन्ना सुष्ठुप्रसादगुणपूर्णेत्यर्थः तथा उज्ज्वला दीप्यमाना मूर्त्तिः अवयवः मे मम स्नेहं प्रीतिं करोति जनयति ॥ ५२३ ॥

एषेति । एषा सुराङ्गना देवमहिला उर्वशीति यावत् पितुर्जनकस्य नारा-

सङ्कल्पोत्पत्तिर्यथा,—

तं पुलइआ पि पेच्छइ तं विअ णिज्झाअइ तीअ गेण्हइ गोत्तं ।
धइअं तस्सा मअणे अणं पि विचितं अणिसच्चिअहिअए ५२५

प्रलापो यथा,—

अमअमअगअणसेहररअणीमुहतिलअ चन्द दे च्छिवसु ।
छित्तो ते जेहि पिअअमो ममं पि तेहि विअ करेहिं ॥५२६॥

जागरो यथा,—

तह विरहज्जागरिओ सिविणे वि स देइ दंसणसुहाइं ।
वाहेण जहा लोअणविलोअणं पि से वि हअं ॥५२७॥

कार्श्यं यथा,—

आइ कोवणा वि सासुरूआविआ गअवईए सोहणाए ।
पाअपड़णोणआए दोसु विगलिएसु बलएसु ॥५२८॥

अरतिः विषयान्तरे यथा,—

असंमतो वि समप्पइ अपरिगाहिअलहुओ परगुणालावो ।
तस्स पिआपडिवड्ढा ण समप्पइ रइसुहासमत्ता वि कहा ॥५२९

लज्जाविसर्ज्जनं यथा,—

यणस्येत्यर्थः वामनरूपेण इति भावः मध्यमं पदम् अन्तरीक्षमित्यर्थः उत्पतन्ती उड्डच्छन्ती सती राजहंसी खण्डिताग्रात् छिन्नाग्रभागात् मृणालात् सूत्रमिव तन्तुमिव मे मम शरीरात् मनः चित्तं प्रसभं बलादित्यर्थः कर्षति आकृष्य नयति ॥५२४

त पुलइआ इति ॥ ५२५ ॥

अमअ इति ॥ ५२६ ॥

तह इति ॥ ५२७ ॥

आइ कोवणा इति ॥ ५२८ ॥

असम्मअ इति ॥ ५२९ ॥

अगणिअसेसजुआणो बालअ ! वोलीणलोअमज्जाआ ।
अह सा भमइ दिसामुहपसारिअच्छी तुह किदे ॥५३० ॥

व्याधिः यथा,—

असाहणतोरइ च्चिअ परिवड्ढंतुङ्गअगरुअसंलावम् ।
मरणविणोएण विणा ण विरमावेउ विरहदुक्खम् ॥५३१॥

उन्मादो यथा,—

अवलम्बइ मांसं करुणरसगाहलङ्घिआ परिब्भमइ ।
अत्थक्कगज्जिअउत्तन्तहित्थहिअआ पहिअजाआ ॥५३२॥

मूर्च्छा यथा,—

जं मुच्छिआणं असुओ कलम्बगन्धेण तं गुणे पड़िअं ।
इअ रहगज्जिअदुसहो जीएण विणा ण वोलिन्तो ॥३५३॥

मरणं यथा,—

अज्जं पि ताव एक्कं मासं धारेह पिअसहि रुअन्तिं ।
पहि ऊण तम्मि गए जइ ण मरिस्सं ण रोइस्सं ।

ता इमा विप्रलम्भजन्मानो द्वादशापि प्रेमपुष्टिभूमयः सम्भोगेषु स्वानुरूपामेव प्रेमप्रकर्षभूमिकामास्कन्दयन्ति ॥५३४॥

अगणितशेषयुवा बालक ! अपक्रान्तलोकमर्यादा ।
अथ सा भ्रमति दिङ्मुखप्रसारिताक्षी तव कृते ॥

अगणितेति । हे बालक ! निर्बाध इति भावः अथेदानीं सा अगणिताः अलक्षिताः अवज्ञाता इत्यर्थः अशेषाः त्वद्व्यतिरिक्ता इत्यर्थः युवानः यया तथाविधा अन्यान् यूनोऽगणयन्तीत्यर्थः अपक्रान्ता अपगता लोकमर्यादा शिष्टाचारः यस्याः तथाभूता शिष्टाचारं प्रियादिलतयृहणरूपमगणयन्तीति भावः तव कृते तत्प्राप्त्यर्थं दिङ्मुखेषु प्रसारिते अक्षिणी यया तादृशी सती भ्रमति इतस्ततः सञ्चरतीत्यर्थः ॥ ५३० ॥

असाहण इति ॥ ५३१ ॥

अवलम्बइ इति ॥५३२॥

जं मूर्च्छिआणं इति ॥ ५३३॥

अज्जम् इति ॥ ५३४ ॥

नायकेषु कथाव्यापी नायको यथा,—

गुरोः शासनमत्येतुं न शशाक स राघवः ।
यो रावणशिरश्छेदकार्य्यभारेऽप्यविक्लवः ॥५३५॥

प्रतिनायको यथा,—

जेतारं लोकपालानां स्वमुखैरर्चितेश्वरम् ।
रामस्तुलितकैलासमरातिं बह्वमन्यत ॥ ५३६ ॥

उपनायको यथा,—

स हत्वा बालिनं वीरं तत्पदे चिरकाङ्क्षिते ।
धातोः स्थान इवादेशं सुग्रीवं संन्यवेशयत् ॥ ५३७ ॥

अनुनायको यथा,

स मारुतसुतानीतमहौषधिहृतव्यथः ।
लङ्कास्त्रीणां पुनश्चक्रे विलापाचार्य्यकं शरैः ॥ ५३८ ॥

गुरोरिति । सः राघवः रामः गुरोः पितुः शासनम् आज्ञाम् अत्येतुं अतिक्रमितुं लङ्घितुमित्यर्थः न शशाक न समर्थोऽभूत् । यः रामः रावणस्य शिरसां दशानामिति भावः छेदकार्य्यमेव भारः गुरुव्यापार इत्यर्थः तस्मिन्नपि अविक्लवः अव्याकुलः अकातर इति यावत् ॥ ५३५ ॥

जेतारमिति । रामः लोकपालानाम् इन्द्रादीनां जेतारं जयिनमित्यर्थः स्वमुखैः निजैः शिरोभिः अर्चितः आराधितः ईश्वरः शिवः येन तं तथा तुलितः हस्ताभ्यां हस्तैर्वा उद्धृतः कैलासः तदाख्यः पर्वतः येन तथाभूतं तम् अरातिं शत्रुं रावणं बह्वमन्यत अधिकं प्रशशंसेत्यर्थः ॥ ५३६ ॥

स इति । सः रामः वीरं महाविक्रान्तं बालिनं हत्वा विनाश्य चिरं काङ्क्षिते अभिलषिते तत्पदे तस्य बालिनः पदे राज्ये सिंहासने वा धातोः स्थाने आदेशमिव यथा स्याधातोः स्थाने तिष्ठ, गमेः स्थाने गच्छेति भावः । सुग्रीवं संन्यवेशयत् संस्थापितवान् ॥ ५३७ ॥

स इति । स लक्ष्मणः मरुदेव मारुतः वायुः तस्य सुतः हनूमान् तेन आनीता या महौषधिः विशल्यकरणीति भावः तया हृता अपनीता व्यथा रावणशरप्रहार-

कथाव्यापिनी नायिका यथा,—

तीए सविसेसदूमिअसवत्तिहिअआइ णिव्वरणन्तसिणेन्तम् ।
पिअ गरुइआइ णिमिअं सोहाग्गगुणाणं अग्गभूमीअपअम् ५३९

प्रतिनायिका यथा,—

जंतिअसकुसुमदामं हरिणा णिम्महिअसुरहिगन्धामोअम् ।
अप्पण इअं पि दूमिअ पणइ पि हिअएण रुप्पिणीअ विइण्णम्
॥ ५४० ॥

उपनायिका यथा—

देवीस्त्रीकृतमानसस्य नियतं स्वप्नायमानस्य मे
तद्गोत्रग्रहणादियं सुवदना यायात् कथं न व्यथाम् ? ।
इत्थं यन्त्रणया कथं कथमपि क्षीणा निशा जाग्रतो
दाक्षिण्योपहतेन सा प्रियतमा स्वप्नेऽपि नास्वादिता ॥५४१

जनितेति भावः यस्य तथाभूतः सन् शरैः पुनः लङ्कास्त्रीणां लङ्कावासिनीनां नारीणां हतनाथानामिति भावः विलापाचार्य्यकं परिदेवनस्य आचार्य्यकर्म शिक्षकतारूपमिति भावः चक्रे पुनरपि राक्षसान् विनाश्य तेषां महिला रोदयामासेत्यर्थः ॥ ५३८ ॥

तीए इति ॥ ५३९ ॥

जंतिअ इति ॥ ५४० ॥

देवीति । नियत सततं देव्या महिष्या स्त्रीकृतम् आक्रान्तं मानसं यस्य तथाभूतस्य स्वप्नायमानस्य स्वप्नमनुभवत इत्यर्थः मे मम तस्याः प्रियतमायाः गोत्रग्रहणात् नामग्रहणात् इयं सुवदना सुमुखी देवीति भावः कथं व्यथां पीडां दुःखमित्यर्थः न यायात् ? न प्राप्नुयात् ? अपि तु प्राप्नुयादेवेत्यर्थः । इत्थम् एवमाकारयेत्यर्थः. यन्त्रणया उद्वेगेन जाग्रत एव निशा कथं कथमपि अतिक्लेशेनेत्यर्थः क्षीणा क्षयं गता प्रभातेत्यर्थः किन्तु दाक्षिण्येन अनेकासु समरागत्वेन उपहतेन विप्रलब्धेनेति यावत् मयेति शेषः सा प्रियतमा सुवदना स्वप्नेऽपि न आस्वादिता न प्राप्ता न दृष्टा वा ॥ ५४१ ॥

अनुनायिका यथा,

श्लाघ्यानां गुणिनां धुरि स्थितवति श्रेष्ठान्वयाये त्वयि
प्रत्यस्तव्यसने महीयसि परं प्रीतोऽस्मि जामातरि ।
तेनेयं मदयन्तिकाद्य भवतः प्रीत्यै भवत्प्रेयसे
मित्राय प्रथमानुरागघटिताप्यस्माभिरुत्सृज्यते ॥ ५४२ ॥

आभासेषु नायकाभासो यथा,—

कहं ण खिज्जउ मत्तो इमोअ कन्दोट्टदलसरिच्छेहिम् ।
अच्छीहिं जो ण दीसइ घणत्थणआवरुद्धपसरेहिम् ॥ ५४३

नायिकाभासो यथा,—

कृतसीतापरित्यागः स रत्नाकरमेखलाम् ।

श्लाघ्यानामिति । श्लाघ्यानां प्रशंसनीयानां गुणिनां दाक्षिण्यादिगुणशालिनां धुरि अग्रे स्थितवति गण्यमाने इति भावः श्रेष्ठान्वयाये महाकुलीने इत्यर्थः प्रत्यस्तं परित्यक्तं व्यसनं मृगयाद्यष्टादशविधदोष इत्यर्थः येन तथाभूते अतएव महीयसि महानुभावे इत्यर्थः जामातरि त्वयि परम् अत्यर्थं प्रीतोऽस्मि । तेन हेतुना इयं मदयन्तिका प्रथमेन प्रागुत्पन्नेनेत्यर्थः अनुरागेण प्रणयेन घटितापि योजितापि अद्य भवतः तव प्रीत्यै सन्तोषाय भवतः तव प्रेयसे प्रियतमाय मित्राय सुहृदे अस्माभिः उत्सृज्यते प्रदीयते ॥ ५४२ ॥

कथं न खिद्यति मर्त्योऽस्याः कन्दोट्टदलसदृक्षैः ।
अक्षिभि र्यो न दृश्यते घनस्तनकावरुद्धप्रसरैः ॥

कथमिति । यः अस्याः नायिकायाः कन्दोट्टदलसदृक्षैः पद्मपत्रनिभैरित्यर्थः घनाभ्यां निविडाभ्यां स्तनाभ्याम् अवरुद्धः प्रतिहतः उत्तुङ्गत्वादिति भावः प्रसरः विकास इति भावः येषां तैः अक्षिभिः नयनैः न दृश्यते नावलोक्यते, अक्षिभिरिति बहुवचनप्रयोगेन पुनः पुनर्दर्शनं प्रतीयते । स मर्त्यः मानवः कथं न खिद्यति न खेदं प्राप्नोति ? स्वस्य दुर्भाग्यत्वादिति भावः ॥ ५४३ ॥

कृतेति । कृतः सीतायाः परित्यागो येन तथोक्तः सः पृथिवीपालो भूपतिः

बुभुजे पृथिवीपालः पृथिवीमेव केवलाम् ॥ ५४४ ॥

उभयाभासो यथा,—

अवऊहिअ पुव्वदिसे समअं जोण्हाए सेविअपओसं मुहे ।
माइ ण भिज्जउ अरणी वरदिसाइ तपच्छिअम्मि मिअङ्के ॥५४५

तिर्य्यगाभासो यथा,—

ओरन्तपङ्कअमुहिं वम्मणडिअं व सलिलसअणणिसण्णम् ।
अल्लिअइ तीरणलिणिवाआइ गमेइ सहचरिं वक्काओ ॥५४६ ॥

नायकेषु सर्वगुणसम्पद्योगादुत्तमः स यथा,—

रामोऽयं जगतीह विक्रमगुणैर्यातः प्रसिद्धिं परा-
मस्माङ्भाग्यविपर्ययाद् यदि परं देवो न जानाति तम् ।
वन्दी वैष यशांसि गायति मरुद्यस्यैकबाणाहति-
श्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः ॥ ५४७ ॥

रामः केवलाम् एकां रत्नाकरमेखलां समुद्ररशनाम् आसमुद्रामिति यावत् पृथिवीमेव न तु अन्या कान्तामित्येवकारार्थः । बुभुजे बभारेत्यर्थः ॥ ५४४ ॥

अवऊहिअ इति ॥ ५४५ ॥

ओरन्त इति ॥ ५४६ ॥

राम इति । अयं रामः इहास्मिन् जगति विक्रमगुणैः वीर्य्यातिशयैरिति भावः परां महतीं प्रसिद्धिं यातः गतः प्राप्त इत्यर्थः । परं केवलं देवः महाराजः रावण इति भावः अस्माकं राक्षसानामिति भावः भाग्यस्य दैवस्य विपर्य्ययात् वैपरीत्यात् प्रातिकूल्यादिति यावत् यदि तं रामं न जानाति न गणयतीति भावः । एष मरुत् पवनः वन्दीव वैतालिक इव एकस्य बाणस्य शरस्य आहत्या प्रहारेण श्रेणीभूतानां विशालानां महतां तालानां तालवृक्षाणां ये विवराः शरवेधजनितानि रन्ध्राणि इत्यर्थः तैः उद्गीर्णाः उच्चैरुच्चरिताः तैः सप्तभिः स्वरैः निषादादिभिः निषादर्षभगान्धारषड्जमध्यमधैवताः । पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वरा इत्यमरः । यस्य रामस्य यशांसि गायति ॥ ५४७ ॥

पादोनगुणसम्पद्योगान्मध्यमो यथा,—

किं नो व्याप्तदिशां प्रकम्पितभुवामक्षौहिणीनां फलं ?
किं द्रोणेन ? किमङ्गराजविशिखैः ? एवं यदि क्लाम्यसि।
जीवद्भ्रातृशतस्य मे भुजबलच्छायां सुखामाश्रिता
त्वं दुर्य्योधनकेसरीन्द्रगृहिणी शङ्कास्पदं किं तव ? ॥५४८॥

अर्द्धगुणसम्पद्योगात् कनिष्ठो यथा,—

एकस्मिन् शयने मया मयसुतामालिङ्ग्य निद्राशया-
मुन्निद्रं शयितेन मच्चरणयोः संवाहनव्यापृता।
पादाग्रेण तिलोत्तमा स्तनतटे सस्नेहमापीड़िता
हर्षादेव समर्पितानि पुलकान्यद्यापि नो मुञ्चति ॥५४९॥

किमिति। हे प्रिये! इत्यध्याहार्य्यम्। यदि त्वम् एवं क्लाम्यसि कातरता-मवलम्बसे तदा व्याप्तदिशां दिग्व्यापिनीनामित्यर्थः प्रकम्पिता भूः पृथिवी याभिः तथाभूतानां नः अस्माकम् अक्षौहिणीनां २१८७ एतत्संख्यका रथाः रथसम-संख्यकाः हस्तिनः ६५६१० एतत्संख्यका अश्वाः १०९३५० एतत्संख्यकाः पदातयः एतच्चतुर्विधबलयुक्ताः सेना अक्षौहिणीति ख्यायते तादृशीनाम् एकादशानामिति शेषः फलं प्रयोजनं किम्? द्रोणेन मूर्त्तिमता धनुर्वेदेनेति भावः किम्? तथा अङ्गराजस्य कर्णस्य विशिखैः शरैः किम्? न किमपि प्रयोजनमित्यर्थः। त्वं जीवद् भ्रातॄणां शतं यस्य तथोक्तस्य मे मम दुर्य्योधनस्येति भावः सुखयतीति सुखा तां सुखकरीमित्यर्थः भुजबलमेव छाया अनातपमित्यर्थः ताम् आश्रिता अधिष्ठिता दुर्य्योधन एव केशरीन्द्रः सिंहराजः तस्य गृहिणी महिषी, तव शङ्कास्पदं भयस्थानं किम्? न किमपीत्यर्थः दुःखप्रदर्शनेन व्यथितां भानुमतीं नाम स्वां महिषीं प्रति दुर्य्योधनस्योक्तिः॥ ५४८॥

एकस्मिन्निति। एकस्मिन् न तु द्वितीयस्मिन्निति भावः शयने शय्यायां निद्रा-शयां निद्रायां सत्यां शेते इति तथोक्तां निद्रितामित्यर्थः मयसुतां मयदानवकन्यां मन्दोदरीमित्यर्थः आलिङ्ग्य आश्लिष्य उन्निद्रं निर्निद्रमित्यर्थः यया तथा शयितेन मया मम चरणयोः पादयोः संवाहने संसेवने व्यापृता व्यासक्ता तिलोत्तमा

सत्वप्रधानः सात्विको यथा,—

शक्त्या वक्षसि मग्नया सह मया मूढे प्लवङ्गाधिपे
निद्राणेषु च विद्रवत्सु कपिषु प्राप्तावकाशे द्विषि ।
मा भैष्टेति निरुन्धतः कपिभयं तस्योद्भटभ्रूस्थिते
मर्मच्छेदविसंष्ठुलाक्षरजडा वाचस्त्वया न श्रुताः ॥ ५५० ॥

रजःप्रधानो राजसो यथा,—

सामन्तमौलिमणिरञ्जितशासनाङ्क-
मेकातपत्रमवनेर्न तथा प्रभुत्वम् ।

तदाख्या सुरसुन्दरीति यावत् वन्दीभूतेति भावः पादाग्रेण मदीयेन चरणाग्रेण स्तनतटे सस्नेहं सप्रणयं यथा तथा आपीडिता आहता सती हर्षादेव न तु विरागादिव समर्पितानि संक्रमितानि जनितानीति यावत् स्तनतटे इति भावः पुलकानि रोमाञ्चान् अद्यापि नो मुञ्चेति न त्यजति। निद्राशयामित्यत्र निद्रालसामिति पाठः समीचीनः। तत्र निद्रया अलसा विवशेत्यर्थः ताम् ॥ ५४९ ॥

शक्त्येति। वक्षसि मग्नया गाढं निपतितयेत्यर्थः शक्त्या तदाख्यास्त्रविशेषेणेत्यर्थः शत्रुप्रयुक्तयेति भावः हेतुभूतया मया सह प्लवङ्गाधिपे वानरराजे सुग्रीवे मूढे मयि सुग्रीवे च मोहं गते इत्यर्थः कपिषु वानरेषु निद्राणेषु निद्रालसेष्विति यावत् राक्षसयुद्धे इति भावः अतएव विद्रवत्सु पलायमानेषु सत्सु, द्विषि शत्रौ रावणे इति भावः प्राप्तः लब्धः अवकाशः अवसरः युद्धभङ्गरूप इति भावः येन तथाभूते सति मा भैष्ट न भयं कुरुत इति वाक्येनेति शेषः कपिभयं वानराणां भीतिं निरुन्धतः अपनयतः उद्भटा उत्कटा भ्रूस्थितिः भ्रूभङ्गः यस्य तथाभूतस्य तस्य विभीषणस्येति भावः मर्मणां सन्धिस्थानविशेषाणां छेदेन वेधेनेव मन्मर्माघातदर्शनादिति भावः विसंष्ठुलानि विकृतस्वरत्वेन उच्चारितानीति भावः अक्षराणि वर्णाः तैः जडाः अनतिस्पष्टा इत्यर्थः वाचः वाक्यानि न श्रुताः, मया तु अन्तः सञ्ज्ञावत्वात् श्रुताः त्वया तु मदव्यथाभिभूतेन अन्तःसञ्ज्ञाविरहितेनेव स्थितेन न आकर्णिता इति निष्कर्षः। रामं प्रति कृतव्यथस्य लक्ष्मणस्य उक्तिः ॥ ५५० ॥

सामन्तेति। हे सखे! मित्र! अहम् अद्य अस्याः कान्तायाः चरणयोः सम्यक्

अस्याः सखे! चरणयोरधिगम्य सम्यग्
आज्ञाकरत्वमहमद्य यथा कृतार्थः ॥ ५५१ ॥

तमःप्रधानस्तामसो यथा,—

तपो वा शस्त्रं वा व्यपदिशति यः कश्चिदिह वः
स दर्पादुद्दामन्द्विषमसहमानः कलयतु।
अरामां निःसौरध्वजदशरथीकृत्य वसुधा-
मलप्तस्तत्कुल्यानपि परशुरामः शमयति ॥ ५५२ ॥

अनेकजानिः साधारणो यथा,—

स्नाता तिष्ठति कुन्तलेश्वरसुता वारोऽङ्गराजस्वसुः
द्यूतैः रात्रिरियं जिता कमलया देवी प्रसाद्याद्य च।

आज्ञाकरत्वं दासत्वम् अधिगम्य प्राप्य यथा कृतार्थः अस्मीति शेषः सामन्तानाम् अधीश्वराणां सामन्तः स्यादधीश्वर इत्यमरः अधीननृपाणामिति भावः मौलिषु किरीटेषु ये मणयः रत्नानि तैः रञ्जितम् अलङ्कृतं शासनम् आज्ञा अङ्कः चिह्नं यस्य तथाभूतम् एकातपत्रम् एकच्छत्रम् एकाधिपत्यमिति भावः अवनेः पृथिव्याः प्रभुत्वं प्राप्य तथा न कृतार्थ इति शेषः ॥ ५५१ ॥

तप इति। इहास्मिन् सदसीति शेषः वः युष्माकं मध्ये यः कश्चित् शतानन्दो वा जनको वेति भावः तपो वा तपश्चरणजनितं तेजो वा इत्यर्थः शस्त्रं वा शस्त्रग्रहणसामर्थ्यं वा इत्यर्थः व्यपदिशति प्रकटयतीत्यर्थः। स दर्पात् अहङ्कारात् उद्दामम् उत्कटं अप्रतिविधेयमिति भावः द्विषं शत्रुं मामिति शेषः असहमानः अक्षममाणः कलयतु व्यपदिशतु इत्यर्थः। किन्तु परशुरामः अरामां रामरहिताम् अर्थे निहतरामामिति यावत् वसुधां पृथ्वीं सौरध्वजः जनकः दशरथः सौरध्वजदशरथौ न विद्येते सौरध्वजदशरथौ यस्यां सा निःसौरध्वजदशरथा न निःसौरध्वजदशरथाम् अनिःसौरध्वजदशरथां निःसौरध्वजदशरथां कृत्वेति निःसौरध्वजदशरथीकृत्य अलप्तः तथापि तृप्तिं न प्राप्तः सन् तत्कुल्यानपि तयोः सौरध्वजदशरथयोः कुलजातानपि शमयति नाशयति ॥ ५५२ ॥

अनेकजानिरिति। न एका अनेकाः बहव इत्यर्थः जायाः कान्ताः यस्य सः अनेकजानिः बहुभार्य्य इत्यर्थः।

इत्यन्तःपुरसुन्दरीः प्रति मया विज्ञाय विज्ञापिते
देवेनाप्रतिपत्तिमूढमनसा द्विधाः स्थितं नाड़िकाः ॥५५३॥

अनन्यजानिरसाधारणो यथा,—

आ विवाहसमयाद्गृहे वने शैशवे तदनु यौवने पुनः।
स्वापहेतुरनुपासितोऽन्यया रामबाहुरुपधानमेष ते ॥ ५५४

अहङ्कारप्रधानो धीरोद्धतो यथा,—

चक्रं वा मधुहा कृतान्तगृहिणां दत्ताग्रपञ्चाङ्गुलं
वज्रं भूधरपक्षशोणितसुरापानोन्मदं वा वृषा।

स्नातेति। कुन्तलेश्वरस्य कुन्तलाधिपतेः सुता दुहिता स्नाता ऋतावितिभावः कृतस्नाना तिष्ठति, तस्यां गमनं शास्त्रीयत्वात् अवश्यकर्त्तव्यमन्यथा प्रत्यवायः स्यादिति भावः। अद्य अङ्गराजस्य स्वसुः भगिन्याः वारः निर्दिष्टं दिनमित्यर्थः सोऽपि नातिक्रमणीय इति भावः। कमलया तदाख्यया कान्तया द्यूतैः पाशकादिक्रीडाविशेषैः इयं रात्रिः जिता यद्यहं पराजीयेय, तदा इमां रात्रिं त्वद्गृहे नयामीति पणत्वेन निरूपिता रात्रिः हारिता तदसौ पणो विजेत्रा अवश्य देय इति भावः। अद्य देवी प्रधाना महिषी प्रसाद्या सान्त्वनीया। सा हि केनचित् व्यपदेशेन कलुषिता अवश्यं प्रसादनीया, अन्यथा मम मनर्थपातः स्यादिति भावः। मया अवरोधकिङ्करेणेति भावः अन्तःपुरसुन्दरीः प्रति उद्दिश्येति भावः इति विज्ञापिते निवेदिते सति देवेन महाराजेन दक्षिणनायकभूतेनेति भावः अप्रतिपत्त्या इतिकर्त्तव्यानवधारणेनेत्यर्थः मूढं जडमित्यर्थः मनः यस्य तथाभूतेन सता द्विधाः नाड़िकाः अत्यन्तसयोगे द्वितीया स्थितम् अवस्थान कृतमित्यर्थः॥ ५५३ ॥

आ विवाहेति। आ विवाहसमयात् विवाहसमयादारभ्येत्यर्थः गृहे वने शैशवे कौमारे तदनु तदनन्तरं पुनः यौवने तारुण्ये स्वापस्य शयनस्य हेतुः शिरोऽवलम्बनाश्रय इत्यर्थः अन्यया अपरया कान्तया अनुपासितः अनधिगतः एषः रामस्य बाहुः ते तव उपधानं शिरोधानाश्रय इत्यर्थः॥ ५५४ ॥

चक्रमिति। मधुहा मधुसूदनः कृष्णः कृतान्तगृहिणां यमसदनगामिनां कृतान्तो यमदैवयोरित्यमरः। अहन्तु अमरत्वात् न तथेति भावः दत्तम् अग्रे यमगृहगमनात् प्रागिति भावः पञ्चानां अङ्गुलीनां समाहारः पञ्चाङ्गुलं तत् येन

शूलञ्चासुररक्तबिन्दुनिचितं गृह्णातु शूलायुधो
धृष्टद्युम्नमहं निहन्मि समरे कश्चित् परित्रायताम् ॥ ५५५॥

रत्युपचारप्रधानः धीरललितो यथा,—

आधातुं विनयं निरागसि नरे कुप्यन्तु नामेश्वरा-
स्तेन स्वाशयशुद्धिरेव सुकरा प्रायः प्रभूणां पुरः ।
मिथ्यामानिनि ! मन्यसे यदि तदा नित्यं मनोवर्त्तिनी
ध्याता तामरसाक्षि ! चित्तफलके का वा त्वदन्या मया ? ॥५५६॥

तथोक्तं चक्रास्त्रेण कण्ठस्य पञ्चाङ्गुलमात्रस्यैव दारणादिति भावः । चक्रं सुदर्शनं वा, वृषा इन्द्रः वासवो वृत्रहा वृषेत्यमरः । भूधराणां पर्वतानां पक्षाः तेषां छिन्नानामिति भावः शोणितान्येव सुराः मदिराः तासां पानेन आस्वादेन उन्मदम् उत्कटगर्वमिति यावत् वज्रं वा तथा शूलायुधः शम्भुः असुराणां रक्तबिन्दुभिः निचितं व्याप्तं शूलं गृह्णातु च । अहं धृष्टद्युम्नं समरे निहन्मि नाशयामि, कश्चित् उक्तानां वीराणां मध्ये इति शेषः परित्रायतां रक्षतु ॥ ५५५ ॥

आधातुमिति । ईश्वराः प्रभवः विनयं शिष्टाचारम् आधातुं शिक्षयितुं निरागसि निरपराधे नरे मानवे कुप्यन्तु नाम प्रकाश्ये, प्रभूणां कोपप्रकाशे निरपराधोऽपि नरः शिष्टाचारः स्यादिति भावः तेन हेतुना विनयाधानेनेत्यर्थः प्रभूणां पुरः अग्रतः प्रायः बाहुल्येन स्वस्य आत्मनः आशयशुद्धिः हृदयभावशोधनं सुकरा अनायासेन क्रियते इत्यर्थः । कदापि मम अविनयिता माभूदिति कोपप्रकाशकारणं मत्प्रभुत्वात् तवेति भावः । हे मिथ्यामानिनि ! अलीककोपने ! तामरसाक्षि ! रक्तोत्पलनयने ! रक्तोत्पलं तामरसमित्यमरः कोपात् नयनस्य रक्तत्वमिति भावः यदि त्वं नित्यं सततं मनोवर्त्तिनी हृदयस्थिता ममेति शेषः इति मन्यसे आत्मानमिति शेषः तदा का वा त्वदन्या त्वत्तः अपरा कान्तेति शेषः चित्तमेव फलकं काष्ठनिर्मिताधारविशेषः तत्र ध्याता चिन्तिता ? मयेति शेषः यदि अहं कामपि चिन्तयामि तदा नित्यं मनोवर्त्तिन्या त्वया अवश्यमेव ज्ञातव्यम् । तस्मात् वृथा मानो मयि न कर्त्तव्य इति निष्कर्षः ॥ ५५६ ॥

उपशमप्रधानो धीरप्रशान्तो यथा,—

कुलममलिनं भद्रा मूर्त्तिर्मतिः श्रुतिशालिनी
भुजबलमलं स्फीता लक्ष्मीः प्रभुत्वमखण्डितम् ।
प्रकृतिसुभगा ह्यन्ते भावा मदस्य च हेतवो
व्रजति पुरुषो यैरुन्मादं त एव नवाङ्कुशाः ॥५५७॥

विश्रोब्धोदारकर्मा धीरोदात्तः स यथा,—

कपोले जानक्याः करिकलभदन्तद्युतिमुषि
स्मरस्मेरं गण्डोड्डमरपुलकं वक्त्रकमलम् ।
मुहुः पश्यन् शृण्वन् रजनिचरसेनाकलकलं
जटाजूटग्रन्थिं द्रढयति रघूणां परिदृढः ॥५५८॥

कुलमिति । कुलं वंशः अमलिनं निर्मलं निष्कलङ्कमिति यावत् मूर्त्तिः अवयवः भद्रा शोभना । मतिः बुद्धिः श्रुत्या शास्त्रानुशीलनेन इति भावः शालते शोभते इति तथोक्ता । भुजबलं बाहुबलं वीर्यमित्यर्थः अलम् अत्यर्थम् । लक्ष्मीः श्रीः समृद्धिरिति भावः स्फीता प्रवृद्धा । प्रभुत्वं प्रभावः अखण्डितम् अव्याहतम् । एते पूर्वोक्ताः भावाः कुलममलिनमित्यादयः, अवस्था इति यावत् प्रकृतिसुभगाः स्वभावेन रमणीयाः मदस्य मत्तताया: हेतवः कारणानि च । यैः प्रागुक्तैः भावैः पुरुषः उन्मादम् अविनयमिति यावत् व्रजति प्राप्नोति ते एव प्रागुक्ताः भावाः नवाः नूतनाः तीक्ष्णा इति भावः अङ्कुशाः शासनहेतवः अस्त्रविशेषा इति यावत् यद्यपि अङ्कुशशब्दः केवलं हस्तिशासनास्त्रतयोच्यते तथाप्यत्र क्वचिद् विशेषस्य सामान्यपरत्वं सामान्यस्यापि विशेषपरत्वमिति न्यायात् सामान्यपरत्वमस्येति बोद्धव्यम् । शमपराणां साधूनामेते भावाः विनयं रचन्ति असाधूनान्तु अविनयमेव जनयन्तीति भावः ॥ ५५७ ॥

कपोल इति । रघूणां परिदृढः पतिः रामः करिकलभस्य गजशावकस्य यद्यपि कलभशब्देन करिशावक उच्यते कलभः करिशावक इत्यमरोक्तेः तथापि कर्णकुण्डलादिवत् अत्र प्रयोगो बोध्यः । दन्तः करिकलभदन्तः तस्य द्युतिं कान्तिं

कैतवप्रधानः शठो यथा,—

दृष्ट्वैकासनसङ्गते प्रियतमे पश्चादुपेत्यादरात्
एकस्या नयने निमील्य विहितक्रीड़ानुबन्धच्छलः ।
ईषद्वक्रितकन्धरः सपुलकः प्रेमोल्लसन्मानसाम्
अन्तर्हासलसत्कपोलफलकां धूर्त्तोऽपरां चुम्बति ॥५५९

कृतापराधोऽप्यविलज्जो धृष्टो यथा,—

शतं वारानुक्तः प्रियसखि ! वचोभिः स परुषैः
सहस्रं निर्द्धूतः पदनिपतितः पार्ष्णिहतिभिः ।
कियत् कृत्वा वद्वाः पुनरिह न वेद्मि भ्रुकुटय-
स्तथापि क्लिश्यन् मां क्षणमपि न धृष्टो विरमति ॥५६०

मुष्णाति हरतीति तथोक्तः तस्मिन् विशदोज्ज्वले इति भावः जानक्याः सीतायाः कपोले गण्डे प्रतिफलितमिति शेषः स्मरेण कामावेशेनेति भावः स्मेर विकसरं गण्डे कपोले उड्डम्बराः उद्गताः पुलकाः रोमाञ्चाः सत्त्वोदयजनिता इति भावः यस्य तथोक्त वक्त्रं वदनमेव कमल पद्मं स्वमिति शेषः मुहुः पुनः पुनः पश्यन् अवलोकयन् तथा रजनिचराणां राक्षसानां खरादीनां या: सेना: वलानि तासां कलकलः कोलाहलः त शृण्वन् आकर्णयन् जटाजूटस्य जटासमूहस्य ग्रन्थिं बन्धनं दृढयति दृढ़ीकरोति। शृङ्गारवीरयोर्मध्यवर्त्ती राम इति भावः ॥ ५५८ ॥

दृष्ट्वेति। धूर्त्तः कितवः प्रियतमे द्वे कान्ते एकासने संस्थिते आसीने दृष्ट्वा पश्चात् पृष्ठभागेन उपेत्य उपगम्य आदरात् प्रणयातिशयात् विहितः कृतः क्रीडाया अनुबन्धः अनुष्ठानमेव छलं येन तथाभूतः क्रीड़ाच्छलेनेति भावः एकस्याः प्रियतमायाः नयने निमील्य पिधायेत्यर्थः पिधायेति पाठान्तरम्। ईषत् अल्पं वक्रिता परावर्त्तितेत्यर्थः कन्धरा ग्रीवा येन तथोक्तः सपुलकः सरोमाञ्चः कामावेशजसत्त्वविकारादिति भावः प्रेम्णा प्रणयेन उल्लसत् मानसं यस्याः तां तथा अन्तर्हासेन गूढहसितेन लसत् विकसत् कपोल एव फलक यस्याः तथाविधाम् अपरा द्वितीयां प्रियतमा चुम्बति ॥५५९ ॥

शतमिति। हे प्रियसखि ! स धृष्टः चपलः परुषैः निष्ठुरैः वचोभिः वाक्यैः

हृदयङ्गमप्रवृत्तिरनुकूलो यथा,—

मुञ्च मानमनिमित्तकोपने ! सन्ध्यया प्रणमितोऽस्मि नान्यया।
किं न वेत्सि सहधर्मचारिणं चक्रवाकसमवृत्तिमात्मनः ? ॥५६१

औपरोधिकप्रवृत्तिः दक्षिणो यथा,—

अनेन कल्याणि ! मृणालकोमलं व्रतेन गात्रं ग्लपयस्यकारणम्।
प्रसादमाकाङ्क्षति यस्तवोत्सुकः स किं त्वया दासजनः प्रसाद्यते ? ॥५६२॥

नायिकागुणेषु सर्वगुणसम्पद् योगादुत्तमा यथा,—

हसिआइं समंसलकोमलाइं बीसम्भकोमलं वअणं।
सबभावकोमलं पुलाइअंवणमिमो सुमहिलाणं ॥५६३॥

शत वारान् उक्तः निर्भर्त्सित इत्यर्थः, पदनिपतितः चरणपतितः पार्ष्णिहतिभिः पादप्रहारैरित्यर्थः सहस्रं वारानिति शेषः निर्धूतः निराकृतः। इहास्मिन् धृष्टे कियत् कृत्वा कतिवारानित्यर्थः पुनः भ्रुकुटयः भ्रूभङ्गाः बद्धाः कृताः, न वेद्मि न जानामि तदिति शेषः। तथापि मां क्लिश्यन् व्यथयन्नित्यर्थः क्षणमपि न विरमति न निवर्त्तते। न त्यजतीति यावत् ॥ ५६० ॥

मुञ्चेति। हे अनिमित्तकोपने ! निष्कारणकोपकारिणि ! मानं कोपं मुञ्च सन्ध्यया प्रणमितः अस्मि, अन्यया कान्तया न, सन्ध्यावन्दनार्थम् अहं कृतप्रणामस्त्वया दृष्टः अन्यां नारीं नाहं वन्दे इति भावः। आत्मनः सहधर्मचारिणं मां चक्रवाकसमवृत्तिम् एकपत्नीव्रतमिति भावः किं न वेत्सि ? न जानासि ? ॥ ५६१ ॥

अनेनेति। हे कल्याणि शुभङ्करि ! मृणालकोमलम् अतिसुकुमारमिति भावः गात्रम् अङ्गम् अनेन व्रतेन नियमेन अकारण हेतुं विनेत्यर्थः ग्लपयसि ग्लानिं नयसि, यः उत्सुकः उत्कण्ठितः सन् तव प्रसादम् अनुग्रहम् आकाङ्क्षति अभिलषति, स दासजनः अहमिति भावः किं कथं प्रसाद्यते सेव्यते इत्यर्थः व्रतेनेति भावः ॥ ५६२ ॥

हसिआइं इति ॥ ५६३ ॥

पादोनगुणसम्पद्योगात् मध्यमा यथा,—

णिअदइअदंसणुक्खित्त पहिअअस्सेण वच्च सुपहेण ।
गहवइवहूआ दुल्लङ्घिवाउदाहअपइहगामो ॥५६४॥

अर्द्धगुणसम्पद् योगात् अधमा यथा,

तं किं खणं विरज्जसि तं किरउ वहससि सअलमहिलाओ ।
एहेहि वारवालिइ अंसूमइमल समुप्पिसिओ ॥५६५॥

वयःकौशलाभ्यामसम्पूर्णा मुग्धा यथा,—

सहिआहिं भसमाणा त्थणए लग्गकुसुम्भपुप्फुन्ति ।
मुद्धवहूआ हसिज्जइ पप्फोड़न्ती णहवआइम् ॥५६६॥

वयसा परिपूर्णा मध्यमा यथा,—

पड़िवक्खमसु उडेलावसउडे अणङ्गअकुम्भे ।
पुरिससअहिअअधरिए कीस त्थणन्ती त्थणे वहसि ॥ ५६७ ॥

वयःकौशलाभ्यां सम्पूर्णा प्रगल्भा यथा,

खिसस्स ठवेइ उपइणो गिह्मावरणहरमिअस्स ।
ओल्लं गलन्त उप्फंणहाणसुअंधचिउरभारं ॥५६८॥

यत्नापनेयमाना धीरा यथा,—

ण वि तह अणालवन्ती हिअअं दूमेइ माणिणी हिअअं ।
जह दूरे वि अम्हिअगरूअरोसमज्जत्थभणिएहिं ॥५६९॥

णिअदइअ इति ॥ ५६४ ॥

त किं खण इति ॥ ५६५ ॥

सहि आहिं इति ॥ ५६६ ॥

पडिवक्ख इति ॥ ५६७ ॥

खिसस्सेति ॥ ५६८ ॥

नवितह इति ॥ ५६९ ॥

अयत्नापनेयप्रमाना अधीरा यथा,—

अवलम्बिअमाणपरम्मुहीअ तए तस्स माणिणि पिअस्स ।
पुट्ठिपुलउग्गामो तुह कहेइ समुहट्ठिअं हिअअं ॥५७०॥

आत्मीया स्वा यथा,—

घरिणीए महाणसकम्मलग्गमसिमइलेण हत्थेण ।
छित्तं मुहं हसिज्जइ चन्दावत्थं गहपइणा ॥५७१॥

परकीया अन्यदीया यथा,—

वइविवरणिग्गअ दलोए रसो साहइ व्व तरुणाणं ।
एत्थ घरे हलिअवहू एइहमेत्तत्थणी वसइ ॥५७२॥

पाणिग्गहीता ऊढा यथा,—

बालत्तणदुल्लिआए अज्ज अणज्जं किदं णववहूए ।
भाआमि घरे एआइणि त्ति खित्तो पई रुट्ठो ॥५७३॥

अनूढा कुमारी यथा,—

कस्स करो वहुपुण्णफले क्क तरुणी तुह णिसम्मिहिइ ।
थणपरिणाहे मम्महणिहाणकलसे व्व पारोहो ॥५७४॥

अवलम्बिअ इति ॥ ५७० ॥

घरिणीए इति ॥ ५७१ ॥

वइविवर इति ॥ ५७२ ॥

बालत्तण इति ॥ ५७३ ॥

कस्य करः बहुपुण्यफलैकतरोस्त्वया निधीयते ।
स्तनपरिणाहे मन्मथनिधानकलस इव प्ररोहः ॥

कस्येति । हे कुमारि ! बहूनि पुण्यान्येव फलानि यस्य सः बहुपुण्यफलः स चासौ एकोऽद्वितीयः तरुरिति तथोक्तः तथाभूतस्य कस्य सुकृतिनः इति भावः प्ररोहः अङ्कुरः तत् स्वरूप इति भावः करः पाणिः त्वया स्तनपरिणाहे स्तनयोर्विस्तारे मन्मथस्य कामस्य निधानकलस इव निधिकुम्भ इव निधीयते निवेश्यते ॥ ५७४ ॥

प्रथमोढ़ा ज्येष्ठा यथा,—

उपणअं पणअं पढ़मपिआए रक्खिउं कामो वि मधुरमधुरेहिं ।
छेअवरो वि ण लिज्जइ अहिणववङ्कआ विलासेहिं ॥५७५॥

पश्चादूढ़ा कनीयसी यथा,—

उट्ठन्त महारम्भत्थणए दट्ठुण मुद्धवहुआए ।
ओसिणकवोलाए णीससिअं पढ़मघरिणीए ॥ ५७६ ॥

अहङ्कारर्द्धिरुद्धता यथा,—

अणमहिलापसङ्गं देटेक्ककरेसु अम्ह दइअस्स ।
पुरिसा एकन्तरस्स ण हु दोसगुणे वि जाणन्ति ॥५७७॥

गूढमानर्द्धिः उदात्ता यथा,—

जाणइ जाणावेउं अणुणअविहीणरोस माणपरिसेसं ।
रइविक्कमम्मि विणआवलम्बणं सच्चिअं कुणन्ती ॥५७८॥

निर्विण्णमाना शान्ता यथा,—

जइ आ पिओ ण दीसइ भणह हला कस्स कीरए माणो ।
अह दिट्ठम्मि वि माणो ता तस्स पिअत्तणं कन्तो ॥५७९॥

श्लाघनीयमाना ललिता यथा,—

हसिएहिं उआलम्भा अच्छ वआरेहि रुसिअव्वाइ ।
असूइ मण्डणाइं एसो मग्गो सुमहिलाणं ॥ ५८० ॥

उपणअं इति ॥ ५७५ ॥

उट्ठन्त इति ॥ ५७६ ॥

अणमहिलेति ॥ ५७७ ॥

जाणइ इति ॥ ५७८ ॥

जइ इति ॥ ५७९ ॥

हसिएहि इति ॥ ५८० ॥

अनियतानेकोपभोग्या [illegible]न्या यथा,—

कडुएक्क धूमंधारे [illegible]भुत्तणमागणो समप्पिहिइ।
मुहकमलचुम्बणलेहलम्मि पासत्थिए दिअरे ॥ ५८१ ॥

पत्यन्तरं प्राप्ता पुनर्भूः यथा,—

मयेन निर्मितां लङ्कां [illegible]ब्धा मन्दोदरीमपि।
रेमे मूर्त्तां दशग्रीवलक्ष्मीमिव विभीषणः ॥ ५८२ ॥

आत्मच्छन्दा स्वैरिणी यथा,—

तह सा जाणइ जाआलोए पच्छण्णमविणअं काउम्।
जह पढमं चिअ लिक्खइ मज्झे चरित्तवतीणम् ॥५८३॥

कलाचतुःषष्टिविद् गणिका यथा,—

सच्छन्दरमण दंसण रसवड्ढिअगरुअवम्मह विलासं।
सुविअड्ढवेसवाणि आरमिअङ्गो बसिउं तरइ ॥५८४॥

रूपयौवनमात्रोपजीविनी रूपाजीवा यथा,—

अयमेव दह्यमानस्मरनिर्गतधूमवर्त्तिकाकारः।

कडुएक्क इति ॥ ५८१ ॥

मयेनेति। विभीषणः मूर्त्तां दशग्रीवलक्ष्मीमिव मूर्त्तिमतीं रावणलक्ष्मीमिव मयेन दानवविशेषेणेति भावः निर्मिता सृष्टाम् उत्पादिताञ्च लङ्कां मन्दोदरीमपि मन्दोदरीञ्चेत्यर्थः लब्ध्वा रावणनिधनानन्तरमिति भावः रेमे ॥ ५८२ ॥

तथा सा जानाति जायालोके प्रच्छन्नमविनयं कर्त्तुम्।
यथा प्रथममिव लिख्यते मध्ये चरित्रवतीनाम् ॥

तह इति। सा जाया कान्ता लोके संसारे तथा प्रच्छन्नं गूढं यथा तथा अविनयं दुराचारमित्यर्थः कर्त्तुं जानाति यथा चरित्रवतीनां सुचारित्राणां सतीनामित्यर्थः मध्ये प्रथममिव लिख्यते गण्यते इति भावः सेति शेषः ॥ ५८३ ॥

सच्छन्द इति ॥ ५८४ ॥

अयमिति। हे सुन्दरि! दह्यमानात् भस्मीक्रियमाणात् स्मरात् कामात्

चिकुरभरस्तव सुन्दरि ! कामिजनं किङ्करीकुरुते ॥५८५॥

कुट्टमितादीनां कर्त्री विलासिनी यथा,—

सामसुन्दरीणं विब्भममावहइ अविणओ चेअ ।

धूमच्चिअपज्जलिआ ण वहुमओ सुरहिदारुणा ॥५८६॥

यथोक्तलक्षणासु खण्डिता यथा,

पव्वणागअणु रताअवत्तं तइ लोअलोअणाणन्दम् ।

असत्थखं विअ सव्वरिणहभूसणवइ णमो दे ॥५८७॥

कलहान्तरिता यथा,—

अह सो विलक्खहिअओ मए अहव्वाइ अगणिअप्पणओ ।

परवज्जणचिरीहिं तुम्हेहिं उवेक्खिओ जंतो ॥५८८॥

विप्रलब्धा यथा,—

अह सा तहिं तहिं विअ वाणीरवणम्मि चुक्कसङ्केआ ।

तुह दंसणं विमग्गइ पब्भट्ठणिहाणठाणाव्व ॥५८९॥

निर्गता या धूमवर्त्तिका वर्त्तिकाकारधूमचय इत्यर्थः तदाकारः तत्सदृशः अयं तव चिकुरभरः कुन्तलनिचय एव अन्यस्य अङ्गस्य का कथेति एवकारार्थः । कामिजनं युववर्गं किङ्करीकुरुते दासीकुरुते ॥ ५८५ ॥

सामस इति ॥ ५८६ ॥

पव्वणा इति ॥ ५८७ ॥

अह सो इति ॥ ५८८ ॥

अथ सा तत्र तत्रैव वाणीरवने च्युतसङ्केता ।

तव दर्शनं विमार्गति प्रभ्रष्टनिधानस्थानेव ॥

अथ सेति । अथेदानीं सा तव कान्तेति शेषः वाणीरवने वेतसवने च्युतः भ्रष्टः सङ्केतः यस्याः तथाभूता त्वत्कृतसङ्केतेन गतापि त्वामप्राप्नुवतीति भावः भ्रष्टं निधानस्थानं निधिलाभचेष्टा यस्याः तादृशीव निधिलाभाशया गत्वा अप्राप्तनिधानस्थाना इव इत्यर्थः तत्र तत्रैव तव दर्शनं विमार्गति अन्विष्यति ॥ ५८९ ॥

वासकसज्जा यथा,—

एहिइ पिओ त्ति णिमिसं व जामिअं जामिणीए पढ़मद्धं।
सेसं संतावपरव्वसाए वरिसं व वोलीणं ॥ ५९० ॥

स्वाधीनपतिका यथा,—

सालोए च्चिअ सूरे घरिणी घरसामिअस्स घेत्तूण।
णेच्छन्तस्स वि पाए धुअइ हसन्ती हसन्तस्स ॥५९१॥

अभिसारिका यथा,—

गम्मिहिसि तस्स पासं मा झूरसु तरुणि वट्टउ मिअङ्को।
दुद्धे दुद्धम्मि व चन्दिआए को पेच्छइ मुहं ते ॥ ५९२ ॥

प्रोषितभर्तृका यथा,—

गिम्हे दवग्गिमसिमइलिआइं दीसन्ति विज्झसिहराइं।
आसउपउत्थपइएण होन्ति णवपाउसब्भाइं ॥५९३॥

विरहोत्कण्ठिता यथा,—

अस्मिन् वर्षमहे न वर्त्तत इदं यत् कामदेवोत्सवे
स्थेयं पुत्रि! निरन्नया तदधुना किञ्चिन्मुखे दीयताम्।

एष्यति प्रिय इति निमिषमिव जाग्रतं यामिन्याः प्रथमार्द्धम्।
शेषं सन्तापपरवशाया वर्षमिवापक्रान्तम् ॥

एष्यतीति। प्रियः कान्तः एष्यति आगमिष्यति इति बुद्ध्येति भावः यामिन्याः रजन्याः प्रथमार्द्धं निमिषमिव क्षणमिवेति भावः जाग्रत जागरणेन नीतमित्यर्थः। शेषं यामिन्या अपरार्द्धमित्यर्थः सन्तापपरवशायाः विरहज्वरविवशायाः सत्याः वर्षमिव सवत्सर इव अतिदीर्घमिति भावः अपक्रान्तम् अपगतम् ॥ ५९० ॥

सालोए इति ॥ ५९१ ॥

गम्मिहि इति ॥ ५९२ ॥

गिम्हे इति ॥ ५९३ ॥

अस्मिन्निति। हे पुत्रि! अस्मिन् वर्षमहे वार्षिकोत्सवकरे इत्यर्थः कामदेवोत्सवे मदनयात्रायामित्यर्थः निरन्नया त्यक्तान्नभक्षणया स्थेयं स्थातव्यमिदं यत्

इत्युक्ते जरतीजनेन कथमप्यध्वन्यवध्वा ततः

पर्य्यस्तेऽहनि कल्पितश्च कवलो धौतश्च धाराम्बुभिः ॥५९४॥

हीनपात्रेषु शकारो यथा,—

पलिच्चले लम्बदशाकलाअं पावालअं शुत्तशदेहिं छत्तं।

मंशञ्च खादुं तुह तुट्ठि काटुं चकुश्चुकुश्चुक्कुचुकुश्चुकुत्ति ॥५९५॥

ललको यथा,—

कम्बलवाणिएकत्ति कुट्टं मलदन्तिधिद्धि

लुद्धिए मइवेआलसि लत्तिं।

सावरि जग्गिरि क्क तुमं सहिं खरा

विदुपप्फुलिण लोको सि ण आगसि ॥ ५९६ ॥

अमात्यादिरासनार्हः पाषण्डादिर्वा पीठमर्दः। तयोरमात्येषु माल्यवान् यथा,—

हा वत्साः खरदूषणत्रिशिरसो! बध्याः स्थ पापस्य मे

हा हा वत्स! विभीषण! त्वमपि कार्य्येण हेयः स्थितः।

तत् न वर्त्तते न भवति सर्व एव जनः सच्छन्दमन्नपानादिकं कृत्वा अव नन्दतीति भावः तत्तस्मात् अधुना इदानीं किञ्चित् किमपि भक्ष्यं वस्त्विति भावः सुखे दीयताम्। जरतीजनेन वृद्धावर्गेण इति उक्ते सति ततस्तदनन्तरम् अध्वन्यवध्वा पान्थमहिलया पर्य्यस्ते अवसिते अहनि दिवसे कथं कथमपि तासामनुरोधापेक्षयेति भावः कवलः ग्रासः कल्पितश्च भक्षणार्थं रचितश्च धाराम्बुभिः वर्षाम्बुभिः धौतश्च प्रक्षालितश्च। वाष्पाम्बुभिरिति पाठः समीचीनः। पतिविरहात् भोजने त्रिष्णातिशयः कामदेवोत्सवदर्शनेन नितरां पुष्टिं नीत इति भावः॥ ५९४ ॥

पलिच्चले इति ॥ ५९५ ॥

कम्बल इति ॥ ५९६ ॥

हा वत्सा इति। हा इति खेदे। पापस्य पापकारिणः मे मम वत्साः प्रियाः खरदूषणत्रिशिरसः! यूयं वध्याः स्थ भवथ। मयैव दुर्मन्त्रणया जनस्थाने स्थापिताः यूयं मत्पापेनैव रामेण हता इति भावः। हाहा पुनः पुनः खेदे

हा महत्सल ! वत्स ! रावण ! महत् पश्यामि ते सङ्कटं
वत्से ! नैकषि ! हा हतासि न चिरं त्रीन् पुत्रकान् द्रक्ष्यसि ॥५९७
पाषण्डेषु भैरवानन्दो यथा,—

दंसेमि तं पि ससिणं वसुहावतीसुं
थंभेमि तस्स वि रदस्स गईणहद्दे ।
आणेमि जक्खसुरसिद्धगणं गणाओ
तं णत्थि भूमिवलए सहजं ण सज्जं ॥

वैहासिकः क्रीड़नको विश्वास्यश्च विदूषकः ॥५९८॥

यथा,—

फुल्लुक्करं कलमकूरसमं वहन्ति
जे सिन्दुवारविड़आ महवल्लहा दे ।
जे गालितस्स महिसीदहिणो सरिच्छा
रूचन्ति सुहविअइल्लपसूणपुञ्जा ॥

मान्यः कलत्रवान् भुक्तविभवो गुणवान् विटः ॥५९९॥

स यथा,—

शकार ! किं प्रार्थनया प्रावारेण मिषेण वा ।
अकार्य्यवर्जं मे ब्रूहि किमभीष्टं करोमि ते ॥ ६०० ॥

द्विभावः । विभीषण ! त्वमपि कार्य्येण हेतुना मे मम हेयः परित्याज्यः स्थितः । हा महत्सल ! मत्प्रिय ! रावण ! ते तव महत् सङ्कटं विपद पश्यामि अवलोकयामि । हे वत्से नैकषि । रावणमातः ! हतासि मत्यापेन विनाशितासि । चिर दीर्घकालं त्रीन् पुत्रकान् रावणकुम्भकर्णविभीषणान् न द्रक्ष्यसि ॥ ५९७ ॥

दसेमि इति ॥ ५९८ ॥

फुल्लुक्करमिति ॥ ५९९ ॥

शकारेति । शकार ! राज्ञी रचितायाः कान्तायाः भ्राता शकार उच्यते तत्सम्बुद्धिः । उक्तञ्च साहित्यदर्पणे । मदमूर्खताभिमानी दुष्कुलतैश्वर्य्यसंयुक्तः । सोऽयमनूढाभ्राता राज्ञः श्यालः शकार उक्त इति । प्रावारेण गात्राच्छादनेन मिषेण

धात्रेयकादिश्चेटो यथा,—

चन्द्रापीड़ोऽथ सञ्जातपीडः कादम्बरीं प्रति।
प्राहिणोत् स्रस्तकेयूरः केयूरकमुपस्थितम् ॥ ६०१ ॥

पताकासु यथा,—

स्वात्मोपयोगिन्यन्योपयोगिन्यनुपयोगिनी।
पताकेत्यापताकेति प्रकरीति प्रकीर्त्यते ॥ ६०२ ॥

तासु पताका हनूमान् यथा,—

दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्द्धनः।
यस्य वीर्य्येण कृतिनो वयञ्च भुवनानि च ॥ ६०३ ॥

आपताकाप्रकर्य्यौ मारीचजटायुषौ यथा,—

रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ।

व्याजेन प्रावरणच्छलेन प्रार्थनया किम्? किं प्रयोजनमित्यर्थः। अकार्य्यवर्जम् अकर्त्तव्यं वर्जयित्वा इत्यर्थः पापं विनेति भावः ते तव किम् अभीष्टं करोमि सम्पादयामि ब्रूहि कथय ॥ ६०० ॥

चन्द्रापीड़ इति। अथानन्तरं चन्द्रपीड़ः सञ्जाता पीड़ा कादम्बरीविरहवचनश्रवणजनितेति भावः यस्य तथाभूतः स्रस्तकेयूरः विरहकार्श्यात् हस्तस्खलितकेयूराख्यालङ्कार इत्यर्थः कादम्बरीं प्रति उपस्थितं केयूरकं प्राहिणोत् प्रेषयामास ॥ ६०१ ॥

स्वात्मोपयोगिनीति। स्वस्य आत्मनः उपयोगिनी पताका अन्योपयोगिननी आपताका, अनुपयोगिनी प्रकरी इति कीर्त्यते कथ्यते ॥ ६०२ ॥

दिष्ट्येति। दिष्ट्या भाग्येन सोऽयं महाबाहुः दीर्घभुजः अञ्जनानन्दवर्द्धनः अञ्जनाख्या वानरी तस्या आनन्दवर्द्धनः तनयः हनूमान् प्राप्त इति शेषः यस्य अञ्जनानन्दवर्द्धनस्य वीर्य्येण बाहुबलेन वयञ्च कृतिनः कृतकार्य्या इत्यर्थः भुवनानि जगन्ति च कृतीनि इति शेषः जगतामुपद्रवरूपराक्षसवशध्वंसनादिति भावः। अत्र स्वात्मोपयोगित्वात् हनूमतः पताकात्वम् ॥ ६०३ ॥

रक्षसेति। स रावणः मृगरूपेण काञ्चनहरिणरूपधारिणा रक्षसा मारीचेन

जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥६०४॥

सहजा पूर्वजागन्तुः सखीह त्रिविधोच्यते ॥ ६०५ ॥

तासु लवङ्गिकादिः सहजा यथा,—

उज्ज्वलालोकया स्निग्धा त्वया त्यक्ता न राजते ।

मलीमसमुखी वर्त्तिः प्रदीपशिखया यथा ॥६०६॥

कामन्दक्यादिः पूर्वजा यथा,—

तथा विनयनम्रापि यथा मालत्युपायतः ।

नीता कतिपयाहोभिः सखीविश्रम्भसेव्यताम् ॥६०७॥

त्रिजटादिरागन्तुः यथा,—

जाणइ सिणेहभणिअं मा रअणिरित्तिमे जुउच्छसु वअणं ।

राघवौ रामलक्ष्मणौ वञ्चयित्वा प्रतार्य्य आश्रमात् निःसार्य्येति भावः पक्षीन्द्रस्य जटायुषः प्रयासेन संग्रामव्यापारेणेति यावत् क्षणं अल्पकालं विघ्नितः सञ्जातविघ्नः सन् सीता जहार हृतवान्। अत्र मारीचस्य मृगरूपत्वं अन्यस्य रावणस्य उपयोगायेति आपतकालम् पक्षीन्द्रस्य प्रयासो न कस्यापि उपयोगीति प्रकरीत्वम् ॥ ६०४ ॥

सहजेति। इहास्मिन् काव्ये इत्यर्थः सखी त्रिविधा उच्यते सहजा, पूर्वजा, आगन्तुरिति ॥ ६०५ ॥

उज्ज्वलेति। उज्ज्वलः आलोकः उद्द्योतः कान्तिरित्यर्थः अन्यत्र प्रभा यस्याः तथाभूतया त्वया त्यक्ता विरहिता स्निग्धा प्रेममयीत्यर्थः अन्यत्र तैल-पूर्णा सा इति शेषः प्रदीपशिखया त्यक्ता मलीमस मलिन मुख यस्याः तथाभूता वर्त्तिर्यथा वर्त्तिरिव न राजते न शोभते। अत्र लवङ्गिकायाः रत्नावल्याः स्वभाव-सहचारित्वात् सहजात्वम् ॥ ६०६ ॥

तथेति। तथा विनयेन तादृशेन सुशीलत्वादिना नम्रापि सौम्यापीत्यर्थः कतिपयाहोभिः कतिपयैर्दिवसैः उपायतः कौशलेन मया कामन्दक्या इति भावः सखीना विश्रम्भः विश्वासः तस्य सेव्यतां वाध्यतामित्यर्थः नीता। अत्र काम-न्दक्याः मालत्या जन्मनः प्रागेव तत्पित्रा सह सौहार्दवत्त्वात् पूर्वजात्वम् ॥ ६०७ ॥

उज्जाणम्मि वणम्मि अ जं सुरहिं तं लआण घेप्पइ कुसुमं ॥६०८

नायकगुणेषु महाकुलीनत्वं पुंसो यथा,—

वासिष्ठैः सुकृतोद्भवोऽध्वरशतैरस्त्यग्निकुण्डोद्भवः
भूपालः परमार इत्यधिपतिः सप्ताब्धिकाञ्चेर्भुवः।
अद्याप्यद्भुतहर्षगद्गदगिरो गायन्ति यस्योद्भटं
विश्वामित्रजयोर्जितस्य भुजयोर्विस्फूर्जितं गुर्जराः ॥६०९॥

औदार्य्यं यथा,—

दिङ्मातङ्गघटाविभक्तचतुरा घाटा मही साध्यते
सिद्धा सापि वदन्त एव हि वयं रोमाञ्चिताः पश्यत।
विप्राय प्रतिपाद्यते किमपरं रामाय तस्मै नमो
यस्मादाविरभूत्कथाद्भुतमिदं यत्रैव चास्तं गतम् ॥६१०॥

जानकीति ॥ ६०८ ॥

वासिष्ठैरिति। वासिष्ठैः वसिष्ठेन मुनिना अनुष्ठितैरित्यर्थः अध्वराणां यज्ञानां शतैः अग्निकुण्डोद्भवः यज्ञाग्निकुण्डोत्थितः सुकृतानां पुण्यानाम् उद्भवः क्षेत्रमित्यर्थः सप्ताब्धिकाञ्चेः सप्तसमुद्रमेखलायाः भुवः पृथिव्याः अधिपतिः परान् शत्रून् मारयतीति परमार इति प्रसिद्धः भूपालः अस्ति आसीदिति भूतसामीप्ये लट्-प्रयोगः। गुर्जराः गुर्जरदेशवासिनः अद्भुतेन विस्मयेन राज्ञो विक्रमगुणश्रवणजनितेनेति भावः हर्षगद्गदाः आनन्दाद्गस्फुटा गिरो वाचः येषां तथाभूताः सन्तः विश्वामित्रस्य वसिष्ठशत्रुभूतस्येति भावः जयेन अर्जितस्य उद्रिक्तवीर्य्यस्य यस्य भूपालस्य भुजयोः बाह्वोः विस्फूर्जितं विक्रान्तम् अद्यापि गायन्ति कीर्त्तयन्ति ॥६०९॥

दिङ्मातङ्गेति। दिङ्मातङ्गानां दिग्गजानां घटाभिः सङ्घैः विभक्ताः चत्वारः आघाटा सीमानः यस्याः सा चतुर्भिर्दिग्वर्त्तिभिः गजैः परिच्छिन्नसीमेत्यर्थः मही पृथिवी साध्यते विजयेन अधिक्रियते महावीरैरिति शेषः सा मही सिद्धापि स्वायत्तापीत्यर्थः सर्वभूभृद्विजयेनेति भावः वदन्त एव कीर्त्तयन्त एव हि वयं रोमाञ्चिताः हृष्टरोमाणः जाता इति शेषः पश्यत अवलोकयत यूयमिति शेषः विप्राय ब्राह्मणाय कश्यपायेति यावत् प्रतिपाद्यते प्रदीयते येनेति शेषः किमपरं वक्तव्यमिति शेषः यस्या लाभार्थं लोकाः प्राणानपि परित्यजन्ति ताम् अक्लेशेन यस्मै कस्मै-

महाभाग्यं यथा,—

दोर्निष्पेषविशीर्णवज्रशकलप्रत्युप्तरूढव्रणः
ग्रन्थ्युद्भासिनि भग्नमोघमघवन्मातङ्गदन्तोद्यमे।
भर्त्तुर्नन्दनदेवताविरचितस्रग्दाम्नि भूमेः सुता
वीरश्रीरिव तस्य वक्षसि जगद्वीरस्य विश्राम्यतु ॥६११॥

कृतज्ञता यथा,—

कृतककुपितैर्बाष्पाम्भोभिः सदैन्यविलोकितैः
वनमसि गता यस्य प्रीत्या धृतापि तथा त्वया।

चित् दातुं कः शक्नोतीति भावः तस्मै रामाय भार्गवाय नमः यस्मात् रामात् इदम् उक्तप्रकारदानीयमिर्थः कथाद्भुतम् अद्भुता अलोकसामान्या कथेत्यर्थः आविरभूत् उदतिष्ठदित्यर्थः, यत्रैव रामे एव अस्तं गतं नाशं प्राप्तं न अपरे एतत् कश्च कदापि शक्नुयात्तीति भावः ॥ ६१० ॥

दोरिति। दोष्णा बाहुना विशतेरिति भावः निष्पेषेण विमर्द्देन विशीर्णं चूर्णितं यत् वज्रम् इन्द्रप्रहितमिति भावः तस्य शकलैः खण्डैः यत् प्रत्युप्तं प्रविक्षिप्तं तेन रूढा जाताः व्रणाः क्षतानि तेषां ग्रन्थिभिः उत्तुङ्गचिह्नविशेषैरित्यर्थः उद्भासते राजते इति तथोक्ते,भग्नः खण्डितः अतएव मोघः व्यर्थतां गतः मघवतः इन्द्रस्य मातङ्गस्य ऐरावतस्य दन्तोद्यमः वेधनार्थमुद्यतदन्तइत्यर्थः यस्मिन् तथाभूते अतएव नन्दनस्य देवोद्यानस्य देवतया स्वर्गपराजयेन वशीकृतयेति भावः विरचिता विरचय्य दत्तेति यावत् स्रग्दाम कुसुममालानिचय इत्यर्थः यच्च तादृशे तस्य जगद्वीरस्य त्रिलोकैकवीरस्येत्यर्थः भर्त्तुः स्वामिनः रावणस्य वक्षसि भूमेः सुता सीता वीरश्रीरिव वीरलक्ष्मीरिव विश्राम्यतु इतस्ततश्चलबुद्धिं निरस्य विश्रामसुखमनुभवतु इत्यर्थः। जनकसभायां रावणदूतस्य उक्तिः ॥ ६११ ॥

कृतकेति। हे प्रिये! यस्य मम प्रीत्यै प्रीत्यर्थं कृतककुपितैः यदि मां त्वामनुयान्तीं निवारयसि तदा प्राणान् त्यक्ष्यामीत्येवं कोपप्रकाशकैरिति भावः सदैन्यविलोकितैः कातरविलोकनयुतैरित्यर्थः बाष्पाम्भोभिः अश्रुभिः उपलक्षणे तृतीया वनं गतासि प्राप्तासि येन मया सहेति शेषः, त्वया तथा

नवजलधरश्यामाः पश्यन् दिशो भवतीं विना
कठिनहृदयो जीवत्येव प्रिये! स तव प्रियः॥ ६१२॥

रूपसम्पद् यथा,—

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः।
आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः॥ ६१३॥

यौवनसम्पद् यथा,—

महोक्षतां वत्सतरः स्पृशन्निव द्विपेन्द्रभावं कलभः श्रयन्निव।
रघुः क्रमाद् यौवनभिन्नशैशवः पुपोष गम्भीरमनोहरं वपुः॥६१४

वैदग्ध्यसम्पद् यथा,—

कोऽयं भामिनि! भूषणं कितव! ते शोणः कथं? कुङ्कुमात्
कूर्पासान्तरितः प्रिये! विनिमयः पश्यापरं क्वास्ति मे।

प्रीत्या तादृशेनैव प्रणयेनेत्यर्थः धृतोऽपि रचितोऽपीत्यर्थः कठिनहृदयः निष्ठुरान्तःकरणः स तव प्रियः वल्लभः भवतीं त्वां विना त्वद्विरहेणापीत्यर्थः नवजलधरैः श्यामाः नूतनमेघोदयेन श्यामवर्णाः दिशः पश्यन् जीवत्येव प्राणान् धारयत्येव। नवजलधराणां तथा उद्दीपकत्वेऽपि त्वद्विरहे प्राणधारणमतीव कठिनहृदयत्वसूचकत्वात् मया त्वां प्रति नितरां निर्दयत्वमाचरितमिति भावः। रामस्य सीताविरहिण उक्तिः॥६१२॥

व्यूढ इति। व्यूढं विशालम् उरो वक्षस्थलं यस्य सः वृषस्येव स्कन्धो यस्य सः उन्नतांस इत्यर्थः शालस्तदाख्यसरुः तद्वत् प्रांशुः उन्नतकाय इत्यर्थः महान्तौ भुजौ यस्य स महाभुजः दीर्घबाहुरित्यर्थः अतएव आत्मनः स्वस्य कर्मणि क्षमं समर्थं देहं शरीरं आश्रितः क्षत्रस्य क्षत्रियजातेः अयं क्षात्रः धर्मः दुष्टनिग्रहशिष्टप्रतिपालनरूप इवेत्यर्थः स्थित इति शेषः॥ ६१३॥

महोक्षतामिति। रघुः क्रमात् उत्तरोत्तरक्रमेणेत्यर्थः यौवनेन भिन्नं निराकृतं शैशवं यस्य तथाभूतः नवयौवन इत्यर्थः सन् महोक्षतां महावृषत्वं स्पृशन् प्राप्नुवन् वत्सतर इव गोशावक इव द्विपेन्द्रभावं गजेन्द्रत्वं श्रयन् अधिकुर्वन् कलभः करिशावक इव गम्भीरं मनोहरञ्चेति गम्भीरमनोहरं गाम्भीर्येण रम्यमित्यर्थः वपुः शरीरं पुपोष दधार। गाम्भीर्यमनोहरमिति पाठान्तरम्॥ ६१४॥

पश्यामीत्यभिधाय सान्द्रपुलकौ मृद्नन् मृडान्याः स्तनौ
हस्तेन प्रतिनिर्जितेन्दुरवतात् द्यूते हसन् वो हरः ॥६१५॥

शौलसम्पद् यथा,—

का त्वं शुभे! कस्य परिग्रहो वा? किं वा मदभ्यागमकारणं ते?
आचक्ष्व मत्वा वशिनां रघूणां मनः परस्त्रीविमुखप्रवृत्ति ॥६१६

सौभाग्यसम्पद् यथा,—

असौ विद्याधारः शिशुरपि विनिर्गत्य भवनात्
इहायातः सम्प्रत्यविकलशरच्चन्द्रमधुरः ।

कोऽयमिति । हे भामिनि ! कान्ते ! अयं कः? इति प्रश्नः । हे कितव ! धूर्त्त ! ते तव भूषणम् अलङ्कारभूतश्चन्द्र इति भावः उत्तरमिदम् । शौणः रक्ताभ इत्यर्थः कथम्? चन्द्रस्य शुभतायां सिद्धायां कथं रक्तत्वमिति भावः, इति पुनः प्रश्नः । कुङ्कुमात् कुङ्कुमलेपनेन रञ्जनादिति भावः इति पुनरुत्तरम् । हे प्रिये ! कूर्पासान्तरितः कूर्पासेन स्तनावरणवाससा काञ्चुलीतिप्रसिद्धेनेति यावत् अन्तरितः आवृतः विनिमयः परिवर्त्तः मया द्यूते यदि पराजीयते तदा मम शिरस्थितः चन्द्रः त्वया प्राप्यते त्वया तु यदि पराजीयते तदा तव स्तनरूपश्चन्द्रः मया लभ्यते इत्येवं परिवर्त्त इत्यर्थः । इति पुनः प्रश्नः । पश्य अवलोकय अपरम् अन्यत् चन्द्रसदृशमित्यर्थः वस्त्विति शेषः मे मम क्व कुत्र अस्ति? नास्तीत्यर्थः तदयमेव मे पण इति भावः । उत्तरमिदम् । पश्यामि अवलोकयामि इत्यभिधाय कथयित्वा द्यूते पाशक्रीडायां प्रतिनिर्जितः इन्दुश्चन्द्रो येन तथाभूतो हरः शिवः हसन् हासं कुर्वन् सान्द्रपुलकौ घनरोमाञ्चौ प्रियस्पर्शजनितसत्त्वोदयादिति भावः मृडान्याः पार्वत्याः स्तनौ हस्तेन मृद्नन् अवतात् रक्षतु ॥ ६१५ ॥

का त्वमिति । हे शुभे ! भद्रे ! त्वं का? कस्य जनस्य परिग्रहः पत्नी वा? ते तव मम अभ्यागमस्य मदन्तिकागमनस्य कारणं किम्? वशिनां विजितेन्द्रियाणां रघूणां रघुवंशीयानां मनः चित्तं परस्त्रीषु परनारीषु विमुखा प्रवृत्तिः गतिः यस्य तथाभूतं मत्वा अवधार्य्य आचक्ष्व ब्रूहि ॥ ६१६ ॥

असाविति । असौ पुमानिति शेषः शिशुरपि बालकोऽपि भवनात् गृहात् विनिर्गत्य स्थानान्तरं गत्वेति यावत् विद्याधारः सर्वविद्याविभूषितः तथा अवि

यदालोकस्थाने भवति पुरमुन्मादतरलैः
कटाक्षैर्नारीणां कुवलयितवातायनमिव ॥ ६१७ ॥

मानिता यथा,—

यदात्थ कामं भवता स याच्यतामिति क्षमं नैतदनल्पचेतसाम्।
कथं प्रसह्याहरणैषिणां प्रियाः परानुवृत्त्या मलिनीकृताः
श्रियः ? ॥ ६१८ ॥

उदारवाक्यत्वं यथा,—

ख्याता एव वयं जगत्सु चरितैर्वाग्भिः किमाख्यायते ?
संयत्तो भव शक्तिरस्ति भवतः सत्यं मनुष्यो भवान्।
शस्त्रैरव्यवधीयमानयशसः प्रायो वयं तेषु चेत्
प्रायस्ते ननु सन्ति तेऽपि गिरयो यैर्वानराः शस्त्रिणः ॥ ६१९

कलः सम्पूर्णकल इत्यर्थः शरच्चन्द्रः शारदीयः शशधरः तद्वत् मधुरः मनोहरः सन् सम्प्रति इह अस्मिन् नगरे आयातः उपस्थितः। यस्य पुरुषस्य आलोकस्थाने दर्शनावसरे पुरं नगरं नारीणां महिलानाम् उन्मादेन उल्लासेन तरलाः चञ्चलाः तैः कटाक्षैः अपाङ्गविलोकनैः कुवलयितानि सञ्जातनीलोत्पलानि वातायनानि गवाक्षाः यस्य यच्च वा तत् भवति ॥ ६१७ ॥

यदिति। भवता त्वया स मत्प्रभुः किरातराज इति भावः याच्यतां प्रार्थ्यतां शरीऽयमिति शेषः इति यत् आत्थ ब्रवीषि ? एतत् याचनमित्यर्थः अनल्पचेतसां मनस्विनां न क्षमं न योग्यं न उचितमित्यर्थः। अक्षमत्वे हेतुमाह कथमिति प्रसह्य बलात् आहरणं लाभम् इच्छन्तीति तथोक्तानां बलवतामिति यावत् परस्य अनुवृत्त्या सेवया प्रार्थनारूपयेति भावः मलिनीकृताः मालिन्यं नीताः श्रियः सम्पदः कथं केन प्रकारेण प्रियाः ? प्रीतिकर्त्र्यः ? न कथमपीत्यर्थः ॥ ६१८ ॥

ख्याता इति। वयं जगत्सु त्रिलोकीषु चरितैः विक्रमादिभिरिति भावः ख्याताः प्रसिद्धा एव। वाग्भिः वाक्यैः किम् आख्यायते ? कथ्यते ? वाचा स्वप्रशंसनं महतां न उचितमिति भावः। भवान् सत्यं यथार्थतः मनुष्यः पुरुषकारसम्पन्नो मानव इत्यर्थः भवतः तव शक्तिः सामर्थ्यं वीर्यमित्यर्थः अस्ति वर्त्तते। संयत्तः

स्थिरानुरागिता यथा,—

ततः कैरप्युक्ते परिणयविधौ काष्ठमुनिभिः
पुराणैरातङ्कग्लपितहृदयेन क्षितिभृता ।
विना वाचं नैतत् क्षममिति निधायाननमधः
पतद्बाष्पाम्भोभिर्निखिलमिव दत्तं प्रतिवचः ॥ ६२० ॥

नायिकागुणेषु स्त्रिया महाकुलीनता यथा,—

मानुषीभ्यः कथं वा स्यादस्य रूपस्य सम्भवः ? ।
न प्रभातरत्नं ज्योतिरुदेति वसुधातलात् ॥ ६२१ ॥

सज्जितः भव । वयं प्रायः बाहुल्येन शस्त्रैः परेषामिति शेषः न व्यवधीयमान न तिरस्क्रियमाणं यशो येषां तथाभूताः शस्त्रबलेन कैरपि वयं न निर्जेतुं शक्या इति भावः । तेषु शस्त्रैरव्यवधीयमानयशःसु अस्मासु इति शेषः चेत् यदि ते तव प्रायः प्रयास इत्यर्थः अस्माभिः सह युद्धार्थमुद्यम इति यावत् ननु भोः । तदा यैः गिरिभिः पर्वतैः वानराः त्वदनुचरा इति भावः शस्त्रिणः शस्त्रवन्तः वानराहि पर्वतखण्डैर्युध्यन्ते इति भावः ते गिरयोऽपि सन्ति विद्यन्ते । अतस्तैरेव वानरवत् अस्माभिः सह युध्यस्वेति भावः ॥ ६१९ ॥

तत इति । ततः अनन्तरं कैरपि पुराणैः वृद्धैरित्यर्थः काष्ठानीव कठिना मुनयः काष्ठमुनयः तैः प्रेममर्मानभिज्ञैः मुनिभिरित्यर्थः परिणयविधौ पुनर्दारग्रहणव्यापारे इत्यर्थः उक्ते कर्त्तव्यतया कथिते सति क्षितिभृता राज्ञा रामेणेति शेषः आतङ्केन आशङ्कया तत् प्रस्तावेन पूर्वानुरागव्यत्ययकारिणा जनितयेति भावः ग्लपितं ग्लानिं नीतं हृदयं यस्य तथाभूतेन सता विना वाचं वाक्योत्तर विनेत्यर्थः आननं वदनम् अधो निधाय अधोमुखीभूयेत्यर्थः पतद्भिः चरद्भिः प्रियायाः स्मरणादिति भावः बाष्पाम्भोभिः अश्रुभिः न एतत् पुनर्दारग्रहणमिति भावः क्षमं युक्तम् इति निखिलं सम्यगित्यर्थः प्रतिवचः प्रत्युत्तरवचन दत्तमिव । एतेन अस्य पूर्वप्रियायां स्थिरानुरागित्वं सूचितम् ॥ ६२० ॥

मानुषीभ्य इति । मानुषीभ्यः मानवजातीयाभ्यः स्त्रीभ्यः अस्य रूपस्य मूर्त्तेः सौन्दर्यस्य वा सम्भवः कथं केन प्रकारेण वा स्यात् ? न केनापि प्रकारेण स्यादि-

औदार्य्यं यथा,—

भ्रूभेदे सहसोद्गतेऽपि वदनं नीतं परां नम्रताम्
ईषत् मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्वाष्पजडीकृतं प्रभुतया चक्षुर्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः ॥६२२॥

महाभाग्यं यथा,—

तां नारदः कामचरः कदाचित् कन्यां किल प्रेक्ष्य पितुः समीपे।
समादिदेशैकवधूं भवित्रीं प्रेम्णा शरीरार्द्धहरां हरस्य ॥६२३॥

कृतज्ञता यथा,—

पुरिससरिसं तुह इमं रक्खससरिसं कअं णिसाअरवइणा।
कह ता चिन्तिआसुलहं महिलासरिसं ण संपड़इ मे मरणं ६२४

त्यर्थः। प्रभया तरलम् उज्ज्वल ज्योतिः वसुधातलात् पृथिवीतलात् न उदेति न उत्पद्यते ॥ ६२१ ॥

भ्रूभेदे इति। भ्रूवोर्भेदे भङ्गे सहसा उद्गतेऽपि जातेऽपि वदनं मुखं परां नम्रताम् अधोवर्त्तितामित्यर्थः नीत प्रापितम्। उद्गते इत्यत्र कृते इति पाठान्तरम्। मां प्रति ईषत् अल्पं भेदकारि कोपप्रकाशकमिति भावः हसितं हासः कृत-इत्यर्थः। निष्ठुरं परुषं वचः वाक्यं न उक्त न कथितम्। प्रभुतया निज-प्रभावेण अन्तर्वाष्पेण अन्तर्गतेन अश्रुणा जड़ीकृतं जाड्यं नीत चक्षुः न विस्फा-रित न उन्मीलितम्। अतएव दयितया प्रियया कोपश्च प्रकटीकृतः प्रकाशितः प्रश्रयः विनयश्च न मुक्तः न त्यक्तः ॥ ६२२ ॥

तामिति। कदाचित् कस्मिंश्चित् समये कामचरः स्वेच्छाविहारी नारदः तां पार्वतीं पितुः हिमाद्रेः समीपे प्रेक्ष्य दृष्ट्वा किलेति प्रसिद्धौ प्रेम्णा प्रणयाति-शयेन हरस्य शरीरार्द्धहरां विच्छेदाशङ्कया अर्द्धशरीरभागिनीम् एकामद्वितीयां वधूं भार्य्यां भवित्रीं भाविनीं समादिदेश समादिष्टवान् कथयामासेत्यर्थः। तदेषा महाभाग्यशालिनी इत्यस्या महाभाग्यत्वम् ॥ ६२३ ॥

पुरिस इति ॥ ६२४ ॥

रूपसम्पद् यथा,—

आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः ।
उपमानस्यापि सखे ! प्रत्युपमानं वपुस्तस्याः ॥ ६२५ ॥

यौवनसम्पद् यथा,—

उन्मीलितं तूलिकयेव चित्रं सूर्य्यांशुभिर्भिन्नमिवारविन्दम् ।
बभूव तस्याश्चतुरस्रशोभि वपुर्विभक्तं नवयौवनेन ॥ ६२६ ॥

वैदग्ध्यसम्पद् यथा,—

एकत्रासनसङ्गतिः परिहृता प्रत्युद्गमाद् दूरतः
ताम्बूलानयनच्छलेन रभसाश्लेषोऽपि संविघ्नितः ।
आलापोऽपि न मिश्रितः परिजनं व्यापारयन्त्याऽन्तिके
कान्तं प्रत्युपचारतश्चतुरया कोपः कृतार्थीकृतः ॥६२७॥

आभरणस्येति । हे सखे ! तस्याः रमण्याः वपुः शरीरम् आभरणस्य अलङ्कारस्य आभरणम् अलङ्कारः प्रसाधनविधेः अलङ्करणविधानस्य प्रसाधनविशेषः अलङ्करणविशेषः । उपमानस्य चन्द्रपद्मादेः प्रत्युपमानं प्रतिरूपमुपमानम् । तस्या अङ्गम् अलङ्कारं हाराङ्गदादिकम् अलङ्करोति, प्रसाधनं प्रसाधयति उपमानं चन्द्रादिकम् उपमिमीते इत्यर्थः ॥ ६२५ ॥

उन्मीलितमिति । तस्याः पार्वत्याः वपुरङ्गं तूलिकया उन्मीलितं प्रकटितं चित्रमिव, सूर्य्यांशुभिः रविकिरणैः भिन्नं विकासितम् अरविन्दमिव पद्ममिव नवयौवनेन विभक्तं विभज्य यथायथं विरचितमित्यर्थः सत् चतुरस्रशोभि सर्वतः शोभमानमित्यर्थः बभूव ॥ ६२६ ॥

एकत्रेति । चतुरया निपुणया कयाचित् कान्तया उपचारतः व्याजात् कान्तं प्रियं प्रति कोपः कृतार्थीकृतः सफलीकृतः कथमपि प्रकटीकृत इति यावत् तथाहि दूरतः दूरात् प्रत्युद्गमात् उत्थायाभिनन्दनात् एकत्र एकस्मिन् आसने सङ्गतिः सम्मेलनं कान्तेनेति भावः सस्थितिरिति पाठान्तरं परिहृता परित्यक्ता । रभसेन वेगेन हर्षेण वा आश्लेषः आलिङ्गनमपि ताम्बूलस्य आनयनमेव छलं तस्मात् ताम्बूलम् आनयामीति व्याजेनेत्यर्थः संविघ्नितः सञ्जातविघ्नः कृतः व्याहत इत्यर्थः । अन्तिके

शीलसम्पद् यथा,—

चतुरघरिणी पिअदंसणाअ वाला पउत्थवइआअ।
असरसअज्जिआ उग्गआअ णहु खण्डिअं सीलं ॥६२८॥

सौभाग्यसम्पद् यथा,—

सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥ ६२९ ॥

मानिता यथा,—

शैलात्मजाऽपि पितुरुच्चिरसोऽभिलाषं
व्यर्थं समर्थ्य ललितं वपुरात्मनश्च।
सख्योः समक्षमिति चाधिकजातलज्जा
शून्या जगाम भवनाभिमुखं कथञ्चित् ॥ ६३० ॥

समीपे कान्तस्येति भावः परिजनं दास्यादिकमित्यर्थः व्यापारयन्त्या प्रेषयन्त्या सत्या आलापोऽपि सङ्घयनमपि न मिश्रितः प्रतिवचनादिना न मिश्रीकृत इत्यर्थः ॥ ६२७ ॥

चतुर इति ॥ ६२८ ॥

सञ्चारिणीति। सा पतिं वृणोतीति पतिंवरा स्वयंवरा इन्दुमती रात्रौ सञ्चारिणी इतस्ततः सञ्चरणं कुर्वती दीपशिखेव यं य भूमिपालं व्यतीयाय परिजहारेत्यर्थः सः सः भूमिपालः राजा नरेन्द्रमार्गाट्ट इव राजपथवर्त्ती हर्म्य इव विवर्णभावं मलिनत्वं प्रपेदे प्राप ॥ ६२९ ॥

शैलेति। शैलात्मजापि पार्वती अपि उच्चिरसः उन्नतशृङ्गस्य हरो मे जामाता भविष्यति इति उन्नतं शिरो मे भविता इति महान्तमाशयमास्थितस्य च इति भावः पितुः हिमालयस्य अभिलाषं सङ्कल्पम् आत्मनः स्वस्य ललितं सुन्दरं मनोहरमित्यर्थः ललितं त्रिषु सुन्दरमिति त्रिकाण्डशेषः। वपुः शरीरञ्च व्यर्थं विफलं समर्थ्य सम्भाव्य सख्योः जयाविजययोः समक्षं चक्षुःसमीपे मदयेम् एतद् मदनदहनरूप घटनमिति च हेतोः अधिकं यथा तथा जाता लज्जा यस्याः तथाभूता अतएव शून्या सर्वमन्धकारमिव पश्यन्ती इति भावः कथञ्चित् अतिक्लेशेन भवनाभिमुखं गृहाभिमुखं जगाम भवनाभिमुखीति पाठान्तरम् ॥ ६३० ॥

उदारवाक्यत्वं यथा,—

यथा श्रुतं वेदविदां वर ! त्वया जनोऽयमुच्चैः पदलङ्घनोत्सुकः ।
तपः किलेदं तदवाप्तिसाधनं मनोरथानामगतिर्न विद्यते॥६३१

स्थिरानुरागिता यथा,—

अलं विवादेन यथा श्रुतं त्वया तथाविधस्तावदशेषमस्तु सः ।
ममात्र भावैकरसं मनः स्थितं न कामवृत्तिर्वचनीयमीक्षते॥६३२

पाकभक्तिषु आदौ अस्वादु अन्ते स्वादु मृद्वीकापाकं यथा,—

प्राक् कामं दहता कृतः परिभवो येनाथ सम्भावनतौ
सेर्ष्या वोऽवतु चण्डिका चरणयोस्तं पातयन्ती पतिम् ।

यथेति । हे वेदविदां वर । वेदज्ञप्रवर । त्वया यथा श्रुतम् आकर्णितं तथेति शेषः अयं जनः अतिसामान्य इति भावः उच्चैः पदस्य शिवरूपस्येति भावः लङ्घने आक्रमणे प्राप्ताविति यावत् उत्सुकः उत्कण्ठितः अभिलाषीति यावत् । इदं तपः व्रताचरणं तस्य पदस्य अवाप्तेः प्राप्तेः साध्यते अनेनेति साधनं कारणं किल इति अलीके । एतेन तपसा तत्प्राप्तिर्वृथा सम्भाव्यते इति भावः तर्हि निवृत्त्यतामित्याशयेन दुराशा मां न मुञ्चतीत्याह मनोरथानाम् अभिलाषाणाम् अगतिः अगम्यस्थानमित्यर्थः न विद्यते नास्ति ॥ ६३१ ॥

अलमिति । विवादेन कलहेन आवयोरिति शेषः अलं वृथा, विवादो निरर्थक इत्यर्थः अलं व्यर्थसमर्थयोरित्यमरः । त्वया यथा श्रुत स हरः तावत् अशेषं समग्रं यथा तथा तथाविधः तादृशः अस्तु तिष्ठतु । अत्र अस्मिन् हरे मम मनः भावैकरसं प्रेमैकप्रवणं सत् स्थितं निश्चलतया अवस्थितम् । अयोग्यवासना इयं लोकेषु गर्हणीयतामादधातीत्यत्राह नेति । कामवृत्तिः स्वेच्छाविहारी वचनीयं लोकनिन्दां न ईक्षते न पश्यति न गणयतीत्यर्थः तदहं स्वेच्छया विचरामीति न मे लोकवादाशङ्केति भावः ॥ ६३२ ॥

पाकभक्तिषु इति पाकविभागेषु इत्यर्थः ।

पागति । प्राक् पूर्वं येन हरेण कामं दहता भस्मीकुर्वता सता परिभवः अवमानना नारीणामिति शेषः कृतः, सम्भावनतौ सम्भावन्दनार्थं प्रणतौ सत्यां

कुर्वन्त्याभ्यधिकं कृते प्रतिकृतं मुक्तेन मौलौ मुहुः
वाष्पेणाहृतकज्जलेन लिखितं लक्ष्मेव चन्द्रे यया ॥६३३॥

आद्यन्तयोः स्वादु नारिकेलीरीतिपाकं यथा,—

जह इच्छा तह रमिअं जाआ पत्ता पइं गआ धूआ।
घरसामिअस्स अस्स अज्ज विसो को उहच्छाइ अच्छीइम् ॥६३४॥

आदिमध्यान्तेषु स्वादु स्वादुतरं स्वादुतममिति आम्रपाकं यथा,

शापादसि प्रतिहता स्मृतिलोपरूक्षे
भर्त्तर्य्यपेततमसि प्रभुता तवैव।
छाया न मूर्च्छति मलोपहतप्रसादे
शुद्धे तु दर्पणतले सुलभावकाशा ॥ ६३५ ॥

सेर्ष्या परनारीभूता सन्ध्यामेघः प्रणमतीति ईर्ष्याकलुषितेत्यर्थः अतएव चरणयोः तं परिभवकारिणमित्यर्थः पतिं हरं पातयन्ती अपराधक्षालनार्थमिति भावः चण्डिका गौरी वः युष्मान् अवतु रक्षतु। यया चण्डिकया कृते अपराधे इति शेषः अभ्यधिकम् अपराधापेक्षया बहुतरमित्यर्थः प्रतिकृतं प्रतीकारं चरणपातनादिरूपमिति भावः कुर्वन्त्या सत्या मौलौ चरणपतितस्य हरस्य धम्मिल्ले मुक्तेन त्यक्तेन पातितेनेति भावः आहृतं कज्जलं यत्र तादृशेन कज्जलमलिनेनेति यावत् आततकज्जलेनेति पाठान्तरम्। वाष्पेण अश्रुणा चन्द्रे तत्सन्निहितललाटवर्त्तिनीति भावः लक्ष्मेव कलङ्क इव लिखितम् अर्पितमित्यर्थः ॥ ६३३ ॥

जह इति ॥ ६३४ ॥

शापादिति। भर्त्तरि पत्यौ शापात् दुर्वाससः इति शेषः स्मृतेः स्मरणस्य लोपेन अपगमेन रूक्षः दारुणः निराकरणादिति भावः तस्मिन् सति प्रतिहतासि निराकृतासि। इदानीम् अपेततमसि शापावसानात् विगतमोहे भर्त्तरि सति तवैव न तु अन्यस्या इत्येवकारार्थः। प्रभुता प्रभुत्वं त्वत्परायण एव भर्त्ता भवेदिति भावः मलेन पांश्वादिना उपहतः नाशितः प्रसादः वैशद्यं यस्य तथाभूते दर्पणतले आदर्शतले छाया प्रतिबिम्बं न मूर्च्छति न प्रतिभाति शुद्धे स्वच्छे तु सुलभः.

यत् नापैति न चातिशोभते तत् नीलीरागं यथा,—

हित्वा सीतां दवमुखरिपुर्नोपयेमे यदन्यां
तस्या एव प्रतिकृतिसखो यत् क्रतूनाजहार।
वृत्तान्तेन श्रवणविषयप्रापिणा तेन भर्त्तुः
सा दुर्वारं कथमपि परित्यागदुःखं विषेहे ॥६३६॥

यदपैति च शोभते च तत् कुसुम्भरागं यथा,—

वहुवल्लहस्स ण होइ वल्लहा कह पि पञ्चदिअहाइम्।
सा किं छन्दं मग्गइ कन्तो मिच्छं च वहुआ च ॥६३७॥

यत् नापैति अपि च शोभते तत् मञ्जिष्ठारागं यथा,—

वेवइ जस्स सव्विड़िअं वलिअं महइ पुलआइअत्थणकलसं।
पेम्मसहावविसुसिअं दुवीआवकासगमणोसुअं वामाइं ॥६३८॥

सुप्रापः अवकाशः स्थितिः यया तथाभूता भवतीति शेषः विशुद्धे दर्पणतले प्रतिबिम्बं सुष्ठु प्रतिभासते एवेत्यर्थः ॥ ६३५ ॥

हित्वेति। दशमुखरिपुः दशाननहन्ता रामः सीतां हित्वा परित्यज्य यत् अन्याम् अपरां कान्तां न उपयेमे न परिणीतवान्, तथा तस्याः सीतायाः एव प्रतिकृतिसखः प्रतिमूर्त्तिद्वितीय इत्यर्थः यत् क्रतून् यज्ञान् आजहार अनुष्ठितवान् सस्त्रीको धर्ममाचरेदिति श्रुतेर्यज्ञादिषु सपत्नीकत्वस्मरणात्। तेन श्रवणविषयप्रापिणा श्रुतिपथं गतेन भर्त्तुः वृत्तान्तेन व्यवहारेण सा सीता दुर्वारमपि वारयितुमशक्यमपि परित्यागदुःखं विषेहे सोढवती ॥ ६३६ ॥

बहु इति ॥ ६३७ ॥

वेपते यस्य सव्रीडं वलितं महत्पुलकाचितस्तनकलसम्।
प्रेमस्वभावविसुषितं द्वितीयावकाशगमनोत्सुकं वामार्द्धम् ॥

वेपते इति। यस्य हरगौरीरूपस्येति भावः वामार्द्धं गौर्य्या वामभाग इत्यर्थः महता अतिशयितेन पुलकेन कान्तदेहसङ्गजनितेनेति भावः पुलकेन वलितं त्रिवलीयुतमित्यर्थः रोमाञ्चेन आचितः व्याप्तः आपूरित इत्यर्थः स्तनः कलस-

अव्यलीकं निर्व्याजं यथा,—

किं कण्ठे शिथिलीकृतो भुजलतापाशः प्रमादात् मया ?
निद्रोच्छेदविवर्त्तनेष्वभिमुखं नाद्यासि सम्भाषिता ? ।
अन्यस्त्रीजनसङ्कथालघुरहं स्वप्ने त्वया वीक्षितः ?
दोष पश्यसि किं प्रिये ! परिजनोपालम्भयोग्ये मयि ? ॥६४१॥

धर्मानुबन्धि धर्मोदर्कं यथा,—

अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ।
मुनिवनतरुच्छायां देव्या तया सह शिश्रिये
गलितवयसामिक्ष्वाकूणामिदं हि कुलव्रतम् ॥६४२॥

जगत् शून्यं जायते इति उक्ता असि कथितासि । सोऽयं तव प्रियतमः दम्भेन अहङ्कारविशेषेण धृतं व्रत तपोविशेषः येन तथाभूतः सन् किं कर्त्तुम् अभ्युद्यतः ? प्रवृत्तः ? । त्वां त्यक्त्वा व्रतच्छलेन अपगच्छतीति भावः ॥ ६४० ॥

किमिति । मया प्रमादात् अनवधानतः कण्ठे मदीये भुजलतापाशः लदर्पित इति शेषः किं शिथिलीकृतः शैथिल्यं नीतः ? । निद्राया उच्छेदे विरतौ यानि विवर्त्तनानि पार्श्वपरिवर्त्तनानि तेषु सत्सु अद्य अभिमुख यथा तथा न सम्भाषितासि नालपितासि ? । त्वया अन्येन स्त्रीजनेन सङ्कथया समालपनेन लघुः क्षुद्रः अहं स्वप्ने वीक्षितः ? दृष्टः ? हे प्रिये ! परिजनस्य सामान्यभृत्यवर्गस्य उपालम्भः तिरस्कारः तस्य योग्यः तदर्हः इत्यर्थः तस्मिन् मयि किं दोषं पश्यसि ? तस्मात् निरपराधे मयि त्व प्रसीदेति भावः ॥ ६४१ ॥

अथेति । अथानन्तरं स दिलीपः विषयेभ्यः सकृच्चन्दनादिभोगवस्तुभ्यः व्यावृत्तः आत्मा चित्तं यस्य तथाभूतः विगतभोगस्पृह इत्यर्थः सन् यूने तरुणाय सूनवे पुत्राय राघवे यथाविधि यथाशास्त्रं नृपतिककुदं राजचिह्नं सितातपवारणं श्वेतच्छत्रं दत्त्वा पुत्रं राज्ये अभिषिच्येति भावः तया देव्या महिष्या सुदक्षिणया सह मुनिवनस्य तपोवनस्येत्यर्थः तरुच्छायां शिश्रिये आश्रितवान् तपोवनं जगामेत्यर्थः । हि यतः गलितवयसां गतायुषामिति यावत् इक्ष्वाकूणाम् इक्ष्वाकुवंशीयानाम् इदं योग्यपुत्रे राज्यभारार्पणपुरःसरतपोवनाश्रयणमिति भावः कुलव्रतं वंशनियमः ॥ ६४२ ॥

अर्थानुबन्धि अर्थोदर्कं यथा,—

भूत्वा चिराय सदिगन्तमहीसपत्नी
दौष्यन्तिमप्रतिरथं तनयं प्रसूय।
तस्मिन्निवेशितभरेण सहैव भर्त्रा
शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन्॥ ६४३॥

यत् पुनः काममेवानुबध्नाति तत् कामोदर्कं यथा,—

अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्य्यो रसः।
कालेनावरणात्ययात् परिणतेर्यत् स्नेहसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत् प्रार्थ्यते॥६४४॥

नानालङ्कारसंसृष्टैः प्रकाराश्च रसोक्तयः। इत्युक्तम्, तत्र अलङ्कारसंसृष्टैः इत्येव वक्तव्ये नानालङ्कारग्रहणं गुणरसानामुपसंग्रहार्थम्, तेषामपि हि काव्यशोभाकरत्वेन अलङ्कारत्वात्।

भूत्वेति। चिराय दीर्घकालं सदिगन्तमह्नाः दिगन्तसहितायाः पृथिव्या इत्यर्थः सपत्नी समानपतिका भूत्वा दौष्यन्तिं दुष्यन्तस्य इमम् अप्रतिरथं अप्रतिबलमित्यर्थः तनयं पुत्रं प्रसूय उत्पाद्य तस्मिन् पुत्रे सन्निवेशितः संस्थापितः भरः राज्यभारः येन तथाभूतेन भर्त्रा स्वामिना सहैव शान्ते अस्मिन् आश्रमपदे पुनः पदं स्थानम् अवस्थितिमित्यर्थः करिष्यसि॥ ६४३॥

अद्वैतमिति। सुखदुःखयोः सुखावस्थायाञ्च यत् अद्वैतम् अभिन्नं तथा सर्वासु अवस्थासु यत् अनुगुणम् अनुकूलम्। यत्र हृदयस्य अन्तरिन्द्रियस्य विश्रामः शान्तिः, यस्मिन् जरसा वार्द्धकेनापि रसः प्रीतिः अहार्य्यः हर्त्तुमशक्यः कालेन दीर्घकालसहवासेनेति भावः आवरणस्य लज्जादेः अत्ययात् अपगमात् यत् परिणते परिपाकं गते स्नेहसारे स्थितं परिणतस्नेहसाररूपेण तिष्ठतीत्यर्थः वर्त्तमाने क्तप्रत्ययः। तत् एकमद्वितीयं भद्रं साधु सुमानुषस्य सुजनस्य प्रेम प्रियता कथमपि प्राप्यते लभ्यते। एतादृक् प्रेमातीव विरलमिति भावः॥ ६४४॥

यदाह,—

काव्यशोभाकरान् धर्मान् अलङ्कारान् प्रचक्षते।
ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति ॥६४५
काश्चित् मार्गविभागार्थमुक्ताः प्रागप्यलङ्क्रियाः।
साधारणमलङ्कारजातमन्यत् प्रदर्श्यते ॥

तत्र काव्यशोभाकरान् इत्यनेन श्लेषोपमादिवद् गुणरसभावतदाभासप्रशमादीनपि उपगृह्णाति। मार्गविभागकृद्गुणानामलङ्क्रियोपदेशेन श्लेषादीनां गुणत्वमिव अलङ्कारत्वमपि ज्ञापयति ॥ ६४६ ॥

श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ॥
इति वैदर्भमार्गस्य प्राणा दश गुणाः स्मृताः।
तेषां विपर्य्ययः प्रायो लक्ष्यते गौड़वर्त्मनि ॥

इति श्लेषादीनां दशानामेव मार्गप्रविभागकारितां ब्रुवन् काव्यशोभाकरत्वेन गुणान्तराणामपि अलङ्कारत्वमुप-

---

काव्येति। काव्यस्य शोभां चारुतामित्यर्थः कुर्वन्ति जनयन्ति इति तान् धर्मान् विषयभेदान् अलङ्कारान् प्रचक्षते कथयन्ति कवय इति शेषः। अद्यापि ते अलङ्काराः विकल्प्यन्ते विभिद्यन्ते। को जनः कार्त्स्न्येन साकल्येन तान् वक्ष्यति ? न कोऽपीत्यर्थः ॥ ६४५ ॥

काश्चित् इति। काश्चित् अलङ्क्रियाः अलङ्काराः प्रागपि पूर्वमपि मार्गस्य रीतिविशेषस्य विभागार्थं भेदार्थम् उक्ताः कथिताः। अन्यत् मार्गाद्भिन्नमित्यर्थः साधारणं सामान्यम् अलङ्कारजातं प्रदर्श्यते प्रकाश्यते ॥

तत्रेति। श्लेष उपमा इत्यादयो यथा अलङ्काराः तथा गुणरसभावादयोऽपि अलङ्कारत्वेन परिगृह्यन्ते इति भावः ॥ ६४६ ॥

श्लेष इति। श्लेषादयो दश वैदर्भमार्गस्य वैदर्भ्या रीतेः प्राणाः जीवनभूताः

कल्पयति । तदाह, कस्तां कार्त्स्न्येन वक्ष्यति युक्तमिदमुक्तम् । अयुक्तन्त्विदमुक्तं रसानामलङ्कारता इति । तेषां गुणानामिव अलङ्कारव्यपदेशाभावात् नायुक्तम् । युक्तोत्कर्षाणामूर्जस्विरसवत् प्रेयसामलङ्कारेषु उपदेशात् ॥६४७॥

तद् यथा,—

प्रेयः प्रियतराख्यानं रसवद् रसपेशलम् ।
ऊर्जस्वि रूढ़ाहङ्कारं युक्तोत्कर्षञ्च तत् त्रयम् ॥६४८॥

तत्र ऊर्जस्वि रूढ़ाहङ्कारमित्यनेन आत्मविशेषनिष्ठस्य उत्कृष्टजन्मनोऽनेक-जन्मानुभवसंस्कारा हि तद्रूढ़िम्नः संग्रामे गुणसम्पदुत्पातातिशयहेतोरलङ्कारविशेषस्य उपसंग्रहादहङ्काराभिमानशृङ्गारापरनाम्नो रसस्य मानमयविकाररूपेण अभिमानिनां मनसि जाग्रतः परां कोटिमुपवर्णयति । रसवद्रसपेशलमित्यनेन विभावानुभावव्यभिचारिसात्त्विकसंयोगाद्रसनिष्पत्तिरिति रत्यादिरूपेण अनेकधा आविर्भवतोऽभिवर्द्धमानस्य परप्रकर्षगामिनः शृङ्गारस्य मध्यमावस्थां सूचयति ॥६४९॥

गुणाः स्मृताः कथिताः । गौड़वर्त्मनि गौड़ीमार्गे प्रायः बाहुल्येन तेषां दशानां श्लेषादीनां विपर्य्ययः वैपरीत्यं लक्ष्यते दृश्यते ॥ ६४७ ॥

प्रेय इति । प्रियतरं अतीव प्रीतिजनकमित्यर्थः आख्यानं कथनं प्रेयः, रसेन पेशलं समुज्ज्वलमित्यर्थः आख्यानं रसवत्, रूढः प्रदीप्तः अहङ्कारः गर्वः आख्यानम् ऊर्जस्वि, तत् उक्तमित्यर्थः त्रयं युक्त उत्कर्षो यस्मिन् तथाभूतम् उत्कर्षवदित्यर्थः ॥ ६४८ ॥

तत्रेति । आत्मनो विशेषः वैलक्षण्यं तन्निष्ठस्य तद्वृत्तेः । उत्कृष्टात् अदृष्टात् जन्म यस्य तथाभूतस्य शुभादृष्टसमुत्पन्नस्येति यावत् । अनेकेषु सुजन्म योऽनुभवः

प्रेयः प्रियतराख्यानमित्यनेन समस्तभावमूर्द्धाभिषिक्तायाः रतेः परप्रकर्षाधिगमाद् भावनाभिगमे भावरूपतामुल्लङ्घ्य प्रेम रूपेण परिणताया उपादानाद् भावान्तराणामपि परप्रकर्षाधिगमे रसरूपेण परिणतिरिति ज्ञापयन् अलङ्कारस्य उत्तरां कोटिमुपलक्षयति। सर्वेषामपि हि रत्यादिप्रकर्षाणां रतिप्रियः, रणप्रियः, परिहासप्रियः, अमर्षप्रिय इति प्रेम्णि एव पर्य्यवसानं भवति। युक्तोत्कर्षञ्च तत् त्रय मित्यनेन अयुक्तोत्कर्षाणां त्रयाणामप्यूर्जस्विप्रभृतीनां गुणत्वमेव नालङ्कारत्वमित्यवस्थापयति। तथाहि, और्जित्यं भाविकं प्रेय इति गुणेषु भण्यते, कुतः पुनरिदमेकदा ऊर्जस्विरसवत्प्रेयसामलङ्कारत्वमन्यदा गुणत्वम्, उच्यते ॥ ६५० ॥

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥

यथा, गोमान् देशः, वाचालो वटुः, वाग्मी विपश्चित्,

आस्वादविशेषः तस्य संस्कारेण आहितः जनितः द्रढिमा दार्ढ्यं यस्य तथोक्तस्य। अहङ्कारेति। अहङ्कारः अभिमानः शृङ्गार इति अपराणि नामानि यस्य तथाभूतस्य। परां महतीं कोटिम् उत्कर्षमिति भावः। उपवर्णयति कविरिति शेषः। रसवदिति आविर्भवतः प्रकाशमानस्य अभिवर्द्धमानस्य अभितो वृद्धिं गच्छतः परप्रकर्षगामिनः परमोत्कर्षं प्राप्तस्य ॥ ६४९ ॥

प्रेयः प्रियतराख्यानमिति। समस्तभावाना मूर्द्धाभिषिक्तायाः शिरसि स्थिताया इत्यर्थः परप्रकर्षाधिगमात् परमोत्कर्षावबोधनादित्यर्थः भावनाभिगमे पर्य्यालोचनायामित्यर्थः भावरूपतां भावस्वरूपत्वम् उल्लङ्घ्य अतिक्रम्य परित्यज्येत्यर्थः। भावान्तराणामपि भावविशेषाणामपि परप्रकर्षाधिगमे परमोत्कर्षबोधने। उत्तरां चरमामवस्थाम् ॥ ६५० ॥

भूमेति। मतुबादयः मतुप्प्रभृतयः प्रत्ययाः अस्तिविवक्षायाम् अस्त्यर्थे इत्यर्थः

चीरिणो वृक्षाः, बलवान् मल्लः, दण्डी, गोमती शालेति । तत्रोर्जस्विरसवतोरलङ्कारत्वविवक्षायाम् अतिशायने वा भूम्नि वा मतुबर्थीयः । गुणत्वविवक्षायान्तु प्रशंसानित्ययोगयोः इति द्रष्टव्यम् । नित्यो हि काव्ये गुणयोग इव रसादि-योगः, गुणवतो रसवतश्च निश्चितैव अस्य प्रशंसा,। संसर्गस्तु गुणानामवश्यमुपादानात् निन्दा पुनर्दोषहानेः न अवतरति गुणेषु । प्रेय इति रूपाभेदात् कथमलङ्कारत्वे तदुत्कर्षप्रतीतिः यथा, युधिष्ठिरः श्रेष्ठतम कुरूणाम् इति । तत्र अति-शायिगुणान्तरेण तदवगतिरिति चेत् इहापि युक्तोत्कर्षश्च तत् त्वयम् इति वाक्यान्तरेण भविष्यति। न च आतिशायिकाः स्वार्थातिरिक्तं किमपि ब्रुवते, अपि तु प्रकृत्युपात्तमेव प्रकर्षादिकं गमयन्ति। स्वार्थिकेषु ह्येते विधीयन्ते। एवमवस्थापिते गुणरसानामलङ्कारत्वे षट्प्रकारो रसालङ्कार-सङ्करः सम्भवति । गुणसङ्करः, अलङ्कारसङ्करः, गुणालङ्कार-सङ्करः, रससङ्करः, रसगुणसङ्करः, रसालङ्कारसङ्करश्चेति । ननु अत्र गुणानां सङ्करव्यवहारो नोपपद्यते बहुष्वपि गुणेषु

भूमा बाहुल्यं निन्दा गर्हा प्रशंसा स्तुतिः तासु नित्ययोगे निरन्तरसङ्गे अतिशायने आधिक्ये तथा संगमे मन्यमाने इति शेषः भवन्ति जायन्ते। यथा गोमान् देश इत्युक्ते देशस्य बहुगोशालित्वं गम्यते। वाचालो वटुरित्युक्ते वटोर्निन्दा प्रतीयते। वाग्मी विपश्चिदित्युक्ते विपश्चितः प्रशंसा सूच्यते। चीरिणो वृक्षा इत्युक्ते वृक्षाणां नित्यं चीरसंयोगः प्रतीयते। बलवान् मल्ल इत्युक्ते मल्लस्य बलाधिकत्वं सूच्यते। दण्डीत्युक्ते दण्डससर्गमात्रं प्रतीयते। मतुबर्थीयः प्रत्यय इति शेषः तथा च ऊर्जस्वी अलङ्कार इत्युक्ते यत्रातिशयितः अधिकतरो वा ऊर्जो धर्मः स ऊर्जस्वी अलङ्कारः। रसवानलङ्कार इत्युक्ते यत्रातिशयितोऽधिकतरो वा रसः सः रसवानलङ्कार इति निष्कर्षः। ऊर्जस्वी गुण इत्युक्ते यत्र प्रशंसितः निरन्तरो वा

गुणवदित्येव व्यपदेशात्। मैवम्। त्रिविधा गुणाः शब्दगुणाः, अर्थगुणा दोषगुणाश्च। ते तु प्रत्येकं द्विधा उल्लेखवन्तः, निरुल्लेखाश्च। तत्र शब्दगुणेषु समाधिमाधुर्य्यौदार्य्यगाम्भीर्य्यादयः सोल्लेखाः, श्लेषप्रसादसमतासौकुमार्य्यादयो निरुल्लेखाः। अर्थगुणेषु प्रसादरीतिकान्त्यादयः सोल्लेखाः, अर्थव्यक्तिसौक्ष्म्यगाम्भीर्य्यसञ्चितत्वादयो निरुल्लेखाः। दोषगुणेषु ग्राम्यपुनरुक्ता पार्थान्यार्थादयः सोल्लेखाः, शब्दहीनसम्भ्रमापक्रमविसन्ध्यादयो निरुल्लेखाः। तत्र सजातीयानां सोल्लेखानामेवम्, विजातीयानान्तु निरुल्लेखानामपि सङ्करव्यवहारः प्रवर्त्तते ॥६५१॥

सजातीयानां शब्दगुणेषु समाध्यादीनां यथा,—

नवपल्लवेसु लोलइ घोलइ विलवेसु वलइ सिहरेसु।
थवइ थवएसु अ तहा वसन्तलच्छी असोअस्स ॥६५२॥

जर्जीधर्मः स जर्जस्वी गुणः यत्र तादृशः रसः, सः रसवान् गुण इति निष्कर्षः। निश्चितेवास्य प्रशंसेति अस्य काव्यस्येत्यर्थः। ससर्गस्त्विति गुणानामवश्यमुपादानात् संसर्गः तथा दोषहानेः दोषाणां परित्यागात् निन्दागुणेषु न अवतरति तस्मात् निन्दासंसर्गो नैषां गुणत्वे प्रविशते इति भावः। प्रेय इति रूपस्य अभेदात् अभिन्नत्वात् मत्वादिप्रत्ययवत्त्वे नेति भावः। यथेति युधिष्ठिरः कुरूणां श्रेष्ठतम इत्यत्र यथा रूपस्य कुरुवंशीयत्वस्येति भावः अभेदः। नचेति। आतिशायिकाः अतिशयवन्तः ब्रुवते बोधयन्ति। अपि तु किन्तु प्रकृत्या धातुशब्दाभ्यामिति भावः उपात्तं प्राप्तमेव नतु अन्यादित्येवकारार्थः। गमयन्ति बोधयन्ति। स्वार्थिकेषु प्रकृत्यर्थोपस्थापितेषु अर्थेषु इत्यर्थः एते प्रेयः प्रभृतयः अलङ्काराः विधीयन्ते आख्यायन्ते। गुणसङ्करः गुणयोः गुणानां वा सङ्करः सम्मेलनम्। व्यपदेशात् कथनात्। उल्लेखवन्तः सोल्लेखा इत्यर्थः ॥ ६५१ ॥

नवपल्लवेसु इति ॥ ६५२ ॥

अत्र अन्यधर्माणामन्यत्रारोपणं समाधिः, पृथक्पदता माधुर्य्यम्, बन्धविगूढत्वमुदारता, ध्वनिमत्ता गाम्भीर्य्यमिति सजातीयाः सङ्कीर्य्यन्ते । यतो वसन्तलक्ष्मीरशोकस्य इति पदयोः शब्दध्वनिरपि परिस्फुरति । यथा कस्यचिदशोकस्य मानिनोऽङ्केषु प्रियाङ्गना सविलासं चेष्टते तथा अस्य इयम् इति ॥ ६५३ ॥

अर्थगुणेषु श्लेषादीनां यथा,—

जनः पुण्यैर्यायाज्जलधिजलभावं जलमुचः
तथावस्थं चैनं निदधतु शुभैः शुक्तिवदने ।
ततस्तां श्रेयोभिः परिणतिमसौ विन्दतु यथा
रुचिं तन्वन् पौनस्तनि ! हृदि तवायं विलुठति ॥६५४॥

अन्येति । अन्यधर्माणाम् अन्यवस्तुनिष्ठानां धर्माणां गुणदोषादीनां अन्यत्र अन्यस्मिन् वस्तुनि आरोपणम् अध्यासः समाधिः । पृथक्पदता विभिन्नपदत्वं न तु समासबाहुल्यमिति भावः माधुर्य्यम् । बन्धविगूढत्वं बन्धे रचनायां विशेषेण गूढत्वं निगूढार्थवत्त्वमिति भावः । बन्धविकटत्वमिति पाठान्तरम् उदारता । ध्वनिमत्ता व्यङ्ग्यार्थशालित्वं गाम्भीर्य्यं दुरवगाहत्वमिति भावः । शब्दध्वनिः शब्दाभ्यां ध्वन्यते व्यज्यते इति शब्दध्वनिः शब्दव्यङ्ग्यः अर्थः इत्यर्थः परिस्फुरति प्रतिभाति ॥ ६५३ ॥

जन इति । जनो लोकः पुण्यैः सुकृतैः स्वकृतैरिति भावः जलधिजलभावं समुद्रजलत्वं यायात् प्राप्नोतु । जलमुचः मेघाः तथावस्थं तादृगवस्थापन्नं जलधिजलत्वं गतमित्यर्थः एनं जनं शुभैः पुण्यैः शुक्तिवदने मुक्ताशुक्तेः मुखे निदधतु अर्पयन्तु । ततः असौ शुक्तिवदननिहितः जलरूपो जनः श्रेयोभिः सुकृतैः तां परिणतिं परिणामं मौक्तिकरूपतामिति भावः विन्दतु लभताम् । हे पौनस्तनि ! यथा अयं मौक्तिकरूपतां गतो जनः तव हृदि हृदये रुचिं अनुरागं तन्वन् प्रकटयन् विलुठति विलुण्ठनं करोति । तव हृदये विलुण्ठनं मुक्ताफलानामपि समधिकपुण्यपरम्पराणां फलमिति भावः ॥६५४॥

अत्र संविधाने सुसूक्तता श्लेषः, । अर्थस्य प्राकट्यं प्रसादः, उत्पत्त्यादिक्रियाक्रमो रीतिः, दीप्तरसत्वं कान्तिरित्यर्थगुणाः सजातीयाः सङ्कीर्य्यन्ते ॥ ६५५ ॥

दोषगुणेषु ग्राम्यादीनां यथा,—

हन्यते सा वरारोहा स्मरेणाकाण्डवैरिणा ।
हन्यते चारुसर्वाङ्गी हन्यते मञ्जुभाषिणी ॥ ६५६ ॥

अत्र हन्यत इति असङ्गतार्थम्, वरारोहेत्यश्लीलार्थम्, हन्यत इति पुनरुक्तम्, चारुसर्वाङ्गीत्युक्तौ वरारोहेति व्यर्थम्, त एते सजातीयाश्चत्वारोऽपि दोषगुणाः सङ्कीर्य्यमाणाः कस्यचित् उन्मत्तभाषिणोऽनुकम्पाद्यतिशयविवक्षायामभ्यनुज्ञायन्ते ॥ ६५७ ॥

यदाह,—

अनुकम्पाद्यतिशयं यदि कश्चिद्विवक्षते ।

अत्रेति । संविधाने विरचने सुसूक्तता सुष्ठु वपनमित्यर्थः श्लेषः । प्राकट्यं प्रकटता प्रस्फुटत्वमित्यर्थः प्रसादः । दीप्तरसत्वं उज्ज्वलरसवत्त्वमित्यर्थः ॥६५५॥

हन्यते इति । अकाण्डवैरिणा सहसा शत्रुभूतेन स्मरेण सा वरारोहा सुन्दरी चारुसर्वाङ्गी मञ्जुभाषिणी मधुरालापिनी बाला हन्यते हन्यते हन्यते विनाश्यते विनाश्यते विनाश्यते इत्यर्थः ॥ ६५६ ॥

हन्यते इति । असङ्गतार्थं बालवहननाभावादिति भावः । अमङ्गलार्थमिति पाठान्तरम् । तच्च हननरूपार्थस्य अमङ्गलजनकत्वेन काव्यार्थदूषणादिति भावः । वरारोहेति वरं आरोहतीति व्युत्पत्तेर्लज्जाजनकत्वादिति भावः । पुनरुक्तं चारुत्वकथनादिति भावः । अनुकम्पाद्यतिशयविवक्षायामिति अतिशयेन सा अनुकम्पनीयेति विवक्षायामित्यर्थः ॥ ६५७ ॥

अनुकम्पेति । यदि कश्चित् कविरिति शेषः अनुकम्पादीनाम् अतिशयं

न दोषः पुनरुक्त्यादौ प्रत्युतेयमलङ्क्रिया ॥ ६५८॥

अथ सजातीयानां शब्दगुणानामर्थगुणानाञ्च सङ्करो यथा,—

को नाम नोदयति नास्तमुपैति को वा ?
लोकोत्तरः पुनरयं सविता जगत्सु ।
यत्रोदयास्तमयभाजि रुचां निधाने
द्वेधा भवत्यहरिति क्षणदेति कालः ॥६५९ ॥

अत्र यावदर्थपदता सम्मितत्वम् सम्यग्बन्धविकटत्वम् उदारता, विशेषगुणयोग उदात्तत्वम् इति शब्दगुणाः, उक्तार्थनिर्वहणं प्रौढिः, अर्थप्राकट्यं प्रसादः, रूढाहङ्कारताः ओर्जित्यमित्यर्थगुणाः सङ्कीर्यन्ते ॥ ६६० ॥

शब्दगुणानां दोषगुणानाञ्च यथा,—

एह्येहि वत्स ! रघुनन्दन ! पूर्णचन्द्र !
चुम्बामि मूर्द्धनि चिराय परिष्वजे त्वाम् ।

आधिक्यं विवक्षते वक्तुमिच्छति तदा पुनरुक्त्यादौ न दोषः, प्रत्युत वैपरीत्ये इयम् अलङ्क्रिया अलङ्कारः ॥ ६५८ ॥

क इति । को जनः नाम न उदयति नोदयं प्राप्नोति ? को वा अस्तं नाशं न उपैति न प्राप्नोति ? अपि तु सर्वएव उदयम् अस्तञ्च प्राप्नोतीत्यर्थः । अयं सविता सूर्यः जगत्सु लोकोत्तरः पुनः लोकातीत एव अलोकसामान्य इत्यर्थः रुचां निधाने तेजोनिधौ यत्र सवितरि सूर्ये उदयास्तमयभाजि उदयवति अस्तवति चेत्यर्थः सति कालः अहरिति दिवस इति क्षणदा रात्रिरिति द्वेधा द्विप्रकारो भवति ॥ ६५९ ॥

अत्रेति । यावदर्थपदता यावन्तः अर्थाः पदेषु यत्र तत् यावदर्थपदं तस्य भावः यावदर्थपदता प्रतिपदानामर्थवत्त्वमित्यर्थः सम्मितत्वम् । उक्तार्थनिर्वहणं कथितार्थनिर्वाहः । अर्थप्राकट्यम् अर्थवैशद्यम् । रूढाहङ्कारता साहङ्कारप्रयोज्यतेत्यर्थः ॥ ६६० ॥

आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयं ते ॥६६१ ॥

अत्र भावतो वाक्प्रतिपत्तिर्भाविकत्वम्, प्रसिद्धार्थपदता प्रसादः प्रियार्थपदोपादानं प्रेय इति शब्दगुणाः, एह्येहीति पुनरुक्तम्, वत्सेत्युक्त्वा त्वत्पादाब्जद्वयं वन्द इति विरुद्धम् मूर्ध्नि चुम्बामि हृदि वहामि इत्यादौ वन्द इति क्रियास्वनुपयोगात्, पूर्णचन्द्रनिदर्शनादिक्रियोपयोगि व्यर्थञ्च इति दोषगुणाः परस्परं सङ्कीर्यन्ते। रसाक्षिप्तचित्तादौ हि पुनरुक्त्यादयो न दुष्यन्ति ॥ ६६२॥

अर्थगुणानां दोषगुणानां यथा,—

किं द्वारि दैवहतिके! सहकारकेण
संवर्द्धितेन विषपादप एष पापः।
अस्मिन् मनागपि विकाशविकारभाजि
भीमा भवन्ति मदनज्वरसन्निपाताः ॥६६३॥

एह्येहि। हे वत्स! रघुनन्दन! रामचन्द्र! एहि एहि आगच्छ आगच्छ। मूर्ध्नि शिरसि त्वां चुम्बामि तथा चिराय दीर्घकालमिति भावः परिष्वजे आलिङ्गामि हृदि हृदये आरोप्य वा दिवानिशम् अहोरात्रम् उद्वहामि अथवा ते तव चरणपुष्करकद्वयं पादपद्मयुगलं वन्दे सेवे ॥ ६६१ ॥

अत्रेति। भावतः अनुरागात् वाक्प्रतिपत्तिः वाग्विन्यासः। प्रियार्थेति प्रियः प्रीतिकरः अर्थो येषां तेषां पदानाम् उपादानम् ग्रहणम्। अनुपयोगात् अनुपकारात्। रसेति। रसेन अनुरागेण आक्षिप्तम् आकृष्टं चित्तं यस्य तस्मिन् स रसाक्षिप्तचित्तः तदादौ ॥ ६६२ ॥

किमिति। हे दैवहतिके! दुर्भाग्यशालिनि! द्वारि द्वारदेशे संवर्द्धितेन सह-

अत्र दीप्तरसत्वं कान्तिः, अर्थप्राकट्यं प्रसादः, उक्तार्थ-निर्वहणं प्रौढ़िरित्यर्थगुणाः दैवहतिके इति विषपादपोऽयं पाप इति अमङ्गलार्थं ग्राम्यं किमनेन संवर्द्धितेन इति अत्र मदनज्वरसन्निपाता इत्यत्र च कृत्यप्रयोजनादेर्विरहिणो द्रष्टुरित्यादेश्च अध्याहारात् असम्पूर्णवाक्यतायामर्थव्यक्ति-विपर्य्ययः, अस्मिन् विकाशविकारभाजि इति विकाश-शब्दस्य पुष्पविषयस्य वृक्षेऽपि प्रयोगेऽवाचकत्वाद् असमर्थ इति दोषगुणा मिथः सङ्कीर्य्यन्ते। यतो रसाक्षेपात् परिहास-लेशोक्त्या मङ्गलम्। प्रविश पिण्डीं द्वारं भक्षय इति न्यायात् प्रसिद्धाध्याहारः। दरी वदति मञ्चाः क्रोशन्ति इति प्रयोग-दर्शनाद् आधाराधेययोरभेदोपचारश्च विरुद्धलक्षणादिभिः प्रयुज्यमानो न दोषाय इति ॥६६४॥

अथ अलङ्कारसङ्करः।

स यद्यपि व्यक्ताव्यक्तोभयात्मतया तिलतण्डुलकादिभेदैः प्रधानाङ्गभावसमकक्षताभ्यां पुरस्तादुक्तः तथापि तेषां

कारकेण चूतपादपेन किम्? न किमपि प्रयोजनम् अस्य सम्वर्द्धने इत्यर्थः। एषः पापः विषपादपः विषवृक्षः। अस्मिन् सहकारे मनाक् अल्प विकासविकारभाजि विकासशालिनि इत्यर्थः सति भीमाः दारुणाः मदनज्वरसन्निपाताः कामज्वरस-म्पाताः तव इति शेषः भवन्ति ॥ ६६३ ॥

अवेति। अर्थप्राकट्यम् अर्थानां प्रकटता प्रस्फुटतेत्यर्थः। विकासशब्दस्य पुष्पविषयस्य पुष्पमात्रप्रयोज्यस्येति यावत्। प्रविश पिण्डीं द्वारं भक्षय इति। द्वारं प्रविश, पिण्डीं भक्षयेति योजना। दरी गुहा। आधाराधेययोरिति दरीमञ्चौ आधारौ तत्र स्थिता जना आधेया इति भावः ॥ ६६४ ॥

अथ अलङ्कारसङ्कर इति। व्यक्तश्च अव्यक्तश्च व्यक्ताव्यक्तौ स्फुटास्फुटौ उभौ

गुणादिसङ्करासाधारणत्वात् सम्प्रति साधारणः प्रकार उच्यते। स षोढा, शब्दालङ्कारसङ्करः, अर्थालङ्कारसङ्करः, उभयालङ्कारसङ्करः, शब्दार्थालङ्कारसङ्करः, शब्दोभयालङ्कारसङ्करः, अर्थोभयालङ्कारसङ्करश्च ॥ ६६५ ॥

तेषु शब्दालङ्कारसङ्करो यथा,—

हंसाली भयतरला सारासरसा सरासमारसरासा।
अम्बरमारूढा सा रासरसा सरा समारसरासा ॥

अत्र संस्कृतप्राकृतभाषाश्लेषः, गतप्रत्यागतं चित्रम्, पादावृत्ति यमकम्, वर्णानुप्रासश्च इति चत्वारः शब्दालङ्काराः सङ्कीर्यन्ते ॥ ६६६ ॥

अर्थालङ्कारसङ्करो यथा,—

वासावस्थिततामचूडवयसामायामिभिः कूजितैः
दूरादप्यनुमीयमानवसतिर्ग्रामोऽयमन्तर्वणः।

आत्मा जीवनाधायकः यस्य तथोक्तः तस्य भावः तत्ता तया हेतुना तिलतण्डुलकादिभेदैः तिलतण्डुलप्रसृतलड्डुकादिविशेषैः प्रधानाङ्गभावसमकक्षताभ्याम् अङ्गाङ्गिभावेन तुल्यबलत्वेन चेत्यर्थः पुरस्तात् प्राक् उक्तः कथितः अलङ्कारसङ्कर इति पूर्वेणान्वयः। तेषाम् अलङ्कारसङ्कराणां गुणादिसङ्करैः असाधारणत्वात् अतुल्यत्वात्। साधारणः सामान्यः प्रकारः भेदः। षोढा षड्विधः ॥ ६६५ ॥

हंसालीति। भयेन तरला चञ्चला रासे क्रीडाया रसो रागो यस्याः सा रासरसा, सरासेषु उल्लसितेषु विकस्वरेष्विति यावत् सारसेषु कमलेषु रासः विहारः यस्याः तथोक्ता ससारसरासा सारससमाननिनदा रासरसेन क्रीडानुरागेण आसरति सञ्चरतीति तथाभूता सा हंसाली हंसश्रेणी अम्बरम् आकाशम् आरूढा उत्पतितेत्यर्थः ॥ ६६६ ॥

यत्रोद्दीप्तकुकूलकूटविसरद्धूम्याघनं घूर्णते
सन्ध्यान्तोल्लसदच्छभल्लपटलच्छायाजटालं तमः ॥

अत्र ताम्रचूड़वयसां कूजितैरिति अनुमानम्, यत्तमो घूर्णते इति ज्ञापकहेतुः, कुकूलकूटविसरद्धूम्याघनमिति सन्ध्यान्तोल्लसदच्छभल्लपटलच्छायाजटालमिति च कारकहेतुः, जायमानपदार्थस्वरूपाभिधानं जातिः इति अर्थालङ्कारसङ्कराश्चत्वारो मिथः सङ्कीर्य्यन्ते ॥ ६६७ ॥

उभयालङ्कारसङ्करो यथा,—

ण हु णवरं दीवसिहासरिच्छेहिं चम्पणहिं पड़िवण्णं।
कज्जलकज्जं पि किदं आभमन्तेहिं भमलेहिम् ॥

अत्र चम्पकादीनां प्रदीपशिखाभिः आकारकान्तिभ्याम् उपमा, विरहिणीहृदयदाहप्रद्योतनार्थक्रियाभ्यां साम्यम्, कज्जलपटलानामुपरि भ्रमरपटलानां मेलनात् मेलितम्,

---

वासेति। वासे कुलाये अवस्थितानां ताम्रचूडानां कुक्कुटानां वयसां पक्षिणाम् आयासिभिः दीर्घैः कूजितैः निनादैः दूरादपि अनुमीयमाना सूच्यमाना वसतिः लोकालयः यत्र तथाभूतः अन्तर्गतं वनं यस्य तादृशः अयं ग्रामः। ताम्रचूडा हि ग्राम्याः पक्षिणः ग्रामेषु यानि सामान्यवनानि सन्ति तेषु च तेषां वास इति भावः। यत्र ग्रामे उद्दीप्तात् उज्ज्वलितात् कुकूलकूटात् तुषानलराशेः विसरन्ती प्रसरन्ती या धूम्या धूमसमूहः तया घनं सान्द्रं तथा सन्ध्यान्ते सन्ध्यावसाने उल्लसन्तः विहरन्तः ये अच्छभल्लाः भल्लूकाः तेषां पटलं समूहः तस्य छाया श्यामला प्रभा इत्यर्थः तया जटालं सम्मिश्रमित्यर्थः तमः अन्धकारः घूर्णते विसरति। अनेति। अनुमानम् अलङ्कार इति शेषः एवं ज्ञापकहेतुः जातिश्च अलङ्कार इति शेषः ॥ ६६७ ॥

न खलु केवलं दीपशिखासदृशैश्चम्पकैः प्रतिपन्नम्।
कज्जलकार्य्यमपि कृतमाभमद्भिः भ्रमरैः ॥

न खलु इति। न खलु केवलं दीपशिखासदृशैः प्रदीपशिखासदृशैः चम्पकैः

चम्पकदीपकलिकयोरिव भ्रमरकज्जलपटलयोरौपम्यादिसम्बन्धात् समुच्चयः इति उभयालङ्कारावत्वारोऽपि सङ्कीर्य्यन्ते ॥६६८

शब्दार्थालङ्कारसङ्करो यथा,—

सर्वाशारुधि दग्धवीरुधि सदासारङ्गबद्धक्रुधि
क्षामक्ष्मारुहि मन्दमुग्धमधुलिहि स्वच्छन्दकुन्दद्रुहि ।
शुष्यत्स्रोतसि तप्तभूमिरजसि ज्वालायमानाम्भसि
ज्यैष्ठे मासि खरार्कतेजसि कथं पान्थ ! व्रजन् जीवसि ? ॥

अत्र अवन्तिका रीतिः, पदमुद्रा, विभक्तिमुद्रा, अनुप्रासश्चेति शब्दालङ्काराः, जातिः, कारकज्ञापकौ हेतू, चित्रहेतुश्च इति अर्थालङ्कारा मिथः शब्दे सङ्कीर्य्यन्ते ॥६६९॥

शब्दोभयालङ्कारसङ्करो यथा,—

स्तोकस्तोकमभूभिरम्बरतले ताराभिरस्तं गतं
गच्छत्यस्तगिरेः शिरस्तदनु च च्छायादरिद्रः शशी ।

प्रतिपन्नम् उल्लसितम् । अपि तु आभमद्भिः समरैः कज्जलस्य दीपशिखोत्थितस्येति भावः कार्य्यमपि कृतं सम्पादितम् ॥ ६६८ ॥

सर्वेति । हे पान्थ ! पथिक ! ज्यैष्ठे मासि सर्वाः सकलाः आशाः दिशः रुणद्धि व्याप्नोतीति तथाभूते मेघाद्यावरणशून्यत्वादिति भावः दग्धाः वीरुधः लताः येन तथोक्ते लतादहनकारिणीत्यर्थः सदा सर्वस्मिन् समये दिवसे इति भावः सारङ्गैः मृगभेदैः बद्धाः कृताः क्रुधः क्रोधाः यत्र तादृशे उत्तापासहनतया कुपितसारङ्गे इत्यर्थः क्षामाः विशीर्णाः क्ष्मारुहः वृक्षाः यत्र तथाविधे, मन्दाः क्षीणाः मुद हर्षा येषां तादृशाः मधुलिहो भ्रमराः यत्र तथोक्ते, स्वच्छन्दाः सोल्लासानि कुन्दानि माध्यकुसुमानि द्रुह्यति शोषयतीति तथोक्ते, शुष्यन्ति शोषं गच्छन्ति स्रोतांसि जलप्रवाहाः यत्र तादृशे, तप्तानि भूमिरजांसि धूलयः यत्र तथाविधे चरणदहनकारिभूरजसीति भावः । तथा ज्वालायमानानि अग्निशिखासदृशानि अम्भांसि जलानि यत्र तथाभूते खरार्कतेजसि तीक्ष्णतूर्य्यकिरणे व्रजन् गच्छन् कथं जीवसि ? प्राणान् धारयसि ? ॥ ६६९ ॥

प्रत्यासन्नतरोदयस्य तरणेः बिम्बारुणिम्ना ततो
मञ्जिष्ठारसलोहिनी दिगपि च प्राची समुन्मीलति ॥

अत्र समुन्मीलतीति विभक्तिमुद्रा, स्तोकस्तोकमस्तं गच्छतीत्यादिरनुप्रासश्च शब्दालङ्काराः, हेतूपमा, समाधिः, अनुक्रमः, समुच्चयोक्तिश्च इति उभयालङ्कारा मिथः सङ्कीर्य्यन्ते ॥६७०

अर्थोभयालङ्कारसङ्करो यथा,—

खं वस्ते कलविङ्ककण्ठमलिनं कादम्बिनीकम्बलं
चर्चां पारयतीव दर्दुरकुलं कोलाहलैरुन्मदम्।
गन्धं मुञ्चति सिक्तजालसुरभिर्वर्षेण दग्धा स्थली
दुर्लक्ष्योऽपि विभाव्यते कमलिनीहासेन भासां पतिः ॥

अत्र जातिः, अनुमानं, कारकज्ञापकहेतू च इत्यर्थालङ्काराः, रूपकोपमा, हेतूपमा, उत्प्रेक्षोपमा चेति उभयालङ्काराः मिथः सङ्कीर्य्यन्ते ॥ एतेन गुणालङ्कारसङ्करोऽपि व्याख्यातः ॥ अतो यद्यपि गुणवत्येव वाक्ये सङ्करयोगः तथापि क्वचिद् गुणस्य प्राधान्यं क्वचिदलङ्कारस्य इति प्रधानाङ्गभावेन गुणा-

---

स्तोकेति। अम्बरतले आकाशे अमूभिः परिदृश्यमानाभिः ताराभिः स्तोकं स्तोकम् अल्पाल्पं यथा तथा क्रमेणेत्यर्थः अस्तं गतं विलीनमित्यर्थः तदनु च तदनन्तरञ्च शशी चन्द्रः क्षयादरिद्रः विच्छाय इत्यर्थः विगतप्रभ इति यावत् अस्तगिरेः अस्ताचलस्य शिरः शिखरं गच्छति। ततः अनन्तरं प्रत्यासन्नतरः अतिसन्निहितः उदयो यस्य तथाभूतस्य तरणेः सूर्य्यस्य द्युमणिस्तरणिर्मित्रश्चित्रभानुर्विभावसुरित्यमरः। बिम्बस्य मण्डलस्य अरुणिम्ना लौहित्येन मञ्जिष्ठारसवत् लोहिनी रक्तवर्णा प्राची पूर्वा दिगपि समुन्मीलति सम्प्रकाशते। प्रभातवर्णनमिदम् ॥ ६७० ॥

खमिति। कलविङ्कः पक्षिभेदः तस्य कण्ठवत् मलिनं श्यामलं कादम्बिनी मेघमाला एव कम्बलं मेषादिलोमनिर्मितप्रावरणविशेषः खमाकाशं वस्ते आच्छादयति। उन्मदम् उत्पन्नप्रमोदं दर्दुरकुलं भेककसमूहः कोलाहलैः कलरवैः चर्चां

लङ्कारयोः सङ्करव्यवहारः प्रवर्त्तते। स षोढा—शब्दगुण-प्रधानः, अर्थगुणप्रधानः, दोषगुणप्रधानः, शब्दालङ्कारप्रधानः, अर्थालङ्कारप्रधानः, उभयालङ्कारप्रधानश्च इति ॥६७१॥

तेषु शब्दगुणप्रधानो यथा,—

प्राप्तश्रीरेष कस्मात् पुनरपि मथितुं मन्यखेदं विदध्यात् ?
निद्रामप्यस्य पूर्वामनलसमनसो नाप्यहं तर्कयामि।
सेतुं बध्नाति भूयः किमिति च सकलद्वीपनाथानुयातः
त्वय्यायाते वितर्कानिति दधत इवाभाति कम्पः पयोधेः ॥

अत्र हेतूत्प्रेक्षाभिधाने त्वयि इत्यादौ पदे विष्णोः स्वरूपाध्यासेन तद्भावापत्तौ समाधेः प्राधान्यमिह प्रतीयते॥ ननु च अयमर्थस्य प्राकट्यात् प्रसादोऽर्थगुणः कस्मान्न भवति ? अस्मिन्नपि तद्व्यपदेशेन शब्दशक्तेराधिक्यात्। ननु च त्वयि इति एष इति अस्य इति युष्मदेतदिदमां न कश्चन विष्णुवाची स कथं वर्णनीये वस्तुनि तमर्थमभिदध्यात्। उच्यते, सर्वनामत्वेन एषां सर्ववाचित्वात्। सर्वनामानि हि सर्वनामाभिधायीनि अपि प्रकरणादिगम्यविशेषम् अर्थं च ब्रुवते,

---

सानन्दविहारं पारयतीव समापयतीव। दग्धा वनाग्निना भस्मीकृता स्थली वनभूमिरित्यर्थः वर्षेण वृष्टिजलेनेत्यर्थः सिक्ताः जालाः नवकलिकासमूहाः तैः सुरभिः लाजेति पाठे लाजाः भृष्टधान्यानि तद्वत्सुरभिः सौरभशालिनी सती गन्धं मुञ्चति त्यजति विस्तारयतीति भावः। भासा पद्मिनीः सूर्यः दुर्दर्शोऽपि मेघावरणादिति भावः कमलिनीनां पद्मिनीनां हासेन विकासेन विभाव्यते अनुमीयते। वर्षावर्णनमिदम् ॥ ६७१ ॥

एतेनेति। एतेन अस्य वाक्यस्य प्रसादादिगुणवत्त्वेनेत्यर्थः। सङ्करयोगः अलङ्कारसङ्करयोग इत्यर्थः ॥

प्राप्तश्रीरिति। एषः पुमानिति शेषः प्राप्ता श्रीः सम्पद् लक्ष्मीर्येति प्राप्तश्रीः, अतः कस्मात् किं निमित्तं मयि पुनरपि मन्यखेदं मन्यनजनितं क्लेशं विदध्यात् ?

स च इह प्राप्तश्रीरित्येवमादिभिः अभिव्यक्त एव अभिगम्यते इति ॥ ६७२ ॥

अर्थगुणप्रधानो यथा,—

लक्ष्मीवशीकरणचूर्णसहोदराणि
त्वत्पादपङ्कजरजांसि चिरं जयन्ति।
यानि प्रणाममिलितानि नृणां ललाटे
लिम्पन्ति दैवलिखितानि दुरक्षराणि ॥

अत्र हेतुसाम्योभयालङ्काराभिधानेऽपि प्राधान्येन अर्थप्राकट्यमर्थगुणः प्रतीयते ॥ ६७३ ॥

अर्पयेत्? सम्पदां रत्नादीनां लक्ष्म्याश्च लाभार्थं मम मन्थनं कर्त्तव्यम् अस्य च तदधिगमः प्रागेव सिद्धः तत्कथं मां मन्थनेन पीडयेदिति निष्कर्षः। तथा अनलसम् आलस्यवर्जितं मनो यस्य तथाभूतस्य अस्य पुंसः पूर्वां प्रथमां निद्रां निद्राप्रारम्भमिति यावत् अपि नाहं तर्कयामि नानुभवामि निद्रावेशे आलस्यं स्यात् अस्य तु न तथा सततमेव उद्योगशीलत्वादिति भावः। किमिति च कथं वा सकलैः समस्तैः द्वीपानां नाथैः द्वीपाधिपतिभिः सामन्तैरिति भावः अनुयातः समभिव्याहृतः सन् भूयः पुनः सेतुं बध्नाति? प्राक् वानरचमूभिः सेतुर्बद्धः, इदानीं राजन्यगणैः सेनापतिभिः सेतुं बन्धुं प्रयस्यते किमिति निष्कर्षः। त्वयि आयाते कूलमुपगते इत्यर्थः इतीत्थं वितर्काञ् संशयान् दधत इव कुर्वत इव पयोधेः सागरस्य कम्पः आभाति प्रतिभासते। राजविषया रतिरत्र भाव इति बोध्यम् ॥ ६७२ ॥

अत्रेति। हेतूत्प्रेक्षाभिधाने दधत इवेति हेतूत्प्रेक्षायाः कथने इत्यर्थः। स्वरूपाध्यासेन स्वरूपारोपेण। युष्मदेतदिदमां शब्दानां मध्ये कथन शब्द इति शेषः। वस्तुनि राजरूपे। सर्वनामत्वेन सर्वेषां नामानि सर्वनामानि तेषां भावः सर्वनामत्वं तेन।

लक्ष्मीति। लक्ष्म्या वशीकरणार्थं यत् चूर्णं चूर्णीकृतवस्तुविशेष इत्यर्थः तस्य सहोदराणि सदृशानि तव पादपङ्कजस्य चरणकमलस्य रजांसि धूलयः चिरं जयन्ति विराजन्ताम्। तव चरणानतानामेव लक्ष्म्याः कृपा स्यादिति

दोषगुणप्रधानो यथा,—

येनापविद्धसलिलस्फुटनागसद्मा
देवासुरैरमृतमम्बुनिधिर्ममन्थे ।
व्यावर्त्तनैरहिपतेरयमाहिताङ्कः
खं व्यालिखन्निव विभाति स मन्दराद्रिः ॥

अत्र व्यावर्त्तनैः अहिपतेः अयमाहिताङ्कः इति ज्ञापकहेतोः, खं व्यालिखन्निव इति उत्प्रेक्षावयवाच्च, देवासुरैरिति नित्यविवक्षायां बहुवचनम् । अमृतमम्बुनिधिः ममन्थे इति द्विकर्मकेष्वपि मथिप्रभृतीनाम् उपसंख्यानम् इति अमृतशब्दात् द्वितीया इति दोषगुणयोः प्राधान्यं प्रतीयते ॥ ननु च अत्रापि अर्थस्य प्राधान्यं न भवति तद्विषयस्य ज्ञापकहेतुना अपहृतत्वात् । सोऽपि अर्थालङ्कार एव गुणालङ्कारयोश्च तुल्यकक्षतायामलङ्कारः प्रधानं भवति न गुणः, गुणैः हि गुणभूतैरेव अलङ्काराः प्राय आरभ्यन्ते ॥ ६७४ ॥

भावः । यानि रजांसि नृणां मानवानां ललाटे भालदेशे प्रणामेन प्रणत्या मिलितानि संलग्नानि सन्ति देवलिखितानि भाग्यलिखितानि दुरक्षराणि एते दुर्भाग्या भविष्यन्तीत्येव रूपाणि दुष्टानि अक्षराणि लुम्पन्ति प्रमार्जयन्ति । राजविषया रतिरव भाव इति बोध्यम् ॥ ६७३ ॥

येनेति । देवासुरैः सुरासुरैः येन साधनेनेत्यर्थः अपविद्धैः उत्क्षिप्तैः सलिलैः जलैः हेतुभिः स्फुटं सुव्यक्तं दृश्यमित्यर्थः नागानां सद्म पातालं यस्य यत्र वा सः अम्बुनिधिः सागरः अमृतं सुधां ममन्थे विलोड़याञ्चक्रे, अहिपतेः वासुकेः शेषनागस्य वा व्यावर्त्तनैः वेष्टनैः आहितः जनितः अङ्कः चिह्नं मध्यवर्त्तिरेखाविशेष इति भावः यस्य तथाभूतः अयं परिदृश्यमानः सः मन्दराद्रिः मन्दराख्योऽचलः खम् आकाशं व्यालिखन्निव विशेषेण आलिख्यमिव चित्रयन्निव विभाति राजते ॥ ६७४ ॥

अत्रेति । तद्विषयस्य अर्थविषयस्य अपहृतत्वात् निरस्तत्वात् । गुणभूतैरङ्गभूतैः । आरभ्यन्ते उत्थाप्यन्ते इत्यर्थः ।

तद् यथा—

असृष्टा दोषमात्राभिः समग्रगुणगुम्फिता।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते॥ ६७५॥
समस्तात्युत्कटपदामोजःकान्तिसमन्विताम्।
गौडीयां तां विजानन्ति रीतिं रीतिविचक्षणाः॥६७६॥
आश्लिष्टश्लथभावाञ्च पुराणच्छायमाश्रिताम्।
मधुरां सुकुमारीञ्च पाञ्चालीं कवयो विदुः॥ ६७७॥
माधुर्य्यमपि वाञ्छन्तः प्रसादञ्च सुमेधसः।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते॥ ६७८॥

असृष्टेति। दोषमात्राभिः दोषलेशैरित्यर्थः कैरपि दोषैरिति यावत् न स्पृष्टा असृष्टा सर्वथा दोषवर्जितेति यावत् समग्रैः सर्वैः गुणैः ओजःप्रसादादिभिरित्यर्थः गुम्फिता ग्रथिता सर्वगुणसम्पन्नेति यावत् विपञ्चीस्वरः वीणास्वरः तस्येव सौभाग्य सुखश्राव्यतेति भावः यस्याः तथाभूता रीतिः रचनाविशेषः वैदर्भी विदर्भदेशीयानां प्रियत्वादिति सज्ञेति भावः इष्यते कविभिरिति शेषः॥६७५॥

समस्तेति। रीतिविचक्षणाः रचनालक्षणविद इत्यर्थः समस्तानि समासवङ्गलानि अत्युत्कटानि श्रुतिकर्कशानीति यावत् पदानि सुप्तिङन्तानि यस्यां तां ओजः तदाख्यगुणः कान्तिश्च गुणविशेषः प्रागुक्त इति भावः ताभ्यां समन्विता युक्ता तथोक्तां तां रीतिं गौडीयां गौड़देशीयानां प्रियत्वादिति सज्ञेति भावः विजानन्ति विदन्ति॥ ६७६॥

आश्लिष्टेति। आश्लिष्टः आलिङ्गितः गृहीत इत्यर्थः श्लथभावः शैथिल्यम् अदार्ढ्यमिति भावः यया तां पुराणा प्राचीना छाया पुराणच्छायं तत् आश्रिता ता प्राचीनजनादृतामिति यावत् सुकुमारां सुकोमलाम् अतएव मधुरां मनोहारिणीं रीतिं कवयः विद्वांसः पाञ्चालीं पञ्चालदेशीयानां प्रियत्वात् तथा सज्ञेति भावः विदुः जानन्ति॥ ६७७॥

माधुर्य्यमिति। सुमेधसः सुष्ठु मेधाशालिनः कवयः माधुर्य्यमपि प्रसादञ्च वाञ्छन्तः इच्छन्तः सन्तः लाटीयावन्त्ययोः रीत्योः तथा मागध्याञ्च रीत्यां क्वचित्

लाटीयावन्त्वयो रीत्यो र्मागध्याश्च क्वचित् क्वचित् ।
केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि ॥६७९॥
प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धिमत् ।
प्रसादि स्वभिधानञ्चाऽयमकं कृतिनां मतम् ॥

मा भूत् अलङ्कारतुल्यकक्षतया अर्थस्य प्राधान्यं गुणस्य तु श्लाघ्यविशेषगुणयोग उदात्तत्वमित्यादेः किमिति प्राधान्यं न भवति, दोषगुणानामतीवोल्लेखविधित्वेन प्राधान्यात् ॥६८०॥

सा वामनप्रसिद्धिर्लङ्घितनभसो वलिद्विषोऽद्यापि ।
मत्सरिणः खलु लोकाः मर्माण्येवानुबध्नन्ति ॥

अत्र दोषस्य यो गुणीभावः स ततोऽप्यधिकं प्रकाशते इति ॥६८१॥

क्वचित् समासवन्ति समस्तानि भूयांसि बहूलानि पदानि न प्रयुञ्जते न प्रयुक्तानि कुर्वन्ति । तथाच लाटी आवन्ती मागधी इति तिस्रो रीतयः माधुर्य्यप्रसादगुणशालिन्यः असमस्तबहुलाश्च प्रायेण भवन्तीति निष्कर्षः ॥ ६७८ ॥

केचिदिति । केचित् कवयः ओजः तदाख्यं गुणमभिधित्सन्तः अभिधातुमिच्छन्तः बहून्यपि पदानि समस्यन्ति समस्तानि कुर्वन्ति ॥ ६७९ ॥

प्रतीतेति । प्रतीताः प्रसिद्धाः शब्दा यत्र तत् ओजस्वि ओजोगुणशालि, सुश्लिष्टैः अनेकार्थैः पदैः सन्धिमत् सन्धिविशिष्टं तथा प्रसादि प्रसादगुणयुक्तं सुष्ठु अभिधानं अभिधेयमित्यर्थः यच्च तत् शोभनार्थयुक्तमित्यर्थः अयमकं यमकालङ्कारवर्जितं काव्यमिति शेषः कृतिनां निपुणानां कवीनामित्यर्थः मतम् इष्टमित्यर्थः । मा भूदिति । अलङ्कारतुल्यकक्षतया अलङ्कारस्य तुल्यबलतया । अर्थस्य वाच्यस्य प्राधान्यम् अङ्गित्वं माभूत् न भवतु ॥ ६८० ॥

सेति । लङ्घितम् अतिक्रान्तं नभः अन्तरीक्षं येन तथाभूतस्य वलिं द्वेष्टीति वलिद्विट् तस्य वलिं छलयत इत्यर्थः विष्णोरिति भावः सा वामनप्रसिद्धिः खर्वाकारतया हीनख्यातिः अद्यापि अस्तीति शेषः । खलु यतः मत्सरिणः विद्वेषिणः लोकाः मर्माण्येव अनुबध्नन्ति दोषप्रदर्शनाय उद्घाटयन्तीत्यर्थः ॥ ६८१ ॥

शब्दालङ्कारप्रधानो यथा,—

यच्चन्द्रकोटिकरकोरकहारभाजि
बभ्राम बभ्रुणि जटापटले हरस्य ।
तद्दः पुनातु हिमशैलशिलानिकुञ्ज-
प्राकारडम्बरविरावि सुरापगाऽम्भः ॥

अत्र अर्थप्राकट्य प्रसादः, विभवोत्कर्षः उदात्तता, मृदु-प्रस्फुटोन्मिश्रवर्णानामवैषम्यं समता, बन्धगाढ़ता ओर्ज्जित्यम् इत्यादिभ्यो गुणेभ्यः प्राधान्येन शब्दालङ्कारानुप्रासः प्रतीयते ॥६८२

अर्थालङ्कारप्रधानो यथा,—

आश्लेषिणः पृथुरतल्लमपीतशीतम्
आयामिनीर्घनमुदो रजनीर्युवानः ।
ऊर्व्योर्मुहुर्बलनबन्धनसम्भिलोल-
पादान्तसंवलितलीनपटाः स्वपन्ति ॥

अत्र बन्धविकटत्वमुदारता, श्लाघ्यविशेषणयोग उदात्तता, विभवोत्कर्ष औदार्य्यम्, दीप्तरसत्वम् कान्तिरित्यादिभ्यो गुणेभ्यः प्राधान्येन जातिरर्थालङ्कारः प्रतीयते ॥६८३॥

अत्रेति । दोषस्य वामनत्वरूपस्य यो गुणीभावः गुणरूपेण परिणाम इत्यर्थः नभोलङ्घनादिति भावः स गुणीभावः ततोऽपि दोषादपि अधिकं प्रकाशते राजते ।

यदिति । यत् चन्द्रकोटेः भालस्थितायाः चन्द्ररेखाया इत्यर्थः करकोरकाः किरणकलिकाः एव हारः तं भजते इति तथोक्ते चन्द्रकोटिकरजालहारशोभिनि इत्यर्थः बभ्रुणि पिङ्गले हरस्य जटाकलापे जटाजूटे बभ्राम भ्रान्तवत् हिमशैलस्य हिमाद्रेः शिला एव निकुञ्जानां लतागृहाणां प्राकाराः सालाः तेषु डम्बरम् उत्कटं यथा तथा विरावि निनादि तत् सुरापगायाः गङ्गायाः अम्भः जलं वः युष्मान् पुनातु पवित्रीकरोतु ॥ ६८२ ॥

आश्लेषिण इति । युवानः युवत्यश्च युवानश्चेति एकशेषात् युवानः तरुणी-सहिताः तरुणा इत्यर्थः आश्लेषिणः परस्परम् आलिङ्गनवन्त इत्यर्थः घनाः सान्द्रा

उभयालङ्कारप्रधानो यथा,—

अभ्युद्धृता वसुमती दलितं रिपूरः
क्षिप्रक्रमं कवलिता बलिराजलक्ष्मीः ।
अत्रैकजन्मनि कृतं यदनेन यूना
जन्मत्रये तदकरोत् पुरुषः पुराणः ॥

अत्र भक्तिपरिपाटिः प्रौढिः, बन्धविकिटत्वमुदारता, आशयोत्कर्षः उदात्तत्वम्, अर्थप्राकट्यं प्रसादः इत्यादिभ्यो गुणेभ्यः श्लेषोपसर्जना विशेषोक्तिः उभयालङ्कारः प्राधान्येन प्रतीयते ॥ रससङ्करोऽपि च अलङ्कारसङ्करवदेव रसाभासप्रशमानां तिलतण्डुलादिप्रकारेण सङ्करः षट्प्रकारो भवति ॥६८४॥

सुदः प्रीतयः सुरतजनिता इति भावः येषां तथोक्ताः सुद्भः पुनः पुनः ऊर्व्वोः ऊरुयुगलयोः वलनेन सञ्चालनेन यत् बन्धनं तस्य सन्धौ संयोगे लीलाः तरलाः पादान्तेषु सवलिताः सङ्गमिताः लीनाः संलग्नाः पटाः वसनानि येषां तथाभूताः सन्तः पृथुर्महान् रतक्लमः रमणजनितक्लान्तिः यस्मिन् तत् तथा पीतं शीतं शीतलं वस्तु पानीयादिकं सुरतक्लमापनयनायेति भावः यस्मिन् तत् यथा तथा आयामिनीः आयताः शीतकालीना इति भावः यामिनीः रात्रीः अत्यन्तसंयोगे द्वितीया । स्वपन्ति निद्रान्ति ॥ ६८३ ॥

अभ्युद्धृतेति । अनेन यूना युवकेन राज्ञा युवराजेन वा वसुमती पृथ्वी अभ्युद्धृता शत्रुभ्यः कृताधिकारिभ्यः प्रत्याहृता, अथच रसातलात् उद्धृता वराहरूपेणेति शेषः, रिपूणां शत्रूणाम् उरः वक्षस्स्थलं दलितं भग्नम् अथच रिपोः हिरण्यकशिपोः उरः दलितं विदारितं नखैः नृसिंहरूपेणेति शेषः तथा क्षिप्रक्रमं झटितिक्रमेणेत्यर्थः बलिनां बलवता राज्ञां लक्ष्मीः कवलिता ग्रस्ता आत्मसात्कृतेत्यर्थः अथच क्षिप्रः झटिति प्रकटितः क्रमः पदविक्षेपः स्वर्गादाविति भावः यस्मिन् तद् यथा तथा बलिराजस्य दैत्यपतेः वैरोचनस्य लक्ष्मीः त्रिलोकाधिपत्यश्रीः कवलिता ग्रस्ता प्रत्याहृत्य इन्द्राय दत्तेति यावत् वामनरूपेणेति शेषः । अतः अत्र अस्मिन् एकस्मिन् जन्मनि यत् कृतं पुराणः पुरुषः आदिपुरुषः नारायण इत्यर्थः जन्मनां त्रये प्रागुक्तवराहाद्यवताररूपे तत् पृथिव्युद्धरणादिकमित्यर्थः अकरोत् कृतवान् ॥ ६८४ ॥

तत्र भावानां तिलतण्डुलप्रकारो यथा,—

न्यक्कारो हृदि वज्रकील इव मे तीव्रः परिस्पन्दते
घोरान्धे तमसीव मज्जति मनः सम्मीलितं लज्जया।
शोकस्तातविपत्तिजो दहति मां नास्त्येव यस्मिन् क्रिया
मर्माण्येव पुनश्छिनत्ति करुणा सीतां वराकीं प्रति॥

अत्र अमर्षलज्जाशोकानुकम्पाः समकक्षतया मिथस्तिल-तण्डुलवत् सङ्कीर्य्यमाणा रामस्य विरहिणो वागारम्भानुरागोक्तिपरतया प्रतीयन्ते॥ ६८५॥

क्षीरनीरप्रकारो यथा,—

मानोन्नतेत्यसहनेत्यतिपण्डितेति
मय्येव धिक्कृतिरनेकमुखी सखीनाम्।
दाक्षिण्यमात्रमसृणेन विचेष्टितेन
धूर्त्तस्य तस्य तु गुणा नु परं जयन्ति?॥

श्लेषेत्यादि। श्लेषोपसर्जना श्लेषः अर्थश्लेष इत्यर्थः उपसर्जनम् अङ्गं यस्याः तथाभूता श्लेषोत्थापितेत्यर्थः।

न्यक्कार इति। मे मम हृदि हृदये वज्रकील इव कुलिशशङ्कुरिव तीव्रः दारुणः न्यक्कारः आत्मावमानरूपः सीताहरणजनित इति भावः परिस्पन्दते परिस्फुरति। लज्जया एका भार्य्यापि रक्षितुं न पारितेति कथं लोकसमाजे मुखं दर्शयामीति भावः। सम्मीलितं मुद्रितं मनः घोरान्धे तमसीव तीव्रे गाढान्धकारे इवेत्यर्थः मज्जति निमग्नं भवति। तातस्य पितुः विपत्तिः मरणं तज्जात: शोकः दुःखं मां दहति ज्वलयतीत्यर्थः यस्मिन् शोके क्रिया प्रतीकार इत्यर्थः नास्त्येव नैव विद्यते। तथा वराकीं तपस्विनीं निर्दोषामित्यर्थः सीतां प्रति करुणा अनुकम्पा मर्माणि हृदयादिसन्धिस्थानानि एव पुनः पुनरित्यर्थः छिनत्ति निकृन्ततीत्यर्थः। तातविपत्तिज इत्यत्र तार्क्ष्यविपत्तिज इति पाठे तार्क्ष्यस्य गरुड़सुतस्य जटायुषः विपत्तिज इत्यर्थः॥ ६८५॥

मानोन्नतेति। त्वं मानेन उन्नता उद्धता इति असहना असहिष्णुरिति

अत्र सखीषु रोषः प्रियगुणेषु च असूया नीरक्षीरवन्मिथः सङ्कीर्य्यमाणौ मानिनीवागारम्भपरतया प्रतीयेते॥६८६

छायादर्शप्रकारो यथा,—

आः सीते ! पतिगर्वविभ्रमभरप्रान्तभ्रमद्बान्धव-
प्रध्वंसस्मितकान्तिमत् तव तदा जातं यदेतन्मुखम् ।
सम्प्रत्येव हठात् तदेव कुरुते केशोच्चयोत्कर्षण-
त्रासोत्तानितलोललोचनपतद्बाष्पप्लुतं रावणः ॥

अत्र क्रोधाभासे छायादर्शन्यायेन रत्याभासः सङ्कीर्य्यते ॥ ६८७ ॥

नरसिंहप्रकारो यथा,—

किं हारि दैवहतिके ! सहकारकेण
संवर्द्धितेन विषपादप एष पापः ।

अतिपण्डिता अतिशयेन पण्डितम्मन्येत्यर्थः इति इत्थं सखीनाम् अनेकसुखी अनेकप्रकारा धिक्कृतिः धिक्कारः तिरस्कारः इति यावत् मय्येव न तु तस्मिन्निति एवकारेण द्योत्यते अस्ति। मामेव सख्यः धिगिति निन्दन्तीति भावः तस्य तु धूर्त्तस्य कितवस्य मत्कान्तस्येति भावः गुणाः दाक्षिण्यमात्रेण सारल्यमात्रेण आपाततः प्रयुक्तेन सामान्येन सारल्येन मसृणं कोमलं तेन विचेष्टितेन व्यवहारेण परम् अत्यर्थं जयन्ति मु ? उत्कर्षेण वर्त्तन्ते किम् ? ॥ ६८६ ॥

आ इति। आ इत्याक्षेपे। सीते ! यत् एतत् तव मुखं पत्युः स्वामिनो गर्वेण अस्मत्पक्षविजयजनितेनेति भावः विभ्रमभरम् अतिस्फूर्त्तिमदित्यर्थः प्रान्ते समन्तत इत्यर्थः भ्रमद्भिः विचरद्भिः बान्धवैः वानरसैन्यैः यः प्रध्वंसः अस्मत्पक्षाणाम् इति भावः सस्मित मृदुहासयुतं तथा कान्तिमत् कान्त्युज्ज्वलमित्यर्थः तदा प्रागिति भावः जातं वृत्तं हर्षातिशयादिति भावः सम्प्रत्येव इदानीमेव रावणः तदेव मुखं हठात् केशानाम् उच्चयस्य सङ्घस्य उत्कर्षणेन छेदनार्थं मत्कृतेनेतिः भावः यः त्रासः भयं तेन उत्तानिताभ्याम् उन्नमिताभ्यां लोलाभ्यां चञ्चलाभ्यां लोचनाभ्यां नेत्राभ्यां पतद्भिः बाष्पैः अश्रुभिः प्लुतं व्याप्तं कुरुते विदधाति ॥ ६८७ ॥

अस्मिन् मनागपि विकासविकारभाजि
भीमा भवन्ति मदनज्वरसन्निपाताः ॥

अत्र नरसिंहजाताविव सिंहनरशरीरभागारम्भानुसारेण सखीविषयानुकम्पा सहकारविषया च कुत्सा मिथः सङ्कीर्यते । तथा हि दैवहतिकेतिशब्देन लब्धायां नियत्युपाधौ सर्वथैव अनुकम्प्यमानतायां सहकारसम्बर्द्धननिबन्धनत्वमेव अस्याः कना द्योत्यते । एवं नाम त्वं दैवोपहताऽसि यत् सहकारविषपादपं हारि सम्बर्द्धयसि विषपादपशब्देन लब्धायां सहकारस्य सर्वथैव कुत्सायां विकासकाले कामिनीनामसह्यस्मरज्वरसन्निपातहेतुकमेव अस्याः कन्प्रत्ययेन प्रत्याय्यते ॥ तदुक्तं,—

कुत्सितत्वेन कुत्सावान् सम्यग् वाऽपि हि कुत्सितः ।
स्वशब्दाभिहिते केन विशिष्टोऽर्थः प्रतीयते ॥
न च साम्प्रतिकी कुत्सा शब्दाभेदे प्रतीयते ।
पूज्यते कुत्सितत्वेऽपि प्रशस्तत्वेऽपि कुत्स्यते ॥६८८॥

तद् यथा,—

एक इह जीवलोके जीवति विरूपो न रूपी ।

किमिति प्राग्व्याख्यातम् । अत्रेति—कना कन्प्रत्ययेनत्यर्थः ।

कुत्सितत्वेनेति । कुत्सितत्वेन कुत्सा जाता अस्येति कुत्सितः तस्य भावः तेन कुत्सावान् कियदंशे कुत्सित इत्यर्थः अपि वा अथवा सम्यक् कुत्सितः सर्वथैव कुत्सित इत्यर्थः । स्वस्य शब्दः अभिधेयार्थप्रतिपादकं पदमित्यर्थः तेन अभिहिते उक्ते वस्तुनि कना कन्प्रत्ययेन विशिष्टः अभिधेयादतिरिक्त इति यावत् अर्थः व्यङ्ग्यादिकं प्रतीयते बुध्यते । शब्दाभेदे शब्दस्य अभिन्नतायां साम्प्रतिकी प्राथमिकी प्रथमभवेत्यर्थः कुत्सा नच प्रतीयते पर्य्यालोचनेन प्रतीयत एवेत्यर्थः । कुत्सितत्वेऽपि पूज्यते आद्रियते इति यावत् तथा प्रशस्तत्वेऽपि प्रशंसायोग्यत्वेऽपि कुत्स्यते निन्द्यते क्वचिदिति शेषः ॥ ६८८ ॥

यः प्रेममयपाशे मृगवत् न मृगीदृशां पतति ॥६८९॥

पांसूदकप्रकारो यथा,—

मा गर्वमुद्वह कपोलतले चकास्ति
कान्तस्वहस्तलिखिता मम मञ्जरीति ।
अन्यापि किं न सखि ! भाजनमीदृशीनां ?
वैरी न चेद्भवति वेपथुरन्तरायः ॥

अत्र स्वसौभाग्यवर्णना मृत्पिण्डे पांसूदकयोरिव अविभागमापाद्यमानयोः असूयागर्वयोः सङ्कर उपपद्यते ॥६९०॥

चित्रवर्णप्रकारो यथा,—

विरोधो विश्रान्तः प्रसरति रसो निर्वृतिघनः
तदौद्धत्यं क्वापि व्रजति विनयः प्रह्वयति माम् ।

एक इति । इह अस्मिन् जीवलोके संसारे एक एव विरूपः कुत्सितरूपः जीवति, रूपी रूपवान् न जीवतीति शेषः । यः विरूपः मृगीदृशां मृगाक्षीणां प्रेममयपाशे प्रेममयबन्धनजाले न पतति । अत्र विरूपः कुत्सितोऽपि पूज्यते, रूपी तु प्रशस्तरूपोऽपि कुत्स्यते इति बोध्यम् ॥ ६८९ ॥

मा गर्वमिति । मम कपोलतले गण्डदेशे कान्तस्य प्रियस्य स्वहस्तेन लिखिता चित्रिता मञ्जरी तदाकाररचनाविशेष इत्यर्थः चकास्ति राजते इति मत्वेति शेषः गर्वम् अहङ्कारं मा वह न कुरु । हे सखि ! चेत् यदि वेपथुः कम्पः प्रियस्पर्शजनितसत्त्वोदयादिति भावः अन्तरायः विघ्नः वैरी शत्रुर्न भवति, तदा अन्यापि अपरापि नारीति शेषः मद्विधेति भावः ईदृशीनाम् एतादृशीनां मञ्जरीणां भाजनं पात्रं न ? अपि तु भाजनमेवेत्यर्थः । कान्तस्पर्शे अस्माकमेतादृक् कम्पः स्यात् येन तादृशमञ्जर्यादिचित्रीकरणं कान्तस्य अवसरो न स्यादिति भावः ॥

अत्रेत्यादि । स्वस्य सौभाग्यं प्रियवाल्लभ्यं तस्य वर्णना एव मृत्पिण्डे वर्तुलाकारमृद्वय इत्यर्थः तस्मिन् पांसूदकयोरिव वालुकासलिलयोरिव अविभागमापद्यमानयोः कियत्यो वालुकाः कियन्ति वा सलिलानीति विभागमप्राप्नुवतोरित्यर्थः असूयागर्वयोः विद्वेषाहङ्कारयोः सङ्करः सम्मेलनम् अविभागेनेति भावः ॥ ६९० ॥

झटित्यस्मिन् दृष्टे किमपि परवानस्मि यदि वा
महार्घस्तीर्थानामिव हि महतां कोऽप्यतिशयः ? ॥

अत्र वीरौद्धत्यस्वातन्त्र्यरसानामानन्दप्रशमपारवश्यरसैः तिरस्क्रियमाणानां पटवर्णनीलादिभिः सितादीनाम् इव प्रशमारामदर्शनप्रभावोद्भवे लवस्य विस्मयातिशयप्रशमजन्मनि वागारम्भानुभावोपमोद्भवे चित्रवर्णवत् सङ्कीर्यमाणाः समुपलभ्यन्ते ॥ अथ रसगुणसङ्करः । ननु च दोषहानमिव गुणोपादानमपि नियमनिर्वर्त्यम्, अलङ्कारयोग इव रसावियोगोऽपि अवश्यं विधेयः । कदाचित् अलङ्कारयोगोऽपि त्यज्यते न तु रसावियोगो गुणयोगश्च व्यभिचरितसम्बन्धौ इति । अत्रोच्यते, यत्र चित्रवर्णवत् नरसिंहवत् पांसूदकवच्च अवयवावयविन्यायेन जातिव्यक्तिन्यायेन च अपृथक्प्रयत्ननिर्वर्त्यानां गुणरसानां वाक्ये सन्निवेशः तत्र सङ्करव्यवहारो न प्रवर्त्तते ॥६८१॥

विरोध इति । अस्मिन् महापुरुषे इति भावः झटिति सहसा दृष्टे सति विरोधः विवादः विश्रान्तः अपगतः । निर्व्याजा अन्तरानन्देनेत्यर्थः घनः सान्द्रः रम रागः प्रसरति प्रस्फुरति । तत् प्राक् प्रकटीकृतमिति भावः औद्धत्य तीक्ष्णत्वं क्वापि व्रजति गच्छति विलीयते इत्यर्थः । विनयः सदाचारनियमः मां प्रह्वयति नमयति नम्रं करोतीत्यर्थः । किमपि अनिर्वचनीयं यथा तथा परवान् पराधीनः अस्मि भवामि कथं पराधीनो भवामीति न निर्वक्तुं शक्यते इति भावः । यदि वा पक्षान्तरे तीर्थानां पुण्यनिचयवतां मध्ये महान् अर्घो मूल्यं यस्य स महार्घः महाप्रभाव इत्यर्थः वा महतां कोऽपि अतिशयः अतीव महान् वा इह अस्मिन् स्थाने उपस्थितः किम् ? अयमिति शेष ॥

अचेत्यादि । तिरस्क्रियमाणानां व्यवधीयमानानां पटस्य वसनस्य वर्णा ये नीलादयः तैः सितादीनामिव श्वेतवर्णादीनामिवेत्यर्थः ॥

अथेति । दोषहानमिव दोषपरित्याग इव । नियमनिर्वर्त्यं नियमेन अवश्य मित्यर्थः निर्वर्त्यं सम्पादनीयमित्यर्थः दोषाः त्यज्यन्ते एव गुणास्तु गृह्यन्ते

तद् यथा,—

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः ।
येन माद्यन्ति धीमन्तो मधुनेव मधुव्रताः ॥६९२॥
कामं सर्वोऽप्यलङ्कारः रसमर्थे निषिञ्चति ।
तथाप्यग्राम्यतैवैनं भारं वहति भूयसा ॥६९३॥
शृङ्गार एव मधुरः परप्रह्लादनो रसः ।
तन्मयं काव्यमाश्रित्य माधुर्यं प्रतितिष्ठति ॥६९४॥
शृङ्गारे विप्रलम्भाख्ये करुणे च प्रकर्षवत् ।
माधुर्यमार्द्रतां याति यतस्तत्राधिकं मनः ॥६९५॥

एवेति निष्कर्षः। रसावियोगः रसैः शृङ्गारादिभिः अवियोगः वियोगाभाव इत्यर्थः। व्यभिचरितसम्बन्धौ इत्यत्र अकारप्रश्लेषः प्रामादिकः अव्यभिचरितसम्बन्धौ इत्येव पाठः तथा च न व्यभिचरितः न वियुक्तः सम्बन्धो ययोस्तौ रसावियोगगुणयोग एतौ इत्यन्वयः। अत्रोच्यते इति अवयवावयविन्यायेन अङ्गाङ्गिभावेनेति भावः। जातिव्यक्तिन्यायेन आधाराधेयभावेनेति भावः। अपृथक्प्रयत्ननिर्वर्त्यानाम् एकप्रयत्नसम्पाद्यानाम् ॥ ६९१ ॥

मधुरमिति। रसवद्वाचि रसविशिष्टे वाक्ये मधुरं माधुर्यगुण इत्यर्थः तथा वस्तुनि मधुरे इति भावः रसस्य स्थितिः अस्तीति शेषः। येन मधुरेण रसवता च वाक्येन धीमन्तः महामतयः कवय इति शेषः मधुना मधुव्रता इव भ्रमरा इव माद्यन्ति मत्ता भवन्ति अतीव उल्लसन्तीति यावत् ॥ ६९२ ॥

काममिति। सर्वोऽपि अलङ्कारः अर्थे अभिधेये वस्तुनि कामं सम्यक् रसं निषिञ्चति अर्थयति, तथापि अलङ्कारस्य रसनिषेककर्तृत्वेऽपि अग्राम्यता ग्राम्यतादोषराहित्यमेव एनं रसं भूयसा बाहुल्येन भारं भारस्वरूपमित्यर्थः वहति धत्ते ॥ ६९३ ॥

शृङ्गार इति। शृङ्गारः रस एव मधुरः मनोहरः अतएव परम् अत्यर्थं प्रह्लादयतीति प्रह्लादनः आनन्दजनक इत्यर्थः। तन्मय शृङ्गारमयं काव्यम् आश्रित्य माधुर्यं तदाख्यो गुणः प्रतितिष्ठति अवतिष्ठते ॥ ६९६ ॥

शृङ्गारे इति। माधुर्यं विप्रलम्भाख्ये शृङ्गारे करुणे च रसे इति शेषः प्रकर्षवत्

रौद्रादयो रसा दीप्ता लक्ष्यन्ते काव्यवर्त्तिनः ।
तद्व्यक्तिहेतू शब्दार्थौ ओजोऽधिष्ठाय तिष्ठति ॥६९६॥
समर्थकत्वं वाक्यस्य यत् तु सर्वरसान् प्रति ।
स प्रसादो गुणो ज्ञेयः सर्वसाधारणक्रियः ॥६९७॥

सेयं गुणानां रसारम्भकत्वे सङ्करप्रसिद्धिः । एवं रसानां गुणारम्भकत्वेऽपि । तद् यथा,—रूढाहङ्कारतौर्जित्यं भावयतो वाक्यवृत्तिर्भाविकत्वम्, क्रोधादावपि तीव्रता माधुर्य्यम्, आशयोत्कर्षः उदात्तत्वम्, अर्थस्याभीष्टतन्मयता प्रेयः, दीप्तरसत्वं कान्तिरिति । यत्र तु तिलतण्डुलवत् क्षीरनीरवच्छायादर्शवत् तुल्यकक्षतयैव गुणरसानां वाक्यैः पृथक्प्रयत्ननिर्वर्त्यानां विनिवेशः तत्र सङ्करव्यवहारः प्रवर्त्तते एव ॥ स षोढा, गुणप्रधानः, रसप्रधानः, उभयप्रधानः, उभयाप्रधानः, गुणाधिकः, रसाधिकः इति ॥

प्रकृष्टं सत् आर्द्रतां द्रवीभूतता याति प्रापयतीत्यर्थः अन्तर्भूतणिजर्थोऽयं धातुः । यतः यस्मात् हेतोः तत्र माधुर्य्ये रमे वा मनः सामाजिकानामिति भावः अधिकं प्रवर्त्तते इति शेषः ॥ ६९५ ॥

रौद्रादय इति । - रौद्रादयः रसाः काव्येषु वर्त्तन्ते इति काव्यवर्त्तिनः काव्यान्तर्गता इत्यर्थः दीप्ताः तीव्रत्वेन प्रकाशमानाः लक्ष्यन्ते अनुभूयन्ते । ओजः तदाख्यो गुणः तेषां रौद्रादीनां व्यक्तेः प्रकटस्य हेतू कारणभूतौ शब्दार्थौ अधिष्ठाय आश्रित्य तिष्ठति वर्त्तते ॥ ६९६ ॥

समर्थकत्वमिति । सर्वरसान् प्रति सर्वेषु रसेष्वित्यर्थः वाक्यस्य समर्थकत्वं सम्पादकत्वं परिपोषकत्वमिति यावत् यत् स प्रसादो नाम सर्वसाधारणानां प्रियः मनोरञ्जकः गुणः ज्ञेयः वेद्यः ॥ ६९७ ॥

सेयमिति । रसारम्भकत्वे रसपरिपोषकत्वे सतीत्यर्थः । एवम् इत्थं रसानां गुणारम्भत्वेऽपि सङ्करप्रसिद्धिरिति शेषः ।

तेषु गुणप्रधानो यथा,—

अत्रान्तरे ललितहारलतानितम्ब-
संवाहनस्खलितवेगतरङ्गिताङ्गी ।
देवी व्यपास्य शयनं धृतमानतन्तुः
अन्तःपुरं गतवती सह सौविदल्लैः ॥

अत्र अर्थप्राकट्यौदार्य्ययोः अर्थशब्दगुणयोः प्राधान्यं भवति इति गुणप्रधानः ॥ ६९८ ॥

रसप्रधानो यथा,—

अस्मिन्नगृह्यत पिनाकभृता सलीलम्
आरब्धवेपथुरधीरविलोचनायाः ।
विन्यस्तमङ्गलमहौषधिरीश्वरायाः
स्रस्तोरगप्रतिसरेण करेण पाणिः ॥

अत्र साध्यविशेषणयोग उदात्तत्वम्, बन्धविकटत्वम् उदारता, अर्थप्राकट्यं प्रसादः, दीप्तरसत्वं कान्तिरिति गुणाः साध्वसविलासानुरागसङ्गमरसैः अतिशय्यन्ते इति रसप्रधानः ॥ ६९९ ॥

अत्रेति । अत्रान्तरे अस्मिन् अवकाशे ललिता शोभना हारलता रसनाकलापः तस्या नितम्बे संवाहनेऽपि सम्यग्धारणेऽपि यत् स्खलितं द्रुतगतिवशात् च्युतिः तस्य वेगेन तरङ्गितं चञ्चलितम् अङ्गं यस्याः तथोक्ता धृतः गृहीतः मानः प्रणयकोप एव तन्तुः सूत्रं यया तादृशी मानवतीत्यर्थः देवी महिषी शयनं शय्यातलं व्यपास्य परित्यज्य सौविदल्लैः कञ्चुकिभिः सह सौविदल्लाः कञ्चुकिन इत्यमरः अन्तःपुरं गतवती जगाम ॥ ६९८ ॥

अस्मिनिति । अस्मिन् प्रदेशे पिनाकभृता पिनाकिना हरेणेत्यर्थः अधीरे चञ्चले विलोचने यस्याः तथाभूतायाः ईश्वरायाः पार्वत्याः आरब्धः धृतः वेपथुः कम्पो येन तथोक्तः सत्त्वोदयादिति भावः विन्यस्तः निहितः मङ्गलाय महौषधिः

उभयप्रधानो यथा,—

आपातमात्ररसिके ! सरसीरुहस्य
किं बीजमर्पयितुमिच्छसि वापिकायाम् ? ।
कालः कलिर्जगदिदं न कृतज्ञम् अज्ञे !
स्थित्वा हरिष्यति तवैव मुखस्य शोभाम् ॥

अत्र भणितिविशेषः उक्तिः, संविधाने सुसूत्रता श्लेषः इति शब्दगुणयोः लावण्यविलासवर्णनीयरसयोश्च तुल्यकक्षतया निर्देश इति उभयप्रधानः ॥ ७०० ॥

उभयाप्रधानो यथा,—

अभिनवबधूरोषस्वादुः करीषतनूनपात्
असरलजनाश्लेषक्रूरस्तुषारसमीरणः ।
गलितविभवस्याज्ञे वाद्य द्युतिर्मसृणा रवेः
विरहिवनितावक्त्रक्लैव्यं बिभर्त्ति निशाकरः ॥

यत्र तादृशः पाणिः करः सस्तः भष्टः उरगः एव प्रतिसरः कौतुकसूत्रं यस्मात् तेन पार्वती विभेतीति भियेति भावः तादृशेन करेण हस्तेन अगृह्णत गृहीतः । अत्र भगवान् हरः पार्वतीं परिणीतवान् इति निष्कर्षः ॥ ६९९ ॥

आपातेति । हे आपातमात्ररसिके ! सरसीरुहस्य नाम श्रवणमात्रानुरागवति । वापिकायां सरसि सरसीरुहस्य कमलस्य बीजम् अर्पयितुम् आधातुं किं कथम् इच्छसि ? कालः अयमिति शेषः कलिः अधर्मपूर्ण इति भावः हे अज्ञे ! निर्बोधे । इदं जगत् अकृतज्ञं कृतमुपकारं न जानातीति तथा, इदं सरसीरुहं स्थित्वा तव वापीम् अधिष्ठाय तवैव मुखस्य शोभां श्रियं हरिष्यति चोरयिष्यति ॥

अत्रेति । भणितिविशेषः वाग्विन्यासविशेषः उक्तिः तदाख्यः गुणः । संविधाने सम्प्रयोगे सुसूत्रता शोभना सूचना श्लेषः तदाख्यो गुणः । लावण्येति । लावण्यविलासाभ्यां वर्णनीययोः रसयोः शृङ्गारयोरित्यर्थः ॥ ७०० ॥

अभिनवेति । अद्य अस्मिन् शीतर्तावेति भावः । करीषतनूनपात् शुष्क-

अत्र स्वादुक्रूरमसृणवक्त्रक्लैव्यमित्यन्यधर्माणामन्यत्रारोपणं समाधिः, अभिनववधूरोषादीनां चतुर्णामप्यर्थानां स्वाद्वादीनाञ्च लक्षणादिलक्षितानां प्राकट्यं प्रसादः, अभिनववधूरोषस्वादुः करीषतनूनपात् इति विशेषणविशेष्याणाम् उपक्रमेण निर्वहणं रीतिः, पादचतुष्टये चतुर्णामर्थानां विभज्य समत्वेन निवेशः सम्मितत्वमिति चत्वारो गुणाः चत्वारश्च रत्यमर्षविषादजुगुप्सात्मानो रसाः कालावस्थानिवेदनपरत्वेन प्रतीयन्ते इत्युभयाप्रधानः ॥ ७०१ ॥

गुणाधिको यथा,—

अजननिरस्तु विभूतेरपूरणिः भवतु सर्वकामानाम् ।

गोमयाग्निः करीषं शुष्कगोमयमिति ज्वलनो जातवेदास्तनूनपादिति चामरः । अभिनवायाः नवोढायाः वध्वाः रोषः प्रणयकोप इति यावत् तद्वत् स्वादुः सुखकर इत्यर्थः तुषारसमीरणः शीतवायुः असरलस्य क्रूरस्य जनस्य आश्लेषः आलिङ्गनं तद्वत् क्रूरः निष्ठुरः दुःसह इति यावत् । रवेः सूर्यस्य द्युतिः प्रभा गलितं गतः विभवः सम्पत् यस्य तथाभूतस्य निर्धनस्येत्यर्थः प्रभोरिति शेषः आर्द्रेव आर्द्रेश इव मसृणा कोमला, मृदोत्यर्थः निर्धनस्य प्रभोराज्ञा प्रायेण न मान्यते तथा रवेः प्रभा मृदुतया अङ्गं न उत्तेजयतीति भावः । निशाकरः चन्द्रः विरहिण्याः वनितायाः स्त्रियाः वक्त्रस्य वदनस्य क्लैव्यं क्लीवतां दैन्यमिति भावः बिभर्त्ति धत्ते ।

अत्रेति । लक्षणादिलक्षितानां लक्षणा मुख्यार्थबाधे अन्यार्थप्रतिपादिनी वृत्तिः उक्तञ्च दर्पणे । मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते । रूढेः प्रयोजनाद्वाऽसौ लक्षणा शक्तिरर्पितेति । आदिपदेन व्यञ्जनादीनां ग्रहणम् । तथा च लक्षणादिभिः लक्षितानां प्रतिपादितानामित्यर्थः । रत्यमर्षेति रतिः अमर्षः विषादः जुगुप्सा ता: आत्मानः जीवनाधायकधर्मा येषां तथाविधाः रसाः शृङ्गारवीरकरुणवीभत्साख्या इति भावः । कालावस्थानिवेदनपरत्वेनेति कालावस्थानिवेदनस्यैव प्राधान्यमिति भावः । तस्मात् उभये गुणा रसाश्चेत्यर्थः अप्रधाना यत्र तादृशः अयं सन्दर्भ इति शेषः ॥ ७०१ ॥

मा याचिषि मा सेविषि मा सहिषि पराभवं धनिनः ॥

अत्र सुप्तिङुत्पत्तिः सौशब्द्यं वाक्यानां परिपूर्णत्वमर्थव्यक्तिः, अर्थस्य प्राकट्यं प्रसादः, विभूतेरनुत्पत्तौ कामाः न पूर्यन्ते, अपरिपूर्णकामो याचते, याचमानस्तदनाप्नुवन् धनिनः सेवते, सेवमानस्तु तैः परिभूयते इत्युत्पत्त्यादिक्रियाक्रमो रीतिः इति गुणाश्चत्वारः। रसस्तु निर्वेदः एवैकः इति गुणाधिकः ॥ ७०२ ॥

रसाधिको यथा,—

कमलमनभ्रसि कमले च कुवलये तानि कनकलतिकायाम् ।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ॥

अत्र कमलमनभ्रसि कमले च कुवलये तानि कनकलतिकायाम् इत्यन्यधर्माणामन्यत्र आरोपणं समाधिः, सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् इति अश्लीलामङ्गलार्थौ दोषा-

---

अजननिरिति । विभूतेः सम्पदः अजननिः अनुत्पत्तिः अस्तु भवतु, विभूतिर्नैव उत्पद्यतामित्यर्थः सर्वे कामाः मनोरथाः तेषां अपूरणिः अपूर्णता भवतु सर्वथा कामपूरणं न भवतु इत्यर्थः आक्रोशे अनिप्रत्ययः धनिनः मा याचिषि धनिसमीपे याच्ञां मा कुरु, मा सेविषि धनिनां सेवां मा कुरु, धनिनः पराभवं निकारं मा सहिषि मा सहस्व । धनिन इति याचिषि सेविषि इत्येतयोः कर्मतया द्वितीयाबहुवचनान्तम् । तृतीयवाक्ये अपादानतया पञ्चम्येकवचनान्तमिति विभक्तिविपरिणामेन अन्वेतीति बोध्यम् ॥

अत्रेति । सुप्तिङुत्पत्तिः सुपां शब्दीनां विभक्तीनां तिङां धातवीनां विभक्तीनाञ्च उत्पत्तिः नैपुण्येन विनियोग इत्यर्थः सौशब्द्यं सुष्ठु शब्दप्रयोगः तदाख्यो-गुण इति यावत् । रसस्तु निर्वेद एव निर्वेदप्रधानः शान्त इति भावः ॥ ७०२ ॥

कमलमिति । अनभ्रसि निर्जले देशे इति शेषः कमलं पद्मम्, कमले च कुवलये नीलोत्पले द्वे इति शेषः । तानि कमलं कुवलये चेति त्रीणि इत्यर्थः कनक-

वपि गुणौ। श्लाघ्यविशेषणगुणयोगः उदात्तत्वम्, विकटबन्धत्वम् उदारता, उपक्रमाभेदो रीतिः, अर्थप्राकट्यं प्रसादः, अनिष्ठुरता सौकुमार्य्यम्, अभीष्टतमता प्रेयः, दीप्तरसत्वं कान्तिः इति गुणा दश, रसास्तु रत्युत्कर्षहर्षधृत्युत्कण्ठावेगविस्मयवितर्कचिन्ता-चपलता-हासोत्साहस्तम्भगद्गदोन्माद-व्रीडाऽवहित्थाभयशङ्काः विंशतिः वागारम्भानुभवे शृङ्गारिणः प्रियाचाटुकारस्य कस्यचित् प्रतीयन्ते इति रसाधिकः। रसालङ्कारसङ्करोऽपि एतेन व्याख्यातः ॥ ७०३ ॥

रसवन्ति हि वस्तूनि सालङ्काराणि कानिचित्।
एकेनैव प्रयत्नेन विवर्त्यन्ते महाकवेः ॥ ७०४ ॥
रसाक्षिप्ततया यस्य बन्धः शक्यक्रियो भवेत्।

लतिकायां स्वर्णलतायाम्। सा च कनकलतिका सुकुमारा सुकोमला सुभगा सुरम्या च इत्यर्थः इति एवं रूपेत्यर्थः का उत्पातपरम्परा उत्पातराजिः का? कामपि नायिका दृष्टा कस्यापि कामिनः तद्वदनं पद्मं, तत्र नयने नीलोत्पले, तदङ्गं कनकलता इति अध्यासादतिशयोक्तिरलङ्कार इति बोध्यम्। केवलं वदनं कमलमित्येक उत्पातः तत्र नयने कुवलये इति द्वितीयः उत्पातः, तत्सर्वं कनकलतिकारूपे अङ्गे इति तृतीयः उत्पातः। तच्च कनकलतिकारूपमङ्गं सुकोमलं सुभगञ्चेति चतुर्थः उत्पातः इत्यस्या उत्पातपरम्परात्वम्। उत्पातश्च दर्शनादेव मनसो नितरां हरणेन व्यथादाय्कत्वधर्मादिति भावः ॥

अत्रेत्यादि। अश्लीलामङ्गलार्थौ सुभगशब्दोऽश्लीलार्थः उत्पातपरम्परेति शब्दः अमङ्गलार्थ इति द्वौ दोषौ अपि दोषत्वेन निर्दिष्टौ अपीत्यर्थः। गुणौ गुणरूपेण गणनीयौ इत्यर्थः। रसास्तु रसधर्मास्तु इत्यर्थः ॥ ७०३ ॥

रसेति। कानिचित् नतु सर्वाणीति भावः रसवन्ति सरसानि वस्तूनि वृत्तानि सालङ्काराणि हि अलङ्कारसहितानि एव महाकवेः एकेनैव प्रयत्नेन प्रयासेन रचना विशेषस्येति भावः विवर्त्यन्ते सम्पाद्यन्ते विरच्यन्ते इति यावत् ॥ ७०४ ॥

रसेति। रसाक्षिप्ततया रसायुक्तत्वेन यस्य सन्दर्भस्येति शेषः बन्धः विरचनं

अपृथग्यत्ननिर्वर्त्यः सोऽलङ्कारः प्रकृष्यते ॥७०५॥

रसभावादिविषयविवक्षाविरहे सति ।

अलङ्कारनिबन्धो यः स कविभ्यो न रोचते ॥

तत्र रसालङ्कारसङ्करो द्विधा—रसप्रधानः, अलङ्कारप्रधानश्च ॥ तयोर्योऽनुभविता एव वर्ण्यते स रसप्रधानः । तत्र हि अलङ्कारवतो वाक्यस्य वागारम्भानुभावत्वं भवति ॥७०६॥

तत्र रतौ उपमायाः सङ्करो यथा,—

तीए दंसणसुहए पणअक्खलणजणिओ मुहम्मि मणहरे ।

रोसो वि हरइ हिअअं मिअअङ्को व्व मिअलञ्छणम्मि णिसण्णो ॥

अत्र उपमातिरस्कारेण रसवतो हरेर्वचसि वागारम्भरूपे रुक्मिणीप्रदत्तपारिजातमञ्जरीविलोकनप्रभवं सत्यभामाया एव रामणीयकं प्राधान्यतः प्रतीयते ॥ ७०७ ॥

शक्या क्रिया यस्य तथाविधः सुकर इत्यर्थः भवेत्, अपृथक् यत्नेन अभिन्नेन प्रयासेन इत्यर्थः निर्वर्त्यः प्रयोज्य इति यावत् सः अलङ्कारः प्रकृष्यते प्रकृष्टतया ख्यायते इत्यर्थः रसासंवलितोऽलङ्कारः प्रशस्त इति भावः ॥ ७०५ ॥

रसेति । रसभावादीनां विषयः प्रतिपाद्यवस्तु इत्यर्थः तस्य विवक्षा वक्तुमिच्छा तस्या विरहे असद्भावे सति यः अलङ्कारनिबन्धः अलङ्कारसमावेशः, स कविभ्यः अनेकेभ्य इति भावः न रोचते न रुचते कवीनां न प्रियतामेतीत्यर्थः ॥

तयोरिति । तयोः रसप्रधानालङ्कारप्रधानयोरित्यर्थः । अनुभविता अनुभवकारिणा इत्यर्थः समाजिकेनेति यावत् । वागारम्भेति वाचाम् आरम्भ एव अनुभावः यस्य तस्य भावः तत्त्वम् ॥ ७०६ ॥

तस्या दर्शनसुभगे प्रणयस्खलनजनितो मुखे मनोहरे ।

रोषोऽपि हरति हृदयं मृगाङ्क इव मृगलाञ्छने निषण्णः ॥

तस्या इति । तस्याः कान्तायाः दर्शनसुभगे दृष्टिप्रिये मनोहरे हृदयहारिणि मुखे प्रणयस्खलनेन व्यत्ययेन जनितः उत्पादितः रोषोऽपि कोपोऽपि कोप-

रतावेव विपरीतोपमा यथा,—

यत् त्वन्नेत्रसमानकान्ति सलिले मग्नं तत् इन्दीवरं
मेघैरन्तरितः प्रिये ! तव मुखच्छायानुकारी शशी ।
योऽपि त्वद्गमनानुकारिगतयस्ते राजहंसा गताः
त्वत्सादृश्यविनोदमात्रमपि मे दैवेन न क्षम्यते ॥

अत्र विरहिणो रामस्य प्रियावयवसादृश्यदर्शनेन आत्मानं विनोदयतः उपायभ्रंशात् अरतिप्रभवविषादवागारम्भस्वरूपाभिधाने प्रक्षीणशक्तिरप्राधान्येन उपमा प्रतीयते ॥ ७०८ ॥

रतावेव पर्य्यायो यथा,—

किं गुरुजहण भरोत्ति भावअदो करलग्गतुलिआए ।
विहिणो खाताङ्गुलित्थाणविब्भमं वहइ से तिवली ॥

प्रकाशकभ्रूभङ्गादिकमपीत्यर्थः मृगलाञ्छने चन्द्रे निषण्णः स्थितः मृगाङ्क इव मृगरूपः कलङ्क इव हृदय हरति प्रीणयतीत्यर्थः ॥

अत्रेति । उपमायाः अलङ्कारभूतायाः तिरस्कारेण आवरणेन । रसवतः रसिकस्य हरेः कृष्णस्य । रुक्मिणीति रुक्मिण्यै प्रदत्ता या पारिजातमञ्जरी तस्याविलोकनं प्रभवः कारणं यस्य तथोक्तं रोषरामणीयकं रोषेण प्रणयकोपेन रमणीयत्वम् ॥ ७०७ ॥

यदिति । हे प्रिये ! तव नेत्रस्य समाना सदृशी कान्तिर्यस्य तथोक्तं यत् इन्दीवर नीलोत्पलं तत् सलिले जले मग्नं विलीनमित्यर्थः, तव मुखस्य छाया कान्तिः ताम् अनुकरोतीति तथाभूतः शशी चन्द्रः मेघैः जलदैः अन्तरितः तिरोहितः तव गमनम् अनुकरोतीति तथोक्ता गतिर्येषां तथोक्ताः ये राजहंसाः, ते गताः पृथिवीं विहाय मानसं सर इति शेषः । मे मम तव सादृश्येन सदृशवस्तुदर्शनेनेति भावः यो विनोदः प्रीतिः स एव तन्मात्रं तदपि दैवेन दुर्विधिना न क्षम्यते न सह्यते ॥ ७०८ ॥

किं गुरुजघनभर इति भावयतः करलग्नतूलिकया ।
विधेः खाताङ्गुलिस्थानविभ्रमं वहति तस्याः त्रिवली ॥

किमिति । अस्याः कान्तायाः त्रिवली वलित्रयं विशिष्टा रेखास्ति इति भावः गुरुः विशालः जघनस्य भरः आभोग इति भावयतः चिन्तयतः तदेकायत्त-

अत्र यद्यपि रतिप्रभवेभ्यः विस्मयादिभ्यः संशयहेतूत्प्रेक्षोपमादिभ्यश्च पर्यायालङ्कारः प्राधान्येन प्रतीयते, तथापि अमौ वागारम्भानुभावः इति रतावपि अप्राधान्यमेव अनुभूयते ॥ ७०९ ॥

रतावेव समाधि यथा,—

क्लृप्ताद्रूरुयुगं व्यतीत्य सुचिरं भ्रान्त्वा नितम्बस्थले
मध्येऽस्यास्त्रिवलीतरङ्गविषमे निष्पन्दतामागता।
मद्दृष्टिस्तृषितेव सम्प्रति शनैरारुह्य तुङ्गौ स्तनौ
साकाङ्क्षं मुहुरीक्षते जलभरप्रस्यन्दिनी लोचने ॥

अत्र वत्सराजेन स्वदृष्टौ प्राणिधर्माः समाधीयमानाः सागरिकादर्शनार्थे वागारम्भे न्यग्भवन्ति ॥ ७१० ॥

चित्तस्येति भावः विधेः विधातुः करलग्ना करस्थिता तूलिका चित्रोपकरणविशेषः तया खातस्य निहितस्य अङ्गुलिस्थानस्य विभ्रमं शोभां वहति जनयति किम्? ॥७०९

अत्रेति। अप्राधान्यमेव अनुभवतीति प्रामादिकः पाठः अनुभूयते इति पाठः समीचीनतया प्रतिभाति।

क्लृप्तादिति। मद्दृष्टिः मदीया दृष्टिः अस्याः रमण्याः ऊरुयुगम् ऊरुद्वयं क्लृप्तात् क्लेशात् क्लृप्तं प्राप्येत्यर्थः ल्यब्लोपे पञ्चमी। क्लृप्तेति पाठान्तरम्। व्यतीत्य व्यतिक्रम्य विहायेत्यर्थः व्यतिक्रमे इच्छाविरहेऽपि अन्येषामङ्गानां ततोऽप्युत्कृष्टानां दर्शनाभिलाषादिति भावः सुचिरम् अतिदीर्घकालं नितम्बस्थले भ्रान्त्वा भ्रमणं कृत्वा सर्वतो निरीक्ष्येति भावः त्रिवली एव तरङ्गः तेन विषमे दुष्पारे इति भावः मध्ये कटिदेशे निष्पन्दतां स्थिरताम् आगता प्राप्ता ततश्चलितुं नेच्छति स्थेति भावः। सम्प्रति शनैः मन्दं मन्दं तुङ्गौ उन्नतौ स्तनौ आरुह्य तृषितेव पिपासितेव उत्तुङ्गारोहणे श्रमातिशयात् तृषा जायत एवेति भावः। साकाङ्क्षं साभिलाषं यथा तथा जलभरेण अश्रुभरेण प्रियतमाप्राप्तिनिबन्धनेनेति भावः प्रस्यन्दिनी निर्झरिणी लोचने नयने मुहुः पुनः पुनः ईक्षते अवलोकयति ॥ ७१० ॥

रतावेव अर्थश्लेषस्य यथा,—

कपोले पत्राली करतलनिरोधेन मृदिता
निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुर्लग्नः कण्ठे तरलयति बाष्पः स्तनतटीं
प्रियो मन्युर्जातस्तव निरनुरोधे ! न तु वयम् ॥

अत्र यद्यपि आक्षेपेण वाक्योपसंहारः तथापि प्रिय इत्यादिभिः प्राधान्येन अभिधीयमानः श्लेष एव शृङ्गारिणो वागारम्भानुभावाङ्गतामङ्गीकरोति ॥७११॥

रतावेव पर्य्यायोक्तेः यथा,—

मुक्ताः कन्धरया धृताः स्तनतटेनोत्तुङ्गता कुम्भयोः
ऊरुभ्यां परिणाहिता क्रमवती हस्तस्य पद्भ्यां गतिः ।
एतद् वः करिघातिनस्तु कठिनं चर्मैव कोऽयं हठः
चण्डीति त्रिपुरारिकेलिवचनैरार्य्यास्मितं पातु वः ॥

अत्र भगवतश्चाटूक्तिवागारम्भे देव्याः पर्य्यायवर्णना श्लेषभावं लभते । यत्र उदासीनेन वर्ण्यते सः अलङ्कारप्रधानः । स हि रसभावादेः सङ्करप्रकारमभिधित्सुः स्वभावोक्तिं वक्रोक्तिं वा अवलम्बते । तत्र स्वभावोक्तिपक्षे जातिः ॥ ७१२ ॥

अत्रेति । प्राणिधर्माः प्राणिनः धर्माः व्यतिक्रमादयः समाधीयमानाः आरोप्यमाणाः । न्यग्भवन्ति अपकर्षेण वर्त्तन्ते इत्यर्थः ।

कपोलेति । हे निरनुरोधे । अगणितानुरोधे ! अश्रुतमदवचने ! इति भावः कपोले गण्डतटे पत्राली मदिरचितेति भावः करतलनिरोधेन करतलामर्शनेनेत्यर्थः मृदिता प्रोञ्छिता । अयम् अमृतवत् हृद्यः मनोज्ञः अधररसः निःश्वासैः दुःखादायतैरुष्णैश्चेति भावः निपीतः नितरां शोषितः । मुहुः पुनः पुनः कण्ठे लग्नः गलितः बाष्पः अश्रुजलं स्तनतटीं तरलयति सिञ्चतीत्यर्थः अतः तव मन्युः कोपः मान इत्यर्थः प्रियः प्रीतिकरः जातः, वयं न तु नैव प्रिया जाता इति शेषः ॥७११

मुक्ता इति । हे चण्डि ! अतिकोपने चण्डस्त्वत्यन्तकोपन इत्यमरः । कन्धरया

सा विधिमुखेन यथा,—

थोओसरन्तरोसं थोअपरिवट्टमानपहरिसम्।

होइ अदूरपआसं उहअरसाअत्तविब्भन्तीअ मुहम्॥

अत्र सत्यभामायाः रोषस्य अपसर्पतः प्रहर्षस्य च प्रसर्पतः येऽनुभावाः जिह्मावलोकनमुखप्रसादादयः ते इह संकीर्य्यमाणाः कविना उभयरसायत्तम् इत्यनेन यथावदवस्थिताः भवन्तीति विधिमुखेन अभिधीयन्ते॥७१३॥

जातिरेव निषेधमुखेन यथा,—

धीरेण माणभङ्गे माणक्खलणे ण सहाअं गरुअधीरारम्भो।

उल्लइ तुलिज्जन्ते एक्कम्मि वि से थिरं न लग्गइ हिअअं॥

अत्र यद्यपि हेतूपन्यासो वर्त्तते तथापि तस्य भावाख्यान-

ग्रीवया मुक्ता मौक्तिकहार इत्यर्थः। स्तनतटेन कुम्भयोः करिशिरस्थितगोलपिण्डयोः उत्तुङ्गता उन्नतता, ऊरुभ्यां हस्तस्य शुण्डस्य क्रमवती गोपुच्छाकारेति भावः परिणाहिता विशालता, पद्भ्यां चरणाभ्यां गतिः मन्दगमनमित्यर्थः धृताः गृहीता त्वयेति सर्वत्र कर्त्तृपदमूह्यम्। वः युष्माकं गौरवे बहुत्वम्। करिघातिनः सिंहात् करिणं निहत्य आनयत इति भावः स्ववाहनादिति भावः एतत् सर्वं त्वया लब्धमिति शेषः तु किन्तु कठिनं चर्मेव तदीयमिति भावः अयं हठः बलात् मानावलम्बनमिति भावः कः? तवेति शेषः इति इत्थं त्रिपुरारेः हरस्य केलिवचनैः परिहासकरचाटुवाक्यैः आर्य्यायाः गौर्य्याः स्मितं मानापनयनात् मृदु हसितं वः युष्मान् पातु रचतु॥ ७१२॥

यत्रेति। उदासीनेन मध्यस्थेन रसगुणयोरिति भावः रसगुणयोर्मध्यवर्त्तितया स्थितेनेत्यर्थः। अभिधित्सुः अभिधातुमिच्छुः।

स्त्रीकापसरद्रोषं स्त्रीकपरिवर्त्तमानप्रहर्षम्।

भवति अदूरप्रकाशं उभयरसायत्तविभ्रमवत्या मुखम्॥

स्त्रीकेति। उभौ रसौ सम्भोगविप्रलम्भाख्यावित्यर्थः तयोः आयत्तः अधीनः उभयप्रकाशक इति भावः यो विभ्रमः स विद्यतेऽस्या इति तथाभूतायाः कान्तायाः मुखं स्त्रीकेन अल्पेनैवेत्यर्थः अपसरन् अपगच्छन् रोषः कोपचिह्नमिति भावः

परिकरत्वेन अप्राधान्येन हृदयक्रियास्वरूपमेव इह निषेधमुखेन अभिधीयते इति इयं जातिरेव भवति ॥७१४॥

सैव विधिनिषेधाभ्यां यथा,—

हेलोदस्तमहीधरस्य तनुतामालोक्य दोष्णो हरेः
हस्तेनांसत एव लम्बचरणावारोप्य तत्पादयोः ।
शैलोद्धारसहायतां जिगमिषोरस्पृष्टगोवर्द्धनाः,
राधायाः सुचिरं जयन्ति गगने बन्ध्याः करभ्रान्तयः ॥

अत्र, राधायाः प्रेयसि हरौ यथावदवस्थिता अद्भुतवृत्तिस्नेहशङ्कोत्साहाः मिथः सङ्कीर्यमाणाः, भयावेगस्मृतिमतिवितर्कादिभिः व्यभिचारिभावैः आलम्बनचरणाक्रमणमहत्तायां करभ्रान्तौ शरीरारम्भानुभावे प्रतीयमानाः अस्पृष्टगोवर्द्धनाः बन्ध्याः इति निषेधमुखेन, जयन्ति इति विधिमुखेन च अभिधीयन्ते ॥ वक्रोक्तिपक्षे उपमादयः ॥७१५॥

यस्मात् तथोक्तं स्तोकेन अल्पेनैव परिवर्त्तमानः जायमानः प्रहर्षः प्रफुल्लता यस्य तथाविधम् अतएव अदूरः सन्निहितः प्रकाशः विकासो यस्य तथाभूतं भवति ॥७१३॥ ७१४ ॥

हेलेति । हेलया अवलीलया अनायासेनेत्यर्थः उदस्तः उद्धृतः उत्थापित इत्यर्थः महीधरः गोवर्द्धनाख्यो गिरिर्येन तथाभूतस्य हरेः कृष्णस्य दोष्णः भुजस्य तनुतां क्षुद्रताम् आलोक्य दृष्ट्वा अथानन्तरं हस्तेन अंसं स्कन्धं तदीयमिति भावः आलम्ब्य धृत्वा तस्य हरेः पादयोः चरणौ पादौ निजाविति भावः आरोप्य संस्थाप्य शैलोद्धारस्य पर्वतोत्तोलनस्य सहायता जिगमिषोः गन्तुमिच्छोः साहाय्य कर्त्तुमिच्छोरित्यर्थः राधायाः अस्पृष्टगोवर्द्धनाः ऊर्द्ध्वोत्तोलनात् गोवर्द्धनास्पर्शिन्य इत्यर्थः बन्ध्याः विफला विफलप्रयत्ना इति यावत् गगने आकाशे करभ्रान्तयः पाणिप्रसारा इत्यर्थः सुचिरं जयन्ति कौतुकं विदधतु इत्यर्थः ॥ ७१५ ॥

चीराः सभयसतृष्णं पुनः पुनः प्रेषयन्ति दृष्टीः ।
अहिरचितनिधिकलसे इव प्रौढमहिलासनीत्सङ्गे ॥

तेषु उपमा यथा,—

चोरा सभअसतिहणं पुणो पुणो पेसअन्ति दिट्ठीओ।
अहिरक्खिअणिहिकलसे व्व पोढ़महिलाथणुच्छङ्गे॥

अत्र चौरगतभयानुरागयोः सङ्करस्वभावोक्तिमतिभूय उत्तरार्द्धागतमौपम्यं प्राधान्येन प्रतीयते॥७१६॥

उपमैव रसाभाससङ्करविषया यथा,—

एकेनार्कं प्रविततरुषा पाटलेनास्तसंस्थं
पश्यत्यक्ष्णा सजलतरलेनापरेणात्मकान्तम्।
अङ्गस्छेदे दयितविरहाशङ्किनौ चक्रवाकौ
द्वौ सङ्कीर्णौ रचयति रसौ नर्त्तकीव प्रगल्भा॥

अत्र निगदेनैव व्याख्याते स्पष्टतयैव उपमायाः प्रधानत्वेन प्रतीतिः॥७१७॥

रसप्रशमयोरुपमासहोक्तिः यथा,—

दृष्टे लोचनवर्त्मना मुकुलितं पार्श्वस्थिते चक्रवत्
न्यग्भूतं वहिरासितं पुलकवत् तत्स्पर्शमातन्वति।

चोरा इति। चौरास्सस्करा: अहिभिः भुजङ्गैः रक्षितः पालितः निधिकलसः रत्नकुम्भः तस्मिन्निव प्रौढायाः महिलायाः नार्याः स्तनोत्सङ्गे स्तनतटे सभयसतृष्णं यथा तथा पुनः पुनः दृष्टीः नयनानि प्रेषयन्ति निक्षिपन्ति॥ ७१६॥

एकेनेति। अङ्गः दिवसस्य छेदे अवसाने दयितस्य प्रियस्य विरहम् आशङ्कते इति तथोक्ता चक्रवाकौ प्रगल्भा प्रौढा नर्त्तकीव प्रविततया प्रकटिता रुट् रोषः येन तथाभूतेन अतएव पाटलेन रक्तवर्णेन एकेन अक्ष्णा चक्षुषा अस्तसंस्थम् अस्तांचलं गच्छन्तमित्यर्थः अर्कं रविं, सजलतरलेन सबाष्पचञ्चलेन अपरेण अक्ष्णा आत्मनः कान्तं प्रियं पश्यन्ती अवलोकयन्ती सती द्वौ सङ्कीर्णौ सम्मिश्रौ रसौ शृङ्गाररौद्राविति भावः रचयति प्रकटयति। रात्रौ चक्रवाकयोर्विरहः रामशापात् प्रसिद्धः। प्रौढाया नर्त्तक्या रात्रौ नर्त्तनव्यापारप्रसङ्गात् कान्तविरह इति भावः॥७१७

अत्रेति। निगदेन शब्दमात्रेण।

नीवीबन्धवदागतं शिथिलतामाभाषमाणे ततो
मानेनापगतं क्रियेव सुतनोरङ्घ्रिस्पृशि प्रेयसि ॥

अत्र कस्याश्चित् सखीविख्यातमानसंविधानकोपात् मानवत्याः प्रियसन्दर्शनात् आलम्बनविभावात् उत्पन्नप्रकृष्टरतिप्रभवप्रहर्षस्थायिभावे तत्पार्श्वोपसर्पणादिभिः उद्दीपनविभावैः उद्दीप्यमानेषु पुलकादिषु समुत्पद्यमानेषु व्यभिचारिषु नयननिमीलनाधोमुख्यनीवीविस्रंसनादिभिः अनुभावैः प्रकर्षणारोपणाद् आनन्दरसतामापाद्यमाने स्थायिनि प्रबलविरोधिभावान्तरोदयाद् एतेभ्य एव कारणेभ्यः प्रतिक्षणमपचीयमानयोः लज्जारोषयोः प्रशमसङ्करावभिभूय प्राधान्येन उपमासहोक्तिः सङ्कीर्यते ॥ श्लेषाद्यलङ्कारसङ्करात् तु क्वचिदवास्तवमपि रसाभाससङ्करं कवयः कल्पयन्ति ॥७१८॥

स रूपकश्लेषेण यथा,—

राममन्मथशरेण ताड़िता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥

दृष्टे इति। प्रेयसि प्रियतमे दृष्टे दर्शनपथं गते सति सुतनोः सुन्दर्याः कान्तायाः मानेन प्रणयकोपेन लोचनवत् नयनेनेव मनाक् ईषत् मुकुलितं निमीलितम्। पार्श्वस्थिते पार्श्ववर्त्तिनि सति चक्रवत् चक्रेणेव न्यग्भूतम् एकाशतः यतितम्, स्पर्शम् अङ्घ्रेरिति शेषः समातन्वति कुर्वति सति पुलकवत् पुलकेनेव बहिरासितं बहिः स्थितम्, आभाषमाणे आलपति सति नीवीबन्धवत् नीवीबन्धेनेव शिथिलताम् आगतं प्राप्तं, ततः अनन्तरम् अङ्घ्रिस्पृशि चरणतलगते इत्यर्थः सति क्रियेव लज्जयेव अपगतम् पलायितम्। सर्वत्र भावे क्तप्रत्ययः। अत्रेति। सखीति। सख्या विख्यातं कथितं यत् मानस्य संविधानं सम्यक् कौशलमिति यावत् तेन कोपः क्रोधः तस्मात् ॥ ७१८ ॥

रामेति। सा निशाचरी राक्षसी ताड़का दुःसहेन सोढुमशक्येन राम एव मन्मथः कामः तस्य शरः तेन ताड़िता प्रहृता प्रविद्धेत्यर्थः गन्धवता सौरभ-

अत्र बीभत्सो रसः श्लेषरूपकसामर्थ्यात् अविद्यमानेनापि शृङ्गाररसेन सङ्कीर्ण इव प्रतीयते ॥ ७१९ ॥

श्लेषानुविद्धार्थान्तरन्यासेन यथा,—

दट्ठोट्ठहो असिढिलवाअच्छाओ
देवि मउलावइ लोअणभउन्तोवेवि ।
सुपओहरकुवलयपत्तलच्छि
कह मोहणजणइणलग्गवच्छि ॥

अत्र वीरो रसः श्लेषसामर्थ्यात् अविद्यमानेनापि विप्रलम्भशृङ्गारेण सङ्कीर्यते ॥ ७२० ॥

श्लेषोपमा यथा,—

क्षिप्तो हस्तावलग्नः प्रसभमभिहतोऽप्याददानोऽंशुकान्तं
गृह्णन् केशेष्वपास्तश्चरणनिपतितो नेक्षितः सम्भ्रमेण ।
आलिङ्गन् योऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्द्रापराधः स हरतु दुरितं शाम्भवो वः शराग्निः ॥

अत्र करुणो रसः श्लेषोपमासामर्थ्येन अविद्यमानेनापि विप्रलम्भशृङ्गारेण सङ्कीर्यते ॥ ७२१ ॥

शालिना रुधिरेण रक्तेन चन्दनेनेव उक्षिता सिक्ता प्रलिप्तेति यावत् सती जीवितेशस्य यमस्य कान्तस्य च वसतिं जगाम प्राप ॥ ७१९ ॥ ७२० ॥

क्षिप्त इति । साश्रुनेत्रोत्पलाभिः सबाष्पनयननीलोत्पलाभिः भयेन मानेन चेति भावः त्रिपुरयुवतिभिः त्रिपुराङ्गनाभिः यः आर्द्रः अभिनवः अपराधो यस्य तथाभूतः नूतनकृतापराध इत्यर्थः कामीव कान्त इव हस्तावलग्नः धृतहस्त इत्यर्थः क्षिप्तः निराकृतः । प्रसभं बलात् अभिहतः प्रतिहतः निर्वापयितुं चेष्टित इति यावत् ताडितश्च अपि अंशुकान्तं वसनाञ्चलम् आददानः गृह्णन् केशेषु गृह्णन् लगन् दधानश्च अपास्तः दूरं क्षिप्तः । चरणपतितः धृतपदतल इत्यर्थः सम्भ्रमेण भयेन गौरवेण च न ईक्षितः नावलोकितः आलिङ्गन् अङ्गेषु लगन् आश्लिष्यंश्च अवधूतः अपविद्धः,

श्लेषव्यतिरेकेण यथा,—

पद्भ्यामूरुयुगं विभज्य भुजयो र्मध्यं निपीड्योरसा
पार्श्वेषु प्रसभं प्रहृत्य नखरै र्दन्तै र्विलुप्याधरम् ।
सुप्तानप्यवबोध्य युष्मदहितान् भूयोऽपि भुक्ते वने
किं कान्ता सुरतैषिणी ? न हि न हि व्याघ्री करालानना ॥

इह श्लेषसामर्थ्यात् अपारमार्थिकी शृङ्गारप्रतीतिः पारमार्थिकेन बीभत्सरसेन व्यावर्त्तमाना तद्धर्माणां मिथः संसर्गबुद्धिमुत्पादयति ॥ ७२२॥

श्लेषरूपकेण यथा,—

अन्त्रैः कल्पितमङ्गलप्रतिसराः स्त्रौहस्तरक्तोत्पल-
व्यक्तोत्तंसभृतः पिनद्ध सहसा हृत्पुण्डरीकस्रजः ।
एताः शोणितपङ्ककुङ्कुमजुषः सम्भूय कान्तैः पिव-
न्त्यस्थिस्रग्वहसुराः कपालचषकैः प्रीताः पिशाचाङ्गनाः ॥

सः शम्भोरयं शाम्बः शराग्निः बाणानलः त्रिपुरासुराणां विध्वंसनाय प्रयुक्त इति भावः वः युष्माकं दुरितं पापं हरतु नाशयतु ॥७२१ ॥

पद्भ्यामिति । वने अरण्ये सुरतम् इच्छतीति सुरतैषिणी सुष्ठु रमणाभिलाषिणी कान्ता सुप्तानपि निद्रितानपि युष्माकम् अहितात् शत्रून् युष्माभिर्निर्वासितानिति भावः अवबोध्य जागरयित्वा पद्भ्यां चरणाभ्याम् ऊरुयुगम् ऊरुद्वयं विभज्य पृथक्कृत्य भग्नं कृत्वा च इत्यर्थः भुजयोर्मध्यं वक्षस्थलमित्यर्थः उरसा वक्षसा नखरैश्च निपीड्य सुदृढमाश्लिष्य विदार्य्य चेत्यर्थः नखरैः पार्श्वेषु पार्श्वदेशेषु प्रसभं सबलात्कारं यथा तथा प्रहृत्य उभयत्र समानम् । दन्तैः अधरं विलुप्य विदश्य छित्त्वा चेत्यर्थः भूयोऽपि पुनः पुनरपि भुङ्क्ते रमयति किम् ? नहि नहि नैव नैव । करालानना भीषणवदना व्याघ्री भुङ्क्ते खादतीत्यर्थः । अत्र राजविषया रतिर्भाव इति बोध्यम् ॥ ७२२ ॥

अत्रेति । अपारमार्थिकी अवास्तवी । पारमार्थिकेन वास्तवेन । व्यावर्त्यमाना व्याहन्यमाना । तद्धर्माणां बीभत्सधर्माणाम् ॥

अन्त्रैरिति । एताः पिशाचाङ्गनाः पिशाचा देवयोनिविशेषाः तेषां अङ्गनाः

अत्र बीभत्सो रसः शब्दसामर्थ्याक्षिप्तेन शृङ्गाराभासेन सङ्कीर्य्यते ॥ ७२३ ॥

समाधिरूपकेण यथा,—

शिखण्डे खण्डेन्दुः शशिदिनकरौ कर्णयुगले
दृशस्ताराश्चलमुडुपचक्रञ्च कुचयोः।
तडित् काञ्ची सन्ध्या सिचयरुचयः कालि! तदयं
तवाकल्पः कल्पव्युपरमविधेयो विजयते ॥

अत्र भयानको रसः समाधिरूपकाद्युपकल्पिताकल्परामणीयकाक्षिप्तेन शृङ्गाराभासेन सङ्कीर्य्यमाणः श्रोतुः प्रेयोरसाङ्गतां गच्छन् सङ्गच्छते। एवमियमनेकप्रकारसंसृष्टिः गुणालङ्कारसङ्करप्रभवा अभिमन्तव्या। तत्रापि प्रधानाङ्गभावेन समकक्षतया च व्यक्ताव्यक्तोभयात्मकरूपाः तिलतण्डुलक्षीरजलच्छायादर्शकादयो भेदाः यथायोग्यमवगन्तव्याः। ते किं वक्तव्याः न वक्तव्याः कथमनुक्ताः गम्यन्ते उक्तेष्वेवान्तर्भा-

---

स्त्रियः प्रीताः प्रहृष्टाः अन्त्रैः प्रेतानां कुक्ष्यन्तर्गतनाडीभिरित्यर्थः कल्पितः रचितः मङ्गलप्रतिसरः माङ्गलिकं हस्तसूत्रं याभिः ताः स्त्रीणां प्रेतीभूतानामिति भावः हस्ताः करा एव रक्तोत्पलानि तैः व्यक्ताः विरचिता उत्तंसाः कर्णालङ्कारविशेषाः तान् बिभ्रतीति तथोक्ताः शोणितानां पङ्काः कर्दमीभूतानि रक्तानीति भावः ते ते एव कुङ्कुमाः तान् जुषन्ति सेवन्ते इति तथाभूताः शोणितकुङ्कुमरञ्जितगात्रा इति भावः सत्यः हृत्पुण्डरीकाणां हृतहृत्पद्मानां स्रजः मालाः पिनद्ध्य परिधाय सहसा कान्तैः प्रियैः पिशाचैः सम्भूय सङ्घत्य कपालाः प्रेतशिरोऽस्थीनि एव चषकाः पानपात्राणि तैः अस्त्रिलेहाः अस्त्रासमन्तर्गतानि मेदांसि एव सुराः मदिराः ताः पिबन्ति ॥ ७२३ ॥

शिखण्डे इति। हे कालि! शिखण्डे चूडायां खण्डेन्दुः अर्द्धचन्द्रः कर्णयुगले श्रोत्रयुग्मे शशिदिवाकरौ चन्द्रसूर्य्यौ, दृशः नेत्राणि ताराः सहत्य: ताराः नक्षत्राणि, कुचयोः स्तनयोः चलं चञ्चलम् उडुपचक्रं चन्द्रसमूहः, काञ्ची रसना

वात्। तद् यथा,—अर्थोभयालङ्काराभिधाने खं वस्ते इति चर्चां पारयति इति विभक्तिमुद्रा, कलविङ्ककण्ठमलिनं कादम्बिनीकम्बलम् इति पदमुद्रा च शब्दालङ्कारावपि संकीर्य्यमाणौ प्रतीयेते ॥ ७२४ ॥ एवमन्यत्रापि

अङ्गाङ्गिभावावस्थानं सर्वेषां समकक्षता।
इत्यलङ्कारसंसृष्टेः लक्षणीया द्वयी गतिः ॥ ७२५ ॥

तत्र अङ्गाङ्गिभावेन अवस्थानं यथा,—

आक्षिपन्त्यरविन्दानि मुग्धे! तव मुखश्रियम्।
कोषदण्डसमग्राणां किमेषामस्ति दुष्करम्? ॥

अत्र अरविन्दानि मुग्धे! तव मुखश्रियमाक्षिपन्ति इत्युपमा, कोषदण्डसमग्राणां किमेषामस्ति दुष्करम् इति श्लेषोपसर्ज्जनार्थान्तरन्यासः, प्रभवन्ति च अरविन्दानि कोषदण्डसमग्राणि तेन किं तेषां न किञ्चिदशक्यमस्ति कोषदण्डयो र्विजयसाधनत्वात्। एतेन श्लेषस्य साधनमानभूतार्थसमर्थकत्वात् उपमायास्तु प्रस्तुतसाध्यवस्तुविशेषकत्वात् अर्थान्तरन्यासं प्रति अङ्गभावो विज्ञायते ॥ ७२६ ॥

तडित् विद्युत्, सिचयरुचयः वसनकान्तयः सन्ध्या, तत् तस्मात् कल्पस्य व्युपरमः प्रलयकालः तस्मिन् विधेयः कल्पनीयः तव अय प्रागुक्तरूपः आकल्पः भूषणं विजयते सर्वोत्कर्षेण वर्त्तते॥ ७२४ ॥

अवेति। ते कि वक्तव्याः अभिधातव्याः?। अनुक्ता अकथिताः गम्यन्ते बुध्यन्ते उक्तेष्वेव भेदेष्विति यावत्।

अङ्गेति। सर्वेषाम् अलङ्काराणाम् अङ्गाङ्गिभावेन गुणप्रधानभावेन अवस्थानं स्थितिः तथा समकक्षता तुल्यबलता इति अलङ्कारसंसृष्टेः द्वयी द्व्यवयवा इत्यर्थः गतिः प्रकारः लक्षणीया अनुभवनीया ॥ ७२५ ॥

आक्षिपन्तीति। हे मुग्धे! सुन्दरि! बाले! इति वा, अरविन्दानि पद्मानि तव मुखस्य श्रियं कान्तिम् आक्षिपन्ति आहरन्ति। कोषाः कुड्मलानि दण्डाः

सर्वेषां समकक्षता यथा,—

लिम्पतीव तमोऽङ्गानि, वर्षतीवाञ्जनं नभः ।
असत्पुरुषसेवेव दृष्टिर्विफलतां गता ॥

ननु च तमसश्च नभसश्च असतश्च सम्बन्धः समत्वात् स्यात् इति कथं सर्वेषां तुल्यकक्षतया सम्बन्धोत्पत्तिः, एवं मन्यते, यदा उत्प्रेक्षोपमादयोऽलङ्काराः विभावानुभावव्यभिचारिवर्णनापरतया रसादेरङ्गतां प्रतिपद्यन्ते, तदा भवति तेषां तुल्यकक्षता इति। तत्र लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः इति उत्प्रेक्षे, असत्पुरुषसेवेव दृष्टिर्विफलतां गता इति उपमा, वर्णनीयस्य तमसः उद्दीपनविभावभूतस्य समतयैव उत्कर्षप्रतिपादकत्वे प्रागभावमुपगता इति नास्ति लक्षणानुपपत्तिः इति। ननु उपमा इमास्तिस्रोऽपि कस्मात् नोच्यन्ते, इवो हि वाक्यान्तरेषु उपमाया एव दृश्यते। मैवम्, उपमानोपमेयशब्दं प्रति यत् तस्य सादृश्यार्थस्य द्योतनं इवेन क्रियते। न च लिम्पति इत्यादौ उपमानमुपमेयं वास्ति, यत् सादृश्यद्योतनाय इवः प्रयुज्यते न च तिङन्तेन उपमानमस्ति, तस्य साध्यार्थाभिधायित्वेन असत्वार्थकत्वात् ॥ ७२७ ॥

नालानि अन्यच्च कोषा धनागाराः धनसमृद्धय इति यावत् दण्डाः प्रतापा इति यावत् तैः समग्राणां सम्पूर्णानाम् एषाम् अरविन्दानां राज्ञां चेति ध्वनिः दुष्करम् असाध्यं किम् अस्ति ? न किमपि अस्तीत्यर्थः ॥७२६॥

अर्वेति। श्लेषः उपसर्जनम् अङ्ग यस्य तथाभूतः अर्थान्तरन्यासः।

लिम्पतीति। तमः तिमिरम् अङ्गानि लिम्पतीव लिप्तानि करोतीव, नभः आकाशम् अञ्जनं कज्जलं वर्षतीव स्रवतीव। दृष्टिः दर्शनेन्द्रियव्यापारः असतां दुष्टानां पुरुषाणां सेवेव परिचर्येव विफलतां व्यर्थतां गता प्राप्ता।

नन्विति। गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यादिति गुणानां धर्माणां परार्थत्वात् धर्मिनिष्ठत्वादित्यर्थः असम्बन्धः परस्परमिति भावः। स्यात् भवेत्

तदाह,

सिद्धस्य हि समानार्थमुपमानं विधीयते ।
तिङन्तार्थस्य साध्यत्वात् उपमार्थो न विद्यते ॥

न च उपमायामिव इव शब्दो भवति तद्यथा,—कथमिव एतद् भविष्यति । अस्तु वा लिम्पतितमसोः उपमानोपमेयभावः तथापि तुल्यधर्मो न दृश्यते य उपमानोपमेयभावाय प्रभवति । किमन्येन लेपनमेव भवति तर्हि लिम्पतिना केन भाव्यम् न हि लेपनं लिम्पेः पृथग् भवितुमीष्टे । ननु च इह इयं चकास्ति, धातुर्लिम्पति तदर्थश्च लेपनम् । मैवं ; एवं सति लिम्पतिरिव इति स्यात् न तु लिम्पतीव इति । अथ यथा राहोः शिरः इति भेदाभावेऽपि अवयवावभिवावः तथा इह धर्मधर्मिभावो भविष्यति । मैवं ; उपमानोपमेयभावस्य

समत्वात् तुल्यत्वात् नहि तुल्यरूपौ द्वौ धर्मौ सङ्गच्छेते इति भावः । सर्वेषाम् अलङ्काराणां तुल्यकक्षतया तुल्यबलतया सम्बन्धोत्पत्तिः संसर्गसद्भाव इत्यर्थः । एवं मन्यते इत्थं विचार्यते इत्यर्थः । रसादेः आदिपदेन भावतदाभासादयो गृह्यन्ते । अङ्गतां पोषकताम् तदा तेषाम् अलङ्काराणां तुल्यकक्षता तुल्यकक्षतया रसादिभिः सह सम्बन्धः न तु तेषां परस्परसम्बन्ध इति भावः । लक्षयेति । लक्षणस्य गुणानाञ्चेति प्रागुक्तस्येति भावः । इमास्तिस्रः लिम्पतीव वर्षतीव असत्पुरुषसेवेति त्रिसख्यका इत्यर्थः । उपमानेति इवेन इवशब्देन लिम्पतीव वर्षतीवेत्यत्र स्थितेनेति भावः । तिङन्तेनेति । तिङन्तेन लिम्पति वर्षतीत्यनेनेत्यर्थः । साध्येति । साध्यार्थस्य सम्पाद्यस्य नतु सिद्धस्येति भावः । अर्थस्य अभिधायित्वेन प्रतिपादकत्वेन असत्त्वार्थत्वात् अविद्यमानत्वार्थत्वात् । अस्तु वेति । तुल्यधर्मः साधर्म्यमित्यर्थः । य स्तुल्यधर्म इत्यर्थः । किमन्येनेति । अन्येन तुल्यधर्मेण किम् ? न किमपि प्रयोजनमित्यर्थः, लेपनमेव तुल्यधर्म इति भावः । भवति अस्ति लिम्पतिना केन भाव्यमिति लिम्पतिः को भविष्यतीत्यर्थः ! नहीति । लिम्पेः लिम्पतेरित्यर्थः पृथक् भिन्नम् । ईष्टे प्रभवति । नन्विति । चकास्ति राजते विद्यते इति भावः । उपमानोपमेयभावस्येति भेदे सति सादृश्यं साधर्म्यं प्रवृत्तिनिबन्धनम् उत्पत्ति-

भेदसादृश्यप्रतिपत्तिनिबन्धनत्वात् ॥ तदभावेऽपि यस्तत् मनुते स कथं न उन्मत्तः स्यात् ॥ ७२८ ॥

स एव धर्मी धर्मी चेत्युन्मत्तोऽपि न भाषते ॥

अस्तु तर्हि तिङां यः कर्त्ता उपमानम् इति चेत् न्यग्-भूतोऽसौ क्रियापदे। कथं पुनरसौ क्रियावयवे न्यग्भूतो भवति। श्रूयते षडर्थाः तिङन्तेन प्रतीयन्ते—क्रिया, कालः उपग्रहः, साधनं, सङ्ख्या, पुरुषश्च इति। तेषु क्रियाकालात्मनेपदपरस्मैपदनिमित्तानि प्रकृतिः अभिधत्ते, प्रत्ययः साधनम् सङ्ख्यां पुरुषञ्च ॥ एतेषान्तु क्रियार्थत्वात् क्रिया प्रधाना कालात्मनेपदनिमित्ते क्रियाविशेषणत्वेन सङ्ख्यापुरुषौ साधन-विशेषणत्वेन तयोरेव न्यग् भवतः। साधनं पुनः प्रकृतिप्रत्ययार्थौ स्वार्थं सह ब्रूत इति न्यायात् प्रधानभूतमपि भूतं भव्याय उपदिश्यते इति न्यायेन क्रियासिद्धौ उत्पन्नव्यापारं परार्थे तस्यां क्रियायां न्यग्भवति। तेन अयं कर्त्ता स्वक्रिया सिद्धा वा कुतः कथं उपमानत्वेन उपमेयत्वेन वा अन्यत् अपेक्षितं

हेतुः यस्य तथोक्तः तस्य भावः तत्त्वं तस्मात्। तदभावेऽपि उपमानोपमेयभावस्य भेदसादृश्यप्रवृत्तिनिबन्धनत्वाभावेऽपीत्यर्थः। यः कविरिति शेषः तम् उपमानोपमेयभावं मनुते स्वीकरोति इत्यर्थः ॥ ७२८ ॥

स एवेति। स एव धर्मः स एव धर्मी च इति उन्मत्तोऽपि वातुलोऽपि न भाषते न वक्ति, धर्मिधर्मयोरतिशयेन पार्थक्यादिति भावः। तिङ्वाच्यः तिङा प्रतिपाद्यः। असौ कर्त्ता क्रियापदे न्यग्भूतः अन्तर्भूतः अङ्गतां गत इत्यर्थः। क्रियेत्यादि। उपग्रहः आत्मनेपदपरस्मैपदनिमित्तमित्यर्थः। प्रकृतिः धातुः अभिधत्ते प्रतिपादयति। क्रियार्थत्वात् क्रियाप्रयोजनकत्वात्। तयोरेव क्रियासाधनयोरेव न्यग्भवतः अन्तर्निविशतः इत्यर्थः। प्रधानभूतमपि साधनमित्यनेन अन्वयः। क्रियासिद्धौ क्रियासिद्धिविषये उत्पन्नः व्यापारः प्रयत्नः यस्य तथाभूतं सत् परार्थे परार्थभूतायामित्यर्थः न्यग्भवति अन्तर्निवि-

चमते। एवं तर्हि, योऽङ्गानि लिम्पति तेन क्रियोपलक्षितेन कर्त्रा तुल्यं तम इति अर्थः प्रतिपत्स्यते। मैवं; क्रियोपलक्षितस्य कर्त्तुः उपमानभूतस्य शब्दन्यायबलाद् अप्रतिपत्तिः। शब्दो हि मुख्यागौणीलक्षणाभिः अर्थप्रकरणादिसम्पादितसाचिव्यादिभिः तिसृभिरेव वृत्तिभिः अर्थविशेषप्रतिपत्तिनिमित्तं भवति॥ तद्यथा, गौः इत्ययं शब्दो मुख्यया वृत्त्या सास्नादिमन्तम् अर्थं प्रतिपादयति। स एव तिष्ठन्मूर्खत्वादिगुणसम्पदमपेक्ष्य वाह्लीकादौ प्रयुज्यमानो गौणीं वृत्तिम् अनुभवति। यदा तु मुख्यया गौण्या वा उपात्तक्रियासिद्धौ साधनभावं गन्तुं समर्थः, तदा लक्षणया स्वार्थाविनाभूतम् अर्थान्तरं लक्षयति। यथा गङ्गायां घोषः प्रतिवसति इति गङ्गाशब्दो विशिष्टोदकप्रवाहे निरूढा अभिधानशक्तिः घोषकर्तृकायाः प्रतिवसनक्रियायाः अधिकरण-

---

शते। आकुलः व्याप्त इत्यर्थः। अपेक्षितुं पर्य्यवेक्षितुं चमते शक्नोति। प्रतिपत्स्यते पर्य्यवसितो भविष्यतीत्यर्थः। क्रियोपलक्षितस्य क्रियया लक्षीकृतस्य शब्दन्यायबलात् शब्दसामर्थ्यवशात् अप्रतिपत्तिः अबोधः अलाभ इति यावत् शब्द इति। मुख्या गौणी लक्षणा ताभिः। संयोगी विप्रयोगश्च साहचर्य्यं विरोधिता। अर्थः प्रकरणम् आदिना लिङ्गादिपरिग्रहः उक्तञ्च दर्पणे। अर्थः प्रकरण लिङ्ग शब्दस्यान्यस्य सन्निधिः। सामर्थ्यमौचिती देशः काली व्यक्तिः स्वरादयः शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः इति। तैः सम्पादित साचिव्य सहायभावः यासां तादृशीभिः वृत्तिभिः शक्तिभिः। अर्थविशेषस्य प्रवृत्तिनिमित्त बोधहेतुरित्यर्थः। मुख्यया वृत्त्या अभिधया शक्त्या इत्यर्थ. स एव गौरित्यय शब्दः तिष्ठन्मूर्खत्वादिगुणसम्पदम् अपेक्ष्य अवलोक्य मलेति यावत् गौणीवृत्तिं गौणीं नाम शक्तिम्। उपात्तक्रियासिद्धौ गृहीतक्रियासम्पादने साधनभावं हेतुतां गन्तु प्राप्तुम् असमर्थः अक्षमः शब्द इति पूर्वेणान्वयः। स्वार्थस्य स्वप्रतिपाद्यस्य अविनाभूतं सम्बन्धमित्यर्थः। अर्थान्तरम् अर्थविशेष लक्षयति गमयति। विशिष्टोदकप्रवाहे भगीरथखातावच्छिन्नजलप्रवाहरूपे इत्यर्थः निरूढा प्रसिद्धा अभिधान-

भावं गन्तुमसमर्थः स्वार्थाविनाभूतं तटं लक्षयतीति ॥ न च, एतासाम् इह अन्यतमाऽपि वृत्तिः संगच्छते । तथाहि लिम्पतिः क्रियावचनत्वात् न मुख्या, नापि क्रियाकर्त्रोः असादृश्येन शुक्तिकादौ रजतादिवत् तद्भावापत्तिः, क्रियागुणानां कर्त्तरि असम्भवात् साक्षादिव प्रयोगाच्च न गौणी । क्रियायाश्च स्वयमेव धर्मरूपत्वात् बुद्धिः पश्यति इतिवत् अन्यधर्माणामन्यत्र अधिरोपणम् उपचार इति न गौणीभेद उपचरितः । इवशब्दस्य च असादृश्येऽपि दर्शनात् न लक्ष्येत । यदि हि इवशब्दः सादृश्यमेव विद्योतयति तदा लिम्पतिक्रियायाः सत्त्वभूतेन तमसा सादृश्यं न सम्भवतीति स्वार्थाविनाभूतं कर्त्तारमाक्षिपति । न च इहलक्षितलक्षणाविरुद्धलक्षणादयोऽपि वर्त्तन्ते । यथा प्रिये जने नास्ति पुनरुक्तम्, स्वल्पैरसावपि न दृश्यत एव कालैरिति । न च शब्दान्य-

---

शक्तिर्यस्य तथाभूतः । स्वार्थस्य तादृशजलप्रवाहरूपस्य अविनाभूतं सम्बन्धशालिनमित्यर्थः । तत्तटं तस्यास्तटमित्यर्थः । न वेति । एतासां मुख्या गौणी लक्षणानां मध्ये अन्यतमा काचिदेकापीत्यर्थः । क्रियावचनात् क्रियावाचित्वात् न मुख्या नाभिधावृत्तिः सम्भवतीति भावः । क्रियाकर्त्रोः असादृश्येन असाधर्म्येण शुक्तिकादौ रजतादिवत् शुक्तिकादौ सादृश्येन यथा रजतादिभावापत्तिः तथा तद्भावापत्तिः सादृश्यप्रतीतिर्नापीत्यर्थः । क्रियागुणानां क्रियाधर्माणां कर्त्तरि असम्भवात् असत्त्वादित्यर्थः । यदि क्रियायाः गुणाः कर्त्तरि सम्भवन्ति तथा सादृश्यं प्रतीयते अत्र तु न तथेति भावः । न गौणीति । यत्र इवादिप्रयोगो नास्ति तत्रैव गौणी वृत्तिः यथा गौर्वाहीक इत्यादि । अन्यधर्माणामिति अन्येषां धर्मिणां ये धर्माः तेषाम् अन्यत्र धर्मिणि आरोपः उपचारः अस्यास्तु क्रियाया धर्मरूपत्वात् न तथा उपचारसम्भव इति भावः तस्मात् गौणीभेदः गौण्या वृत्तेर्विशेषः न उपचरितः नारोपितः । इवशब्दस्यापीति । असादृश्येऽपि सादृश्यसम्बन्धविरहेऽपि

विलम्बिनीपदार्थव्युत्पत्तिः प्रेक्षावद्भिः आद्रियते। यद्यपि अध्याहारादिभिः इदमपि स्यात्, तथापि तुल्यधर्मो मार्गणीयः तद्वदेव विप्रतिपत्तेः। न चेन्दुमुखादिवत् अनभिधीयमानस्यापि तुल्यगुणस्य प्रत्ययो भवतीति वाच्यम्।

यथेन्दुरिव ते वक्त्रमिति कान्तिः प्रतीयते।
न तथा लिम्पतेर्लेपादन्यदत्र प्रतीयते ॥७२९॥
तदुपश्लेषणार्थोऽयं लिम्पतिर्ध्वान्तकर्त्तृकः।
वर्षणार्थश्च विद्वद्भिरुत्प्रेक्ष्यत इतीष्यताम् ॥
मन्ये शङ्के ध्रुवम्प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥

यथा किमिव न दृश्यते इत्यादिषु। न लक्ष्येत लक्षणया वृत्त्या न प्रतीयेत सादृश्यमिति भावः। विद्योतयति बोधयति। सत्त्वभूतेन प्राणभूतेन आश्रयभूतेनेति यावत्। स्वार्थाविनाभूतं मुख्यार्थसम्बद्धमित्यर्थः कर्त्तारम् अन्यमिति शेषः, आक्षिपति आकर्षति बोधयतीति यावत् लक्षितलक्षणयेति भावः। लक्षितलक्षणेति। लक्षिते लक्षणया बोधिते अर्थे पुनर्लक्षणा लक्षितलक्षणा सा च विरुद्धलक्षणा तदादयः अपि वृत्तयः नापि वर्त्तन्ते न सम्भवन्तीत्यर्थः। न चेति। शब्दान्यविलम्बिनीशब्दात् शब्दप्रतिपाद्यात् अन्यस्मिन् शब्दाप्रतिपाद्ये इत्यर्थः विलम्बते चिरेण अन्यत् प्रतिपादयतीति भावः तथाभूता पदार्थस्य व्युत्पत्ति प्रतीतिः। प्रेक्षावद्भिः पण्डितैः। यद्यपीति। अध्याहारादिना ऊहादिना इदमपि अन्यार्थज्ञानमपीत्यर्थः तुल्यधर्मः साधर्म्ये मार्गणीयः अन्वेषणीयः आवश्यकत्वेनेति भावः। तद्वदेव पूर्ववदेव विप्रतिपत्तिः विरोधादित्यर्थः। न चेति इन्दुमुखादिवत् चन्द्रमुखादाविवेत्यर्थः अनभिधीयमानस्य अकथ्यमानस्य। तुल्यगुणस्य साधर्म्यस्येत्यर्थः। यथेति। इन्दुरिव ते तव वक्त्रं वदनमिति उक्ते इति शेषः कान्तिः साधारणधर्म इति भावः लेपात् अन्यत् अपरोऽर्थः इत्यर्थः ॥ ७२९ ॥

तदिति। तत् तस्मात् उपश्लेषार्थः लेपनार्थः। ध्वान्तकर्त्तृकः तमःकर्त्तृक

वाक्यवदेव प्रबन्धेषु अनौचित्यपरिहारेण गुणालङ्कारसङ्करनिवेशो भवति। तत्र अनौचित्यपरिहारो यथा। मायया कैकेयीदशरथाभ्यां रामः प्रलम्भितो न मातापितृभ्याम् इति निर्दोषदशरथे, राममेव योधयन् रामेण वाली निहतो न सुग्रीवमिति महावीरचरिते, रुधिरप्रियराक्षसेन दुःशासनस्य रुधिरं पीतं न भीमसेनेनेति वेणीसंहारे, दुर्वाससोऽपध्यानाद्दुष्यन्तः शकुन्तलास्वीकारं विसस्मार न अनवस्थितानुरागतयेति शाकुन्तले, लवणप्रयुक्तराक्षसाभ्यां वासोपस्करेण सीता परित्याजिता न कैकेयीमन्थराभ्यामिति च्छलितरामे। किञ्च दग्धायामपि वासवदत्तायां वैरप्रतिचिकीर्षया पद्मावती मयोढा अवसिते च समीहिते तया विना क्षणमपि न जीवामीत्यविज्ञातवासवदत्तासन्निधेः वत्सराजस्य अग्निप्रवेशाध्यवसायः प्रियाहृदयतो व्यलीकशल्यम् उच्चखानेति तापसवत्सराजे, मरीचाद्यः स्वामिकार्यं साध-

---

वर्षणार्थः वर्षति रति शेष.। उत्प्रेक्ष्यते उत्कटकोटितया सम्भाव्यते। इति ईक्ष्यता दृश्यतां विवेच्यतामित्यर्थः। मन्ये इति स्पष्टम्।

वाक्येति। वाक्ये यथा गुणालङ्कारसन्निवेश. तथा प्रबन्धेषु महावाक्यभूतेषु सन्दर्भेष्विति भावः। यथेति। मायया दैव्या छलनयेत्यर्थः कैकेयीदशरथाभ्यां कल्पिताभ्यामिति भावः प्रलम्भितः प्रवञ्चितः निर्वासित इति यावत्। मातापितृभ्यां कैकेयीदशरथाभ्यां नेत्यर्थः। निर्दोषदशरथे तदाख्ये सन्दर्भे इति भावः। सुग्रीव योधयन्निति पूर्वेणान्वयः। अनवस्थितानुरागतयेति अस्थिरप्रणयतयेत्यर्थः। लवणेति। लवणेन राक्षसेन मधुवनवासिना प्रयुक्तौ प्रहितौ राक्षसौ ताभ्यां कैकेयीमन्थराकूपधराभ्यामिति भावः। छलितरामे तदाख्ये सन्दर्भे इत्यर्थः। प्रियाहृदयत प्रियायाः वासवदत्तायाः हृदयात्। व्यलीकशल्यं पद्मावतीविवाहजनित शल्य

यामीति प्रभुभक्त्या निरपराधामपि प्रेयसीं हित्वा स्वामिकार्य्यापेक्षया अहमेव एतावन्ति दिनानि जीवितोः अद्य अनुक्लृप्तस्वामिकार्य्यः तामेवानुगच्छामीति शिवगणः शूद्रकनिमित्तां मायामयीं चितां प्रियासमक्षं प्रविवेश सापि तत् प्रेमावदानदर्शनापङ्कृतप्रियव्यलीकात् तद्वियोगकातरा तत्रैवात्मानं प्रतिचिक्षेप इति विक्रान्तशूद्रके इति। तदेतत् दोषहानम्। गुणोपादानन्तु सम्यग्गुणयोगेन संविधाने सुसूत्रता, अपि च चतुर्वृत्त्यङ्गसम्पन्नमिति चतस्रो वृत्तयो भारती आरभटी कैशिकी सात्त्वती चेति ॥ ७३० ॥

तत्र,—

या वाक्प्रधाना नृपतिप्रयोज्या स्त्रीवर्जिता संस्कृतया प्रयुक्ता।
स्वनामधेयैर्भरतप्रयोज्या सा भारती नाम भवेत् तु वृत्तिः॥७३१

विधनरूपं दुःखमित्यर्थः। उद्खान उत्खातवानित्यर्थः। तापसवत्सराजे तदाख्यग्रन्थे इति भावः। अद्येति अनुक्लृप्तस्वामिकार्य्यः अनुष्ठितस्वामिकार्य्य इत्यर्थः। मायामयीं मायाकल्पिताम् असत्यरूपामिति यावत्। तदिति। तस्य शिवगणस्य प्रेम प्रणयः तस्य अवदानं कर्म प्रेमोचितं कर्म अग्निप्रवेशरूपमिति भावः. तस्य दर्शनात् अवलोकनात् अपङ्कृतम् अपगत-प्रियस्य पत्युः व्यलीकम् अप्रियकार्य्यकरणसम्भूतं दुःखं यस्याः तथाभूता तत्रैव चितायामेव। विक्रान्तशूद्रके तदाख्यग्रन्थे। दोषहानं दोषपरित्यागः अनौचित्यपरिहार इति यावत्। संविधाने सम्प्रयोगे सुसूत्रता सुष्ठु निपुणतया विरचनमित्यर्थः। चतुर्वृत्त्यङ्गसम्पन्नमिति चतसृभिः वृत्तिभिरेव अङ्गैः सम्पन्नं समन्वितं काव्यं कर्त्तव्यमिति प्रागुक्तमिति भावः॥ ७३०॥

या वागिति। या वाक् वाक्यं प्रधाना उत्कृष्टा यच्च तथोक्ता नृपतिप्रयोज्या राजप्रयोगयोग्या स्त्रीवर्जिता स्त्रीभिः प्रयोक्तुमनर्हेत्यर्थः संस्कृतया भाषया प्रयुक्ता समन्विता, स्वनामधेयैः स्वैः स्वैः नामभिः संकीर्त्तितैरिति भावः भरतेन नटेन

यत्रावपातप्लुतलङ्घितानि छेद्यानि मायाकृतमिन्द्रजालम् ।
चित्राणि युद्धानि च तत्र वृत्तिमेतादृशीमारभटीं वदन्ति ॥७३२
या श्लक्ष्णनेपथ्यविशेषयुक्ता स्त्रीसङ्गता या बहुगीतवृत्ता ।
कामोपभोगप्रचुरोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति ॥७३३॥
या सात्त्विकेनात्मगुणेन युक्ता त्यागेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा सा सात्त्वतीति ग्रथितेह वृत्तिः ॥७३४

आसाम् अङ्गानि षोडश । तेषु प्ररोचना, प्रस्तावना, वीथी, प्रहसनमिति चत्वारि भारत्यङ्गानि । तत्र वक्तव्यार्थप्रशंसापरं वचः प्ररोचना, यथा,—

नाट्याचार्येण वा प्रयोज्या करणीया सा भारती नाम वृत्तिः रचनाविशेषः स्यात् ॥ ७३१ ॥

यत्रेति । यत्र यस्यां अवपातः उच्चदेशात् अधःपतनं प्लुतं लम्फनं लङ्घितम् अतिक्रमणं तानि, छेद्यानि छेदनव्यापाराः मायया कृतम् इन्द्रजालं भेलकि इति प्रसिद्धं चित्राणि आलेख्यकर्माणि तथा युद्धानि वर्णयन्ति इति शेषः तत्र एतादृशीम् एवंरूपां वृत्तिम् आरभटीं वदन्ति कवय इति शेषः ॥ ७३२ ॥

यैति । श्लक्ष्णेन समुज्ज्वलेन विशदेनेति यावत् नेपथ्यविशेषेण परिच्छदविशेषेण युक्ता समन्विता स्त्रीभिः सङ्गता सम्मिलिता, या बहु प्रभूतं गीतवृत्तं गानव्यापारः यस्यां तथाविधा तथा कामोपभोगस्य मन्मथविहारस्य प्रचुरः प्रभूतः उपचारः उपकरणं यस्यां तादृशी, तां कैशिकीं वृत्तिम् उदाहरन्ति कीर्त्तयन्ति ॥ ७३३ ॥

यैति । या सात्त्विकेन सत्त्वगुणोद्रिक्तेन आत्मगुणेन स्वभावेन युक्ता त्यागेन दानेन वृत्तेन सच्चरितेनेत्यर्थः समन्विता सङ्गता हर्षेण आनन्देन उत्कटा उज्ज्वला तथा संहृतः अपनीतः शोकभावः स्वजनवियोगदुःखं यया तथोक्ता वियोगदुःखहारिणीत्यर्थः सा इह काव्यसन्दर्भे सात्वती नाम वृत्तिः ग्रथिता प्रसिद्धा ॥७३४॥

जयति भुवनकारणं स्वयम्भू र्जयति पुरन्दरनन्दनो मुरारिः ।
जयति गिरिसुता निरुद्धदेहो दुरितभयापहरो हरश्च देवः ॥७३५

प्रस्तुतवस्तूपपादनावसरसूचकं वचः प्रस्तावना, रत्नावल्याम् यथा,—

द्वीपादन्यस्मादपि मध्यादपि जलनिधेर्दिशोऽप्यन्तात् ।
आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः ॥७३६

उद्घात्यकादीनामङ्गानां प्रवृत्तिर्वीथी ॥

उद्घात्यकः, कथोद्घातः, प्रयोगातिशयः, प्रवर्त्तकः अवलगितमिति । तत्र उद्घात्यको यथा,—

को जयति जयति शर्वः केन जितं जितमनङ्गदहनेन ।

जयतीति । भुवनस्य जगतः कारणं हेतुः सृष्टेरित्यर्थः स्वयम्भूः ब्रह्मा जयति, पुरन्दर देवराजं नन्दयतीति तथाभूतः असुराणां विनाशेनेति भावः मुरारिः विष्णुः जयति । गिरिसुतया पार्वत्या निरुद्धः आक्रान्तः आलिङ्गित इति यावत् देहो यस्य तथाविधः दुरितभयं पापभयम् अपहरतीति तादृशः देवो हरश्च शम्भुश्च जयति सर्वोत्कर्षेण वर्त्तते । अत्र विशेषणवशात् वक्तव्यार्थस्य प्रशंसनमिति प्ररोचना ॥ ७३५ ॥

द्वीपादिति । अभिमुखीभूतः अनुकूलता गतो विधिः दैवं विधिर्विधाने दैवे चेत्यमरः । अन्यस्मात् अपरस्मात् खापेक्षव्यतिरिक्तादित्यर्थः द्वीपात् अपि जलनिधेः समुद्रस्य मध्यादपि दिशः अन्तात् शेषसीम्नः अपि अभिमतम् इष्टं वस्तु आनीय झटिति सहसा घटयति सङ्गमयति । अत्र समुद्रे यानभङ्गनिमग्नायाः सागरिकाया अभीष्टभूतायाः सहसाधिगमसूचनात् प्रस्तावना । प्रस्तावनालक्षणं दर्पणकारेण उक्तं यथा । नटी विदूषको वापि पारिपार्श्विक एव वा । सूत्रधारेण सहिताः संलापं यत्र कुर्वते । चित्रैर्वाक्यैः स्वकार्योत्थैर्नाम्ना प्रस्तावना हि सेति ॥ ७३६ ॥

त्रिपुरारिणा भगवता बालशशाङ्काङ्कितजटेन ॥ ७३७ ॥

कथोद्भातो यथा,—

साकं पङ्कजजन्मना सुरपतेरभ्यर्थनाया वशा-
दिक्ष्वाकोः शरदिन्दुबिम्बविमले वंशेऽवतीर्य्य स्वयम्।
निःशेषाक्षपदं त्रयीपदजुषां विद्वेषिणं राक्षसं
यः पौलस्त्यमहन् स पातु भवतो रामाभिधानो हरिः ॥ ७३८ ॥

प्रयोगातिशयो यथा,—

अत्याहितमवतु हरेः क्ष्मामुद्धरतो वराहवपुषो वः।
शेषफणारत्नदर्पणसहस्रसंक्रान्तबिम्बस्य ॥ ७३९ ॥

क इति। को जनः जयति सर्वोत्कर्षेण वर्त्तते ?। शर्वः शिवः जयतीति उत्तरकेन जनेन जितं सर्वोत्कर्षेण स्थितमित्यर्थः। अनङ्गदहनेन मन्मथदाहिना भगवता त्रिपुरारिणा त्रिपुरासुरसंहारिणा बालः नवः शशाङ्कश्चन्द्रः तेन अङ्किता चिह्निता राजितेति भावः जटा यस्य तथाभूतेन शर्वेण जितमित्युत्तरम् ॥ ७३७ ॥

साकमिति। यः पङ्कजजन्मना कमलयोनिना ब्रह्मणेत्यर्थः साकं सह सुरपतेः इन्द्रस्य अभ्यर्थना प्रार्थना तस्याः वशात् हेतोः इक्ष्वाकोः शरदिन्दुः शरच्चन्द्रः तस्य बिम्बमिव विमले निर्मले समुज्ज्वलमिति यावत् तस्मिन् वंशे कुले स्वयम् आत्मना अवतीर्य्य निःशेषं यथा तथा आत्त गृहीत पदम् आधिपत्यं जयतामिति भावः येन तथाविधं त्रयीपदजुषां वेदमार्गयायिनां विद्वेषिणं शत्रुं पुलस्त्यस्य अपत्य पुमान् पौलस्त्यः त पुलस्त्यपौत्रमित्यर्थः राक्षस रावणम् अहन् जघान, स रामाभिधानः रामनामा हरिः भवतः युष्मान् पातु रक्षतु ॥ ७३८ ॥

अत्याहितमिति। क्ष्मा पृथ्वीम् उद्धरतः रसातलात् उत्तोलयतः वराहवपुषः शूकरमूर्त्तेः शेषस्य अनन्तनागस्य फणासु सहस्रसंख्यकाष्विति भावः यानि रत्नानि मणयः तान्येव दर्पणानां सहस्राणि तेषु संक्रान्तं बिम्बं छाया यस्य तथाभूतस्य हरेः नारायणस्य अत्याहितम् अतिप्रयत्नः रसातलात् क्ष्मोद्धरणे इति भावः वः युष्मान् अवतु रक्षतु। उत्थापितमिति पाठान्तरम् ॥ ७३९ ॥

प्रवर्त्तको यथा,—

आसादितप्रकटनिर्मलचन्द्रहासः
प्राप्तः शरत्समय एष विशुद्धकीर्त्तिः ।
उत्साद्य गाढ़तमसं घनकालमुग्रं
रामो दशास्यमिव सम्भृतबन्धुजीवः ॥७४०॥

अवलगितं यथा,—अमुमेव शरत्समयमाश्रित्य गीयताम्, तथा ह्यस्याम्

सत्पक्षा मधुरगिरः प्रसाधिताशा मदोद्धतारम्भाः ।
निपतन्ति धार्त्तराष्ट्राः कालवशात् मेदिनीपृष्ठे ॥७४१॥

आसादितेति । आसादितः प्राप्तः प्रकटः उज्ज्वलः निर्मलः विशदः चन्द्रस्य हासः विकासः चन्द्रहासोऽसिश्च येन तथाभूतः विशुद्धा निर्मला कीर्त्तिः ख्यातिः यशश्च यस्य तथोक्तः तथा सम्भृतानि विकसितानि बन्धुजीवानि तदाख्यकुसुमानि यत्र तादृशः अन्यत्र सम्भृताः सम्पालिताः बन्धूनां जीवा जीवनानि येन तथोक्तः एष शरत्समयः रामो दशास्यं दशाननमिव गाढं तमः तिमिरं मोहश्च यत्र तम् उग्रं दारुणं घनकालं मेघसमयं वर्षाकालमित्यर्थः अन्यत्र अतिकृष्णकायम् उत्साद्य निरस्य व्यापाद्य च प्राप्तः उपस्थितः ॥ ७४० ॥

सत्पक्षा इति । सन्तौ शोभनौ पक्षौ येषाम् अन्यत्र सन्तः विद्यमानाः साधवश्च पक्षाः सहायाः येषां तथोक्ताः पक्षः पक्षसहायोऽस्त्रीत्यमरः । मधुरा मनोहारिण्यः गिरः वाचः येषां तथाभूताः मधुरभाषिण इत्यर्थः प्रसाधिताः रञ्जिताः आशा दिशः अन्यत्र प्रसाधिताः पूरिताः आशा अभिलाषः अर्थिनामिति भावः यैः तादृशाः मदेन उल्लासेन उद्धताः उत्कटाः आरम्भाः चेष्टितानि अन्यत्र मदेन गर्वेण उद्धता दारुणा आरम्भाः कर्माणि द्रौपद्याः सभायां केशाम्बराकर्षणादीनि येषां तादृशाः धार्त्तराष्ट्राः हंसविशेषाः धृतराष्ट्रतनयाश्च कालवशात् समयवशात् मेदिनीपृष्ठे महीतले रणभूमौ च निपतन्ति विचरन्ति व्यापादिताः पतन्ति च ॥७४१

स्वधर्मविप्रचलितानां तापसादीनाम् उपहासपरं वचः प्रहसनम्, यथा,—

श्रमणः श्रावकवध्वाः सुरतविधौ दशति नाधरं दत्तम् ।
मदिराक्षि ! मांसभक्षणमस्मत्समये निषिद्धमिति ॥

संक्षिप्तिका, अवपातः, वस्तूत्थापनं, सस्फोटः इति चत्वारि आरभट्यङ्गानि ॥७४२॥

तेषु माहेन्द्रजालनेपथ्यादिभिः वस्तुसंक्षेपः संक्षिप्तिका यथा,

रक्षसा मृगरूपेण वञ्चयित्वा स राघवौ ।
जहार सीतां पक्षीन्द्रप्रयासक्षणविघ्नितः ॥७४३॥

भयादिभिः विद्रवादिकर्मानुप्रवेशनिर्गमनमवपातो यथा,—

मृगरूपं परित्यज्य विधाय विकटं वपुः ।

स्वधर्मवदिति । स्वस्य धर्मः आमिषभक्षणवर्जनरूपः तं विदन्ति जानन्तीति तथाभूतानां प्रचलितानां चापल्यवताम् इन्द्रियपरतन्त्राणामिति भावः तापसादीनां तपस्विप्रभृतीनाम् ॥

श्रमण इति । श्रमणो बौद्धसन्न्यासी कश्चित् श्रावकस्य धर्मश्रवणशीलस्य सेवकभूतस्य शिष्यस्य वध्वाः सुरतविधौ रमणव्यापारे, हे मदिराक्षि ! मत्तखञ्जननयने । मदिरो मत्तखञ्जन इति कोषः यद्वा मदिरे उन्मादकारिणी अक्षिणी यस्यास्तत्सम्बुद्धौ । अस्माकं समये शास्त्रनियमे मांसभक्षणं निषिद्धम् इति उक्तेति शेषः दत्तं दशनार्थमुपनीतम् अधरं न दशति न दशनक्षत करोतीत्यर्थः । दंशने आमिषास्वादः स्यादिति भावः । दत्तमित्यत्र दन्तैरिति पाठान्तरं वस्तुसंक्षेपः सक्षेपेण वस्तुनः उक्तिरित्यर्थः ॥ ७४२ ॥

रक्षसेति । स रावणः मृगरूपेण स्वर्णमृगरूपधारिणा रक्षसा मारीचेन राघवौ रामलक्ष्मणौ वञ्चयित्वा प्रतार्य आश्रमात् निष्कास्येति यावत् पक्षीन्द्रस्य जटायुषः प्रयासेन प्रयत्नेन आक्रमणेनेत्यर्थः क्षणम् अल्पकाल विघ्नितः सञ्जातविघ्नः सन् सीतां जहार हृतवान् ॥ ७४३ ॥

नीयते रक्षसा तेन लक्ष्मणो युधि संशयम् ॥७४४॥

अविद्रवः सविद्रवो वा सर्वरसभावसमासो वस्तूत्थापनं यथा,

राहोश्चन्द्रकलामिवाननचरीं दैवात् समासाद्य मे
दस्योरस्य कृपाणपातविषयादाच्छिन्दतः प्रेयसीम् ।
आतङ्काद् विकलं द्रुतं करुणया विक्षोभितं विस्मयात्
क्रोधेन ज्वलितं मुदा विकसितं चेतः कथं वर्त्तताम् ? ॥७४५॥

नानास्त्रयुद्धनियुद्धादिभिः ससंरम्भसम्प्रहारः संस्फोटो यथा,

क्लृप्ता येन शिरोरुहेषु पशुना पाञ्चालराजात्मजा
येनास्याः परिधानमप्यपहृतं राज्ञां गुरूणां पुरः ।

मृगरूपमिति । तेन रक्षसा मारीचेन युधि युद्धे रामेणेति शेषः मृगरूपं परित्यज्य विहाय विकटं भीषणं वपुः शरीरं विधाय लक्ष्मणः संशयं कथमेतत् मृगरूपत्यागेन राक्षसरूपधारण कस्यचित् छलनेन वा मम आश्रमात् निष्कासनं दैव्याश्च सीतायाः का प्रवृत्तिरिति विविधवितर्कं प्राप्यते स्मेत्यध्याहार्य्यम् ॥७४४॥

अविद्रव इति । अविद्रवः उपद्रवरहितः, सविद्रवः सोपद्रवः, सर्वेषां रसानां भावानाञ्च समासः सम्मेलनम् ।

राहोरिति । राहोः आननचरीं मुखवर्त्तिनीं चन्द्रकलामिव प्रेयसीं प्रियतमां मालतीं दैवात् सहसा भाग्येन वा समासाद्य प्राप्य दृष्ट्वा वा अस्य दस्योः तस्करस्य कृपाणपातः खड्गपातः एव विषयः तस्मात् आच्छिन्दतः आकृष्य नयतः इत्यर्थः मे मम चेतः चित्तम् आतङ्कात् भयाद् विकलं विवशीकृतं करुणया कृपया द्रुतं द्रवीभावं प्राप्तं विस्मयात् विस्मयं प्राप्येत्यर्थः विक्षोभितं विलोडितं, क्रोधेन ज्वलितं दीपितं मुदा आनन्देन प्रेयसीरक्षणजनितयेति भावः विकसितम् उल्लसितं सत् कथं केन प्रकारेण वर्त्ततां ? स्थिरीभूय तिष्ठतु ? ॥ ७४५ ॥

नानेति । नानास्त्राणि विविधायुधानि तैः युद्धं तथा नियुद्धं बाहुयुद्धं तदेवादिभिः ससंरम्भं सावेगं सक्रोधं वा यथा तथा सम्प्रहारः अन्योन्यप्रतीघातः ॥

क्लृप्तेति । येन पशुना चतुष्पदत्वं गतेनेति यावत् पाञ्चालराजस्य आत्मजा

यस्योरःस्थलशोणितासवमहं पातुं प्रतिज्ञातवान्
सोऽयं मङ्गुजपञ्जरे निपतितः संरक्ष्यतां कौरवाः! ॥

नर्म, नर्मस्फिजः, नर्मस्फोटः, नर्मगर्भ इति चत्वारि कैशिक्यङ्गानि ॥७४६॥

तेषु स्थापितशृङ्गारं वचः विचेष्टितं वा सपरिहासं नर्म यथा,—

वयं तथा नाम यथात्थ किं वदा-
म्ययं त्वकस्माद् विकलः कथान्तरे।
कदम्बगोलाकृतिमाश्रितः कथं
विशुद्धमुग्धः कुलकन्यकाजनः? ॥७४७॥

प्रथमसम्भोगे नवावस्थानं सम्भोगाश्रयवाक्यादिकर्म नर्मस्फिजः यथा—

तनया द्रौपदीत्यर्थः शिरोरुहेषु केशेषु अवच्छेदे सप्तमी कृष्टा आकृष्य राजसभां नीतेत्यर्थः येन राज्ञां गुरुणा भीष्मद्रोणादीनाञ्च पुरोऽग्रतः अस्याः द्रौपद्याः परिधानं परिधेयं वसनमपि अपहृतं, यस्य उरस्थलस्य वक्षसः शोणितमेव आसवः मदिरा तं पातुम् अहं प्रतिज्ञातवान् कृतप्रतिज्ञः अस्मीत्यर्थः सोऽयं पशुः दुःशासनः मम भुजावेव पञ्जरः पश्वादिरोधनस्थानमित्यर्थः तस्मिन् निपतितः समुपस्थित इत्यर्थः, हे कौरवाः। कुरुप्रवीराः! संरक्ष्यतां परित्रायताम् ॥ ७४६ ॥

स्थापितेति। स्थापितः रचितः योजित इति यावत् शृङ्गारो यत्र तादृशम्।

वयमिति। वयं तथा तादृशा दुरभिसन्धिवर्जिता इति भावः नाम प्राकाश्ये, प्रकाशं ब्रूम इत्यर्थः, यथा आत्थ ब्रवीषि अस्य कुलकन्यकाजनविषयिणीं वार्त्तामिति भावः किं वदामि किं कथयामि अन्येति शेषः। अयन्तु विशुद्धः निर्दोषः मुग्धः सरलः कुलकन्यकाजनः कुलजा कन्येत्यर्थः कथान्तरे कथाप्रसङ्गावसरे अकस्मात् सहसा विकलः विवशः सन् कथं कदम्बगोलस्य कदम्बपुष्पस्य गोलः वर्त्तुलाकारः सर्वावयवः तस्य आकृतिम् आकारं सादृश्यमित्यर्थः आश्रितः प्राप्तः यथा कदम्बगोले एकदैव सर्वे केशराः समुत्पद्यन्ते तथा अस्य कन्याजनस्य सर्वाणि गात्राणि रोमाञ्चपूर्णानि जातानीति भावः ॥ ७४७ ॥

प्राप्तासौ वृषपर्वणः प्रियसुता सङ्केतखण्डे नवे
वृष्टिः सेयमनम्बुदाऽमृतमयी गात्राणि मे सिञ्चति ।
किं जानामि विनोदयिष्यति मनः सन्तप्तमेवाद्य मे
दुर्वात्येव निवर्त्तयिष्यति न भोस्तां देवयानीं प्रति ॥७४८॥

आविर्भूताभिलाषानुभावयोः अकाण्डसम्भोगभङ्गः नर्मस्फोटः यथा,—

इतः परानर्भकहार्य्यशस्त्रान् वैदर्भि ! पश्यानुमता मयाऽसि ।
एवंविधेनाहवचेष्टितेन त्वं प्रार्थ्यसे हस्तगता ममैभिः ॥७४९॥

कार्य्यहेतोः स्वरूपविज्ञानादिप्रच्छादनं नर्मगर्भः । यथा,—

अथाजिनाषाढधरः प्रगल्भवाक् ज्वलन्निव ब्रह्ममयेन तेजसा ।

प्रथमेति । प्रथमसम्भोगे नवम् अवस्थानं प्रवर्त्तन तत्र सम्भोगाश्रयवाक्यादिना सम्भोगविषयककथादिना नर्म परिहासवचनं नर्मस्फिजः ।

प्राप्तेति । असौ वृषपर्वणः दैत्यराजस्य प्रियसुता प्रिया दुहिता शर्मिष्ठेत्यर्थः नवे नूतने सङ्केतखण्डे सम्भोगनिकेतने इति यावत् प्राप्ता उपस्थिता । सा इयं शर्मिष्ठेति भावः अनम्बुदा अनभ्रा अमृतमयी सुधामयी वृष्टिः तद्रूपेति भावः मे मम गात्राणि अङ्गानि सिञ्चति आर्द्रीकरोतीत्यर्थः । किं जानामि, यदि देवयानी शुक्रदुहिता दुर्वात्येव कर्कशा वात्येव वायुराशिरिव ताम् अमृतमयीं वृष्टिरूपां शर्मिष्ठामिति भावः न निवर्त्तयिष्यति न निवारयिष्यति न सन्ताडयिष्यतीत्यर्थः भा. । तदा अद्य मे मम सन्तप्त मदनावेशेनेति भावः मनः चित्तं विनोदयिष्यति एव अवश्यं प्रीणयिष्यतीत्यर्थः ॥ ७४८ ॥

इत इति । हे वैदर्भि ! विदर्भनन्दिनि इन्दुमति ! मया अनुमता अनुज्ञातासि, इतः अस्मात् प्रदेशात् परान् शत्रून् अर्भकैः बालकैः हार्य्याणि हर्त्तुं शक्यानि शस्त्राणि येषां तथाविधान् प्रस्थापनास्त्रप्रयोगेण अचेतनपतितानिति भावः पश्य अवलोकय । एभिः शत्रुभिः राजभिः मम हस्तगता त्वम् एवंविधेन एवम्प्रकारेण आहवचेष्टितेन युद्धव्यापारेण प्रार्थ्यसे हर्त्तुम् अभिलष्यते इत्यर्थः ॥७४९

अथेति । अथ पार्वत्याः तपसः परमोत्कर्षदर्शनानन्तरमित्यर्थः अजिन

विवेश कश्चिज्जटिलस्तपोवनं शरीरबद्धः प्रथमाश्रमो यथा ॥

उत्थापकः, परिवर्त्तकः, संलापकः, सघात्यक इति चत्वारि सात्वत्यङ्गानि ॥७५०॥

तेषु परम्परीभूयार्थेषु उत्थापनं उत्थापकः यथा,—

प्रहर मम तु कायं प्राक्प्रहारप्रियोऽहं
अपि तु कृतविघाते किं विदध्याः परस्मात् ?।
झटिति विततबह्वङ्गारभास्वत्कुठार-
प्रविघटितकठोरस्कन्धबन्धः कबन्धः ॥७५१॥

प्रस्तुतार्थत्यागादन्यार्थभजनं परिवर्त्तकः यथा,—

मुनिमभिमुखतां निनीषवो याः
समुपययुः कमनीयतां गुणेन।

क्लृप्तमृगत्वक् आषाढः पालाशो दण्डः तयोः धरतीति धरः पचाद्यच्। प्रगल्भा धृष्टा वाक् यस्य तथोक्तः वाचाल इत्यर्थः ब्रह्ममयेन वेदानुशीलनजनितेनेति भावः तेजसा ज्योतिषा ब्रह्मवर्चसेनेत्यर्थः ज्वलन्निव दीप्यमान इव कश्चित् जटिल जटाधारी पुरुषः शरीरबद्धः मूर्त्तिमान् प्रथमाश्रमो यथा ब्रह्मचर्य्यमिव तपोवन पार्वत्या इति शेषः विवेश आजगाम ॥ ७५० ॥

प्रहरेति ॥ तु इति अवज्ञासूचकमव्ययम्। मम काय मच्छरीरं प्रहर मम शरीरे अस्त्रं प्रयुङ्क्ष्वेत्यर्थः प्रागिति शेषः। अहं प्रहारः पूर्वप्रहारः प्रतिवीर कर्त्तृक इति भावः प्रियो यस्य तथोक्तः नाहं प्रतिवीरे पूर्वं प्रहरामि अहमेव पूर्वं प्रहार प्राप्तुमिच्छामीति भावः। तु यत इत्यर्थः मयि कृतविघाते कृतप्रहारे प्राक् प्रहृतवतीत्यर्थः सति परस्मात् समनन्तरमेवेत्यर्थः झटिति विततैः विस्तृतैः बहुभिः प्रसृतैः अङ्गारैः अग्निशिखाभिरित्यर्थः भास्वान् यः कुठारः तेन प्रविघटितः प्रकर्षेण विच्छिन्नः कठोरः कठिनः स्कन्धबन्धः कण्ठदेशः यस्य तथाभूतः कबन्ध क्रियाशून्यम् अशिरः कलेवरं तद्भूत इत्यर्थः कबन्धोऽस्त्रीक्रियाशून्यमपमूर्द्धकलेवर मित्यमरः। त्वं किं विदध्याः ? किं कुर्य्याः ? न किमपि कर्त्तुं शक्ष्यामीति भावः विदध्यादिति पाठे तादृशः कबन्धः किं विदध्यादित्यन्वयः। राम प्रति परशुरामस्य उक्तिः ॥ ७५१ ॥

मदनमुपदधे स एव ताभ्यो
दुरधिगमा हि गतिः प्रयोजनानाम् ॥७५२॥

सदसि नानावाक्यैः मिथोऽधिक्षेपः सलापकः यथा,—

कथमपि न निषिद्धो दुःखिना भीरुणा वा
द्रुपदतनयपाणिस्तेन पित्रा ममाद्य ।
तव भुजबलदर्पाध्मायमानस्य वामः
शिरसि चरण एष न्यस्यते धारयैनम् ॥७५३॥

कार्य्यमन्त्रानुभावदैवादिभिः सङ्घातभेदः सङ्घात्यकः यथा,—

अपश्यद्भिरिवेशानं रणात् निववृते गणैः ।

सुनिमिति । याः सुराङ्गना इति भावः कमनीयतागुणेन सौन्दर्य्यप्रभावेण तापसम् अभिमुखतां वश्यता निनीषवः नेतुमिच्छवः सत्यः समुपययुः समुपागमन् स मुनिः ताभ्य एव सुराङ्गनाभ्यः मदनं कामम् उपदधे मनसि उत्तेजितवान् मुनेः कामवश्यता दूरे तिष्ठतु ता एव तद्दर्शनेन कामार्त्ता आसन्निति निष्कर्षः हि तथाहि प्रयोजनानां कार्य्याणां गतिः प्रसरः दुरधिगमा दुर्ज्ञेया किं कृते किं स्यादिति न केनापि ज्ञातुं शक्यते इति भावः । अत्र प्रस्तुतार्थस्य मुनितपोभङ्गरूपस्य असामर्थ्येन परित्यागेन स्वीयकामवश्यताभजनमिति परिवर्त्तकत्वम् ॥७५२॥

सदसीति । सदसि सभायां मिथः परस्परम् अधिक्षेपः आक्रोशः ।

कथमिति । तेन मम पित्रा द्रोणेनेति यावत् अद्य दुःखिना युधिष्ठिरवाक्यविश्वासात् महिनाशस्य निश्चयेनेति भावः भीरुणा भयशीलेन वा सता द्रुपदतनयस्य धृष्टद्युम्नस्य पाणिः खड्गप्रहाराय उद्यत इति भावः कथमपि कथञ्चिदपि केनापि अनिर्वचनीयेन कारणेनेति भावः न निषिद्धः न विवारितः न प्रतिहत इति भावः । भुजबलस्य बाहुवीर्य्यस्य दर्पेण अहङ्कारेण आध्मायमानस्य आपूर्य्यमाणस्य तव शिरसि मस्तके एषः वामश्चरणः न्यस्यते निधीयते एनं वामं चरणं धारय निवारयेति यावत् । कर्णं प्रति अश्वत्थाम्नोऽधिक्षेपः । कार्य्यति । सङ्घातभेदः दलभङ्गः ॥ ७५३ ॥

अपश्यद्भिरिति । गणैः प्रमथवर्गैः स्कन्दादिभिः ईशानं हरम् अपश्यद्भिरिव

मुह्यत्येव हि कृच्छ्रेषु सम्भमाधिगतं मनः॥

चतुर इत्यनेन शास्त्रीयलौकिकव्यवहारवेदिनो नायकस्य धर्मार्थकाममोक्षेषु वैचक्षण्यमुच्यते। उदात्त इत्यनेन आशयविभूत्योः आभिजात्ययौवनादीनां च उत्कर्षः प्रकाश्यते। चतुर्वर्गफलं प्रबन्धे को वा न बान्धवीयति इत्यनेन श्रोतॄणां रामादिवद् वर्त्तितव्यं, न रावणादिवदिति विधिनिषेधनिबन्धनस्य प्रबन्धस्य अभीष्टतमत्वमाख्यायते। मुखं प्रतिमुखमित्यादिना तु पञ्चाङ्गं प्रबन्धशरीरमभिधीयते। तदङ्गानि च उपक्षेपपरिकरादीनि चतुःषष्टिरपि मुखादिषु एव अन्तर्भवन्ति। यतः तद्वदेव पञ्चसन्ध्येकमपि वाक्यं प्रबन्धव्यपदेशमासादयति। तद्यथा,—कथमपि कृतप्रत्यासत्तौ प्रिये इति मुखं, स्खलितोत्तरे इति प्रतिमुखं, विरहकृशया कृत्वा व्याजं प्रजल्पितमश्रुतम् इति गर्भः, असहनसखीश्रोत्रप्राप्तिप्रसादससम्भ्रम-विगलितदृशा इति विमर्षः, शून्ये गेहे समुच्छ्वसितं इति निर्वहणम्। एतेन प्राचीनप्रबन्धार्थेऽपि एकवाक्योक्तेन प्रबन्धत्वमित्याख्यातं भवति॥७५४॥

तापसस्य अर्जुनस्य शस्त्राघातेन दिग्विदिग्ज्ञानशून्यैरिवेति भावः रणात् संग्रामात् निवर्त्तते निवृत्तं पलायितमित्यर्थः। हि यतः कृच्छ्रेषु सङ्कटेषु सम्भ्रमेण भयेन अधिगतं युक्तं भयार्त्तमित्यर्थः मनः चित्तं मुह्यत्येव मोहं गच्छत्येव कार्य्याकार्य्यविमूढतां प्राप्नोत्येवेत्यर्थः॥

चतुर इति। चतुरो नायक इत्यर्थः। उदात्त इति उदात्तः महान्। आशयविभूत्योः अभिप्रायसम्पदोः। आभिजात्येति। आभिजात्यं कौलीन्यमित्यर्थः। चतुर्वर्गेति। चतुर्णां वर्गाणां धर्मार्थकाममोक्षाणामित्यर्थः समाहारः चतुर्वर्गं तत् फलं प्रयोजनं यस्य तथोक्तं प्रबन्धं सन्दर्भं को जनः न बान्धवीयति न बान्धवमिच्छति बान्धवत्वेन न आद्रियते इति यावत् अपि तु सर्व एव बान्धवीयतीत्यर्थः। मुखमित्यादि। पञ्चाङ्गं पञ्चावयवम्। यत इति। तद्वदेव उपक्षेपपरिकरादिमदेव

तद्यथा,—

तुरगनिचयव्यग्रानूर्वीभिदः सगराध्वरे
कपिलमहसा रोषात् प्लुष्टानपि प्रपितामहान्।
अगणिततनूपातस्तन्वा तपांसि भगीरथः
भगवति! तव स्पृष्टानङ्गिश्चिराद्दुददौधरत्॥

तैरन्तर्भावेन परिपुष्टमिति भावः। पञ्चानां सन्धीनां समाहारः पञ्चसन्धि सुखादि-पञ्चकमित्यर्थः प्रबन्धव्यपदेशं प्रबन्धाभिधानम् आसादयति प्रापयति। तद्यथेति॥

कथमपि कृतप्रत्यासत्तौ प्रिये स्खलितोत्तरे
विरहकृशया कृत्वा व्याजं प्रजल्पितमश्रुतम्।
असहनसखी श्रोत्रप्राप्तिप्रसादसम्भ्रम-
विगलितदृशा शून्ये गेहे समुच्छ्वसितं तदा॥

कथमपि अतिकष्टेन अत्यायासेन सख्या कृतेनेति भावः कृता प्रत्यासत्तिः समुपस्थितिः यस्य तादृशे सखीप्रयत्नेन कथञ्चित् गृहमानीते इत्यर्थः प्रिये कान्ते स्खलितम् असम्बद्धमिति भावः उत्तरं कथमेतावन्तं कालं त्वया नायातमिति प्रश्नस्य प्रतिवचनं यस्य तथाभूते सति विरहेण कृशया शीर्णया कान्तया व्याजं छलं कृत्वा प्रजल्पितं कान्तस्य भाषितम् अश्रुतं नाकर्णितमित्यर्थः। तदा शून्ये प्रियरहिते इत्यर्थः गेहे गतयेति शेषः तया असहना कोपना मया एतावता प्रयत्नेन आनीतस्ते पतिस्त्वयापि विराग इति धियेति भावः या सखी तस्याः सकाशात् श्रोत्रप्राप्तः श्रुतिपथं गतः श्रुत इत्यर्थः यः प्रसादः कान्तस्य आत्मान प्रति अनुग्रह इति यावत् तेन ससम्भ्रमं सगौरव यथा तथा विगलितदृशा गलदश्रुनेत्रया सत्या समुच्छ्वसितं जीवितं तयेति कृत्वा निश्वसितमित्यर्थः॥७५४॥

तुरगेति। हे भगवति! देवि गङ्गे! भगीरथः अस्मत् पूर्वपुरुष इति भावः अगणितः तनूपातः शरीरविध्वंसो यस्मिन् तत् यथा तथा तपांसि तन्वा कृत्वेत्यर्थः सगरस्य अध्वरे अश्वमेधयज्ञे तुरगस्य अश्वमेधीयस्य अश्वस्य इन्द्रेण हृत्वा कपिलाश्रमे रक्षितस्येति भावः विचये अन्वेषणे व्यग्रान् व्यापृतान् उर्वीभिदः उर्वीं पृथ्वीं भित्त्वा पातालवर्त्तिनं कपिलाश्रमं प्रविष्टानिति भावः रोषात् तेषामवमाननाजनितादिति भावः कपिलस्य महसा तेजसा प्लुष्टान् दग्धान् पितुर्दिलीपस्य प्रपितामहान् सगरसुतान् षष्टिसहस्रसङ्ख्याकानिति भावः तव अङ्गिः सलिलः

अविस्तृतमसंक्षिप्तम् इत्यनेन विस्तारभीरूणां कथारस-विच्छेदशङ्किनाञ्च चित्तमावर्ज्यते। अव्यान्तरैः इत्यनेन वृत्तान्तरैः आश्वासकादिपरिसमाप्तिरिति परिश्रान्ताः श्रोतार आश्वास्यन्ते, स्रगादिसन्निवेशादिवत् सन्दर्भे च आश्वासादयो विभाव्यन्ते।

पुरोपवनेत्यादिना च देशकालपात्रसम्पदुपवर्णनात् आलम्बनोद्दीपनविभावाः कथ्यन्ते। उद्यानसलिलक्रीड़ाद्युपलक्षणेन कामिनीनां दिवाचेष्टाः, मधुपानं रतोत्सव इत्यनेन च रात्रिचेष्टा उच्यन्ते, विप्रलम्भा इत्यनेन चत्वारोऽपि प्रथमानुरागादयः परामृश्यन्ते। विवाहा इत्युपलक्षणेन प्रथमानुरागो, विवाहान्तो मानः, प्रेमान्तः प्रवासः, सङ्गमान्तः करुणः, प्रत्युज्जीवनान्तः प्रबन्धः कर्त्तव्यः इत्युपदिश्यते। मन्त्रदूतेत्यादिपुरुषकारायत्तसिद्धिसूचनेन आद्यूनादिनिरासात् नायकस्य सत्वोत्कर्षः प्रकाश्यते। नावर्णनं नगर्य्यादेर्दोषाय इत्यादिना तु पुरुषार्थासन्नोपकारित्वेन शैलर्त्तूद्यानचन्द्रोदयमधुपानरतोत्सवादीनां मन्त्रदूतप्रयोगादिनायकाभ्युदयादीनाञ्च नियमेन प्रयोगः, शेषाणान्तु प्रबन्धशरीरानुरोधेन इति प्रतिपाद्यते। गुणतः प्रागुपन्यस्य नायकं तेन विद्विषाम्। निरा-

---

स्पृष्टान् सिक्तान् चिरात् सुदीर्घकालादनन्तरमित्यर्थः उददीधरत् उद्धारयामास। तनूतापस्त्रिति पाठे आपततः तस्याः शरीरस्य तापः क्लेशः यस्मिन् तद्यथा तथेत्यर्थः ॥७५५॥

अविस्तृतमिति—आवर्ज्यते आयत्तीक्रियते। अव्यवृत्तमिति। वृत्तान्तरैः छन्दोभेदैः आश्वासकादिभिः प्रागुक्तलक्षणैरिति भावः परिसमाप्तिः सर्गशेषः। विप्रलम्भा इति परामृश्यन्ते प्रतिपाद्यन्ते। विवाहा इति उपलक्षणेन स्वप्रतिपादकत्वे सति स्वेतरप्रतिपादकत्वम् उपलक्षणं तेन तथा च विवाहा इत्यनेनादौ पाणिग्रहणप्रतिपत्तिः। ततः तदनन्तरभाविरत्यः प्रथमानुरागादयो व्यापाराद्या-

करणम् इत्यनेन गुणवता भाव्यं न गुणद्वेषिणेति ज्ञाप्यते। वंशवीर्य्यश्रुतादीनि इत्यादिना पुराभिजात्यौद्धत्यशौटीर्य्यवीर्य्यादय एव शत्रोः वर्णनीयाः न त्ववच्छेदहेतवोऽन्याय्याचरणाविनयादय इति प्रत्याय्यते। धिनोति न इति तु अयमेव पक्षः श्रेयानिति ग्रन्थकारेण स्वाभिप्रायः प्रकाश्यते ॥ ७५५ ॥

इति निगदितभङ्ग्यानङ्गसर्वस्वमेतद्
विविधमपि मनोभि र्भावयन्तोऽस्य भेदम्।
तदनुभवसमुत्थानन्दसम्मीलिताक्षाः
परिषदि परितोषं हन्त सन्तः प्रयान्तु ॥

यावन् मूर्ध्नि हिमांशुकन्दलभृति स्वर्वाहिनी धूर्जटेः
यावद् वक्षसि कौस्तुभस्तवकिते लक्ष्मीर्मुरद्वेषिणः।
यावच्चित्तभुवस्त्रिलोकविजयप्रौढं धनुः कौसुमं
भूयात् तावदियं कृतिः कृतधियां कर्णावतंसोत्पलम् ॥

इति महाराजाधिराज श्रीभोजदेवविरचिते सरस्वतीकण्ठाभरणालङ्कारे रसविवेचनो नाम पञ्चमः परिच्छेदः समाप्तोऽयं ग्रन्थः।

ऽपि प्रतिपाद्यन्ते इति भावः। सत्त्वेति आद्यूनतादिनिरासात् आद्युनः औदरिकः विजिगीषाविवर्ज्जितो वा तस्य भावः आद्यूनता तदादीना निरासात् परिहारात् आद्यूनः स्यादौदरिके विजिगीषाविवर्जिते इत्यमरः। सत्त्वोत्कर्षः महानुभावता, वंशेति। शौटीर्य्यं गर्वः। अवच्छेदेति अवच्छेदहेतवः परिमिततासाधनानि क्षुद्रत्वहेतव इति यावत् ॥

इति पण्डितकुलपतिना वि, ए, उपाधिधारिणा श्रीजीवानन्द-विद्यासागर भट्टाचार्य्येण विरचिता पञ्चमपरिच्छेद व्याख्या समाप्ता।